Sri Venkateswara University

॥ श्रीशंकरगुरुकुलपत्रिका ॥

The Journal

OF THE

Sri Sankaragurukulam

Srirangam


VOLUME II—1940-1941.

EDITOR : *Gurubhaktasikhamani, Sastraprasarabhushana,*
T. K. BALASUBRAHMANYA AIYAR, B. A.

LITERARY ADVISER : *Vidyasagara, Vidyavacaspati Bharatakalanidhi*
P. P. SUBRAHMANYA SASTRI B. A. (Oxon), M. A.,
Curator, Govt. Oriental Mss. Library, and Professor of Sanskrit, Presidency College, Madras.

SRI VENKATESWARA ORIENTAL INSTITUTE
LIBRARY
TIRUPATI.

PRINTED AT THE SRI VANI VILAS PRESS
AND PUBLISHED BY THE
SRI SANKARAGURUKULAM, SRIRANGAM.
1941.



॥ श्रीः ॥

या वर्णपदवाक्यार्थस्वरूपेण विवर्तते । अनादिनिधनाऽनन्ता सा मां पातु सरस्वती ॥
यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ । तस्यैतेकथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

दृष्ट्वा सर्वं परममसृतं स्वप्रकाशैकरूपं
बुद्ध्वाऽऽत्मानं विमलमचलं सच्चिदानन्दरूपम् ।
ब्रह्माधारं सकलजगतां साक्षिणं निर्विशेषं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥

॥ शारीरकमीमांसाशास्त्रम् ॥

ॐकाराख्यमनन्तमेकमभयं संसाररोगापहं
सत्यज्ञानसुखस्वरूपममृतं सर्वज्ञमूर्तिं प्रभुम् ।
विश्वातीतमनन्तवैभवयुतं तं द्वादशान्तस्थितं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १ ॥

यस्माद्ब्रह्महरीश्वरादिजगतां संभूतिरुक्ता श्रुतौ
यस्याज्ञापरिपालनैकनिरताः सर्वे च लोकेश्वराः ।
यत्पादाब्जमनन्तसौख्यजनकं नित्यं भजन्ते मुदा
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ २ ॥

यन्निःश्वाससमुद्भवाः स्युरखिला वेदाश्च साङ्गास्तथा
विद्या भारतसूत्रजालनिकराः सांख्याः पुराणानि च ।
विश्वोत्तीर्णमहाविभूतिसहितं सर्वात्मविद्याप्रदं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ३ ॥

यस्यानन्तचिदात्मशक्तिजनिता मुक्त्यादिशक्त्यादिका
याभिर्विश्वमिदं ततं हि सकलं ताभिः समेतेश्वरैः ।
शक्तीनां तमधिष्ठितं च जगतां संप्रेरकं त्वां प्रभो
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ४ ॥

यत्पादाब्जमनेकजन्मजनितानन्ताघसंहारकं
स्मर्तॄणां सकृदेव सत्यवरदं ब्रह्मेन्द्रविष्ण्वादिभिः ।
नित्यं पूजितमद्वितीयमभवद्वेदान्तमानैः स्तुतं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ५ ॥

यन्नामस्मरणेन मूढमतयो ये ते महान्तोऽभव-
न्ब्रह्मेन्द्रादिसुरेश्वरैरपि सदा संपूज्यपादाम्बुजाः ।
शंभोर्दिव्यपदे हि सत्यभिधाः साध्यैः समेताश्च ये
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६ ॥

यन्नामस्मरणं प्रशान्तमतयः कुर्वन्ति नित्यं जना
भक्त्या ये परमेशदिव्यकृपया युक्ताः कृतार्थाश्च ते ।
सायुज्यं पदमापुरस्य परमं शुद्धं प्रबोधात्प्रभो
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ७ ॥

सर्वोत्कृष्टमनुत्तमात्मवरदं सत्कीर्तियुक्तं सदा
यस्यैवामलदिव्यनाम मनुजाः संकीर्तयन्त्याशु ते ।
मुक्ताः पातककोटिजालनिगलैः शृण्वन्ति ये वा सकृ-
न्मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ८ ॥

तेषां किंकरतामुपैति कमला वाणी च जिह्वास्थिता
नित्यं भाति यदात्मनाम परमं संकीर्तयन्त्यादरात् ।
शंभोर्यान्ति परं पदं च सहसा यद्वै पदानां परं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ९ ॥

शंभो शंकर देवदेव भगवञ्श्रीरुद्र सर्वात्मक
ब्रह्मानन्त शशाङ्कशेखर विभो शूलिन्कपर्दिन्निति ।

ये नित्यं परिकीर्तयन्ति मनुजास्ते सत्यमीशात्मका
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १० ॥

ईशेशान हरोग्र शर्व जगतां साक्ष्यात्मदेवेति ये
भक्त्या यं परिकीर्तयन्ति मनुजास्तेषां पशूनां पतिः ।
स्वात्मानं प्रददाति यस्तु कृपया श्रीनीलकण्ठो मुदा
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ११ ॥

सर्वज्ञेश्वर वामदेव भव भो भूतेश कालान्तक
सर्वात्मंस्त्रिपुरान्तकान्धकरिपो देवेति संकीर्तनात् ।
सद्यः संसृतिपाशजालरहिता यद्यान्ति दिव्यं पदं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १२ ॥

दक्षस्याध्वरनाशन त्रिनयन स्थाणो गिरीशेति ये
नित्यं भक्तिपुरःसरं भवहरं संकीर्तयन्त्याशु ते ।
सत्यं यान्ति परावरेशकृपया सर्वात्मकामान्पदं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १३ ॥

यः सृष्ट्वा परिपालको जगदिदं तत्पूरुषो धूर्जटि-
र्घोरो घोरतरः समः सुखतनुः सर्वाघसंहारकृत् ।
कामध्वंसकृदात्मभोगवरदस्तं शान्तमूर्तिं सदा
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १४ ॥

सर्वाधार किरात भीष्मक विभो यस्त्वं पिनाकीति च
सर्वाधिष्ठितमाप्तकाममसृतं यं कालकूटापहम् ।
संपूज्यापुरनन्तकाममभयं विश्वैकयोनेः परं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १५ ॥

यं विश्वात्मकमीश्वरेश्वरमजं सर्वार्थसंसाधकं
सर्वात्मानमनन्तवेषसहितं देवादिदेवं जनाः ।
स्मृत्वाऽनेकमहाप्रभावसहिताः शंभोः पदे भान्ति तं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १६ ॥

ये पूजानिरताः प्रसन्नमतयः सौभाग्यकामैर्वृता-
स्ते वै धन्यतमाः स्युरत्र परमानन्दैकमूर्तेः प्रभोः ।
यस्यानन्दमवाप्य दुःखरहिता नित्यं वसन्त्यैश्वरे
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १७ ॥

श्रुत्वा यद्वरनाम दिव्यममृतं लोकेऽधमानां वरो
यानैः कोटिशशिप्रभानुसदृशैर्ब्रह्मादिलोकान्परम् ।
शुद्धं यत्पदमेति तत्र सततं संराजते तं प्रभुं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १८ ॥

जाड्याद्वाऽथ भयेन वाऽर्थविषयाल्लोभाद्यमीशेश्वरं
स्मृत्वा याति परां गतिं पशुपतेर्यस्यैव कामान्वितः ।
नित्यं तत्र महीयसे सुरवरैः संपूज्यमानो जनो
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १९ ॥

यन्नामापदि येन केन वपुषा संकीर्तितं वा श्रुतं
सोऽयं यत्पदमेति वेदविहितैः सर्वैर्मखैर्याजिनः ।
नैतद्यान्ति हि स्वर्गभोगमतयस्तं त्वां सदाऽहं प्रभो
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ २० ॥

केचिद्यद्वरनामरत्नमतुलं संकीर्त्य युद्धेऽद्भुते
जित्वा शत्रुवरान्प्रसन्नमतयः सौभाग्यकामैर्युताः ।

लोके पूज्यतमाः प्रभान्ति सकलैर्वैचित्र्यमोदादिभिः
मीनाक्ष्या शिवया समेतसुमया श्रीसुन्दरेशं भजे ॥ २१ ॥

केचिद्यद्वरदिव्यनाम मनसा स्मृत्वाऽऽत्त भक्त्या प्रभो-
र्विज्ञानाद्भवपाशबन्धरहिता जीवन्मुक्ताः पराः ।
स्वात्मानन्दमनन्तमेकमभयं ब्रह्म प्रकाशं गता
मीनाक्ष्या शिवया समेतसुमया श्रीसुन्दरेशं भजे ॥ २२ ॥

यन्नामश्रवणात्पिशाचवपुषः सद्यो निवृत्ताः प्रभो
शंभो शंकर चन्द्रचूड भगवन्सर्वेश्वरेशेति च ।
यानैर्यान्ति हि चन्द्रकोटिसदृशैर्यस्यैव सत्य पदं
मीनाक्ष्या शिवया समेतसुमया श्रीसुन्दरेशं भजे ॥ २३ ॥

संसारोद्भवदुःखशोकमरणानन्तैकरोगापहं
यन्नामश्रवणं वदन्ति मुनयो यन्नामसंकीर्तनम् ।
शंभोर्दिव्यविभूतिदानचतुरं वेदैः प्रगीतं वरैः
मीनाक्ष्या शिवया समेतसुमया श्रीसुन्दरेशं भजे ॥ २४ ॥

प्रातः प्रातरनन्तदिव्यसुखदं यन्नाम संकीर्तय-
न्सद्यः कोटिभवार्जिताघरहितो यस्याद्भुतं वै पदम् ।
यात्येवेति वदन्ति सत्यमतयः संसाररोगापहं
मीनाक्ष्या शिवया समेतसुमया श्रीसुन्दरेशं भजे ॥ २५ ॥

सत्यं नास्ति कलेर्युगे तु मनुजो यन्नामसंकीर्तना-
दन्यो नैति परं तदीश भगवंस्त्वन्नाम संकीर्तये ।
इत्येवं प्रवदन्ति शुद्धमतयो भक्तिर्हि यस्यैव तं
मीनाक्ष्या शिवया समेतसुमया श्रीसुन्दरेशं भजे ॥ २६ ॥

यन्नामामृतपानसक्तहृदया विष्ण्वादिदेवैरपि
संपूज्याः परमेश दिव्यपदवीं तत्सार्ष्टिमुक्तिं गताः ।
सारूप्यादिपदं तु केचिदिह ते यस्यैव शंभोः पदं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ २७ ॥

यो वा मानुषजन्म दुर्लभमिदं संप्राप्य भक्त्या प्रभुं
शंभुं विष्णुविधीन्द्रदेवनिकरैः संपूज्यपादाम्बुजम् ।
नैवाराधितवान्खलः पशुरयं दुःखी सदा स्यान्नरो
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ २८ ॥

सौभाग्यं वरदिव्यकान्तिमतुलं रूपं च सत्यं पदं
सत्कीर्त्तिं वरदिव्यदानविभवं शौर्यं च संप्राप्यते ।
यत्पूजानिरतैः प्रशान्तमतिभिस्तत्त्वं मृडानीपते
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ २९ ॥

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

जिज्ञास्यं परमं वदन्ति विबुधा ब्रह्माद्वितीयात्मकं
शिष्यान्साधनजालशुद्धसमतीन्भक्त्या समेतान्प्रति ।
प्रत्यग्बोधसुखात्मकं तममृतं संशान्तविश्वात्मकं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ३० ॥

जन्माद्यस्य यतः ॥ २ ॥

जन्माद्यस्य यतो हि सर्वजगतोऽनन्तात्मशक्तेः प्रभोः
स्यादेतत्परमार्थतत्त्वमनिशं प्रत्यक्स्वरूपं बुधैः ।
विज्ञेयं त्विति सत्यकाममतयो यं प्राहुरेकं प्रभुं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ३१ ॥

शास्त्रयोनित्वात् ॥ ३ ॥

यद्रूपं वरवेदमाननिकरैः सर्वैरनन्यार्थकै-
स्तात्पर्येण सुसंप्रगीतममृतं सर्वान्तरस्थं प्रभुम् ।
इत्याहुः परमेश्वरस्य कृपया युक्तांस्तु शिष्यान्प्रति
मीनाक्ष्या शिवया समेतसुमया श्रीसुन्दरेशं भजे ॥ ३२ ॥

तत्तु समन्वयात् ॥ ४ ॥

यस्मिन्नेव समन्विताः श्रुतिवराः शास्त्राणि सर्वाणि च
सत्यानन्तसुखैकबोधजलधौ प्रत्यक्स्वरूपे शिवे ।
नान्यत्किञ्चिदिहास्ति वस्तु परमाद्यस्मादसङ्गाद्वयात्
मीनाक्ष्या शिवया समेतसुमया श्रीसुन्दरेशं भजे ॥ ३३ ॥

ईक्षतेर्नाशब्दम् ॥ ५ ॥

सर्वज्ञत्वगुणो हि सर्वजगतां सृष्ट्यादिकृच्चेक्षिता
नैवैतद्गुणसाम्यवस्तु विमतैर्यत्तत्प्रधानं स्मृतम् ।
लोष्टाद्यैः सदृशं जडं हि सततं तच्छास्त्रगम्यं भवेत्
मीनाक्ष्या शिवया समेतसुमया श्रीसुन्दरेशं भजे ॥ ३४ ॥

गौणश्चेन्नात्मशब्दात् ॥ ६ ॥

सच्छब्दं न हि तत्प्रधानममृतं ग्राह्यं जगत्कारणं
स्यात्तत्रात्मपदप्रयोग इह वै श्रुत्या सुसंगीयते ।
तस्मात्सत्पदवाच्य ईश इति यं विज्ञानमूर्तिं जगुः
मीनाक्ष्या शिवया समेतसुमया श्रीसुन्दरेशं भजे ॥ ३५ ॥

तन्निष्ठस्य मोक्षोपदेशात् ॥ ७ ॥

पुंसस्तत्पुरुषार्थदाननिरते स्यादात्मशब्दो गुणा-
नैतत्साधु सदेकवस्तुविषये निष्ठां गतस्यात्मनः ।
मुक्तेः संपरिकीर्तनादिति बुधा यं प्राहुरात्मेश्वरं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ३६ ॥

हेयत्वावचनाच्च ॥ ८ ॥

गौणात्मत्वमिहोपदिष्टमभवत्तस्यात्मरूपं परं
संकीर्त्याथ जडात्मनस्तु नितरां हेयत्वमेवोच्यताम् ।
तस्मात्स्यात्र निवृत्तिमाप विमला सत्यार्थवादिश्रुतिः
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ३७ ॥

स्वाप्ययात् ॥ ९ ॥

सुप्त्यादौ विलयो हि यत्र जगतां तत्रैव जीवात्मनां
नान्यत्तल्लयकारणं भवति यत्सांख्यैः प्रगीतं जडम् ।
तत्कार्यत्वमिहात्मनां न हि परानन्तात्मरूपं गता
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ३८ ॥

गतिसामान्यात् ॥ १० ॥

वेदान्तेष्वखिलेषु सर्वजगतां सृष्ट्यादिहेतौ शिवे
निष्ठा चावगतिः सदैकविषया नैवान्यशास्त्रेष्विव ।
संजाता गतिरीश्वरस्य विषया यस्मात्सदेकं शिवं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ३९ ॥

J. S. S. II. viii. 2.

श्रुतत्वाच्च ॥ ११ ॥

सर्वज्ञैः परमेश्वरो हि जगतां सृष्ट्यादिकृच्छ्रूयते
नान्यत्किंचिदिहात्मशब्दविदितात्सर्वात्मकेशात्परम् ।
तुल्यं वेद्मि हि दिव्यमन्त्रनिकरैर्यं प्राहुरेकं पदं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ४० ॥

आनन्दमयोऽभ्यासात् ॥ १२ ॥

यस्त्वानन्दमयस्य सर्वजगतामाधारभूतो विभुः
सोऽयं नः परमेश्वरो हि भगवानानन्दशब्दोऽसकृत् ।
तस्मिन्नेव सदाशिवेऽत्र परमे श्रुत्याऽनुसंगीयते
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ४१ ॥

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १३ ॥

नैवानन्दमयस्य शेषविषयो ब्रह्मेति शुद्धे स्मृतं
स्वस्मात्तन्व्यतयैव सर्वजगतामाधारमेतत्परम् ।
यत्तत्पुच्छपदं तदीशविषयं सर्वज्ञमव्याहतं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ४२ ॥

तद्धेतुव्यपदेशाच्च ॥ १४ ॥

अस्यानन्दमयस्य कार्यवपुषो यत्कारणत्वेन वै
ब्रह्मैतत्परिगीयते परतरं तन्मुख्यवृत्त्या श्रुतिः ।
पुच्छं संलयकारणं च जगतामाधारहीनं शिवं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ४३ ॥

मान्त्रवर्णिकमेव च गीयते ॥ १५ ॥

सत्यानन्तमखण्डबोधममलं यद्ब्रह्म मन्त्रोदितं
यस्माद्विश्वमिदं प्रजातमखिलं मन्त्रान्तरस्थं परम् ।
तत्पुच्छं त्विति विश्वजालविलयस्थानं हि संगीयते
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ४४ ॥

नेतरोऽनुपपत्तेः ॥ १६ ॥

नैवानन्दमयः परापरतनुर्भोक्ता हि जीवस्ततो
विश्वोत्पत्तिविपत्तिरस्य सहसा नैवात्र संभाव्यते ।
सुप्तौ नित्यमयं प्रशान्तविषयं यं प्राप्य सौख्यं गतो
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ४५ ॥

भेदव्यपदेशाच्च ॥ १७ ॥

लब्ध्वानन्दरसं हि देव वरदं नित्यं सुखी भासते
तं त्वानन्दमयं प्रभेदविषयं वाक्यं ब्रुवच्छ्रूयते ।
संप्राप्यः परमेश्वरो हि जगतामानन्ददस्तं शिवं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ४६ ॥

कामाच्च नानुमानापेक्षा ॥ १८ ॥

सोऽयं कामयितेति विश्वविषया सत्कामनाऽत्र श्रुता
यद्ब्रह्म प्रकृतं तदेव जगतां सृष्ट्यादिकृच्छ्रूयते ।
नैतत्सांख्यमतप्रसिद्धमनृतं युक्तं प्रधानं त्विह
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ४७ ॥

अस्मिन्नस्य च तद्योगं शास्ति ॥ १९ ॥

अस्मिन्नात्मनि सत्यबोधपरमानन्दैकरूपे शिवे
विज्ञाने परिनिष्ठितस्य विदुषस्तद्रूपमीशात्मताम् ।
शास्त्येषा श्रुतिरन्यमीश भवतो नास्त्येव सत्वं त्विति
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ४८ ॥

इत्येषां शिव पञ्चकोशविषयातीतं जगत्साक्षिणं
ब्रह्मानन्तचिदेकसौख्यममृतं भक्त्या समेतान्प्रति ।
प्रत्यग्रूपतयैव वक्ति कृपया सायुज्यमुक्त्यै श्रुतिः
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ४९ ॥

अन्तस्तद्धर्मोपदेशात् ॥ २० ॥

आदित्येऽक्षिणि चान्तरो हि पुरुषो यः श्रूयतेऽसौ शिव
उक्तामाखिलपापपाशरहितः सर्वात्मकामेश्वरः ।
विश्वात्मा जगदेकयोनिरमृतो नान्यः परस्माच्छिवं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ५० ॥

भेदव्यपदेशाच्चान्यः ॥ २१ ॥

अन्तर्यामी महेशो रविशशिसुरराड्जीवराशेर्हृदिस्थ-
स्तेषां संनिधिमात्रतो हि भगवान्संप्रेरयन्राजते ।
इत्याहेश्वरजीवयोस्तु परमाभेदं सदोपासके
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ५१ ॥

एवं चक्षुषि सूर्य एकमुमया हृत्पङ्कजस्थं भज-
न्सर्वैश्वर्यमुपैति यस्य कृपया यत्सार्ष्टिमुक्तिं गतः ।
मुक्तः संप्रति पापशोकनिगलादित्याह यं वै श्रुतिः
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ५२ ॥

आकाशस्तल्लिङ्गात् ॥ २२ ॥

आकाशोऽत्र परापरेश इति वै संगीयतेऽस्मात्प्रभो-
भूतानां प्रभवोऽप्ययश्च जगतां यल्लिङ्गमर्थं स्मृतम् ।
ज्यायस्त्वं च परायणत्वमपि तत्स्वाभाविकं ते विदुः
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ५३ ॥

तस्मादत्र न भूतगोचरमयं त्वाकाशशब्दो बुधाः
स्वात्मानं परमेश्वरं तमनिशं ध्यायन्ति शंभोः पदम् ।
सर्वोत्कृष्टतमस्य यान्ति भजनाद्यस्येति चोक्तं श्रुतौ
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ५४ ॥

अत एव प्राणः ॥ २३ ॥

प्राणोऽयं त्विति शब्दवाच्य अखिलेशानो हि यस्मात्प्रभो-
भूतानां प्रभवाप्ययौ च भवतो लिङ्गं तदैशं स्मृतम् ।
नान्यस्तं परकर्मयुक्तभजनं कुर्वन्फलं तद्व्रजेत्
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ५५ ॥

ज्योतिश्चरणाभिधानात् ॥ २४ ॥

अत्र ज्योतिरनन्तवैभवयुतः सर्वान्तरस्थो हर-
स्तत्पादं जगदेतदात्मनि परे पादैस्त्रिभिर्भासते ।

विश्वान्तर्बहिरेष भाति परमे लोके च सर्वात्मको
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ५६ ॥

छन्दोभिधानान्नेति चेन्न तथा चेतोर्पण-
निगदात्तथा हि दर्शनम् ॥ २५ ॥

गायत्र्याः प्रतिपादनान्न हि परं ब्रह्मात्र संकीर्तितं
तन्नानन्तसदेकरूप इह तद्द्वारेण सर्वात्मकः ।
सेवार्थं परिकीर्त्यते हि भगवान्पादोऽस्यमन्त्रेण तं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ५७ ॥

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २६ ॥

भूतं भूमिशरीरमत्र हृदयं वेदोऽस्य पादाब्जगौ
तस्माद्ब्रह्मसमाश्रये हि भवतीशानोऽत्र सर्वात्मकः ।
पादोऽस्येति ततः परेशविषयो मन्त्रस्तमेकं शिवं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ५८ ॥

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ २७ ॥

भेदः स्यादुपदेशवाक्यविषये यस्मात्ततोऽसौ शिवः
सत्यं न प्रकृतः परेश इति चेन्नैवोभयस्मिन्नपि ।
सर्वात्मन्यविरोध एव विमलाः संप्राहुरित्येव तं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ५९ ॥

यत्पूर्वं परिकीर्तितं हि परमं ब्रह्मात्र संज्ञायते
तज्ज्योतिः पर ईश एव जगताभूद्ध्यायमानो बुधः ।
सर्वोत्कृष्टपदं प्रयाति कृपया यस्यैव दिव्यं शिवं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६० ॥

प्राणस्तथानुगमात् ॥ २८ ॥

अत्र प्राणपदेन सत्यसुखभूः प्रज्ञात्मकोऽयं स्मृतः
शंभुस्तस्य हितैकवर्यविषयः षड्भावधर्मातिगः ।
कर्माण्यस्य लयं प्रयान्ति विदुषो यद्बोधमात्रेण तं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६१ ॥

इत्येवंपरमेकवाक्यजनितं विज्ञानमेवात्मनः
शंभोस्तत्प्रविजायते हि सहसा तस्मान्न वायुर्जडः ।
अत्र प्राणपदोदितास्त्विति परं यं वै महान्तं विदुः
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६२ ॥

न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् ॥ २९ ॥

वक्ता हीन्द्रः स्वकीयं वपुरिह विमलं सेव्यरूपं विवक्ति
त्वं मां जानीहि नित्यं त्विति न हि भगवान्सत्यबोधैकरूपः ।
वक्ता नान्योऽस्ति देहस्त्विति विदुरमृतं यं महेशं हि केचि-
न्मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६३ ॥

शंभोः सर्वात्मनोऽस्मिन्बहुतरविमलाः संप्रगीता गुणाः स्यु-
स्सेवाधारत्वपूर्वास्तत इव भगवानीश्वरेशः प्रगीतः ।
नास्मादर्वाक्प्रजातः सुरपतिरिति यं प्राहुरात्मैकनिष्ठा
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६४ ॥

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ ३० ॥

इन्द्रः स्वात्मानमीशं सुखतनुममृतं सर्वभावाद्यतीतं
शुद्धं बुद्धं प्रशान्तं शिवमहमिति तं शास्त्रदृष्ट्योपदेशम् ।

कृत्वा शम्भोः प्रबोधादयमिह विलयं स्यादितीशं यमाहु-
र्मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६५ ॥

यद्वैतद्वामदेवः परशिवमहमित्यात्मरूपं विदित्वा
सर्वात्मत्वं स्वकीयं परमिति भगवान् प्राह चैवं सुरेन्द्रः ।
तस्मात्सर्वात्मकोऽयं पशुपतिरिह वै गीयते यो महान् तं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६६ ॥

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रित-
त्वादिह तद्योगात् ॥ ३१ ॥

वायोर्जीवस्य लिङ्गं श्रुतमिह बहुशो नैव सर्वेशलिङ्गं
तस्मात्प्राणात्मनोर्यत्फलमपि विमलं संप्रबोधात्प्रयाति ।
प्राणः प्रज्ञात्मकोऽयं त्विति विदुरपरे प्राहुरत्रोत्तरं यं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६७ ॥

नैतद्युक्तं द्विधैतत्फलमपि भजनं संप्रसज्येत यस्मा-
देकं वाक्यं सदैतत्परशिवविषयं प्राह चैकं महान्तम् ।
लिङ्गैः षड्भिः प्रशस्तैः स्मृतिपरविषयैः प्राण ईशस्तथोक्तो
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६८ ॥

यस्मिन्विश्वं समस्तं जडमिदमजडं भाति सत्येऽद्वितीये
नित्यं यद्बोधमात्राह्वयमिह विदुषः कर्मवृन्दं प्रयाति ।
प्राणाख्यं सत्यबोधं सममिममृतं सर्वलोकेश्वरेशं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६९ ॥

इति श्री शारीरकमीमांसाशास्त्रे प्रथमाध्यायस्य
प्रथमः पादः ॥

अभिज्ञानशाकुन्तलानुभवः ॥

मीमांसारत्नं, एम्. ए., बि. एल्., बिरुदभाजा श्री ए. वि. गोपालाचार्येण विरचितः ॥



'नान्दी नन्दीश्वरप्रिया' इति वसन्तराजीये लक्षणश्लोके। कविश्चायमीश्वरभक्तः। यद्यपि, 'एकैव मूर्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम्' इति मूर्तित्रयैक्यमेव तन्मतम्, तस्येष्टदेवता उमासहितेश्वरमूर्तिरिति, सर्वसंप्रतिपन्नम्। 'कालिदासः' इति कविनाम च देव्यामसाधारणभक्तिपिशुनम्। 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुत्या यच्छब्दोपनिबद्धवाक्यत्रयेण यथा ब्रह्म लक्षितं, तथैव नाटकत्रयनान्दीश्लोकेषु यच्छब्दघटितवाक्यैः ईश्वरलक्षणं उपनिबबन्धे ॥

'वेदान्तेषु यमाहुरेकपुरुषम्' इति विक्रमोर्वशीयनान्दीश्लोके, स्वेष्टदेवताभूतस्थाणौ सर्वेषां वेदान्तानां समन्वयः प्रतिजज्ञे। यथा, श्रीशांकरसूत्रभाष्यव्याख्यायां रत्नप्रभायाम् 'रामनाम्नि परे पुंसि वेदान्तानां समन्वयः' कथितो रामभक्तेन ॥

भगवच्चक्षुर्भूतौ चन्द्रसूर्यौ एकीकृत्य, एकेन वाक्येन निर्दिष्टौ। तथा एकीकृत्यनिर्देशेऽस्त्यौचित्यम्। अपरा मूर्तयः पृथक् निर्दिष्टाः। यद्यपि अदृश्यत्वादिगुणकः ईश्वरः अप्रत्यक्षः अव्यक्तः, तस्य तनुभूता एता मूर्तयः सर्वलोकप्रत्यक्षाः अन्तरवस्थितान्तरात्मभूततद्व्यञ्जिन्यः। आकाशस्यापि प्रत्यक्षत्वमङ्गीक्रियते कौमारिलतन्त्रेण, वेदान्तिभिश्च कैश्चित्। आकाशस्य प्रत्यक्षत्वमभिमतमिवास्य कवेः। 'प्रत्यक्षाभिस्ताभिः' इति वचनभङ्गी आपाततः अनुचितेव भायात्; 'तदिति परोक्षे जानीयात्'। अत्र ताभिरिति शास्त्रतः प्रसिद्धिः अभिप्रेयत इव कविना। यद्यपि, एतास्तनवः प्रत्यक्षाः, एतासां ईश्वरतनुत्वम्, 'यस्य पृथिवी शरीरं, यस्य आपः शरीरं' इत्यादिश्रुतिभिः,

'भूमिरापोऽनलो वायुरात्मा व्योम रविः शशी ।
इत्यष्टौ सर्वलोकानां प्रत्यक्षा हरमूर्तयः ॥'

इति वायवीयवचनादिभिश्च अपूर्वतया आवेद्यते, नैतल्लोकतः प्राप्तम् । शास्त्रतः प्रसिद्धिः परोक्षप्रसिद्धिः प्रायेण । इमास्तनवः, भगवन्तं प्रपन्नाः सर्वात्मनाऽऽश्रिताः, 'तन्मूलाः तदायतनाः तत्प्रतिष्ठाः' । बाह्यतन्वष्टकं वर्णयन्कविः, ईशाभिन्नां अन्तरङ्गतमां ईशार्धभूतां उमामूर्तिं, अत्र न निरदिक्षत । तदनिर्देशश्च न निरभिसन्धिः स्यात् । 'दाम्पत्यार्थमुमां सतीम्' इति शुकवचनेन निष्प्रत्यूहाविच्छिन्नदाम्पत्यलाभः सिध्येदुमादेव्यनुग्रहतः । 'पूर्वेद्युरास्ति महती कुलदेवियात्रा यस्यां बहिर्नववधूर्गिरिजामुपेयात्' 'देवी वा विमुखा गौरी' इत्यादिरुक्मिणीवचनैश्चेदं स्फुटीचक्रे । एतन्नाटकान्ते 'ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः' इति भरतवाक्ये, शक्तिभूतदेवीसमन्वितत्वम्, ईश्वरार्धभूतदेवीनीलतनुश्च 'नीललोहितः' 'परिगतशक्तिः' इति स्पष्टं निरदिक्षताम् । एतन्नाटकवस्तुभूतदाम्पत्यवर्णने परिणयानुपदमेव दीर्घदीर्घोऽतिक्रूरः सुदुःसहो विच्छेदः प्रतिपिपादयिषितः । यदि ग्रन्थारम्भ एव, उमाऽपि ईशेन सह अस्तोष्यत, कालिदासग्रथितनाटकवस्तुनि, कविप्रदिदर्शयिषितदाम्पत्यविच्छेदो नैवाभाविष्यत् । भविष्यद्दाम्पत्यविच्छेदसंभवाय उमामूर्तिः प्रथमश्लोकेऽनिर्दिष्टैव कविना । उमाया अनिर्देशः, ईश्वरस्याप्यप्रीत्यै भवेत् । दुर्वासाः ईश्वरांश इति प्रसिद्धम् । अत्र दाम्पत्यविच्छेदस्तत्कोपेनैवाभूत् । तत्कोपश्च तदंशभूतेश्वराप्रीतिमूलः स्यात् । सप्तमाङ्कान्ते संयुक्तौ दम्पती, तदनन्तरं न कदाऽपि विप्रयोगदुःखं अन्वभूताम् । स्तोत्रावर्जितेश्वरदम्पत्यनुग्रहभाजोः तयोः दम्पत्योः न विश्लेषसंभावनावकाशः । अगायि च शकुन्तलोपाख्यानान्ते महाभारते— 'भरते भारमावेश्य कृतकृत्योऽभवन्नृपः । ततो वर्षशतं पूर्णं राज्यं कृत्वा त्वसौ नृपः । गत्वा वनानि दुष्यन्तः स्वर्गलोकमुपेयिवान्' ॥ इति । विक्रमोर्वशीये स्थाणुमात्रध्यानं कृतं नान्दीश्लोके । तत्राप्येवं विरहः समजनि । न तथा मालविकाग्निमित्रे ; यत्र कान्तासंमिश्रदेहो ध्यातः ॥

रघुवंशं सूर्यप्रभवं विस्तरेणागायदयं कविः । 'रघुवंशस्य चरितं चकार भगवानृषिः' इति रामायणं रघुवंशचरितम् । तत्र बालकाण्डे कुमारसंभवः कथितो रामाय विश्वामित्रेण । 'कुमारसंभवश्चैव धन्यः पुण्यस्तथैव च' । कुमारसंभवश्च अगीयत विस्तरेण अनेन कविना । मेनकाविश्वामित्रकथा कथिता रामाय बालकाण्डे शतानन्देन विश्वामित्रस्य पुरतः । गोपनीयेदृशस्वविषयपूर्वकथानां जनकराजसदसि विस्तरेण कथनं न प्रत्यवोधि कौशिकेनेति तस्य लोकोत्तरस्वभावः शिरसा श्लाघनीयः । तस्य स्ववृत्तान्तप्रकाशनस्य न चुकोप कोपनो मुनिः । तत्प्रकाशनं काममनुमेने । 'असंमानात् तपोवृद्धिः संमानात्तु तपःक्षयः । अर्चितः पूजितो विप्रो दुग्धा गौरिव गच्छति ॥' इति वचन अनुतिष्ठन्ति महान्तः । महाभारतं पुरुवंशचरितं भरतवंशचरितं च । दौष्यन्तेः भरतस्य द्वादशाब्दे पित्रा समागमे पुरुवंशस्यैव भरतवंश इति नाम अन्वग्राहि देवैः राजसभायाम्—

"भर्तव्योऽयं त्वया यस्मादस्माकं वचनादपि ।
तस्माद्भवत्वयं नाम्ना भरतो नाम ते सुतः ॥

भरताद्भारती कीर्तिः येनेदं भारतं कुलम् ।
अवरे ये च पूर्वे च भारता इति तेऽभवन्" ॥ इति ॥

'दश पूर्वान्दशावरान्पुनाति' इति स्मृतिषु कीर्त्यते। अयं च दौष्यन्तिः सुबहूनपि स्वपूर्वान् स्वावरान् स्वसंबन्धेन भारतीचकार; स्वनामाङ्कितान् स्वमहिम्ना चकार। 'तस्माद्युध्यस्व भारत' इत्यर्जुनः समबोधि गीतायाम्। एतद्वंशमधिकृत्य कृतो ग्रन्थो भारतम्। महान् अस्य वंशो भारवांश्च। एतन्नाम्नैव भारतवर्षं इति नाम अस्मद्देशस्य। भरतः शाकुन्तलः। स एव प्रधानाभिज्ञानं सप्तमाङ्के दम्पत्योः संयोजने। शकुन्तलां शाकुन्तलं च अधिकृत्य कृतं नाटकं शाकुन्तलम्। अभिज्ञानं च शाकुन्तलो भरतः। अभिज्ञानं शाकुन्तलो यस्मिन् तदभिज्ञानशाकुन्तलम्। अभिज्ञानेन अपत्येन पित्रोर्घटना समभवत्। शाकुन्तल इति भूयो निर्दिश्यते भरतो महाभारते। 'दौष्यन्तिं च तथा राजा पुत्रं शाकुन्तलं तदा। भरतं नामतः कृत्वा यौवराज्येऽभ्यषेचयत्॥' इत्युपाख्यानान्ते पठितम्। मातृसंबन्धिनाम्नैव असंदिग्धो व्यपदेशः शक्यः। 'कौसल्या सुप्रजा राम' इति सावित्रीद्रष्टृविश्वसुहृदृषिगीतं सर्वजनप्रसिद्धं रामसुप्रभातम्। 'दुष्यन्तात् लक्षणायां तु जज्ञे वै जनमेजयः। शकुन्तलायां भरतो दौष्यन्तिरभवत् सुतः। तस्माद् भारतवंशस्य विप्रतस्थे महद्यशः॥' इति भरतादन्यः पुत्रोऽप्यभवत् दुष्यन्तस्य; सोऽपि दौष्यन्तिः; शाकुन्तल इति नाम तं व्यावर्तयेत्। 'यथा च भरतो राजा दौष्यन्तिः पृथिवीपतिः। शाकुन्तलो महावीर्यस्तव पूर्वपितामहः॥' इत्याश्वमेधिकपर्वणि युधिष्ठिरं प्रति व्यासवचने शाकुन्तलनामापि दौष्यन्तिनाम्ना सह न्यवेशि भारतकविना दौष्यन्त्यन्तरजनमेजयव्यावर्तनाय। 'भरतं चैव दौष्यन्तिं मृतं सृञ्जय शुश्रुम। शाकुन्तलं महात्मानं भूरिद्रविणतेजसम्॥ अश्वमेधसहस्रेण राजसूयशतेन च। इष्टवान्स महातेजा दौष्यन्तिर्भरतः पुरा॥' इति शान्तिपर्वणि॥

'संभवं भरतस्याहं संभवं च महामुनेः। शकुन्तलायाश्चोत्पत्तिं श्रोतुमिच्छामि तत्त्वतः। दुष्यन्तेन च वीरेण यथा प्राप्ता शकुन्तला॥' इति जनमेजयप्रश्नः आदिपर्वणि। तत्पृष्टास्त्रयो विषयाः एतन्नाटकप्रविष्टाः। महाभारते शकुन्तलोपाख्यानं रामायणसुन्दरकाण्डवत् सुन्दरम्। तद्रसभरितः कविः तदेव वव्रे स्वोत्तमनाटकवस्तुत्वेन। यथा सुन्दरकाण्डरसभरितो मेघसंदेशं प्रणिनाय। 'परं कवीनामाधारम्' इति रामायणस्य सर्वकव्याधारत्वम्। निरतिशयभक्तिः प्राचेतसे महाभारतकवेः। रामायणरसभरितहृदयेन व्यासेन महाभारतं उपनिबद्धमिति स्फुटमवगम्येत इतिहासद्वयपठनेन। 'कृतं मयेदं भगवन् काव्यं परमपूजितम्' इति भारतकर्त्रैव पञ्चमवेदस्य भारतस्य काव्यत्वं विज्ञापितं ब्रह्मसंनिधौ। 'जन्मप्रभृति सत्यां ते विद्म गां ब्रह्मवादिनीम्। त्वया च काव्यमित्युक्तं तस्मात्काव्यं भविष्यति। अस्य काव्यस्य कवयो न समर्था विशेषणे॥' इति निरतिशयोक्तमत्वाशीः अनुजगृहे ब्रह्मणा। 'कवयः' इति व्यासादर्वाचीनाः कवयः परामृश्यन्त इव। न ततोऽपि पूर्वः प्राचेतसः कविवृषा प्रथमः कवीनां विवक्षितः स्यात्। 'त्वया भारतसूर्येण नृणां विनिहतं तमः। पुराणपूर्णचन्द्रेण स्मृतिज्योत्स्नाप्रकाशिना। नृणां कुमुदसौम्यानां कृतं बुद्धि-

प्रबोधनम्॥ इतिहासप्रदीपेन मोहावरणवातिना । लोकगर्भगृहं कृत्स्नं यथावत्संप्रकाशितम्॥ ' इति ब्रह्मकृतप्रशंसा भारतकाव्यस्य । सूर्याख्यं ज्योतिः, चन्द्रज्योत्स्ना, दीपज्योतिः, शब्दज्योतिश्च महाभारतम् । ' कार्ष्णो वेदः ' इति ब्रह्मकृतसमाख्यया तस्य वेदज्योतिष्ट्वमपि । ' श्रुत्वा त्विदमुपाख्यानं श्राव्यमन्यन्न रोचते । पुंस्कोकिलरुतं श्रुत्वा रूक्षा ध्वाङ्क्षस्य वागिव॥' इति सौतिवचनं आदिपर्वणि । ' पुंस्कोकिलरुतं श्रुत्वा ' इति उपमानकथनेन भारतस्याप्याधारभूतस्य वाल्मीकिकोकिलकाव्यस्य रोचकतमत्वे उपमानत्वं व्यञ्जितमिव । तथा च तस्य सर्वकाव्यश्रेष्ठत्वम्, भारतस्याप्युपमानकोटित्वेन ततोऽप्युत्तमत्वम्, निपुणं असूच्यत इव । ' त्वया तु काव्यमित्युक्तं तस्मात्काव्यं भविष्यति ' इति वदन् पितामहस्त्वच्छन्दात्, न मच्छन्दादेवेति वदतीव । श्रव्यं महाभारतकाव्यम्, आदिकाव्यं च बहुप्रकारैरुपजीव्य इदं दृश्यकाव्यं प्रणिन्ये काव्यमार्गदर्शिव्यासप्राचेतसभक्तेन कविना । ' श्राव्यमन्यन्न रोचते ' इति निषेधगीः भारतोपजीवि इदं दृश्यकाव्यं न स्पृशेत् । अनेन कविना भारतकाव्यगते द्वे उपाख्याने उपाजीव्येतां दृश्यप्रबन्धप्रणयनाय । पुरूरवसो वृत्तान्तमधिकृत्य विक्रमोर्वशीयं न्यबन्धि । ' प्रतिष्ठाने पुरे राजा शाकुन्तलपितामहः । अध्युवास चिरं कालं उर्वश्या सहितः पुरा॥' इति कण्वेनोक्ता शकुन्तला भर्तृगृहं प्रति प्रस्थानावसरे । ' इलायाः पुरूरवाः, पुरूरवसः आयुः, आयुषो नहुषः, नहुषस्य ययातिः, ययातेः शर्मिष्ठायां पुरुः । ययात्यनुग्रहेण अस्य वंशस्य पुरुवंश इति नामाभवत् । क्रमेण तद्वंशे इलिलः संबभूव । इलिलात् दुष्यन्तः ' इति वंशक्रमः । अप्सरसः पुत्री दास्याः पुत्रीति शकुन्तलायाः अधिक्षेपे दुष्यन्तेन सदसि कृते, ' पुरा नरवरः पुत्रः उर्वश्यां जनितस्तदा । आयुर्नाम महाराज तव पूर्वपितामहः॥' इति निपुणं सनर्म शकुन्तलया उत्तरितम् । अप्सरा उर्वश्येव नायिका विक्रमोर्वशीये । अत्र सुरयुवतिसंभवा नायिका । रामायणे विश्वामित्रः सीतारामविवाहमघटयत् । ' यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ' इति प्राचेतसभक्तो महाकविर्भवभूतिः । स्वदृष्टसावित्रीमन्त्रदेवताभिन्ने सावित्रभूपाले रामे विश्वामित्रस्य पुत्रत्वाभिमानः । ' स्थाणुं देवमिवाचिन्त्यं कुमारमिव पावकी ' इति प्राचेतसगानेनापि इदं व्यञ्जितमिव । अत्र शकुन्तलायाः विश्वामित्र एव साक्षात् जनकः । ' दुष्यन्तस्तु विश्वामित्रदुहितरं शकुन्तलां चोपयेमे । तस्यां अस्य जज्ञे भरतः ' इति महाभारते । सीतास्थाने अत्र शकुन्तलां नायिकात्वेन निविवेशयिषतीव कविः । ' पौरवाणां वंशकरो दुष्यन्तो नाम वीर्यवान् । पृथिव्याश्चतुरन्तायाः गोप्ता भरतसत्तमः॥' इति शकुन्तलोपाख्यानमारभ्यते महाभारते । तत्र भरतपिता दुष्यन्तः ' भरतसत्तमः ' इति व्यपदिश्यते इत्यवधेयम् । ' सुतार्थं तप्यमानस्य नासीद्वंशकरः सुतः ' इति जनिष्यमाणदाशरथिविषये ' वंशकरः ' इति आदिकविप्रयुक्तं शब्दमेव प्रयुयुजे भारतकविः॥

(क्रमशः)

VENKATESWARA ORIENTAL LIBRARY TIRUPATI

तृतीयाध्यायस्य चतुर्थः पादः ॥

१. पुरुषार्थाधिकरणम् ॥

पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥

क्रतुषु जुहूस्रुवप्रभृतिवदङ्गतां
कलयति चेतनो वहति हि कर्तृतां
तदधिगतिस्ततो भजति तदङ्गतां
श्रुतिरपि हेतुभिः सह विदधाति याम् ।
तदधिगतेरतः फलभाविवक्षितं
सह तदकर्तृताद्यखिलविरोधिभि-
र्यदि न तथा भवेज्जनकमुखास्तदा
कथमिव कर्मणां वितनुयुरावलिम् ॥ १ ॥

अधिगतिरङ्गगाऽप्यफलवती कथं
यदिह विरोधिनी न हि समकालता
भजति न चाङ्गतां यदुदितमात्मनो
भवति सतत्त्वमित्युपनिषदां गणैः ।
प्रकृतपरश्रुतिः प्रशिथिलहेतवो-
ऽप्यधिगतिरङ्गमित्यपगमनाक्षमा
पराविदि कर्म यत्स तु जनसंग्रहो
यत इह कर्मणां त्यजनमपि श्रुतम् ॥ २ ॥

(रथोद्धता)

२. परामर्शाधिकरणम् ॥

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥

धर्मस्कन्धत्रितयवचनं यज्ञदानादिकानां
निन्दापूर्वं श्रुतिषु कुरुते ब्रह्मसंस्थाप्रशंसाम् ।
मैवं यज्ञादिकेषु त्रय इति वचनं नाश्रमत्वानपेक्षं
तस्मात्तेषां चतुर्णां विधिरिह गृहिणां वीरहेत्यादिनिन्दा ॥

योगाद्वक्ति प्रकृतमखिलं ब्रह्मसंस्थेति शब्द-
स्तस्मात्सर्वाश्रमिषु भवति ब्रह्मविद्या विमुक्त्यै ।
मैवं नास्तीतरेषामनितरपरतोपक्रमश्चाश्रमाणां
तत्तद्धर्मप्रधानैर्ग्रहणपर इति ब्रह्मसंस्थः परिव्राट् ॥ ४ ॥

(स्रग्धरासन्दाक्रान्तोपजातिः)

३. स्तुतिमात्राधिकरणम् ॥

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

रसतमादिकहीनमुद्गीथादिविधौ तदुपस्थितेः
स्तवनमङ्गगतोक्तप्रवस्त्वध्यासतया रविरूपवत् ।
भवतु संनिहिते तदुपास्तेर्वा तदिदं स्थलं विधौ
न तदुपास्यविशेषणविध्यर्थं न हि तत्र विधिश्रुतिः ॥ ५ ॥

प्रकरणान्तरसंगमकाकाङ्क्षादिकमत्र न किंचन
प्रकरणं च विधौ स तु नान्यत्र क्वचिदस्त्यपकर्षणम् ।

स्तवनतोऽपि च तत्र विधौ युज्यते विशेषविधिस्ततो
रसतमादिरपूर्वतयोद्गीथादिषु तत्र विशेषणम् ॥ ६ ॥

(खेचरपुरम्)

४. पारिप्लवाधिकरणम् ॥

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥

आख्यानजातं समनुप्रयान्ती
सर्वश्रुतिः शंसति शेषभावम् ।
यद्यैकवाक्यमपि तद्गमयेत्तदर्थं
विद्यार्थतावगमकं परयूथलिङ्गम् ॥ ७ ॥

सर्वश्रुतिर्गच्छति संकुचत्तां
पारिप्लवाख्यानपुनर्विधानात् ।
न ह्यन्यदस्ति फलमग्रनिबद्ध....
आख्यानमात्रविषयत्वकृतिं विना स्युः ॥ ८ ॥

(इन्द्रवज्रावसन्ततिलकोपजातिः)

५. अग्नीन्धनाद्यधिकरणम् ॥

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥

फलजननाय कर्ममुखवीक्षिकेति विद्या
स्फुटमवगम्यते विविदिषन्तिवाक्यगत्या ।
न हि तदुपार्जितां विविदिषां फलं मखादेः
कथयति किं तु तन्मुखफलोपकारकत्वम् ॥ ९ ॥

करणतयेष्यमाणपरवेदने श्रुतोऽसौ
कथमिव तस्य यास्यति फलोपकारकत्वम् ।
फलमपि कर्मसाध्यमिह नैव नित्यसिद्धं
तदनवबोधहानिरपि बोधमात्रसाध्या ॥ १० ॥

(वाणिनी)

६. सर्वापेक्षाधिकरणम् ॥

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

अध्यक्षमाम्नायशिखाऽपि वा भवे-
त्परावबोधे करणं न तु क्रिया ।
तस्मात्क्रिया कर्मगणं सविभ्रमं
क्षयं नयन्त्यस्त्वपवर्गसाधनम् ॥ ११ ॥

आविद्यकं कर्म सभेदविभ्रमं
विलीयते केवलमात्मविद्यया ।
तच्चित्तशुद्धया यजनादिका क्रिया
यथाश्रुतं वेदन एव साधनम् ॥ १२ ॥

(वंशस्थेन्द्रवंशोपजातिः)

७. सर्वान्नानुमत्यधिकरणम् ॥

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥

प्राणोपासावलम्बनं नीतः सर्वः स्यात्तथा विधेः ।
क्रत्वङ्गं रागमूलकप्रतिषेधो नास्कन्दितुं क्षमः ॥ १३ ॥

प्रत्यक्षश्चेद्विधिर्भवेत्स्यात्सर्वस्त्रीषङ्गवत्तथा ।
प्रतिषेधो बाधते श्रुतस्तस्यापूर्वस्यात्र कल्पनम् ॥ १४ ॥

(वैतालीयम्)

८. आश्रमकर्माधिकरणम् ॥

विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥

नित्यानित्यविधेर्विरुद्धमुभयार्थत्वं ततो नित्यता
बाध्याऽभ्याहितबोधसाधनतया यज्ञादिसत्कर्मणाम् ।
यद्वा कल्प्या प्रशंसा विषयेविविदिषावाक्यमन्यच्च तादृङ्-
नेयं यज्ञादि तत्र प्रकरणभिदया वाऽपि कर्मान्तरत्वम् ॥१५॥

नित्यानित्यतयोर्विरोधगणना साध्येषु नो सिद्धय-
त्तस्मान्नित्यविधिर्न काम्यविधिभिः प्रासङ्गिको बाध्यते ।
अर्थे चापूर्वरूपे न तदविधिपरं यज्ञदानादिवाक्यं
नाम्नैवोपाददानं तदिह न सहते नित्ययज्ञादिभेदम् ॥ १६ ॥

(स्रग्धराशार्दूलविक्रीडितोपजातिः)

९. विधुराधिकरणम् ॥

अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥

आश्रमधर्मानपेक्षतो या विधुरादीनां सारततोऽस्तविद्या ।
यदि सा स्याद्वर्णमात्रधर्मादाश्रमधर्मा व्यर्थतामुपेयुः ॥ १७ ॥

यज्ञादिगया पृथग्विभक्तया सर्वे धर्माः साधनानि तस्याम् ।
वर्णाश्रमधर्ममेलने तु स्वरति विद्याजन्म हेतुभूम्ना ॥ १८ ॥

(औपच्छन्दसिकम्)

१०. तद्भूताधिकरणम् ॥

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥ ४० ॥

यतिभिर्यज्ञादिचिकीर्षाकृतनिष्कृतिभिः प्राप्य गृहित्वम् ।
चरिता यज्ञा अपि विद्याहेतुरनाश्रमिकर्म यथैव ॥ १९ ॥

प्रव्रज्यादिच्युतिभाग्भ्यो जातानां चण्डालतयोक्तेः ।
पतितास्ते शुद्धिविहीनास्तद्यज्ञा नार्थाय भवन्ति ॥ २० ॥

(आपातछिका)

११. आधिकारिकाधिकरणम् ॥

न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ ४१ ॥

विनिष्कृतिर्याऽवकीर्णिनां श्रुता न सा स्यान्नैष्ठिकादिषु ।
अदर्शनं निष्कृतेः स्मृतं विशिष्य तेषां यच्च्युतात्मनाम् ॥ २१ ॥

अदर्शनं ह्यर्थना स्थिता विधिश्रुतीनामूहमीहते ।
ततोऽपि सामान्यगोचरा बलीयसी सा निष्कृतिश्रुतिः ॥ २२ ॥

(दक्षिणान्विका)

१२. बहिरधिकरणम् ॥

बहिस्तूभयथाऽपि स्मृतेराचाराच्च ॥ ४३ ॥

तदित्थमेते विनिष्कृतिध्वस्ताधा व्यवहार्यतोचिताः ।
न चेदमीषां विनिष्कृतिर्व्यर्थैव स्यात् ॥ २३ ॥

अपीत्य शुद्धिर्विनिष्कृतेरेषां स्यान्ननु पारलौकिकी ।
कृतघ्नवद्वालघातिवन्नेहासंव्यवहार्यतास्थितेः ॥ २४ ॥

(उदीच्यवृत्तिः)

१३. स्वाम्यधिकरणम् ॥

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

अङ्गनिबद्धा उपासना यदि भवन्ति यजमानकर्तृकाः ।
फलशायित्वादशक्यताविरहितादपि तथा श्रुतेरपि ॥ २५ ॥

औद्गात्र्याद्या समाख्या या वाक्यशेषलिङ्गतश्च ताः ।
ऋत्विक्कर्माणि तन्मुखात्स्वामिनो भवति तासु कर्तृता ॥ २६ ॥

(प्राच्यवृत्तिः)

१४. सहकार्यन्तरविध्यधिकरणम् ॥

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥

पाण्डित्योक्त्या विहितं ज्ञानं व्युत्थानोक्त्या विहितो न्यासः ।
तत्रैकस्य स्तुतये मौनस्यानूक्तेस्तन्न विधिः कल्प्यः ॥ २७ ॥

ज्ञानोत्कर्षे प्रथिता शक्तिर्न्यासादौ स्यादुपचारोऽस्याः ।
आत्मस्तस्मिन्धिषिरप्राप्ते निर्विद्येति स्फुटलिङ्गाच्च ॥ २८ ॥

(मात्रासमकम्)

१५. अनाविष्काराधिकरणम् ॥

अनाविष्कुर्वन्नन्वयात् ॥ ५० ॥

कामतश्चरणवादभुक्तिता बाल्यमत्र विदुषो विधीयताम् ।
नियमशास्त्रमखिलं तदन्यतश्चारितार्थ्यमधिगन्तुमर्हति ॥ २९ ॥

इह शेषिणि विरोधिनी ततो भावशुद्धिरिह बाल्यमिष्यते ।
नियमशास्त्रमपि सर्वगोचरं सत्तथा सति भजेदनुग्रहम् ॥ ३० ॥

(रथोद्धता)

१६. ऐहिकाधिकरणम् ॥

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५१ ॥

इहैव विद्या भवे भवेच्चक्षु.....त इव ए...तेः ।
...चन्द्रवत्यङ्गही तोल्पनं···श्रवणसंपदो परम् ॥ ३१ ॥

विभिद्यते चक्षुरादितो विधिपरं श्रवणमुख्यसाधनम् ।
भवान्तरे दर्शनं ततः प्रस्तुतितः प्रतिहतिर्भवेद्यदि ॥ ३२ ॥

(प्रभु.....)

१७. मुक्तिफलानियमाधिकरणम् ॥

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥५२॥

प्रवचनयज्ञदानतपसां श्रवणात्मधियां च विशेषा-
त्तदनुविधायिनावुपचयापचयावुपगच्छति विद्या ।
तादिह विमुक्तिलक्षणफलेऽपि सुखात्मनि तावुपगम्यौ
यदि न तथोच्यते क्रतुफलेष्वपि तौ भवतो न भवेताम् ॥

निरवधिनिर्विशेषसुखरूपतया प्रमिता खलु मुक्ति-
र्न हि परिकल्पनामुपचयापचयादिकमर्हति तस्याम् ।
न तदपरोक्षसंविदि च वैषयिकोऽतिशयस्तु कुतो वा
तादिह विलम्बितत्वरितजन्मपरः करणे तु विशेषः ॥ ३४ ॥

इति श्रीमदप्पय्यदीक्षितेन्द्रविरचिते चतुर्मतसारे नयमञ्जर्याख्ये
चतुर्थपरिच्छेदे तृतीयस्याध्यायस्य

चतुर्थः पादः ॥



अथ चतुर्थोऽध्यायः ॥

१. आवृत्त्यधिकरणम् ॥

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

श्रवणादिकानि सकृदेव कुर्युरधिकारिणोऽग्निमुखव-
न्ननु तान्यदृष्टसमुपार्जनेन करणानि मुक्तिभवने ।
अपरोक्षरूपपरमात्मबोधजनकत्वधीस्तु वितथा
किमनिन्द्रियाणि विभवन्ति किंचिदपरोक्षबोधजनने ॥ २ ॥

न विनाऽपरोक्षमपयात्यबोधलसितं परात्मविषयं
तदुपासनं च विषयापरोक्ष्यविधुरं ददाति न फलम् ।
श्रवणादि तच्च खलु रत्नतत्त्व इव चापरोक्ष्यजनकं
प्रथितं तदातदपरोक्षतासि गुणनीयमेव विबुधैः ॥ २ ॥

(मणिमालिका)

२. आत्मत्वोपासनाधिकरणम् ॥

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

अहमिति नेश्वरः श्रवणमत्युपास्तिषु धिया ग्रहीतुमुचितः
कथमभिदा विरुद्धगुणयोर्भवत्वनुभवश्रुतिप्रमितयोः ।
परगुणराशिरध्यसनतोऽनुभूयत इति प्रथाऽपि च वृथा
न हि घटते विशेषरहिते स्फुरत्यविरतं भ्रमस्य विततिः ॥

स्पुटमभिदैव जीवपरयोर्बलात् कठविभुश्रुतिव्रजमिता
तदनुसरत्प्रमाणमितरत्वतात्त्विकभिदावलम्बमखिलम् ।
भवति च पूर्वपूर्वगुणिताभ्रमेण सगुणे गुणभ्रमतति-
स्तदहमितीश्वरः श्रवणमत्युपासनधियां दृशामपि पदम् ॥४॥
(अश्वललितम्)

३. प्रतीकाधिकरणम् ॥

न प्रतीके न हि सः ॥ ४ ॥

ब्रह्मवदेव मनःप्रभृतिष्वपि कार्यमुपासनमात्मधिया
ब्रह्मदृशा यदुपासनगोचरभावविधानमिहाकलितम् ।
ब्रह्मविकारतया तदभेदबलादपि युज्यत एव तथा
श्रौतमिवार्थमपि श्रुतिसंमतमादरणीयमुशन्ति बुधाः ॥ ५ ॥

जीवमनःप्रमुखैक्यमतेर्न हि वस्तुसदैक्यसमाश्रयता
न श्रुतता च न च श्रुतसंघटनार्थमपेक्षिततताकलिता ।
ब्रह्मविकारतया त्वभिदा हि मनःप्रभृतेर्विलयावधिका
तस्य विवक्षणमत्र यदि त्वनु किंचिदुपास्यमिहावतरेत् ॥६॥
(मानिनी)

४. ब्रह्मदृष्ट्यधिकरणम् ॥

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

ब्रह्माणि फलवति मनआदिदृशां न्यायान्निपतति संस्कार्यत्वम् ।
तद्दृढयति नृपसेवान्यायस्तत्रावरपरचिन्ता मन्दा ॥ ७ ॥

वितरति फलमितरोपास्तावप्यधिपस्थानिखिलकर्माध्यक्षम् ।
तदपरमिति परहृद्योपास्यं मनआदिकमपि कर्मविभक्तेः ॥ ८ ॥

(विश्लोकः)

५. आदित्यादिमत्यधिकरणम् ॥

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

अङ्गं खलु फलयुतमुत्कृष्टं ध्येयं तद्धिमकरलोकादौ ।
तद्व्ययमतिरहिभूत्यै स्यात्तत्र श्रि...मत्र(?)विषयत्वस्य ॥ ९ ॥

अङ्गे दिनकरमुखहृत्कार्या साक्षात्फलमिति स खलूत्कृष्टः ।
अन्यात्मकमिति मतिराहार्या तत्त्वं क्वचिदपि न तिरोदध्यात् ॥

(चित्रा)

६. आसीनाधिकरणम् ॥

आसीनः संभवात् ॥ ७ ॥

अङ्गाश्रितोपासनया... दासीनतां नापेक्षते ।

(ध.विपुला)

७. एकाग्रताधिकरणम् ॥

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

स्यादुपासा चोदिता दिग्देशकालप्राप्त्यपेक्षा ।
सर्वकर्मस्वङ्गभूतास्ता कथं तान्नाद्रियेत ॥ ११ ॥

सत्ववृत्तेरुद्भवे स्याच्चित्तमेकाग्रत्वशालि ।
तत्प्रधानं भूष्णु यत्र स्यादुपासा तत्र कार्या ॥ १२ ॥

(र.विपुला)

८. आप्रायणाधिकरणम् ॥

आ प्रायणात्तत्रापि हि दृष्टम् ॥ १२ ॥

वि...परोक्षमिह दृष्टफलमवययन्त्वहं... भावि ।
फलमिव...द...न्ति...ह...नकिमध्वरादिवददृष्टतो भवेत् ॥१३॥

प्रतिबन्धकेत्यदृशिजं मननीयतमदृष्टतः स्थिते ।
तस्य नियतिकृदिह...रणं तदुपासना नवतया... यसी ॥ १४ ॥

(वसूवा)

९. तदधिगमाधिकरणम् ॥

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥

न सगुणविद्ययाऽघविहतिं क्षममर्पयितुं
प्रबलनिषेधविध्यभिहतं स्तुतिपादवचः ।
न विगुणविद्ययाऽप्यघगणेतरबाधितया
तदिह तु युज्यते न तदघं लयमेति ततः ॥ १५ ॥

न हि परवेदने विधिगतं क्वचिदस्ति फलं
स्तुतिगतमिष्यते यदि तदाऽन्वयहानिरपि ।

दुरितमनिष्टदं विदधतः श्रुतिषेधविधे-
र्दुरितनिवर्हकं विदधता च न बाधलवः ॥ १६ ॥

(कोकिलकम्)

१०. इतरसंश्लेषाधिकरणम् ॥

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १७ ॥

पुण्यं विहितं नाहितदायीत्यस्य न बोधो बाधविधार्यो ।
अत एव ततः पाप्मानिवृत्तिर्भणिता श्रुतिषु न पुण्यविनाशः ॥

विहितस्यापि हि विद्वदनिष्टो दुरितस्येवास्यापि फलौघः ।
पाप्मपदं च प्रस्तुतमुभयं ब्रूते पुण्यस्यापि लयोऽतः ॥ १८ ॥

(उपचित्रा)

११. अनारब्धाधिकरणम् ॥

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १९ ॥

तच्च तदा त्ववबोधे जाते सप्रारब्धं प्राच्छीति नाशम् ।
ज्ञानादज्ञानस्य विनाशे तन्मूलं किं क्षणमपि तिष्ठेत् ॥ १९ ॥

न द्राक्प्रतिहतशक्तिज्ञानं प्रारब्धबलादस्य निदानम् ।
अज्ञानांशं ग्रसते गदितो ह्यातन्नाशोपगति विलम्बः ॥ २० ॥

(चरणाकुलकम्)

१२. अग्निहोत्राद्यधिकरणम् ॥

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

कथं हि कर्माणि हिनस्तु विद्या कर्मोत्थिता तत्समजातिभाञ्जि ।
काष्ठात्तु वह्निः समवासजन्मा काष्ठानि नान्यान्यपि किं क्षिणोति ॥

अनीहिताऽसौ सविशेषाविद्याऽप्येवं समस्तं क्षमयेत कर्म ।
मैवं फलं सातिशयं हि तस्यास्तत्प्रापकं कर्म समीहितार्थम् ॥

(इन्द्रवज्रोपेन्द्रवज्रोपजातिः)

१३. विद्याज्ञानसाधनत्वाधिकरणम् ॥

यदेव विद्ययेति हि ॥ १८ ॥

कर्माङ्गविद्यासहितं विद्याफलोत्कर्षकरम् ।
यत्तत्प्रशंसा गमयेन्नानङ्गविद्याफलदम् ॥ २३ ॥

नानाङ्गविद्या सहते नैष्फल्यशङ्का सफला ।
प्राशस्त्यवाक्ये तरपा तत्रापि वीर्यावगतेः ॥ २४ ॥

(भ.विपुला)

१४. इतरक्षपणाधिकरणम् ॥


भोगेन त्वितरे क्षपयित्वा संपद्यते ॥ १९ ॥

यदि वपुरपरं पुनरपि विदुषां फलमपि निथतं मतिविनशनतः ।
यदि मतिरथवाऽन्यवगतिलवतो भवपरवशतामपनयतु कदा ॥

वपुरपरिमितानपि खलु शृणुमः समधिगतचरानविमुषितमतीन् ।
अनवगतिलवः क्षयमयति धिया प्रतिभटदुरितक्षयमनुघटितिः ॥

(प्रहरणकलिका.)

इति श्रीमदप्पय्यदीक्षितेन्द्रविरचिते चतुर्मतसारे नयमञ्जर्याख्ये
चतुर्थपरिच्छेदे चतुर्थ्यायस्य
प्रथमः पादः ॥





चतुर्थाध्यायस्य द्वितीयः पादः ॥

१. वागधिकरणम् ॥

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

मनसि लयं श्रुतिराह च वाक्प्रकृतिलयो वचनान्न भवेत् ।
श्रुतिगदितो यदि वृत्तिलयः स तव किमप्रकृतौ घटते ॥ १ ॥

विलयमियाद्यदि सोत्क्रमणे पवनमनूत्क्रमणं न भजेत् ।
तदनुभवास्पदवृत्तिलयो मनसि कृतस्तदधीनतया ॥ २ ॥

(सुमुखी)

२. मनोऽधिकरणम् ॥

तन्मनः प्राण उत्तरात् ॥ ३ ॥

पृथ्वीमयं तदम्मये प्राणे मनोऽवलीयताम् ।
मुख्यार्थसंभवे किमित्यङ्गीक्रियेत लक्षणा ॥ ३ ॥

प्राणप्रभञ्जने जलाधीनस्थितिस्तयोच्यते ।
साक्षात्तथाऽपि नो मनः प्राणप्रकृत्यतो भवेत् ॥ ४ ॥

(नाराचकम्)

३. अध्यक्षाधिकरणम् ॥

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

प्राणमरुद्वृत्तिलयस्तेजसि युक्तश्रवणात् ।
तन्मुखतः संघटते जीवसमायोगवचः ॥ ५ ॥

नाविकयुक्तं मुखतो नावमितः पारमिव ।
जीवमितो भूतयुतः प्रैति परामित्युचितम् ॥ ६ ॥

(माणवकम्)

४. आसृत्युपक्रमाधिकरणम् ॥

समाना चा सृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥

सगुणविदामपि हि शृणुमो वयं फलं
सगुणमपि प्रथिततरमेव सर्वतः ।
श्रुतमपि चोत्क्रमणमिह न व्यपेक्षितं
पराविषयोत्क्रमणगतिरूपणा भवेत् ॥ ७ ॥

सगुणविदां गतिरभिहिताऽर्चिरादिका
तदुपरि च स्थितिरमितभोगसंहिता ।
तदुचितमुत्क्रमणमुदितं फलाशये
तादिह सदप्यफलदमिति प्रकल्प्यते ॥ ८ ॥

(सुकेसरम्)

५. संसारव्यपदेशाधिकरणम् ॥

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

स्वरूपनाशोऽस्तु तेजःपदोक्तजीवादिकानाम् ।
परा हि सा देवतेषां भवत्युपादानमेव ॥ ९ ॥

ततोऽपि संसारभाजामुपाधिनाशो न युक्तः ।
अतो यथापूर्वमेषां लयोऽपि नात्यन्तिकः स्यात् ॥ १० ॥

(वितानम्)

६. प्रतिषेधाधिकरणम् ॥

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥

न तस्मादिति श्रुत्या प्रतीचः परामर्शात् ।
शरीरादसूत्क्रान्तिर्निषिद्धा न सिद्धानाम् ॥ ११ ॥

निषिद्धैव तद्वृत्त्या शरीरस्फुटामर्शात् ।
यदाध्मात इत्युक्तं समानश्रुतौ शेषे ॥ १२ ॥

(विलोडा)

७. वागादिलयाधिकरणम् ॥

तानि परे तथा ह्याह ॥ १५ ॥

भूतविकृतयः कला इमास्तेषु लयवतीरधीमहे ।
पूरणकरतागुणान्वयात्तेषु पुरुषशब्द इष्यताम् ॥ १३ ॥

ब्रह्मणि विदुषां कलालयं काचन विदधाति तद्दृशा ।
तेषु तमितरा स्वतद्दृशा तेन समुचिता श्रुतिद्वयी ॥ १४ ॥

(पीतविद्यवितद्)

८. अविभागाधिकरणम् ॥

अविभागो वचनात् ॥ १६ ॥

अवादि विदुषां श्रुत्या यदेतत्कलाविलयनं नात्यन्तिकं तत् ।
कलाप्रलयतासामान्ययोगाद्व्याभ्यविदुषामौत्क्रान्तिकं तत् ॥

प्रबोधमहिमा ह्यज्ञानमूलं भिनत्ति सकलं निःशेषमेव ।
कलाविलयने को वा विशेषः पुनश्च वलते निःशेषतायाम् ॥

(शिखण्डिवृत्तम्

९. तदोकोऽधिकरणम् ॥

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १७ ॥

मूर्धन्यया नाड्यैव निष्क्रान्तिं कथं विद्वानिया-
न्नाड्योऽखिलाः सूक्ष्मा भृशं कस्तां तदा द्रष्टुं क्षमः ।
श्लोकः शतं चैकेति नो नाड्यन्तरं व्यावर्तये-
न्नाड्या तया निष्क्रामतो विद्याफलं ब्रूते हि तत् ॥ १७ ॥

नाड्या तया निष्क्रामतो विद्याफलं तच्चेद्वदे-
दित्थं न किं विद्यावतो नाड्यन्तरं व्यावर्तयेत् ।
नो चेच्छ्रुतं विद्याफलं विद्यावतः स्यात्पाक्षिकं
सूक्ष्मामपि द्रष्टुं तदा विद्यामहिम्नैव क्षमः ॥ १८ ॥

(वृत्तनाम न दृश्यते)

१०. रश्म्यधिकरणम् ॥

रश्म्यनुसारी ॥ १८ ॥

रजनीषु च रश्मिवियोगात्पाक्षिकमेव फलं सगुणानाम् ।
करणानि तदूर्ध्वगतेस्ते ननपेक्ष्य कथं फललाभः ॥ १९ ॥

रजनीष्वपि सन्ति निदाघे तास्वपि चोष्मगुणप्रतिलम्भात् ।
शशिसंश्रयणादपि यावद्दहसमन्वयिकाश्रवणाच्च ॥ २० ॥

(भोगवती)

११. दक्षिणायनाधिकरणम् ॥

अतश्चायनेऽपि दक्षिणे ॥ २० ॥


ननु दक्षिणायनमृतस्य सगुणविधिचोदितं फलम् ।
न भवति गतिसरणेर्विरहान्न खलूत्तरायणमुदीर्यते ॥ २१ ॥

तदाऽपि वलते तदिति...देवतामयं स्वपितृमहिम ।
यशसे तु नदीतनयस्य कालविषयं प्रतीक्षणम् ॥ २२ ॥

(ललितम्)

इति श्रीमदप्पय्यदीक्षितेन्द्रविरचिते चतुर्मतसारे नयमञ्जर्याख्ये
चतुर्थपरिच्छेदे चतुर्थाध्यायस्य

द्वितीयः पादः ॥



चतुर्थाध्यायस्य तृतीयः पादः ॥

१. अर्चिराद्यधिकरणम् ॥

अर्चिरादिना तत्प्रथितेः ॥ १ ॥

प्रकरणविभिदा विभिदा धियां त्वरितगतिवच्चोऽवधृतिस्तथा ।
समधिगम्यते भिदिनध्वनां न वलनमिलितक्रमपर्वणाम् ॥ १ ॥

गतिरियमभिदाऽखिलपर्वयुक्सकलसगुणधीष्वपि लाघवात् ।
अयुजिमपनयत्यवधारणा त्वरिततरगतिः पितृयाणतः ॥ २ ॥
(महतोष्वजा)

२. वाय्वधिकरणम् ॥

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

अधि हुतवहात्पवनपठनक्रमतो न तु तिग्मरुचेरधः
क्षिपति तमितः सुरलोक...भावि चलं विनिवेश्य हि पञ्चमी ।
न हि भवति तेन स ऊर्ध्वामिति तच्छ्रुति तप...वनिमित्तता
दिनकरगतावुपरिक्रमणे खलु तामविशेषमधीमहे ॥ ३ ॥

दिनकरसमागमरूपतयोपरि तत्क्रमणं हि विशेषितं
यदि न विफलं भवति क्रमणं ननु नेत्रसमागमतो जगद्धितम् ।
तदिह करणश्रुतिरत्यनपेक्षतया बलिनि विनिवेशये-
स्मृतमुपरिस्थितिवत्सरतः सुरलोकनैश्वरमन्तरा ॥ ४ ॥
(हरिणीप्लुतम्)

३. तडिदधिकरणम् ॥

तडितोऽधि वरुणः संबन्धात् ॥ ३ ॥

उपरि निपठिताः प्रभञ्जनाद्वरुणशतमखप्रजेश्वराः ।
श्रुतिबलचलितस्वकक्रमाः कथमपि पथि सन्तु वा न वा ॥ ५ ॥

तडित उपरि तावदासिकां जलपतिरुपयाति योगतः ।
तदुपरिपठनक्रमान्नयादपि परिणणनाऽवशिष्टयोः ॥ ६ ॥

(भद्रिका)

४. आतिवाहिकाधिकरणम् ॥

आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥

मार्गगतचिह्नान्यर्चिरहराद्या लोकपरिदृष्टे तत्कथनसाम्यात्
भोगफलभूम्यो वाऽपि विदुषां स्युर्लोकपदपाठात्तेषु सकलेषु ।
न क्वचिदतस्ते तद्गमयितारस्तेऽप्यपरतन्त्रा नैव तदपेक्षाः
कार्यकरणानां पाटवजुषस्ते ह्यध्वनि हिमस्विट्संवदनदृष्टेः ॥ ७ ॥

अर्चिरहराद्यैर्गन्तृजनयोगः पूर्वमविशिष्य श्रुत्याभिहितो यः
स त्वनुपदोक्ते वैद्युतनिरूढे गम्यगमकत्वे पर्यवसितः स्यात् ।
एवमुपपन्नो मानवविशेषः प्राप्तगमकानां त्वस्य हि विधानं
तत्तदभिमानी देवपृहनेता नेतरि निरीक्षाऽप्यास्ति नवमार्गे ॥

(महती मणिमाला)

५. कार्याधिकरणम् ॥

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ७ ॥

प्राप्यमुपेयुषां गतिमिमां निराकृतभिदागुणाकृति परं

.....

बन्धविधूननश्रुतिबला...विषयावबोध...

...भवद्विषये तां विना देशगमनप्रतीक्षणमपि ॥ ९ ॥

वृक्षनदीह्रदार्णवमुखैरुपेतमधितिष्ठदुन्नतपदं

प्राप्यमिहैतया सगुणमित्यशेषनिगमान्तघोषविदितम् ।

तेन नुतिः परप्रकरणे गतिश्रुतिरविद्वदुत्क्रमणव-

द्ब्रह्मपदं त्वमुख्यममृतश्रुतिश्च यदि वा क्रमाप्यविषया ॥

(महत्प्रभद्रकम्)

६. अप्रतीकालम्बनाधिकरणम् ॥

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा-ऽदोषात्तत्क्रतुश्च ॥ १५ ॥

अपरं प्रतीकदृशोऽपि नयति वचनादमानवः ।

ब्रह्म 'ये च' वचसो विषयान्युमुखाग्निदृष्टिवदतस्क्रतूनपि ॥ ११ ॥

वचसा च भवति विद्युदवाधिगमने समुच्चयः ।

ब्रह्मगन्तृविषयं तु पदं प्रकृताग्न्युपासनपरैकगोचरम् ॥ १२ ॥

(सौरभकम्)

इति श्रीमदप्पय्यदीक्षितेन्द्रविरचिते चतुर्मतसारे नयमञ्जर्याख्ये
चतुर्थपरिच्छेदे चतुर्थाध्यायस्य
तृतीयः पादः ॥

चतुर्थाध्यायस्य चतुर्थः पादः ॥

१. संपद्याविर्भावाधिकरणम् ॥

संपद्याविर्भावः स्वेनशब्दात् ॥ १ ॥

त्रिदिवगतिवदपवर्गोऽपि स्फुरति पुरुषयतनैः साध्यः ।
भवति हि फलमभिनिष्पत्तिः श्रुतिरपि सुहृदनुमानस्य ॥ १ ॥

भ्रमविलसितविधुतावासं भवति सहजापिहितं रूपम् ।
तदिदमवगमयति स्वेनश्रुतिफलमिदमात्मन्येव ॥ २ ॥

(वृत्तम्)

२. अविभागेन दृष्टत्वाधिकरणम् ॥

अविभागेनैव दृष्टत्वात् ॥ ४ ॥

रूपमिदं परतमः प्रविभक्तं भवति भिदाश्रवणात्फलवाक्ये ।
साधनबोधविधायकवाक्यैराधिगमिता त्वभिदाऽस्तु दृगर्था ॥ ३ ॥

तत्परवाक्यसहस्रनिरूढः प्रचलति नैव तयोरविभागः ।
तत्फलवाक्यभिदामनुरोद्धुं तदिह भिदाश्रवणान्युपचारात् ॥ ४ ॥

(द्रुतमध्या)

३. ब्राह्माधिकरणम् ॥

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

सविशेषमिदं बहुधा तथोपन्यसनादपवर्गदरूपम् ।
तदभिन्नतया न पृथक्क इत्येव विशेषनिषेधवचांसि ॥ ५ ॥

बहुधर्मगणैरभिदा यदि ब्रह्म विभिन्नमिदं हि तदा स्यात् ।
अविशेषमतो भवति स्वतो युक्तमुपाधिवशात्सविशेषम् ॥ ६ ॥
(.....)

४. संकल्पाधिकरणम् ॥

संकल्पादेव तु तच्छ्रुतेः ॥ ८ ॥

.....दती श्रुतिरपरिमितानां
सा स्तुतिरेवानतियतनपरा नार्थपरा स्फुटमनुमितिबाधात् ।
सृष्टिषु संकल्पनमितरसखं कार्यकरीषु हि भवति जनानां
शब्दगशक्तिग्रहसहकरणी शब्दमितावनुमितिरुपजीव्या ॥ ७ ॥

प्राकृतरीतीर्न हि जगति दधत्यद्भुतशक्तिविभवसमुपेताः
साधनसंवादनकृतिविधुरं सृष्टिकृदीक्षणमिह न किमैशम् ।
वक्ष्यनुमानादपि निगमवचो धर्मिविबोधनकरमनपेक्षं
वाक्यजबोधेऽनधिगतविषये तेन यथाश्रुतविभवयुतास्ते ॥८॥
(तन्वी)

५. अभावाधिकरणम् ॥

अभावं बादरिराह ह्येवम् ॥ १० ॥

ते सवपुषो न मनसेति हि विशेषणममुष्य परिवर्जनफलं तत्
कामरमणोक्तिषु विकल्पवचनं भवतु भूमविदनन्वये निरर्थम् ।
सन्तु यदि वा सवपुषोऽर्थवति संभवति निर्विषयताकृतिरयुक्ता
तत्र मनसेति तु विशेषणमयोगपरिवर्जनकरं भवति सार्थम् ॥ ९ ॥

कामरमणे न हि मनोविरहशङ्कितमतो सपुरुपासनफलं तत्
निर्गुणफलाऽपि च.....तिः सगुणदेशमुपलभ्य चरितार्था ।
सा च न मनोविभिदयैव भवति प्रकटजाग्रदुपभोगघटनार्था
तत्सवपुषोऽप्यवपुषः समयभेदत इतीदमुचितं नियतिरिच्छा ॥
(मङ्गलमहाश्रीः)

६. प्रदीपाधिकरणम् ॥

प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥

तद्वपूंषि न मनसा तदुपाधिस्थेन च जीवे-
नाततानि यदि मनोन्तरसृष्टिर्जीवभिदा स्यात् ।
तेन तानि विगणयेमहि सूत्राथोजननृत्य-
द्दारुनिर्मितपुरुषाकृतितुल्यावस्थितिभाञ्जि ॥ ११ ॥

तत्प्रवेशविरहितं तदनेकत्वं किमु सिद्ध्ये-
त्तद्भजन्त्विति मनसा विपुलत्वं योगबलात्ते ।
तानि तेषु बहुविधेष्वथवाऽन्यान्यानि सृजन्तु
व्यापिकाऽखिलवपुषां तदुपाधिस्तत्तदविद्या ॥ १२ ॥
(हरनृत्तम्)

७. जगद्व्यापाराधिकरणम् ॥

जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च ॥ १७ ॥

यदि निरवग्रहमीश्वरतागणमभ्युपगच्छसि विश्वपतौ
भवति च तत्कतुनीतिसमाश्रयणात्तदुपासनसिद्धजने ।

श्रुतिरपि तस्य विभूतिमनेकविधां महतीमुपदर्शयते
तदखिलविष्टपस्रष्टुरुपसंहरणाय..... ॥ १३ ॥

.....

.....तनावहवे.....मिमां नियताम् ।
न यदुपलभ्यमुपासनया कृतयाऽपि न तल्लभते पुरुषः
प्रभवति तत्र तु साम्बशिवः परमेश्वर एव महामहिमा ॥
(कविराजविराजितम्)

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभ श्रीमद्द्वैताविद्याचार्यश्रीविश्वजिद्याजि श्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतौ चतुर्मतसारसंग्रहे नयमञ्जर्याख्ये
चतुर्थपरिच्छेदे चतुर्थाध्यायस्य

चतुर्थः पादः ॥



यद्वा यान्येतानि त्रयीविद्भिर्न गृहीतानि शाक्यादिभिर्निर्मितानि धर्मशास्त्राभासानि तेषामनेनाप्रामाण्यं पूर्वोक्तसूत्रोक्तकर्तृसामान्यप्रत्युदाहरणत्वेनोच्यते। तेषां हि प्रत्यक्षादिमूलत्वेन प्रामाण्यं प्रत्यक्षसूत्रे निराकृतम्। मन्वादिवद्वेदमूलत्वेन प्रामाण्यमिह निराक्रियते। तेषां ह्यसत्यपि प्रसिद्धवैदिकैरग्निहोत्रादिभिः कर्तृसामान्ये भिन्नप्रस्थाना वेदा मूलं भविष्यति। यथैवाथर्वणस्य त्रयीभिन्नप्रस्थानरूपता, तथा चतुर्भ्योऽपि वेदेभ्यो भिन्नरूपा वेदाः संभवेयुः। ते चेदानीं प्रलीनाः। मन्वादीनामपि हि केचित्प्रविलीनशाखामूलतामनुमन्यन्ते, तद्वदत्रापि भविष्यति। इत्थं च संभवति प्रामाण्ये नाप्रामाण्यं युक्तमिति भवति केषांचिदाशङ्का, सा च मन्दविषन्यायेन निराकर्तव्यैवेत्येवमर्थामिदमधिकरणम्। कृतः पूर्वः पक्षः॥

सिद्धान्तस्तु — अविच्छिन्नवैदिकपरिग्रहानुपपत्त्या मन्वादिष्वनुपलभ्यमानोऽपि वेदः कल्पितः। शाक्यादिष्विदमत्यन्तविपरीतम्। अवैदिकमप्रमाणं च तदित्येव शिष्टानां स्मरणम्। वेदवैदिकद्वेषिण एव तेषां प्रामाण्यमनुमन्यन्ते। दृष्टानुसारिणी कल्पना न तद्वैपरीत्येन।

त्वलक्षणाप्रामाण्यविषयत्वमधिकरणस्य वाच्यं तदा विषयान्तरं प्रदर्श्यत इत्याह— यद्वेति। कर्तृसामान्येति। अग्निहोत्रादिभिर्वैदिकैः कर्तृसामान्ये सत्येव स्मृतीनां प्रामाण्यं न तदभाव इति प्रत्युदाहरणतयेत्यर्थः। ननु शाक्यादिशास्त्राणां प्रत्यक्षादिमूलत्वेनाप्रामाण्यं प्रथमपादे 'सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्' (जै. १. १. ४. ४.) इति सूत्रे निराकृतम्। वेदमूलत्वं तु तेषां न शक्यशङ्कमिति कथं पूर्वपक्ष इत्यत्राह— तेषां हीति। भिन्नप्रस्थाना इति। ननु तेषामष्टकादिस्मृतिवच्चतुर्ष्वेव वेदेषु विप्रकीर्णवाक्यमूलत्वं कल्प्यताम्, किं वेदान्तरकल्पनयेति चेत्; उच्यते— मन्वादिस्मृतीनां प्रायः प्रत्यक्षश्रुतिमूलार्थकरम्बितत्वात् क्वचिदेव सर्ववेष्टनादिविषये तद्विरोधात्तासां मूलश्रुतिस्तत्र तत्र विप्रकीर्णेति वक्तुं शक्यम्, न तु शाक्यादिस्मृतीनां सर्वत्र प्रत्यक्षश्रुतिविरुद्धानां तद्विरुद्धमेव चानुष्ठानमुपदिशन्तीनामित्यभिप्रेत्य वेदान्तरमूलत्वमुक्तम्। ननु वेदान्तरमनुपलब्धिपराहतं न कल्पयितुं युक्तमित्याशङ्क्याह— ते चेति। केचित्प्रविलीनशाखामूलतामिति। शाखारूपेणोत्सादमपि हि केचिदिच्छन्ति; तन्मतानुसरणे अनुपलब्धिरुपपद्यत इति भावः। दृष्टानुसारिणी कल्पनेति। ततश्च 'अप्रमाणं वेदः' इत्याक्रोशतां 'पश्याम्यहं भिक्षवो दिव्येन चक्षुषा सुकृतं दुष्कृतं च' इति स्वप्रत्यक्षमेव मूलं वदतां स्मृतेर्वेदमूलकत्वं दृष्टविरुद्धमिति न तत्कल्पनार्हमिति भावः। दवीयसी दूरतरा। एवं विरोधाधिकरणस्य शाक्यादिस्मृतिविषयत्वपक्षे हेतुदर्शनसूत्रं शाक्यादिचोदनाः सर्वा हेतूपन्यासपूर्वकाः, न च निरपेक्षाश्चोदनास्तमपेक्षन्त इत्यप्यप्रामाण्यमित्येतत्परम्।

अतोऽत्र वेदकल्पना दवीयसीत्यप्रामाण्यमेव तेषामसन्मूलत्वादिति ॥

तदुक्तं वार्त्तिके— 'शाक्यादयस्तु सर्वत्र कुर्वाणा धर्मदेशनाम्। हेतुजालविनिर्मुक्ता न कदाचन कुर्वते' ॥ इति ॥

अधिकरणस्य प्रत्यक्षश्रुतिविरुद्धस्मृतीनामविचिन्त्यमेवानुष्ठानपरत्वाभावलक्षणाप्रामाण्यपरत्वपक्षे प्राग्यदि परात्मीयस्य प्रत्ययस्येत्यादिना प्रवर्तते हेतुदर्शनसूत्रम; आचारयोर्विरोधे दृष्टलोभादिमूलाचारस्यानादरणीयत्वपरं योज्यम्। स्मृत्यधिकरणं हि स्मृतिवदाचारस्यापि वेदमूलत्वेन प्रामाण्यसमर्थनार्थमिति वार्त्तिक एवोक्तम् ॥

शिष्टाकोपाधिकरणम् ॥ ४ ॥

शिष्टाकोपे विरुद्धमिति चेत् ॥ ५ ॥ न शास्त्रपरिमाणत्वात् ॥ ६ ॥ अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् ॥ ७ ॥

॥ जैमिनीयन्यायमाला ॥

आचान्तेनेत्यमा मा वा स्मृतिरेषा न मा भवेत्।
वेदं कृत्वेति यः श्रौतः क्रमस्तेन विरोधतः ॥ १० ॥

आचान्त्यादिः पदार्थोऽत्र क्रमो धर्मः पदार्थगः।
धर्मस्य धर्म्यपेक्षत्वादबाधादस्ति मानता ॥ ११ ॥

शाक्योक्ताहिंसनं धर्मो न वा धर्मः श्रुतत्वतः।
न धर्मो न हि पूतं स्याद्दोक्षीरं श्वदतौ घृतम् ॥ १२ ॥

सदाचारोऽप्रमा मा वा निर्मूलत्वादमानता।
अष्टकादेरिवैतस्य समूलत्वात्प्रमाणता ॥ १३ ॥

'आचान्तेन कर्तव्यम्' 'यज्ञोपवीतिना कर्तव्यम्' 'दक्षिणाचारेण कर्तव्यम्' इत्येवमादीनि क्रत्वङ्गस्मरणान्युदाहरणम्; किं प्रत्यक्षागमप्रमाणं वेति विचारः। तदर्थं च प्रत्यक्षश्रुत्या विरुध्यन्ते न वेति। तदर्थमप्येभिः क्रतुमध्येऽनुष्ठीयमानैः कस्यचिच्छ्रुत्यर्थस्य क्रमादेर्भवति बाधो न वेति। अथ वाऽभ्युपेत्यैव विरोधं प्रमाणमप्रमाणं वेति विचारः। तदर्थं च प्रमाणप्रमेयबलाबलविसंवादे किं न्याय इति चिन्त्यते। तथा हि— श्रुतिस्मृत्योः प्रमाणयोः श्रुतिर्बलीयसीति स्थितम्। अतः श्रौतत्वात्क्रमादयः स्मार्तेभ्य आचमनादिभ्यो बलीयांसो विज्ञायन्ते। प्रमेयस्वरूपालोचने तु पदार्थगुणत्वात्क्रमादेराचमनादयः पदार्था बलीयांसोऽवगम्यन्त इति बलाबलद्वयविसंवादात्कतरेण निर्णय इति संदेहः। तत्र पूर्वः पक्षः—

श्रुत्युक्तानां क्रमादीनां स्मार्तैराचमनादिभिः।
व्याकोपः स्यादतस्तावद्विस्पष्टेन विरोधिता॥
ततः श्रुतिबलीयस्त्वात्स्मृतेः स्यादप्रमाणता।
पूर्वभाविप्रमाणस्थं प्रमेयस्याद्बलाबलात्॥

शिष्टाकोपे विरुद्धमिति चेत्॥ ५॥

यथाभाष्यं तावदधिकरणं प्रदर्श्यते— स्मृतीनां प्रत्यक्षश्रुत्यविरुद्धानां प्रामाण्यं तद्विरुद्धानामप्रामाण्यं च प्रत्यपादि। इदानीं विरोध एव कास्ति नास्तीति चिन्त्यते। अथ वा प्रत्यक्षश्रुतिविरोधेऽपि कचित्प्रामाण्यं भवतीत्युपपाद्यते। तत्र विषयं स्मृतिवाक्यमुदाहरति— आचान्तेनेति। कर्ममध्ये क्षुतादिनिमित्तकाचमनविधायकस्मृतिवाक्यमिहोदाहरणम्; न तु कर्मारम्भे नित्यवदनुष्ठेयतया आचमनविधायकम्, वेदवेदिक्रमाविरोधस्य वक्ष्यमाणत्व तत्रानन्वयात्। दक्षिणाचारेण दक्षिणकरेण। आदिशब्देन यज्ञोपवीतिना कर्तव्यमित्येवंजातीयकं गृह्यते। किं प्रमाणमिति। श्रुत्यर्थक्रमादिहानिर्भवति चेद्विरोधोऽस्तीत्यप्रमाणम्, न भवति चेद्विरोधो नास्तीति प्रमाणमिति पूर्वपक्षसिद्धान्तयोः फलफलिभावः। अथ वेति। विरोधमभ्युपगम्य कथं प्रामाण्यमुपपादनीयमित्याकाङ्क्षायां तदुपपादकं तदर्थसंशयमाह— तदर्थं चेति। तदर्थं संशयस्वरूपं तस्य मूलसंशयोपपादकत्वं चास्पष्टं विवृणोति— तथा हीति। तत्र क्रमादिप्रमाणश्रुतिप्राबल्यं प्रमाणबलमित्याह— श्रुतिस्मृत्योरिति। प्रमेयात्पदार्थधर्मात् क्रमादेराचमनादीनां पदार्थानां तद्धर्मित्वेन प्राबल्यं प्रमेयबलमित्याह— प्रमेयस्वरूपेति। कतरेणेति। किं प्रमाणबलमभ्यर्हितमिति तेन निर्णयः कार्यः; ततः स्मृतीनामप्रामाण्यम्। उत प्रमेयबलमभ्यर्हितमिति तेन निर्णयः कार्यः; ततश्च तासां प्रामाण्यमिति तेन संदेह इत्यर्थः। पूर्वपक्षयति— तत्रेति। सार्धश्लोकेन प्रथमसंशयानुसारिणं पूर्वपक्षं प्रदर्श्य पुनः

ज्यायस्तेनैव निर्णीते न पश्चादितरादरः ।
नैराकाङ्क्ष्यात्प्रमातृत्वामतः स्मृत्यर्थबाधनम् ॥

'वेदं कृत्वा वेदिं कुर्यात्' इति क्रमः, कालश्च यः प्रधानेनाङ्गानामविप्रकर्षः प्रयोगप्राशुभावश्च प्रयोगवचनावगतो यश्च पूर्वाह्णादिः, परिमाणं चाविस्मृतसर्वपदार्थानुष्ठानसिद्ध्यर्थं प्रयोगविधिनैवाकाङ्क्षितं पदार्थविधिप्रचयावगतं तदेतत्त्रितयमपि क्रमकालपरिमाणात्मकमाचमनादिभिरन्यथात्वमापद्यते । तेन विरोधस्तावदस्त्येव । विरोधे च श्रुतेर्बलीयस्त्वात्स्मृत्यर्थस्याचमनादेर्बाधः ॥

न च श्रुत्यर्थत्वेऽपि पदार्थगुणभूतत्वात्क्रमादेः दौर्बल्यमाचमनादेः स्मृत्यर्थस्यापि पदार्थत्वाद्बलीयस्त्वमिति वाच्यम् । प्रमाणपूर्वको हि प्रमेयावगमः । तेन पूर्वभाविप्रमाणस्थं बलाबलं पूर्वं गम्यते । तेनाचमनादिभ्यः क्रमादीनां बलीयस्त्वे निर्णीते निराकाङ्क्षत्वाच्च पश्चादवगतं प्रमेयबलाबलमादर्तव्यम् । तस्मादाचमनादिस्मृतीनामप्रामाण्यमिति ॥

सिद्धान्तस्तु—

पदार्थप्राप्त्यपेक्षत्वात्क्रमादेरविरोधिता ।
विरोधेऽपि च दौर्बल्यं पदार्थेभ्यो गुणत्वतः ॥

सार्धश्लोकेन द्वितीयसंशयानुसारिणं पूर्वपक्षं प्रदर्शयति– **पूर्वभावीति** । श्लोकं व्याचष्टे– **वेदं कृत्वेति** । क्रमः वेदाख्यदर्भमुष्टिकरणस्य वेद्याख्यचतुरङ्गुलपरिमितखातभूमिकरणस्य चाव्यवहितपौर्वापर्यलक्षणः । कालः प्रधानसंनिकर्षप्रयोगशैघ्र्यपूर्वाह्णादिरूपेण त्रिविधः । तत्राद्यः सर्वाङ्गसहितं प्रधानमनुष्ठापयितुं प्रवृत्तेन प्रयोगविधिना सर्वादेकस्मिन् प्रधानानुष्ठानक्षण एवाङ्गानां साहित्यासंभवादाक्षिप्तः संनिकर्षनिर्वाहार्थम् । द्वितीयोऽपि तेनैवाक्षिप्तः । तृतीयस्तु पूर्वाह्णादिराहत्य विहितः । परिमाणं त्वङ्गानामियत्तारूपं श्रुतिलिङ्गाद्यवगताङ्गविधिप्रचयादवगतम् । तत्र क्रमः क्षुतादिनिमित्तकेनाचमनेन प्रधानयज्ञोपवीतपुनःकरणेन च बाध्यते । कालस्ताभ्यां दक्षिणकरणेनानुष्ठानेन च बाध्यते । परिमाणं दक्षिणाचारं विना द्वाभ्यां बाध्यते, कर्माङ्गतयाऽऽचमनयज्ञोपवीतसंग्रहेण [1]श्रौतपदार्थेयत्तासंभवात् । एवमविरोधवादिनं[2] प्रति विरोधोपपादनेन कृतं पूर्वपक्षमुपसंहरति— **तेनेति** । विरोधेऽपि प्रमेयबलेन स्मृतीनां प्राबल्यमिति सिद्धान्तिनः प्रतिक्षिपति— **न च श्रुत्यर्थत्वेऽपीति** । कुतो न वाच्यमित्याकाङ्क्षायामाह— **प्रमाणेति** । प्रथमोपस्थितं प्रमाणबलं प्रमेयबलादभ्यर्हितमिति ततः

---

1. क. श्रौतपदार्थेयत्ताभङ्गाद् 2. सिद्धान्तिनं प्रति

सर्वेषु हि पदार्थेषु प्राप्तेषु प्रयोगवेलायां तद्विशेषणतया क्रम आश्रीयत इति, तेन पदार्थप्राप्त्यपेक्षत्वात्क्रमस्यात्यन्तिकजघन्यः प्राप्तोऽपि पदार्थः पूर्वं प्राप्नोति पश्चात्क्रमः सर्वपदार्थप्रयोगाङ्गतयाऽवतरन्नपि न पदार्थैरुध्यते। कालोऽप्येवमेव प्रयोगाङ्गत्वात्, यावन्तः पदार्था अवधारितास्तेषां सर्वेषामेव पूर्वाह्णादिकालत्वं प्रधानसंनिकर्षः प्रयोगप्राङ्भावश्च. परिमाणं तु न कस्यचिच्छास्त्रस्यार्थः। अयोगार्थोऽपि न तदाक्षिपति। अन्यथाऽप्यविस्मरणसिद्धेः। अथापि शास्त्रार्थस्तथाऽपि प्रयोगतन्त्रत्वात्प्रयोगस्य च प्रयोज्यपदार्थप्राप्त्यपेक्षित्वादविरोधित्वम्। यद्यपि क्रमादीनामाचमनादिभिर्विरोधः स्यात्तथाऽपि सर्वपदार्थगुणत्वाद्दौर्बल्यम्। आचमनादयस्तु पदार्थत्वाद्बलवन्तः। न च प्रमाणबलाबलस्य पूर्वभावित्वम्। न हि प्रमाणयोः स्वरूपतो विरोधः, अपि तु प्रमेयविरोधनिमित्तः। प्रमेयगतं हि विरोधमालोच्य प्रमाणविरोधबुद्धिर्भवति। तदेव प्रमेययोर्विरोधो गम्यते तदेव तयोर्बलाबलमपीति तत एव निर्णये कृते नैराकाङ्क्ष्यात्प्रमाणबलाबलमनादर्तव्यमिति न स्मृतेर्बाधः। यद्धि स्वभावत एवाप्रमाणं शाक्यवाक्यं तत्सर्वदैवानादर्तव्यम्। यत्तु बलवद्विरो-

---

श्रौतानां क्रमादीनां बलीयस्त्वात्तद्विरुद्धाचमनादिस्मृतयो न प्रमाणमित्यर्थः। विरोधाभावतदभ्युपगमाभ्यां द्विविधमपि सिद्धान्तं संगृह्णाति— पदार्थेति। श्लोकं व्याचष्टे— सर्वेषु हीति। [1]श्रुत्यादिप्रतिपन्नावपि क्रमकालौ प्रयोगाङ्गत्वात्प्रयोज्यसकलपदार्थप्राप्तिमपेक्ष्य प्रयोगविधौ प्रवर्तमाने प्रयोगविशेषणतया तत्रान्वयं लभेते; आकाङ्क्षानुसारित्वादन्वयस्य। ततश्च श्रौतेषु[2] प्राप्नुवत्सु स्मार्तपदार्था अपि प्राप्नुवन्तो न निवार्यन्ते। तदानीं तद्व्यवच्छेदकयोः क्रमकालयोरनवधारणेन[3] विरोधाभावात्, अविरोधे च स्मृतिप्रामाण्यानपवादात्। पश्चात्त्वापतन्तौ क्रमकालौ श्रुतिस्मृतिप्राप्तसकलपदार्थानुष्ठानाविरोधिनावापतत इति न तद्विरोध इत्यर्थः। ननु अविस्मरणार्थं प्रयोगविध्याक्षिप्तं परिमाणं शास्त्रार्थ एवेत्याशङ्क्याह— अन्यथाऽपीति। न च प्रचयशिष्टपदार्थयत्तारूपपरिमाणावधारणेनैवाविस्मरणं संपादनीयमिति नियमः; तथा नियमकल्पनायां प्रमाणाभावादिति भावः। शास्त्रार्थत्वमभ्युपगम्यापि क्रमकालन्यायातिदेशेनाविरोधमाह— अथापीति। विरोधमभ्युपगम्य सिद्धान्तन्यायं दर्शयति— यद्यपीति। सर्वपदार्थगुणत्वादिति। विततिरूपक्रमस्य सर्वपदार्थाश्रयत्वेन तद्गुणत्वमस्तीति भावः। कालस्य तु पूर्वाह्णादिरूपस्य स्वतन्त्रत्वेऽपि पदार्थावच्छेदकत्वात्तद्गुणत्वम्। प्रमाणबलस्य पूर्वभावित्वानुमानमपाकरोति— न चेति। सर्ववेष्टनादिस्मृतिवदाचमनादिस्मृतीनामप्रामाण्यमेवास्तु; तथा च प्रथमाचमनाद्यसंग्रहात्तदनुगुणतया क्रमकालौ नापतत इत्याशङ्क्याह— यद्धीति। न हि सर्ववेष्टनादिस्मृतीनां स्मृतित्वप्रयुक्तमप्रामाण्यम्,

---

1. अ. श्रुत्या प्रतिपन्नावपि 2. पदार्थेषु इत्यधिकम् 3. अ. अनवतारेण

धापेक्षमप्रमाणं तत्तदभावापेक्षया प्रमाणमेवेत्यवगन्तव्यम् ॥

न चात्र बाधकमस्ति, प्रमाणबलाबलन्यायबाधकत्वात् । तस्मादाचमनादेर्बलीयस्त्वात्तदनुरोधेनैव श्रुत्युक्तक्रमादयो बाध्यन्त इत्याचमनादिस्मृतीनामबाधात्प्रामाण्यमिति । न त्विदमेवाधिकरणं पूर्वपक्षस्थातिमन्दत्वात्, यज्ञोपवीतादेश्च प्रत्यक्षश्रुतिविहिततयेनानुसाहरणत्वात् । तस्माद्यत्पूर्वं शाक्यादिशास्त्राभासानामप्राप्ताण्यमुक्तं तत्रैव चोद्योत्तरत्वेनार्थं

किं तु बाधकसत्त्वप्रयुक्तम् । प्रामाण्यं त्वौत्सर्गिकमिति बाधकाभावादाचमनादिस्मृतीनां प्रामाण्यं व्यवतिष्ठत इत्यर्थः । पूर्वपक्षस्यातिमन्दत्वादिति । शाखान्तराधिकरणे हि 'अपि वा क्रमसंयोगाद्विधिपृथक्त्वमेकस्यां व्यवतिष्ठेत' इति सूत्रेण क्रमादिविरोधाच्छाखान्तरीयपदार्थानुपसंहारमाशङ्क्य 'विरोधिना त्वसंयोगादैककर्म्ये तत्संयोगात् विधीनां सर्वकर्मप्रत्ययः स्यात्' इति सूत्रेण पदार्थानां क्रमादिबाधकत्वं वक्ष्यते। तेन गतार्थत्वादिह निराकरणीयाभावादाद्यपूर्वपक्षस्तावदतिमन्दः। न च शाखान्तरीयवाक्यात् स्मृतेर्दुर्बलतया तन्न्यायाविषयत्वं शङ्कनीयम् । स्मार्तपदार्थप्राप्तिदशायां प्रयोगाङ्गक्रमाद्यनुपस्थित्या विरोधाप्रतिसंधानेन शाखान्तरीयवाक्येनेव स्मृत्याऽपि पदार्थप्रापणोपपत्त्या न्यायसामान्यानपवादात्। किं च स्मार्तपदार्थानामपि श्रुतिप्राप्यत्वमविशिष्टम्, स्मार्तपदार्थोपस्थितिदशायां तद्विरोधिक्रमाद्यप्राप्त्या मूलश्रुत्यनुमानस्य प्रतिहतत्वात्। प्रत्यक्षश्रुतिप्राप्यत्वं[1] त्वप्रयोजकम्, अनुमेयचोदकप्राप्यत्वमप्यपेक्ष्यैव तदनुगुणक्रमकल्पनायाः पञ्चमे स्थितत्वात्। तत्र हि— 'आग्नावैष्णवमेकादशकपालं निर्वपेत्, सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुः' इति श्रुतायां विकृतीष्टौ मुख्यक्रमेण प्रथमं सारस्वताज्यस्य निर्वाप इति प्राप्ते सर्वेषु पदार्थेषु प्राप्तेषु पश्चात्प्रयोगवचनेन तेषां क्रमः कल्प्यः। प्राकृतपदार्थाश्च निर्वापादयश्चोदकेन प्राप्नुवन्तः प्रकृतिकल्पेन क्रमेण सहैव प्राप्नुवन्ति। अतस्तद्विरुद्धं क्रमान्तरं प्रयोगवचनेन कल्पयितुं न युक्तमिति 'तद्वचनात्तु विकृतौ यथाप्रधानं स्यात्' (जै. ५-१-१७) इत्यधिकरणे निर्णीतम्। तस्मात्प्रथमपूर्वपक्षोऽतिमन्दः। तथा द्वितीयपूर्वपक्षोऽप्यतिमन्दः, प्रमाणप्रवृत्तेः पूर्वभावित्वेऽप्यननुसंहितार्थयोः 'धूमोऽस्ति, नास्ते' इति वाक्ययोः विरोधानुसंधानादर्शनेन प्रमाणयोर्विरोधानुसन्धानस्य प्रमेयविरोधानुसंधानाधीनतायाः स्पष्टत्वात्। स्मृतेः श्रुतिमूलत्वानिश्चये प्रामाण्याभावेनाऽऽचमनादेस्तत्प्रमेयत्वासिद्धेः तत्सिद्ध्यर्थं मूलश्रुतिनिश्चयो वक्तव्य इति प्रमाणबलाबलविभागायोगाच्चेति भावः। यज्ञोपवीतादेश्चेति। 'तस्माद्यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा यज्ञस्य प्रसृत्यै' इति यज्ञोपवीतस्य प्रत्यक्षविधानम्। 'यथा वा दक्षिणः पाणिरेवं देवयजनम्' इति दक्षिणपाणिसाम्येन देवयजनस्तुतिः। देवयजनवद्दक्षिणपाणेर्यज्ञाङ्गत्वे सत्येवाऽवकल्प्यत इति तदुन्नीतं दक्षिणाचारस्य विधानम्। 'न सोमेनोच्छिष्टा भवन्ति' इति सोमभक्षणेनोच्छिष्टाभाववचनमुच्छिष्टत्वनिमित्ताचमनाप्राप्त्यर्थं तदुच्छिष्टान्तरेष्वाचमने लिङ्गमिति तदुन्नीतं श्रुताद्युच्छिष्टनिमित्ताचमनस्य विधानम्। यद्यप्याचमनदक्षिणाचारविधाने न प्रत्यक्षे तथाऽप्यत्र प्रत्यक्षश्रुतिशब्देन

---

1. म. प्राप्यत्वं

सूत्रद्वयं व्याख्येयम् । यत्तु तेष्वहिंसादिवचनं श्रुतिस्मृतिशिष्टं न कोपयति तत्प्रमाणं भवत्विति चेत्' तत्रोत्तरम् 'न शास्त्रपरिमाणत्वात्' इति । न खलु येन केनचित् प्रमितो धर्मः फलं साधयति तत्प्रमाणं भवति । 'स्वाध्यायोऽध्येतव्यः' 'वेदोऽखिलो धर्ममूलम्' 'तद्विदां च स्मृतिशीले' 'धर्मज्ञसमयः प्रमाणं वेदाश्च' ।

'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥

इत्येवमादिभिर्वेदादिभिरेव धर्मप्रमितेर्नियमनादन्यतः प्रमितस्य फलसाधनत्वाभावेन धर्मत्वाभावात्तेषामप्रामाण्यमिति ॥

स्मृत्यनुमेयश्रुतिर्विवक्षितेति द्रष्टव्यम् । चोद्योत्तरत्वेनेत्युक्तम्; तच्चोद्यं दर्शयति— यत्त्विति । शास्त्रपरिमाणत्वादित्यस्य शास्त्राणां धर्मप्रमाणानामियत्तया परिच्छिन्नत्वादित्यर्थमभिप्रेत्य व्याचष्टे— न खल्विति । परिमाणशब्दः कर्मणि ल्युडन्तः । परिमाणत्वशब्देन गुणवाचिनाऽपि षष्ठ्यन्तस्य शास्त्रशब्दस्य 'तदशिष्यं संज्ञाप्रमाणत्वात्' इति पाणिनीयप्रयोगात् ज्ञापकात्समासः । स्वाध्यायोऽध्येतव्य इति । यद्यप्यहिंसाया वेदार्थत्वेऽपि वेदेनैव ज्ञातव्येति नियमविधिविषयत्वं न संभवति; वेदेनैवावगता हिंसा प्रत्यवायाय भवतीति नियमाश्रयणे ये हिंसा प्रत्यवायकरीति वेदेन न जानन्ति तेषां हिंसाकरणेऽपि प्रत्यवायाभावप्रसङ्गात्, हिंसावर्जनं वेदेनावगतमेव प्रत्यवायपरिहाराय भवतीति नियमाश्रयणे ये वेदेन तन्न जानन्ति तेषां हिंसावर्जनेऽपि प्रत्यवायप्रसङ्गात्; तथाऽपि वेदेनैव ज्ञातव्यत्वनियमः प्रागहिंसादीत्यादिशब्दगृहीतेषु शाक्यादिमतसाधारणेषु प्रपातटाकादिनिर्माणध्यानदानदयादिषु द्रष्टव्यः । हिंसातद्वर्जनयोस्त्वनवगतयोरपि प्रत्यवायतत्परिहारहेतुत्वाद्विहितेष्विव नावगमकप्रमाणनियमः, स्वकार्यजननार्थमवगमकापेक्षायामेव तन्नियमावतारणात् । तथाऽपि रागतः प्रसक्तायां हिंसायां तद्वर्जनसिद्ध्यर्थमहिंसाशास्त्रार्थावगतिरेष्टव्येति चेत्— सत्यम्; सा तु संध्यावन्दनशौचाचाराद्यवगतिवत्पित्रादिवचनादेवेष्टव्या, उपनयनप्रभृत्यध्ययनारम्भात् प्रागेव तदवगत्यपेक्षणात् । 'उपनयनादिर्नियमः' इत्युपक्रम्य 'वर्जयेत्' इत्यनुवृत्तौ 'अदत्तादानं हिंसामाचार्यतत्पुत्रस्त्रीदीक्षितनामानि' इति स्मरणात् । अतो न काप्यहिंसाशास्त्रार्थे वेदादवगन्तव्यत्वनियमः । अत एव वेदाप्रामाण्यं वदतामपि हिंसातद्वर्जनाभ्यां तत्कार्यप्राप्तिः । एवं सत्यपि ग्रन्थे प्रथमहिंसाग्रहणं तटाकादिधर्माणां 'नीचादप्युत्तमां विद्याम्' इति न्यायेन शाक्यादिशास्त्रैरवगतिर्भूदित्यत्र उपपत्तिसूचनार्थम् । 'अहिंसा परमो धर्मः' इति शाक्यादीनामुक्तिर्न हिंसावर्जनावश्यंभावतात्पर्येण; किं तु हिंसायुक्तवैदिकयागादिनिन्दाभिप्रायेण । अतो वेदवैदिकप्रद्वेषिणां तेषामुक्त्याऽवगतं तटाकारामादिकं धर्मत्वेन न ग्राह्यम्, श्वदृष्टानीतं गङ्गाम्भ इव पावनत्वेनेत्युपपत्तिस्तेन सूचिता

यत्तु तृतीयं सूत्रम् 'अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् तेष्वदर्शनाद्विरोधस्य' इति तत्सदाचारसामान्यप्रतिपादनार्थमधिकरणान्तरं व्याख्येयम् । अज्ञानिबन्धनाः सदाचारा वसन्तोत्सवादिविषया उदाहरणम् । प्रमाणमप्रमाणं वेति संदेहः । तदर्थं च श्रुतिमूलत्वं भ्रान्त्यादिमूलत्वं वेति चिन्तनीयम् । तत्र स्मृत्यधिकरणे कर्तृसामान्यादाचाराणामपि स्मृतिवत्प्रतिपादितमपि प्रामाण्यं निर्निबन्धनतया व्यतिक्रमसाहससंकरदर्शनाच्चाक्षिप्य समाधीयते । यदि वसन्तोत्सवादयोऽष्टकादिवेदमूला भवेयुस्ततस्तद्वदेव मन्वादिभिरपि निबध्येरन् । अनि-

---

भवति । वेदादिभिरेवेति । यद्यप्यध्ययनविधिबलाद्वेदेनैव धर्मप्रमितिर्नियता, तथाऽपि वेदानुमापकतया स्मृत्यादीनामपि तदुपयोगिताऽभ्युपेत्याधिकरणेन वेदादिभिरित्युक्तम् । ननु अध्ययनविधिबलादेव धर्मप्रमाणनियमसिद्धेः किमर्थं दिष्टाकोपादिसूत्रद्वयम् ? तत्सिद्धस्यैवार्थस्य बुद्धिस्थशङ्कानिराकरणाय स्मरणार्थम् । अत एव गुणसूत्रत्वमुक्तम्, अपूर्वन्यायव्युत्पादनाभावात् । तद्व्युत्पादने हि आक्षेपिक्या संगत्याऽधिकरणान्तरार्थत्वं स्यात् । अपि वेति । ननु 'तेष्वदर्शनाद्विरोधस्य' इति सूत्रांशो यववराहाधिकरणोत्तरसूत्रादित्वेन भाष्ये लिखितः । स्वयमपि तदेव ग्रन्थकृताऽनुपदं लिख्यते । कथमेतत्सूत्रशेषत्वेनापि लिखितम् ? वार्त्तिके तथा लेखनात् । तत्र तथा लेखनं चात्रापि सूत्रे तदपेक्षणात् । द्विविधो हि शिष्टाचोपाधिकरणसिद्धान्तः । यस्तत्र विरोधमभ्युपगम्य प्रमेयबलाबलीयस्त्वेन सिद्धान्तः, सः 'कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्' इत्यनेन वेदवेदिमध्ये शिष्टैः प्रयुक्तानि श्रुतादिनिमित्तकाचमनादीनि लोभादिदृष्टकारणाग्रहणे विद्यमाने प्रतीयेरन्, कर्तव्यत्वेनावश्यमाद्रियेरन्, सत्यपि क्रमादिविरोधे प्रमेयबलाबलस्य प्रमाणबलाबलादभ्यर्हितत्वादित्यर्थकेन दर्शितः । प्राथमिकाचमनादिपदार्थान्वये पश्चादुपतत्क्रमादिविरोध एव नास्तीति यः सिद्धान्तः सः 'तेष्वदर्शनाद्विरोधस्य' इत्यन्तेन स्फुटमविरोधप्रतिपादकेन प्रदर्श्यत इति । वसन्तोत्सवादय इति । फाल्गुनकृष्णप्रतिपदि क्रियमाणपरस्परजलसेचनादिर्वसन्तोत्सवः । आदिशब्देन कार्त्तिकशुक्लप्रतिपदादिषु क्रियमाणाः प्रदीपदानादयो गृह्यन्ते । व्यतिक्रमसाहससंकरदर्शनादिति । प्रजापतेः स्वदुहितृकामना, इन्द्रस्याहल्यासक्तिः, चन्द्रस्य गुरुभार्याक्रमणम्, वसिष्ठस्य पुत्रशोकात् भृगुपतनजलप्रवेशादियत्नः, विश्वामित्रस्य चण्डालयाजनम्, पाण्डवानामेकदारतिरित्यादयः प्राचीनानां धर्मव्यतिक्रमाः । इदानींतनानामपि दाक्षिण्यात्यानां पर्युषितभोजनादुपनीतभार्यादिसहभोजनमातुलपितृष्वसृदुहितृपरिणयनादयः, औत्तराहाणामूर्णावेत्रयशीधुपानतुरगोष्ट्रादिव्यवहारायुधग्रहणसमुद्रयानादयः । साहसानि; जामदग्न्यकृतमातृशिरश्छेदादीनि क्रूरकर्माणि । निर्निबन्धनतयेति हेतुं विवृणोति—अष्टकादिवदिति । ये विप्रकीर्णवेदमूलास्ते तद्दृष्टाभिर्मन्वादिभिर्निबद्धा इत्यष्टकादिषु दृष्टम् । आचारप्राप्ता अपि वेदमूलाश्चेत् तैर्निबध्येरन्; न निबद्धा इत्यतस्तन्मूलत्वाभावो ज्ञायत इति मूलवेदाभावादप्रमाणान्याचारा इत्यर्थः । ननु अनिबन्धनमा वेद्धम्, 'वेदोऽखिलो धर्ममूलं स्मृतिशीले च

तानि यस्य तथोक्तो मुनिः। 'आश्रमभूमि शोणितम्' इति विश्वः। तं पाण्डुमब्रवीत्। किमित्याह— हे नृप हे राजन् आख्यया नाम्ना। 'प्रकृत्यादिभ्य उपसंख्यानम्' इति तृतीया। किन्दम इति द्विजोऽहं ब्राह्मणोऽहं स्मरेषुविद्धः कामबाणताडितः सन् मृगत्वं हरिणत्वं प्राप्तः सन् निजां स्वकीयां वधूं मृगीभूतामित्यर्थः। न तु परस्त्रीमिति भावः। 'वधूर्जाया स्नुषा स्त्री च' इत्यमरः। रमयन् क्रीडयन् तव शरेण बाणेन हतोऽस्मि। निरपराधोऽहं त्वया हतोऽस्मीति भावः॥ ५७॥

यमान्तिकं यास्यति भाव ईदृशे
भवानिति व्याहृतिमाञ्जहावसून्।
पतिं स्वमारोप्य चितामुदर्चिषं
तदीयपत्नी च पतिव्रताऽन्वगात्॥ ५८॥

यमेति। हे राजन्, ईदृशे ईदृग्विधे भावे सति चेष्टायां सत्याम्। 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु' इत्यमरः। भवान् यमान्तिकं यमसमीपं यास्यति प्राप्स्यसीत्यर्थः। 'शेषे प्रथमः' इति प्रथमपुरुषः। शेषश्चायं भवच्छब्दः युष्मदस्मद्विषयत्वादिति। इतः परं त्वं यदि स्त्रीसंगमं करिष्यसि, तर्हि तत्काल एव मरिष्यसीति भावः। इति उक्तप्रकारेण व्याहृतिरुक्तिस्तस्यास्तीति व्याहृतिमान् उक्तवानित्यर्थः। असून् प्राणान् 'पुंसि भूम्न्यसवः प्राणाः' इत्यमरः। जहौ तत्याज। जहातेर्लिट्। पतिव्रता—'आर्ताऽऽर्ते मुदिते हृष्टा प्रोषिते मलिना कृशा। मृते म्रियेत या नारी सा स्त्री ज्ञेया पतिव्रता॥' इत्युक्तलक्षणात्। तदीयपत्नी मुनिभार्या च स्वमात्मीयं पतिं भर्तारं उदर्चिषं उद्गताग्निज्वालां चितां चितिम्। 'चिता चित्या चितिः स्त्रियाम्' इत्यमरः। आरोप्य प्रापय्य अन्वगात् अनुजगाम। 'तिस्रःकोट्यर्धकोटी च यानि रोमाणि मानुषे। तावत्कालं वसेत्स्वर्गे भर्तारं याऽनुगच्छति॥' इति स्मरणादिति भावः॥ ५८॥

नृपः स निर्विण्णमना विरक्तिमा-
न्समं वधूभ्यां चरितुं महत्तपः।
निवर्त्य दीनानखिलाननुव्रजान्
वनं मुनीनामनुपप्लवं ययौ॥ ५९॥

नृप इति। निर्विण्णमनाः मुनिवधादुःखितमनाः स नृपः पाण्डुः विरक्तिमान् वैराग्ययुक्तः सन् वधूभ्यां कुन्तीमाद्रीभ्यां समं सार्धं महत्तपश्चरितुं कर्तुं दीनान् दुःखितान् अखिलान् समस्तान्

अनु पश्चात्प्लवन्ते गच्छन्तीति अनुप्लवा अनुचराः । 'ऋदोरप्' इत्यप् । 'अनुप्लवः सहायश्चानुचरोऽभिचरः समाः' इत्यमरः । तान् निवर्त्य निवृत्तान् कृत्वा । अन्यथा तपोवनविघातः स्यादिति भावः । अनुपप्लवमनुपद्रवं मुनीनां वनं तपोवनं ययौ ॥ ५९ ॥

समं सुखैर्वैषयिकैर्विभूषणा-
न्यपास्य वल्कं वहता जटाभृता ।
चिराय पत्नीसहितेन पाण्डुना
तपो वितेने शतशृङ्गवासिना ॥ ६० ॥

सममिति । विषया इन्द्रियार्थाः शब्दकुचन्दनवनितादयः । 'विषयास्त्विन्द्रियार्थेऽपि देशे जनपदेऽपि च' इति विश्वः । तत्प्रभवैर्वैषयिकैः सुखैः समं विभूषणान्यपास्य विषयसुखानि भूषणानि च त्यक्त्वेत्यर्थः । वैषयिकसुखत्यागस्य विभूषणत्यागनान्तरीयकत्वात् वैषयिकसुखत्यागकथनेन विभूषणान्तर्गतविभूषणत्यागे सिद्धेऽपि पुनर्विभूषणशब्दग्रहणं गोबलीवर्दन्यायेन द्रष्टव्यम् । वल्कं तरुत्वचं वहता बिभ्रता । 'वल्कं वल्कलमस्त्रियाम्' इत्यमरः । जटाभृता जटाधारिणा पत्नीसहितेन पत्नीयुक्तेन । शतशृङ्गो नाम कश्चित्पर्वतः तत्र वासिना स्थितिमता पाण्डुना राज्ञा चिराय चिरकालं तपः कृच्छ्रचान्द्रायणादिकम् । 'तपश्चान्द्रायणादौ स्याद्धर्मे लोकान्तरेऽपि च' इति विश्वः । वितेने विहितम् । तनोतेः कर्मणि लिट् ॥ ६० ॥

नखंपचस्त्रीकुचमर्दनोचितः
करीन्द्रकुम्भाहतिकेलिलम्पटः ।
स तेन [1]भीताभयदानदीक्षितः
कुशाङ्कुरादानविधौ कृतः करः ॥ ६१ ॥

नखंपचेति । नखंपचतस्तपत इति नखंपचो यौवनोष्मलावित्यर्थः । 'मितनखे च' इति खच्प्रत्ययः । 'अरुर्द्विषत्' इत्यादिना मुम् । तयोः स्त्रीकुचयोर्मर्दने पीडने उचितः अभ्यस्तः परिचित इत्यर्थः । 'उचितस्यामिते योग्ये ज्ञातेऽभ्यस्ते समञ्जसे' इति रत्नमालायाम् । करीन्द्राणां गजश्रेष्ठानां कुंभाहतिकेलौ कुंभास्फालनक्रीडायां लम्पटो लालसः । 'लोलुपो लोलुभो लोलो लम्पटो लालसोऽपि च' इति शब्दार्णवे । भीतानामुद्विग्नानामभयदाने अभयप्रदाने दीक्षितः कृतसंकल्पः ।

---

1. दीना०

दीनानीति वा पाठः। स प्रसिद्ध इत्यर्थः। अत्र 'अच्छन्दस्यपि दृश्यते' तदुक्तं काशिकायाम्— 'प्रकान्तप्रसिद्धाद्भूतार्थविनियुक्तच्छन्दो यदुपाख्यानं नापेक्षते' इति। एवंविधः करो दण्डः तेन पाण्डुना कुशाङ्कुराणां दर्भप्ररोहाणां आदानादौ हरीतक्यां क्रय इव विहितः॥

धनुर्गुणामर्शनकर्कशाङ्गुलि[1]-
र्महेभकुम्भाहतिनिष्ठुरोदरः[2]
दिने दिने होमसमिद्विभञ्जने
विवेद हस्तोऽस्य न जातु वेदनाम् ॥ ६२ ॥

धनुर्गुणेति। धनुषश्चापस्य गुणो मौर्वी 'गुणोऽप्रधाने रूपादौ मौर्व्यां सूत्रे वृकोदरे' इति विश्वः। तस्यामर्शनेन संमार्जनेन कर्कशाङ्गुलिः कठिनाङ्गुलिः महेभानां महागजानां कुम्भाहत्या कुम्भास्फालनेन निष्ठुरोदरः कठिनतलः अस्य पाण्डोर्हस्तः दिने दिने प्रतिदिनं होमार्थं समिधः इध्मानि। 'इध्ममेधः समित्स्त्रियाम्' इत्यमरः। तासां विभञ्जने प्रस्रश्चने। 'कृत्योना च षष्ठी समस्यत इति वक्तव्यम्' इति षष्ठीसमासः। तत्र यां वेदनां तीव्रदुःखं जातु कदाचिदपि न विवेद न जानाति। वेत्तेर्लिट्॥ ६२॥

तपोवने राज्य इव स्थितो विभु-
र्मृगैर्विनीतैः[3] सह बद्धसौहृदः।
निगृह्य शत्रूनबहिःस्थितानयं
प्रवर्धयामास तपोमयं धनम् ॥ ६३ ॥

तपोवन इति। तपोवने तापसाश्रमे राज्ञो भावः कर्म वा राज्यम्। पुरोहितादित्वाद्यत्। तस्मिन् राज्ये साम्राज्य इव स्थितो विभुः पाण्डुः विनीतैर्विधेयैः मृगैः सह सुहृदयस्य भावः सौहृदं सख्यम्। युवादित्वादण्प्रत्ययः। 'हृदयस्य हृल्लेखयदण्लासेषु' इति हृदादेशः। बद्धसौहृदो बद्धसख्यः सन् अबहिःस्थितानन्तर्वर्तिनः शत्रून् कामक्रोधादीन् निगृह्य नियम्य तपोमयं तपोरूपम्। स्वार्थे मयट्। धनं प्रवर्धयामास वर्धयते स्म। लोके राजानः शत्रून् जित्वा धनं वर्धयन्ति॥ ६३॥

---

1. ०कर्शिताङ्गुलि 2. झर्झरोदरः 3. ०तैरिव लब्ध०

स जातु राजर्षिरुवाच यादवीं
सपर्यया व्यासमुनेः प्रहृष्यतः ।
वरप्रसादेन मम प्रजावती
बिभर्ति गर्भं शतपुत्रदायिना ॥ ६४ ॥

स इति । राजर्षिः पाण्डुः जातु कदाचित् यादवीं कुन्तीमुवाच । किमित्याह— सपर्यया सेवया प्रहृष्यतः नन्दतः व्यासमुनेः संबन्धिना शतपुत्रदायिना शतपुत्रप्रदेन वरप्रसादेन वरानुग्रहेण हेतुना मम प्रजावती भ्रातृजाया गान्धारी गर्भं बिभर्ति धारयति। भृञो लटि 'श्लौ' इति द्वित्वचनम्। 'भृञामित्' इत्यभ्यासस्येकारः ॥ ६४ ॥

मया न तत्पुण्यमकारि सूयते
सुताह्वयं येन तमोपहं महः ।
यदन्यदप्यार्जितमध्वरादिभि-
र्वृथा हि तत्सर्वमपुत्रसंपदः ॥ ६५ ॥

मयेति । येन पुण्येन सुत इत्याह्वयो नाम यस्य तत् सुताह्वयम् । 'अथाह्वयः आख्याह्वे अभिधानं च नामधेयं च नाम च' इत्यमरः । तमः शोकमन्धकारं चापहन्तीति तमोपहम् । 'अपे क्षेशतमसोः' इति हन्तेर्डप्रत्ययः । महस्तेजः सूयते जन्यते। कर्मणि लट्। तत्पुण्यं सुकृतं मया माकारि न कृतम्। करोतेः कर्मणि लुङि चिणि वृद्धिः। यज्ञादिसुकृतमप्यपुत्रकस्यार्किंचित्करमेवेत्याह— यदिति। अध्वरादिभिर्यज्ञादिभिरार्जितं संपादितमन्यदपि यत्पुण्यमस्ति तत्सर्वं पुण्यं न विद्यते पुत्रसंपत् पुत्रसमृद्धिर्यस्य तस्य मम वृथा व्यर्थं हि। तदुक्तं महाभारते— 'संतानरहितो जन्तुरिह लोके परत्र च। न पूज्यते वृथा जन्म कुलं तस्य विनाशितम्' ॥ ६५ ॥

स्तनं जनन्याः पिबतोऽङ्कशायिनो
मुखं शिशोरश्रुमुचा पिबन्दृशा ।
पिता यथा निर्वृतिमश्नुते तथा
ज्वलन्पितॄणां हृदि शोकपावकः ॥ ६६ ॥

स्तनमिति । जनन्या मातुः स्तनं लक्षणया स्तन्यमित्यर्थः । पिबतो धयतः अङ्कशायिनः उत्सङ्गवर्तिनः शिशोः अर्भकस्य मुखं अश्रूणि आनन्दबाष्पं मुञ्चतीत्यश्रुमुक् किप् । तया दृशा पिबन्नादरेण पश्यन् पिता यथा येन प्रकारेण निर्वृतिं सुखमश्नुते प्राप्नोति तथा तेन प्रकारेण पितॄणां हृदि हृदये ज्वलन्दीप्यमानः शोकपावको दुःखाग्निर्निर्वृतिं नाशमश्नुते । 'सुखनाशौ निर्वृती' इति रत्नमालायाम् । पुत्रोत्पत्त्या पितुः पितॄणां चानन्दो भवतीति भावः । 'अशू व्याप्तौ' इति ळट् ॥ ६६ ॥

तदद्य मे पूरय कुन्ति काङ्क्षितं
भजन्ति दारैर्गृहमेधिनः शुभम् ।
अहं तु शापोपहतस्तपस्विनो
लभस्व पुत्रं पुरुषान्महौजसः ॥ ६७ ॥

तदिति । तत्तस्मात्कारणात् कुन्तेरपत्यं स्त्री कुन्ती 'वृद्धेत्कोसलाजादाञ्ञ्यङ्' 'स्त्रियामवन्तिकुन्तिकुरुभ्यश्च' इति ञ्यङ्प्रत्ययस्य लुक् । 'इतो मनुष्यजातेः' इति ङीष् । तस्याः संबुद्धिः हे कुन्ति । अद्य मे मम काङ्क्षितं मनोरथं पूरय पूर्णं कुरु । गृहमेधिनो गृहेषु संगताः गृहस्था इत्यर्थः । 'मेधृ संगतौ' इत्यस्माद्धातोस्ताच्छील्ये णिनिः । अथवा मेधशब्दो यागवचनः यथा त्वमेव पितृवचनं यथा त्वमेव पितृमेध इति । 'दारेषु च गृहाः' इत्यमरः । गृहैर्दारैः सहितो मेधः ; स एषामस्तीति गृहमेधिनः । सर्वधनीत्यादिवत् कर्मधारयादपि मत्वर्थीयः । दारैः पत्नीभिः शुभं कुशलं भजन्ति प्राप्नुवन्ति । 'क्रियाणां खलु धर्म्याणां सुपत्न्यो मूलकारणम् ।' इति वचनादिति भावः । किं तु अहं तु तपस्विनः किन्दमनाम्नो मुनेः शापेन उपहतो नष्टः । महौजसः पुरुषात् सकाशात् पुत्रं लभस्व प्राप्नुहि । लभेर्लोटि मध्यमपुरुषैकवचनम् । 'अपुत्रेण निजक्षेत्रे नियोगोत्पादितः सुतः । उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥' इति वचनादिति भावः ॥ ६७ ॥

तमाह सा नाथ विगर्हितं सता-
मनुक्तपूर्वं वचनं त्वयोदितम् ।
पतिं त्वदन्यं कथमाश्रयेत्पृथा
समुद्रगा किं सरिदेति पल्वलम् ॥ ६८ ॥

तमिति । सा कुन्ती तं पाण्डुमाह उक्तवती । आहेति भूतार्थे लट्प्रयोगो भ्रान्तिमूल इत्याह वामनः । हे नाथ स्वामिन्, गतां सङ्गिरित्यर्थः । 'कृत्य च वर्तमाने' इति चकारात् षष्ठी । विगर्हितं निन्दितं पूर्वमनुक्तमुक्तपूर्वं अधुनोक्तमित्यर्थः । 'एकमुपेति समासः । वचनं त्वया एतितमुक्तम् । वदेः कर्मणि क्तः । 'गतिरित्वाप' इत्यादिना संप्रसारणम् । पृथा कुन्ती त्वदन्यं त्वद्व्यतिरिक्तं पतिं कथमाश्रयेत् कथं प्राप्नुयात् ; नाश्रयेदेवेत्यर्थः । 'विभाषा कथमि लिङ् च' इति लिङ् । पतिव्रत्यद्योतनार्थं स्वनामग्रहणम् । तथा हि—समुद्रं गच्छतीति समुद्रगा । 'अन्यत्रापि दृश्यते' इति डप्रत्ययः । समुद्रगामिनी सरित् नदी पल्वलमल्पसरः । 'वेशन्तः पल्वलं चाल्पसरः' इत्यमरः । एते प्राप्नोति किम् ; न प्राप्नोत्येवेत्यर्थः ॥ ६८ ॥

नृपेण भूयः सनिदर्शनोक्तिना
कथंचिदभ्यर्थितया तया ततः ।
अभाणि लाभः परितोषितान्मुनेः
शुभस्य मन्त्रस्य विना परीक्षणम् ॥ ६९ ॥

नृपेणेति । सनिदर्शनोक्तिना सदृष्टान्तवचनेन नृपेण पाण्डुना भूयः पुनरपि कथंचित महता प्रयासेन अभ्यर्थितया प्रार्थितया, अनुनीतयेति यावत् । तया कुन्त्या ततः प्रार्थनानन्तरं परितोषितात् परिचर्यया संतोषितात् मुनेर्दुर्वाससः सकाशात् शुभस्य मन्त्रस्य लाभः प्राप्तिः परीक्षणं विना पूर्वमात्मकृतां परीक्षां वर्जयित्वेत्यर्थः । 'पृथग्विना' इत्यादिना अन्यतरस्यां द्वितीया । अभाणि उक्तः । कर्मणि लुङ् ॥ ६९ ॥

प्रशंसता तेन मुदा नियोजिता-
ऽजुहाव धर्मं निजमन्त्रसंपदा ।
अनेन संपर्कमुपेयुषी च सा
रराज [1]तारेव तुषाररश्मिना ॥ ७० ॥

प्रशंसतेति । पृथा कुन्ती प्रशंसता मन्त्रलाभश्रवणात् स्तुवता तेन पाण्डुना नियोजिता प्रेरिता सती निजमन्त्रसंपदा स्वमन्त्रोत्कर्षेण धर्मं यममाजुहाव आहूतवती । ह्वेञो लिट् ।

1. राकेव

अनेन यमेन सङ्गमुपेयुषी प्राप्तवती सती तुषारोहिमना चन्द्रेण संयोगमुपेयुषी तारा बृहस्पतिपत्नीव रराज शुशुभे। 'अथ तारा स्यात्सुग्रीवगुरुयोधिनोः' इति रत्नमालायाम्। पुरा किल चन्द्रो महाबलेपात् सकलदेवगुरोर्बृहस्पतेः तारां नाम पत्नीं जहारेति पुराणप्रसिद्धिः। यद्वा तारा रोहिणीव रराज ॥ ७० ॥

ततो मुहूर्तेऽभिजिति प्रियंकरे
तिथौ शुभायां प्रथितौजसं पृथा।
युधिष्ठिरं पुत्रमसूत पावनं
जटाटवी गाङ्गमिवौघमीशितुः ॥ ७१ ॥

तत इति। ततोऽनन्तरं पृथा कुन्ती शुभायां तिथौ दिने प्रियंकरे क्षेमकारिणि। 'क्षेमप्रियमद्रेऽण् च' इति चकारात् खच्। 'अरुर्द्विषत्' इत्यादिना मुम्। अभिजिति अभिजित्संज्ञके मुहूर्ते शुभलग्न इत्यर्थः। प्रथितौजसं प्रसिद्धतेजसं पावनं शुद्धं युधि रणे स्थिरः युधिष्ठिरः। 'गवियुधिभ्यां स्थिरः' इति षत्वम्। 'हलदन्तात्सप्तम्याः संज्ञायाम्' इत्यलुक्। तं युधिष्ठिरं युधिष्ठिराख्यं पुत्रम्। 'अजातशत्रुः शल्यारिर्धर्मपुत्रो युधिष्ठिरः' इत्यमरः। ईशितुर्महेश्वरस्य जटाटवी जटाकाननं गाङ्गं गङ्गासंबन्धिनं ओघं प्रवाहमेवासूत जनयति स्म। सूतेर्लङ् ॥ ७१ ॥

सुरैस्तदुत्पत्तिदिनेऽभिनन्दिते
प्रसक्तिरद्भिः सह दिग्भिराददे।
अनोकहानां कुसुमैः सहाधिकं
मनांसि चामोदमबीभरन्नताम् ॥ ७२ ॥

सुरैरिति। सुरैर्देवैरभिनन्दिते साधुमोदिते तस्य युधिष्ठिरस्य उत्पत्तिदिने जन्मदिवसे दिग्भिः कन्याभिः अद्भिः सलिलैः सह प्रसक्तिः प्रसादः। सेवः स्त्रियां क्तिन्। आददे स्वीकृतवान्। दिशश्चापश्च प्रसन्ना जाता इत्यर्थः। सतां सज्जनानां मनांसि चित्तानि च अनोकहानां द्रुमाणाम्। 'अनोकहः कुटः सालः पालाशी द्रुद्रुमागमाः' इत्यमरः। कुसुमैः पुष्पैः सहाधिकमामोदं हर्षं गन्धं च। 'आमोदो हर्षगन्धयोः' इति विश्वः। अधारयन् आवहन्। सज्जनचित्तानि हृष्टानि, द्रुमकुसुमानि च सुरभीणि जातानीत्यर्थः। धरतेः स्वार्थे ण्यन्ताल्लङ् ॥ ७२ ॥

निरीक्षमाणस्य सुताननं शुभं
नृपस्य मात्रात्पुलका निरन्तरम् ।
निरीयुरन्तः प्रमदाय सर्पते
भृवं समन्तादवकाशदित्सया ॥ ७३ ॥

निरीक्षमाणस्येति । शुभं रम्यं सुताननं पुत्रमुखं निरीक्षमाणस्य पश्यतो नृपस्य पाण्डोर्गात्रादेहात् पुलका रोमाञ्चाः अन्तः अभ्यन्तरे सर्पते व्याप्नुवते प्रमदाय हर्षाय समन्तात्सर्वतः अवकाशस्यावस्थानस्य दित्सया दातुमिच्छया। ददातेः सन्नन्तात् 'अ प्रत्ययात्' इति स्त्रियामकारप्रत्ययः । 'सनि मीमा' इत्यादिना इसादेशः । 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः । निरन्तरं यथा भवति तथा निरीयुः निर्गताः । ध्रुवमिति वितर्के । 'तर्कनिश्चययोः क्वीवे ध्रुवम्' इति रत्नमालायाम् । निरूपूर्वादिण् गतावित्यस्माल्लिटि 'दीर्घः इणः किति' इति दीर्घः ॥ ७३ ॥

निशम्य कुन्त्याः सुतजन्म सौबली
मयैष गर्भस्तु चिराद्धृतो महान् ।
न जायते जात्विति [1]वोढुमक्षमा
सधैर्यमात्मोदरमाहताश्मना ॥ ७४ ॥

निशम्येति । सुबलस्यापत्यं स्त्री सौबली गान्धारी । 'तस्यापत्यम्' इत्यण् । 'टिड्ढाणञ्' इत्यादिना ङीप् । कुन्त्याः सुतजन्म पुत्रोत्पत्तिं निशम्य श्रुत्वा चिरात् बहुकालं मया धृतो महानेष गर्भस्तु जातु कदाचिदपि न जायते न प्रादुर्भवतीति वोढुं धर्तुं गर्भमिति शेषः । अक्षमा अशक्ता सती । सोढुमिति पाठे सोढुं तितिक्षितुं कुन्तीपुत्रोत्पत्तिमिति शेषः । अक्षमा अशक्ता सती अश्मना पाषाणेन आत्मोदरं स्वकुक्षिं सधैर्यं यथा भवति तथा आहत आजघ्ने । आङ्पूर्वाद्धन्तेर्लङ् । 'आङो यमहनः' इत्यतो हन इत्यनुवृत्तौ 'स्वाङ्गकर्मकाच्चेति वक्तव्यम्' इत्यात्मनेपदम् । यद्वा हन्तेर्लुङि 'आत्मनेपदेष्वन्यतरस्याम्' इति वधादेशो विकल्पितत्वादिह न भवति । 'हनः सिच्' इति कित्त्वात् 'अनुदात्तोपदेश' इत्यादिना नकारलोपः । 'झस्वादङ्गात्' इति सिज्लोपः ॥ ७४ ॥

क्षणेन पेशीं पतितां सशोणितां
ददर्श पाराशरिरागतस्तदा ।

---

1. सोढुमक्षमा

पतिः प्रभाणामुषसीव विश्लथां
द्युगर्भतः सांध्यपयोदलेखिकाम् ॥ ७५ ॥

क्षणेनेति । तदा तस्मिन्नुदरहननकाले । पराशरस्यापत्यं पुमान् पाराशरिर्व्यासः । 'अत इञ्' । आगतः सन् क्षणेन पतितां शोणितेन रक्तेन सहितां सशोणितां पेशीं मांसम् । 'पेशी त्वण्डे खगादीनां मांसखङ्गपिधानके' इति रत्नमालायाम् । प्रभाणां पतिर्भास्करः उषसि प्रभाते द्युगर्भतः आकाशगर्भात् विश्लथां विमुच्यताम् । संध्यायां भवा सांध्या 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्' । सा चासौ पयोदलेखिका मेघपङ्क्तिस्तामिव ददर्श ॥ ७५ ॥

स मांसकोशं शतधा विभज्य तं
निधाय कुम्भेषु भृतेषु सर्पिषा ।
विभक्तशेषं पिशितं कराहृतं
परत्र कुर्वन्कलशे वचोऽब्रवीत् ॥ ७६ ॥

स इति । स व्यासः तं मांसकोशं मांसखण्डम् । 'कोशोऽस्त्री कुड्मलेऽर्थौघे गुह्येऽण्डे शास्त्रदिव्ययोः' इति रत्नमालायाम् । शतेन प्रकारैर्विभज्य विभक्तं कृत्वा सर्पिषा घृतेन भृतेषु पूरितेषु कुम्भेषु घटेषु निधाय निक्षिप्य विभक्तात् मांसात् शेषमवशिष्टं करेण पाणिना आहृतं आनीतं पिशितं मांसं परत्रान्यस्मिन् । 'सप्तम्यास्त्रल्' । कलशे कुर्वन् निक्षिपन्नित्यर्थः । वचो वाक्यमब्रवीत् ॥

अलं शुचा राज्ञि न मे वृथा वरः[1]
शतं सुतास्ते दुहिता च काचन ।
विभिद्य पूर्णावयवा घटानिमा-
न्विनिर्गमिष्यन्ति विसृत्वरौजसः ॥ ७७ ॥

अलमिति । राज्ञः पत्नी राज्ञी । 'ऋन्नेभ्यो ङीप्' । तस्याः संबुद्धिः हे राज्ञि । शुचा शोकेनालं कृतमलमिति वारणे । मे मम वरो वृथा व्यर्थो न भवति ; किं त्वमोघ इति भावः । ते तव विसृत्वरौजसः विसृमरतेजसः शतं शतसंख्याकाः सुताः पुत्राः । 'कोट्याः शतादिसंख्यान्य' इत्युक्तत्वात्

1. वचः.

शतशब्दस्य नपुंसकत्वम् । 'विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः' इत्यभिधानात् शत-शब्दस्यैकत्वं च । काचन काचिद्दुहिता पुत्री । 'न षट्स्वस्रादिभ्यः' इति ङीप्प्रतिषेधः । पूर्णावयवाः पूर्णाङ्गाः सन्तः इमान् घटान् विभिद्य उद्घाट्य विनिर्गमिष्यन्ति स्वयमेव विनिर्यास्यन्ति । 'गमः परस्मैपदेषु' इतीट् ॥ ७७ ॥

इतीदमाख्याय तिरोहिते मुनौ
ननन्द गान्धारनरेन्द्रनन्दिनी ।
ररक्ष गूढं कलशानिवात्मजा-
नवाप्तुमण्डानि यथा महोरगी ॥ ७८ ॥

इतीति । मुनौ व्यासे इति उक्तप्रकारेण इदं वचनमाख्याय कथयित्वा तिरोहिते सति गान्धारनरेन्द्रनन्दिनी । 'कृत्यल्युटो बहुलम्' इति ल्युटि 'टिड्ढाणञ्' इत्यादिना ङीप् । गान्धारी ननन्द । मुनिप्रसादान् मम पुत्रशतमुत्पत्स्यत इति जहर्षेत्यर्थः । निजात्मजान् स्वपुत्रान् अवाप्तुं प्राप्तुं महोरगी सर्पस्त्री अण्डानि यथा कोशानिव कलशान् गूढं यथा भवति तथा ररक्ष रक्षितवती ॥ ७८ ॥

पृथा निदेशान्निजभर्तुरेकदा
समाह्वयन्मन्त्रबलेन मारुतम् ।
स चागतः संभृतपुष्पसौरभो
लतामिवैनां स्पृशति स्म माधवीम् ॥ ७९ ॥

पृथेति । एकदा एकस्मिन् दिने पृथा कुन्ती निजभर्तुः पाण्डोर्नियोगात् निदेशाद्धेतोः मन्त्रबलेन मन्त्रशक्त्या सामर्थ्येन मरुद्देवः मारुतः । प्रज्ञादित्वात् स्वार्थेऽण्प्रत्ययः । तं मारुतं वायुं समाह्वयत समाहूतवती । स्पर्धाया अभावान्नात्मनेपद । । संभृतपुष्पसौरभः संपादितकुसुमगन्धः स च मारुतश्चागतः सन् मधुर्नाम कश्चित् यादवः तस्य गोत्रापत्यं स्त्री माधवी तामेतां कुन्तीं मधोर्वसन्तस्येयं माधवी वासन्ती । 'अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी च सा' इत्यमरः । तां लतामिव स्पृशति स्म स्पृष्टवान् आलिङ्गितवानित्यर्थः ॥ ७९ ॥

गते तु तस्मिन् मरुति स्वमास्पदं
शुभे मुहूर्ते दिनमध्यगे रवौ ।

असूत भीमं क्षणदाचरान्तकं
पृथा सुतं मारुतिमञ्जना यथा ॥ ८० ॥

गत इति । तस्मिन् मरुति वायौ स्वमात्मीयमास्पदं स्थानं गते तु प्राप्त एव सति । 'आस्पदं प्रतिष्ठायाम्' इति निपातनात्साधुः । 'आस्पदं स्थानकृत्ययोः' इति रत्नमालायाम् । रवौ सूर्ये दिनमध्यगे मध्याह्नवर्तिनि सति शुभे क्षेमंकरे मुहूर्ते काले क्षणदाचराणां निशाचराणां अन्तकं नाशकं; राक्षसान्तकमित्यर्थः । बिभ्यत्यस्मादस्य इति भीमः । 'भियः षुग् ह्रस्वश्च' इत्यौणादिको मनप्रत्ययः । विकल्पात् षुगागमाभावः । 'भीमादयोऽपादाने' इति अपादाने साधुः । भीमं भीमाख्यं सुतं अञ्जना वायुपत्नी । 'अञ्जना वायुपत्न्यां स्याद्दिग्गजे कज्जलेऽञ्जनम्' इति रत्नमालायाम् । मारुतस्यापत्यं पुमान् मारुतिः । 'अत इञ्' । तं मारुतिं हनूमन्तमिव पृथा असूत सुषुवे ॥ ८० ॥

मुमोच कीर्णद्रुमकोरकच्छला-
त्सुतोदयेन प्रमदाश्रु मारुतः ।
प्रियः सुहृत्तस्य च वेदिषु ज्वलन्
ननर्त हर्षादिव वह्निरुच्छिखः ॥ ८१ ॥

मुमोचेति । मारुतो वायुः सुतोदयेन पुत्रोत्पत्त्या हेतुना कीर्णाः पर्यस्ता ये द्रुमाणां कोरकाः कलिकाः तेषां छलाद्व्याजेन प्रमदाश्रु आनन्दबाष्पं मुमोच मुक्तवान् । तस्य वायोः प्रियः सुहृत् मित्रम् । 'सुहृद्दुर्हृदौ मित्रामित्रयोः' इति निपातनात्साधुः । वह्निश्च वेदिषु ज्वलन् दीप्यमानः उच्छिखः उद्गतज्वालः सन् हर्षात् मित्रसुतप्राप्तिरूपानन्दाद्धेतोः ननर्तेव नृत्तं चकारेव ॥

अलब्ध यत्राहनि जन्म मारुति-
स्ततस्तु पूर्वत्र निशीथिनीमुखे ।
अजायत व्यायतलोचनोत्पलः
सुयोधनो मानधनाग्रतल्लरः ॥ ८२ ॥

अलब्धेति । मारुतिर्भीमः यत्राहनि यस्मिन् दिने जन्म उत्पत्तिमलब्ध प्राप्तवान् ततो भीमजन्मदिनात् पूर्वत्र पूर्वस्मिन् । 'सप्तम्याखल्' । निशीथिनीमुखे रजनीप्रारम्भे तु; प्रदोषकाल

एवेत्यर्थः। तु-शब्दोऽवधारणे। व्यायते विशाले उत्पले इन्दीवरे इव लोचने यस्य स तथोक्तः। मान एव धनं येषां ते मानधनाः मानिनः तेषामग्रतःसरः पुरःसरः अत्यन्तमानीत्यर्थः। 'पुरोऽग्रतोऽग्रेषु सर्तेः' इति टप्रत्ययः। सुखेन योद्धुम् इति सुयोधनः। संज्ञायां शासियुधीत्यादिवक्तव्याद्युच्प्रत्ययः। अजायत जातः। सुयोधनाख्यो गान्धारीसुतो जात इत्यर्थः॥ ८२॥

[1]तदीयजन्मोत्सवतूर्यनिस्वनाः
शिवारुतैरन्तरयांबभूविरे।
असृग्भिरौत्पातिकमभ्रमाप्लुतां-
श्चकार पौरान्प्रमदाश्रुवर्षिणः॥ ८३॥

तदीयेति। तदीयः सुयोधनसंबन्धी जन्मैव उत्सवः तस्मिन् तूर्यनिस्वनाः वाद्यनिनदाः शिवानां सृगालानां रुतैः वाशितैः। 'शिवा भवेदामलकी भवानी हरीतकी सक्तुफला शृगाले' इति रत्नमालायाम्। अन्तरयांबभूविरे आच्छादयांचक्रिरे। अन्तरशब्दात् तत्करोतीति ण्यन्तात् 'कास्प्रत्ययात्' इत्यादिना आम्प्रत्ययः। कर्मणि लिट्। औत्पातिकमुत्पातनिमित्तमभ्रं मेघः प्रमदाश्रुवर्षिणः पुरे भवाः पौराः। 'तत्र भवः' इत्यण्। तान् पौरान् नागरान् असृग्भी रुधिरैः आप्लुतान् सिक्तान् चकार॥ ८३॥

शरारुवृत्ताश्च शतेन वासरैः
क्रमादजायन्त सुयोधनानुजाः।
अभूच्च तेषामनवद्यजन्मनां
यवीयसी काचन दुःशलाभिधा॥ ८४॥

शरारुवृत्ता इति। शरारुः घातुकं वृत्तं वर्तनं येषां ते शरारुवृत्ताः; हिंसनशीला इत्यर्थः। 'शृवन्द्योरारुः' इत्यारुप्रत्ययः। 'शरारुर्घातुको हिंस्रः' इत्यमरः। सुयोधनस्यानुजाः अनुजन्मानश्च शतेन वासरैर्दिवसैः क्रमात् पर्यायात् अजायन्त जाताः। दिवससंख्ययैव तेऽपि शतसंख्येति गम्यते। अनवद्यं निर्दोषं जन्म येषां तेषां सुयोधनानुजानां दुःशलेत्यभिधा नाम यस्याः सा काचन काचिद्यवीयसी स्वसा चाभूत्॥ ८४॥

---

1. तदीयजन्मोदित०

विकासलक्ष्म्येव तया परिष्कृतै-
[1]रसौ कुमारैः सुबलस्य कन्यका ।
असुक्तपार्श्वस्थितिरात्मजैर्बभौ
शतेन पत्रैरिव पद्मकर्णिका ॥ ८५ ॥

विकासलक्ष्म्येति । असौ सुबलस्य कन्यका गान्धारी विकासलक्ष्म्या विकासश्रियेव तया दुःशलया परिष्कृतैरलंकृतैस्तद्युक्तैरित्यर्थः । कुमारैर्बालैः शतेनात्मजैः पुत्रैरमुक्तपार्श्वस्थितिरसंसृष्टसमीपस्थितिः शतेन पत्रैर्दलैः पद्मस्य कमलस्य कर्णिका बीजकोशेव बभौ । 'कर्णिका कर्णभूषणे करिहस्तेऽङ्गुलौ पद्मबीजकोशयां त्रिषूत्तरे' इत्यमरः ॥ ८५ ॥

निजेन भर्त्रा पृथया नियुक्तया
महीयसा मन्त्रसमाधिना स्मृतः ।
दिवस्पतिर्जह्नुजयेव दिग्गज-
स्तया च संगम्य यथागतं ययौ ॥ ८६ ॥

निजेनेति । निजेन भर्त्रा पाण्डुना नियुक्तया प्रयुक्तया पृथया कुन्त्या महीयसा महत्तरेण मन्त्रसमाधिना मन्त्रध्यानेन स्मृतो दिवस्पतिरिन्द्रः । कस्कादिषु दिवस्पतिशब्दः साधुः । जह्नुजया भागीरथ्या दिग्गज इव तया कुन्त्या संगम्य संयुज्य यथागतं ययौ; येन मार्गेणागतं तेनैव ययावित्यर्थः । 'यथाऽसादृश्ये' इति समासः ॥ ८६ ॥

अथोदयं जग्मुषि मासि फाल्गुने
दिने शुचिन्युत्तरफल्गुनीयुते ।
अजीजनद्वीरमसौ यदर्जुनं
जगत्त्रये तेन स फल्गुनः स्मृतः ॥ ८७ ॥

अथेति । अथेन्द्रनिर्गमनानन्तरं असौ कुन्ती फल्गुनीभ्यां युक्ता पौर्णमासी फाल्गुनी । 'नक्षत्रेण युक्तः' इत्यण् । 'टिड्ढाणञ्' इत्यादिना ङीप् । फाल्गुनी पौर्णमासी अस्मिन्नस्तीति

1, परिष्कृतैः ससौकुमार्यैः

फाल्गुनः । 'विभाषा फाल्गुनीश्रावणाकार्तिकीचैत्रीभ्यः' इति वैभाषिकोऽण्प्रत्ययः । तस्मिन् फाल्गुने मासि । 'पद्दन्' इत्यादिना मासादेशः । उदयं प्रादुर्भावं जग्मुषि प्राप्तवति सति उत्तराभ्यां फल्गुनीभ्यां नक्षत्राभ्यां युते युक्ते शुचिनि निर्दोषे दिने यद्यस्मात् कारणाद्वीरं शूरमर्जुनं अर्जुनाख्यं पुत्रं अजीजनज्जनयामास । जनेर्ण्यन्ते लुङि चङि द्विर्वचने सन्वद्भावे इत्वे कृते 'दीर्घो लघोः' इति दीर्घः । तेन फल्गुनीनक्षत्रयुक्तदिने जननेन कारणेन सोऽर्जुनः जगत्त्रये लोकत्रये । फल्गुन्योर्जातः फल्गुनः । 'तत्र जातः' इत्यण् । 'श्रविष्ठाफल्गुन्यनूराधा' इत्यादिना जातार्थे अणो लुक् । 'लुक् तद्धितलुकि' इति स्त्रीप्रत्ययस्य लुक् । फल्गुन इति स्मृतः कथित इत्यर्थः । तथा च महाभारते अर्जुनोत्तरसंवादे, अर्जुनः— 'उत्तराभ्यां तु पूर्वाह्णे फल्गुनीभ्यामहं दिवा । जातोऽस्मि फाल्गुने मासि तेन मां फल्गुनं विदुः ॥' इति ॥ ८७ ॥

प्रकीर्णमन्दारपरागवृष्टिभिः[1]
प्रमोदनृत्तोचिततूर्यनिस्वनैः ।
महर्षयः संकुलमप्सरोगणै-
रमंसत स्वः शतशृङ्गमागताः ॥ ८८ ॥

प्रकीर्णेति । आगताः पाण्डुपुत्रमहोत्सवं द्रष्टुमागता महर्षयः प्रकीर्णा नाट्यसंभ्रमादितस्ततः पर्यस्ता मन्दारपरागाणां कल्पद्रुमकुसुमरजसां वृष्टयो यैषां तैः । प्रमोदेन हर्षेण यन्नृत्तं नाट्यं तस्मिन् उचिता योग्याः तूर्यनिस्वना वाद्यध्वनयः येषां तैः । अप्सरसां स्वर्वेश्यानां गणैः सङ्घैः । 'गणाः प्रथमसंख्यौघाः' इति वैजयन्ती । संकुलं समाकीर्णं शतशृङ्गं गिरिं स्वः स्वर्गं अमंसत मेनिरे । स्वरित्यव्ययम् । मन्यतेर्लुङि अनुदात्तेत्त्वादिट्प्रतिषेधः ॥ ८८ ॥

अनुत्तमं मन्त्रमपास्तविग्रहा
ददौ सपत्न्यै[2] दयिताज्ञया पृथा ।
सकृत्प्रयुक्तेन[3] च तेन सा पुनः
सुतौ यमौ लिप्सुरकाङ्क्षदश्विनौ ॥ ८९ ॥

अनुत्तममिति । पृथा दयितस्य प्रियस्य पाण्डोराज्ञया निदेशेन अपास्तविग्रहा त्यक्तविरोधा सती । समानः पतिर्यस्याः सा सपत्नी । 'नित्यं सपत्न्यादिषु' इति नकारः । नान्तत्वात्

1. मुष्टिभिः 2. पतिशासनात् 3. प्रयोज्येन

ङीप्। निपातनादेव समानस्य सभावः। तस्यै सपत्न्यै माद्र्यै। न विद्यते अन्य उत्तमोऽन्यादित्यनुत्तमः। तमनुत्तममतिश्रेष्ठं मन्त्रं ददौ। सा पुनर्माद्री तु सकृत् एकवारं प्रयुक्तेन; कुन्त्या सकृदेव प्रयोक्तव्यमिति वितीर्णत्वादिति भावः। प्रयोज्येनेति वा पाठः। तेन च तेनैव मन्त्रेण चकारोऽवधारणे। यमौ यमजौ। 'यमस्तु यमजेऽन्तके' इति रत्नमालायाम्। सुतौ पुत्रौ लिप्सुर्लब्धुमिच्छुः सती। लभेः सन्नन्तादुप्रत्ययः। 'सनि मीमा' इत्यादिना इसादेशः। 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासस्य लोपः। अश्विनौ नासत्यावकाङ्क्षत् काङ्क्षितवती; आहूतवतीत्यर्थः। 'नासत्यावश्विनौ दस्रौ' इत्यमरः। काङ्क्ष इच्छायामिति धातोर्लङ्॥ ८९॥

क्षणेन तौ तत्र नृपावरोधने
समेत्य पुत्रौ जनयांबभूवतुः।
कुलस्य पूरोर्नकुलं विभूषणं
सहानुभावं सहदेवमप्युभौ॥ ९०॥

क्षणेनेति। तावश्विनौ क्षणेन क्षणमात्रेण समेत्य समागम्य तत्र नृपावरोधने राजपत्न्यां पूरोः कुलस्य भूषणं नकुलं नकुलाख्यम्, अनुभावेन प्रभावेन सहितं सहानुभावं सहदेवं सहदेवाख्यमप्युभौ पुत्रौ जनयांबभूवतुः उत्पादयामासतुः। अनुभावः प्रभाववत्साध्यः॥ ९०॥

सुतैरुदारैस्त्रिदिवो यथा द्रुमैः
प्रसूनधन्वेव शरैर्मनोहरैः।
रराज भूतैरिव पद्मसंभवो
महद्भिरेभिर्नृपतिः स पञ्चभिः॥ ९१॥

सुतैरिति। स नृपतिः पाण्डुः पञ्चभिर्द्रुमैः मन्दारादिभिः कल्पकवृक्षैः त्रिदिवो यथा स्वर्ग इव, मनोहरैः मनोज्ञैः। 'अरविन्दमशोकं च चूतं च नवमल्लिका। नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः॥' इत्यभिधानप्रसिद्धैः पञ्चभिः शरैः बाणैः प्रसूनं धनुः यस्य सः प्रसूनधन्वा काम इव। 'वा संज्ञायाम्' इत्यनङ्। पञ्चभिर्महाभूतैः पृथिव्यादिभिः पद्मसंभवो ब्रह्मेव उदारैः प्रख्यातैः। 'उदारो दक्षिणे ख्याते' इति रत्नमालायाम्। पञ्चभिरेभिः सुतैः युधिष्ठिरादिभिः रराज शुशुभे॥ ९१॥

अकल्पितधात्र्यङ्गुलिपल्लवग्रहाः
क्रमादनाकर्णितवेत्रिचाटवः ।
मणिस्थलीचङ्क्रमणोचिताङ्घ्रयः
पदान्यकुर्वन्नुटजाङ्गणेषु ते ॥ ९२ ॥

अकल्पितेति । अकल्पितः अविहितः धात्रीणामङ्गुलिपल्लवानां ग्रहो ग्रहणं यैस्तु तथोक्ताः । तपोवने धात्रीणामभावादित्यर्थः । क्रमात् पर्यायात् अनाकर्णितानि अश्रुतानि वेत्रिणां कञ्चुकिनां चाटूनि प्रियवाक्यानि यैस्ते तथोक्ताः । मणिनिबद्धभूमिषु । यद्यपि जानपदसूत्रे स्थलशब्दादकृत्रिमार्थे ङीष् विहितः तथाऽपि कृत्रिमत्वेऽपि अकृत्रिमार्थत्वोपचारात् ङीष् । चंक्रमणं कौटिल्येन गमनम् । चङ्क्रम्यतेर्यङन्तात् 'ल्युट् च' इते नपुंसके ल्युट् । 'यङोऽचि च' इति चकारेण बहुलग्रहणानुकर्षणात् अनच्यपि यङो लुक् । तस्मिन्नुचिता योग्या अङ्घ्रयः चरणा येषां ते तथोक्ताः । ते कुमाराः उटजाः पर्णशालाः । 'पर्णशालोटजोऽस्त्रियाम्' इत्यमरः । तेषामङ्गणेषु बहिःप्रदेशेषु पदान्यकुर्वन् निक्षिपुरित्यर्थः ॥ ९२ ॥

तपोधनानामुपलालिताः सुतै-
रितस्ततः कल्पितपांसुकेलयः ।
वितेनिरे सिंहसटाविकर्षणं
तपोवनस्थाः [1]कलभा इवाभियः ॥ ९३ ॥

तपोधनानामिति । तपोधनानां मुनीनां सुतैः कुमारैः उपलालिताः आश्वासिताः इतस्ततः सर्वत्रेत्यर्थः । कल्पिता विहिता पांसुभिर्धूलिभिः केलिः क्रीडा यैस्ते तथोक्ताः । अभियो भयरहिताः तपोवनस्था आश्रमवासिनः कुमाराः कलभाः करिपोता इव सिंहानां सटाः जटाः । 'जटाकेसरयोः' इति रत्नमालायाम् । तासां विकर्षणमाकर्षणं वितेनिरे विहितवन्तः । आश्रमवासिनां कलभानां मुनितपःप्रभावेन जातिवैराभावात् सिंहसटाकर्षणं संभवति ॥ ९३ ॥

अथोपनीतैः [2]श्रुतिपारदृश्वभि-
र्विशिष्टविद्याधिगमोज्ज्वलैश्च तैः ।

---

1. धरभा 1. श्रुत०

षष्ठीविशेष्यो यथा— युष्माकमियं गौः यौष्माकी गौः, देवदत्तस्य भूतपूर्वो देवदत्तरूप्यः राजा, पुत्रस्य निमित्तं पुत्रीयः संयोगः, विदिशाया अदूरभवं वैदिशं नगरम्, मूर्वायाः विकारः मौर्वं भस्म, दूर्वाया अवयवः दौर्वः काण्डः, इति। अषष्ठीविशेष्यो यथा— वत्सेभ्यो हितो वत्सीयो गोधुक्, अङ्गारेभ्य इमानि अङ्गारीयाणि काष्ठानि, शरणे साधुः शरण्यो राजा, आकर्षे कुशलः आकर्षको धूर्तः, पुष्पैः चित्तः पुष्पचणः चम्पकः, सूर्येणैकदिक् सौरी बलाका इति। प्रकृत्यैकच्छायोऽभिन्नरूपः; स द्विधा— लिङ्गसंख्यानुपग्राही, लिङ्गसंख्योपग्राही च। तयोर्लुगभिधेयो लिङ्गसंख्यानुपग्राही; यथा— गर्गस्यापत्यानि गर्गाः, पञ्चालस्य राजानः पञ्चालाः, अत्रेः अपत्यानि अत्रयः, कुसुम्भ्याः पुष्पं कुसुम्भम्, बदर्याः फलं बदरम्, लवणेन संसृष्टः लवणः सूपः इति। लुबभिधेयो लिङ्गसंख्योपग्राही; यथा— पञ्चालानां निवासः पञ्चाला जनपदः, वरणाः सन्त्यस्मिन् वरणा नगरी, शिरीषाणामदूरभवः शिरीषा ग्रामः। किंच गोदौ नाम ह्रदौ, तयोरदूरभवो ग्रामः गोदौः; हरीतक्यादिषु पुनः व्यक्तिमेवोपगृह्णाति, न वचनम्— हरीतक्याः फलानि हरीतक्यः; खलतिकादिषु वचनमेव, न व्यक्तिम्—खलतिको नामाद्रिः, तस्यादूरभवानि खलतिकं वनानि इति। ननु च वसिष्ठस्यापत्यमित्यादौ भिन्नाधिकरणत्वाद्द्वयमेवाश्रयते पितरं पुत्रं च; तथाहि—उभयमपि संबन्धाद्भ्यधिकं प्रतीयते—पितुश्चामी पुत्राः स्वमिति; तत् कथमेकस्मादेव षष्ठी तद्धितो वा? उच्यते— यद्यप्ययमुभयाधिकरणः, तथाऽप्येक एव; भेदे हि नोभयाधिकरण एकः स्यात्, संबन्धद्वयप्रसङ्गात्। सोऽयमेकोऽनेकाश्रयः, एकश्चैव विभक्त्योच्यते, एकस्मादेव च तद्धितोत्पत्तिर्भवति। एवमपि पितुरेव षष्ठीति नियमो न स्यात्। कः पुनराह नियम इति; यावता मातुः पिता मातामह इत्यपि भवति। कुतः पुनरिदं यदेकदा तु स्वामिनोऽन्यदा तु स्वस्माद्विभक्तिः तद्धितो वेति? संबन्धस्य पदन्यासातिरेकात्। नियोगतो हि पितापुत्रयोरेकस्य प्राधान्यमन्यस्योपसर्जनत्वम्, तुल्यत्वे संबन्धाभावात्। तत्र न प्रधानं पुत्रादि गुणानुरोधेन प्रवर्तितुमर्हति; उपसर्जनं तु पित्रादि यथा प्रधानानुग्रहः तथाऽऽत्मानं निर्वर्तयति, स्वरूपावस्थितौ प्रधानार्थासिद्धेः। अतोऽप्रधाने संबन्धस्याधिकः पदन्यासः। तत्र षष्ठी तद्धितोत्पत्तिर्वा भवति। सा चैकत्वात् संबन्धस्य पुत्रगतमप्येनमभिधत्ते। यदा तु मातुः पिता मातामहः इति विवक्षातः प्राधान्यविपर्ययः, तदा अपत्याद्युत्पन्नया षष्ठ्या द्विष्ठोऽप्यसावभिहित इति न सा तद्धितो वा पितृशब्दात्; तदुक्तम्—

द्विष्ठोऽप्यसौ परार्थत्वाद्गुणेषु व्यतिरिच्यते।
तत्राभिधीयमानश्च प्रधानेऽप्युपयुज्यते॥ इति॥

एवं 'तेनैकदिक्' (पा. ४-३-११२) 'तदर्थं विकृतेः प्रकृतौ' (पा. ५-१-१२)

'तस्य निमित्तम्' (पा. ५-१-३८) 'तेन वित्तश्चुञ्चुप्चणपौ' (पा. ५-२-३६) 'तस्मै हितम्' चतुष्प्रकरणे 'युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम्' इत्यादिषु सहार्थतादर्थ्यवित्तहित-लक्षणोपपदपरिशेषादयः संबन्धविशेषाः षष्ठ्यन्ता अपि द्विष्ठत्वादेकविभक्तिवाच्यत्वेनावगन्तव्याः। ननु च तृतीयादीनां व्यतिरेकविभक्तित्वात् षष्ठीवदेव भवतु, संबन्धाभिधानसामर्थ्यात्; प्रथमायाः पुनरव्यतिरिक्तप्रातिपदिकार्थाभिधायिन्याः कथमिवैतदुपपद्यते— त्वमिव त्वावान्, अहमिव मावान् इति। अत्रैके वर्णयन्ति— त्वावतः पुरुवसो, यङ्कं विप्रस्य मावतः, न त्वावानन्यो दिव्यो न पार्थिव इति प्रथमान्तायाः प्रकृतेः प्रधानभूतेऽपि संबन्धिनि प्रयोगदर्शनात् प्रत्ययोऽवगम्यते। अन्ये त्वाहुः— त्वमिव त्वावान्, अहमिव मावान् इत्युपमानमत्र प्रथमान्तं प्रकृत्यर्थः, उपमेयं प्रत्ययार्थः। न तत्र तावदवच्छेदकत्वादुपमानं प्रधानम्। अवच्छेदकादप्युपमानात् षष्ठी नोत्पद्यते, व्यतिरेकहेतोरसंभवात; इवशब्दो ह्यतत्त्वभूताभिधायित्वान्न व्यतिरेकाधायकः; सादृश्यद्योतको ह्यसौ। अन्यश्च न कश्चिदिह व्यतिरेकहेतुः श्रूयते। अतश्च गौरिव गवयः इत्यादाविवात्र षष्ठ्या अभावः; व्यतिरेकहेतौ तु सतीवशब्दप्रयोगे उपमानात् षष्ठ्युत्पद्यते— देवदत्तस्येव यज्ञदत्तस्य दन्ता इति। तदुक्तम्—

इवशब्दप्रयोगे तु वाह्यात् संबन्धिनो विना।
नाधिक्यमुपमानेऽस्ति द्योतकः स प्रयुज्यते॥

मा भूत् षष्ठी; प्रथमयाऽपि न भवितव्यमेव, उपमानस्यावच्छेदकत्वेनाप्याधिक्यात्। कः पुनराह— अनधिक एव प्रातिपदिकार्थे प्रथमेति; पाटलिपुत्राद्राजकं सप्त योजनानि, सप्तसु वा योजनेषु इत्यध्वनः प्रथमा सप्तमी च स्मर्यते; संबोधने च प्रथमैव विधीयते; धिक् देवदत्तम्, हा देवदत्तम्, इति च द्वितीयाविषये प्रथमाप्रयोगो दृश्यते; यथा—

'हा धिक्कष्टमनिष्टमस्तकरुणः कोऽयं विधेः प्रक्रमः'।
'कन्यान्तःपुरमेव हा प्रविशति क्रुद्धो मुनिर्भार्गवः॥' इति॥

षष्ठ्यन्ताभिधेयो गुणभूतः; स त्रिधा— भावविशिष्टः, कारकविशिष्टः, संबन्धिविशिष्टश्च। तेषु भावेनावच्छिन्नो भावविशिष्टः; स द्विधा— मुख्येन, उपाधिना च। तयोर्मुख्येन यथा— कृषिरस्यास्तीति कृषीवलः, मायावी, आमयावी, दयालुः, श्रद्धालुः, इति। उपाधिना यथा— मृदङ्गो वाद्यत इति शिल्पमस्य मार्दङ्गिकः, अपूपाः क्रियन्त इति शिल्पमस्य आपूपिकः, मासं ब्रह्मचर्यमस्य भिक्षोः मासिकः, अस्ति परलोक इति मतिरस्य साधोः आस्तिकः, नास्ति नरकादिकमिति मतिरस्यासाधोः स नास्तिकः, दिष्टमेव प्रभवतीति मतिरस्य जिगीषोः दैष्टिकः, इति। कारकेणावच्छिन्नः कारकविशिष्टः; स द्विधा— स्वतन्त्रेण, अस्वतन्त्रेण च। तयोः स्वतन्त्रेण

वथा—धनमस्यास्तीति धनवान् वदान्यः, पञ्चमोऽस्य मासो जातस्य वर्तते पञ्चमो बालकः, प्रासादोऽस्य स्यात् प्रासादीयं दारु, तारकाः संजाता अस्य तारकितं नभः, समयः प्राप्तोऽस्य सामयिकं कर्म, एकमन्यत् कर्माध्ययने वृत्तमस्य ऐकान्यिकः इति। अस्वतन्त्रेण यथा— लवणं पण्यमस्य लावणिकः, वासुदेवे भक्तिरस्य वासुदेवकः, धनुः प्रहरणमस्य धानुष्कः, प्रस्थः परिमाणमस्य प्रास्थिकः, सलातुरोऽस्याभिजनः साक्षातुरीयः, ग्रामो निवासोऽस्य ग्रामीणः इति। संबन्धिनाऽवच्छिन्नः संबन्धिविशिष्टः; स द्विधा—विशेष्येण, विशेषणेन च। तयोः विशेष्येण यथा— अपूपा हिता एषाम् आपूपिकाः अवन्तयः, मूलमावहिं एषां मूल्याः माषाः, बृहत्यादिरस्य बार्हतः प्रगाथः, कालः प्रकृष्टोऽस्य कालिकमृणम्; किंच निशासंबन्धादध्ययनमपि निशा, तदस्य सोढं नैशः, एवं प्रादोषिक इति। विशेषणेन यथा— इन्द्रो देवता अस्य ऐन्द्रं हविः, संशप्तकाः योद्धारोऽस्य सांशप्तकः संग्रामः, विनयः प्रयोजनमस्यां वैनयिकी विद्या, देवदत्तो ग्रामणीरस्य दैवदत्तकः सङ्घः, पञ्च अवयवाः अस्यां पञ्चतयी गतिः, पञ्च अस्य भूतिर्वस्तो वा पञ्चकः पदार्थः इति। ननु च 'तस्यापत्यम्' इत्यादौ उपगोरपत्यम् औपगवः इति 'समर्थानां प्रथमाद्वा' (पा. ४-१-८२) इत्यधिकारात् षष्ठ्यन्ता प्रकृतिरपत्यवतो गुणभूतस्य वाचिका; प्रथमान्तं तु प्रधानभूतमपत्यं प्रत्ययार्थ एव। 'तस्येदम्' (पा. ४-३-१२०) इत्यादावपि प्रधानं संबन्धि तद्धितवाच्यमित्युपपद्यते। 'साऽस्य देवता' (पा. ४-२-२४) इत्यादौ तु इन्द्रो देवता अस्य ऐन्द्रं हविः इति पूर्वोक्तादेवाधिकारात् सेति प्रथमान्ता प्रकृतिरिन्द्रादिदेवतावाचिका प्रधानम्; गुणभूतस्तु संबन्धी पुरोडाशादिरस्येत्यनेनाप्रधानभूतसंबन्धिवाचकत्वेन निर्दिष्टः प्रत्ययार्थः। तत्कथमिवायं विपर्यस्तः प्रधानगुणभाव उपपन्नो भवति? उच्यते— गुणभूतोऽपि संबन्धी बुद्ध्यन्तरेणाप्रधानभावात् प्रत्याव्यासादितप्रधानभावः प्रत्ययार्थत्वेन प्रदर्श्यते। अत एव इन्द्रो देवता अस्येत्येतावानेव विग्रहो न कार्यः; वृत्तिसमानार्थेन हि तेन भवितव्यम्। न चैतावतो वृत्तिसमानार्थता; वृत्तौ हि इन्द्रादिदेवतावच्छिन्नं पुरोडाशाद्यवगम्यते, वाक्ये तु पुरोडाशाद्यवच्छिन्नेन्द्रादिदेवतेति। अयं तु विग्रहो वृत्त्या समानार्थः— इन्द्रो देवता अस्य तदिदमिन्द्रस्वाम्यवच्छिन्नमैन्द्रं हविः इति। तदिदमुक्तम्—

अनन्तरोक्तः संबन्धी प्रतिपद्य प्रधानताम्।
बुद्ध्यन्तरपरामर्शाद्वाच्यतां प्रतिपद्यते॥

प्रकृत्यर्थविशिष्टो हि प्रत्ययार्थोऽभिधानभाक्।
न्यायः स नतः साम्येत्यधिकारसमाश्रयात्॥

एवं 'सोऽस्यादिरिति छन्दसः प्रगाथेषु' इत्यादावपि गुणभूतः संबन्धी तद्धिताभिधेयो बोद्धव्यः। यत्र तु गुणभूतः संबन्धी प्रत्ययार्थः तत्र न प्रधानम्; यत्र प्रधानं तत्र न गुणभूतः; कुतः पुनरिदं ज्ञायते? आचार्यप्रवृत्तिर्ज्ञापयति—यदयं निवासनिवासवत्संबन्धे उभयमाह— 'तस्य निवासः' (पा. ४-२-६९) 'सोऽस्य निवासः' (पा. ४-३-८९) इति।

ननु च अपत्यापत्यवत्संबन्धेऽप्युभयं संभाव्यते— माता अपत्यमस्य मातामहः, पिताऽपत्यमस्य पितामहः इति। नैवम्; पितुः पिता पितामहः, मातुः पिता मातामहः, इति करिष्यते। तथाऽपि हृदयस्य बन्धनं शृङ्खलमस्य बन्धनं करभे, इति कथम्? नान्योऽत्र बन्धनशब्दः संबन्धिवचनः— यथा हि बन्धनमित्यनेन दामोच्यते। नैवम्; बन्धनमित्यनेन संज्ञाशब्दोपाश्रयः शृङ्खलकः करभ इति। एवं च निवासतद्धतोरपि शेषषष्ठ्यभ्युपगमत्वे कर्तृविशिष्टमधिकरणं वाच्यम्— शिबीनां निवासः शैबः इति; अपरत्र अधिकरणविशिष्टः कर्ता— ग्रामो निवासोऽस्य सोऽयं ग्राम्यः इति। ननु च ग्रामशब्दोऽयं समूहवचनः; तद्यथा— 'अश्वग्रामविधौ कृती न समरेष्वस्थास्ति तुल्यः पुमान्' 'न रुणत्सीन्द्रियग्रामम्' इति। किं चातः? समूहश्च समूह्यपेक्ष इति सापेक्षत्वादसामर्थ्ये तद्धितोत्पत्तिर्न भवति। न च सामान्येन समूहाद्भविष्यतीति वाच्यम्, तावतैवार्थे तस्यापरिसमाप्तेर्दुरधिगमाभिधाने च सामर्थ्याभावात्। न च यथा देवदत्तस्य मातुः पिता मातामहो देवदत्तस्य, विष्णुमित्रस्य गुरोः कुलं गुरुकुलं विष्णुमित्रस्येति सापेक्षस्यापि तद्धितः सजातसो वा भवति, एवमस्यापि भविष्यतीति वाच्यम्; न ह्ययं संबन्धिशब्दः। संबन्धिशब्दानामेव च सापेक्षाणां वृत्तयो भवन्ति; यदाह—

संबन्धिशब्दः सापेक्षो नित्यं सर्वः प्रवर्तते।
स्वार्थवत् सा व्यपेक्षाऽस्य वृत्तावपि न हीयते॥

अन्येषां तु सविशेषणानां न वृत्तिः, वृत्तानां वा न विशेषणमित्येव; न हि भवति ऋद्धस्य राज्ञः पुरुषः ऋद्धराजपुरुष इति; नापि ब्राह्मणानां ग्रामो निवासोऽस्य ब्राह्मणानां ग्राम्योऽयमिति। कथं तर्हि राज्ञः पुरुषः शोभनो राजपुरुषः शोभनः इति? भवति वै प्रधानस्य सापेक्षस्यापि वृत्तिः। कथं तर्हि ग्रामो निवासोऽस्येति ग्रामस्य विशेष्यत्वात् प्राधान्ये सापेक्षस्यापि वृत्तिर्न भवति? अनन्तरोक्तन्यायेनात्र षष्ठ्यर्थस्य प्राधान्यात्। ननु, अयमपि संबन्धिशब्दः कस्मान्न भवति? समूहार्थमात्र एव वृत्त्यपरिसमाप्तेः। तर्हि न भवितव्यमेव ग्रामशब्दाश्रिवासनिवासवत्संबन्धे तद्धितेन? न भवितव्यम्; यथा—अव्युत्पन्नजनसमूहास्पदार्थोऽयमुपचारवृत्त्या भवति; दृश्यते च तात्स्थ्यात् तद्व्यपचारः, यथा मञ्चाः क्रोशन्तीति; यदि वा ग्रामशब्दोऽयं

बहुर्थः; यथा— अस्ति शालासमुदाये— ग्रामो दग्ध इति; जनपदसमुदाये— ग्राम आगत इति; अस्ति वाटपरिक्षेपे— ग्रामं प्रविष्ट इति; अस्ति सारण्यके ससीमके सस्थण्डिलके च भूप्रदेशे— ग्रामो लब्ध इति; अस्ति अव्युत्पन्नजनसमूहास्पदे— 'शूद्रकर्षकप्राये जनपदं निवेशयेत्; तत्र अष्टशतग्राममध्ये प्रधानं स्थापनीयम्; स नागराणां निवासो नगरमिति।' तत्र अव्युत्पन्नजनसमूहास्पदे यो ग्रामशब्दो वर्तते, ततो भवितव्यं तद्धितेन—ग्रामो निवासः अस्येति सोऽयं ग्राम्यः ग्रामीणः इति ॥

अथ स्वार्थिकाः। तेऽपि द्विधा— असत्त्वभूतार्थाः, सत्त्वभूतार्थाश्च। उभयेऽपि प्रत्येकं षोढा— वाचकाः, द्योतकाः, विशेषकाः, सहाभिधायकाः, सार्थकाः, निरर्थकाश्च इति। तत्र असत्त्वभूतार्थेषु शक्तिमात्राभिधायिनो वाचकाः; यथा— तत आगतः, तत्र वसति, पुरस्तादागतः, पुरस्ताद्वसति, देवत्रा गच्छति, मनुष्यत्रा तिष्ठति इति। पदार्थगतकुत्साप्रशंसाद्यभिव्यञ्जकाः द्योतकाः; यथा— कुत्सितं पचति पचतकि, प्रशस्तं पचति पचतिरूपम्, ईषदसमाप्तं पचति पचतिकल्पम्, प्रकृष्टं पचति पचतितराम्; एवं नितराम्, अतीवतराम् इति। वाचकत्वे द्योतकत्वे वा मङ्गलवीप्साद्यधिकार्थाभिधायिनो विशेषकाः; यथा— बहुभ्यो देहि बहुशो देहि इति, अल्पं देहि अल्पशो देहि इति, द्वाभ्यां द्वाभ्यां देहि द्विशो देहि, माषं माषं देहि माषशो देहि। एवं कस्मिन् काले कदा, केन प्रकारेण कथमिति। अनुप्रयोगाद्यपेक्षिणः सहाभिधायकाः; यथा— अनग्निरग्निः संपद्यते अग्निसात्संपद्यते, देवाय देयं करोति देवत्राकरोति। एवं तं भवन्तं ततो भवन्तम्, एतेन दीर्घायुषा अत्र दीर्घायुषा, अस्मै आयुष्मते इहायुष्मते, कस्य देवानांप्रियस्य क देवानां प्रियस्य इति। गतिसंज्ञादिकार्यनिमित्तभूताः सार्थकाः; यथा— शुक्लीकृत्य, पटपटायते, द्वेधाकारम्, अभितो ग्रामम्, विना देवदत्तेन, दक्षिणाहि ग्रामात् इति। शब्दोपचयादिमात्रहेतवो निरर्थकाः; यथा— उरसि प्रत्येव प्रत्युरसम्, आत्मन्यध्येव अध्यात्मम्, गिरिमन्वेव अनुगिरम्, उच्चैरेव उच्चकैः, त्वयैव त्वयका, अस्माभिरेव अस्माकाभिः इति। एवमन्येऽपि— देवाः अर्जुनतोऽभवन्, पूर्वतो ग्रामस्य, ग्रामपूर्वेण, पुरस्ताद्रमणीयम्, ऐकध्यं करोति, पञ्चकृत्वः पचति, इत्यादयः असत्त्वभूतार्थाः स्वार्थिकेषु यथायोगमवगन्तव्याः। अन्ये तु— वतिमपि शक्त्यभिधायिषु विशेषकत्वार्थिकेषु वर्णयन्ति; यथा— राज्ञेव व्यवहृतमनेन राजवत्, देवमिव भवन्तं पश्यामि देववत् इत्याद्युदाहृतं पुरस्तात्। एवं च सूत्रं व्याचक्षते— तेन तुल्यम् इत्येतस्मिन्नर्थे वतिर्भवति यत्तुल्यं क्रिया चेत् सा भवति। क्रियेत्यनेन क्रियानिमित्तभूताः शक्तय उच्यन्ते। न चैतद्वाच्यम्— एवं सति क्रिया न संगृहीता भवति; यतः क्रियाऽपि कारकमेव; यथोच्यते—

क्रियामन्ये तु मन्यन्ते क्वचिदप्यनपाश्रिताम् ।
साधनैकार्थभावित्वे प्रवृत्तिमनपायिनीम् ॥

सामान्यभूता सा पूर्वं धात्वर्थैः प्रविभज्यते ।
ततो व्यापाररूपेण साध्ये च व्यवतिष्ठते ॥

प्रकृतिः साधनानां सा प्रथमं तच्च कारकम् ।
शक्तिरेकाधिकरणे स्रोतोवदुपकर्षति ॥

अपूर्वं कालशक्तिं वा क्रियां वा कालमेव वा ।
तमेवंलक्षणं भावं केचिदाहुः कथंचन ॥ इति ॥

तत्र तस्येवेत्यस्य च प्रयोजनमुपन्यस्तं पुरस्तात्— द्रव्यगुणयोस्तुल्ययोः प्रत्ययो न लभ्यत इति । नन्वेवं सति देवदत्त इव स्थूलः, यज्ञदत्त इव गोमान्, इत्यत्र प्रत्ययो न प्राप्नोति, सप्तमी षष्ठ्यन्तत्वयोरभावात् । अत्रापि क्रियाग्रहणाद्भविष्यति । कथं पुनः क्रियाशब्देन गुण उच्यते? क्रियापूर्वकत्वात्; स्थूलगुणयोगाद्धि स्थूलो भवति, गोसंबन्धाच्च गोमान् इति । नन्वेवं सति क्रियाग्रहणमपि न कर्तव्यम्; प्रवर्ततामविशेषेणैव तेन तुल्यम् इत्येतस्मिन्नर्थे वतिः । 'तत्र तस्येव' इत्यनेन च नार्थः सूत्रारम्भेण । 'तदर्हम्' इत्येतदप्युपमानान्न व्यतिरिच्यते; यद्धि वृत्तं राजानमर्हति तद्राजसदृशमेव भवति । एवं च तेन तुल्यम् इत्येवावतिष्ठते । तथा चाह चन्द्रगोमी— 'इवे वतिः' इति । नन्वेवं सति गौरिव गवय इत्यत्रापि वतिः प्राप्नोति । नैवम्; उपमायां वतिः, नोपमाने । यद्यपि वतिशब्देनोभयमपि द्योत्यते, तथाऽप्यन्यदेवौपम्यम्, अन्यदेवोपमानम्; भूयोऽवयवसादृश्यस्य योगो ह्युपमा; यथा— चन्द्र इव मुखम् । सदृशात् सदृशप्रतिपत्तिरुपमानम्; यथा— गौरिव गवय इति ॥

सत्त्वभूतार्थभेदेषु लिङ्गविशेषाद्यभिधायिनो वाचकाः; यथा— देव एव देवता, देवतैव दैवतम्, उपधिरेव औपधेयम्, भाग एव भागधेयम्, उपाय एव औपयिकम्, चत्वार एव वर्णाः चातुर्वर्ण्यम्, इति । कुत्साप्रशंसाद्यभिव्यञ्जका द्योतकाः; यथा— कुत्सितो वैयाकरणः वैयाकरणपाशः, प्रशस्ता मृत् मृत्ना, तनुः उष्ट्रा उष्ट्रतरः, लघुः कुटी कुटीरकः, ईषदसमाप्तः आढ्यः आढ्यकल्पः, भूतपूर्वो राजा राजचरः, इति । वाचकत्वे द्योतकत्वे वा व्याहृतत्वाद्यर्थविशेषव्यक्तिहेतवः विशेषकाः; यथा— व्याहृतार्था वाग्येव वाचिकम्, उपदेशरूपं कर्मैव कार्मणम्, असहाय एक एव एकाकी, अश्व इवायमश्वकः, कुशाग्रमिव कुशाग्रीया बुद्धिः, शिलेव शैलेयं

दधि, इति। प्रकृतिविशेषेभ्यो नित्यमुपजायमानाः सहाभिप्रायकाः; यथा— करीषगन्धेरपत्यं कारीषगन्ध्या, अभिजितोऽपत्यमाभिजित्यः, कुञ्जस्यापत्यं कौञ्जायन्यः, परस्परं विविध आक्रोशो व्याक्रोशी, समन्ताद्भावः सांराविणम्, राज्ञामायत्तं राजाधीनम्, इति। 'लुपि युक्तवद्व्यक्तिवचने' (पा. १-२-५१) इति कार्यार्थाः सार्थकाः; यथा— चञ्चा रमणीयम्, वर्धिका दर्शनीयः, वासुदेवः प्रतिमा, बलदेवश्चित्रम्, देवपथः आकाशरेखा, हंसपथः क्रौञ्चम्, इति। शब्दोपचयादिमात्रहेतवः निरर्थकाः; यथा— प्रज्ञ एव प्राज्ञः, विनय एव वैनयिकः, मृदेव मृत्तिका, सूर एव सूर्यः, नामैव नामधेयम्, देवानां राजैव देवराजः, इति। एवं कतरः, कतमः, पटुतरः, पटुतमः, पटिष्ठः, पटीयान्, इत्यादयोऽपि सत्त्वभूताः स्वार्थाः स्वार्थिकेषु यथायोगमवगन्तव्याः। किं पुनरमी पदप्रकृतयः प्रातिपदिकप्रकृतयो वा? कुतस्ते संशयः? उभयथोपलम्भात्; तथा ह्येषां युष्मकाभिः, कदा, तर्हीत्यादौ प्रातिपदिकप्रकृतित्वम्; भिन्धकि, त्वयकि, मयकि, इत्यादौ पदप्रकृतित्वमुपलभ्यते। ततश्च यावकः, अश्वकः, उच्चैकैः, इत्यादौ संदेहः; न संदेहः; स्वार्थद्रव्यलिङ्गसंख्याशक्तिमात्राभिधानेन प्रातिपदिकात् स्वार्थादिनिमित्तकुत्साप्रशंसानुकम्पातिशयापरिसमाप्त्याद्यधिकार्थद्योतनेन पदादेव स्वार्थिकोत्पत्तिर्भवतीति। स्वार्थाद्यभिधानेन हि परिसमाप्तार्थं पदं स्वार्थादिनिमित्तकैः कुत्सादिभिः संबन्धमुत्सहते; तदाह—

कुत्साप्रशंसातिशयैः समाप्तार्थं तु युज्यते।
पदं स्वार्थादयः सर्वे यस्मात्कुत्सादिहेतवः॥

यद्यपि स्वार्थाद्यन्यतमनिबन्धनाः क्वचित् कुत्सादयो भवेयुः, तथाऽपि तत्साकल्यार्थं पदादेव कादय उत्पाद्याः। तत्र अन्यतमनिबन्धनाः कुत्सादयो यथा—

किं द्वारि दैवहतिके सहकारकेण
संवर्धितेन विषवृक्षक एष पापः।
यस्मिन्मनागपि विकाशविकारभाजि
भीमा भवन्ति मदनज्वरसंनिपाताः॥

अत्र हि दैवहतशब्देन लब्धायां नीत्युपाधौ सर्वथैवानुकम्प्यमानतायाम्, सहकारसंवर्धननिबन्धनत्वमेवास्याः कपा द्योत्यते— एवं नाम त्वं दैवोपहताऽसि, यत् सहकारच्छद्मानं विषपादपं द्वारि संवर्धयसि इति। विषपादपशब्देन लब्धायां सहकारस्य सर्वथैव कुत्सायाम्, पादपविकासकाले कामिनामसह्यस्मरज्वरसंनिपातहेतुकत्वमेवास्याः कप्रत्ययेन प्रत्याय्यते। तदुक्तम्—

कुत्सितत्वेन कुत्स्यो वा न सम्यग्वा विकुत्सितः ।
स्वशब्दाभिहिते केन विशिष्टोऽर्थः प्रतीयते ॥

न च सांप्रतिकी कुत्सा शब्दाभेदे प्रतीयते ।
पूज्यते कुत्सितत्वेऽपि प्रशस्तत्वेऽपि कुत्स्यते ॥

तद्यथा—

एक इह जीवलोके जीवतिरूपं नृरूपपशुरूपः ।
यः प्रेमपाशपाशे मृग इव न मृगीदृशां पतति ॥

स्वार्थादिसाकल्यनिबन्धनाः कुत्सानुकम्पातिशयप्रशंसादयो यथा— कुत्सितकः, अनुकम्पितकः, प्रकृष्टतरः, प्रशस्यरूपः इति । अत्र हि—

देवदत्तादिकुत्सायां वर्तते कुत्सितश्रुतिः ।
कुत्सितस्था तु या कुत्सा तदर्थे को विधीयते ॥

प्रकृष्ट इति शुक्लादिप्रकर्षस्याभिधायकः ।
प्रकृष्टस्य प्रकर्षे तु तरबादिर्विधीयते ॥

एवमनुकम्पाप्रशंसयोरपि वाच्यमिति । अनुकाभिकाभीकादयोऽपि स्वार्थिकप्रत्ययान्ता एव । तेषामन्वादिभिर्हि क्रियाविशेषः काश्चिदाक्षिप्यते; तत्र च कामयते इत्यादौ प्रत्ययो भवन् स्वार्थे एव भवति । ननु च 'अनुकाभिकाभीकः कमिता' इत्यत्र अनुकामयतेऽसौ इत्यनुकः, अभिकामयतेऽसौ इत्यभिकः, अभीको वेति वृत्तिसमानार्थवाक्यकल्पनायां धातोः पूर्वमुपसर्गेण संबन्धः, साधनेन वा? किं चातः? यद्युपसर्गेण, प्रकृत्यर्थो वक्तव्यः, अनुकामयते, अभिकामयते इत्यर्थे प्रत्ययस्यैवोत्पादात् । अथ साधनेन, पश्चादुपसर्गयोगो न घटते; न ह्यसत्त्ववचना अन्वादयः सत्त्वभूतार्थवचनैः सह संबन्धमुत्सहन्ते । यथेच्छसि तथाऽस्तु । अस्तु तावत् कमेः प्रथममुपसर्गेणैव संबन्धः । ननु चोक्तं प्रकृत्यर्थो वक्तव्य इति । स नास्ति पृथक्, प्रत्ययार्थविशेषणभूतस्यैवान्वादेः प्रकृतिभावात्; यथा 'भृशादिभ्यो भुव्यच्वेः' इत्यत्र मनस्वी सुष्ठु भवति सुमनायते, दुर्मनायते, अभि-अभिमनायते इति, सुदुरभीनां प्रत्ययार्थे भवने विशेषणत्वेऽपि प्रकृतिभावः । ननु असुमनाः सुमना भवतीति प्रकृत्यर्थविशेषणत्वमपि सुदुरभीनां कस्मान्न भवति? तथा सति स्वमनायत, दुरमनायत, इत्यङागमः स्वादीनां पूर्वतः प्राप्नोति; यथा— असंग्रामयतेति ।

॥ सप्तरत्नमालिकास्तोत्रम् ।

करोपान्ते कान्ते वितरणनितान्ते विदधतीं
नवां वीणां शोणां नखरुचिभिरेणाङ्कवदनाम् ।
सदा वन्दे मन्देतरमतिरहं देशिकवशा-
त्कृपालम्बामम्बां कुसुमितकदम्बाङ्गणगृहाम् ॥ १ ॥

अपि व्याधावाधावपि सति समाधाय हृदय-
मनौपम्यां रम्यां श्रुतिसमधिगम्यान्तरकलाम् ।
निजां विद्यामाद्यां नियतमनवद्यां न कलये
न मातङ्गीमङ्गीकृतसरससंगीतरसिकाम् ॥ २ ॥

शशिप्रख्यं मुख्यं कृतकमलसख्यं तव मुखं
सुधावासं हासं स्मितरुचिभिरासन्नकुमुदम् ।
कृपापात्रे नेत्रे दुरितकरितोले प्रणमतां
सदाऽऽलोके लोकेश्वरि विगतशोकेन मनसा ॥ ३ ॥

स्फुरद्रूपा नीपावनिरुहसमीपाश्रयपदा
धराधारा धाराधररुचिरुदारा करुणया ।
स्तुतिप्रीता गीता मुनिभिरुपनीता हितकथां
त्रयीसीमा सा मामवतु सुरसामाजिकनुता ॥ ४ ॥

तुलाकोटीकोटीकिरणपरिपाटीदिनकरं
नखच्छायाधाया क्षपितनलिनदायादविभवम् ।

पदं सेवे भावे तव विपदभावे व्यवसितं
जगन्मातः प्रातः कमलमुखि नातः परतरम् ॥ ५ ॥

सुधां पायं पायं नयनयुगलं घूर्णयति या
भुवं गायं गायं त्रिपुरहरमुच्चैः स्मरति या ।
शुकं वारं वारं करतलगतं चालयति या
स्मरस्मेरे शक्तिप्रणतजनचित्ते वसतु सा ॥ ६ ॥

न चाह्वानं ध्यानं तदपि न हि ते ह्यासनविधिं
न चाप्यर्घो न्यासः कलि कति च क्षुद्रार्पणविधिः ।
न मन्त्रो नो यन्त्रं तदपि च न जाने स्तुतिकथां
परं जाने मातस्त्वदनुसरणं कष्टहरणम् ॥ ७ ॥

इति श्रीकालिदासविरचितं सप्तरत्नमालिकास्तोत्रं संपूर्णम् ॥

॥ ज्ञानप्रसूनाम्बिकास्तोत्रम् ॥

माणिक्याञ्चितभूषणां मणिरवां माहेन्द्रनीलोज्ज्वलां
मन्दारद्रुममाल्यभूषितकुचां मत्तेभकुम्भस्तनीम् ।
मौनिस्तोमनुतां मरालगमनां माध्वीरसानन्दिनीं
ध्याये चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ १ ॥

श्यामां राजनिभाननां रतिहितां राजीवपत्रेक्षणां
राजत्काञ्चनरत्नभूषणयुतां राज्यप्रदानेश्वरीम् ।

रक्षोगर्वनिवारणां त्रिजगतां रक्षैकचिन्तामणिं
ध्याये चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ २ ॥

कल्याणीं करिकुम्भभासुरकुचां कामेश्वरीं कामिनीं
कल्याणाचलवासिनीं कलरवां कन्दर्पविद्याकलाम् ।
कञ्जाक्षीं कलबिन्दुकल्पलतिकां कामारिचित्तप्रियां
ध्याये चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ३ ॥

भावातीतमतप्रभावभरितां ब्रह्माण्डभाण्डोदरीं
बालां बालकुरङ्गनेत्रयुगलां भानुप्रभाभासिताम् ।
भास्वत्क्षेत्ररुचाभिरामनिलयां भव्यां भवानीं शिवां
ध्याये चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ४ ॥

वीणागानविनोदिनीं विजयिनीं वेतण्डकुम्भस्तनीं
विद्वद्वन्दितपादपद्मयुगलां विद्याप्रदां शांकरीम् ।
विद्वेषिण्यरिभञ्जनीं स्तुतिभवां वेदान्तवेद्यां शिवां
ध्याये चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ५ ॥

नानाभूषितभूषणादिविमलां लावण्यपाथोनिधिं
काञ्चीचञ्चलघण्टिकाकलरवां कंजायतपत्रेक्षणाम् ।
कर्पूरागरुकुङ्कुमाङ्कितकुचां कैलासनाथप्रियां
ध्याये चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ६ ॥

मञ्जीराञ्चितपादपद्मयुगलां माणिक्यभूषान्वितां
मन्दारद्रुममञ्जरीमधुझरीमाधुर्यखेलद्धिरम् ।
मातङ्गीं मधुरालसां करशुकां नीलालकालंकृतां
ध्याये चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ७ ॥

कर्णालम्बितहेमकुण्डलयुगां कादम्बवेणीमुमां
अम्भोजासनवासवादिविनुतामर्धेन्दुभूषोज्ज्वलाम् ।
कस्तूरीतिलकाभिरामनिटिलां गानप्रियां श्यामलां
ध्याये चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ८ ॥

कौमारीं नवपल्लवाङ्घ्रियुगलां कर्पूरभासोज्ज्वलां
गङ्गावर्तसमाननाभिकुहरां गाङ्गेयभूषान्विताम् ।
चन्द्रार्कानलकोटिकोटिसदृशां चन्द्रार्कबिम्बाननां
ध्याये चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ९ ॥

बालादित्यनिभाननां त्रिनयनां बालेन्दुना भूषितां
नीलाकारसुकेशिनीं विलसितां नित्यान्नदानप्रदाम् ।
शङ्खं चक्रवराभयं च दधतीं सारस्वतार्थप्रभां
ध्याये चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ १० ॥

इति श्रीज्ञानप्रसूनाम्बिकास्तोत्रं संपूर्णम् ॥

॥ श्रीगिरिजादशकम् ॥

मन्दारकल्पहरिचन्दनपारिजात-
मध्ये मणिमण्टपवेदिसंस्थे ।
अर्धेन्दुमौलि सुललाटषडर्धनेत्रे
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥ १ ॥

केयूरहारकटकाङ्गदकर्णपूर-
काञ्चीकलापमणिकान्तिलसद्दुकूले ।
दुग्धान्नपूर्णवरकाञ्चनदर्विहस्ते
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥ २ ॥

लीलावचांसि तव देवि ऋगादिवेदाः
सृष्ट्यादिकर्मरचना भवदीयचेष्टाः ।
त्वत्तेजसा जगदिदं प्रतिभाति नित्यं
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥ ३ ॥

अम्ब त्वदीयचरणाम्बुजसेवया ये
ब्रह्मादयोऽप्यविकलाश्रयमाश्रयन्ति ।
तस्मादहं तव नतोऽस्मि पदारविन्दं
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥ ४ ॥

आलीकदम्बपरिसेवितपार्श्वभागे
शक्रादयो मुकुलिताञ्जलयः पुरस्तात् ।
देवि त्वदीयचरणं शरणं प्रपद्ये
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥ ५ ॥

सद्भक्तकल्पलतिके भुवनैकवन्द्ये
भूतेशहृत्कमलमध्यनिवासभूते ।
कारुण्यपूर्णनयने किमुपेक्षसे मां
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥ ६ ॥

संध्यात्रये सकलभूसुरसेव्यमाने
स्वाहास्वधर्षिपितृदेवगणाः स्तुवन्ति ।

जाया सुताः परिजनातिथयोऽकृकामा
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥ ७ ॥

गन्धर्वदेवमुनिनारदकौशिकात्रि-
व्यासाम्बरीषकलशोद्भवकश्यपास्त्वाम् ।
भक्त्या स्तुवन्ति निगमागमसूक्तमन्त्रै-
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥ ८ ॥

एकाम्रमूलनिलयस्य महेश्वरस्य
प्राणेश्वरि प्रणतभक्तजनावनेधि ।
कामाक्षि रक्षितजगत्त्रितयेऽखपूर्णे
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥ ९ ॥

शब्दात्मिके शशिकलाभरणार्धदेहे
शंभोरुरःस्थलनिकेतननित्यवासे ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
भिक्षां प्रदेहि गिरिजे क्षुधिताय मह्यम् ॥ १० ॥

भक्त्या स्तुवन्ति गिरिजादशकं प्रभाते
पुत्रार्थिनोऽथ धनधान्यसमृद्धिकामाः ।
प्रीता महेशवनिता हिमशैलकन्या
तेषां ददात्यसुलभान्यपि चेप्सितानि ॥ ११ ॥

इति श्रीगिरिजादशकं संपूर्णम् ॥

॥ श्रीभ्रमराम्बाष्टकम् ॥

श्रीकण्ठार्पितपत्रगण्डयुगलां सिंहासनाध्यासिनीं
लोकानुग्रहकारिणीं गुणवतीं लोलेक्षणां शांकरीम् ।
पाकारिप्रमुखामरार्चितपदां मत्तेभकुम्भस्तनीं
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ १ ॥

विन्ध्याद्रीन्द्रगृहान्तरे निवसितां वेदान्तविद्यानिधिं
मन्दारद्रुमपुष्पवासितकुचां मायां महामायिनीम् ।
बन्धूकप्रसवोज्ज्वलारुणनिभां पञ्चाक्षरीरूपिणीं
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ २ ॥

माद्यच्छुम्भनिशुम्भमेघपटलप्रध्वंसझंझानिलां
कौमारीं महिषाख्यशुष्कविटपीधूमोरुदावानलाम् ।
चक्राद्यायुधसंग्रहोज्ज्वलकरां चामुण्डकाधीश्वरीं
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ ३ ॥

दृक्कंजातविलासकल्पितसरोजातोरुशोभान्वितां
नक्षत्रेश्वरशेखरप्रियतमां देवीं जगन्मोहिनीम् ।
रञ्जन्मङ्गलदायिनीं शुभकरीं राजत्स्वरूपोज्ज्वलां
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ ४ ॥

केलीमान्दिरराजताचलतलां संपूर्णचन्द्राननां
योगीन्द्रैर्नुतपादपङ्कजयुगां रत्नाम्बरालंकृताम् ।

स्वर्गावाससरोजपत्रनयनाभीष्टप्रदां निर्मलां
श्रीशैलभ्रमरार्म्बिकां भज मनः श्रीशारदासेविताम् ॥ ५ ॥

संसारार्णवतारकां भगवतीं दारिद्र्यविध्वंसिनीं
संध्याताण्डवकेलिकां प्रियसतीं सद्भक्तकामप्रदाम् ।
शिञ्जन्नूपुरपादपङ्कजयुगां बिम्बाधरां श्यामलां
श्रीशैलभ्रमरार्म्बिकां भज मनः श्रीशारदासेविताम् ॥ ६ ॥

चञ्चत्काञ्चनरत्नचारुकटकां सर्वंसहावल्लभां
काञ्चीकाञ्चनघण्टिकाघणघणां कंजातपत्रेक्षणाम् ।
सारोदारगुणाञ्चितां पुरहरप्राणेश्वरीं शांभवीं
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ ७ ॥

ब्रह्मर्षीश्वरवन्द्यपादकमलां पङ्केरुहाक्षस्तुतां
प्रालेयाचलवंशपावनकरीं शृङ्गारभूषानिधिम् ।
तच्चातीतमहाप्रभां विजयिनीं दाक्षायणीं भैरवीं
श्रीशैलभ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ ८ ॥

भ्रमराम्बामहादेव्या अष्टकं सर्वसिद्धिदम् ।
शत्रूणां तु नराणां च ध्वंसनं तद्ददाम्यहम् ॥ ९ ॥

इति श्रीदुर्वासोमुनिविरचितं श्रीभ्रमराम्बाष्टकं संपूर्णम् ॥



॥ श्री शारदाम्बा, शृङ्गगिरि ॥

ॐ

The Journal

OF THE

Sri Sankaragurukulam

Srirangam

VOL. II. NO. 8.

SRI VENKATESWARA ORIENTAL LIBRARY TIRUPATI.

RATIONALE OF THE PRINCIPLES OF UNTOUCHABILITY AND TEMPLE-WORSHIP.

By Rao Saheb N. NATESA IYER B.A., B.L., *Working President : All India Varnasrama Svarajya Sangha, Madura.*

PRELIMINARY.

It has been said well and truly by an eminent foreign savant that "It may be safely assumed that when many millions of intelligent people observe certain customs and practices for thousands of years there must be something in them to redeem them from the charges of folly and criminality and barbarism." No better illustration of the truth of this observation can be thought of than the practices and customs of the Hindus relating to Untouchability and Temple-Entry no less than Early Marriage. Every element of the dictum is present in an abundant measure in these cases. That the Hindus are an intelligent people cannot be gainsaid. Mr. Max Muller says that they are a nation of philosophers and I suppose it is a sufficient passport. Their achievements in all realms of knowledge, in Sciences, Arts, Industries, Medicine, Politics etc., proclaim it loudly. There is not a single field left unexplored by them. That the practices and customs have been in existence from prehistoric times is also an admitted fact. The people who have evolved the Vedic Religion and the Vedanta philosophy and the people

who have produced Valmiki, Vyasa, Panini, Patanjali, Manu, Yajnavalkya, Parasara, Kautilya, Sukra, Kamandaka, Charaka and Susruta, Apastamba, Bodahyana, Kalidasa, Bhavabhuti, Sankara, Ramanuja, Madhva, Appaya Deekshitar, Vedanta Desikar and Raju Sastrial cannot be fools or criminals. If the Vedic Religion and the Vedic Philosophy formulate, accept and apply in practice the principles of Untouchability and Temple-worship now furiously attacked; if the Vedas, the Upanishads, the Brahma Sutras, the Mahabhashya, Srimad Ramayana. Mahabharata, Bhagavadgita, the Smritis of Manu, Yajnavalkya and Parasara, Kamikagama, Karanagama, Vaikhanasa, and Pancharatra Agamas, Sakuntala, Uttararamacharita, the Sutra Bhashya, Sivanandalahari, Soundaryalahari, Sadhana panchakam, Manisha Panchakam, Bhamati, Kalpataru, Parimalam, Nyaya Bhaskara, Nyayendu Sekhara, Nyayamrita Tarka Tandava etc., insist on the observance of the principles of Sanatana Dharma, Varna Dharma, Asrama Dharma and lay special stress on the principles underlying Untouchability, and Temple-Entry; if the great philosophers who preached and experienced the oneness and divinity of the Soul have also preached and practised the diversities and differences and distinctions of the various physical bodies enshrining the soul and have stamped certain people as untouchables and unapproachables by birth; how can we arrogate to ourselves the right to declare these saints, sages and philosophers as idiots and sinners, the principles so enunciated as so many dark blots on an otherwise admittedly excellent religion and prescribe prayaschittam and penance for committing and permitting and perpetuating the otherwise inexpiable æons-old sins. Is it not necessary that one should think a hundred times, nay a thousand times, before one can declare that our forbears and ourselves have gone wrong, for over 2000 years, in the matter of untouchability and temple-entry alone, when our excellence, shrewdness and wisdom have been acclaimed in every other particular? In spite of a quarter of a century of wordy warfare, quibbles, and dialectics, what are the proofs which our erring brethren have adduced in support of their position? Have they placed before the world one single text from the Srutis, Smritis, Itihasas or Puranas for the bold proposition, boldly asserted and boldly repeated *ad nauseam* that untouchability has no sanction in the Sastras. All that they have done is to mutilate, twist and torture the instances of Nandanar, Tiruppanalvar, Ajamila etc., which in their heart of hearts they know are not only incapable of the interpretation they seek to place on them but demonstrate the very opposite of it.

जानामि धर्मं न च मे प्रवृत्तिः
जानाम्यधर्मं न च मे निवृत्तिः ।

केनापि देवेन हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि ॥

Yet it is these empty uncorroborated dicta of those people that pass as supreme authority and as overriding Vedavakyam and are giving rise to endless strifes, dissensions, black eyes, broken heads and pandemonium. May I ask here, who are the criminals ? Is it the sages of yore or the modern trouble-pickers. Let one touch one's heart and answer. May God save us all.

BASIC MISAPPREHENSION OF SANATANA DHARMA & VARNASRAMA DHARMA AND ITS CAUSES.

Nothing in our religious and philosophical Literature stands more cruelly misunderstood, more ferociously maligned and more brutally attacked than the terms Sanatana Dharma and Varna Dharma and Asrama Dharma. The division of us Aryans into Sanatanis and non-Sanatanis has no sanction in the Sastras. It is one of the many modern inventions which are daily devouring us. Even the term Sanatani does not appear to occur in the books though the term Sanatana Dharma occurs. Non-Sanatani Hindu is a contradiction in terms. We have submitted to our country being called India and to ourselves being called Hindus. There is no warrant for this in our ancient writings. We are to submit to this division also likewise. Our motto is and has always been.—'What is there in a name.' A rose will smell as sweet by any other name. Even if people should call us Panchamas and Panchamas as Brahmanas, I presume we would not quarrel. This is by the way. The question naturally rises to the lips—Who is responsible for this misunderstanding of the terms Sanatana Dharma and Varnasrama Dharma and for the quite modern violent attack upon them? Who again is responsible for people becoming more and more indifferent to Sanatana Dharma and Varnasrama Dharma? The answer is writ large in capital letters—"WE". We must confess our guilt and hang our heads in shame. Why? Knowing as we do, that for the past quarter of a century and more, people are succumbing to the glamour of the West, to the materialism of the West and to its suppresion of religion in favour of science ; seeing as we do that aggressive breaches of Sastraic injunctions and lapses from correct practices and customs and acharas are becoming increasingly frequent in the shape of pleasure-sea-voyages inter-dining, inter-marriages and Pratiloma marriages; have we done anything to condemn them or express our condemnation. On the other hand, have we not been encouraging them by continuing social contacts with the offenders. Had we only interfered in time and nipped the evils in the bud, would they have assumed their present huge and uncontrollable dimensions ? Would the people have ceased to look upon them with the horror and wrath which were heaped on them but a quarter of a century ago ? Had we

not raced with one another as we have been shamelessly doing, all these years, to secure a share in the ill-gotten wealth of high-placed offenders; had we not tamely allowed their irreligious acts to become precedents for later repetitions and further aggressions, had we only ostracised them as we were entitled to do and not encouraged them directly and indirectly by our conduct positive and negative, as we have done, would they have dared to dictate to us, as they are now doing, with impunity at the top of their voice and from the position of affluence and influence which a merciful Providence for purposes of its own has thought fit to grant them? Would they have dared to dictate to us that Hinduism is a religion ridden with meaningless rituals, that Hinduism is not a position but a movement, that the institution of Varna and Caste, early marriage and joint family have outlived their original purpose and may be scrapped with usefulness, that it is competent to the crowned heads of Indian States to abolish and alter the Sanatana Dharma, Varnasrama Dharma and Stree Dharma, untouchability and the principles regulating the entry into temples by a fiat of their own and by mere proclamation? What is the use of crying over spilt milk.

Are we not still committing day in and day out, other crimes equally, or far more, serious? I shall explain myself. It appears to be true, I wish I am incorrect, that more than 50 p. c. of our adult and middle-aged men are not performing the Tri-Sanchyas and that most of them have well nigh forgotten the Mantras also. What a tragedy. Our Parvana Sraddhas and Tarpanams and Abdikams, are, I am told, threatening to share the same fate. They are perhaps past redemption. We shall leave them. What about our boys and girls who are to be the future guardians of our country and its Dharma. Even the names, Varna, Asrama and Dharma, Sandhya, Tarpana, Sraddha, Ekadasi, Amavasya, Uparaga, Gayatri, Upanayanam, Vivaha etc., would become unknown to them, not to say anything about their meaning. The time will not be far off when these names will be ranked by them with the objects to be kept in public museums. Is this for the good of India and Hinduism? What have we done to curb this growing tendency, I ask, in all seriousness? How many of us know the elements of Sanatana Dharma and Varnasrama Dharma? Is it not a fact that at the bare mention of these words, our boys and girls and even adult men and women take to their heels as they would from some dreaded objects or contageous diseases. What is the reason for this astounding modern phenomenon? The answer is this: We have allowed the formation, growth and continuance of a thick and impenetrable wall of ignorance and misconception, Apratipatti, अप्रतिपत्तिः, Vipratipatti विप्रतिपत्तिः and Anyatha pratipatti अन्यथाप्रतिपत्तिः to grow around the terms. Ignorance has grown into indiffer-

ence and indifference has grown into misunderstanding and misunderstanding has grown into hatred. We have not moved one little finger so far, to arrest the process in an organized manner. The principles underlying untouchability and temple-entry are an integral part of Varna Dharma. It is no wonder therefore that there is a likelihood of a rapid fall in the number opposing the two movements and a still more rapid rise in the number supporting them.

THE TASK AHEAD.
BETTER LATE THEN NEVER.

The problem before us is—Are we to simply look on in despair with folded hands? My answer is an emphatic *No*. My reasons are these. A good cause is bound to succeed ultimately whatever difficulties may confront it and however numerous the initial failures. We have absolute faith in the goodness of our cause. Sanatana Dharma and Varnasrama Dharma are eternal truths and as such eternally good and admit of no alteration. If you can alter truth you can alter Dharma, and not otherwise. A good cause sometimes fails at the initial stages because of the ignorance of its goodness. At present our work has to be two-fold, We have to remove this wall of ignorance of Varnasrama Dharma and Sanatana Dharma and of the principles relating to Untouchability and Temple-Entry. Nextly we have to educate the masses in the details and bring home to them the sweet eternal truths treasured in them.

It has been said by an eminent man "Bring your lotus to blossom and the bees will come of themselves."

The lotus of Varnasrama Dharma is still under water. The bees of humanity are either ignorant of the lake and the lotus or have forgotton their existence. We must make the lotus rise above the water and bring it to blossom. The soft sweet delicious fragrance which now lies imprisoned within, will then radiate in all directions and draw the million stragglers once more to the lotus. Thus we shall ride over the destructive deluge which is sweeping Bharata Varsha from end to end. It will be never too late. We may have to face appalling difficulties. Hopeless perplexities may confront us. Absence of willing and self-less co-operation may smother us. All these can be easily overcome. We have to take courage in both the hands. We have to plant our feet firm in the surrounding mist. Tomorrow may see us fail and perhaps the day after also. Let us not lose heart on that account. Let us work and work and work again, be true to ourselves and stand to our guns and act in the full belief that we will win. It may be there is amongst us no Hitler, no Mussolini, no Nehru, no Bose, no Savarkar, no Mukerjee. We do not require them. If we will, if we will intensely, if we will whole-heartedly and one-pointedly, the necessary men and materials will appear in no time.

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

Let us put our shoulders to the wheel and draw with faith the national chariot of Svarajya clasped in a loving embrace with Svadharma like Uma with Maheswara. Success will greet us, and woo us and jump into the hollow of our hands. To this end, we must lead the world into a reasoned, informing and satisfying understanding of the principles of Sanatana Dharma and Varnasrama Dharma which comprise as parts of themselves the principles regulating Untouchability and Temple-worship.

THE FUNDAMENTALS OF VEDIC RELIGION AND VEDIC PHILOSOPHY.

It is well that we remind ourselves at the outset of certain unquestioned and unquestionable facts and positions. *Vedic Religion* which is only another name for Varnasrama Dharma has been existing side by side with *Vedic Philosophy* or Vedanta. Both have been guiding us, controlling us and ruling us. We have been rendering allegiance to both. Both have solved for us our problems of life here and hereafter. We have been marching on towards our goal of Mukti under their joint benign influence unobsessed by any conflict between them, real or imaginary. There is conflict and there is no conflict.

Whereas *Vedic Religion* formulates and insists upon well-defined differences and distinctions between Varna and Varna and Caste and Caste, the Vedic philosophy postulates the essential oneness and divinity of the soul from the ant (पिपीलिका) to Brahma and from Chandala to Brahmana. Thus, to all appearances, Vedic Religion is the very opposite of Vedic philosophy. Still they work in unison hand in hand. Therein lies their grandeur and all-pervasiveness which are at once their merit and their strength.

There is yet another intriguing feature which has been totally lost sight of by our erring brethren. The very saints, sages and philosophers who have proclaimed the oneness and divinity of the Soul have proclaimed with equal emphasis the differences, distinctions and diversities of the physical bodies in various gradations. In other words the persons who accept the Vedantic oneness, *Ekatvam*, accept also the many-ness of the Varna Dharma, its Bahutvam.

Is there really any conflict between the two ? Let us ponder over this. When the Vedic philosophy or Vedanta formulates oneness it has only the soul in view and not the body. When Vedic religion or Varna Dharma postulates diversity it has only the body in view and not the soul. Both agree in holding that the soul is one and that the bodies are diverse. The conflict is thus more apparent than real. The principles underlying Untouchability and Temple-Entry belong to the domain of Vedic Religion, to the domain of Varna Dharma, which deals with the physical

body and its diversities and gradations and not to the realm of Vedanta which deals with the oneness of the Soul. This lamentable failure of our unthinking brethren is the prolific parent of the unreasonable bitterness and split and chasm which divide us. This matter may be further elaborated as follows.

RATIONALE OF UNTOUCHABILITY AND TEMPLE-ENTRY.—RELIGIOUS AND PHILOSOPHICAL ASPECTS.

The three great Acharyas of this country are in complete agreement upon certain fundamental truths underlying the religion and philosophy of the Hindus. The enunciation of these basic principles will clear the way for a proper understanding of the rationale.

Every living being, man, beast, bird or tree has a soul as well as a body. The soul has no birth or death, is intrinsically pure in whatever body it may be imprisoned and is essentially divine. The physical body is impure to a greater or less degree and subject to birth, change, decay and death. The linking of the soul with the body is samsara, bondage or misery. The liberation of the soul from the body is Mukti, freedom or bliss. The ultimate goal of every living being is this liberation of the soul from the body. It can be normally achieved only by successively going through the prescribed series of disciplinary actions and religious excercises. Any attempt at the liberation of the soul from the body in other than the recognised modes, will result only in the forging of additional fetters and in a more rigorous imprisonment of the soul in a fresh body. The correct method is to make by a slow process the impure body less and less impure repeating the process until it becomes virtually pure, and finally to cast it off.

The disciplinary actions and religious exercises necessarily vary with the body in which the soul is sheathed. Here again there is a close similarity with what obtains in the physical world. What will nurture a tree-body will not nourish an animal-body and vice versa; what will nurture a child-body will not sustain a man-body; what will sustain a man-body will not fully sustain a woman-body; what will sustain a vegetarian body will not satisfy a carnivore body; what will satisfy one accustomed to tamasic food will not be agreeable to one living on sattvic food. A burning charcoal will feed an ostrich and a volume of air will satisfy a cobra. A food suitable to a man in health will not agree with a man in a diseased condition. From this it logically follows that the religious discipline needed for a man will not be the same as that needed for a woman; that what is needed for one class of men will not be agreeable to a different class of men and what is needed for the same individual while yet a boy will not be the same as that needed for him when he grows into adolescence and manhood. Untouchability and prohi-

bitions against temple-entry necessarily flow as corollaries from these principles.

The untouchability of Hinduism is a religious injunction having a scientific basis also as will be demonstrated later on. Months back, a statement was made by Mr. Gandhi and reiterated by him, later on also, that untouchability as practised now is an untruth and has no foundation in the Sastras, and is not an integral part of Hinduism. The statement is an unpardonable bluff and a political stunt and betrays either colossal ignorance of the Sastras or a perverse mentality. As many as 165 Sastraic authorities were cited in support of untouchability at the Tamil Nadu Varnasrama Conference held in Madura in 1934 and more than 20 of them have been drawn from the Samhitas and Upanishads with a wealth of illustrations which could not have failed to convince any body but an unwilling mind. The term "untouchability as practised now" has not been explained by Mr. Gandhi or his choristers so far. It has not been shown how the Vedic, Smritic, Puranic and Agamic untouchability differs from the untouchability as practised now though it is admitted that the modern Panchamas are astonishingly similar in almost every respect to the Vedic, Smritic, Puranic and Agamic Chandalas, similar in costume, living, manners, customs, worship and residence. The term "practised" as applied to untouchability has no meaning. Nobody practises untouchability as one practises Law, Medicine, Engineering, Painting and Sculpture.

The position as enunciated by the Sastras is this: Untouchability is by birth and not of man's making. It is inherent in every created being. It runs in the blood of man and beast and in the juice of tree and plant. It is part of the stuff of which every physical body is made in the same way as colour, smell, taste, predilection, temperament, tendency etc. It has relation only to the physical body and not to the soul enshrined in it. The soul is always pure and divine while the physical body is necessarily impure though in a varying degree. The same Sastras which have declared the oneness and the divinity of all souls, have, with equal emphasis, declared the varying degrees of impurity and untouchability attaching to the various physical bodies of man, beast or tree which are the results of the Karma of a previous birth and not a mere chance or accident. Where the prior Karma is meritorious (punya), God gives a comparatively pure body and when it is ignoble (papa) God gives a comparatively impure body. You have a beast-body when your Vachikapapa predominates, you have a tree-body when your Kayikapapa predominates and you have a Chandala body when your Manasikapapa predominates.

शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥

The impurity and untouchability attaching to a Panchama body or non-panchama body are bound to last as long as that body lasts. Every species of physical bodies is untouchable to every other species; every individual of one species is untouchable to every other individual of the same species: and every part of an individual of the same species is an untouchable to every other part of the individual of the same species. The reason, is that on account of the varying degrees of impurity, touch is prohibited, as otherwise the toucher and the touched will be affected. As from one aspect the grossest impurity attaches to the offspring of the union of a Brahmana female with a Sudra male and their descendants they go by the name of "Untouchables". It is God that makes one an untouchable, due regard being had to the Karma of his former or previous birth. God alone can remove it. He will do so according to his own laws by giving him another body after his death. No man or body of men on earth can ever remove it, even though he or they be Mr. Gandhi or Mr. Rajagopalachariar, or Mr. Malaviya or Mr. Savakar or the Legislative Assembly or the Imperial British Parliament. There is therefore no question of the removal of it by legislation, and legislation will be but a BRUTUM FULMEN. There will, no doubt, be the satisfaction of a legislative enactment disfiguring the Statute Book. There will be nothing more.

Similarly, the principles underlying temple-entry have been laid down with equal clearness in the Sastras. The division of the Hindus, into exluded castes and non-excluded castes is as misleading as it is baseless. It is perhaps more correct to say that the entire Hindu community is excluded because it is the Archaka or Bhattar alone that can enter the Garbhagriha or SANCTUM SANCTORUM and touch and worship the idol. Not even a perfect Brahmana can do so. The truth, however, is that no section is really excluded. What happens in temples is this: Various places have been assigned by the Sastras to various classes of people, for Darsanam, some near and some far away from the Garbhagriham, in much the same way as definite places have been assigned in the Durbar Halls to individuals holding definite positions and to different classes of persons, some near and some far away from the Throne. The Brahmana alone can go up to the Ardha Mantapam. The mightiest potentate has to keep himself away from it. A woman though she is the princess blood royal or the most spiritual Brahamana woman, has to rest content with a place lower down. A Brahmana in pollution, a Brahamana woman in menses or in confinement cannot even approach the temple. Where is caste arrogance or superiority in all these, as mischievously adumbrated by the reformers for unhinging and inflaming the credulous minds of the uninformed

and inciting them to revolt against the established order. The fact of the matter is this : Though God is omnipresent, yet in His infinite mercy, and with a view to benefit mankind He manifests (himself) in the idols consecrated in the temples when invoked to do so according to the rules prescribed by Himself in much the same way as the omnipresent electrical energy manifests itself in a small bulb, when the necessary conditions are satisfied.

चिन्मयस्याद्वितीयस्य निष्कलस्याऽशरीरिणः ।
उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना ॥

Though the sovereign sitting in the throne in the Durbar hall and the sovereign passing along the streets in procession is the same, still, persons conforming to the regulations of the prescribed dress, military, civil, evening etc., will alone be admitted into the august presence in the Durbar Hall, while no such restrictions will fetter the approach to him while passing along the street. Even so, though the God vivified in the idol (sila) at the Garbhagriha is the same as the God vivified in the idols carried in procession along the streets, the regulations regarding the dress in which the soul is clad, have to be satisfied for going into the temple, while all can approach the idol in the streets without restriction. The Brahmana body, the Kshatriya body, the Vaisya body and the Sudra body are the dresses prescribed by God. The same spiritual merit and efficacy which are vouchsafed to the perfect Brahmana worshipping at the Ardhamandapam is assured to the Panchama standing at the far-off Gopuram. The rules are therefore not arbitrary or capricious or the tricks of crafty priests. The same sastras prescribe the conditions of worship as well as the effects of worship. Where is the logic in accepting the one and rejecting the other ? If, what the non-panchama acquires by submitting to very hard and exacting rules can be acquired by a panchama unconditionally, it is a privilege for the panchama and not a disability. It is the non-panchama, on the other hand, that is under a disability. We shall now turn to the scientific aspect.

RATIONALE OF UNTOUCHABILITY AND TEMPLE-ENTRY.
SCIENTIFIC ASPECT.

The untouchability of Hinduism is but part of the general law of untouchability obtaining in the entire universe. Untouchability is the rule and touchability is the exception. Observe the birds and the beasts. There will be physical contact only when mating and to the extent necessary for it; observe again the trees; however closely you may plant them, the branches of one will attempt to get away from the touch of the branches of the other, as much as they can within their limited sphere. This is the rule even with the inanimate kingdom. A man of positive sciences will tell you that the electrons of a body will try to fly away from one another and every physical body

has only a deceptive appearance of solidarity. The interspaces between electrons and electrons are normally much larger than the spaces occupied by themselves. Why? Nature abhors touch in every sphere. Man alone, in the plenitude of his learned ignorance is persistant in the breaking of these laws of Nature and is incessantly paying the penalty.

The matter can be viewed from another standpoint of positive sciences. The patent impurity of a man suffering from a contagious, loathsome disease creates around him an atmosphere uncongenial to pure beings, the sphere and duration of which vary with the intensity and duration of the impurity itself. And hence this physical body is excluded from the temple so long as the disease and the impurity last. The latent impurity of a man or woman in pollution, and of the woman in menses and confinement produces similar results and hence they are excluded from temples so long as these pollutions last. The physical body of the untouchable has in its flesh, blood and marrow, the accumulated impurities of centuries of impure and unclean life and food and creates an impure atmosphere which renders him unfit to enter a temple so long as that physical body subsists. The difficulty in establishing by any known scientific process, this difference between the blood and flesh of a pure body and the flesh and blood of an impure body is no argument against its existence. The American scientists are reported to have discovered so far about 48 different kinds of blood. Just as carbon under certain structural arrangements assumes the body of a sparkling diamond and under others the body of dull charcoal and functions differently in each case, just as a substance takes the body of a beautiful crystal under certain conditions and is a shapeless mass under others; even so, the energy released by the karma of a living body in a previous birth produces in contact with a congenial physical body and as a result of electronic and protonic arrangements, a panchama body or a non-panchama body, according to the nature of the actions, good or bad, in obedience to the law of conservation of mass, matter and energy of which the Hindu doctrine of Karma, Janma and Varna is but an illustration. A mere bath or a clean clothing cannot transform the one into the other. A more radically different treatment is needed by taking away that body and giving a different body as was done in the case of Saint Nandanar and Tiruppanalvar. Can legislation do this?

There is yet another aspect. Modern scientists tell us that each race, nation, class, caste or community has its own nerve-aural envelope and contacts of different auras lead to injurious results. This explains why in a seance room, entry of persons belonging to butchering or hunting classes prevents the manifestation of the spirit and causes the disappearance of the

manifested spirit. Similarly the aura of a panchama taken to a temple constructed according to the Sastras fails to evoke the SANNIDHYAM or causes its disappearance. Is it in the power of the legislature to change this aura, to create it or destroy it?

LEGAL ASPECT.

I refrain from dealing with the legal aspect in *extenso*. It is sufficient to state that whether the temple is the property of GOD or of the section to which it stands dedicated, it will be nothing short of legislative dacoity to take the temples away from them and throw it open to the Panchamas to whom it was never dedicated. To leave the matter to a decision by votes is extremely chimerical. Can the vote of the majority determine questions relating to religion, science or property? If tomorrow people are asked to vote upon a Bill to confiscate all private properties and distribute them amongst themselves, is it necessary to state what the result will be? People are not wanting in these days to vote away by a majority resolution even the existence of GOD. Besides, the THIRTY CRORES of Hindus scattered throughout India are interested in all the temples of repute. How can the local people alone be recognised as the persons entitled to vote. Again, the legislatures composed as they are, of men of different nationalities, faiths and beliefs, are no more competent to decide the matter in hand than they are competent to decide between the undulatory theory and the corpuscular theory of light. It is extremely doubtful whether the legislatures have really jurisdiction over the matter.

A strange question is asked sometimes in this connection. 'You admit alien religionists such as Europeans, Americans etc. into a few temples up to the Dhvaja Stambham; how can you deny with any sense of fairness and logic, admission, to your own co-religionists like the Panchamas?" The answer is, one wrong cannot make right another wrong. The question serves only to furnish an argument for the abrogation of the practice wherever it may exist and not for adding another wrong to an existing wrong. The prevailing practice is probably one of the incidents of a foreign rule which, it is the duty of every true Hindu to put an end to.

UNTOUCHABILITY, TEMPLE-ENTRY AND EXPEDIENCY.

It is said that having regard to the modern conditions, the removal of untouchability has to be effected as being eminently expedient and that if only the panchamas are allowed to enter the temples, shake hands with the non-panchamas, dine with them and marry their boys and girls, however scanty their clothings and however hungry their stomach, the millennium will be reached. CAN PERVERSITY AND DOGMATISM GO FURTHER? What they want is food and lodging and not this spectacular demonstration. Let us visualise the results of interdining and inter-marriages. There is

at first, a Varna-Sankarya or a confusion of castes among the Hindus. It is necessarily followed by interdining and intermarriage among the Hindus and the non-Hindus like the Europeans, Muslims, Americans etc. A new race springs up, a mixture and medley of all races, of all blood, all religions, all colours and all practices. What will you call this race? What is its religion? How will you call this country. Is this the United Nation which is desired? Is this the unification designed for reaching SVARAJ for which brave Hindu boys and girls enter the prisons daily, perform satyagrahas and shed their blood? May God bless us all and prevent this Svarajya from disturbing our PEACE.

In the first place, Expediency is a slippery and illusory ground especially in a matter touching the religious conscience of the people. Secondly, expediency in this case is all the other way. It may be safely predicted that if the temples are thrown open to the Panchamas there will be a repetition of the tragedy of Sivakasi riots. The *sites* of temple and the places around will be turned into battlefields and blood will flow like water. Lastly if panchamas enter temples, non-panchamas will desert them; as soon as non-panchamas desert them, the panchamas will follow suit. The temples will become no better than the Java temples in ruins. Do you desire this result?

It is said that the Sastras have changed from day to day and that later Smritis have often times modified the earlier ones. This again, is the result of a huge misconception. A close examination will show that no Smriti has modified an earlier Smriti. One Smriti lays down with prominence the rules applicable to one Yuga, while, another lays down with equal prominence the rules relating to a different Yuga. The rules governing a particular Yuga have never been stated differently in different Smritis.

It is said that if you do not allow the panchamas into temples they will leave our faith. This is a gross libel upon that community. The panchamas have withstood the Moslem sword, and the Christian preaching and purse all these several hundreds of years. They have so far justified the observation of Mr. M. C. Raja made the other day in the Legislative Assembly that they belong to the warrior class. This warrior spirit will surely serve as a strong shield against outside aggression. Their firm loyalty to the Hindu religion is wholly different from the vociferous lip-worship of their literate brethren. On the other hand, it may be safely predicted that if further action is taken, history will repeat itself. The tragedy of CHAURI CHAURA will be a daily occurrence in millions of places in India especially in villages and small towns which still continue to be impervious to the influence of social reformers.

I now proceed to the consideration of

Sanatana and Varnasrama Dharmas. These Dharmas are the warp and woof of the life of the Hindu. The Hindu is conceived in Dharma, born in Dharma, bred up in Dharma and growing and consummating in Dharma. Dharma is part of his blood, flesh and marrow. Expounding Dharma to him was like giving lessons in swimming to the fish. This however has become the crying need of the hour.

SANATANA DHARMA DEFINED.

That even truisms require to be aggressively asserted, discussed and established is, perhaps, the saddest tragedy of the times. Otherwise, I cannot understand the necessity for defining the term "Sanatana Dharma". "Sanatana" means eternal. *The term Dharma like the terms Sat, Chit, Ananda is untranslatable. Great men have tried and failed and deservedly so. No other language in the world possesses a conception similar to it. It is peculiarly Hindu. A rose is a rose and Dharma is Dharma.* Every one of us realises what Dharma means though not one in a million can find an expression for describing it. *The reason is, that it is more an experience than an abstract precept.* Sanatana Dharma is called Sanatana Dharma, because it has no limitations of place, time and people. Being a Sanskrit term, it is associated with the Hindu and erroneously assumed to be the exclusive property of the Hindu. It is a mistake. It is common to all nations, to all ages and to all elimes and admits of no ebb or flow, unchanging and unchangeable.

समानं त्रिषु लोकेषु सर्वावस्थासु शाश्वतम् ।
सनातनं मतं सत्यं क्षीयते नोपचीयते ॥

It holds an unquestioned sovereign sway over all countries, over all people and at all times. It consists of seven universal principles condensed in seven simple words, Ahimsa, Satyam, Asteyam, Saucham, Indriyanigraham, Tyaga and Seva. Injure not anybody in thought, word or deed. Speak the truth always.

ना हिंस्यात् सर्वा भूतानि । सत्यं वद । सत्यान्न प्रमदितव्यम् । सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम् । प्रियं च नानृतं ब्रूयात् । एष धर्मः सनातनः । सत्यं भूतहितं प्रियम् ।

Don't cast covetous eyes on other's possessions.

मा गृधः कस्यस्विद्धनम् ।

Be clean in mind and body.

शौचे यत्नः सदा कार्यः ।

Keep your senses always under control.

प्रकीर्णविषयारण्ये धावन्तं विप्रमाथिनम् ।
ज्ञानाङ्कुशेन कुर्वीत वशमिन्द्रियदन्तिनम् ॥

Practise renunciation.

न कर्मणा न प्रजया धनेन त्यागेनैकेनामृतत्वमानशुः ।

Serve humanity.

परोपकारः पुण्याय पापाय परपीडनम् ।

त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्यभृत्यस्य भृत्य इति मां स्मर लोकनाथ ।

Is there anything in this which should make any one grumble, fret or frown? Is there anything reactionary or unacceptable or unreasonable in any of these principles, anything which admits of addition or alteration? Even the Purvadevas of Russia, Italy and Germany swear their allegiance to these principles, however much they may break them and justify their breaches. One can more successfully command the Sun and the Moon to fly from their orbits than make humanity forsake these principles.

SVADHARMA AND VARNASRAMA DHARMA

Svadharma means one's own Dharma. Varnasrama Dharma means the Dharma appertaining to Varnas and Asramas. *Varna is untranslatable.* Asrama means a particular order in life of a particular Varna. Varna has often been translated as caste. It is a grievous mistake and has arisen from the confusion of Jati with Varna. Jati may perhaps be translated as caste but not Varna. Varna is not synonymous with Jati. *There are and there can be but four Varnas, Brahmana, Kshatriya, Vaisya and Sudra. There never was and there never will be a fifth Varna.* Manu says. "There is no fifth Varna." He does not say that there is no fifth caste. On the contrary, he unequivocally, states that there can be as many Jatis as there can be permutations and combinations of mixed unions among the Varnas and offsprings of mixed unions. They are bound to be countless in number. Manu, and other Smritikaras enumerate the names of some of them. The Yajurveda Samhita in the Naramedha Prakarana mentions at least dozen castes *based on birth and not merely on occupation.* The Dharma of the four pure Varnas is not the same as the Dharma of the numerous mixed castes. Manu himself deals with them in sufficient detail and later Smritikaras amplify them. Similarly there are but four Asramas and their respective Dharmas have also been meticulously defined.

RELATIONSHIP BETWEEN SVADHARMA, VARNASRAMA DHARMA AND SANATANA DHARMA.

Is Svadharma the same as Varnasrama Dharma? How are they related to Sanatana Dharma? Varnasrama Dharma proper as already stated is the Dharma of the four Varnas and the four Asramas *viz.*, Brahmacharin, Grihastha, Vanaprastha and Sanyasin. It draws within its orbit, as its name implies, the groups answering to the terms Varna and Asrama. It relates exclusively to them. It cannot take in but on the other hand virtually excludes all the other groups outside. Varnasrama Dharma does not therefore govern the offspring of mixed unions who, though they may be Hindus, have ceased to be pure Varnas by reason of their mixed blood. Nor does it govern the groups who consider themselves as having never belonged to the Varnasrama, such as Christians, Moslems etc. *Time was when the whole world was inside the*

Varnasrama group and all were Varnasramites. Immigration into distant lands and the inevitable fading of memories coupled with ignorance, illusion and perhaps perversity also brought about a total severence from the parent stock. This is but a theory. It certainly admits of a demonstration in the fullness of time. Whether or not it is correct, there arose a necessity to distinguish the Dharma of the Varnasrama group, from the Dharma of other groups outside, and to reiterate and emphasise the total absence of any superiority or inferiority complex on that account. In consequence, the term Varnasrama Dharma came to be used to indicate the Dharma of the groups inside it, while the term Svadharma was used to indicate the Dharma of not only that group but of every other group outside. *Svadharma is the genus of which the Varnasrama is only a species.* Under the term Svadharma will be included the distinct Dharma of such of the innumerable mixed castes as well as of Moslems, Christians and every other caste and creed in the world, while Varnasrama Dharma will be confined only to the four Varnas and Asramas; it is called Dharma in all cases and the central idea is to bring home the truth that the goal is the same for all the groups and each group can reach it by following its own group-Dharma. What a grand, noble and tolerant religion and philosophy! Gita, that tiny but mighty volume of eighteen chapters with 700 verses, which pours out in unparalleled directness, terseness and brevity, the boiled down essence of Hindu religion, philosophy, morality and ethics says :

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनिष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।

The principles of Sanatana Dharma enunciated above are common to all the groups aforesaid, while Svadharma or Varnasrama Dharma is the special Dharma of each group binding on that group only. Svadharma and Varnasrama Dharma are Sanatana Dharma put into action and practice and made applicable to particular groups and orders. *A Panchama who faithfully observes his Svadharma is far superior to a Brahmana who is false to his.* One special feature may be noted in this connection. The moment by one's superior merit one transcends Varna and Asrama, one rises above Traigunyam and stands wholly emancipated from its bondage. The fetters fall away from him of their own accord like the dew off the peacock's feather.

निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः।

Varnasrama Dharma in its broad sense is universal religion. While the Moslem faith and the Christian faith deny bliss to all individuals except its own followers, Varnasrama Dharma promises it to every one who sincerely follows his Svadharma.

THE PURPOSE OF VARNASRAMA DHARMA AND SVADHARMA AND THEIR POTENTIALITY.

It may be said that Varnasrama Dharma insists upon numerous restraints and shackles and clogs liberty of action such as prohibition of sea-voyage, inter-dining and inter-marriage and antagonises the modern generation which is spinning and whirling endlessly in the delirium of unbridled sense-enjoyment. It may be that it is riddled with rituals and formalities which are irksome, uneconomical and enslaving. Is there any disciplinary code which is free from such charge? After all, these rules are primarily intended to school the people on to discipline, patience, capacity to endure and self-sacrifice from the cradle to the grave. You want that we should become a nation of stalwart warriors. Can there be a more effective training ground than the field of Varnasrama Dharma? Is there any other institution anywhere which combines in itself all the good points in Imperialism, Pacifism, Fascism and Socialism etc. and presents such fine and easy facilities for creating and fostering a spirit of unity, service, self-sacrifice and team-work? Remember that these rules have been promulgated by the same sages and saints who have preached and practised the essential oneness and divinity of the soul in every created being.

ANNAMBHATTA

By Vidyasagara, Vidyavacaspati, P. P. SUBRAHMANYA SASTRI, B.A. (Oxon), M.A., *Professor of Sanskrit, & Comparative Philology, Presidency College, and Curator, Government Oriental Mss. Lirary, Madras.*

Annambhatta, the reputed author of (1) the Tarkasangraha and (2) the Tarkasangrahadipika, a commentary thereon, is well known to the scholar-world as a versatile writer of books on almost all departments of knowledge. In the field of Nyaya, besides the above, he is also the author of (3) Subuddhimanohara or Manohara, a commentary on Tattvacintamanididhiti, (4) Siddhanjanam, a commentary on Tattvacintamanyaloka and (4) Tarkabhasatattvabodhatika.

In the field of grammar, his (6) Vyakaranamitaksara and (7) Svaraviveka are already well known; his magnum opus in this field is the (8) Mahabhasyapradipodyotanam.

In the sphere of Mimamsa, he has written (9) Subodhini, a commentary on Tantravartika (10) Ranakojjivini, a commentary on Nyayasudha and (11) Ranakabhavanakarikavivaranam.

Vedanta also claims his hand; and his

two standard works in this field are (12) Tattvavivekadipanavyakhya and (13) Brahmasutravrittimitaksara, a running commentary on the Badarayana Sutras.

Of the above, (1), (2) & (6) alone are available in print; (8) is being printed in the Madras Government Oriental Mss. Series and the others are available in Mss. in the Madras Government Oriental Mss. Library except (12).

Annambhatta's versatility is well testified to by the popular tag:

काशीगमनमात्रेण नाम्नंभट्टायते द्विजः ।
अपि गङ्गाजलस्नानान्नाधः केशः कुशायते ॥

Annambhatta's works are easily identifiable by his mangalaslokas, wherein he praises his Istadevata, Siva or Sambasiva.

From the colophons affixed to his works, we learn that he belonged to the Kausikagotra, that his father's name was Tirumalaraya or Tirumalacarya whom he refers to as a past master in all branches of knowledge and who was always spoken of as Mahopadhyaya and sometimes as Advaitavidyacarya—two epithets which are also attributed to an illustrious ancestor of his, Raghava Somayaji. Annambhatta refers to an elder brother of his in his Siddhanjana and from the introductory verses to this work, his name is known as Sarvadeva.

In his introduction to the Vyakaranamitaksara, published in the Benares Sanskrit Series in 1906, the Editor states that Annambhatta is posterior to the author of Prakriyakaumudi (Ramachandra, C 1400 A. D. according to Keith) and prior to Bhattoji Diksita (C. 1600 A. D.)

Mahadev Rajaram Bodas in his Introduction to the Tarkasangraha (Bombay Sanskrit Series 1918) argues in detail and fixes the date of Annambhatta between A.D. 1625 and A D. 1700 and adds that the colophon at the end of a Tarkasangraha Ms. in Weber's Berlin Catalogue (No. 683, P. 203) which dates the Ms. as 1425 A. D. should be read correctly as 1725 A. D., as the term 'abdhi' can denote both the numerals 7 as well as 4. And the above conclusion has all along held the field.

In this connection, it is interesting to observe that Isvara Diksita, who composed the Brhadvivaranam on the Ramayana in A. D. 1518 refers to the Udyotana of Annambhatta by name and quotes from it. And as the date of Isvara is well attested by his own hand, Annambhatta's date will have to be pushed back by at least two centuries from the seventeenth to the fifteenth century. In any case, the evidence of the Berlin Ms. which reads 1425 A. D. cannot be set aside as easily as Mr. Bodas would like us to do.

In the second part of this article which will follow in the next issue, we propose to discuss the date of Annamhatta in greater detail.

NEWS AND NOTES

OURSELVES.

With this issue we complete the second year of our existence. In this issue we have printed a very rare and interesting work called "*Sariraka Mimamsa Sastram*". Its author is not known. Only one manuscript copy of it was available in the Tanjore Serfoji Maharaja Saraswati Mahal Library. In the guise of praising the God Minakshisundaresvara at Madura the author proceeds to expound the Brahmasutras concisely at the rate of one sloka for each Sutra. Unfortunately the manuscript is incomplete. It breaks off with the second Sutra of the second Pada of the first Adhyaya. So we have printed herein to the end of the first pada only. We would be very grateful to any of our readers who may be able to send us the remaining portion of this very interesting work. The work "*Nayamanjari*" of the renowned Sri Appayya Dikshita is also completed in this issue. The Introduction, Index etc., for the same will be given in the next issue along with the Title-page and Contents of the Second Volume. Three works *viz.*, *Manisha Panchakam*, *Ramayana Rahasyam* and *Nayamanjari* have been completed in the 2nd Volume.

In the Third Volume which commences with the next Issue we propose taking up, as space permits, the following hitherto unpublished works for publication—(i) *Saundaryalahari* of Sri Sankara Bhagavatpadacharya with the commentaries 'Arunamodini' and 'Saubhagyavardhini' of Kamesvarasuri and Kaivalyasrami respectively, (ii) *Tattva Kaustubha* of Bhattoji Dikshita—a commentary on the Brahmasutras refuting the Dvaita interpretation, (iii) *Siddhantasukti-Manjari*, a resume of the Siddhantalesasangraha by Sri Gangadharendra Sarasvati, author of the Svarajyasiddhi, with commentary, just like the Siddhantakalpavalli of Sri Sadasiva Brahmendra, (iv) *Mahisha Satakam* of Sri Vanchesvarakavi with the commentary of the author's grandson Sri Vanchesvara (v) *Satya Parinayam* a Kavya in 12 Cantos by Ekamranatha Kavi, (vi) *Jagadguru Dhama satakam* by the late Srinivasa Makhi, the editor of the now defunct "Brahma Vidya," (vii) *Jivanmuktikalyana Nataka* of Nalla Dikshitar, (viii) *Madra-*

kanya Parinayachampu with commentary. These and several other rare and valuable works in Manuscripts await publication and it rests with our readers to enable us to publish them all by converting this Quarterly into a Monthly. If at least 500 new subscribers are secured we would most gladly convert this Journal into a Monthly and publish all the works quickly. We appeal to our readers to co-operate with us in securing the required number of subscribers. We would also specially invite the attention of our subscribers to the fact that in spite of the scarcity and the consequent abnormal increase in the price of Paper and Ink, we have neither reduced the size of the Journal, nor increased the rate of subscription, nor altered the format.

With this Issue we are sending a Postal M. O. form for the use of our subscribers in remitting their subscriptions for the Third Volume. *We request our subscribers to remit their subscriptions early and avoid thereby the additional expense and trouble caused in sending the next issue by V. P. P.*

***

JAYANTI-ARADHANA CELEBRATIONS of the Late MAHASWAMIGAL of SRINGERI.

During the closing days of this quarter, the Sri Sankaragurukulam was *en fete* on account of the Jayanti-Aradhana celebrations of His Holiness Sri Sacchidananda Sivabhinava Narasimha Bharati Swamigal of Sringeri whose image adorns the northern side temple here. The celebrations commenced on Thursday the 20th March with a series of brilliant discourses on Srimad Valmiki Ramayana by Sri Sivaramakrishna Sastrigal of Mayavaram. These lectures continued up to Saturday 5-4-41. The Jayanti proper was on the 23rd of March when Mahanyasapurvaka Ekadasarudrajapams and Abhishekams and Sahasranama Archanas were performed in a grand scale to the marble image of His Holiness as well as to His Padukas. A large number of Bhaktas were fed sumptuously. In the evening Sri R. Krishnaswamy Iyer M.A., B.L., of Tinnevelly who had come here specially for the occasion, delivered a very interesting lecture on the life of His Holiness. He said that unless one thought of the Acharya as an incarnation of God himself there was no salvation for him. He also pointed out how each of the innumerable disciples of the late Mahaswamigal including Sri T. K Balasubrahmanya Aiyar thought of Him as his own Acharya who was specially kind to him above all others. He was followed by Gurubhaktasikhamani T. K. Balasubrahmanya Aiyar who spoke for nearly three hours of the peculiarly marvellous and unique characteristics of the late Mahaswamigal exemplifying them with several incidents within his own experience. On the 29th idem, the Aradhana of the Mahaswamigal was performed as usual with great *sraddha* and *bhakti* by Sri T. K. Balasubrah-

manya Iyer. There was a large concourse of bhaktas both on the Jayanti and the Aradhana days and all of them evinced immense zest in the celebrations. This day also alarge number of bhaktas were fed very sumptuously. In the evening there were lectures by Dewan Bahadur K. S. Ramaswami Sastrigal B.A., B.L., Retd. Dt. & Sessions Judge and Sri R. Krishnaswami Iyer M. A., B. L., Advocate, Tinnevelly who had both come here specially for the occasion. Sri K. S. Ramaswami Sastrigal spoke about the functions of an Acharya and demonstrated by various instances how well the late Mahaswamigal befitted the role of Acharya. Sri Sivaramakrishna Sastrigal spoke next expatiating on the greatness of the late Mahaswamigal from all the accounts he had heard and regretted very much that he had not the good fortune to be personally acquainted with the great Sage. He said he would like to know more of his greatness through the reminiscentic experiences of Sri T. K. Balasubrahmanya Aiyar.

Sri T. K. Balasubrahmanya Aiyar followed him with his reminiscences and Sri R. Krishnaswami Iyer spoke last and narrated several incidents to show the greatness of the late Mahaswamigal. All the lectures were very interesting and the audience was absorbed in them on both the Jayanti and Aradhana days. On both these days the Ramayana discourses were suspended. On both these days the atmosphere of the Sri Sankaragurukulam scintillated with intense devotion to the late Mahaswamigal and great enthusiasm for the celebrations. The Ramayana discourses were continued till the 5th of April—the Sri Ramanavami day—when the last of the discourse on Sri Ramapattabhishekam was delivered by Sri Sivaramakrishna Sastrigal in his inimitably characteristic style. These lectures were largely attended every day and eagerly listened to by several hundreds of people both males and females. The lectures were all splendid masterpieces and were appreciated alike both by the learned and by the ignorant. The last day being Punarvasunakshatra, the Pattabhishekam was celebrated with great eclat and the Sastrigal was duly honoured.

***

SRI SANKARAGURUKULAM PUJA - FUND SCHEME.

The late Sri Brahmananda Sarasvati Swamigal of Benares, through whose good offices the three white marble images consecrated at the Sri Sankaragurukulam were obtained from Jaipur (Rajputana), paid a visit to the temple here just before his lamented demise. He was much struck with wonder at the unique structure of the temple here and admired the realistic workmanship of the images and remarked to the Founder as follows—"The images which I am seeing for the first time, though they were ordered through me, are really very sublime and wonderously beautiful. You have also

OUR EXCHANGES.

Aryadharmam, Kumbakonam.
Brahmavidya: The Adyar Library Bulletin, Adyar.
The Sanskrit Sahitya Parishat Patrika, Calcutta.
The Divine Life, Rikhikesh.
The Vedanta Kesari, Mylapore.
The Mysore Sanskrit College Magazine, Mysore.
The Kalpaka, Tinnevelly.
The Quarterly Journal of the Mythic Society, Bangalore.
Madhuravani, Belgaum.
The Poona Orientalist, Poona.
The Journal of Oriental Research, Madras.
The Indian Thinker, Trivandrum.
The Hindu Heritage, Bombay.
The Journal of the Oriental Institute, Tirupati.

JUST PUBLISHED

ASPECTS OF ADVAITA

1. **Brahman and Maya.**
2. **Advaita and Modern Thought**

BY

K. SUNDARARAMA AIYAR M. A.

&

Diwan Bahadur
K. S. RAMASWAMY SASTRI B.A., B.L.,

Cr. 8vo. pp. 270. Half Calico bound.
Price Rs. **2**/—. Postage extra.

VANI VILAS PRESS,
SRIRANGAM.

THE ADYAR LIBRARY

Director: Dr. G. Srinivasa Murti, B.A. B.L., M. B., & C. M., Vaidyaratna.

BRAHMAVIDYA

THE ADYAR LIBRARY BULLETIN
APPEARING FOUR TIMES A YEAR

Editor: PROF. C. KUNHAN RAJA, M.A., D. PHIL. (OXON.)

Rates of Subscription:

LIFE SUBSCRIPTION	Rs.	100
OR	$	50
OR	£	10

	PER ANNUM	SINGLE COPY
INDIA & CEYLON	Rs. 6	Rs. 2—8
U. S. A.	$ 3	$ 1-25
BRITISH EMPIRE	Sh. 12	Sh. 5
OTHER COUNTRIES	Rs. 9	Rs. 3—8

All Communications to be addressed to:

THE DIRECTOR,
Adyar Library,
ADYAR Madras, S. India.

READY FOR SALE.

SRIRANGAM SRI SANKARA GURUKULA SERIES.

No. 1. PANCHARATNAKARIKAS: A poetic commentary on the Upadesa Panchakam of Sri Sankara Bhagavatpadacharya by Sri Sadasiva; with a *Prastavana* by Sri Sachhidananda Tirtha Swami. 0 12 0

No. 2. NAYAMANJARI: A poetic commentary on the Brahma Sutras, by Sri Appayya Dikshita.

No. 5. KUMARASAMBHAVACHAMPU: by Sri Sarabhoji Maharaja of Tanjore; with an Introduction by Vidyasagara Vidyavacaspati P. P. Subrahmanya Sastri, B. A. (Oxon).. M. A. Professor of Sanskrit, Presidency College, Madras. 1 0 0

No. 6. DAMARUKAM: A Sanskrit Farce by Pandit Ghanasyama with the Commentary of Chandrasekhara; Edited by Vidyasagara Vidyavacaspati P. P. Subrahmanya Sastri, B. A. (Oxon), M. A. Curator, Govt. Oriental Mss. Library, and Professor of Sanskrit, Presidency College, Madras. 0 8 0

No. 8. MANISHAPANCHAKAM: of Sri Sankara Bhagavatpadacharya with a Summary of the Commentary of Sri Sadasiva Brahmendra and a Foreword by Rao Saheb N. Natesa Iyer B.A., B.L., President, All-India Varnasrama Swarajya Sangha, Madura. Edited by T. K. Balasubrahmanya Iyer 0 6 0

IN THE PRESS.

No. 3. SASTRADIPIKA: of Parthasarathi Misra with *Mayukhavali* of Sri Appayya Dikshita.

No. 4. BALABHARATAM: of Agastya Pandita with the Commentary *Manohara* of Salva Timmaya Dandanatha.

No. 7. SRINGARAPRAKASA: by Maharajadhiraja Sri Bhoja Deva.

The above three books are being published serially in the ***Sri Sankara-gurukula Patrika:*** Annual Subscription Rs. 6 only.

Apply to THE LIBRARIAN,
Sri Sankaragurukulam, Srirangam.



Printed at the SRI VANI VILAS PRESS,
& Published at the Sri Sankaragurukulam, Srirangam,
by Gurubhaktasikhamani
T. K. BALASUBRAHMANYA AIYAR B. A.

The Journal

OF THE

Sri Sankaraguru kulam

Srirangam

VOL. III. APRIL—JUNE 1941 NO. 9.



Editor :
Gurubhaktasikhamani,
Sastraprasarabhushana,
T. K. BALASUBRAHMANYA AIYAR.
B. A,
Founder, Sri Sankara-
gurukulam, Srirangam.

Literary Adviser :
Bharatakalanidhi,
Vidyasagara,
Vidyavecaspati,
P. P. SUBRAHMANYA SASTRI.
B. A. (Oxon) M. A,
Curator, Govt.
Oriental Mss. Library
& Professor of
Sanskrit, Presidency
College, Madras.

ANNUAL SUBSCRIPTION { INLAND Rs. 6/—Post Free. FOREIGN SH. 12/—

CONTENTS.

Original Articles.

1	शंभुप्रार्थनादशकम्		2—3
2	श्रीरङ्गनायिकार्यासप्तति:	By Pandit Sri Venkata Raghavacharya	4—10
3	संपादकीयम्		11—12
4	अभिज्ञानशाकुन्तलानुभव:	By Mimamsaratna A. V. Gopalachariar, M. A., B. L.	13—16

Rare & Hitherto Unpublished Works.

5	सौन्दर्यलहरी	By Sri Sankara Bhagavatpadacharya with three commentaries — Lakshmidhara, Saubhagyavardhini and Arunamodini	1—8
6	नयमञ्जरी	Introduction By P. P. S. Sastri	i—ii
	,, प्रस्तावना	By Swami Sri Sacchidananda Tirtha	1—16
	,, श्लोकानुक्रमणिका		111—114
	,, श्लोकवृत्तानुक्रमणिका		115—116
7	तत्त्वकौस्तुभ:	By Sri Bhattoji Dikshita	1—8
8	मयूखावली	A commentary on the Sastra Dipika of Parthasarathi Misra By Sri Appayya Dikshita	71—78
9	बालभारतम्	By Agastya Pandita with the commentary of Salva Timmayah Dandanatha	87—94
10	भद्रकन्यापरिणयचम्पू:	By Sri Gangadharakavi	1—8
11	जीवन्मुक्तिकल्याणम्	A Drama By Sri Nalladhvari	1—8
12	शृङ्गारप्रकाश:	By Maharajadhiraja Bhoja	63—70
13	श्रीजगद्गुरुधामसेवाशतकम्	By Sri Nadukkaveri Srinivasa Sastrigal	67—74

Original Articles in English.

14	*The Search after Light*	By Prof. K. Sundararamaiyer M. A.	1—4
15	*Ramayana Problems*	By P. P. S. Sastri B.A. (Oxon), M.A.	4—6
16	**Reviews.**		
	Aspects of Advaita	By G. Srinivasa Iyer, M. A., B. L.	6—8
17	**News and Notes.**		9—12



कालट्यां श्रीशंकरभगवत्पादाचार्याणां आलयात् प्रतिनिवर्त्तमानाः
शृङ्गगिरि श्री १०८ श्रीजगद्गुरु चन्द्रशेखरभारतीस्वामिनः ॥

PATRONS.


It is with much pleasure that we announce that in response to our Appeal in our last issue, ***The Dewan of Travancore*** has become a PATRON of our Journal and has sent us a cheque for Rs. 250 —

We hope all lovers of our hoary Sanskrit Literature and Culture, who could afford, will follow the above lead and enrol themselves as Patrons and thus encourage this publication.

LIFE-MEMBERS.

It is with much pleasure that we announce that H. H. Sri Bodhendra Narayana Bharati Swamiji of the Nelamavu Mutt, North Kanara, has, in response to our Appeal in our last issue, become a ***Life-Member*** of our Journal.

We hope more lovers of our Literature and Culture will follow the lead of His Holiness.



॥ श्रीः ॥

या वर्णपदवाक्यार्थस्वरूपेण विवर्तते । अनादिनिधनाऽनन्ता सा मां पातु सरस्वती ॥

यस्य देवे परां भक्तिर्यथा देवे तथा गुरौ । तस्यैतेकथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

संपुटः ३] वृषसंवत्सरवैशाखभावः [संचिका ९

यत्स्वात्मानं सकलवपुषामेकमन्तर्बहिःस्थं
दृष्ट्वा पूर्णं खमिव सततं सर्वभाण्डस्थमेकम् ।
नान्यत्कार्यं किमपि च तथा कारणाद्भिन्नरूपं
निर्द्वैगुण्ये पथि विचरतां को विधिः को निषेधः ॥

॥ शंभुप्रार्थनादशकम् ॥

नानायोनिसहस्रकोटिषु मुहुः संभूय संभूय त-
द्गर्भावासनिरन्तदुःखनिवहं वक्तुं न शक्यं च तत् ।
भूयो भूय इहानुभूय सुतरां कष्टोऽस्मि नष्टोऽस्म्यहं
त्राहि त्वं करुणातरङ्गितदृशा शंभो दयाम्भोनिधे ॥ १ ॥

निर्गत्याप्युदरात्स्वमातुरधिकं क्लेशेन पश्चात्सदा
सोत्सानेन शयेन पीडिततनुः संबाधितो जन्तुभिः ।
पूयं स्तन्यमिति भ्रमेण सततं शुद्धाधयाऽहं पिब-
न्भ्रष्टोऽस्मीश्वर रक्ष मां करुणया शंभो दयाम्भोनिधे ॥ २ ॥

ध्यातं ते न पदाम्बुजं सकृदपि ध्यातं धनं सर्वदा
पूजा ते न कृता कृता स्ववपुषः स्रग्गन्धलेपार्चनैः ।
नाम्नाद्यैः परितर्पिता द्विजवरा जिह्वैव मे तर्पिता
पापिष्ठेन मया सदाशिव विभो शंभो दयाम्भोनिधे ॥ ३ ॥

बाल्ये ताडनपीडनैर्बहुविधैः पित्रादिभिः प्रापितैः
तत्कालोचितरोगजालजनितैर्दुःखैरलं बाधितः ।
लीलालौल्यगुणोचितैश्च विविधैर्दुश्चेष्टितैः क्लेशितः
सोऽहं त्वां शरणं व्रजाम्यव विभो शंभो दयाम्भोनिधे ॥ ४ ॥

संध्यास्नानजपादिकर्म न कृतं भक्त्या कृतं दुष्कृतं
त्वन्नामेश न कीर्तितं स्वयि मुदा दुर्भाषितं भाषितम् ।
त्वन्मूर्तिर्न विलोकिता पुनरपि स्त्रीमूर्तिरालोकिता
भोगासक्तिमता मया शिव विभो शंभो दयाम्भोनिधे ॥ ५ ॥

तारुण्ये मदनेन पीडिततनुः कामातुरः कामिनी-
सक्तस्तद्वशगः स्वधर्मविमुखः पापैः सदा दूषितः ।
कर्माकार्षमपारनारकफलं सौख्याशया दुर्मतिः
सोऽहं त्वां शरणं व्रजाम्यव विभो शंभो दयाम्भोनिधे ॥ ६ ॥

वृद्धत्वे गलिताखिलेन्द्रियबलो विभ्रष्टदन्तावलिः
श्वेतीभूतशिराश्च जर्जरतनुः कम्पाश्रयोऽनाश्रयः ।
लालोच्छिष्टपुरीषमूत्रसलिलक्लिन्नोऽस्मि दीनोऽस्म्यहं
देव त्वां शरणं व्रजाम्यव विभो शंभो दयाम्भोनिधे ॥ ७ ॥

संध्यास्नानजपादिकर्मकरणे शक्तोऽस्मि नैव प्रभो
दातुं हन्त मतिं प्रतीपकरणे दारादिबन्धास्पदे ।
नामैकं तव तारकं मम विभो नान्यन्ममास्ते क्वचित्
तस्मादीश्वर रक्ष मां करुणया शंभो दयाम्भोनिधे ॥ ८ ॥

कुम्भीपाकदुरन्तरादिषु महाद्वीपादिषु प्रोत्थितं
घोरं नारकदुःखमीषदपि तत्सोढुं न शक्तोऽस्म्यहम् ।
तद्भीत्या शरणं व्रजाम्यव विभो त्वामेव भक्त्याऽऽर्तिहन्
तस्मादीश्वर रक्ष मां करुणया शंभो दयाम्भोनिधे ॥ ९ ॥

माता वाऽपि पिता सुतोऽपि न हितो भ्रात्रादयो बान्धवाः
सर्वे स्वार्थपरा भवन्ति विमुखास्त्रातुं न केऽपि क्षमाः ।
दूतेभ्यो यमचोदितेभ्य इह मां त्वामन्तरा शंकर
त्रातारं न हि वेद्मि मामव विभो शंभो दयाम्भोनिधे ॥ १० ॥

इति शंभुप्रार्थनादशकं संपूर्णम् ॥

॥ श्रीरङ्गनायिकार्यासप्ततिः ॥

[संस्कृतपण्डित श्रीवेङ्कटराघवाचार्येण विरचितः]

श्रीरङ्गनायिकाख्यां देवीं देवस्य मातरं जगताम् ।
वन्दे समस्तदुरितध्वंसं भजतां करोति या सततम् ॥ १ ॥

यत्पादपद्मसेवाकलनादन्यशृणाय मन्वानाः ।
अतिशयितलोकपाला भवन्ति धन्या भुवीह बहुमान्याः ॥ २ ॥

श्यामलकोमलमूर्तौ विलसितकीर्तौ विनाखिलनतार्तौ ।
श्रीरङ्गधामनिलये कलये क्लान्ते विहारिणीं शान्ते ॥ ३ ॥

विरचितबहुनतमोदां वेङ्किलहृष्यद्रमापतिपयोदाम् ।
संततघोषितवेदां पोषितकुजच्छुकादिबहुनादाम् ॥ ४ ॥

भासुरभूसुरनिवहे या किल वीक्षां करोति विनुतिवहे ।
तामवनौ हरिकान्तां भजामि चञ्चन्मनोज्ञकेशान्ताम् ॥ ५ ॥

वन्देय विष्णुहृदयां वाञ्छितलाभाय दीनजनसदयाम् ।
वर्धितभक्तसमुदयां वारिधिजातां विनम्रविलसदयाम् ॥ ६ ॥

अतिमुदितपद्मनाभामखिलजनानन्दिदिव्यतनुशोभाम् ।
संतप्तकाञ्चनाभां सततं वन्दे समृद्धतुरगेभाम् ॥ ७ ॥

अच्युतलोकनतुष्टामम्बुजसंभवविशेषनुतिहृष्टाम् ।
भक्तगुणव्रजकृष्टां भजामि कमलां दयादिगुणजुष्टाम् ॥ ८ ॥

गोविन्दलोलचित्तां गोपनशीलां विवृद्धबहुविलासाम् ।
हरिहर्षदायिवृत्तां माधवसुकथाश्रुतौ बहुदृष्टाम् ॥ ९ ॥

नित्यानन्दसमृद्धां निखिलजगन्नाथभावलपिनीम् ।
स्मितचन्द्रिकाविशुद्धां स्मरामि पद्मां धनादिसुसमृद्धाम् ॥ १० ॥

नन्दितसंनतविभवां नमामि सततं हरेः प्रियां सचिवाम् ।
निन्दितषट्चरणरवां निःशेषितदुर्गतालिकृच्छ्रसवाम् ॥ ११ ॥

कनकलसत्तनुलतिकां काङ्क्षितदात्रीं नमामि रमपतिकाम् ।
सुनिश्चितशोभनमतिकां सुन्दरमूर्त्तिं नमामि नतयतिकाम् ॥ १२ ॥

स्वरजितकोकिलनादां सारससंभूषणीतशुभवेदाम् ।
दर्शितसदमद्वेदां नमामि लक्ष्मीविहाद्य सविनोदाम् ॥ १३ ॥

वचनजितामृतधारां वर्तुलविलसन्मनोज्ञमणिहाराम् ।
मण्डितशुभसंसारां मामहमीडे मनोहराकाराम् ॥ १४ ॥

विरचितशुचबहुमानां वीक्षणपरिभूतरम्यतरमीनाम् ।
पदनतविरचितगानां प्रामोमि रमां प्रकल्पसुखनेमौनाम् ॥ १५ ॥

सुरुचिरनिजशुभसौधां सोदरचन्द्रस्य वक्त्रकृतबोधाम् ।
अधरकृतविम्बबाधामम्बां पद्मां नमामि रिपुवेधाम् ॥ १६ ॥

अच्युतवक्षसि शोभामङ्घ्रिसरोजानतालिबहुलाभाम् ।
रञ्जितपङ्कजनाभां रमणीं शौरेर्नमामि हृतलोभाम् ॥ १७ ॥

शंकरचरणविलासां सुप्रसन्नानुमोदकरहासाम् ।
सविनायकशुभदासां सत्यां वन्दे सुमन्विनिश्वासाम् ॥ १८ ॥

नवरत्नचारुभूषां निरवधिसौगन्ध्यशालिसुमवेशाम् ।
अतिमहिततत्पशेषामार्यां वन्दे सर्वाघशुभघोषाम् ॥ १९ ॥

शुचिगुणविशेषबहुलां सुन्दरगन्धाढ्यरङ्गपतिमहिलाम् ।
वन्देय भूरि कमलां वरदां शुभदां विशेषतो विमलाम् ॥ २० ॥

अतिसुन्दरेन्दुसहजाममलां कमलां प्रफुल्लदृग्जलजाम् ।
धरणीसमृद्धमनुजां धनधान्यकरीं नमामि भृगुतनुजाम् ॥ २१ ॥

शोभनवलित्रयाढ्यां सुतरां नमतां निरस्तबहुमौढ्याम् ।
स्थापितशरीरदाढ्यां तुष्टां वन्दे बुधौघवाक्प्रौढ्याम् ॥ २२ ॥

पूरितवाञ्छितदानां फुल्लाम्बुजनेत्रपात्रबहुदीनाम् ।
ह्लादितजनकनदीनां हृष्टां वन्दे विचित्रतरगानाम् ॥ २३ ॥

कामितफलाढ्यकरुणां कल्पद्रुमकामधुक्प्रवरचरणाम् ।
पदनतदिगीश्वरुणां यज्ञां वन्दे सदाऽधरेऽप्यरुणाम् ॥ २४ ॥

प्रशमितमनोगतार्तिं प्रचुरितकमलासनादिसुरकीर्तिम् ।
विरचितनतेष्टपूर्तिं वनितां नृहरेर्नमामि शुभमूर्तिम् ॥ २५ ॥

श्रुतिशिरसि दीप्तमालां शुद्धामितवेदशास्त्रजनिशालाम् ।
मधुरिपुतोषणशीलां महिषीं विष्णोर्नमामि बहुलीलाम् ॥ २६ ॥

धृतबहुभूषणहृद्यां वरणीहृदयप्रमोदनाविदग्धाम् ।
कुन्तलकुटिलस्निग्धां कलये कमलां स्मितावगतदुग्धाम् ॥ २७ ॥

कनककलशाभिषिक्तां काङ्क्षितदाने जगत्सु बहुशक्ताम् ।
आश्रितजनातिसक्तामम्बां कमलां नमामि धृतभक्ताम् ॥ २८ ॥

ऊरुहसितरम्भाम्बुरोजजितहारिगजकुम्भाम् ।
वर्धितमादृग्डिम्भां वन्दे पद्मां विराजितसदम्भाम् ॥ २९ ॥

अतिहृद्यवक्त्रसौम्यामनिशं भवनागवैर्धृवि विनम्य माम् ।
उज्ज्वलभूषणरम्याम्बुदवेल्लतयां नमामि शुभहर्म्याम् ॥ ३० ॥

सुभगप्रहृष्टलोकां स्वसदनशोभाभिभूतशुभनाकाम् ।
नतजनशारदराकां नौमि रमां तां विचित्रपरिपाकाम् ॥ ३१ ॥

पदनतबहुविधलेखामानन्दकरस्वकीयकरेखाम् ।
वन्दारुनिगमशाखां वन्दे पद्मां वितीर्णविविधसुखाम् ॥ ३२ ॥

अत्यद्भुततनुसंस्थामम्बुजनाभस्य मोदननिजास्थाम् ।
संततचिन्तनहृत्स्थां सरसिजगेहां नमामि कृतसुस्थाम् ॥ ३३ ॥

तनुशोभाजितशम्पां तरलितनयनां ततास्मदनुकम्पाम् ।
अतिनतनिखिलनिलिम्पामार्यां पद्मां नमामि हतकम्पाम् ॥ ३४ ॥

क्षौमैर्जितशरदभ्रां क्षान्त्यादिगुणैर्विशेषतः शुभ्राम् ।
यशसाप्तफणिश्वभ्रां यतेय नन्तुं रमां नमद्दभ्राम् ॥ ३५ ॥

मङ्गलनिवहचतुष्कामुरसि विराजन्मुरारियुतनिष्काम् ।
वर्धितबहुधानुष्कां वन्दे पद्मां सदीपसर्पिष्काम् ॥ ३६ ॥

संततसुरगणमान्यां समस्तनम्यां समृद्धबहुधान्याम् ।
अम्बामम्बुधिकन्यामनिशं वन्दे मुरारिबहुमान्याम् ॥ ३७ ॥

वीक्षितसुरारिपुञ्जां विविधविलोकनविवृद्धकविपुञ्जाम् ।
तोषितपतिगुणपुञ्जां तुष्टां वन्दे सरित्तटनिकुञ्जाम् ॥ ३८ ॥

नरपतिगीतयशस्कां नम्रजनेष्वाहितादरमनस्काम् ।
पद्मजपतिपदस्थां पङ्कजहस्तां नमामि सदुरस्काम् ॥ ३९ ॥

अपराधनिह्नवच्यु तमम्बुजनाभस्य तोषणसुनिपुणाम् ।
भक्तानुमोदितगुणां भावय चेतः प्रसारितपाणिकजाम् ॥ ४० ॥

स्वाश्रितविनिहितमहिमा वचनपराभूतशीतकुसुमहिमा ।
अम्बुजयुग्मेन हि मा भाति मनस्तां भजाशु मा जहि मा ॥ ४१ ॥

भूषितसुरारिपुवत्सा भाषितमन्त्रेण तुष्टविधिवत्सा ।
भासितसच्छ्रीवत्सा या किल नित्यं विवर्धितसकुत्सा ॥ ४२ ॥

मामवताज्जगदम्बा केशविनिर्जितपयोदनिकुरम्बा ।
क्षितरक्षितसुमविडम्बा वीक्षणसंतर्जितोरुरोरम्बा ॥ ४३ ॥

साधुषु वर्द्धितभद्रा सततं निजपदमनःसु गतनिद्रा ।
कान्त्या तुलितहरिद्रा सा मां पायात्सदा हतदरिद्रा ॥ ४४ ॥

आनन्दपूर्णपक्षा नीतिपथच्युतविवर्तिणलघुशिक्षा ।
अगतिकरक्षणदीक्षा पातु रमा मां भवाब्धिशुभरक्षा ॥ ४५ ॥

यदनतदैवतवृन्दा पंकजनाभस्य रतिकुदरविन्दा ।
रदनविनिर्जितकुन्दा लक्ष्मीर्मायात्प्रवर्द्धितमुकुन्दा ॥ ४६ ॥

नारदतुम्बुरुगीता नायकदुत्सङ्गवासिनी माता ।
रघुपतिजन्मनि सीता रमतां हृदये मनोज्ञगुणजाता ॥ ४७ ॥

रुचिरतरकुन्तलभरा रोमावलिभृत्सकृष्टलसदुदरा ।
पल्लवकचाकचिधराधरवरशोभा बिभर्ति कलितवरा ॥ ४८ ॥

कचचयनिर्जितबर्हा कान्तिलसत्फालकलसशशिगर्हा ।
भाति रमा भजनार्हा पङ्कजनाभस्य हृद्यवपुषार्हा ॥ ४९ ॥

काचिदिह भाति कमला करुणाजलधिः कपोलतलविमला ।
निर्धूतमानसमला निरवधिशेवधिनिजाङ्घ्रियुगकमला ॥ ५० ॥

निर्मलमुखेन्दुसुभगा निजाङ्घ्रितलनतविनीततरविहगा ।
रञ्जितमुरारिपदगा लसति रमा भुवि मणीन्द्रलसदुरगा ॥ ५१ ॥

अतिशयितचारुगात्री या दलदिन्दीवराढ्यदलनेत्री ।
या भुवि शुभस्य दात्री सा मां पायान्मुरारिदृढमैत्री ॥ ५२ ॥

यत्पदपङ्कजसेवा शुभमातनुते सदैव नतदेवा ।
मधुरिपुनिबद्धभावा मामवतात्सा विराजिवग्रीवा ॥ ५३ ॥

परितो विलसच्छिष्टा पङ्कजनाभस्य चाटुपरितुष्टा ।
परिपूरितसदभीष्टा पातु सदा मां विनम्रगणजुष्टा ॥ ५४ ॥

ह्लादितसर्वापन्ना हरिवरवक्षःप्रभाविसंवन्ना ।
सारसभरणाविखिन्ना सा मां पायात् सुरारिजिदभिन्ना ॥ ५५ ॥

भ्रूजितरतिपतिचापा भरनतमध्या सदैव जितकोपा ।
भासुरकोमलदीपा भाति रमा सा सुगन्धकृतलेपा ॥ ५६ ॥


उरसि धृतहेमकाचा वचनपराभूतभूरिरसमोचा ।
उत्तमितनीचनीचा लसति पदा साऽम्बुजस्य तद्रीचा ॥ ५७ ॥

तनुरुचिविशोभिताशा तरुणपयोदाभकान्तजनिताशा ।
पदनतनिखिलदिगीशा पातु रमा मां पदान्तावेशा ॥ ५८ ॥

सद्मनि सदैव समहा सादरवीक्षाविवृद्धशुभनिवहा ।
प्रशमितसुरेन्द्रकलहा पायान्मां श्रीः प्रपन्ननिचयवहा ॥ ५९ ॥

नतजनवितीर्णधैर्या निखिलं हृदये सदैव सुनिधार्या ।
संधुक्षितनृपवीर्या सा मां पायात्सदाऽऽहिताश्चर्या ॥ ६० ॥
वाञ्छितफलस्य दात्री वलगत्कुचभारनम्रानुगात्री ।
सर्वेशमानधात्री सा मां पायात्सरोजदलनेत्री ॥ ६१ ॥
शौरिमनस्तिरन्त्री शश्वद्दोषस्य सुवि हन्त्री ।
नरहरिपदस्य नन्त्री नवाहताङ्घ्रिः सदाऽपि बहुनन्त्री ॥ ६२ ॥
सर्वप्रपदनविद्यासाधनभूता हरेश्च बहुहृद्या ।
दारितजनार्त्यवद्या दयतां दयिता विधो रचितमुद्या ॥ ६३ ॥
मुरारिपूर्वभूषा मुहुरनुमोदितमुरारिबहुवेषा ।
वीक्षणवर्द्धितभाषा विहरतु लक्ष्मीर्मनस्यधिकतोषा ॥ ६४ ॥
चर्चितचन्दनपङ्का चरणनतानां निरस्तबहुशङ्का ।
परिहृतजनतातङ्का प्रथते पद्मा प्रधर्षितकलङ्का ॥ ६५ ॥
वीक्षणहर्षितविहंगा विलसनशीलैर्विराजिशुभरङ्गा ।
राजितनिजबलिभङ्गा पायान्मां श्रीर्हरेर्विहितसङ्गा ॥ ६६ ॥
वस्त्रालंकृतनग्ना विजययुतानेकसंगरसुभग्ना ।
पतिगुणवारिधिमग्ना पातु रमा मां नमःसमवलग्ना ॥ ६७ ॥
सेवनसरभसशक्रा सविधलसत्सारसाभकरचक्रा ।
कुन्तलभरेऽतिवक्रा करोतु शं श्रीर्निरस्तकलिनक्रा ॥ ६८ ॥
बुधजनरचितश्लाघा बोधविशेषान्निरस्तदुरितौघा ।
वाञ्छितफलनामोघा वितरतु सा शं विजृम्भिहरिमेघा ॥ ६९ ॥
छायातुलितसुवर्णा संश्रितविनुतिप्रदत्तशुभकर्णा ।
लक्षितपतदघमर्णा रक्षतु मां श्रीर्गृहस्थसदपर्णा ॥ ७० ॥

इति श्रीवेङ्कटराघवाचार्यकृतिषु श्रीरङ्गनायिकार्यासप्तशतिः संपूर्णा ॥



अयि सुरभारतीपरिचरणपरायणाः ! सदुष्णैकभूषणाः ! विद्वद्धुरीणाः ! वाचकवरेण्याः ! नेमं विषयं स्मरणपदवीद्वितीयीसमाधातुं प्रभवन्ति भवन्तः, यत् सर्वकालसुखावहे सह्यजातीरपरिसरे परमपवित्रेऽस्मिन् श्रीरङ्गक्षेत्रे तिष्ठति श्रीशंकरगुरुकुलं नाम विद्यास्थानमेकं चकास्ति; तदङ्गतया चैषा त्रैमासिकी पत्रिका यथासमयमाविर्भवन्ती तदा तदा वाचकवराणां करतलमुपसर्पतीति च ॥

इयं हि पत्रिका ग्राहकमहाशयैरेव परिपोषितसर्वाशयवा सुललितपदविन्याससमावर्जितरसिकजनस्वान्ता विविधालंकारसंभृतशोभातिशयसमुद्दीपितोपान्ता प्रकटीकृताद्वैतराद्धान्ता च सती लीलयैव वत्सरद्वितयमतिवाह्यांबभूव । सैव हि सांप्रतं तृतीयेऽस्मिन् वत्सरे पदं निदधाना ग्राहकमहोदयानामेव करुणारञ्जितामपाङ्गभङ्गीमवलम्बमाना तदीयामेव भाविनीमुपकारपरंपरां चातकवदुदीक्षमाणा तदेकार्पितसर्वभरा च सती ग्राहकजनमनोविनोदनाय सर्वदैव तदीयसेवायां समुपस्थिता विजयते ॥

अयि ग्राहकमहाशयाः, वाचकवरेण्याश्च ! तामेनां स्वयमेव भवदीयसेवार्थमुपसर्पन्तीं न प्रत्याचक्षीरन्नाश्रितवत्सला भवादृशाः ; न वा परावर्तयेयुः शरणागतपरित्यागभीरवो महाभागा इति सुदृढं विश्वस्यैव विस्रब्धमेषा समुपसर्पति सहृदयाग्रेसरान् भवादृशान् । तृतीयवत्सरारम्भेऽस्मिन् भवतामन्तिकं स्वयमुपसर्पन्त्या अस्याः परावर्तने भवदीयसहजप्रणयिन्या अस्याः कीदृशी दुरवस्था स्यादिति स्वयमेव समालोचयन्तु सहृदयमूर्धन्याः । गुरुकुलाभिवृद्धिं कुर्वाणा सर्वाङ्गसौष्ठववती सैषा कथमिव हि नाम सहृदयजनसंमान्या न स्यात् ? अतः स्वकरतलं संस्पृशन्तीमेनां सादरं संगृह्य भूतरामनुगृह्णीयुः सर्वे वाचकमहाभागा इति दृढीयान्नः प्रत्ययः ॥

सैषा प्रथमवत्सरे बहूनि ग्रन्थरत्नानि स्वगर्भे बिभ्राणाऽपि पञ्चरत्नकारिकाः, कुमारसंभवचम्पूः, डमरुकं चेत्यपत्यत्रयं प्रायान्येन यथा प्रासोष्ट, तथैव द्वितीयवत्सरेऽपि

मनीषापञ्चकम्, रामायणरहस्यम्, नयमञ्जरी, चैत्यपत्यत्रितयं स्वगर्भादवतारयामास। बाल-भारत, शृङ्गारप्रकाश, मयूखावल्यादिमहानिबन्धास्तु अद्यापि तदीयगर्भङ्गुहर एव परिवर्तन्ते। तृतीयवत्सरप्रारम्भे च, लक्ष्मीधरप्रणीता लक्ष्मीधरा, कामेश्वरसूरिविरचिता अरुणामोदिनी, कैवल्याश्रमिकृता सौभाग्यवर्धनी इति व्याख्यात्रयविराजिता श्रीशंकरभगवत्पादाचार्यप्रणीता सौन्दर्यलहरी, श्रीभट्टोजिदीक्षितप्रणीतलक्ष्यकौस्तुभः, नल्लाध्वरिविरचितं जीवन्मुक्तिकल्याणं नाम नाटकम्, मद्राधिपदुहितुर्लक्ष्मणाया भगवतो यशोदानन्दनस्य चोद्वाहवर्णनपरा गङ्गाधरकविप्रणीता मद्रकन्यापरिणयचम्पूः इत्येतदपत्यचतुष्टयं च सहृदयहृदयाह्लादिन्या अस्याः गर्भविवरे प्रविष्टं सत्क्रमशो बहिरवतरिष्यतीत्यमुमुदन्तं सामोदमावेदयामोऽमन्दानन्दनिर्भरितस्वान्ताः। किं च गङ्गाधरेन्द्रसरस्वतीप्रणीता सव्याख्या सिद्धान्तमुक्तिमञ्जरी, योगवासिष्ठसारः, श्रीवाञ्छेश्वरकविप्रणीतं सव्याख्यं महिषशतकम्, एकाम्रनाथकविप्रणीतः सत्यापरिणयः, इत्यादीन्यनन्यसुलभान्यपूर्वाणि ग्रन्थरत्नानि च यथावकाशं प्रकाशमेष्यन्ति॥

तदित्थं बहून् पुत्रान् बह्वीश्च दुहितॄः प्रसुवाना लोकोपकारैकव्यसिनी सज्जनसेवावशंवदाऽपि सेयं कैश्चित्पाषाणहृदयैर्यथोचितसत्कारं विनैव प्रत्याख्याय परावर्त्य च प्रेषयितुरेव महती द्रव्यहानिः, उत्साहभङ्गश्च क्रियते इति किमितोऽप्यधिकं कष्टं नाम॥

परां काष्ठामारूढेऽपि च समरनिमित्तं पत्राणां मूल्ये ग्राहकाभिवृद्धिमेकामुपजीव्यैव जीवितुमपि शक्नोति संस्कृतपत्रिकाप्रपञ्च इति न खल्वावेदनीयं विदितचराणां वाचकवरेण्यानाम्। अतश्च प्रत्येकं सर्वेऽपि वाचकमहाभागाः पञ्चषान् ग्राहकान् संगृह्य, स्वयं च पोषककोटावन्तर्भूय, संवर्धयन्तु भवच्चरणनिपतितामन्तर्वत्नीमबलां चेमां दुहितरम्। अस्याश्चाभिवृद्धिमाप्तिपादयिषया, (२५०) पञ्चाशदुत्तरद्विशतरूप्यकदातारो महाभागाः "पोषकाः" इति, शतरूप्यकदातारो वदान्यमूर्धन्याः "यावज्जीवग्राहिणः" इति च नियमः परिकल्पितः॥

अयि वाचकवरेण्याः! इतोऽपि बहूनि ग्रन्थरत्नानि प्रसोष्यमाणायाः बहूंश्च ग्रन्थवरान् स्वगर्भे बिभ्राणायाश्चास्याः यथोचितदोहदप्रदानेन सर्वे उपचरिष्यन्ति, सफलीकरिष्यन्ति च आस्माकीनं प्रयत्नमिति सुदृढं विश्वसिमः॥



अभिज्ञानशाकुन्तलानुभवः ॥

मीमांसारत्नं, एम . ए., वि. एल्., ए. वि. गोपालाचार्येण विरचितः

(पूर्वतोऽनुवृत्तः)

कोसलदेशवर्णनं अयोध्यानगरवर्णनं च प्रायेणान्यत्रापि भारते दुष्यन्तराज्यराजधानीवर्णने। 'धर्मात्मा च महात्मा च दुष्यन्तः पुरुषोत्तमः' इति काश्यपोऽश्लाघत दुष्यन्तम्। 'धर्मात्मा सत्यसन्धश्च,' 'राघवाय सहात्मने,' 'राघवं शोभयन्त्येते गुणाः पुरुषोत्तमम्' इति राघवविषये पठिता इमे शब्दाः। 'परमर्षिश्चापि पाणिभ्यां सुतां श्रीमिव रूपिणीम्' इति भारते। द्वादशवार्षिको भरतः पित्रा समागमे। द्वादशहायनौ कुशलवौ पितृसमागमे। वसुधाश्रोत्रजत्वान् सीतासहजत्वेन संभावनीयस्य वाल्मीकेराश्रमे जातौ संवर्धितौ च कुशलवौ वाल्मीकिमेव पितृत्वेन अभ्यमन्येताम्। तथैव भरतोऽपि काश्यपं कण्वं पितृत्वेनाभिमेने। 'त्वं पिता मम विप्रर्षे त्वं माता त्वं गतिश्च मे। न चान्यं पितरं मन्ये त्वामृते तु महातपः॥' इति भरतेनोक्तं दुष्यन्तगृहं प्रति प्रेषणावसरे। आश्रम एव उपनीता इमे त्रयोऽपि राजपुत्राः। यथा कैकेयी स्वपुत्रस्य अभिषेचनाय वरं वव्रे, तथा एतद्भरतमाता शकुन्तला स्वपुत्रं अभिषेचयितुं वरं वव्रे। तद्विषये समयं च अकरोत्। समयं तमनुरुद्ध्य भरतं यौवराज्ये अभ्यषेचयद्दुष्यन्तः॥

कालिदासग्रथितवस्तुनि शाकुन्तलनाटके सन्ति केचिद्भेदाः इतिहासोपाख्यातकथातः। दुर्वाससः शापो वा दीर्घकालविरहस्य तद्धेतुकत्वं वा न दृश्यते भारतोपाख्याने। 'मनसा चिन्तयन्प्रायात् काश्यपं प्रति पार्थिवः। भगवांस्तपसा युक्तः श्रुत्वा किं नु करिष्यति॥ तं न प्रसाद्यागतोऽहं प्रसीदेति द्विजोत्तमम्। एवं संचिन्तयन्नेव प्रविवेश स्वकं पुरम्।' इति भारतोक्तप्रकारेण काश्यपकोपाद्भीतो राजा काश्यपागमनं प्रतिपालयितुं आश्रमे स्थित्वा प्रत्यावृत्तं तं आप्रष्टुं, स्वनगरात् तदाश्रमं गन्तुं, शकुन्तलामानेतुं स्वाधिकारिपुरुषान् प्रेषयितुं च बिभाय 'ऋषेर्भयात्तु दुष्यन्तः स्मरन्नैवाह्वयत्तदा' इति भारते। कण्वशापभयं विरहकारणमिति भारतम्। दुर्वाससो मुनेः शापस्तन्निमित्तमिति नाटककथा॥

गर्भिणी च शकुन्तला वर्षत्रयं गर्भमुवाह। 'करिणी चिराय सूते सकलमहीपाललालितं कलभम्' इति रङ्गास्थाने रसिकमहिते गीता श्रीवेङ्कटनाथगाथा अवधेया। संवत्सरत्रयान्ते भरतं सुषुवे। संवत्सरत्रयविलम्बस्य अस्त्येतत्कारणम्। जातस्य लोकोत्तरपुत्रस्य सर्वलक्षणोपेतस्य संवर्धने लालने च व्यापृता शकुन्तला सुतमुखचन्द्रदर्शनेन, अद्भुतस्वदतत्संश्लेषादिना च सुचिरं कालं सुखं निनाय। प्रथमपुत्रजन्यनन्तरं न केवलं धर्मार्थं भवेत् पतिपत्नीसंयोगः। 'इतरांस्तु कामजान् विदुः' इति ज्येष्ठपुत्रादन्यानवजानाति मनुः। 'गुरुर्गरीयसां श्रेष्ठः पुत्रः स्पर्शवतां वरः' इति राजसभायां शकुन्तलावचनं भर्तुः संश्लेषादपि पुत्रस्पर्शस्य सुखतरत्वे स्वानुभवपिशुनमिव। भर्त्रा

अनाहूता तद्गृहं गन्तुं नेयेषेव शकुन्तला । 'मां नयेद्यदि दाकुत्स्थस्तस्य सहशं भवेत्' इति खलु पतिव्रतानां भर्तृपारतन्त्र्यनिष्ठा ॥

शाकुन्तलस्य भरतस्य संभवादिकमधिकृत्य कृतमिदं नाटकं भारतदेशे सर्वोत्तमं नाटकम् । नैतस्मात् काव्यालोके किमपि चारुतरमिति बहवः पाश्चात्यपण्डितवरा एतन्नाटकरत्नसागरे मज्जन्तः उद्भुष्यन्ति ॥

नान्दीश्लोकरसानुभवामः । अत्र भगवान् अष्टमूर्तिरीश्वरः तदधीनकृतसिद्धविशेषणीभूतं तत्प्रपन्नं विश्वरूपतन्मष्टकं च भाव्यते इति स्पष्टम् । नाटककाव्यरचननटनारम्भे रङ्गिकाद्यस्य सर्वज्ञस्य श्रीनटराजस्य प्रणिधानं उचितमेव । ईश्वरेणैव कविशक्तिरनुग्राह्या । 'शक्तिर्निपुणता लोककाव्याद्यवेक्षणम्' इति श्लोके सैव प्रथमहेतुत्वेन उपादीयत । कविजिह्वाग्रसिंहासने अवस्थाय सर्वप्रवृत्तिकारणेन ईश्वरेणैव काव्यं गेयं कविमुखव्याजेन । 'मतः स्मृतिर्ज्ञानमपोहनं च' इति जगौ विजयरथे भगवान । 'निमित्तमात्रं भव सव्यसाचिन्' इत्यादिकं स्मर्तव्यम् । पार्वतीपरमेश्वरौ जगतः पितरौ दम्पती, वाल्मीकिं काव्यप्रथमगुरुं च प्रपद्य तदात्मकीभूय स्वस्य अत्यन्तं आकिंचन्यं सुदृढं अनुसंधाय, 'सोऽहमाजन्मशुद्धानां' 'रघूणामन्वयं वक्ष्ये' 'तनुवाग्विभवोऽपि सन्' इति तेषां स्वग्रन्थकारयितृत्वं तत्कर्तृत्वं च अनुसंदधे । ग्रन्थारम्भे 'कस्त्वं कविः' इति प्रश्नस्य 'सोऽहं' इत्युत्तरमिव । स एव अहं भूत्वा एतत् काव्यं निर्मास्यति इति कव्यनुभवो निपुणं असूचि महाकाव्यकथारम्भे सोऽहमिति वेदान्तप्रसिद्धसूत्रवाक्यपठनेन । अत्रापि नान्दीश्लोके विश्वरूपनीश्वरं ध्यायन् प्रस्तावनानन्तरं नाटकारम्भ एव 'साक्षात्पश्यामीव पिनाकिनम्' इति स्वध्यानस्य व्यक्तेश्वरसाक्षात्कारदशापर्यवसानफलं कीर्तयतीव कविः ॥

'आत्मा वा अरे द्रष्टव्यः, श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति मैत्रेयीब्राह्मणविधिवाक्यम् । केवलं मनुष्यं मां शृण्वती, मां मन्वती, मां ध्यायन्ती, मां पश्यन्ती, एतावन्तं कालमनैषीः, संसारपथेषु भूयः परिश्राम्यन्ती । 'न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति, यत्कामाय पतिः प्रियो भवति, यत्कामाय सर्वं भोग्यजातं प्रियं भवति तनेवात्मानं दिदृक्षस्व, तद्दर्शनाय यतस्व, इत्यनुशशास भगवान् याज्ञवल्क्यः अमृतत्वं आशासानायै मैत्रेय्यै । श्रवणमननसंपन्नः कविः भगवन्तं सर्वात्मानं नान्दीश्लोके सानन्दं विश्वरूपत्वेन प्रणिदध्यौ । प्रस्तावनान्ते च तद्ध्यानं घनीभूय दर्शनरूपफले पर्यवसितमिव । नटानां राजा ईश्वर एव संमुखे स्थित्वा कविं कृपावर्षिकटाक्षैराप्याययन् कविताशक्तिं उपर्युपरि प्रदाय अनुगृह्णन् आस्ते इति कव्यनुभवो द्योतत इव नाटकारम्भे 'साक्षात्पश्यामीव पिनाकिनम्' इति प्रथमपात्रमुखेन नाटकप्राथमिकवचनभङ्गीनिवेशनेन । वक्तृपात्रं च सूतः सारथिः । 'बुद्धिं तु सारथिं विद्धि' इति वेदान्तप्रसिद्धया सूतो बुद्धितत्त्वलक्षकः । कवेर्बुद्धिः सूक्ष्मीभूय भगवन्तं पश्यतीव । 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' इति कठवल्लीकविगानं स्मर्तव्यम् । अग्र्या सूक्ष्मा बुद्धिः साधनं सुसूक्ष्मब्रह्मसाक्षात्कारे । अत्र रथनिविष्टः सारथिः कठवल्लीकविप्रदर्शितरथरूपकनिवेशितबुद्धितत्त्व-

लक्षक इति सामञ्जस्यमनुभाव्यम्। स्वकल्पितनाटकपात्रीभूतसूतसुखव्याजेन कविः स्वकीयभगवत्साक्षात्कारानुभवमपि अवगमयतीव दृश्यप्रबन्धारम्भे ॥

अस्मिन्नान्दीश्लोके न केवलमीश्वरं किं तु रामायणकविं भारतकविं इतिहासद्वयं नाटकनायकौ, तत्पुत्रं सर्वदमनं भारतचक्रवर्तिनं भरतं च चित्ते कृत्वा तानि सर्वाणि सुसूचयिषतीव कविः। व्यासप्राचेतसौ काव्यगुरू; तत्कृती च कवीनां परमाधारभूते। नायकौ च काव्यप्रतिपाद्यौ। अमीषां सर्वेषां नान्दीश्लोकेऽनुसंधानं उचितमेव ॥

ईश्वरपरप्राथमिकयोजनायां चिन्तां प्रवर्तयामः। श्लोकोपात्तसृष्टिक्रमः प्रसिद्धश्रौतक्रमानुसारी। नात्र यथाभूतसृष्टिक्रमविवक्षा कवेः। नात्र पाठक्रमे आदरः कवेः। श्रुतिष्वपि सृष्टिः क्वचित् वियत्पूर्विका, क्वचित्तेजउपक्रमः, इतरत्र अन्यथाऽन्यथा च श्राव्यते। पाठक्रमादर्थक्रमो बलीयान्। पाठक्रममुल्लङ्घ्य अर्थक्रममनुसृत्य सृष्टिश्रुतिषु सृज्यक्रमो ग्राह्यः इति सूचयतीव वेदान्तिनिष्णातः कविः व्युत्क्रम्य पठनेन। श्रौतसृष्टिवर्णने तु न पाठस्य क्रमिकत्वानिर्बन्धः इति शिक्षयतीव अपां प्रथमपठनेन। अन्यच्चापि प्रयोजनं अभिप्रेतमिवेह कविना। अत्र प्रसिद्धपूर्वराजचरितं विवर्णयिषितम्। 'आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव' इति मनीषिणां माननीयो मनुराद्यराजः। 'यद्वै किंच मनुरवदत्तद्भेषजम्' इति श्रूयते। स्मर्तृषु स एवाभ्यर्हिततमः। 'श्रूयते मनुना गीतौ' इति विग्रहवता धर्मेण रामेण द्वौ मानवश्लोकावुदाहृतौ बलवद्बोधक्षिप्तवन्तं मुमूर्षुं बालिनं धर्मसूक्ष्मं प्रत्याययितुम्। 'मनुव्यासप्राचेतसपरिषदर्हा कचिदियं सुधासिक्ता सूक्तिः' इति श्रीवेङ्कटनायकेन कविसिंहेन मनुः उत्तमकविपरिषदि अगणि। अत्र नाटकादौ आदिराजं आद्यस्मर्तारं पुराणकविं मनुं स्मरति कविः। 'सोऽभिध्याय शरीरात्स्वात् सिसृक्षुर्विविधाः प्रजाः। अप एव ससर्जादौ तासु वीर्यमवासृजत्॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः। ताबुभावयनं यस्य तेन नारायणः स्मृतः॥' इति स्मृत्यारम्भे पठितं मनुना। तद्गीतं अपां प्रथमसृष्टत्वमनुरुध्य अत्र कविर्गायतीति स्फुटम्। मनुगीतमनुगायति कविः। मनुश्लोका एव उदाहृताः सर्वैरपि व्याख्यातृभिः अत्र कविबुद्धिस्थत्वेन। अपां प्रथमनिवेशने सन्ति बहूनि प्रयोजनानि कवेः। भारतोपाख्यानोपजीविनाटकारम्भे नरनारायणस्मरणस्मारणे निर्वर्त्यतां मनुश्लोकस्मारणेन। 'नारायणं नमस्कृत्य नरं चैव नरोत्तमम्' इति महाभारतोदीरणारम्भे विधिर्दृश्यते। भारतोपाख्यानं चेदम्। 'प्रकृतिवद्विकृतिः कर्तव्या'। उपजीवकस्य उपजीव्यविषयविध्यनुयायित्वं च समुचितमेव। 'अलंकृतं द्वीपवत्या मालिन्या रम्यतीरया। नरनारायणस्थानं गङ्गयेवोपशोभितम्॥' इति भारते कण्वाश्रमस्य नरनारायणाश्रमतौल्यमुक्तम्। मनुव्याख्याता मेधातिथिः 'न शब्दादर्थभेदः, ब्रह्मा नारायणो महेश्वरः इत्येक एव अर्थः, नोपासनाकर्मतया भिद्यते, तथा च द्वादशे दर्शयिष्यामः' इति आपो नारा इति श्लोकव्याख्याने वक्ति। तद्व्याख्यारीत्या शिवनारायणैक्ये मनुः कविमतानुग्राहको भवेत्। 'या सृष्टिः स्रष्टुराद्या' इति मनुवचनस्मारणेन अत्र भारतोपाख्यानारम्भे अवश्यकर्तव्यं नरनारायणनमस्कारं कथंचित् संपाद्य सोऽपां स्रष्टा मनुकथितो नारायणः स एव ईशः इति स्वनिष्कृष्टत्रिमूर्त्यैक्यमतं प्रथममङ्गलश्लोक एव उपक्रमोपसंहाराभिरूप्यन्यायावलम्बनेन सूचयतीव। 'शिवश्च

नारायणः' इति श्रुतिं मनसि करोतीव । 'या आपः स्रष्टुर्नारायणस्य आद्या सृष्टिः प्रत्यक्षतत्तनुप्रपन्नः अप्शरीरकः ईशः अवतु वः' इति अस्मिन् श्लोके वचनव्यक्तिः । प्रस्तावनान्ते सशरचापं भारतराजानं रथस्थं सारथिं च नाटकारम्भे प्रवेशयन् कृष्णस्य सारभूतगीतागानस्मारकं कृष्णसारशब्दं चादौ कीर्तयन् गीतरागशब्दं च प्रस्तावनान्तिमश्लोके प्रयुञ्जानः, नाटकारम्भे च नरनारायणौ स्मरति स्मारयति चास्मान् । स्रष्टा कविः । 'स कविः कथ्यते स्रष्टा रमते यत्र भारती' इति श्रीवेङ्कटनाथकविः । स्रष्टुः कवेः आद्या सृष्टिः रामायणम् । कविप्रथमपङ्क्तिस्तत् । कालिदाससृष्टिरिदं रूपकम् । तत्सृष्टिषु च इयं कृतिराद्या उत्तमा अग्रगण्या । 'युवतिविषये सृष्टिराद्येव धातुः' इति मेघसन्देशगीतरीत्या शकुन्तला धातुः स्रष्टुः सृष्टिराद्या । 'स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे' इत्यत्रैव गास्यते । स्रष्टुर्भारतकवेः आदिपर्वस्थं शाकुन्तलोपाख्यानं शकुन्तलाविषये आद्या दृश्यकाव्यसृष्टिः । इदं सर्वं कविबुद्धिस्थमिव या सृष्टिः स्रष्टुराद्येत्यत्र । अप्सरःसंभवायाः शकुन्तलायाः अद्भिः संबन्धोऽस्ति । अद्भिरुपक्रममाणः कविः प्राणेन उपसंहरति । 'आपोमयः प्राणः' इति छन्दोगगानं स्मरतीव कविः । आपो रसाः । अपां सृष्टिः रससृष्टिः । रसाः काव्यजीवातुः । 'आपोहिष्ठा मयो भुवः, यो वः शिवतमो रसः, तस्य भाजयतेह नः, उशतीरिव मातरः, तस्मा अरं गमाम वः', इत्यादिकं वैदिकलोकदैनन्दिनगानं च चित्ते करोतीव कविः काव्यारम्भे स्वकाव्यस्य शिवतमरसघनत्वानुग्रहं आशासनः । रससृष्टिः कवेः प्रथमाशास्या । 'वहति विधिहुतं या हविः' । अग्नेरिदं वैदिकं प्रयोजनं वैदिकलोकस्य । 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः ॥' इति स्मर्यते । अपां वृष्टेः मूलं अग्नौ विधिहुतं हविः । एतत्स्मृतिवचने 'सम्यक्प्रास्ता' इति गदितं आहुतिप्रक्षेपे सम्यक्त्वं विवक्षते कविना विधिहुतमित्यत्र विधिशब्देन । विधिना शास्त्रदृष्टवर्त्मना श्रद्धया हुतम् । 'अग्नीषोमौ' इत्यप्तेजसोः कार्यकारणभावेन मिथःसंनिकर्षः । इत्थं च औचित्यं तयोः समभिव्याहारस्य । 'वहति विधिहुतं या हविर्या च होत्री' इति यज्ञयजमानौ सह स्मर्येते । 'तव भवतु बिडौजाः प्राज्यसृष्टिः प्रजासु त्वमपि विततयज्ञः स्वर्गिणो भावयाल्म् । युगशतपरिवर्तानेवमन्योन्यकृत्यैर्नयतमुभयलोकानुग्रहश्लाघनीयैः ॥' इति काश्यपस्य अनुग्रहादेशो नाटकान्ते दुष्यन्तं प्रति । तेन च श्लोकेन प्रजापतिप्रवर्तितजगच्चक्रानुवर्तनविषये गीतागीतः 'देवान् भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥' इति श्लोकः प्रत्यभिज्ञाप्यते इति सुगमम्, उभयोः शब्दार्थसाम्यप्यभूयस्त्वस्य सुस्फुटत्वात् । यथा नाटकोपसंहारे तथा तदुपक्रमेऽपि वृष्टिभवा अपः, अग्नौ सम्यगाहुतिप्रासनरूपं यज्ञं, आहुतिहोतारं यजमानं च सह निर्दिशति एकस्मिन् प्रथमे पादे । इत्थं च काव्येऽपि उपक्रमोपसंहाराभिरूपयं संपादयति सर्वशास्त्रपारदृश्वा कविः । वृष्टयनुग्रहीता सारोचो ऋश्यशृङ्गवत् काश्यपः । 'कश्यपस्य तु पुत्रोऽस्ति विभण्डक इति श्रुतः' इति रामायणे । योजनान्तरेषु च महदस्ति प्रयोजनं प्रथमपादपठितपदार्थक्रमे । तच्च परस्तात् प्रदर्शयिष्यते । 'ये द्वे कालं विधत्तः' इति सूर्याचन्द्रमसौ गृह्येते एकेन खण्डवाक्येन । तमोनिरासकज्योतिष्टरूपेण भगवच्चक्षुष्टरूपेण च तयोरेकीकृत्य उपादानमुचितम् ॥

(क्रमशः)

॥ श्रीः ॥

॥ श्रीशंकरभगवत्पादाचार्यविरचिता ॥

॥ सौन्दर्यलहरी ॥

लक्ष्मीधरा सौभाग्यवर्धनी अरुणामोदिनी व्याख्यात्रयोपेता ॥

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।
अतस्त्वामाराध्यां *हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥ १ ॥

॥ लक्ष्मीधरा ॥

वन्दामहे महीयांसमंसलम्बिजटाभरम् ।
यः कङ्कणझणत्कारस्वः शब्दानुशासनम् ॥

शेषाश्चे वोक्तिभूषाः कणचरणचणग्रन्थसौगन्ध्यजिघ्राः
भक्तिप्रौढिलीढा गुरुगुरुतरगीर्गुम्भशुम्भद्विजृम्भाः ।
निःशङ्काः शंकरोक्तौ पशुपतिमतनिर्वाहिकाः सांख्यसंख्याः
यस्य श्रीलोल्लुलक्ष्मीधरविबुधमणेर्भान्ति वाचां निगुम्भाः ॥

---

*हरिहरविरिञ्च्यादिभिः इति सौभाग्यवर्धनीपाठः

सोऽहं लक्ष्मीधरः प्राह टीकां लक्ष्मीधराभिधाम् ।
एनां समाहितस्वान्ता सेवन्तां सततं बुधाः ॥

स्यादेव मेऽल्पमतया मतिमान्द्यतो वा दोषः क्वचित्क्वचिदपि न काऽपि शङ्का ।
नैसर्गिकी खलु गुणीकरणप्रवीणा शक्तिः सदा विजयते भुवि सज्जनानाम् ॥

इह खलु शंकरभगवत्पूज्यपादाः सौन्दर्यमततत्त्ववेदी नः समयाख्यां चन्द्रकलां श्लोकशतेन स्तुवन्ति— शिव इति । शिवः सर्वमङ्गलोपेतः सदाशिवतत्त्वम् । 'वश कान्तौ' इत्यस्माद्धातोः शिवशब्दो निष्पन्नः । यथोक्तम्— 'हिंसिधातोः सिंहशब्दे वश कान्तौ शिवः स्मृतः । वर्णव्यत्ययतः सिद्धौ पश्यकः कश्यपो यथा ॥' इति । 'वश कान्तौ' इत्ययं धातुः तुदादिः अदादिश्च संगृहीतः । तुदादेर्वशतेः दीप्तिरर्थः । कान्तिर्दीप्तिः । अदादेर्वष्टिरिति कामना अर्थः । इच्छाशक्त्याश्रयत्वादीश्वरस्य शिवत्वम् । वशति प्रकाशते स्वयंप्रकाश इति; यद्वा, स्वस्मिन् प्रपञ्चं प्रकाशयतीति शिवः; यद्वा, शीङ् स्वप्ने इत्यस्माद्धातोः शिवशब्दो निष्पन्नः । स्वप्नं याति क्षिपतीति शिवः, जाड्यरहितः, अविद्यानिर्मुक्तः इत्यर्थः । यद्वा, स्वप्नमविद्यां याति गच्छतीति शिवः, सादाख्यकलासंवलित इति यावत् । तस्यैव शिवशब्दवाच्यत्वं वक्ष्यते । तादृशः शिवः शक्त्या जगन्निर्माणशक्त्या युक्तः अवच्छिन्नः, अविद्याऽवच्छिन्नचैतन्यस्यैव ब्रह्मणः जगन्निर्माणशक्तत्वात् । यदि चेत्, भवति शक्तः समर्थः प्रभवितुं प्रपञ्चं निर्मातुम् । न चेदेवं, शक्त्या युक्तो न चेदित्यर्थः । दीव्यतीति देवः पूर्वोक्तः सदाशिवः । न खलु निषेधसंभावनायाम् । स्पन्दितुमपि चलितुमपि कुशलः समर्थः । निराकारस्य विभोराकाशतुल्यस्य स्पन्दनायोगात् इति हृद्गतोऽर्थः ॥

वाच्यार्थस्तु— शिवशक्त्योः जायापतिन्यायेन जायया शक्त्या युक्तश्चेत् प्रपञ्चरूपसंतानं निर्मातुं शक्नोति, तया वियुक्तश्चेत् न शक्नोतीति ॥

आगमरहस्यार्थस्तु— शिवशब्देन नवयोनिचक्रमध्ये चतुर्योन्यात्मकमर्धचक्रमुच्यते । शक्तिशब्देन अवशिष्टं पञ्चयोन्यात्मकमर्धचक्रमुच्यते । एवमर्धद्वयमिलितं नवयोन्यात्मकं चक्रं भवति । एतस्माच्चक्रादेव जगदुत्पत्तिस्थितिलया भवन्तीति पुरस्तान्निवेदयिष्यते । उक्तं च— 'चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः । शिवशक्त्यात्मकं ज्ञेयं श्रीचक्रं शिवयोर्वपुः ॥' इति । शिवशक्त्योर्मेलनं षट्त्रिंशं सर्वतत्त्वातीतं तत्त्वान्तरमिति पुरस्तान्निवेदयिष्यते । तस्मान्मेलनादेव जगदुत्पत्तिस्थितिलयाः, न केवलादेव इति च वक्ष्यते । यथोक्तं वामकेश्वरमहातन्त्रे चतुःशत्याम्— 'परोऽपि शक्तिरहितः शक्त्या युक्तो भवेद्यदि । सृष्टिस्थितिलयान्कर्तुमशक्तः शक्त एव हि ॥' एतच्च 'चतुर्भिः श्रीकण्ठैः' इत्यादिश्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्यामः ॥

अतः तन्मात्रहेतोः त्वां भगवतीं आराध्यां आराधयितुं पूजयितुमहीं हरिहरविरिञ्चादिभिः हरिर्विष्णुः हरो रुद्रः विरिञ्चो ब्रह्म आदिशब्देन इन्द्रादयः संगृह्यन्ते । न च अविकारपुरुषाः षडूर्मिषड्भावरहिताः । तेषामाराध्यत्वं कथमुपपद्यत इति वाच्यं भगवत्याः पूर्णत्वेनोक्तम्— अतस्त्वामाराध्यामिति, न तु आरोपस्तुतिरिति ध्येयम् । यद्वा, निगमा वा आदिशब्देन संगृह्यन्ते, निगमलभ्यत्वाद्भगवत्याः तदुक्तम् 'श्रुतीनां मूर्धानः' इत्यादौ स्फोर्यते । विरिञ्चशब्द अकारान्तः । अपिशब्दः कथंशब्दार्थमुपस्करोति । प्रणन्तुं नमस्कर्तुम् । उशब्दः कायिकं वाचिकं मानसिकं त्रिविधं नमस्कारमाह । स्तोतुं वा केवलं स्तुतिमात्रमपि कर्तुं येति । अकृतपुण्यः पूर्वजन्मार्जितपुण्यनिचयः कृतपुण्यः तदन्यः अकृतपुण्यः । प्रभवति ईष्टे शक्तः ।

अत्रेत्थं पदयोजना— हे भगवति, शिवो देवः शक्त्या युक्तो भवति यदि, तदा प्रभवितुं शक्तः । एवं न चेत्, स्पन्दितुमपि कुशलो न खलु । अतः हरिहरविरिञ्चादिभिरपि आराध्यां त्वां अकृतपुण्यः प्रणन्तुं स्तोतुं वा कथं प्रभवति ॥ १ ॥

॥ सौभाग्यवर्धनी ॥

शब्दायमानतिमिरावलिमेद्यमाननिष्यन्दमानतिमिरोर्ध्वगसान्ध्यरागम् ।
विघ्नान्धकारतरणिं तरुणार्कशोणं वन्देऽर्धनारनरयोरवियोगयोगम् ॥ १ ॥

कुण्डलितकुन्तलालीकर्तरिकाकृत्यमाननवभानोः । शबलमिव शोभमानं वन्दे सीमन्तरागमम्बायाः ॥ २ ॥

रमणीवामदेहाय रजताचलवासिने । रमाधरेन्द्रचापाय रमाकान्ताय ते नमः ॥ ३ ॥

वृश्चते दुश्चरित्राणां वृद्धिं भारकरीं भुवः । वृन्दावनविहाराय वृष्णीनां पतये नमः ॥ ४ ॥

श्रीशंकराचार्यकृते स्तवेऽस्मिन्टीकां चिकीर्षोर्मम मन्दबुद्धेः ।
विदूषकस्येव वचोऽस्तु युष्मद्धासाय सन्तोऽस्मि तथाऽपि धन्यः ॥ ५ ॥

भगवान्परमकारुणिकः शंकरावतारः शंकराचार्यः शिवशक्त्योरभेदं ज्ञापयितुं सकलप्रपञ्चसाक्षिण्याः ब्रह्मादिभूतचिच्छक्तेः स्तुतिद्वारा मातृन्यादिमन्त्रानुद्धरति — शिव इति । जन्ममरणाद्यनेकक्लेशसंचयैरुपचीयमानतापत्रयरूपामङ्गलाभावाच्छिवः सदा मङ्गलरूपः, चिद्विलासमनमुल्लसितपरमानन्दनिर्भरः, एतादृशः शक्त्या कर्तुमकर्तुमन्यथाकर्तुं च प्रभवन्त्या सामर्थ्यविशेषस्फूर्त्या यदि युक्तो भवति, तदा प्रभवितुं प्रभुर्भवितुं शक्तो भवति समर्थ भवति, सर्वोत्कृष्टो भवतीति यावत् । विपक्षे बाधकमाह— न चेदेवमिति । न चेदेवं देवः अप्रतिहतशक्तिः स्पन्दितुं चलितुमपि न कुशलः न क्षमः । अतः कारणात्त्वामाराध्यां हरिहरविरिञ्च्यादिभिरप्युपास्यां स्तुतिं कर्तुं कथं प्रभवति । आदिशब्देन मनुचन्द्रादयः । तदुक्तं मानसोल्लासे—'विष्णुः शिवः सुरज्येष्ठो मनुश्चन्द्रो धनाधिपः । लोपामुद्रा तथाऽगस्त्यः स्कन्दः कुसुमसायकः । सुराधीशो रौहिणेयो दत्तात्रेयो महामुनिः । दुर्वासा इति विख्याता एते मुख्या उपासकाः ॥' इति । ज्ञानार्णवेऽपि— 'मनुश्चन्द्रः कुबेरश्च मन्मथस्तदनन्तरम् । लोपामुद्रा तथाऽगस्त्यः स्कन्दो विष्णुस्तथा शिवः । दत्तात्रेयो मुनिः

शक्तो दुर्वासाश्च त्रयोदश । उपासते महाविद्या द्वादशोक्तास्तवानघे । त्रयोदशाक्षरी विद्या दुर्वासोपासिता ध्रुवे ।।' इति । प्रणन्तुं नमस्कर्तुं स्तोतुं वाऽप्यकृतपुण्यः कथं प्रभवति समर्थो भवति? एतावता सृष्टिस्थितिसंहृतिकर्तॄणां हरिहरादीनां स्वस्वकृत्येषु शक्त्या विना कर्तृत्वायोगात्सृष्ट्यादौ त्वमेव हेतुः, त्वत्परतन्त्रास्तेऽपि इति भावः । तदुक्तं मार्कण्डेये— 'सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि । गुणाश्रये गुणमयि नारायणि नमोऽस्तु ते ।।' इति । एतादृश्या अनेकजन्मार्जितसुकृतराशेरेव तव प्रणामे स्तुतौ पूजाजपध्यानेष्वप्यधिकारी भवति, नान्यः । तदुक्तं शारदातिलके— 'पूर्वजन्मकृतैः पुण्यैर्ज्ञात्वेमां परदेवताम् । पूजयेदागमोक्तेन विधानेन समाहितः ।।' इति । तथा च येऽन्ये त्वदितिरिक्ता देवतागणा भक्तेभ्यो भुक्तिं मुक्तिं च ददते तेऽपि शक्तिरूपया त्वयैवानुगृहीता उपासकेभ्य उपासनानुरूपाणि फलानि ददते । त्वमेव फलदात्री सर्वत्र । येन केनापि प्रकारेण या काचिद्देवतोपास्या तदुपासना त्वदुपासनैवेति पर्यवस्यति । तदुक्तं मानसोल्लासे— 'येऽपि ब्रह्मादयो देवा भवन्ति वरदा नृणाम् । त्वद्रूपां शक्तिमासाद्य ते भवन्ति वरप्रदाः । तस्मात्त्वमेव सर्वत्र कर्मणां फलदायिनी ।।' इति । एतादृश्या शक्त्या सह शिवस्याविनाभावो भवतीति परमार्थतः शक्तिशक्तिमतोरभेद इति तात्पर्यार्थः । तदुक्तं कूर्मपुराणे— 'शक्तिशक्तिमतोर्भेदं वदन्त्यपरमार्थतः । अभेदमनुपश्यन्ति योगिनस्तत्त्वचिन्तकाः ।।' इति । परे तत्रापारमार्थिकं भेदमापादयन्ति 'तन्तुमान् पटः' 'मृद्वान् घटः' इतिवत् । शिवः शक्तियुक्तः प्रभवति, न शक्तिवियुक्तः कदाचिदपि । तथा च यैव शक्तिः सैव शिवः, य एव शिवः स एव शक्तिः, उपासकानां वासनाभेदेन शिवः शक्तिरिति भेदकल्पना, यथा चित्रविशेषे तत्तद्वासनाभेदेन कदाचिद्गजप्रतीतिः कदाचिद्वृषभप्रतीतिरित्यादि । तदुक्तं परिमले— 'आलेख्यविशेषे यथा गजवृषभयोर्द्वयोः प्रतिभासस्तथैवैकस्मिन्नर्थे शिवशक्तिविभागकल्पनां कुर्मः' इति । अथवा शिवः शक्त्या युक्तः । शक्तिरेकारः कामबीजम् । 'मादनं तदधः शक्तिस्तदन्ते बिन्दुमालिनी' इति चतुःशत्याम् । स चैकारः अकोकारद्व्यक्षरात्मकः । तेनाक्षरद्वयमेव गृह्यते । तथुक्तः वर्णव्यत्ययेन अकारेकारयुक्तो यदि भवति, तदा प्रभवितुं शक्तो भवति । न चेदेवं देवोऽपि स्पन्दितुमपि न कुशलः, तालोष्ठपुटस्पन्दनोच्चारणयोग्योऽपि न भवति, श् व् इति व्यञ्जनमात्रावशेषात् । अतस्त्वामाराध्यामित्यन्तार्थः पूर्ववदेव । एतावता त्वया वशीकृतः शिवस्त्वन्मय एव, परमार्थतो न भेदलेशोऽप्यस्तीति भावः । तदुक्तं चिद्गगनचन्द्रिकायाम्— 'अम्ब तावकपदद्वयार्चकस्त्वन्मयो भवति नात्र विस्मयः । यस्त्वयैष विवशो वशीकृतः शक्तिरेव समभूच्छिवः स्वयम् ।।' इति । हरिरपि त्वन्मय एव । तदुक्तं मानसोल्लासे— 'हरं त्यक्त्वा हरिरभूद्धरिरेव तवाम्बिके । स्फुरच्छक्तिः पुनरभूदपरः सन्धियोगतः ।।' इति । श्लोकार्थः स्पष्टः । तथाऽपि गुरुमुखादवगन्तव्यः ।।

अथ मातृकादिमन्त्रोद्धारक्रमो रहस्यार्थ उच्यते— शिवः ककारादिः क्षकारान्तो वर्णसमूहः पञ्चत्रिंशद्वर्णात्मकः समस्तव्यस्तरूपेण षट्त्रिंशत्तत्त्वात्मकः । शकारेकारादिषोडशस्वरसमूहः । षट्त्रिंशत्तत्त्वात्मको व्यञ्जनसमूहः शिवः षोडशस्वररूपया शक्त्या युक्तो यदि भवति तदा प्रभवितुं वेदादिविद्यारूपेण शब्दार्थसृष्टिं स्पष्टीकर्तुं शक्तो भवति । न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि न पटुः तालोष्ठपुटव्यापारशून्यः अकिंचित्करः । अतस्त्वामाराध्यामित्यादिः स्पष्टार्थः । एतादृशोऽपि शिवस्त्वन्मय एव, मातृकारूपत्वात् । मातृकातिरिक्तशब्दार्थसृष्टेरभावाच्छब्दार्थसृष्टिः सर्वा त्वदधीनेति भावः । तस्माच्छिवशक्तिमयाः

सर्वे वर्णाः । तदुक्तं शारदातिलके— 'विना स्वरैस्तु नान्येषां ज्ञायते व्यक्तिरञ्जना । शिवशक्तिमयान्प्राहु-स्तस्माद्वर्णान्मनीषिणः ॥' इति । मातृकाहृदयेऽपि— 'ककारादिक्षकारान्ता वर्णास्ते शिवरूपिणः । समस्तव्यस्तरूपेण षट्त्रिंशत्तत्त्वविग्रहाः । अकारादिविसर्गान्ताः स्वराः षोडश शक्तयः । नित्यषोडशकान्मानः परस्परममी युताः । शिवशक्तिमया वर्णाः शब्दार्थप्रतिपादकाः । शिवः स्वतन्त्रशक्त्यर्थो न स्वतन्त्रः कदाऽप्यसौ । स्वराः स्वतन्त्रा जायन्ते न शिवस्तु कदाचन' इति । इति मातृकोद्धाररूपार्थः ।

अथ विद्याप्रासादपदोद्धारः— शिवो हकारः । तदुक्तं रुद्रयामले— 'शक्तिः प्राणश्च जीवश्च मन्त्रो नादः शिवो रविः । कपोलक इति प्रोक्ताः स्मुर्हकारस्य शिवोदिताः' इति । लक्ष्मीः शक्तिकूटं बालाविद्यायास्तृतीयपक्षरम् । तदुक्तं त्रिपुरार्णवे— 'वाग्भवं प्रथमं बीजं कामराजं द्वितीयकम् । तृतीयं शक्तिकूटाख्यं निगमान्त्रितयोद्धृतम् । इत्थं कुमारीविद्याया बीजत्रयमुदीरितम् ॥' इति । तया युक्तो यदि भवति तदा प्रभवितुं शक्तो भवति । न चेदेवं देवः स्पन्दितुमपि न कुशलः तालवोष्ठपुटस्पन्दनव्यापारेण व्यक्तीभवितुं समर्थः । किं पुनर्मन्त्ररूपतां प्राप्तुम् । उत्तरार्धार्थः पूर्ववदेव योजनीयः । इति प्रासादपदोद्धाररहस्यार्थः ॥

अथानुत्तरमन्त्रोद्धारः— शिवः अकारः । तदुक्तं संकेतपद्धत्याम्— 'अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः' इति । शक्तिर्विसर्गः । तदुक्तं शिवदृष्टौ— अहं बिन्दुर्विसर्गस्त्वमावयोर्योगतः परः । प्रकाशितोऽनुत्तराख्यो वर्णो वर्णेष्वनुत्तरः ।' इति । शारदातिलकेऽपि— 'बिन्दुः पुमान्रविः प्रोक्तः सर्गः शक्तिर्निशाकरः' इति । तया यदि युक्तो भवति, तदा प्रभवितुं शक्तो भवति सर्ववर्णपदवाक्येष्वप्यनुत्तरत्वेन प्रकाशमानो भवति, साक्षान्निरतिशयानन्दसुन्दरश्चिच्छक्तिसमेवतो ब्रह्मैव भवति । तथा च श्रुतिः— 'अ इति ब्रह्म' इति । न चेदेवं देवो न भवति देवतारूपचिच्छक्तिविलासाभावात् । तदुक्तं वासिष्ठरामायणे— 'न देवः पुण्डरीकाक्षो न च देवस्त्रिलोचनः । अकृत्रिममनाद्यन्तं देवनं देव उच्यते ॥' इति । स्पन्दितुमपि न कुशलः केवलं शून्यरूपाकारः पर्यवस्यति । तदुक्तं योगिनीहृदये— शून्याकारादिसर्गान्ताद्बिन्दुप्रस्पन्दसंविदः । प्रकाशपरमार्थत्वात्स्फुरत्तालहरीयुतात् । प्रसृतं विश्वलहरीस्थानं मातृत्रयात्मकम् ॥' इति । आदिपर्वणि महाभारतेऽपि—'ऋतस्य दातारमनुत्तरस्य निधिं निधीनां चतुरन्वयानाम् । ये नाद्रियन्ते गुरुमर्चनीयं ते वै लोकान्निविशन्त्यप्रतिष्ठान् ॥' इति । अतस्त्वामित्यर्धं पूर्ववदेव योजनीयम् । हरिहरविरिञ्च्यादयोऽप्यनुत्तरमेवोपासत इति तात्पर्यार्थः । अथवा हरिहरविरिञ्चयो गायत्रीरूपाः, गायत्र्यास्त्रिमूर्तिरूपत्वात् । तथा च याज्ञवल्क्यः— 'प्रातर्ब्रह्मस्वरूपा स्यान्मध्याह्ने रुद्ररूपिणी । सायं विष्णुस्वरूपेयं गायत्री त्रायते भयात् ॥' इति । इति गायत्र्यादिमन्त्रैराराध्याम् । एतावता गायत्र्यादयो मन्त्रा वेदादिसकलविद्याः । किं बहुना ! यत्किंचिच्छब्दजालं जगति वृत्तं वर्तमानं वर्तिष्यमाणं तत्सर्वमप्यनुत्तररूपे स्वरप्रत्याहारे मग्नम् । एतादृशानुत्तरतत्त्वरूपिणीं त्वां प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति । शिवदृष्टौ— 'प्रत्याहृताः स्वरा देवि षोडशानुत्तरे मनौ । अकारस्य विसर्गेण सहाद्यन्तस्य मेलनात् ॥ वैदिकं लौकिकं वाऽपि यत्किंचिच्छब्दजालकम् । अनुत्तरेण तत्त्वेन सकलं कबलीकृतम् ॥' इति । इत्यनुत्तरोद्धारः ॥

अथ वाग्वादिनीविद्योद्धारः— शिवो हकारः शक्त्या युक्तः शक्तिरूपाकारेण युक्तः । शक्तिश्चासावा चेति कर्मधारयः । तेन द्वयक्षरी वाग्वादिनीविद्या भवति । एतदुक्तं मन्त्रनारायणीयान्तर्गतवाग्वादिनीमन्त्रोद्धारे विद्यार्थप्रकाशिकायाम्— 'अनन्तो लक्ष्मीशश्च विद्या वाग्वादिनी मता' इति । यदि भवति प्रभवितुं शक्तस्तदा भवति वाग्वादिनीविद्यारूपेण वेदादिसमस्तविद्याद्योतको भवति । न चेदेवं हकारमात्रावशेषेण न देवो न खलु कुशलः स्पन्दितुमपि, स्तम्भनयमानः केवलं शोकमोहच्छन्नो भयादिद्योतक एव स्यात् । अतस्त्वामाराध्यामित्युत्तरार्धस्यार्थः स्पष्टः । इति वाग्वादिनीविद्योद्धारः ॥

अथ शैवपञ्चाक्षरीविद्योद्धारः— शिवः शक्त्या युक्तः शक्तिरेकारः । तेन चतुर्थीविभक्तिः 'ङे' इत्यत्र ङकारलोपे 'ए' इति भवति । तद्युक्तो यदि भवति तदा प्रभवितुं शक्तो भवति नम इति शक्तियुक्तो भवति । तदुक्तं स्कान्दपुराणे— 'प्रणवो बीजमाख्यातं नमः शक्तिरुदीरिता । ऋषिः स्याद्वामदेवोऽस्य पङ्क्तिश्छन्द उदाहृतम् । पर्वतावलुमः साक्षादेवताऽत्र सदाशिवः ॥' इति । न चेदेवं देवः स्पन्दितुमपि न कुशलः । प्रातिपदिकमात्रावशेषान्मन्त्ररूपतया फलदानासमर्थः स्यात् । अतस्त्वामाराध्यामित्याद्यर्थः पूर्ववदेव योजनीयः ॥

अथ पाशादिन्यक्षरीविद्योद्धारः— शिव आकारः, शक्तिर्बिन्दुः, तद्युक्तो यदि भवति तदा प्रभवितुं शक्तो भवति । न चेदेवं देवः स्पन्दितुमपि न कुशलः । अतः त्वा त्वां शक्तिं भुवनेश्वरीं आमा सबिन्दुकाकारेण । हकाररेफौ सबिन्दुनकारेण सह शक्तिर्भुवनेश्वरी । हरिहरविरिञ्च्यादिभिः हरिहर विरिञ्च्यादयः प्रणवरेफककाराः । तेषां विलोमयोजनेनाङ्कुशबीजं भवसि । अत एव विरिञ्च्यादिभिरित्युक्तम् । हरिश्च हरश्च हरिहरौ, विरिञ्चिश्चासावादिश्च विरिञ्च्यादिः हरिहरौ विरिञ्च्यादिश्च हरिहरविरिञ्च्यादयः । तैश्च सहाराध्यां प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ? अनेनाद्यन्तप्रधानयुक्तोऽयं मन्त्र इति सूचितम् । तदुक्तं शारदातिलके पूजामुक्त्वा— 'इत्थं संपूजयन्देवीं साक्षाद्वैश्रवणो भवेत् । ईड्यते सकलैर्लोकैस्तेजसा भास्करोपमः । अनेनाधिष्ठितं गेहं निशि दीपशिखाकुलम् । दृश्यते प्राणिभिः सर्वैर्मन्त्रस्यास्य प्रभावतः ॥' इति ॥ १ ॥

॥ अरुणामोदिनी ॥

श्री श्रीपतिप्रमुखदैवतवृन्दवन्द्यसर्वेष्टदानचणदिव्यपदाम्बुजाय ।
तस्मै नमः समुदितारुणसंनिभाय सिद्धेन्दिरासहचराय गणेश्वराय ॥ १ ॥

यं भक्तिपूर्णमतिमङ्गलयाऽईयन्तः सिद्धोद्यमस्वमुपयन्ति महेश्वराद्याः ।
सोऽयं कृपारसलसत्करुणाकटाक्षदीक्षाभिरस्तु भजन्मम चित्तवृत्तिम् ॥ २ ॥

भुवनममृतसेकैरिन्दुलेखेव नक्तं मधुरमयवचोभिः प्रीणयन्ती नितान्तम् ।
ललितपदगुणालंकारवृत्ताऽसमाना भवतु भगवती मे भारती सुप्रसन्ना ॥ ३ ॥

स्फटिकमणिविशुद्धं मौलिबद्धेन्दुलेखं शबलितमिव देवं कुर्वती कम्रकान्त्या ।
तरुणतरणिशोणा तारुणी दारुणेभ्यः करुणयतु कटाक्षान्काऽपि नित्यारुणा नः ॥ ४

यो लोकोपकृतिप्रविष्टहृदयो स्निग्धः प्रतिष्ठाह्वयं नत्वा श्रीमच्छंकरशब्दपूर्वभगवत्पादाभिधानं गतः ।
सद्वेदान्तरहस्यवत्स्फुटितवान्गोप्यं रहो मानवं तं वन्दे भगवन्तमन्धकरिपुं सर्वान्तरायच्छिदम् ॥

अस्त्यस्मिन्विषयेऽन्ध्रसंज्ञिनि मनुच्छ्रीगौतमीरोधसि श्रीमद्राजमहेन्द्रवाटमहितं दुर्गं दुरारोहणम् ।
पूर्णा पण्डितमण्डलीभिरनिशं यद्दीक्षया दिव्यभूद्विख्याता बहुधा जगत्सु तनुधा श्रीकोनसीमाभिधा ॥

तस्यां सीमनि वृद्धगौतमतनूजातामृतः सर्वतः संपूर्णो निगमागमादिनिपुणैः पद्माह्वयैः संततम्
श्रीमल्लेशकृपाकटाक्षकलनाकाम्नेऽप्रहाराऽभवत्सर्वद्विन्महाप्रहारादितः श्रीकोत्तलङ्कामिधः ॥ ७ ॥

तस्मिन्विश्वजनीनवृत्तिरभवत्संश्रोत्रियः सज्जनैः संख्यावद्भिरधिष्ठितः प्रबलसद्विख्यातवाग्वैभवैः ।
भव्यः श्रीकोडमर्तिनामविदितः कौण्डिन्यगोत्रोदितो वंशः प्रांशुरनारतं प्रबलसद्विद्वत्प्ररोहाश्रयः ॥

तत्र श्रीमति मल्लिकार्जुनबुधः प्रापोदयं भानुवत्संख्यावत्सरसीरुहाणि विकचं प्रापुर्यतः प्रत्यहम् ।
प्रासोष्टायमपत्यसंघमनघं षड्दर्शनव्रातवच्छ्रीमत्प्राणनिलक्ष्यमौलिसदृशः शंभौ परं भक्तिमान् ॥ ९ ॥

षट्शास्त्राध्ययनप्रचारणसमायातप्रतिष्ठाभुवः संसेव्याखिललोकमाद्रविभवाः प्रादुर्बभूवुस्ततः ।
श्रीरामेश्वरपूरुषोत्तमबुधश्रीनारसिंहाभिधश्रीमद्वेङ्कटपद्मनाभविबुधब्रह्माभिधानाः सुताः ॥ १० ॥

तत्र स्वतन्त्रबुधयूथनुतप्रभावः श्रीमद्गिरीशपदपद्मगृहीतस्वभावः ।
वाचामधीश इव दिग्विदितात्मकीर्तिर्ब्रह्माह्वयः समभवन्महितेषु तेषु ॥ ११ ॥

भट्टं भट्टमते गुरुं गुरुमते श्रीशंकरं शांकरे शेषं शेषकृतेऽक्षपादकणभुजावाजानतान्निर्मितौ ।
काव्यं काव्यकलासु नीतिकुशलं नीतौ नये सर्वथः प्राहुर्ज्ञाः सकलागमेषु कुशला यं ब्रह्मविद्वन्मणिम् ॥

सूनुः सूनृतवाग्बृहस्पतिरिव प्राचीनजन्मार्जितात्पुण्याद्पुण्यनुमोदितस्वचरितः शान्तिप्रधानक्रियः ।
श्रीगौरीपतिपादपद्मकरन्दास्वादलुब्धान्तरस्तस्य प्राप्तयशःप्रशस्तिरभितो मल्लेश्वराख्योऽजनि ॥ १३ ॥

सूनुस्तस्य च सांप्रदायिकबुधश्रेणीसमालादितः श्रीमद्गौतमकृष्णजैमिनिफणिग्रन्थाब्धिपारंगतः ।
श्रीमद्रामपदाम्बुजन्मनिहितप्रज्ञः प्रधीश्लाघितः श्रीमान्सर्वजनीनवृत्तिरतुलो गङ्गाधराख्योऽजनि ॥ १४ ॥

तद्गङ्गाधरधीरवर्यतनुभूर्विद्वत्कृपागोचरः श्रीविश्वेश्वरपादपद्मभजनेनावाप्तविद्यः सुधीः ।
श्री आनन्दलहर्यभिख्यभगवत्पादीयदेवीस्तुतेर्व्याख्यानं विदुषां प्रहर्षणकृते निर्मौति कामेश्वरः ॥ १५ ॥

कामदेवकविर्व्याख्यां करोति विदुषां मुदे । अरुणामोदिनीनाम्नीमानन्दलहरीस्तुतेः ॥ १६ ॥

वाणी ममेयमरुणाकरुणाकटाक्षवीक्षाविशिक्षितरसा सरलान्तराणाम् ।
सम्यक्पदार्थपरिशोधविचक्षणानां मोदं दधातु निरसूक्ष्मणवीक्षणानाम् ॥ १७ ॥

व्याख्यानान्यस्य लक्ष्मीधरमुखविबुधैरागमाब्धिप्रवीणैः
प्राचीनैः कल्पितान्यप्यतिकुशलहतेः खेदिताख्यातृमन्ति ।
फल्गून्याचार्यसूत्रोपमपदविवृतौ वाङ्मुखैर्दुर्मुखानी-
त्येवं देवीकटाक्षैर्विवृतिषु यतते प्रेरिता भारती मे ॥ १८ ॥

टङ्कारामसुखप्रबन्धरचितप्रौढावगाहक्षमव्याख्यानाटविसाधुमार्गविरहाद्भ्यासखिन्नान्तरः ।
भक्तत्राणनिकारुणातिकरुणावीक्षाविशेषोदितां प्रेक्षावत्प्रचयः प्रमोदभरितो भूयात्कृतिं वीक्ष्य मे ॥

सूत्रन्यायसुबोधवाक्यविवृतिश्लाघासमुल्लासितप्रौढाचार्यनिगुम्भितागमकृतिव्याख्याविधोद्योगिनः ।
सिद्धश्रीपतिवीरवीक्षणकृपापात्रस्य कानेश्वरी वीक्षाप्रेरणशिक्षितस्य विबुधैर्मैं साहसं क्षम्यताम् ॥ २० ॥

अतोऽत्र वेदकल्पना दवीयसीत्यप्रामाण्यमेव तेषामसन्मूलत्वादिति ॥

तदुक्तं वार्त्तिके— 'शाक्यादयस्तु सर्वत्र कुर्वाणा धर्मदेशनाम्। हेतुजालादिनिर्मुक्ता न कदाचन कुर्वते' ॥ इति ॥

अधिकरणस्य प्रत्यक्षश्रुतिविरुद्धस्मृतीनामविस्रम्भेणानुष्ठानपरत्वाभावलक्षणाप्रामाण्यपरत्वपक्षे प्राग्यदि परात्मीयस्य प्रत्ययस्येत्यादिना प्रवर्तते हेतुदर्शनसूत्रम; आचारयोर्विरोधे दृष्टलोभादिमूलाचारस्यानादरणीयत्वपरं बोध्यम्। स्थूलाधिकरणं हि स्मृतिवदाचारस्यापि वेदमूलत्वेन प्रामाण्यसमर्थनार्थमिति वार्त्तिक एवोक्तम् ॥

शिष्टाकोपाधिकरणम् ॥ ४ ॥

शिष्टाकोपे विरुद्धमिति चेत् ॥ ५ ॥ न शास्त्रपरिमाणत्वात् ॥ ६ ॥ अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् ॥ ७ ॥

॥ जैमिनीयन्यायमाला ॥

आचान्तेनेत्यमा मा वा स्मृतिरेषा न मा भवेत्।
वेदं कृत्वेति यः श्रौतः क्रमस्तेन विरोधतः ॥ १० ॥

आचान्त्यादिः पदार्थोऽत्र क्रमो धर्मः पदार्थगः।
धर्मस्य धर्म्यपेक्षत्वादबाधादस्ति मानता ॥ ११ ॥

शाक्योक्ताहिंसनं धर्मो न वा धर्मः श्रुतत्वतः।
न धर्मो न हि पूतं स्याद्गोक्षीरं श्वदतौ धृतम् ॥ १२ ॥

सदाचारोऽप्रमा मा वा निर्मूलत्वादमानता।
अष्टकादेरिवैतस्य समूलत्वात्प्रमाणता ॥ १३ ॥

INTRODUCTION

Sri Appayya Dikshita, the polyhistor of the sixteenth century was well known to be a great controversialist in all domains of knowledge. The distinguishing mark of Appayya Dikshita's greatness is his supreme and unassailable presentation of his opponent's point of view in the clearest manner possible. And this is achieved in a preeminently high degree in his famous work Caturmatasara or Caturmatasara-sangraha or Caturmatalesasangraha.

2. Caturmatasara contains, in epitome, in four sections, the four schools of Vedanta—the Dvaita, the Visishtadvaita, the Sivadvaita and the Advaita. The work is in the form of a running commentary in prose and verse on the Brahma-Sutras of Badarayana, treated topically under the several adhikaranas. In this work, Appayya Dikshita interprets each school of Vedanta according to the most ardent expounder of that school, without in the least disclosing his own personal inclination.

3. The composition of the Caturmatasara must have been when Sri Appayya Dikshita was the Court-poet of King Chinna Bomma. The introductory verses of the Caturmatasara are as follows :—

'सर्वेषामपि पूजनी सुमनसामभ्याहताज्ञाञ्चिता श्लाघ्यश्लोकपरम्पराधिकरणेष्वासाधितप्रौढिमा ।
एषा मत्कृतिरेधतामनुकलं ब्रह्मप्रतिष्ठापिनी राज्यश्रीरिव चिन्नबोम्मनृपतेराचन्द्रसूर्यं क्षितौ ॥ १ ॥

यन्नानाभाष्यशाखोदितफलवितति: प्रौढनानारसाढ्या यस्मिन् मूले निरूढं फलमधिकतरं स्वादुनारुह्य लभ्यम् ।
यस्य प्रेक्षैव देहद्वयतदनुगतप्रत्यगर्तौ विविङ्क्ते सूत्रात्मा पारिजात: सकलमभिमतं मह्यमर्थं स दद्यात् ॥ २ ॥

आनन्दतीर्थमुनिलक्ष्मणदेशिकेन्द्रश्रीकण्ठयोगिपदवीरदवीयसीर्न: ।
आचार्यपादसरणिं च विविच्य बोद्धुं संगृह्यते मतचतुष्टयसारलेश: ॥ ३ ॥

4. In some places, the Caturmatasara is referred to as Adhikaranasarasangraha also. (See colophons at the end of the printed edition of the Nayamanimala appended to the Sivarkamanidipika edited by Halasyanatha Sastri.) In the list of works of the Dikshita in page 10 of the Introduction to the Sivadvaitanirnaya edited by S. S. Suryanarayana Sastri, (University of Madras) we come across three titles—Adhikaranamala, Adhikaransaravali and Adhikarakuncika. The learned editor adds that the Adhikaranamala might be identical with the Mimamsavisayasangrahadipika—And a work by the latter name has been edited by Dr. T. R. Chintamani and Pandit T. V. Ramachandra Dikshitar in pages 319 to 334 of the Journal of Oriental Research, Madras, Volume IX 1935. This latter work does not deserve the name Adhikaranamala as the treatment of Purvamimamsa herein is by Adhyayas and

Padas and not at all by Adhikaranas. Besides, the above work Purvamimamsa-vishayasangrahadipika, is not an independent work of Appayya Dikshita as the learned editors would have us believe. It is indeed an integral part of the introductory portion of the Sivarkamanidipika of Appayya Dikshita (see page 72–78 of the printed edition of the work—Kumbakonam 1918). The titles Adhikarana Saravali and the Adhikaranamala seem to indicate more explicitly the Caturmatasarasangraha of Appayya Dikshita.

5. It is difficult to lay down definitely whether Appayya Dikshita favours the Sivadvaita of Srikantha or the Advaita of Sankara. On both, he has written standard works–the Sivarkamanidipika on Srikantha Bhashya and the Parimala on the Bhashya-Bhamati Kalpataru. But his opposition to the Dvaita and Visishtadvaita systems is quite pronounced and very definite. His Madhvatantramukhamardana is a highly provocative work criticising the tenets of the Dvaita school in unmistakable terms. In his Ramanujasringabhanga, he controverts the doctrines of Ramanuja with a thoroughness all his own. That such an uncompromising critic should have also written works like the Nyayamuktavali and Nayamayukhamalika which portray the respective systems even better than its own adherents, is proof positive of the genius of the Dikshita who certainly can hold his own and at the same time expound his opponents' point of view in the most unprejudiced and authoritative manner.

6. Each of the sections of the Caturmatasara is known by an individualistic name also. The section on Dvaita is termed Nyayamuktavali and is reported to have been published at Belgaum. The second section is on Ramanuja's system and is called Nayamayukhamalika. It was published at Kumbakonam in 1915; the third section is on Srikantha's system and is called Nayamanimala. It was published by Halasyanatha Sastri from Kumbakonam in 1908. The fourth section is an exposition of Sankara's Advaita system and is called Nayamanjari. It is now published for the first time from a single Ms. belonging to the Tanjore Palace Saraswati Mahal Library, (a transcript of which is now available at the Government Oriental Mss. Library, Madras R. No. 7300).

7. The Nayamanjari is composed fully in verse, each adhikarana of the Brahmasutra being represented by at least two slokas, one putting forth the Purvapaksha and the other the Siddhanta. Sankara's view is closely adhered to and succinctly explained. The distinguishing merit of the Nayamanjari lies in the 386 stanzas of the work being composed in more than 182 different metres, many of which are rare and not easily met with even in standard works. An Alphabetical list of the metres employed is also appended.


Govt. Oriental Mss. Library,
Madras 9—11—1941.

P. P. Subrahmanya Sastri.

॥ श्रीः ॥

श्रीमदप्पयदीक्षितेन्द्रविरचितायाः नयमञ्जर्याः

॥ प्रस्तावना ॥



अयि महीमण्डलमण्डनायमानमहनीयगुणगणाः, निरवधिकसारस्वतसुधापयोधिलहरीविहरणपरायणाः सुधीजनधुरीणाः ! न खल्विदमविदितं नाम स्यात्तत्रभवतां, यदिह वैरिञ्चे प्रपञ्चे सुखप्रेप्सया दुःखपरिजिहीर्षया च समेऽपि खल्वमी प्राणभृतः प्रवर्तन्त इति । प्रवर्तमानाश्च खल्विमे स्वबुद्ध्यैव किमपि किमपि तत्साधनमनुमिमानाः तादृक्साधनसहस्रसंपादनेनापि स्वेप्सितं फलमलभमानाः विषयमृगतृष्णिकास्वेव बहुधा बम्भ्रम्यमाणाः आयासमात्रपर्यवसितसकलकर्माणः परः सहस्रैर्दुःखजालैराहतमर्माणः कुत्राप्यलब्धशर्माणश्च सन्तः कथमपि कीटनाशं नश्यन्त्येवेति च । केचित्तु पुनः प्राक्तनबहुजननसमासादितसद्वासनाद्रढिमानः समाश्रितसदसद्विवेकगरिमाणश्च परिणतप्रज्ञाः पुरुषप्रवराः स्वबुद्धिमात्रपरिकल्पितसाधनानां स्वसमीहितसुखसंपादनानौपयिकतां अन्वयव्यतिरेकाभ्यां बोधं बोधं अलौकिकं किमपि तत्साधनं स्यादेवेति संभाव्य तद्बोधकं प्रमाणं किं नु नाम स्यादिति सुनिपुणमन्विष्यन्ति । तादृशान् सफलजन्मनः पुरुषधौरेयानधिकृत्यैव तत्तदधिकारानुरूपं कर्मोपासनज्ञानाख्यकाण्डत्रितयमण्डिता प्रववृते भगवती श्रुतिः । तस्याश्च यथायथमाशयमवगन्तुं न तावदैदंयुगीनाः प्रभविष्यन्तीति पर्यालोच्यैव महामुनिर्जैमिनिः सहस्राधिकरणपरिकर्मितां कर्मकाण्डविचारात्मिकां द्वादशलक्षणीं मीमांसां प्राणिनाय । तथा संकर्षनाम्ना प्रथितां परिशिष्टधर्मजिज्ञासारूपां चतुर्लक्षणीमपि संजग्रन्थ । अवशिष्टयोरुपासनाज्ञानकाण्डयोरैदंपर्यमवबोधयितुमेव भगवान्बादरायणो द्विनवत्युत्तरशताधिकरणात्मिकां चतुर्लक्षणीं ब्रह्ममीमांसां उपनिबबन्ध । तादित्थं जैमिनिकृतषोडशलक्षण्या सह व्यासकृतचतुर्लक्षण्याः समावेशने विंशतिलक्षणी मीमांसा पर्यवस्यति ॥

अस्याश्च विंशतिलक्षण्याः एकशास्त्रत्वं वा भिन्नशास्त्रत्वं वा इति विधिकित्सायां केचित् प्रथमां कोटिमवलम्ब्यैव स्वसिद्धान्तं समर्थयन्ति । तथा हि— अधीतसकलसाङ्गस्वाध्यायानामेव वेदार्थविचारे अधिकार इति हि सर्वसंप्रतिपन्नोऽयमर्थः । न हि मूलग्रन्थपरिशीलनमन्तरा व्याख्या-

गतविचारधारा क्वचिदास्पदं लभेत । विचाररूपपूर्वोत्तरमीमांसात्मकविंशतिलक्षण्यश्च मूलं सर्वप्रमाणमूर्धाभिषिक्ता सोपनिषत्का भगवती श्रुतिरेव । अत एव हि खलु अधुनाऽवधि वेदाध्येतारः सर्वे सोपनिषत्कां समग्रां तत्तच्छाखां अधीत्यैव स्वाध्यायं परिसमाप्तं मन्यन्ते । अन्यथा हि कर्मविचारात्मकषोडशलक्षण्याः मूलभूतां कर्मकाण्डात्मिकां श्रुतिमेव उपनिषद्भजं अधीयीरन्नध्येतारः, उपनिषद्विचारात्मकशास्त्रस्य हि तन्मतरीत्या भिन्नप्रस्थानतया तन्मूलभूतानां उपनिषदां अध्ययनस्य तदानीमप्राप्तावसरत्वादिति । न हि पाणिनीयव्याकरणमध्येष्यमाणः प्रेक्षावान् तच्छास्त्रमूलभूतपाणिनीयसूत्राणीव तत्कालानुपस्थितत्वानुद्दिष्टयोगशास्त्रमूलभूतयोगसूत्राण्यपि तदात्व एव स्वयमधीयीत । अधीयानो वा न हि साकल्यमश्नुवीत । योगशास्त्रविचारस्य तदानीमप्राप्तावसरत्वात् । तथैव तुल्ययुक्त्या पूर्वमीमांसामूलभूतकर्मकाण्डात्मकवेदभागाध्ययनस्य तदर्थविचारमात्रप्रयुक्तत्वादुपनिषदर्थविचारस्य च तदानीमप्राप्तावसरतया तादृगुपनिषद्भागाध्ययनमेव तदा न कर्तव्यं स्यात् । तदित्थं विंशतिलक्षण्याः एकपुरुषाध्येतव्यताप्रयुक्तमेकशास्त्रत्वं दुर्निवारमेव । यदि हि पूर्वोत्तरमीमांसयोर्भिन्नशास्त्रता स्यात् तर्हि पूर्वमीमांसामूलभूतकर्मकाण्डाध्ययनमेकेन कर्तव्यं स्यात्, उत्तरमीमांसामूलभूतज्ञानकाण्डात्मकोपनिषद्भागाध्ययनमपरेण च कर्तव्यं स्यात् । न तु तथा दृश्यते । न खलु तादृशः कश्चिदध्येता वा अध्यापयिता वा क्वचिदुपलभ्यते, यः किल उपनिषद्भजं अपरानेव वेदभागानधीयीत अध्यापयेद्वा । तस्मात् सोपनिषत्कसमस्तवेदस्यैव सर्वत्र अधीयमानत्वान्यथानुपपत्त्या तावदर्थविचारात्मिका विंशतिलक्षणी मीमांसा एकमेव शास्त्रमिति निश्चीयते ॥

तर्हि 'अथातो धर्मजिज्ञासा' 'अथातो ब्रह्मजिज्ञासा' इति च भिन्नशास्त्रतासूचकं प्रतिज्ञावैलक्षण्यं शास्त्रारम्भे कथमुपपद्यते इति चेत्, अत्र वदन्ति । न हि प्रतिज्ञावैलक्षण्यमात्रं शास्त्रभेदे प्रयोजकं, महाप्रतिज्ञावैलक्षण्यस्यैव शास्त्रभेदप्रयोजकत्वात् । अवान्तरविषयभेदनिरूपणार्थमपि अथातःशब्दयोः प्रयोगदर्शनेन 'अथातो ब्रह्मजिज्ञासा' इत्यस्य अवान्तरप्रतिज्ञात्वेऽपि बाधकाभावात् । अत एव तृतीयाध्यायारम्भे 'अथातः शेषलक्षणम्' इति सूत्रं अवान्तरप्रतिज्ञापरतया समर्थयति । 'द्विलक्षण्याः परं शिष्टं यावत्किंचन लक्षणम् । तत्सर्वं वक्तुमारब्धमथातः शेषलक्षणम् ॥' इति हि तद्विवरणं दृश्यते । इत्थमेव 'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' इत्यादिकमपि अवान्तरप्रतिज्ञापरं सूत्रजातं भूयसा प्रवृत्तमिति नेयमदृष्टचरी रीतिः । तथैव तुल्ययुक्त्या 'अथातो ब्रह्मजिज्ञासा' इत्यपि प्रतिज्ञा अवान्तरार्थविषयिणी कुतो नाम न स्यात् ? अतः प्रतिज्ञावैलक्षण्यं न शास्त्रभेदे तावत्प्रयोजकं स्यात् ॥

ननु माऽस्तु प्रतिज्ञावैलक्षण्यं तत्र प्रयोजकं; कर्तृभेदस्तु शास्त्रभेदे प्रयोजकः स्यादेव । न च कादम्बर्यादिषु कर्तृभेदेऽपि ग्रन्थैक्यमेव दृष्टमिति तथैव व्यासजैमिनिरूपकर्तृभेदेऽपि एकग्रन्थत्वमत्राप्यस्तु इति वाच्यम्, कादम्बर्यादिषु ग्रन्थकर्तुस्तत्परिशिष्टकर्तुश्च विरुद्धसिद्धान्ताभिनिवेशाभावात् । इह तु जैमिनिव्यासयोर्विरुद्धसिद्धान्ताभिनिवेशित्वं स्फुटतरमुपलक्ष्यते । तथा हि— 'शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः' इति सूत्रे कर्तृतया मूलकारेण एवाङ्गीकृतेन

अकर्तृब्रह्मस्वरूपमेव जैमिनिरपलपतीयवगम्यते । व्यासाचार्यस्तु 'अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्' इति सूत्रानुसारेण अकर्मशेषं स्वतन्त्रं च ब्रह्मस्वरूपमङ्गीकरोतीत्येव प्रतीयते । तथा 'परामर्शं जैमिनिरचोदना चापवदति हि' इति सूत्रेण जैमिनिना संन्यासापलापे कृते 'अनुष्ठेयं बादरायणः साम्यश्रुतेः' इति सूत्रेण व्यासाचार्यस्तमङ्गीकरोति । ततश्च ब्रह्मसंन्यासापलापितदङ्गीकर्तृभ्यां जैमिनिव्यासाचार्याभ्यां प्रणीतयोर्ग्रन्थयोः कथमेकप्रबन्धता स्यादिति चेत्, अत्र वदन्ति— विरुद्धमताभिनिविष्टपुरुषप्रणीतत्वमात्रेण नैकप्रबन्धतायां कश्चन विरोधः स्यात् । विरुद्धसिद्धान्ताभिनिवेशिनामपि कस्मिंश्चित्सन्दर्भे केनापि निमित्तेन समभिवन्धपूर्वकं एकग्रन्थनिर्मातृत्वस्यापि संभवात् । दृश्यते हि वामनजयादित्ययोः विरुद्धसिद्धान्ताभिनिवेशित्वेऽपि काशिकाख्यैकनिबन्धनिर्मातृत्वम् ॥

ननु वामनजयादित्ययोः विरुद्धसिद्धान्ताभिनिवेशित्वेऽपि तत्कृतनिबन्धे न तावत् दृश्यते विरोधः; पूर्वोत्तरमीमांसयोस्तु सिद्धान्तांशेऽपि भूयान् विरोधो दृश्यत एव । तथा हि— जैमिनिना 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इति सूत्रेण अक्रियार्थकवाक्यानां अप्रामाण्यमाशङ्क्य 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः' इति सूत्रेण तादृशवाक्यानां विधिस्तावकत्वेन विधिशेषतां प्रापय्य तत्प्रामाण्यं समर्थितम् । भगवता व्यासेन तु 'शास्त्रयोनित्वात्' इति सूत्रेण अक्रियार्थस्यापि ब्रह्मणः वेदैकगम्यत्वप्रतिपादनेन तादृशसिद्धवस्तुबोधकवाक्यानामपि प्रामाण्यं उररीकृतम् । 'तत्तु समन्वयात्' इति सूत्रेण च विधिशेषत्ववादं प्रतिक्षिप्य अक्रियार्थस्यापि ब्रह्मणः स्वातन्त्र्येणैव शास्त्रप्रमाणकत्वं प्रतिष्ठापितम् । इत्थमेव पूर्वतन्त्रे जैमिनिना 'देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात्' इति सूत्रेण देवतानिराकरणेऽपि ब्रह्ममीमांसायाम् 'तदुपर्यपि बादरायणः संभवात्' इति सूत्रेण मन्त्रार्थवादादिप्रामाण्यान्यथानुपपत्त्या देवताविग्रहादिसत्त्वमपि सोपपत्तिकमेव समर्थ्यते। ब्रह्मसंन्यासस्वीकारतदपलापौ तु पूर्वमेव प्रतिपादितौ । तथा च निबन्धतोऽपि तत्र तत्र दृश्यमानं विरोधजातं कथमिव परिहरेयाः इति चेत्, अत्रायमस्त्युपायस्तत्परिहरणे । 'अथातो धर्मजिज्ञासा' इति हि प्रतिज्ञा विंशतिलक्षणीसाधारणी इत्येवाङ्गीकुर्मः । तेन हि अध्ययनगृहीतस्य सोपनिषत्कस्य कृत्स्नस्यैव वेदस्य अर्थविचारः प्रतिज्ञातो भवति । अत्र हि अथशब्देन कृत्स्नवेदाध्ययनानन्तर्यमभिधीयते । अतःशब्देन च कृत्स्नस्य वेदराशेर्विवक्षितार्थत्वमुच्यते । तदानुगुण्येन च धर्मशब्दः कृत्स्नवेदार्थपरः इत्येव अवसीयते । कृत्स्नवेदाध्ययनानन्तरं कृत्स्नवेदार्थविचारकर्तव्यता हि औचित्येन प्राप्तावसरा स्यात् । ततश्च कृत्स्नवेदाध्ययनानन्तरं तस्य विवक्षितार्थकत्वात् तादृशवेदार्थविचारः कर्तव्यः इति सूत्रार्थः फलति । ततश्च यो यो वेदविवक्षितार्थः स स विचारणीयः इति सिद्धौ तुल्ययुक्त्या ब्रह्मणोऽपि वेदार्थतया तद्विचारोऽपि अनयैव प्रतिज्ञया क्रोडीकरिष्यते । 'चोदनालक्षणोऽर्थो धर्मः' इति द्वितीयसूत्रेऽपि चोदनाशब्देन अज्ञातज्ञापकसकलवेदवाक्यानामपि परामर्शात् ब्रह्मप्रतिपादकवाक्यानामपि प्रामाण्यं दुरपह्नवमेव । 'अथातो ब्रह्मजिज्ञासा' इति सूत्रमपि 'अथातः कर्त्वर्थपुरुषार्थयोर्जिज्ञासा' इतिवत् अवान्तरप्रतिज्ञारूपतयाऽपि योजयितुं शक्यमेव । इत्थं विंशतिलक्षण्याः एकशास्त्रत्वाङ्गीकारे सत्येव अधीतकृत्स्नवेदाः पुरुष-

धौरेयाः तदर्थविचारे प्रवर्तेरन् । अन्यथा ब्रह्ममीमांसायाः शास्त्रान्तरत्वे ब्रह्मविचारैषिणामस्माकं किं कर्मकाण्डाध्ययनेन इति कर्मकाण्डाध्ययनमवधूय उपनिषदध्ययनमात्रे प्रवर्तेरन् । तथा च कालक्रमेण अध्ययनसंप्रदायस्यैव उच्छेदप्रसङ्गः स्यात् । तत्परिहाराय कृत्स्नवेदाध्येतुरेव वेदार्थसामान्यविचारे अधिकारः इति नियमे एव वेदप्रामाण्यवादिभिरास्थेयः, अन्यथा स्वाध्यायोऽध्येतव्यः इति विधिवाक्यस्यैव अननुष्ठापकत्वबलक्षणाप्रामाण्यप्रसङ्गात् ॥

विंशतिलक्षण्याः एकशास्त्रत्वस्वीकारे तु सर्वमिदं संगतं भवतीति तत्स्वीकारे औचित्यावर्जिते निर्णीते च सति तन्निर्मात्रोर्वा निबन्धयोर्वा क्वाचित्कः काश्चिदाशयविरोधो दृश्यते चेत् सोऽपि यथाकथंचिदविरोधसमर्थनद्वारा परिहरणीय एव । अत एव हि पशुहिंसायाः पुरुषदोषबहुत्वेऽपि क्रतूपकारकतया महाफलप्राप्तिहेतुत्वेन तत्र प्रवर्तमाना याज्ञिकाः तादृशमल्पीयांसं दोषं सहमाना एव ज्योतिष्टोमादौ प्रयतन्ते । अत एवाहुर्वाचस्पतिमिश्राः— 'मृष्यन्ते हि पुण्यसंभारोपनीतस्वर्गसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकाम्' इत्यादि, 'हिंसा हि पुरुषस्य दोषमावक्ष्यति क्रतोश्च उपकरिष्यति' इति च । तथा प्रकृतेऽपि व्यासजैमिनिवचनयोः क्वाचित्कविरोधे सत्यपि पूर्वोक्तमहाफलपरिपालनाय सोऽपि मह्य एव । तदविरोधोऽपि कथंचिदुपपादनीय एव । न चानयोरविरोध एव सर्वथा दुरुपपाद इति शङ्क्यं, तस्यापि कथंचिदुपपादनसंभवात् ॥

तथा हि— जैमिनिमुनेः जीवातिरिक्तब्रह्मस्वरूपापलापे वा तज्ज्ञानाङ्गभूतसंन्यासनिराकरणे वा न तात्पर्यम्, परं तु अधिकारिभेदेन तदुभयव्यवस्थापन एव । कर्माधिकारिणां हि अकर्तृब्रह्मात्मत्वावगमे कर्मप्रवृत्तिरेव कुण्ठिता स्यात् । अत एवाह स्म भगवान् भाष्यकारः 'शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वा आत्मनः परलोकसंबन्धं अधिक्रियते, तथाऽपि न वेदान्तवेद्यं अशनायाद्यतीतं अपेतब्रह्मक्षत्रादिभेदं असंसारि आत्मतत्त्वं आधिकारे अपेक्ष्यते अनुपयोगात् अधिकारविरोधाच्च' इति । तथा च कर्माधिकारिणामपि अकर्त्रात्मज्ञाने सति कर्ममार्ग एव व्युच्छिन्नः स्यादित्यालोच्यैव जैमिनिः तादृशमन्दाधिकारिणामनुजिघृक्षया स्वानभिमतमपि ब्रह्मनास्तिकत्वाभिनिनाय, कर्तारमेवात्मानमुपदिदेश; मन्दाधिकारिणां हि मुख्याधिकारियोग्यमात्मतत्त्वोपदेशकरणं अनर्थायैव कल्पेतेति । अत एवाहुरभियुक्ताः— 'अज्ञस्यार्थप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत् । महानरकजालेषु तेन वै स प्रवेशितः ॥' इति । 'न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् ।' इति च । इत्थं ब्रह्मज्ञानानधिकारिणां अविशुद्धचित्तानां अज्ञानतो वा आलस्यतो वा संन्यासधर्मं जिघृक्षतां उभयतो भ्रंशो मा भूदित्यभिप्रेत्यैव संन्यासमेव सर्वात्मना स्वयमपललाप । 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' इति हि मन्दाधिकारिणं प्रति मातेव श्रुतिरुपदिशति । तर्हि वस्तुतः अकर्त्रात्मसत्त्वं जैमिनिरङ्गीकरोतीत्यत्र किं प्रमाणमिति चेत् तदिदं तदीयवार्तिककृतैव स्फुटतरं निरटङ्कि । तथा चाह वार्तिककारः— 'इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या । दृढत्वमेतद्विषयश्च बोधः प्रयाति वेदान्तनिषेवणेन ॥' इति । वार्तिककारो ह्येवमभिधत्ते—जैमिनिना-

क्रियमाणं कर्त्रात्मप्रतिपादनं सर्वं देहात्मत्वादक्षणिकात्मवादादिनास्तिकवादनिरासिकीर्षयैव प्रावर्तिष्ट। आत्मयाथात्म्यज्ञानं तु उपनिषदर्थविचारात्मकशास्त्रभागेनैव तदधिकारिणं प्रति प्रक्रंस्यत इति 'किमार्द्रकवणिजो वहित्रचिन्तया' इति न्यायेन कर्मकाण्डविचारसंदर्भे तान्निरूपणं अप्राप्तावसरमेवेति ॥

ननु तर्हि विंशतिलक्षण्यात्मकेऽस्मिन्नेकशास्त्रे किमधिकारिणो नानाविधा भवन्ति? एकस्मिन् हि शास्त्रे एकरूप एवाधिकारी वक्तव्य इति हि शास्त्रविदां समयः। तथा च यो यः अधीतसकलसाङ्गस्वाध्यायः स सर्वोऽपि कृत्स्नशास्त्रविचारेऽप्यधिकृत इत्येव वक्तव्यतया तदन्तर्गतज्ञानकाण्डविचाराधिकारी ततो भिन्न इति कथमिदं संगतं स्यादेकशास्त्रतावादे इति चेत्, नायं दोषः; औत्सर्गिकतया अधीतसकलस्वाध्याय एव विंशतिलक्षण्यात्मकेऽस्मिन् शास्त्रे अधिकारी इति हि सत्यमङ्गीकुर्मः, तथाऽपि नित्यानित्यविवेकादिसाधनचतुष्टयसंपत्तिरपि यत्र अधिकतया वर्तते तस्यैव उपनिषदर्थविचारे मुख्याधिकारित्वमिति विशेषनियमाङ्गीकारे को नामात्र दोषः प्रादुःष्यात्? अयमेवात्र दोषः, यत् एकस्मिन्नेव शास्त्रे नानाधिकारिकल्पनं इति चेत्, तदिदं भवतामपि अवर्जनीयमेवेति न दोषकोटिमनुप्रवेष्टुमीष्टे; एकस्मिन्नेव शास्त्रे अधिकारितारतम्यानुसारेण तत्त्वबोधनप्रक्रियायाः भिन्नशास्त्रतावादेऽपि भूयिष्ठमुपलम्भात्। अत एव हि भगवान् बादरायणः 'भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्' इति सूत्रे भोक्तृभोग्यादीनामविभागप्राप्तिदोषपरिहारावसरे 'स्याल्लोकवत्' इति सूत्रांशेन समुद्रफेनवीचीबरङ्गदृष्टान्तमवलम्ब्य परिणामवादानुसारेणैव प्रागुक्तामापत्तिं परिजहार। स चायं परिहारो मन्दाधिकारिविषय एवेत्यभिसंधायैव पुनश्च मुख्याधिकारिविषये विवर्तवादसिद्धान्तमवलम्ब्यैव 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इत्यादिना तामेनामापत्तिं परिजहे। तदिदं भाष्यकारैरेव स्फुटीकृतम् 'अभ्युपगम्य चेमं भोक्तृभोग्यलक्षणं विभागं स्याल्लोकवदिति परिहारोऽभिहितः, न त्वयं विभागः परमार्थतोऽस्ति' इत्यादिना। तथा च एकस्मिन्नेव शास्त्रे एकस्या एवाशङ्कायाः परिहारावसरे मन्दाधिकारिणं प्रति परिणामवादेन, मुख्याधिकारिणं प्रति विवर्तवादेन च, परिहारसरणिः प्रादर्शीति एकस्मिन्नेव शास्त्रे अधिकारिभेदाश्रयणं भिन्नशास्त्रतावादिनामपि अवर्जनीयमेव। अत एवाहुः सर्वज्ञात्मश्रीचरणाः— 'कृपणधीः परिणाममुदीक्षते क्षपितकल्मषधीस्तु विवर्तताम्' इति। ततश्च अधीतसाङ्गस्वाध्यायानां अधिकारिणां सामान्यतः एकरूपत्वेऽपि विवेकित्वविरक्तत्वादिविशेषधर्मसमावेशेन अधिकारिषु दृश्यमानोऽवान्तरभेदो न सामान्यनियमं विरुणद्धि इत्येव सर्वैरङ्गीकर्तव्यतया वार्तिककृतो वेदान्तविचाराधिकारिणां पृथक्करणं विंशतिलक्षण्याः न भिन्नशास्त्रतामापादयितुमलम्। अन्यथा भोक्त्रापत्तिसूत्रे तदनन्यत्वसूत्रे च अधिकारिभेदमवलम्ब्य परिहारकरणात् वेदान्तशास्त्रस्यापि भिन्नशास्त्रतापातादिति ॥

अपि च देवताविग्रहादिकमपि जैमिनिमुनेः नात्यन्तमनभिमतमिति तदीयैरेव वचनैरुन्नीयते। 'न देवानां देवतान्तराभावात्' इति हि वचनेन देवतोद्देश्यकद्रव्यत्यागरूपे यागे देवतानां नास्त्यधिकारः स्वोद्देश्यदेवतान्तराभावात् इति कर्मणि देवानामधिकारमपवदता जैमिनिना देवतानां विग्रहवत्त्वमर्थात्स्वीकृतमेवेत्यनुमीयते। अन्यथा देवतानां विग्रहवत्त्वाभावरूपहेतुनैव

अधिकाराभावे उपपादयितुं शक्ये किमिति देवतान्तराभावो हेतूकरणीयः स्यादिति । तथा च 'देवता वा प्रयोजयेत्' इत्याद्यधिकरणं अपूर्वमेव धर्माणां प्रयोजकं न देवता, उद्देश्यकारकत्वेन तस्या उपसर्जनत्वादित्येवंपरतया नेतव्यमिति नायमपि विरोधः शास्त्रभेदप्रयोजकः ॥

किं च, अक्रियार्थानामानर्थक्यवादिनो जैमिनेः, सिद्धपदार्थब्रह्मणो वेदैकमेयत्वं ब्रुवतो व्यासाचार्यस्य च, योऽयं विरोधः प्रागुदभावि सोऽपि सुपरिहर एव । जैमिनिः खलु 'वायव्यं श्वेतमालभेत' इत्यादिविधिवाक्यसमभिव्याहृतानां 'वायुर्वै क्षेपिष्ठा' इत्याद्यर्थवादवाक्यानामेव सिद्धार्थपरतया भासमानानामप्रामाण्यमाशङ्क्य 'विधिना त्वेकवाक्यत्वात्' इति सूत्रेण तेषामेव विधेयस्तावकतया प्रामाण्यं प्रतिपादयतीति नैतत् ब्रह्मणः शास्त्रैकमेयत्वसमर्थकाभ्याम् 'शास्त्रयोनित्वात्' 'तत्तु समन्वयात्' इति सूत्राभ्यां विरुध्यते । अनधिगताबाधितप्रयोजनवदर्थबोधकानां वेदान्तानां अर्थवादविलक्षणत्वेन तत्र आनर्थक्यशङ्काऽनवकाशात् । तदित्थं विंशतिलक्षण्या एकशास्त्रत्वाङ्गीकारे बाधकाभावात् भिन्नशास्त्रताकल्पनं तत्र न शोभनम् ॥

सिद्धे चैकशास्त्रत्वे तदधिकारिणोऽप्येकत्वमर्थसिद्धमेव । तथा च पूर्वोत्तरमीमांसयोरेककर्तृकत्वे सिद्धे युगपदेव तयोरध्ययनस्य कर्तुमशक्यतया कश्चन क्रमः कल्पनीयः । ततश्च यथा अग्निहोत्रं जुहोति, यवागूं पचति इत्यत्र पूर्वं यवागूपाकः ततोऽग्निहोत्रहोमः इति आर्थिकः कश्चन क्रमः समाश्रीयते, यवागूपाकं विना द्रव्यासिद्ध्या होमस्यैव अनिष्पत्तेः, तथा उत्तरमीमांसायाः पूर्वमीमांसासापेक्षत्वात् पूर्वमीमांसैव प्रथममध्येतव्या, ततःपरमेवोत्तरमीमांसा इति क्रमः प्राप्नोति । तथा वेदपाठक्रमेणैव तदर्थविचारक्रमस्यापि न्यायतः प्राप्तत्वात् पूर्वोक्तरीत्यैव क्रमसमाश्रयणं युक्तम् । तस्मात् विंशतिलक्षणीं मीमांसां अधिजिगीषुणा अधिकारिणा कर्मविचारं परिसमाप्य ततःपरमेव ब्रह्मविचारः करणीय इति क्रमकल्पने विरोधाभावात् विंशतिलक्षण्या एकशास्त्रत्वमव्याहतमेवेति ॥

अत्रोच्यते– विंशतिलक्षणी मीमांसा यदि एकशास्त्रं स्यात् तर्हि 'अथातो धर्मजिज्ञासा' इत्यारभ्य 'अनावृत्तिः शब्दात्' इत्यन्तं एकं वाक्यं इत्येव वक्तव्यं स्यात् । तत्तु न संभवति, अर्थैकत्वाभावात् । अर्थैकत्वं हि एकवाक्यतायां प्रयोजकमिति निर्णीतं पूर्वतन्त्रे 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' इति सूत्रेण । अत्र च भूयानर्थभेद एव संलक्ष्यते । तथा हि— अर्थशब्दोऽयं यदि प्रयोजनपरः, यदि वा प्रतिपाद्यवस्तुपरः उभयथाऽपि तद्भेदो दृश्यत एव पूर्वोत्तरमीमांसयोः । धर्मजिज्ञासायाः प्रयोजनं अनित्यमभ्युदयरूपमेव ; ब्रह्मजिज्ञासायास्तु नित्यं निःश्रेयसमिति फलतो भेदः । तथा जिज्ञास्यधर्मस्य पुरुषव्यापारनिष्पाद्यतया अनित्यत्वात् ब्रह्मणस्तु अपुरुषतन्त्रतया नित्यत्वाच्च विषयतोऽप्यस्ति भूयान्भेदः । तथा अधिकारिभेदोऽपि स्पष्ट एव, अर्थित्वसमर्थत्वादेरेव कर्माधिकारप्रयोजकत्वात् विवेकवैराग्यशमदमादेरेव ब्रह्मविद्याधिकारप्रयोजकत्वात् । तदित्थं भूयो भेदे विद्यमानेऽपि कथमल्पीयसा युक्तिशकलेन तदेकशास्त्रत्वं वक्तुमुचितम् ? अर्थभेदो ह्ययं वाक्यभेदप्रयोजकः सन् एकवाक्यताभङ्गेन शास्त्रमपि भिनत्तीत्येव कल्पनीयत्वात् । न च कर्मब्रह्मरूपावान्तरार्थभेदे सत्यपि वेदार्थत्वेन तयोरेकरूपत्वात् एकवाक्यतानिर्वाहः स्यादेवेति वाच्यं, तादृशैकवाक्यताग्राहकप्रमाणाभावात् ॥

तथा विंशतिलक्षण्या एकशास्त्रतानिर्वाहाय 'चोदनालक्षणोऽर्थो धर्मः' इत्यत्र चोदनापदस्य अज्ञातज्ञापकवाक्यमात्रपरत्वं यदुक्तं तदपि न समञ्जसम्, 'चोदना चोपदेशश्च विधिश्चैकार्थवाचकः' इति विधिपदसमानार्थकतयैव तस्य अभियुक्तैर्व्यवहारात्। विधिपदस्य च कार्यपरतायाः सर्वसंप्रतिपन्नत्वात्। ततश्च चोदनासूत्रानुसारेण प्रथमसूत्रस्थ धर्मशब्दस्य ज्योतिष्टोमादिपरत्वनिर्णयात् तस्य ब्रह्मसाधारणवेदार्थपरत्वाङ्गीकारो निर्युक्तिक एव। यच्चोक्तम् 'आम्नायस्य क्रियार्थत्वात्' इत्यादिसूत्रं अर्थवादवाक्यमात्रविषयकमेवेति तदपि न विचारसहम्, अक्रियार्थानां इति पदस्य वेदान्तर्गतसिद्धवस्तुप्रतिपादककृत्स्नवाक्यसाधारणतायाः एव न्यायतः प्राप्तत्वात्। न च वेदान्तानां फलवदर्थपरत्वात् अर्थवादवैलक्षण्येन आम्नायस्येत्यादिपूर्वपक्षसूत्रे वा सिद्धान्तसूत्रे वा ग्रहणं न युक्तमिति वाच्यम्, वेदान्तवाक्यानामपि जैमिनिना अर्थवादसमानस्कन्धत्वाङ्गीकारात्। यदि जैमिनिना वेदान्तवाक्यानामानर्थक्यं नाङ्गीकृतं स्यात् तर्हि 'तत्तु समन्वयात्' इति सूत्रमेव अनुत्थितिपराहतं स्यात्, तत्सूत्रपरिहरणीयपूर्वपक्षस्यैव तदानीमलब्धावकाशत्वप्रसङ्गात्। तस्मात् नेदमपि एकशास्त्रतावादे अनुकूलं स्यात्। यच्च ब्रह्मसंन्यासापलापिनोऽपि जैमिनेः तदङ्गीकारे तात्पर्यकल्पनं तदपि साहसमात्रमेव। जैमिनिः बादरायणः इति पूर्वपक्षसिद्धान्तयोः नामनिर्देशपूर्वकं तयोर्मतभेदनिरूपणेन तयोराशयविरोधे स्पष्टं जागरूके सति तदविरोधकल्पनस्य आवेश्वसनीयत्वात्। तथा जैमिनेर्देवताविग्रहाङ्गीकर्तृत्वकल्पनमपि न शोभनम्, प्रत्यक्षमेव देवताविग्रहनिराकरणे क्रियमाणे अनुमानविधया तत्र देवताङ्गीकारसमर्थनस्यानुचितत्वात्, चतुर्थ्यन्तशब्दस्यैव देवतात्वमिति जैमिनिसिद्धान्ताच्च॥

यत्पुनः साङ्गवेदाध्येतृणामेव वेदान्तविचारे अधिकारं नियमयितुं विंशतिलक्षण्याः एकशास्त्रत्वाङ्गीकार इति युक्तिकल्पनम्, तदिदं स्वबुद्धिमात्रविजृम्भितमेवेति नैव प्रमाणपथमवगाहेत। न च तथा सति अनधीतकर्मकाण्डानां उपनिषन्मात्राधीतिनामपि उपनिषदर्थविचारे प्रवृत्तिः स्यादिति वाच्यम्, तादृशप्रवृत्तिवारणाय प्रमाणान्तरस्यैव गवेषणीयत्वात्। 'योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्। स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥' इति हि मानवे वचने अनधीतवेदानां शूद्रतुल्यताभिधानात् तादृशानां उपनिषन्मात्राधीतिनामपि तदर्थविचारे मुख्याधिकाराभावव्यवस्थोपपादनसंभवात्। ननु उपनिषदर्थविचारे उपनिषन्मात्राध्ययनमेव प्रयोजकं वाच्यं कर्मकाण्डस्य तु तदर्थविचारे अनुपयोगितया कर्मकाण्डाध्ययनस्य निरर्थकत्वात् इति चेत्, मैवं, अधीतसोपनिषत्कसकलस्वाध्यायस्यैव वेदान्तविचारे मुख्याधिकार इत्येव सिद्धान्ताङ्गीकारात्। तथा हि—कर्मकाण्डाध्ययनं वा ज्ञानकाण्डाध्ययनं वा सर्वमपि 'स्वाध्यायोऽध्येतव्यः' इति विधिमूलकमेव। न हि खलु उपनिषन्मात्राध्ययनविधायकः कश्चन विधिरुपलभ्यते, येन तावन्मात्राध्येतुरपि तदर्थविचारे मुख्याधिकारित्वकल्पना संभाव्येत। न च उपनिषदोऽपि स्वशाखान्तर्गतत्वात् तदध्ययनमात्रेणापि स्वाध्यायविधिरर्थवान् स्यादिति वाच्यम्, तथा सति गायत्र्या अपि वेदान्तर्गतत्वेन तदध्ययनमात्रेणापि स्वाध्यायविधिसार्थक्यापातात्, गायत्रीमात्राधीतिनामपि वेदाध्येतृत्वव्यवहारापत्तेश्च॥

ननु केवलवेदाध्येतृणां सर्ववेदपाठनियमेऽपि उपनिषदर्थजिज्ञासूनां उपनिषन्मात्राध्ययने को दोषः स्यादिति चेत्, न कोऽपि दोषः; स्वाध्यायविधिमूलकत्वं परं तत्र नाङ्गीकर्तुं शक्यमिति तं

प्रति तस्य नैरर्थक्यमेव । स्वाध्यायोऽध्येतव्यः इति विधिना क्रमविशेषविशिष्टमक्षरराशिं स्वाध्याय-शब्दवाच्यं अधीयीत इति विधानात् तस्य व्युत्क्रमेण वा क्रमान्तरेण वा अन्यथा वा अध्ययने क्रियमाणे स्वाध्यायाध्ययनत्वाभावात् । स्वाध्यायाख्यस्य अक्षरराशेर्यादृगानुपूर्वीविशिष्टत्वं तादृश-क्रमेण अध्ययने कृते सत्येव स्वाध्यायविधिसार्थक्यसंभवात् । यद्यपि उपयुक्तवेदभागाध्ययनेऽपि काचिदानुपूर्वी अस्त्येव, तथाऽपि न स्वाध्यायविधिविवक्षितसमग्रानुपूर्वीकत्वं तत्र संभवतीति तादृ-गध्ययनस्य गौणत्वात् न स्वाध्यायापूर्वनिष्पादनक्षमत्वम् । न ह्येतत् स्वाध्यायाध्ययनं नाम कामि-नीवर्णनपरकाव्यग्रन्थाध्ययनसमानं वक्तुं शक्यं येन काव्यग्रन्थस्य क्रमानपेक्षयैव स्वेच्छया अध्ययन-वत् यत्किंचिद्भागमात्राध्ययनेनापि स्वाध्यायविधेश्चारितार्थ्यं स्यात् । तस्मात् उपयुक्तवेदाध्ययनरीत्या उपनिषन्मात्रमधीतवतामपि उपनिषदर्थविचारात्मकब्रह्ममीमांसायां मुख्याधिकारालाभात् गौणाधि-कारित्वमेव सर्वथा एष्टव्यम् । तर्हि तुल्यन्यायेन चतुर्वेदविदामेव मुख्याधिकारः ततो न्यूनानां एकवेदविदां एकशाखामात्राधीतिनां वा गौणाधिकारः इत्येव प्राप्नोति इति चेन्नैवम्, स्वाध्यायो-ऽध्येतव्यः इति विधिना यथाऽऽनुपूर्वीकं समग्रस्वशाखाध्ययनस्यैव विहितत्वात्, इतरवेदाध्ययनस्य वा इतरशाखाध्ययनस्य वा ऐच्छिकत्वेन तदकरणेऽपि प्रत्यवायाभावात् । अत एव स्वशाखामनधीत्य परशाखामात्राध्येतुः शाखारण्डत्वदोषमप्यामनन्ति स्मृतिकाराः । तस्मादधीतसमग्रस्वशाखस्य साधन-चतुष्टयसंपन्नस्य ब्रह्मविचारे मुख्याधिकारित्वं दुरपह्नवमेव ॥

ननु भाष्यकारैः स्वाध्यायाध्ययनस्य उपनिषदर्थविचारे अधिकारितावच्छेदककोटौ प्रवेशो नाङ्गीकृत एव । अत एव अतःशब्दार्थविचारसमाप्तौ 'तस्मात् किमपि वक्तव्यं यदनन्तरं ब्रह्मजि-ज्ञासा उपादिश्यते' इत्यवतार्य विवेकादिसाधनचतुष्टयस्यैव अधिकारितावच्छेदककोटौ निवेशनम-कारि । तथा च समग्रवेदाध्येतुर्वा उपनिषन्मात्राध्येतुर्वा मुख्याधिकारित्वगौणाधिकारित्वपरीक्षा अभित्तिचित्रायमाणैव स्यादिति चेत्, मैवम्, वेदान्तविचारनिरूपितासाधारणकारणजिज्ञासायां साधनचतुष्टयवत्त्वस्य तथात्वनिरूपणेऽपि वेदाध्ययनस्य तन्निरूपितनियतकारणत्वानपायात् । तथाऽपि असाधारणकारणस्यैव मुख्यतया साधनचतुष्टयस्यैव मुख्याधिकारप्रयोजकत्वं न स्वाध्या-याध्ययनस्य इति चेन्नैतदेवं स्वाध्यायाध्ययनस्य स्वजन्यापूर्वद्वारा आरादुपकारकत्वेन तस्यापि मुख्यत्वानपायात् । कार्यनियतत्वं हि कारणस्य मुख्यत्वं, तच्च संनिपत्योपकारकाणां विवेकादीनामिव विधिवदधीतस्वाध्यायस्याप्यस्त्येवेति तस्यापि नियतसाधनत्वं संभवत्येव । अतश्च स्वाध्यायाध्य-यनमपि मुख्यमेव अधिकारिविशेषणम् । अत एवाहुर्भाष्यकाराः 'स्वाध्यायानन्तर्यं तु समानम्' इति । अत्र हि धर्मविचारं प्रति समग्रशाखाध्ययनस्य यादृशसाधनत्वं तादृशमेव साधनत्वं ब्रह्मविचारं प्रत्यपि इति ब्रह्मविचारैषिणः समग्रस्वशाखाध्ययनकर्तव्यता भाष्यकारैः स्फुटतरमुदघोषि । अत एव च 'तेषु हि सत्सु प्रागपि धर्मजिज्ञासायाः ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च न विपर्यये' इत्यादिभाष्येण अन्वयव्यतिरेकाभ्यां साधनचतुष्टयस्य मुख्यकारणत्वानिरूपणावसरे ब्रह्मविचारं प्रति धर्मविचारस्यैव साधनत्वं व्यावर्तितम्, न तु पुनः स्वाध्यायाध्ययनस्य । तस्य तं प्रति नियतसाधनतायाः 'स्वाध्यायानन्तर्यं तु समानम्' इति पूर्ववाक्येन निर्धारितत्वादिति ॥

ननु तथा सति 'धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः' इति भाष्यं कथं संगच्छेत? तत्र हि अधीतेपनिषद्भागत्वस्यैव ब्रह्मजिज्ञासाप्रयोजकत्वकथनादिति चेत्, अत्र ब्रूमः। न वयमुपनिषदध्ययनस्य ब्रह्मविचारप्रयोजकत्वं प्रत्याचक्ष्महे। किं तर्हि? समग्रस्वशाखाध्ययनसहितस्यैव तस्य तत्प्रयोजकत्वमाचक्ष्महे। तथा सत्यविशेषेण अधीतवेदस्येत्येवावक्ष्यद्भाष्यकार इति चेत् मैवम्, ब्रह्ममीमांसाया एव प्रस्तुतत्वेन तन्मूलभूतोपनिषदामेव विषार्यकोटिप्रविष्टतया प्राधान्येन तद्ग्रहणोपपत्तेः। न तावता स्वाध्यायविधिविहितं समग्रस्वशाखाध्ययनं वारयितुं शक्यम्। वेदपाठक्रमानुसारेणैव तस्य अध्येतव्यतया तत्क्रमानुसरणे सति कर्मकाण्डाध्ययनानन्तरमेवोपनिषदध्ययनस्य क्रमप्राप्तत्वेन कर्मकाण्डाध्ययनं विनाऽकस्मादेवोपनिषन्मात्राध्ययनस्य स्वाध्यायविधिविरुद्धत्वेन अमुख्यत्वात्। यदि उपनिषन्मात्राध्ययनमपि मुख्यमिति भाष्यकारा अभ्यमंस्यन्त, तर्हि स्वाध्यायानन्तर्यं तु समानं इति समग्रस्वशाखाध्ययनस्य ब्रह्मविचारोपकारकत्वं नाभ्यधास्यन्त; प्रत्युत ब्रह्मविचारे स्वाध्यायाध्ययनमप्रयोजकम्' इत्येव स्फुटतरमवक्ष्यन्। तस्मात् स्वाध्यायाध्ययनस्य ब्रह्मविचारं प्रत्युपकारकत्वोक्त्या तदविरोधाय 'धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः' इति वाक्येऽपि वेदान्तशब्देन समग्रस्वशाखामुपलक्ष्य तदध्ययनस्यैव ब्रह्मविचारप्रयोजकत्वमङ्गीकरणीयम्, अन्यथा वाक्योरनयोः परस्परविरोधापत्तेः। न च स्वाध्यायानन्तर्यं तु इत्यत्र स्वाध्यायशब्देन स्वान्तर्गतोपनिषन्मात्रं लक्ष्यतामिति वाच्यम्, 'स्वाध्यायोऽध्येतव्यः' इति विधिगतस्वाध्यायपदेन समग्रस्वशाखाया एव ग्रहणात्; तदैकार्थ्याय अत्रापि तथैवार्थवर्णनस्य युक्तत्वात्॥

अस्त्वेवम्, तथाऽपि कर्मकाण्डाध्ययनस्य वेदान्तविचारेण साकं को वा संबन्धः? नियतपौर्वापर्यलभ्यसंबन्धाभावे च स्वाध्यायानन्तर्यं वेदान्तविचारस्य कथमुपपद्येत? इति चेत्, समग्रस्वशाखाध्ययनजन्यापूर्वद्वारकत्वमेव तत्संबन्ध इत्यवेहि। ततश्च विचारेण ब्रह्मज्ञाने जननीये असंभावनादिप्रतिबन्धानां श्रवणादिनिवर्तनीयानां संभवो यथाऽङ्गीक्रियते, तथा समग्रस्वशाखाध्ययनजन्यापूर्वजातेन निवर्तनीयानां प्रतिबन्धकदुरितानां संभवात् तन्निवर्तनद्वारैव स्वाध्यायविधिरयं ब्रह्मज्ञानायोपकरोतीत्यवश्यमेष्टव्यम्। अत एव दीक्षितेन्द्राः न्यायरक्षामणौ अपशूद्राधिकरणे, स्वाध्यायाद्यपूर्वेण प्रतिबन्धकनिवृत्तिं दृष्टान्तीकृत्य ब्रह्मज्ञानस्य संन्यासापूर्वजन्यप्रतिबन्धनिवृत्तिद्वारा तत्साध्यत्वमपि समर्थयामासुः। न च पूर्वजन्मीयस्वाध्यायापूर्ववतामस्मिञ्जन्मनि वेदाध्ययनाभावेऽपि ब्रह्मविचाराधिकारः स्यादेवेति वाच्यम्, तुल्ययुक्त्या जन्मान्तरीयोपनयनसंस्कारवत्त्वमङ्गीकृत्य अस्मिञ्जन्मनि उपनयने प्रवृत्त्यभावप्रसङ्गात्, जन्मान्तरीयापूर्ववत्तायाः निर्णेतुमशक्यत्वाच्च। अन्यथा आलस्यवशादनधीतवेदानामकृतोपनयनानामननुष्ठितकर्मणां च प्रतारकाणां जन्मान्तरीयतत्तदपूर्ववत्तावादेन परप्रतारणस्य सुलभतया स्वाध्यायादिविधीनामेव सर्वथा उच्छेदप्रसङ्गात्। अत एव 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इति वेदानुवचनाख्यस्य स्वशाखाध्ययनस्य आत्मवेदनसाधनत्वं स्पष्टमेव ब्रूते भगवती श्रुतिः। न चात्र वेदशब्दस्योपनिषन्मात्रपरत्वं शङ्कितुमपि शक्यम्, यज्ञादिसहपाठविरोधप्रसङ्गात्। 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इति सूत्रयन् सूत्रकारोऽपि वेदानुवचनादीनां विद्यासाधनत्वमङ्गीकरोत्येव। इयान्परं भेदः—वेदानुवचनादीनामारादुपकारकत्वम्, विवेकशमदमादीनां संनिपत्योपकारकत्वमिति। तस्मात्स्वाध्यायविधिबलाद्वेदानुवचनादीनां ब्रह्म-

विद्यासाधनत्वविधानबलाय समग्रस्वशाखाध्ययनजन्यापूर्ववतामेव साधनचतुष्टयसंपत्तिमतामप्रतिबद्धब्रह्मज्ञानोदयसंभव इति नियमलाभात्प्रागुक्तश्रुतिसूत्राणामैकार्थ्याय 'स्वाध्यायानन्तर्यं तु समानम्' 'अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः' इत्यादिभाष्यवाक्यानामपि तदविरुद्धार्थकल्पनमेव न्याय्यमिति साधनचतुष्टयवत्त्वेऽपि साङ्गसकलवेदाध्येतुरेव ब्रह्मविचारे मुख्याधिकारित्वं वज्रलेपायते ॥

ननु तर्हि संन्यासिनामेव ब्रह्मविचारे मुख्याधिकारित्वात्तेषां वेदाध्येतृत्वं नियमायितुं कथं शक्यं इति चेत्, मैवम्, पूर्वाश्रमीयवेदाध्ययनजन्यापूर्ववत्त्वेन तदानीमध्ययनाभावेऽपि बाधकाभावात्, जन्मान्तरीयापूर्ववत्पूर्वाश्रमीयापूर्वस्य संदिग्धत्वाभावात् तर्हि वेदाध्ययनरहितानां संन्यासे का गतिरिति चेत्, तादृशानां संन्यासे नाधिकार इत्येव समर्थनीयम्; काऽन्या गतिः ? वेदाध्ययनात्प्रागेव विरक्तानां परिगृहीतपारमहंस्यानां ब्रह्मज्ञानोदयसंभवे स्वाध्यायस्य तत्साधनत्वं व्यभिचरितमेव स्यादिति चेत्; तर्हि उपनयनात्प्रागेव विरक्तानां पुरुषधौरेयाणां विषये या गतिः सैव अत्राप्यस्तु। उपनयनात्प्रागेव वैराग्ये सत्यप्युपनयनजन्यसंस्कारलाभाय तद्विधिसार्थक्याय च विरक्तेनाप्युपनयनसंस्कारं लब्ध्वैव पारिव्राज्यं परिग्रहीतव्यमिति यदि नियमः कल्प्यते, तर्हि अत्रापि स्वाध्यायविधिसार्थक्याय तज्जन्यसंस्कारलाभाय च विरक्तेनापि स्वाध्यायं परिसमाप्यैव संन्यासो वा ब्रह्मविचारो वा कर्तव्य इति नियमकल्पनं तुल्यमेव। अनधीतस्वाध्यायानामेवाधुना प्रायशः संन्यासिनां दृश्यमानत्वात्कथमिदमुपपद्यत इति चेत्, किं तावता शास्त्रमेव परिवर्तनीयमिति ब्रवीषि ? न हि शास्त्रस्यायं दोषो यत्स्वकृतं नियमं केचिन्नानुसरन्तीति। तादृशानां समग्रस्वशाखाध्ययनाभावेऽप्युपनिषदाद्युपयुक्तमात्राध्येतृणां संन्यासब्रह्मविचारादिषु गौणाधिकारः कल्पनीय एव इति चेत्, चिरं जीवतु भवान्। अयमेवास्माकमप्यभिमतोऽर्थः। अत एव तादृशानामपि गौणाधिकारित्वं तत्र तत्र पूर्वमवादिष्म। तस्मादालस्यादिना समग्रस्वशाखाध्ययनमपहाय उपनिषन्मात्राध्येतृणां साधनचतुष्टयवत्त्वेऽपि न ब्रह्मविद्यायां मुख्याधिकारो वर्षसहस्रेणापि शक्यते साधयितुम्। अत एव हि शंकरभगवत्पादा अपि समग्रां स्वशाखां विधिवदधीत्यैव संन्यासमुररीचक्रुः; अत एव च तदनुयायिनोऽस्मत्प्राक्तना अपि तमेव नियमं परिपालयामासुः। तदेवं कर्मविचारैषिणा वा ब्रह्मविचारैषिणा वा मुख्याधिकारिणा समग्रस्वशाखाध्ययनं कर्तव्यमेवेति नियमस्य भिन्नशास्त्रतावादेऽप्यवश्यं समर्थनीयतया तदर्थं विंशतिलक्षण्या एकशास्त्रत्वाङ्गीकारकल्पनं सर्वथाऽनुपपन्नमेव। नैतावता धर्मजिज्ञासानन्तरमेव ब्रह्मजिज्ञासेति क्रमकल्पनं युक्तम्, धर्मविचारस्य ब्रह्मविचारं प्रत्यानन्तर्यस्य वा साधनत्वस्य वा भाष्यकारैरेव निराकृतत्वात्। तस्माच्चतुर्लक्षणीकं ब्रह्ममीमांसाशास्त्रं षोडशलक्षणीतो भिन्नमेवेति सर्वमनवद्यम् ॥

इत्येवं श्रुतिसूत्रभाष्यवचनान्यालोच्य बालोऽप्यहं तत्तात्पर्यमदीक्षं गुरुकृपापाङ्गावलम्बात्परम्।
निर्दोक्ष्यिण्यमिमां विचारसरणिं शास्त्रैकदृष्ट्या कृतां सारासारविवेकचारुमतयः पश्यन्तु निर्मत्सराः॥
अनधीतस्वशाखानां यद्यपीदं न संमतम्। तथाऽपि भाष्यकाराणां प्रीतये कल्पते ध्रुवम् ॥

अस्माच्च ब्रह्ममीमांसाया मुमुक्षुजनोपचिकीर्षया भगवता बादरायणेन सचिवायास्तात्पर्यवर्णनाय यथा शांकरं भाष्यं प्रावर्तिष्ट, तथैव मध्वरामानुजश्रीकण्ठवल्लभादिकृतान्यपि भाष्याणि

यथायथं प्रावर्तिषत । सर्वाणि च भाष्याणि स्वस्वपक्षोपोद्बलकानि परपक्षप्रतिक्षेपकाणि च परिदृश्यन्ते । किमिमानि सर्वाण्यपि सूत्रकृत्तात्पर्यविषयीभूतानि उत तेष्वेकतममेव ? इति विशेषे एकतममेवेति केचन समर्थयन्ति । वैष्णवाः खलु विष्णुम्, शैवाश्च शिवमद्वैतिनश्च निर्गुणं ब्रह्म सूत्रकृत्तात्पर्यविषय इति हि वदन्ति । न चैतत्सर्वं सूत्रकाराशयानुसार्येवेति वक्तुं शक्यम्, तेषां परस्परविरुद्धत्वेन तत्र सर्वत्र सूत्रकृत्तात्पर्यकल्पने सूत्रकारस्य परस्परविरुद्धार्थवादित्वप्रसङ्गेनानाप्तत्वापातात् । तर्हि तन्मध्ये यन्मतं श्रुतिसूत्राद्यनुगुणमुपपत्त्युपबृंहितं च विद्यते, तदेव सम्यक् परीक्ष्योपादेयमिति चेत्तदपि दुःसाधमेव, सर्वमतस्यापि तादृशत्वेनैव तत्तन्मतस्थैरङ्गीक्रियमाणत्वात् । तर्हि, उपक्रमोपसंहारादितात्पर्यनिर्णायकलिङ्गानि यत्र सम्यगुपपद्यन्ते तन्मतमेव व्यासतात्पर्यविषयतया निर्णेष्याम इति चेत्, नैतद्वर्षसहस्रेणापि शक्यं निर्णेतुम्, सर्वमतीयैरपि तात्पर्यनिर्णायकलिङ्गानां स्वस्वमतेषु सम्यगुपपादनेन तत्र तात्पर्यविवेचनस्य दुष्करत्वात् । 'व्याख्या बुद्धिबलापेक्षा' इति न्यायेन स्वस्वबुद्धिबलानुसारेण सर्वैरपि स्वस्वमते सूत्रस्वारस्यातिशयसमर्थनसामर्थ्यस्याहमहमिकया प्रदर्श्यमानत्वाच्च । तदुक्तमस्मदीये पूर्वपक्षसंग्रहे—

'व्याख्या बुद्धिबलाश्रयेति नयतो वेदस्य तात्पर्यकं स्वस्वाभीष्टमतानुकूलविधया संदर्शयन्ते बुधाः ।
इत्थं बुद्ध्यनुसारतः श्रुतिरियं व्याख्यायते चेत्तदा पुंबुद्धयैव मतप्रवृत्तिघटनात्किं स्यान्मतं वैदिकम् ॥
अद्वैतं यदि वैदिकं श्रुतिशिरस्तात्पर्यविश्रान्तितो द्वैतं किं न तथा भवेदथ विशिष्टाद्वैतमेवं न किम् ।
तात्पर्यं न च सर्वतो न हि बलाद्वस्तुन्यपि स्याद्विदा पुंसामाग्रहिणां व्यवस्थितिकथा नैवाधिकारादपि ॥
यस्मै यत्खलु रोचते मतमिदं स स्वीकरोत्वत्र चेत्किं श्रुत्या कथनस्तु मानमपि सा पुंधीनिरोधाक्षमा ।
वेदो बोधक एव न क्वचिदयं स्यात्कारकश्चेत्तदाऽप्येकं वक्तु मतं स्फुटं किमपरैर्नानामतैर्भ्रामकैः ॥
वेदस्यास्य हि विश्वतोमुखतया नानार्थता भूषणं स्याच्चेन्नास्तिकताऽपि वेदविहिता व्याख्याबलात्स्यान्न किं।
एकत्रैव यदि श्रुतेस्तु परमं तात्पर्यमुन्नीयते नैतद्वर्षशतेऽपि सेत्स्यति तरां नानामते जायति ॥' इत्यादि ॥

तस्मादेकतमस्यैव मतस्य व्याप्ततात्पर्यविषयत्वसमर्थनं न किमपि वर्त्म संभावयाम इति चेत्, अत्र वदन्ति 'विप्रतिपत्तौ साक्षिनिमित्ता सत्यव्यवस्था' इति न्यायेन यन्मतं शास्त्रान्तरेषु वेदान्तिमतत्वेन परिगृह्यते, अनूद्यते वा, तदेव व्यासतात्पर्यविषय इति निर्णेतव्यम् । 'यावत्परमतं न निराक्रियते तावत्स्वमतमप्रतिष्ठितं भवति' इति न्यायेन स्वैरेव शास्त्रकारैः स्वमतप्रतिष्ठापनविषया परमतनिराकरणस्यावश्यकर्तव्यत्वात्तादृशरीतेरेव सर्वशास्त्रेष्वनुसृतत्वाच्च । तथा च सांख्यादिदर्शनेषु तैस्तैः सूत्रकारादिभिर्वेदान्तिमतत्वेनाद्वैतिमतस्यैवानूद्यमानत्वान्यथानुपपत्त्या सांख्यादितत्तत्सूत्रकारादीन्साक्षीकृत्याद्वैतस्यैव व्यासतात्पर्यविषयत्वं निर्णेतव्यमिति तस्यैव परमसिद्धान्ततां सुधीरमुद्घोषयितुं प्रभवाम इति ॥

अपरे तु निगदन्ति—नास्तिकषड्दर्शन्या आस्तिकषड्दर्शन्याश्च आन्तरालिकतत्तत्प्रक्रियाभेदे सत्यपि तेषां सर्वेषां दर्शनानामद्वैतसौधसमधिरोहणसोपानायमानतया परंपरयाऽद्वैत एव परमं तात्पर्यम् । द्वैतविशिष्टाद्वैतादिदर्शनानामप्युपास्यस्वरूपगुणमहिमावधारणद्वारा सगुणब्रह्मोपासनोपयोगिता सगुणं ब्रह्मोपासनानामद्वैतिनामत्यन्तोपकारकत्वमेवेत्युक्तदिशा सर्वेषां दर्शनानामद्वैतमतानु-

गुणत्वसंभवात्सर्वोपकार्यत्वाच्चाद्वैतमेव व्यासतात्पर्यविषय इति.। अत्रैवार्थे श्रीमदप्पय्यदीक्षितेन्द्राणां वचनमप्युदाहरन्ति—

'शिवं विष्णुं वा यद्यभिदधति शास्त्रस्य विषयं तदिष्टं ग्राह्यं नः सगुणमपि तद्ब्रह्म भजताम् ।
विरोधो नातीव स्फुरति नहिनिन्दानयविदां न सूत्राम्नामर्थान्तरमपि भवद्भार्यमुचितम् ॥' इत्यादि ।

प्रागुक्तं युक्तिद्वयमपि यद्यप्यद्वैतमतावलम्बिनः स्वमतस्य व्यासतात्पर्यविषयत्वसमर्थनाय, सर्वमतसामरस्याय च ब्रह्मास्त्रवदवलम्बन्ते, तथाऽपि नैतत्सर्वं परमतीया अनुमन्यन्ते । तेऽपि हि कामपि कामपि युक्तिमवलम्ब्य दर्शनान्तरवदद्वैतदर्शनस्यापि कयाऽपि विधया स्वमतोपकारकत्व-प्रदर्शनेन स्वमतस्यैव सर्वोपकार्यतां परमसिद्धान्ततां च समर्थयन्त्येव । यदि अद्वैतिनो द्वैतादि-शास्त्राणां विष्णुभक्तिजननद्वारा तत्प्रसादलभ्याद्वैतवासनाप्रयोजकतामङ्गीकृत्य तत्प्रामाण्यमाचक्षते, तर्हि द्वैतिनोऽप्यद्वैतशास्त्रस्य बौद्धादिशास्त्रस्येव प्रपञ्चमिथ्यात्वबोधनद्वारा विषयवैराग्योपजननेन तद्द्वारा भगवदुपासनायामानुकूल्योत्पादनाद्द्वैतशास्त्रस्यापि स्वमतोपकारकत्वकल्पनद्वारा स्वमतस्यैव सर्वोपकार्यतया परमसिद्धान्तत्वं कल्पयन्ति चेत् को नाम तेषां निवारकः स्यात् । तथा शैवाः शिव-भक्तेरेव प्राधान्येन मोक्षसाधनतामङ्गीकृत्य विष्णुभक्तिपारम्यप्रतिपादकवाक्यानां गतिकल्पनाव विष्णुभक्तेर्जन्मान्तरे शिवभक्तिजननद्वारा मोक्षसाधनत्वं यदि वदन्ति, तर्हि वैष्णवा अपि तामेव युक्तिमवलम्ब्य अद्यकृतशिवभक्तेर्जन्मान्तरीयविष्णुभक्तिसाधकतां वक्तुं कुतो वा जिह्रियुः ? अत एव विश्वगुणादर्शे कविराह — 'स्मरहरपरिचर्या सांप्रतं तन्यते या जनयति हरिभक्तिं हन्त जन्मान्तरे सा' इति ॥

किं चैते स्वस्वमताभिमानिनो नैतावन्मात्रे विश्राम्यन्ति; परं तु परमतप्रवर्तकतदनुयायि-तत्कृतग्रन्थानामपि दूषणार्थमेव स्वपाण्डित्यमशेषं व्ययीकुर्वन्ति; तदर्थमेव च परस्परं कलहायन्ते; तेनैव च स्वकीयमायुःशेषमतिवाहयन्ति; तावन्मात्रेण च कृतार्थमात्मानं मन्यन्ते, इत्यहो! महदिदं वैशसं भारतीयानाम् । यान्येव हि शास्त्राणि पुराणादीनि च सांसारिकाविविधव्यसनविक्षि-प्तचेतसां पुंसां मनःसमाधानाय प्रावर्तिषत, तान्यपि खल्वधुनातनानां परमतदूषणवैयग्र्यप्रयुक्त-विक्षेपसहस्रसमुत्पादनद्वारा चित्तविक्षोभकारीण्येव खलु परिणतानीति शोचनीयामिमां दुर्दशामनु-क्षणमन्वीक्षमाणानां निष्पक्षपातानां चक्षुष्मतां प्रत्यक्षमेवैतत् । तथा हि— वैष्णवाः केचन सूत्रकारस्य स्मार्तमतं न संमतमिति प्रतिपादयितुम् 'न च स्मार्तमतद्धर्माभिलापात्' इति तदीय-सूत्रमेवोदाहृत्य स्मार्तमतं न व्याससंमतं व्यासानभिमतधर्माणां प्रपञ्चमिथ्यात्ववादभस्मरुद्राक्षधार-णादीनां स्मार्तमते आश्रयणीयत्वेन व्यवहारादिति व्यासतात्पर्यं वर्णयन्ति चेत्तदिदमसहमाना मतान्तरीयाः 'मध्वादिष्वसंभवादनधिकारं जैमिनिः' 'भावं तु बादरायणोऽस्ति हि' इति सूत्रद्वयमुदाहृत्य मध्वरामानुजादिषु पुराणद्राविडप्रबन्धमात्राध्येतृषु वैदिकधर्माणां स्वाध्याययज्ञादीनां शमदमादीनां चासंभवात्तेषां वैदिककर्मसु वा विद्यायां वा नास्त्यधिकार इति जैमिनिराचार्यो मन्यते । परं तु बादरायणाचार्यो वैदिककर्मसु तेषामधिकाराभावेऽपि तान्त्रिकेषु वा पौराणिकेषु वा कर्मसु पुराणोक्तविद्यायां वा तेषामपि कथंचिदधिकारमङ्गीकरोति । अस्ति हि पुराणश्रवणे सर्वेषामधिकार-

प्रापकं वचनम् 'श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः' इत्यादि इति स्वबुद्ध्या किमपि कल्पयित्वा तत्रैव व्यासतात्पर्यं प्रदर्शयन्ति ॥

तथा, 'मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते' इत्यादीनि कानिचन पूर्वोत्तरविरुद्धानि पद्यानि पद्मपुराणे प्रक्षिप्य माध्वादयोऽद्वैतशास्त्रं दूषयन्ति चेत्, तत्समाधानाय मतान्तरीयाः 'तदा वसन्तः कर्णाटत्रिलिङ्गादिकदूषकः। मधुनामा च विधवाक्षेत्रे विप्राद्भविष्यति ॥ प्रच्छन्नोऽसौ महादुष्टश्चार्वाको मध्वसंज्ञकः। भविष्यति कलौ विप्राः शिवनिन्दाप्रवर्तकः ॥' इत्यादिसौरपुराणवचनान्यवलम्ब्य माध्वादिशास्त्रमपि दूषयितुं प्रवर्तन्ते। वस्तुतस्तु पद्मपुराणे वा सौरपुराणे वा परिदृश्यमानं मतान्तरदूषणपरं वचनजातं सर्वमर्वाचीनैः कैश्चित्कलहपरैः प्रक्षिप्तमित्येव निष्पक्षपातैः समदर्शिभिरवश्यं मन्तव्यम्। तथा पद्मपुराणे केषांचित्पुराणानां तामसत्वप्रतिपादनमपि द्वेषमूलकप्रक्षिप्तवाक्यकृतमित्येवोभयमतसामरस्यदर्शिनाऽवश्यमङ्गीकरणीयम्; अन्यथा सर्वमतीयैः प्रामाणिकतया समाद्रियमाणस्य व्यासाचार्यस्यैव प्रतारकत्वप्रसङ्गात्। सर्वलोकहितैषी भगवदवतारभूतो व्यासाचार्य एव यदि पद्मपुराणेऽद्वैतिनिन्दां, सौरपुराणे माध्वादिनिन्दां च स्वयमकरिष्यत्, तर्हि तादृशोऽयमस्मदीयहितैषी कथं स्यात्? प्रत्युत अविश्रान्तकलहप्रवर्तकतयाऽस्माकं प्रतारकः खलु स्यात्। व्यासाचार्यस्य प्रतारकत्वं किं कस्यापि संमतं भारतीयस्य? मैवं मैवम्। अतस्तस्य प्रतारकत्वदोषो यदि परिहर्तव्यस्तर्हि पद्मसौरादिपुराणगतमतान्तरीयनिन्दापरवचनानां सर्वेषामर्वाचीनैः कैश्चित्कलहपरैः प्रक्षिप्तत्वसमर्थनं विना न सर्वमतसामरस्याय गतिं पश्यामः। तदेतद्रहस्यमजानानाः प्रक्षिप्तवाक्यशकलान्येव दृढतरमवलम्बमानाः कति कति जगति कलहायन्ते कलिकालीनाः कोविदवरेण्याः? कतिधा दुराग्रहग्रहमाविश्चिकीर्षन्ति? कतिविधं परेषु परुषभाषणविषमविषविशेषमभिवर्षन्ति? कति वा साधुजनानिन्द्याजनितं पातकमुपचिन्वन्ति? कियद्वा चित्तकालुष्यमुपार्जयन्ति? कियन्तं च रागद्वेषदावानलमुद्दीपयन्ति? कियत्कियद्वो मानसिकं संतापजातं संपादयन्ति? कियद्वधि च ब्राह्मणानामनैकमत्यमाविष्कुर्वन्ति? कियतीं च विपत्तिपरंपरामनुभवन्ति? अहो! किमिदं दौर्भाग्यं भारतीयानाम्, यदिह प्राकृतजनानज्ञानसागरात्समुत्तारयितुं भारतभूमौ लब्धजन्मानः पण्डितमूर्धन्या अपि स्वयमेव परस्परं कलहायन्ते ॥

यानि खलु व्याससूत्राणि समस्तकलहमूलस्याज्ञानस्य समुन्मूलनाय आत्मानमलभन्त, तान्यपि हि दौर्भाग्यादस्माकं कलहकन्दलीकन्दान्येव पर्यणंसिषुः। यतः शैववैष्णवद्वैताद्वैतादितत्तन्मताभिनिवेशप्रयुक्तकलहकोलाहलोऽद्यापि नोपारंसीत्; इतः परमुपरंस्यत इति तु का प्रभा? तर्हि किं नास्त्येव सर्वमतसामरस्यसमर्थने काश्चिदुपायः? अस्तीत्येव ब्रूमः। तथा हि—मध्वरामानुजश्रीकण्ठशंकरादयः सर्वेऽप्याचार्याः सर्वज्ञा एव। 'कपिलो यदि सर्वज्ञः कणादो नेति का प्रमा' इति न्यायेनैकतमस्यैव सर्वज्ञत्वं समर्थयितुमशक्यमिति सर्वेषां सर्वज्ञत्वस्यैव समदर्शिभिरुपपादनीयत्वात्। सर्वाचार्याणां सर्वज्ञत्वसिद्धौ च तत्प्रणीतं सर्वमपि भाष्यं तन्मतं च तत्तदधिकारिभेदेन प्रामाणिकमेव। सर्वेषामपि वैदिकत्वाविशेषान्न गुणप्रधानभावशङ्कावकाशः। सर्वमपि तदीयं मतं व्यासतात्पर्यविषयीभूतमेव। तर्हि परस्परविरुद्धद्वैताद्वैतादिमतानां समानतयैव व्यासतात्पर्यविषयत्वे विरुद्धार्थवादिनो व्यासस्य कथमाप्तपुरुषत्वम्? तत्प्रणीतग्रन्थानां वा कथं प्रामाणिकत्वम्? इति

चेत्, अधिकारिभेदादेवेत्यवेहि । अधिकारिणो हि मन्दमध्यमादिभेदेन बहुविधाः सन्ति । न चैकमेकरूप एव शास्त्रार्थो बोधयितुमुचितः; न वा तदर्थं पृथक्पृथक् सूत्रान्तरप्रणयनं शक्यसंभवं स्यात्, अधिकारिभेदानामसंख्यत्वात् । तस्मादेकरूपैरेव सूत्रैस्तत्तद्विनेयपाटवानुसारेण नानार्थसूचनमेव साधीयानुपाय इत्यभिसंधायैव हि भगवान्व्यासाचार्यो नानामतानुगुणानर्थानेकरूपैरेव सूत्रैः संसूच्य मन्दमध्यमादिसर्वाधिकारिजनानपि कृतार्थीकरोतीति समर्थनमेव साधीय इत्युत्पश्यामः । न चैतदनुचितं मन्तव्यम्, सूत्राणां विश्वतोमुखत्वेन नानार्थसूचकताकल्पने बाधकाभावात् । अत एव हि परमेश्वरेण स्वताण्डवावसरे निःसृतानां ढक्कानिनादरूपाणां व्याकरणसूत्राणां नानार्थसूचकतया तच्छ्रवणेन आत्मतत्त्वबोधनद्वारा सनकादिशिष्याः कृतार्थीकृता इत्युपाख्यायते । तर्हि कस्य मन्दाधिकारित्वं कस्य वा मुख्याधिकारित्वमिति कथमिदं निर्णेतव्यम् ? सर्वैरपि तत्तन्मतीयैः स्वकीयानामेव मुख्याधिकारित्वाङ्गीकारादिति चेत्, काममेवमेवास्तु, तत्तन्मतरीत्या तेषां तेषां मुख्याधिकारित्वकल्पने बाधकाभावात् । तर्हि मन्दमध्यमाद्यधिकारिणामनुग्रहाय स्वसूत्रैरेव नानामतसूचकत्वं व्यासाचार्यस्य पूर्वोक्तं कथमुपपद्येत इति चेत्, अत्र ब्रूमः —

सूत्राणां मन्दमध्यमाद्यधिकारिजनानुद्दिश्य तत्तन्मतसूचकत्वेऽपि तादृगधिकारिणां मध्ये को वा मुख्याधिकारी, को वा मन्दमध्यमाद्यधिकारी, कीदृशं च मतं तस्य तस्यानुगुणम्, इत्यादिविभागं सर्वं सर्वज्ञो भगवानेक एव जानाति । अल्पज्ञास्तु तत्तन्मतीयैः स्वस्वमताभिनिवेशपरवशैः स्वकीयानां वा परेषां वा विषये मन्दमुख्याद्यधिकारित्वविचारो वा मतानामुत्तमाधमभावविमर्शो वा नैव करणीयः । परं तु स्वमतीयभाष्यादिग्रन्थोक्तरीत्या स्वकीयानां विषय एवाधिकारतारतम्यचिन्ता कर्तुमुचिता । न पुनः स्वमतरीत्या परेषामधिकारचर्चा युक्तरूपा । न च परमतीयानां स्वमतप्रवेशनेन स्वमतबलिष्ठतासंपादनप्रयासो वा कार्यो, यवनकैवल्यवादिमाधारण्यास्तत्पङ्क्तेर्ब्राह्मणजातीयैरनुपादेयत्वात्, तथा करणे च परस्परकलहवार्तायां एवाविश्रान्तिप्रसङ्गात्, तस्य भगवत्संकल्पविरुद्धत्वाच्च । सर्वज्ञो हि भगवान्प्राक्तनकर्मानुसारेणैव तत्तद्देशे तत्तत्काले तत्तन्मतानुसारिणि तत्तत्कुले च जन्म ददाति । ततश्च भगवान यस्य यन्मतानुसारिणि यस्मिन्कुले जन्म ददाति तस्य तत्कुलपरंपरागततन्मतानुसरणमेव युक्तम्, तदेव च मतं तस्य प्रधानम्, तदनुसरणे सत्येव मोक्षप्राप्तिरिति नियमाश्रयणात्तेषां तेषां स्वस्वमतरीत्यैवाधिकारविचारो युक्तः । परमतचङ्क्रमणं तु भगवत्संकल्पविरुद्धत्वादुपेक्षणीयमेव । तथाऽपि मध्वमतस्यैव सर्वोत्तमत्वं मुख्याधिकारिविषयत्वं चेति मध्वाचार्यस्य बदरिकाश्रमे व्यासंदर्शनावसरे व्यासाचार्यैरनुमोदितत्वात्तन्मतीयानामेव मुख्याधिकारित्वं सूत्रकारसंमतमिति चेत्तर्हि वाराणस्यां भगवत्पादीयं भाष्यमामूलचूडमवलोक्य तदेव स्वाशयानुसारि सर्वसिद्धान्तमूर्धन्यं चेति तैरेव व्यासाचार्यैरनुमोदितमिति शंकरविजयादावुद्घुष्यमाणत्वादद्वैतिनामेव मुख्याधिकारित्वं व्यासंसंमतमिति तन्मतीया अपि सप्रमाणं समर्थयन्त्येव । तथा विशिष्टाद्वैतिनोऽपि तथैव स्वमतं व्यासाभिमतमिति वदन्ति । तत्र किं मतमुपाददीमहि किं च पुनर्दूरीकुर्वीमहि ? परस्परविरुद्धत्वात्सर्वमप्यनुपपन्नमेवेति कल्पनापेक्षया सर्वेषामुपपन्नत्वसमर्थनमेव न्याय्यः । अथा च तत्तदधिकारिजनानुद्दिश्य तस्य तस्य मतस्य सर्वोत्तमत्वमुक्तं भगवता व्यासेनेति चेत् का नामानुपपत्तिः ? तस्मात्स्वस्वमतानुसारेण तत्र तत्र प्रतिपादि-

तमोक्षसाधनानां संपादनेन तद्द्वारा भगवत्प्रसादं संपाद्य तत्तन्मतीया यथायथं साक्षाद्वा परंपरया वा मोक्षं प्राप्नुवन्तीत्येव सर्वमतीयानामविरोधी सुगमः साधीयांश्च पन्था इति सुदृढं निश्चिनुमः ॥

ननु तथा सति कस्य मतस्य साक्षान्मोक्षसाधकत्वं, कस्य वा परंपरया तत्साधकत्वम् , इत्यनिर्णये कथं तत्र प्रवृत्तिराञ्जसी स्यादिति चेत्, नैष दोषः, सर्वैरपि स्वस्वमतस्यैव साक्षान्मोक्षसाधकत्वमिति निर्णीयैव प्रवर्तितव्यत्वात् । तर्हि परंपरया मोक्षसाधकस्यापि मतस्य साक्षान्मोक्षसाधकत्वभ्रमेणावलम्बने कथं मोक्षसिद्धिः स्यात् ? न हि रजतबुद्ध्या परिगृहीतानां शुक्तिशकलानां कटकादिपदार्थनिर्वर्तनसामर्थ्यं कुत्रचिदपि दृष्टम् इति चेन्मैवम्, स्थूलारुन्धतीन्यायस्यैवात्र दृष्टान्तीकरणीयत्वात् । ततश्च यथा सूक्ष्मतारागृहणोपायतया स्थूलतारायाः प्रथमतः अरुन्धतीत्वबोधनेऽप्यरुन्धतीयाथार्थ्यप्रतिपत्तिरूपफले न कोऽपि विघातो भवति, यथा च तद्बोधनस्य सफलप्रवृत्तिजनकतया स्थूलतारामरुन्धतीत्वेन ग्राहयितुरनाप्तत्वशङ्काऽपि न प्रसरति, तथैवान्तरसिद्धान्तरूपमतभेदानां परमसिद्धान्ततत्त्वबोधने वा परंपरया मोक्षसाधकानामपि तेषां साक्षान्मोक्षजनकत्वबोधने वा तत्तदधिकारानुगुणं क्रियमाणेऽपि तथा बोधयितुर्व्यासाचार्यस्य वा तत्प्रवर्तकस्य भगवतो वा नानाप्तत्वशङ्कावकाशः ; न वाऽवान्तरसिद्धान्तरूपमतभेदानां मोक्षसाधनतायां व्यभिचारशङ्कावकाशो वाऽऽस्पदं लभेत । मुख्यसिद्धान्तरूपं मतं किमिति तु व्यासाचार्यो वा भगवान्वा जानाति, नान्ये तत्तन्मतीया इति प्रागुक्तं न विस्मर्तव्यम् । न हि यथार्थारुन्धतीतारा इयमेवेति तदीयतत्त्वनिर्णयो बोधनीयकोटिप्रविष्टस्य शिष्यस्य संभवति, पूर्वपूर्वबोधिततारामपवादपुरःसरमुत्तरोत्तरतारायाः अरुन्धतीत्वबोधनशैलीदर्शनेन मुख्यारुन्धतीप्रदर्शनेऽपि तस्या एव तारायाः मुख्यत्वं वा उत अन्यस्या वा इति शङ्कायाः अनिवार्यत्वात् । तथाऽप्याचार्येणेयमेवारुन्धती नान्या इत्यन्तिमनिर्णये बोधिते सति मुख्यारुन्धतीज्ञानं संभवत्येवेति चेत्तर्हि, व्यासाचार्यो वा साक्षादीश्वरो वा स्वयमेव प्रत्यक्षं संनिधायायमेव परमसिद्धान्तो नान्य इत्यन्तिमनिर्णयं यदा बोधयति, तदानीमेव तदीययाथार्थ्यमवगन्तव्यमित्यपि तुल्यमेव । तावत्पर्यन्तं तु स्वाधिकारानुरूपं यन्मतं कुलधर्मानुसारात्प्राप्तमस्ति, तस्यैव तत्काले मुख्यत्वभावनयाऽनुसरणं युक्तमिति निर्णय एव राजमार्गः । अत्रापि पुनश्च विपश्चितां यदि काश्चिदनुपपत्तयः प्रतिभासेरन्, तर्हि तासामपि यथाबुद्धिबलं प्रागुक्तदिशा स्वयमेव परिहारः कार्यः ॥

एषा च परिहारसरणिः श्रीमदप्पय्यदीक्षितेन्द्रैर्यथा समसूचि न तथा केनापीति निश्चप्रचमेवेदम् । प्राक्निर्दिष्टे च 'शिवं विष्णुं वा' इत्यादिपद्ये तदिदं सुनिपुणं न्यरूपि । तत्र हि सूत्राणां विश्वतोमुखत्वेन शैववैष्णवादिनानामतसूचनापरत्वोक्त्या, न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तु स्तुत्यं स्तोतुम्' इति न्यायमवलम्बमानया सर्वमतसामरस्योपपादकवचनशैल्या च, दीक्षितेन्द्राणां सर्वमतेष्वापे कियती समदृष्टिरासीदिति स्वयमेव स्फुटीभवतीति नेदं विशिष्य वर्णनीयम् । क्वचित्क्वचिदद्वैतस्यैव सर्वोत्तमत्वपरमसिद्धान्तत्वादिप्रतिपादनं वा तन्नान्तरीयकतया परमतनिराकरणं वा दीक्षितेन्द्रैः क्रियमाणं तु भगवत्संकल्पानुसारं स्वकुलक्रमागतस्याद्वैतसंप्रदायस्य परिपालनार्थमेवेत्यपि सुधीभिः सूक्ष्मेक्षिकया परिकलनीयम् । अत एव दीक्षितीयग्रन्थेषु परमतनिराकरणप्रस्तावे वैयक्तिकनिन्दावादाः क्वचिदपि नास्पदं लभन्ते । सर्वमतसामरस्यप्रदर्शनार्थमेव

चतुर्मतसारसंग्रहाख्यो निबन्धोऽपि दीक्षितेन्द्रैर्निरमायि । तत्र हि तत्तन्मतीयप्रक्रियासर्वस्वमपि प्रदर्श्य तत्तदुपपादनमरणिमपि सुगमया शैल्या प्रदर्श्य मतान्तरीयाणामपि महान्तमुपकारं कृतवन्तो दीक्षितेन्द्राः सर्वमतीयानामपि कृतज्ञतापूर्वकस्मरणविषयतां नातिवर्तितुमर्हन्तीति नेदमपि विशिष्य वक्तव्यकोटिमाटीकते ॥

चतुर्मतसारसंग्रहाख्ये ग्रन्थे च मध्वमतानुसारिणी न्यायमुक्तावलिः, रामानुजमतानुसारिणी नयमयूखमालिका, श्रीकण्ठमतानुसारिणी नयमणिमाला, भगवत्पादीयमतानुसारिणी नयमञ्जरी चेति चत्वारो भागाः अन्तर्गताः सन्ति । तत्र नयमञ्जरी इयन्तं कालं कुत्राप्यमुद्रितचरी सत्यपि सुधीजनानां सुकृतपरिपाकबलात्संप्रति श्रीशंकरगुरुकुलादवतरति; या खलु सुश्लोका चारुवृत्ता सुललितपदविन्याससुमनोहरा नयनानन्दकरी मृदुलतरशय्यासमाश्रयणैकधवणा स्फुटाभरवाग्विलासा रमणीयाकृतिश्च सती रमणीव रमयतितमां रसिकजनचेतांसि । अस्यां च नयमञ्जर्यां पूर्वपक्षसिद्धान्तांशान्क्रोडीकृत्य तत्तदधिकरणार्थसर्वस्वमपि तत्तत्पद्येषु विनिवेशितमस्ति । तत्तदधिकरणार्थानामपि भिन्नवृत्तैरेव पद्यैर्नातिविस्तरं निरूपणेन पाठकानामेतद्ग्रन्थावलोकनपठनादिषु विनोदातिशयवशाज्जामितालेशोऽपि नावकाशं विन्देत । तदेतद्दीक्षितेन्द्रैरेव ग्रन्थारम्भे स्वप्रतिज्ञावाक्येन प्रादर्शि—'एकोऽत्र पूर्वपक्षश्लोकः सैद्धान्तिकस्वपरः । एवं प्रत्यधिकरणं भिन्नैर्वृत्तैरयं क्रियते ॥' इति । एवं भिन्नभिन्नवृत्तघटितेषु पद्येषु तत्तदधिकरणार्थानां सौलभ्येन प्रदर्शनादिति हि नाम आविष्कृतं छन्दःशास्त्रमर्मज्ञत्वं दीक्षितेन्द्रैः, अतितरां च तदनुगुणशब्दसंनिवेशघटनापाटवम्, अतितमां च बृहत्समग्रब्रह्ममीमांसामहाराज्यसर्वस्वातन्त्र्यनिर्वाहकसार्वभौमत्वम् । अहो ! महदेतदाश्चर्यं, यदेवमेकेनैव प्रयत्नेन छन्दःसाहित्यमीमांसाशास्त्रेषु, अथवा सर्वशास्त्रेष्वसाधारणी नैपुणी समकालमेव प्रादर्शि दीक्षितेन्द्रैः । किमयमेक एव तदीयनिबन्धो विपश्चितामाश्चर्यलहरीभिश्चेतश्चमत्कारमातनोति? अहो नु परःशताः । नूनमेते शंकरगणांशसंभूता एवेति 'दीक्षितोऽपि भवेत्कश्चिच्छैवश्छन्दोगवंशजः' इत्यादिशिवरहस्यवचनं नांशतोऽपि संशयास्पदं भवति ॥

इमे च दीक्षितेन्द्रास्तुण्डीरमण्डलान्तर्वर्तिनि अडयप्पलनाम्नि अग्रहारे श्रीरङ्गराजाध्वरीन्द्राणां पुत्रभावमवलम्ब्यैव भूतलमिदमलमकार्षुः । क्रमेण च खतातादेव समुपात्तसकलकलाकलापाः सन्तो विजयनगराधीश्वरचिन्नबोम्मनरपतेराश्रानीमध्यवात्सुः । तदानीं खल्वेते महापुरुषाः निबबन्धुश्चतुरधिकशतं निबन्धजातम्, प्राचीचरन्नार्यभाष्यमासेतुतुहिनाचलम्, निरवीवृतन्निष्प्रत्यासलेशं नानाविधानध्वरविशेषान्, आवीवृतन् सर्वजनान् साधुमार्गेषु, प्रादीदृशन् शिवभक्तेरपरिमाणं गरिमाणम्, अजूघुषन् परमेश्वरस्यातिमानं महिमानम्, अन्वभूवन्नासेतुहिमाचलं सर्वतो बहुमानम्, अनीनयन्वर्षपूगं द्वासप्ततिपरिमाणम्, व्यलीयन्त चान्ते निरन्तरायमन्तकान्तकपदपाथोजयोः, इत्यादिदीक्षितेन्द्रचरितं सर्वं सुप्रसिद्धमेव । अस्य च ग्रन्थस्य सुदूरमन्विष्य प्रकाशनेन बहूपकृतवतां गुरुभक्तशिखामणि बालसुब्रह्मण्यार्याणां महीयांसमिममुत्साहभरं तत्साह्यकारिणः सर्वे सहृदया भूयोभूयः संवर्धयेयुरिति सुहृदं विश्वसिमः ॥ इति परमहंसकुलभेषाधुरंधरः

स्वामी सच्चिदानन्दतीर्थः ॥

॥ श्रीः ॥

॥ नयमञ्जर्याः श्लोकानुक्रमणिका ॥

	पृष्ठम्		पृष्ठम्		पृष्ठम्
अक्षरं रूढितो वर्ण	१५	अवेक्ष्य कर्मजातमेष	३५	इह परिपठिताऽस्ति	७१
अखिलानामप्युपास्य:	८१	असत्वोऽशनयश्च	२०	इह शेषिणि विरोधिनी	९०
अग्नित्रेताकल्पना०	१२	अस्ति महाप्रलयेऽपि	५३	इह स्म यत्किंचन	५८
अङ्गं खलु फलयुत०	९४	अस्ति ह्येषां शरीर०	५४	इहैव विद्या भवे भवेत्	९०
अङ्गनिबद्धा उपासना	८९	अस्त्वेवमभेदो भेदश्च	३१	ईशस्त्वसौ चेतनवाचि०	७
अङ्गबद्धा उपासना:	७८	अस्त्वेवमेवमपि	४	ईशो मायी न च वपु०	३३
अङ्गाश्रितोपासनया	९४	अहंकार: कर्ता चिद०	५०	उत्क्रमणं गतमागतं	४८
अङ्गे दिनकरमुख०	९४	अहंग्रहात्मनां धियां	८१	उत्क्रमश्रुतेरणूनि	५३
अजडो जडस्य जगत:	२९	अहमिति नेश्वर:	९२	उद्गीथविषया विद्या०	८०
अथ यदिति दिशोक्ते	७	अहमिति बुद्धिरात्म०	८०	उपक्रमसमापनानुगुण०	८
अदर्शनं ह्यर्थना स्थिता	८८	आकाशं गगनमुपक्रम०	६	उपक्रान्त्युपसंहृती	८१
अदृश्यतामुखगुणयुक्त०	१२	आकाशादिष्वमीषां	६०	उपनिषत्सु हि	४३
अधिगतिरङ्गगाऽप्यफल०	८३	आकाशाद्या विलम्बा०	६०	उपरिनिपठिता:	१०५
अधिमुखविकृते:	६४	आख्यानजातं समनु०	८५	उपास्यदर्शनं मृता०	८१
अधि हुतवहात्पवन०	१०४	आचार्यपाददर्शित०	१	उभयो: सर्वान्तरता०	७६
अध्यक्षमाम्नायशिखाऽपि	८६	आध्येय आनन्दमय:	५	ऋतपिबौ ननु	१०
अध्यासादपि भवति	६६	आनन्त्यं किल परिहर्तुं०	१	एकत्र विधेयोद्गीथा०	६८
अनीहिताऽसौ सविशेष०	९७	आरम्भणशब्दाद्यैर्द्वैत०	३१	एकत्राकाश आध्येयो	७८
अन्तर्यामी स्याद्योग्य०	११	आविद्यकं कर्म समेद०	८६	एकोऽत्र पूर्वपक्षश्लोक:	१
अपरं प्रतीकदृशोऽपि	१०६	आवेदयन्तिननु	४७	एवं सति श्रुतीनां	७५
अपां जनिर्नैव पावका०	४४	आश्रमधर्मानपेक्षतो	८७	ऐतरेयिभिरात्मगिरोक्ताद्वा	७०
अपीत्य शुद्धिर्विनिष्कृतेरेषां	८९	इति जिन कलितं	३९	ऐतरेयिभिरात्मगिरोक्तो	७०
अप्रसिद्धेषु वृत्तेषु	२	इति सुगतानां मत०	३८	ओदनपदेन खलु	९
अभिहितगुणसाम्य०	७१	इदं नास्त्वेकान्तं	३७	औद्गात्र्याद्या समा०	८९
अर्चिरहरादि०	१०५	इन्द्रियादिपरतोक्तय:	६९	कथं हि कर्माणि	९७
अवादि विदुषां श्रुत्वा	१०२	इयमपि कुमतिधक०	३०	कथमपि पूर्वस्थित०	६०

	पृष्ठम्		पृष्ठम्		पृष्ठम्
कपिलेन तत्त्वगण०	२८	तत्प्रवेशविरहितं	१०९	धर्मस्कन्धत्रितय०	८४
करणतयेष्यमाण०	८६	तत्सृष्टितः प्राणसृष्टेः	५४	न क्रमेण प्रतिपादितः	६१
कर्मण एव फलातिः	६६	तत्सृष्टेः पृथगस्य	५६	न खलु दहरस्यान्तः	१७
कर्मोङ्गविद्यासहितं	९७	तदपि विकारः कारण०	४३	न खलु नैयायिकोपलब्धि०	५६
कामतस्मरणवादभुक्तिता	९०	तदसत्कथयन्ति	२५	न तस्मादिति श्रुत्या	१०१
कामरमणे न हि मनो०	१०९	तदाऽपि बलते तदिति	१०३	न द्रव्यप्रतिहतशक्ति०	९६
किंचिदसामान्योक्त०	७२	तदित्थमेते विनिष्कृति०	८९	ननु च दहरादन्य०	१६
कृतमुपशाम्यन्ति	७९	तदूपूंषि न मनसा	१०९	ननु दक्षिणायन०	१०३
कृतुषु जुहूषुच०	८३	तनुनरपरयोरन्योन्य०	७६	ननु देहान्तरमुप०	५५
कृष्ण इह तेजसः	४२	तपनवह्निमुखाः	५६	ननु मायया त्रिगुणया	३६
क्षीरवदात्मनैव	३३	तस्य जनिर्बहुधा	५४	ननु योगशासनमुपा०	२८
गतिरियमभिदा	१०४	तस्य प्रतिष्ठात्मक०	५	न प्राण ईशस्तपना०	७
गुणदूयं तद्धि न	९	तेजसो जनिर्ब्रह्मणः	४३	न बिनाऽपरोक्षमप०	९२
ग्राह्यकार्यक्रिया०	१५	तेजोधातुः कोऽपि	१७	न सगुणविद्यया	९५
छन्दोगश्रुतिबाजसनेय०	६८	तेऽर्थाभिदाद्वाक्यै०	६७	न सर्वविद्प्रकृति०	१२
जगति हि विदिता०	६३	तेषां संख्या नाना०	५२	न सिद्धे व्युत्पत्तिर्न	४
जगद्धि निम्नमुन्नतं	३४	ते सर्वपुषो न मनसेति	१०८	न स्तुतिमात्रमिदं	५०
जन्यभावभङ्गतो	५२	त्रिदिवगतिवदप०	१०७	न स्युरसत्यञ्जसा	६९
जागरणादावनुभव०	६२	त्रिमात्रामिध्येयं	१६	न हि परेदने विधि०	९५
जीवज्जननापवर्ग०	४१	दक्षिणाक्षिादिन०	७१	न हि समुदायद्ध्व०	३८
जीवब्रह्माभिदां	५१	दद्याद्यथेदिति	४९	न हि सर्वथा निष्कृति०	२९
जीवसनःप्रमुखैक्य०	९३	दिनकरसमागम०	१०४	नाड्यां पुरीतति परमे	६२
जीवस्य जन्ममृति०	४६	दुःशङ्केषा खल्वप०	३५	नाड्या तया निष्क्रामतो	१०२
ज्यैष्ठ्यादिगुणप्राणद्वारा	६९	दृश्यं दिनकृति योक्ता	७७	नानाशक्तिर्या सहते	९७
ज्ञातिरिति	४८	दृष्ट्यर्थं रचितं न किं	३	नानाभाष्याद्वता	१
ज्ञानोत्कर्षे प्रथिता	९०	देहात्समुत्थाय यज्ज्योति०	२०	नानासंख्यामाने	५३
तच्च तदा स्वबोधे	९६	देहाभावान्न हि सुमनसां	१८	नान्वेतुं योग्यः क्रम०	४६
तडित उपरि ताव०	१०५	द्युभूम्नभृत्यायतनं	१४	नाप्यक्षाणां क्रियैव	५५
तत्रोऽपि संसारभाजां	१११	द्यौराकाशस्तन्निर्वाह्या	११	नाब्धेः प्रतिबिम्बे	३२
तमुद्भूताकारापन्नं	४५	द्वितीयरहितः परस्तत्र	३२	नाविकसुक्तं मुक्ततो	१००
तस्मात्संवर्गगुणक०	७१	द्वित्वोपगूढतायाः	७६	नित्यानित्यतयोर्विरोध०	८७
तत्परवाक्यसहस्र०	१०७	द्विरुपस्तिकहोल०	७६	नित्यानित्यविवेकैक०	८७

	पृष्ठम्		पृष्ठम्		पृष्ठम्
नियतक्रमेति निरपेक्षतो०	२८	प्रकरणान्तरसंगम०	८४	बलि खलु योगतोऽपि	२४
नियताः प्रतिपद्य	८२	प्रकृतं परपूर्वमन्व	२०	बहुधर्मगणैरभिदा	१०८
नियमो न भवेत्	८२	प्रकृतिरजोचिता	२३	बाधं नार्हन्त्येते	४५
निरवधिनिर्विशेष०	९१	प्रतिबन्धकेत्यदाशि०	२५	बुद्धिः कर्त्री परिणति०	४९
निर्गुणं न परसंगति०	६४	प्रतिबन्धफलत्वं	७३	ब्रह्म कर्तृ जगतोऽस्य	२६
निर्गुणं निगदितं श्रुतिषु	६४	प्रत्यक्षश्चेद्विधिर्भवेत्	८७	ब्रह्मगुणा ये संभृति०	७२
निर्गुणविद्याऽपि गति०	७४	प्रथममिह विविच्य	२२	ब्रह्मणि फलवति	९३
निःश्वसितं हि परस्य	४०	प्रपञ्चोपादाने	३६	ब्रह्मणि विदुषां कला०	१०१
निषिद्धैव तद्वृत्त्या	१०१	प्रबलतरश्रुतिलिङ्ग०	७९	ब्रह्मणो न जगज्जनि०	२
नीरोगत्वात्तावि	७४	प्रबोधमहिमा ह्यज्ञान०	१०२	ब्रह्मण्यात्मश्रुत्यादीनां	२१
नीवारप्रमुखमन्नं	४४	प्राणमानसादि०	४६	ब्रह्म धर्मि यदि हि	२७
नेति नेति पदयुगे	६५	प्रमितस्तनुभृत्	२८	ब्रह्म यदि प्रकृति०	२७
नैरपेक्ष्यतः कारक०	४४	प्रवचनयज्ञदान०	९१	ब्रह्मवदेव मनः	९३
नैव भवत्यपां पुरुष०	५८	प्रव्रज्यादिच्युतिभाग्भ्यो	८८	ब्रह्म हि कृत्स्नमेव	३२
नैवानेकत्वं द्रुतघन०	३७	प्रसिद्धा व्युत्पत्तिः	४	ब्रह्मात्मत्वं त्वप	४७
नोपादानं जगतामादि०	४०	प्राकृतरीतीर्न हि जगति	१०८	ब्रह्मात्मश्रुत्यर्पिते	१३
नोपादानं निर्गुण०	३५	प्राणप्रभञ्जने जल०	९९	ब्रह्मात्माभिन्न०	२
नो यत्सत्त्वे भायु०	१७	प्राणमरुद्वृत्तिलयस्ते	९९	ब्रह्माभिन्नं यदि खलु	३०
पञ्चपञ्चजनकीर्तनं	२४	प्राणाग्निहोत्रलोपो	७८	ब्रह्मेष्टं यदि शास्त्र०	३
पतिसुतमुखसूचितस्य	२६	प्राणालम्बो लघुतर	१५	ब्रह्मैवासौ स्यात्	१२
पदसंयतः प्रकरण०	७४	प्राणोपासावलम्बनं	८६	भवति सतश्चेत्	४३
पर एव हि बृन्द	१८	प्राणोऽयं वायुमात्र	५४	भवति हैरण्यगर्भो	५५
परस्तदात्मा श्रुति०	१४	प्राणो वायुश्च न पृथक्	७९	भवतु शिलादात्मज०	६०
पाण्डित्योक्त्या विहितं	८९	प्राथमिकी किल	२७	भवत्यन्यध्यानात्	१६
पुण्यं विहितं नाहित०	९६	प्राधान्यबलेन सर्व०	७४	भिन्नानां चेत्कुह०	३०
पुरुषे य एषपदपर्य०	११	प्राप्यमुपेयुषां गति०	१०६	भूतजन्मतोऽपि	४६
पुरुषो य एष इति	११	प्रारब्धकर्मणि	७५	भूतविकृतयः कला	१०१
पुरुषो योऽयमजात०	२५	प्रावृडुदञ्चितशैव०	५०	भूतानामधिकृते०	४४
पृथ्वीमयं तदम्मये	९९	फलगुणचोदनाह्वय०	६७	भूमा प्राणो न हि	१४
प्रकरणनामधेय०	६७	फलजननाय कर्म	८५	भोक्तुर्निरूपणात्	७६
प्रकरणमिदमादि०	२१	फलभेदोऽस्यन्तराल०	८१	भोग्यवदन्यदेह०	५८
प्रकरणविभिदा	१०४	फलमिह विधिवाक्ये	७७	भ्रमवान्गर्गकुलोद्भवो	२६

	पृष्ठम्		पृष्ठम्		पृष्ठम्
भ्रमविलसितविधु०	१०७	विदधाति न कश्चन	२९	सदसत्प्रभवं	२५
मनसि लयं श्रुति०	९९	विदुषो यज्ञस्येति०	७२	सदसद्भयतादि०	३९
मम तनुरित्यपि	८०	विद्यैक्येऽपि न कार्यः	६७	सन्तु तल्लक्षणवर्णजा	१९
मरुदनस्तमित०	४२	विधिपरकत्वेनैक्य०	७७	सप्रयोजनकपुरुष०	७०
महदधिगतसल्प०	३०	विधुममखादेकको	५९	समतया मीयते	५५
मा तात्पर्यं भवतु	१९	विनिष्कृतिर्गो	८८	सरसिजदृशः	५७
मा भून्म तुर्जनन०	४७	विभिद्यते चक्षुरादितो	९०	सर्वकार्यपूर्वभावि०	५२
माया खल्वप्यवपुषि	३३	विमृशति यादति	८	सर्वज्ञं खलु जीवं	३१
मार्गगतविघ्नान्यार्चि०	१०५	विलयमियाद्यदि	९९	सर्वश्रुतिर्गच्छति	८५
मूर्धन्यया नाडयैव	१०२	विशिष्टविप्रादिषु	५९	स विगृह्णीतिगिहा०	१८
मृत्युरुपसेचन०	१०	विशुद्धो यज्ञवं	३९	सविशेषामदं	१०७
मैवं गौरः कृशोऽहं	२	विहितस्यापि हि	९६	सा कारणस्य सत	५
य एषोऽन्तरादित्यगः	५	वृक्षनदीहृदार्णव०	१०६	सामानाधिकरण्य०	६८
यज्ञादिगया पृथक्	८८	वेधादिलिङ्गवाक्यैः	७१	सामान्यतया विहिते	७०
यज्ञे विद्वद्भेदः	७२	वैयर्थ्यतो निर्गुण०	२१	सामान्याधि	७१
यतिभिर्यज्ञादि०	८८	वैश्वानरनिरूपणे	८०	सुखदुःखमोहकालिलं	३६
यदि तथा प्रतीक०	८२	व्यतिक्रमः किं	४४	सुखमनुभवतो हि	३४
यदि तदन्त्यकाल०	८२	व्यवधिसहिता	५७	सृष्टौ भूतानां क्रम०	४५
यदि निरवग्रह०	१०९	व्यवहृतिविषया०	३६	सेत्स्यादिव्यवहरणात	६५
यदि वपुरपरं	९७	व्यापकानि तानि	५३	सौगतं मतान्तरं	३९
यदि सृजति फलेप्सुता	३४	व्यावर्तकमुदीथपद०	६८	सौधोपरिगृह०	६३
यस्मादेवंशब्दः	६५	व्रीहियवादिरूप०	६५	स्तुत्यवधारण०	६६
या ब्रह्मप्रतिबिम्बता	५१	शतक्रतुवचःक्रमो	८	स्थानयुक्तपुरुष०	७२
ये शाटीपेटी०	३७	शुक्रं प्रवर्ध्यमत्र	७३	स्थालीपुलाकरीत्या	७५
योगरूढितोऽपि काऽपि०	२३	शैवादीनामनुमान०	४०	स्फुटमभिदैव	९३
योगाद्वाक्ति प्रकृत०	८४	श्रवणादिकानि सकृ०	९२	स्यादुपासा चोदिता	९४
रजनीषु च रश्मि०	१०३	श्रुत्युदितापि नुता	४८	स्वभुजङ्गनयात	१
रजनीष्वपि सन्ति	१०३	श्रौतलिङ्गेन लिङ्गकैः	७९	स्वतन्त्रमपरं सहाय०	३२
रसतमादिकहीन०	८४	श्लेषणमात्रमत्र	६१	स्वपनमधिगतो यः	६३
रूढिरस्य सांख्य०	१६	संकोचं संनिधिः	८०	स्वप्रधनियात	३८
रूपमिदं परतः	१०७	संख्यया न खलु	२४	स्वप्रपदार्थाः खलु	६२
लयजननवतोः	६३	संततचिन्मात्रस्तु	४८	स्वप्रधानमिह खलु	६५
लोपस्तस्य तदन्यार्थ०	७८	स ईशः परः साधक०	६	स्वरूपनाशोऽस्तु	१००
वक्तुमध्ययनशालि०	१९	सगुणविदां गतिरभिहिता	१००	हरिपदतेजसोः	४२
वचसा च भवंति	१०६	सगुणविदामपि	१००	हानं विरजात्यये	७३
वपुरपरमितानपि	९८	सगुणास्वपि प्रकरण०	७४	हानश्रुतावुपायन०	७१
वाक्चक्षुःप्रभृतीदं	५६	सति कतोः कर्माणि	९	हार्दत्वप्रत्यभिज्ञानात्	७८
वि...परीक्षामिह	९५	सत्ववृत्तेरुद्भवे	९५	हिमकिरणाग्निवदेव	५९
वितरति फल०	९४				

VENKATESWARA ORIENTAL INSTITUTE
LIBRARY
TIRUPATI

॥ श्रीः ॥

॥ श्लोकवृत्तानुक्रमणिका ॥

	पृष्ठम्		पृष्ठम		पृष्ठम्
अनङ्गक्रीडा	52—53	उपेन्द्रवज्रा	14	चित्रपदा	66
अनुष्टुप्	2	उर्वशी	55	चित्रा	94
अपरवक्त्रम्	30	ऋषभगजविलसितम्	61	जघनचपला	76
अपराजिता	76—77	एकरूपा	47	जघनविपुला	68—69
अम्बुरुहम्	50	एला	74—75	जलदा	48
अलोला	56—57	औपच्छन्दसिकम्	20; 87–88	जलधरमाला	33
अश्वगतिः	40—41	कलभाषिणी	28—29	जलोद्धतगतिः	32
अश्वललितम्	92—93	कविराजविराजितम्	109–110	जीमूतमाला	71
असंबाधा	45—46	काञ्चनमाला	35	तन्वी	108
आपातालिका	88	कुरबकमाला	14—15	त. विपुला	94
आर्यागीतिः	73	कुसुमविचित्रा	60	तामरसम्	59
आर्यागीतिभेदः	75	कुसुमितलता	37	तोटकम्	18
इन्द्रवंशा	7	कोकिलकम्	95—96	दक्षिणान्तिका	88
इन्द्रवज्रा	5	क्षमा	63	दोधकम्	27
इन्द्रवज्रावसन्ततिल-कोपजातिः	85	खेचरपुरम्	84—85	द्रुतमध्या	107
इन्द्रवज्रोपेन्द्रवज्रोप-जातिः	97	गीतिः	72	द्रुतविलम्बितम्	10
इन्द्रवदना	9—10	चञ्चरीकावली	36—37	नर्कुटकम्	23—24
उत्पलमालिका	58	चन्द्रकला	70	नवनन्दिनी	36
उत्सुकम्	53—54	चन्द्रलेखा	54—55	नवमालिनी	80
उदीच्यवृत्तिः	89	चन्द्रवर्त्म	64	नाराचकम्	99
उद्धता	95	चन्द्रश्रीः	49—50	निशा	21—22
उद्गीतिः	74	चन्द्रिका	39	पञ्चचामरः	34—35
उपगीतिः	73	चपलवक्त्रम्	79	पथ्यार्या	67
उपचिता	96	चपलार्या	75	पथ्यावक्त्रम्	78
उपस्थिता	70—71	चम्पकमाला	72	पुष्पिताग्रा	26
		चरणाकुलकम्	96	पृथ्वी	8
		चारुहासिनी	44	प्रमद्वकम्	42

	पृष्ठम्
प्रभा	63—64
प्रमाणिका	81
प्रमिताक्षरा	29
प्रमुदितवदना	57
प्रवृ....	90
प्रहरणकलिका	97—98
प्रहर्षिणी	6
प्राच्यवृत्तिः	89
प्रियंवदा	42—43
प्रियकान्ता	38
भद्रकप	70
भद्रविराट्	73—74
भाद्रिका	105
भ. विपुला	97
भुजङ्गप्रयातम	5—6
भुजङ्गविजृम्भितम्	45
भोतिलकम्	60
भोगवती	103
भ्रमरविलसितम्	49
मङ्गलमहाश्रीः	108–109
मञ्जुभाषिणी	28
मञ्जुवादिनी	58—59
मणिमाला	31
मणिमालिका	92
मत्तकोकिलः	2—3
मत्तमयूरो	17
मत्तहासिनी	43—44
मत्ता	30—31
मत्तेभविक्रीडितम	25—26
मदलेखा	31—32
मनोरमा	82
मन्दाकिनी	34
मन्दाक्रान्ता	18—19
मन्दारदाम	20—21
मयूरसारिणी	52
महती मणिमाला	105
महतोज्वला	104
महत्प्रभदकम्	106
महालक्ष्मी	62—63
महास्रग्धरा	81
माणवकम	99–100
मात्रासमकम्	89—90
मालिनी	93
मालिनी	7–8; 79
मुखचपला	76
मत्तविपुला	68
मेघविस्फूर्जिता	16
मौक्तिकमाला	43
युगविपुला	80
योगिनी	25
रत्नभषणम	24
रथोद्धता	19; 90
र. विपुला	94—95
रसोद्धता	83
रुचिरा	12
ललितम्	103
लालिता	67
लाटी	82
वंशपत्रपतितम्	32—33
वंशस्थम	9
वंशस्थेन्द्रवंशोपजातिः	86
वक्त्रम	78
वसन्ततिलकम्	4—5
वाणिनी	85—86
वानोमी	40
वितानम	100–101
विद्युन्माला	21
विपरीतपथ्यावक्त्रम	78—79
विपुलार्या	68
विलोला	101
विश्लोकः	93—94
वीरविलसितम	101
वृत्तम	38–39; 107
वैतालीयम	86—87
वैश्वदेवी	11—12
शान्तिः	23
शार्दूलविक्रीडितम्	3
शालिनी	12—13
शिखण्डवृत्तम	102
शिखरिणी	4
शुद्धविराट्	51
श्येनिका	53
श्रीवृत्तम	62
सिंहरुता	46
सकेसरम	100
सन्दरम	48—49
समञ्जलिका	11
सुमुखी	99
सुवदना	60—61
सोरभकम	106
स्वंवविपुला	80—81
स्फुटम	77
स्रग्धरा	1; 2
स्रग्धरामन्दाक्रान्तोपजातिः	84
स्रग्धराशार्दूलविक्रीडितोपजातिः	87
स्रग्विणी	15
स्वागता	26—27
हंसगीता	44
हरनर्तकम	65
हरनृत्तम	109
हरिणी	16—17
हरिणीप्लुतम्	104
हलमुखी	71—72

॥ श्रीः ॥

श्रीगणेशाय नमः ॥

श्रीवेदव्यासाय नमः ॥

॥ तत्त्वकौस्तुभः ॥

॥ भट्टोजिदीक्षितविरचितः ॥

प्रथमः परिच्छेदः ।

विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत् ।
चरीकर्ति बरीभर्ति संजरीहर्ति लीलया ॥

केलदीवेङ्कटेन्द्रस्य निदेशाद्विदुषां मुदे ।
ध्वान्तोच्छित्तौ पटुतरस्तन्यते तत्त्वकौस्तुभः ॥

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
शांकरादपि भाष्याब्धेस्तत्त्वकौस्तुभमुद्धरे ॥

इह खलु केचित् पाञ्चरात्राद्यागमांस्तदनुसारिपुराणभागांश्चोपजीव्य तदधिकारितत्त्वमपर्यालोचयन्तः श्रौतस्मार्तमार्गं त्यजन्ति त्याजयन्ति च । तान् सम्यक् शिक्षयितुं तन्त्राद्यधिकारी तावन्निरूप्यते । तत्रायं सिद्धान्तः—

शापाद्वा गौतमादीनां पापाद्वा महतो नराः । ये गता वेदबाह्यत्वं ये च संकीर्णयोनिजाः ॥
तेऽधिक्रियन्ते तन्त्रादौ स्त्रीशूद्राश्च यथायथम् ।

तथा हि कौर्मे चतुर्दशाध्याये—

तेषां मायावशाज्ज्ञातं गोवधं गौतमो मुनिः । केनापि हेतुना ज्ञात्वा स्वशापात्यन्तकोपनः ॥

भविष्यथ त्रयीबाह्या महापातकिनः शठाः । इत्यादिना गौतमशप्तान् प्रस्तुत्य,

सर्वे संप्राप्य देवेशं शंकरं विष्णुमव्ययम् । अस्तुवंस्तादृशैः स्तोत्रैः...

इत्यादिना शिवकेशवसंनिधौ तेषां गतिप्रार्थनां प्रदर्श्य,

तस्माद्वै वेदबाह्यानां रक्षणार्थं च पापिनाम् । विमोहनाय शास्त्राणि करिष्यावो वृषध्वज ॥
एवं संचोदितो रुद्रो माधवेन मुरारिणा । चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ॥
कापालं गारुडं शाक्तं भैरवं पूर्वपश्चिमम् । पाञ्चरात्रं पाशुपतं तथाऽन्यानि सहस्रशः ॥

इत्युक्तम् । अत्र च गौतमशप्तानां वेदबाह्यानां कथंचिद्भूतिग्रामर्थे आगमप्रणयनेऽपि तत्र प्ररोचनार्थं चतुर्षु वेदेषु परमपुरुषार्थमलभमानः शाण्डिल्यः इमां विद्यामधिगतवानित्यादिक्रमेण तन्त्राणामवैदिकत्वं वैदिकमार्गादाधिक्यं बहुधा वर्णितमिति । एतावता विमोहनायेत्युक्तिः ॥

कौर्मे एकादशाध्याये—

कापालं पाञ्चरात्रं च यामलं वाममार्हतम् । एवंविधानि चान्यानि मोहनार्थानि तानि तु ॥
ये तु शास्त्राभियोगेन मोहयन्ति च मानवान् । मया सृष्टानि शास्त्राणि मोहायैषां भवान्तरे ॥

इत्यादि । अत्रापि मोहनायेति प्राग्वदाख्येयम् ॥

तथा स्कान्देऽपि यज्ञवैभवखण्डे गौतमशापो दर्शितः—

पाञ्चरात्रे च कापाले तथा कालामुखेऽपि च । शाक्ते च दीक्षिता यूयं भवत ब्राह्मणाधमाः ॥
बौद्धे चार्हन्मते चैव तथा पाशुपतेऽपि च । इत्यादि ॥

ब्रह्मशापस्तु पराशरपुराणे तृतीयाध्याये दर्शितः—

आयुधैः शङ्खचक्राद्यैस्त्वदीयैरङ्किता जनाः । अग्नितप्तैर्महामोहाङ्केयुश्चांसयोर्द्वयोः ॥
त्वदीये पाञ्चरात्रे च तन्त्रे भागवते तथा । दीक्षिताश्च द्विजा नित्यं भवेयुर्गर्हिता हरे ॥ इति ।

भृगुदधीचिशापावपि सौरपुराणादिषु द्रष्टव्यौ । तथा पापविशेषस्यापि तन्त्रमार्गप्रवेशहेतुत्वं पाराशर्ये एकादशेऽध्याये दर्शितम्—

शङ्खचक्रगदापद्मवज्रपाशाङ्कुशादिभिः । अङ्किताश्च भविष्यन्ति मनुष्याः पापकर्मिणः ॥ इति ।

पाञ्चरात्रे च कापाले पाषण्डेष्वखिलेष्वपि । दीक्षिताश्च भविष्यन्ति मनुष्याः पापकर्मिणः ॥
इति वासिष्ठे ॥

लैङ्गे नवमाध्याये—

अङ्किताश्च भविष्यन्ति देवतायुधलाञ्छनैः । नराणां नामरूपाभ्यां युगान्ते समुपस्थिते ॥

पाञ्चरात्रं प्रशंसन्ति केचिद्भागवतं मुने । केचित्कापालमिच्छन्ति केचित्पाशुपतं मुने ॥
[1]केचिद्बौद्धं प्रशंसन्ति [2]केचिल्लैङ्गं परं मुने । अन्यानि यानि शास्त्राणि विरुद्धानि महामुने ॥
[3]स्वलप्रमाणभूतानि वेदेन मुनिसत्तम । तान्येव श्रद्धया युक्ताः परिगृह्य द्विजातयः ॥
आचरन्ति महापाप्म युगान्ते समुपस्थिते ।

साम्बपुराणे—

श्रुतिभ्रष्टः श्रुतिप्रोक्ते प्रायश्चित्ते भयं गतः । क्रमेण श्रुतिसिद्ध्यर्थं मनुष्यस्तन्त्रमाश्रयेत् ।
धर्मशास्त्रे पुराणे च प्रोक्तं हि मरणान्तिकम् । प्रायश्चित्तं मनुष्याणां पापिष्ठानां सुदारुणम् ॥
भयं दुर्बलचित्तानां मरणाज्जायते भृशम् । तेषामेवाभिरक्षार्थं [4]खलानां तन्त्रमुक्तवान् ॥ इति ।

तथा तत्रैव—

पाञ्चरात्रं भागवतं तन्त्रं वैखानसाभिधम् । वेदभ्रष्टान्समुद्दिश्य कमलापतिरुक्तवान् ॥ इति ।

सूतसंहितायां मुक्तिखण्डे चतुर्थाध्याये—

अत्यन्तं पतितानां हि द्विजानां वेदमार्गतः । पाञ्चरात्रादयो मार्गाः कालेनैवोपकारकाः ॥ इति ।

पाञ्चरात्रादीनां न स्मृतिपुराणसाम्यम्, किं तु पतितादीन् प्रत्येवानुष्ठापकत्वम्, काल-विलम्बेन कथंचिदुपकारकत्वं चेति तस्मिन् प्रघट्टके माधवः ।

तथा सूतसंहितायामेव चरमाध्याये—

श्रुतिपथगलितानां मानुषाणां हितार्थं हरिरपि मुनिमुख्यः प्राह तन्त्रं स्वकीयम् ।
श्रुतिपथनिरतानां तन्न सेव्यं हि नित्यं श्रुतिपथसममार्गो नैव सत्यं मयोक्तम् ॥

पाञ्चरात्राद्यागमानां श्रुत्यनधिकृतपतितादिमात्राधिकारिकत्वं दर्शयति प्रकृतप्रघट्टकव्या-ख्यायां माधवः । यज्ञवैभवखण्डे द्वादशाध्याये तव्याख्यायां च स्पष्टमेतत् ॥

तथा [5]संकरजातीनामप्यधिकारः कौर्मे द्वाविंशे दर्शितः—

अथांशोः सात्वतो नाम विष्णुभक्तः प्रतापवान् । महात्मा दाननिरतो धनुर्वेदविदां वरः ॥
स नारदस्य वचनाद्वासुदेवार्चने रतः । शास्त्रं प्रवर्तयामास कुण्डगोलादिभिः श्रितम् ॥
तस्य नाम्ना तु विख्यातं सात्वतं नाम शोभनम् । प्रवर्तते महाशास्त्रं कुण्डादीनां हितावहम् ॥
इति । स्त्रीशूद्राधिकारो भागवते दशमस्कन्धे दर्शितः—
त्रिवक्रायाश्चोपक्रोशपुत्रः कुब्जमनुव्रतः । शिष्यः साक्षान्नारदस्य ददौ चित्तमनुत्तमम् ॥

---

1. केचिदैन्द्रं 2. केचिद्वैगम्बरं 3. स्वतः प्रमाणभूतेन 4. खस्वई 5. कुण्डानाम्०

तेनोक्तं सात्त्वतं तन्त्रं यज्ज्ञात्वा मुक्तिभाग्भवेत् । यत्र स्त्रीशूद्रदासानां संस्कारो वैष्णवः स्मृतः ॥ इति । हेमाद्रौ प्रायश्चित्तकाण्डे पद्मपुराणवचनमुदाहृतम्—

शृणु राम महाबाहो लिङ्गचक्रादिधारिणाम् । शूद्रधर्मरतानां हि तेषां नास्ति पुनर्भवः ॥
विप्रस्यैतद्विगर्ह्यत्वात्प्रायश्चित्तमुदीरितम् ॥ इति ।

ब्रह्मपुराणे दशमेऽध्याये—

तप्तमुद्रा ह्यनन्त्यजाय हरिणा निर्मिता पुरा । भूदेवस्तप्तमुद्रां तु चिह्नं कृत्वा विमूढधीः ॥
इह जन्मनि शूद्रः स्यात्प्रेत्य श्वा च भविष्यति । इति ।

आश्वलायनस्मृतौ षष्ठेऽध्याये—

शिवकेशवयोश्चिह्नं चक्रशूलादिकं द्विजः । न धारयेत मतिमान्वैदिके वर्त्मनि स्थितः ॥
व्यक्तवैदिककर्माणो नास्तिका नटनर्तकाः । ते धारयेयुश्चिह्नानि शिवयोर्भिन्नबुद्धयः ॥
वेदाक्षरविहीनानां नास्तिकानां द्विजन्मनाम् । विहितं धारणं नित्यं चिह्नानां केशवेशयोः ॥
तेषां भिन्नधियां किंचित्सुगत्यर्थं शिवः पुरा । कृपया तच्चकारेह पुराणेपूदितं च तत् ॥ इति ।

किंचिदिति तन्त्रमित्यर्थः । इहेति स्मृतिष्वित्यर्थः । चकारो भिन्नक्रमः; पुराणेषु चेति योज्यः । अत एव स्मृतिपुराणयोरपि क्वचित्तन्त्रसमानविषयत्वं पराशरपुराणे दशमेऽध्याये स्पष्टीकृतम्—

क्वचित्कदाचित्स्मर्तारस्तन्त्रार्थं च ब्रुवन्ति वै । क्वचित्तन्त्रानुरोधेन धर्मं पौराणिका अपि ॥
वदन्ति तादृशोऽशश्च ग्राह्यस्तन्त्रावलम्बिना ॥ इति ।

स्कान्देऽपि—

तन्त्रावलम्बनेनैव पुराणानि च कानिचित् । साक्षाद्वेदविरुद्धार्थं प्रवदन्ति क्वचित्क्वचित् ॥
अधिकारिविभेदेन नैव वेदपरं प्रति । इति ।

अधिकारीति भ्रष्टाद्यधिकारीत्यर्थः । अत एव वेदाधिकारिणां तप्तमुद्रादिनिषेधकं तद्धारणे प्रायश्चित्तविधायकं प्रायश्चित्ताननुष्ठाने नरकादिबोधकं च वचनसहस्रं तत्र तत्रोपलभ्यते । दिङ्मात्रं तु प्रदर्शयामः ॥

बृहन्नारदीये चतुर्दशाध्याये—

यस्तु संतप्तशङ्खादिलिङ्गचिह्नतनुर्नरः । स सर्वयातनाभोगी चण्डालः कोटिजन्मसु ॥
तं द्विजं तप्तशङ्खादिलिङ्गाङ्किततनुं नृप । संभाष्य रौरवं याति यावदिन्द्राश्चतुर्दश ॥
चक्राङ्किततनुर्यत्र तत्र कोऽपि न संवसेत् । यदि तिष्ठेन्महापापी सहस्रब्रह्महा भवेत् ॥
गङ्गास्नानरतो वाऽपि अश्वमेधरतोऽपि वा । चक्राङ्किततनुं स्पृष्ट्वा रौरवं परमश्नुते ॥

चक्राङ्किततनुं दृष्ट्वा पश्येत्सूर्यं जले स्थितः । जपेच्च पौरुषं सूक्तमन्यथा रौरवं व्रजेत् ॥
चक्राङ्किततनुर्वाऽपि राजन् लिङ्गाङ्कितोऽपि वा । नाधिकारी परिज्ञेयः श्रौतस्मार्तेषु कर्मसु । इति ।

कौर्मे उपरिभागे षोडशाध्याये—

पाषण्डिनो विकर्मस्थान्धर्माचार्यांस्तथैव च । पाञ्चरात्रान्पाशुपतान्वाङ्मात्रेणापि नार्चयेत् ॥

तत्रैवैकोनविंशेऽध्याये श्राद्धवर्ज्यब्राह्मणप्रस्तावे—

बौद्धश्रावकनिर्ग्रन्थाः पाञ्चरात्रविदो जनाः । कापालिकाः पाशुपताः पाषण्डा ये च तद्विधाः ॥
इति । तथा पूर्वार्धे सप्तविंशेऽध्याये—

वामाः पाशुपताचारास्तथा वै पाञ्चरात्रिकाः । भविष्यन्ति कलौ तस्मिन्ब्राह्मणाः क्षत्रियास्तथा ॥
इति । तथा हेमाद्रौ श्राद्धकाण्डे श्राद्धवर्ज्यब्राह्मणप्रस्तावे 'बौद्धश्रावक—' इत्यादि समनन्तरोक्तं कौर्मवचनमुदाहृत्य प्रवट्टकान्तरे,

विड्भक्षाश्चैव ये केचित्कपालकृतभूषणाः । शैवाः पाशुपताश्चान्ये पाञ्चरात्रास्तथापरे ॥
पाशब्देन त्रयीधर्मः पालनाज्जगतः स्मृतः । तं खण्डयन्ति यस्मात्ते पाखण्डास्तेन हेतुना ॥
इति ब्रह्मवैवर्तवचनमुदाहृत्य पाञ्चरात्राणां विड्भक्षादिसाकक्षत्वं पाखण्डत्वं च स्फुटीकृतम् । तथा प्रायश्चित्तकाण्डे पुराणान्तराण्युदाहृतानि । तद्यथा वायुपुराणे—

ब्राह्मणो यदि मोहेन तापयेद्वह्निमुद्रया । न कर्मार्हो भवेदत्र स वै पाखण्डसंज्ञितः ॥

लिङ्गपुराणे—

शङ्खचक्रे तापयित्वा यस्य देहः प्रदह्यते । स जीवन्कुणपस्त्याज्यः सर्वधर्मबहिष्कृतः ॥

आदित्यपुराणे—

वेदेषु यज्ञभागेषु यस्य नास्त्यधिकारिता । स तापयित्वा चक्रादीन्धारयेत्स्वभुजद्वये ॥
ब्राह्मणो यदि मोहेन धारयेत्तन्मुद्रिकाः । तस्य दर्शनमात्रेण कुर्यात्सूर्यावलोकनम् ॥

वह्निपुराणे—

पूर्वजस्य तनुं दग्ध्वा शङ्खचक्रादिभिः पृथक् । न तस्य निष्कृतिर्दृष्टा स्नानदानजपादिभिः ॥
तस्य निष्कृतिरुत्पन्ना पाराशर्येण भाषिता । केशान्संवापयित्वाऽथ पुनः कर्म समाचरेत् ॥
गर्भगोलात्समुद्धृत्य गर्भाधानादिपूर्वकम् । षष्ट्याब्दत्यैव कृच्छ्राणां प्रायश्चित्तमुदीरितम् ॥

कौर्मे—

अज्ञात्वा मुखजेभ्यस्तु मुद्रादग्धेभ्य आदरात् । सुवर्णमात्रसंग्राही प्राजापत्यं समाचरेत् ॥

मानवोपपुराणे चतुर्दशोऽध्याये—

आयुधैः शङ्खचक्राद्यैर्न दहेच्च कदाचन । इति ।

प्रयोगपारिजाते पृथ्वीचन्द्रोदयादौ तु विष्णुशातातपहारीतादिवचनान्युदाहृतानि । यथा विष्णुः—

शङ्खचक्राङ्कनं च गीतनृत्यादिकं तथा । एकजातेरयं धर्मो न जातेः स्याद्द्विजन्मनः ॥
यथा श्मशानजं काष्ठमनर्हं सर्वकर्मसु । तथा चक्राङ्कितो विप्रः सर्वकर्मसु गर्हितः ॥
शङ्खचक्रं मृदा यस्तु कुर्याच्चक्रायसेन वा । स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः ॥

शातातपः—

अङ्गेषु नाङ्कयेद्विप्रो देवतायुधलाञ्छनैः । अङ्कयेद्यदि वा मोहात्पतत्येव न संशयः ॥

हारीतः—

राम संदग्धगात्राणां न स्यात्पारत्रिकं शुभम् ॥

बोधायनः—

नाङ्कनाय दहेद्देहं दहेच्चेत्कामकारतः । नाधिकुर्वीन्त दग्धाङ्गाः श्रौतस्मार्तेषु कर्मसु ॥

यमः—

नाङ्कनाय दहेद्गात्रं देवतायुधलाञ्छनैः । दहनाच्छेखनाद्विप्रः पातित्यं याति तत्क्षणात् ॥

इत्यादि । यत्तु माध्वाः —

वैष्णवं नारदीयं तु तथा भागवतं शुभम् । गारुडं च तथा पाद्मं वाराहं शुभदर्शने ॥
षडेतानि पुराणानि सात्त्विकानि मतानि मे । ब्रह्माण्डं ब्रह्मवैवर्तं मार्कण्डेयं तथैव च ॥
भविष्यद्वामनं ब्राह्मं राजसानि निबोध मे । मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कान्दं तथैव च ॥
आग्नेयं च षडेतानि तामसानि मतानि मे ॥

इति वचनानि परिकल्प्य 'तामसा नरकायैव' इत्यादि पठित्वा मात्स्यकौर्मादेरप्रामाण्यमेवेति जल्पन्ति, तत्तुच्छम्, पुराणानां क्वचिदप्रामाण्ये त्वदुदाहृततामसादिविभागवाक्यस्यैव लाघवादप्रामाण्यौचित्यात् । न चास्य बाधकाभावात् प्रामाण्यम्, 'इदं पुराणं मुक्त्वैकं नास्त्यन्यत्पावनं परम्' इत्यादिकौर्मादिपठिततत्तत्पुराणोत्कर्षप्रतिपादकानेकवाक्यानामेव बाधकत्वात्,

मदुक्तसंहिता तु या तया विरुद्धमस्ति चेदनर्थकं हि तद्धि वचः प्रयोजनाय न ॥

इति सूतसंहिताचरमाध्यायवचनाच्च, भूयसामनुग्रहस्य न्याय्यत्वाच्च । किं च सात्त्विकाभिमते गारुडे शिवरहस्ये पाद्मे शिवराघवसंवादाद्यनेकप्रदेशेषु च लैङ्गादिभ्योऽप्यधिकं विभूतिरुद्राक्षादि-

माहात्म्यकथनं व्यावहारिकशिवोत्कर्षव्यवस्थापनं विशुद्धाद्वैतप्रतिपादनं च दृश्यते। प्रसिद्धं चैतत् अथर्वशिखाथर्वशिरःश्वेताश्वतरमाण्डूक्यकालाग्निरुद्ररुद्राक्षजाबालाद्युपनिषत्स्वपि। तथा च श्रुतिमूलैः सात्त्विकपुराणैश्च मात्स्यादीनामप्यर्थसाम्ये सति कथं प्रामाण्याप्रामाण्यविभागः। अपि च मध्वभाष्येऽपि तत्र तत्र स्कान्दादेरुदाहृतत्वाच्च्याघातः। तथा हि— प्रथमसूत्रे 'नारायणाद्विनिष्पन्नम्' इति, जन्मादिसूत्रे 'उत्पत्तिस्थितिसंहाराः' इति, शास्त्रयोनित्वाधिकरणे 'ऋग्यजुरित्यादि' स्कान्दम् इत्युदाहृतम्। तथा शास्त्रयोनित्वाधिकरण एव 'श्रुतेस्मृतिसहायं यत्' इत्यादि कौर्ममित्युदाहृतम्। किं च पाद्मे शिवराघवसंवादे कौर्मपुराणप्रशंसा भूयसी दृश्यते। तत्रैकादशेऽध्याये—

द्विजेन वाच्यमानं तु पुराणं श्रुतवानिदम्। हृदये पद्ममेकं तु द्विजेरितमतिष्ठत॥
परात्परतरं यान्ति नारायणपरायणाः। न ते तत्र गमिष्यन्ति ये द्विषन्ति महेश्वरम्॥

इति पञ्चविंशाध्यायस्थं कौर्मपुराणवचनमुदाहृतम्। तथा तत्रैव—

कौर्मोक्तं यत्पुराणं तदेवयोरभिदावहम्। शृणोति यस्तत्प्रथमं तस्य पापं विनश्यति॥

इत्यादि। एवं द्वादशाध्यायेऽपि भूयसी कौर्मप्रशंसा दृश्यते। सर्वपुराणानामविगीतमहाजनपरिग्रहोऽप्येवं संगच्छत इति दिक्। यद्यपि विरोधाधिकरणे शिष्टाकोपाधिकरणे च पाञ्चरात्रादीनामप्रामाण्यमेव भाष्ये निर्णीतम्, तथाऽपि श्रुत्यधिकारिणं प्रति अननुष्ठापकत्वमात्रेण तथोक्तमिति प्रामाणिकाः। दृश्यते ह्यदृष्टदोषोपवर्णनकाले व्रीहिशास्त्रं पक्षे अप्रमाणमिति तान्त्रिकाणां व्यवहारः। तद्विषयीभूतश्च विकल्पः क्वचिदैच्छिकः। प्रकृते तूक्तवचनबलाद्व्यवस्थित इत्यन्यदेतत्। अत एवोत्तरतन्त्रे उत्पत्त्यसंभवादित्यधिकरणेषु भाष्यभामत्यादौ आगमानामप्यविरुद्धांशे प्रामाण्यं स्वीकृतम्। यस्तु विरुद्धोंऽशः तस्यापि स्मृतिस्थस्येव कथंचिदविरुद्धेऽर्थे तात्पर्यं कल्प्यम्। अत एव,

सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा। आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः॥

इति भारतवचनम्। तथा आगमानुपक्रम्य 'अधिकारिविशेषेण प्रवृत्तो न हि संशयः' इत्यादिमानवपुराणोक्तिश्च संगच्छते। भागवतेऽपि दशमस्कन्धे चत्वारिंशाध्याये अक्रूरस्तोत्रे 'त्रय्या च विद्यया केचित्' इत्युपक्रम्य,

त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम्। बह्वाचार्यविभेदेन भगवन् समुपासते॥

इत्यादिनाऽधिकारिविभेदेनैव प्रामाण्यं विभावितम्। स्पष्टं चैतत् यज्ञवैभवखण्डे द्वात्रिंशेऽध्याये।

यत्तु पाद्मे उत्तरखण्डे विंशेऽध्याये केषुचिन्माध्वपुस्तकेषु पठ्यते—

शङ्खं वा शङ्खचक्रे वा तथा पञ्चायुधानि वा। धारयित्वैव विधिवद्दाह्यं कर्म समारभेत्॥
सुदर्शनं धारयित्वा वह्नितप्तं द्विजोत्तमः। उपनीय विधानेन तस्मात्कर्मसु योजयेत्॥

इति तन्नानादेशस्थबहुपुस्तकेष्वदर्शनादप्रामाणिकमेव। प्रामाणिकाभ्युपगमेऽपि तत्रापि प्रागुक्त-

[1]भगवद्वचनानुरोधेन वेदाक्षरविहीनब्राह्मण एवाधिकारी बोध्यः । द्विजोत्तमशब्दस्य क्षत्रियवैश्याभ्यामुत्तमतया निरक्षरब्राह्मणेऽपि संभवात्, प्रायश्चित्तपराङ्मुखेभ्यः पापैकनिरतेभ्यस्तन्त्र-[2]तत्परस्योत्तमत्वाच्च । एतेन 'दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्' इत्यादि व्याख्यातम् । कश्चित्तु 'चरणं पवित्रम्—' इत्यादिश्रुतेः सुदर्शनपरतया व्याचख्यौ, 'पवित्रं चरणं चक्रं लोकद्वारं सुदर्शनम्' इति निघण्टुरिति चोदाजहार । तत्रेदं वक्तव्यम्— श्रुतिस्तावदपाघेष्टिपरैव, 'अपाघा अनुवित्तयो नाम' इत्युत्तरसंदर्भानुरोधात् । अभ्युपेत्यापि ब्रूमः— अस्तु श्रुतिश्चक्रधारणस्यापि विधात्री, तथाऽप्युक्त एव तत्राधिकारी । इष्यते हि गौण्याप्यश्वमेधादेः स्त्री[3]प्राणादिगतेन कलिनिषिद्धपरिगणनादिना संकोचः, अन्यथा मुख्यस्याप्यश्वमेधः स्यात्, स्याच्च पतितस्यापि तत् । किं च त्वदुक्तरीत्या चरणशब्दस्य चक्रपरत्वे स्थिते तन्निषेधपरतयाऽपि श्रौतलिङ्गानि सुवचानि । तथा हि— 'गोघ्नातत्करत्वात्' इत्यादिश्रुतिश्चक्रधारणे प्रायश्चित्तपराऽस्ति । न च स्वरूपतश्चक्रस्य पापजनकत्वानुपपत्तिः, धारणपरत्वे तु लक्षणा स्यादिति वाच्यम् . चक्रधारणस्येव धार्यमाणचक्रस्यापि अधर्मजनकत्वात् । फलसाधारण्याय प्रयोजकत्वमात्रं पञ्चम्यर्थ इति भर्तृहरिप्रभृतिभिः सिद्धान्तितत्वाच्च । युक्तं चैतत् ; चरणपदस्य दुराचारपरत्वे लक्षणापत्तेः, गोघ्नादित्यादिवैधर्म्यस्य[3] आपत्तेश्च । गोबलीवर्दन्यायाश्रयणेऽपि क्लिष्टता, 'यन्मे गर्भः' इत्यादिना गतार्थता च । तस्मात् गोहननादिनिषेध्यविशेषश्रुत्यपाठाच्चक्रपरतैवोचिता । 'अर्चाः पुंसि' इत्यादाविव बहुवचनादाद्यर्थविगतिमाश्रित्य शङ्खादेरपि संग्रह इह सुवचः, चरणेभ्यश्चक्रशङ्खगदादिभ्य इत्यर्थात् । अपि च 'वडेत्य वपन्ते इन्द्रागच्छ' इत्यादौ स्वेच्छामात्रेणोपक्रमोपसंहारनिगमनिरुक्तव्याकरणादिविरुद्धार्थान् वदन्तं केन स्याद्वाक्यस्यार्थत्रयं तत्रावस्थां च कुर्वाणं वैदिकाभासं माध्वं प्रति 'पवित्रं ते चमूषत्' इत्यादयो बह्व्यः श्रुतयस्तन्मुद्राविषेधपरतया सुयोज्याः । वेदविप्लावनप्रयुक्तप्रत्यवायभयात्तु न तथा योज्यन्ते । [4]अहतये पञ्चसाम इति न्यायेन पिशाचभाषया पिशाचं बोधयितुं दिङ्मात्रमुक्तम् । न तु वास्तवाभिप्रायेणेति क्षन्तव्यमिदं साहसिकत्वं गुणगृह्यैः सूरिभिः ॥

इति भट्टोजिदीक्षितविरचिते तत्त्वकौस्तुभे
प्रथमः परिच्छेदः ।



1. भूयोऽनुरोधेन 2. तत्परस्योक्तत्वाच्च 3. वैयर्थ्यापत्तेश्च 4. अहृदयवाचां

बन्धनात्तु तेषां मूलं केनचिदृष्टम्। आचारपरम्परामात्रमेव दृष्ट्वा मन्वादिभिरपि सदाचारः प्रमाणमित्येवं परोक्षरूपेणाभिधानात्प्रामाण्यमनुमीयत इति मन्यामहे। तत्र सैवान्धपरम्परा स्यात्; धर्मव्यतिक्रमसाहसदर्शनाच्च सदाचारमात्राच्छक्यं धर्मोपसानमिति पूर्वः पक्षः॥

सिद्धान्तस्तु— धर्मबुद्ध्या वैदिकैरनुष्ठानमस्ति वैदिकत्वेऽनुपपन्नम्। व्यतिक्रमसाहसदर्शनं तु रागद्वेषादिनिबन्धनत्वान्न धर्मबुद्धिनिबन्धनम्। धर्मबुद्धिनिबन्धनस्य चाचरितस्यागृहीतमूलकारणत्वात् श्रुतिस्मृतिविरोधदर्शनाच्च धर्मलिङ्गत्वाव्यभिचारः। मन्वादिभिस्तु लाघविकैर्यदि नाम स्वरूपेणानिबध्य सामान्यात्मना शिष्टाचारः प्रमाणमित्युक्तम्; नैतावता कश्चिद्दोषः। तस्मात्स्मृतिवदाचाराणामपि धर्मे प्रामाण्यं सिद्धम्॥

तद्विदाम्। आचारश्चैव साधूनामात्मनस्तुष्टिरेव च' इत्यादिवचनैः श्रुतिस्मृतिवदाचारस्यापि प्रामाण्यप्रतिपादनादित्यत्राह— आचारपरम्परेति। यदि वसन्तोत्सवादिमूलभूतान् वेदान् मन्वादयः पश्येयुः तदाऽष्टकादिवद्विशिष्य तानपि निबध्नीयुः। विशिष्यानिबन्धनात् ज्ञायते— मूलभूतान् वेदानदृष्ट्वाऽपि तदानीन्तनाचरितृदाक्षिण्यात् केवलं सदाचारः प्रमाणमित्यन्वमन्यन्तेति। ततश्च मूलवेदादर्शनात् नित्यानुमेयवेदवादे अष्टकादिषु योऽन्धपरम्परादोष उक्तः, स एवात्राचारप्राप्तेषु समापतेदित्यर्थः। धर्मबुद्ध्येति। न हि सर्वेषामाचाराणां प्रामाण्यं ब्रूमः; किं तु धर्मबुद्ध्या क्रियमाणानाम्। अतो रागद्वेषादिमूलव्यतिक्रमादीनामप्रामाण्येऽपि न क्षतिः। न खलु सर्वलेष्टनादिस्मृतीनां मूलालोभादिकल्पनावदिह द्वेषादिमूलकल्पनास्ति। 'प्रजापतिः स्वां दुहितरमभ्यधावत्' इत्यादिषु तत्तदाचारानुवादेष्वेव रागादीनां निबद्धत्वात्, अद्यतनानां पूर्वाचारप्राप्तत्वाभिमानेन दुराचारत्वोपपत्तेरिति भावः। विशिष्य निबन्धनाभावं हेतुमुपाकरोति— मन्वादिभिस्त्विति। विप्रकीर्णवेदमूलेषु स्थालीपुलाकन्यायेन केचिदष्टकादयो विशिष्य निबद्धाः। विस्तरभयात्त्वन्ये शिष्टाचारप्रामाण्यप्रतिपादनेन वेदमूलतया सूचिता इति लाघवार्थतयाऽन्यथासिद्धं विशिष्यानिबन्धनं न मूलवेदादर्शनज्ञापकमित्यर्थः॥

यववराहाधिकरणम्॥ ५॥

तेष्वदर्शनाद्विरोधस्य नित्या विप्रतिपत्तिः स्यात्॥ ८॥ शास्त्रस्था वा तन्निमित्तत्वात्॥ ९॥

॥ जैमिनीयन्यायमालाः ॥

यवादिशब्दाः किं अर्थां नो वाऽऽर्थैम्लेच्छसाम्यतः । दीर्घशूकप्रियङ्ग्वाद्या त्र्येऽप्यर्थां विकल्पिताः ॥ १४ ॥

यत्रान्या इति शास्त्रस्था प्रसिद्धिस्तु बलीयसी । शास्त्रीयधर्मे तेनात्र प्रियङ्ग्वादि न गृह्यते ॥ १५ ॥

यवाद्यर्थानिर्णयेन तद्वाक्यं न प्रमेति चेत् । न शास्त्रस्य बलित्वेन तत्प्रसिद्ध्याऽर्थनिर्णयात् ॥ १६ ॥

यो मातुलविवाहादौ शिष्टाचार न वा न वा । इतराचारवन्मात्स्यसमारब्धं स्मार्तबाधनात् ॥ १७ ॥

स्मृतिमूलो हि सर्वत्र शिष्टाचारस्ततोऽत्र च । अनुमेया स्मृतिः स्तुत्या बाध्या प्रत्यक्षया तु सा ॥ १८ ॥

लौकिको वाक्यगो वाऽर्थैस्त्रिवृदादेः समत्वतः । उभौ विध्यर्थवादैकवाक्यत्वादास्त्वनुक्तिमः ॥ १९ ॥

आचारप्रसङ्गाच्छब्दस्यार्थे म्लेच्छाचारविप्रतिपत्तौ बलाबलं चिन्त्यते । अत्र भाष्ये आर्यम्लेच्छविशेषानुपादानाद्वाक्यशेषेण सिद्धान्तकथनात् शिष्टाचारस्य च पूर्वप्रकृतत्वाद्यत्र शिष्टानामेव मिथोऽभिधानविप्रतिपत्तिः, केषांचिद्वाक्यशेषानुगुण्यं केषांचिदननुगुण्यं तत्र तुल्यबलतामाशङ्क्य वाक्यशेषानुगुण्यस्य बलीयस्त्वं प्रतिपाद्यत इति लक्ष्यते ।

तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात् ॥

प्रासङ्गिकीं संगतिमाह— आचारेति । अत्र यथाभाष्यमिदमधिकरणम्— यववराहवेतसशब्दान् केचिद्दीर्घशूकसूकरवञ्जुलेषु प्रयुञ्जते । अन्ये प्रियङ्गवायसज म्बूवृक्षेषु । एवमभिधानविप्रतिपत्त्या 'यवमयश्चरुर्भवति' 'वाराही उपानहावुपमुञ्चते' 'वेतसः कटो भवति' इति यवादिपदवतीषु चोदनासु यवादिशब्दार्थसंदेहव्यवहारयोस्तुल्यबलत्वात् दीर्घशूकप्रियङ्ग्वादीनां यवादिशब्दोपात्ततया विकल्पेन ग्रहणमिति पूर्वपक्षः । 'यत्रान्या ओषधयो म्रियन्ते अर्धते मोदमाना इवोत्तिष्ठन्ति' इति वाक्यशेषात् दीर्घशूका यवशब्दार्था निश्चीयन्ते । अन्योषधिम्लानकाले वसन्तप्रारम्भे दीर्घशूकानामेव मोदनात् । शरदि पच्यमानानां प्रियङ्गूणां तदा म्लानत्वाभावात् । तथा 'वराहं गावोऽनुधावन्ति' इति वाक्यशेषात् वराहः सूकरोऽवसीयते । सूकरं हि गावश्चतुष्पात्त्वेनानुधावन्ति । एवम् 'अप्लुत्रो वेतसः' इति वाक्यशेषात् वेतसो वञ्जुलाख्यो जलवृक्षोऽवगम्यत इत्येवं भाष्यकारीयाधिकरणशरीरवर्णोचनालब्धं भाष्यतात्पर्यं दर्शयति— अत्र भाष्ये इति । अस्मिन्नधिकरणे आर्याणामेव मिथोऽभिधानविप्रतिपत्तिर्विवक्षिता ; न त्वार्या दीर्घशूकादिषु प्रयुञ्जते, म्लेच्छाः प्रियङ्ग्वादिष्विति शिष्टाशिष्टाभिधानविप्रतिपत्तिः; आर्यम्लेच्छविशेषानुपादानात्, वाक्यशेषेणैव सिद्धान्तकथनात्, आर्यम्लेच्छविशेषसद्भावे आर्यप्रसिद्धिबलीयस्त्वेन सिद्धान्तयितव्यत्वात्, आर्यव्यवहारमात्रविषयत्व एव तन्मात्रविषयपूर्वाधिकरणसंगतिसामञ्जस्याच्च । ततश्चार्याणामेव व्यवहारविसंवादयोस्तुल्यबलत्वेन वैदिकयवादिशब्दार्थग्रहणे विकल्पमाशङ्क्य वाक्यशेषानुगुण-

तत्तदाहरणाभावाद्यवादिशब्दानां दीर्घशूकादिष्वेव सर्वशिष्टप्रयोगादन्यस्यापि शिष्टप्रयोगस्य विप्रतिपत्तिविषयस्योदाहरणस्यादर्शनात्, 'संदिग्धे तु वाक्यशेषात्' इत्यनेन गतप्रायत्वात् वाक्यशेषाच्चेन्निर्णय स्ततोऽस्ति वाक्यशेषेऽप्रियुक्तानामियुक्तप्रसिद्धयोश्च तुल्यबलत्व-

---

बलीयस्त्वव्युत्पादनेन सिद्धान्तः क्रियत इति स्पष्टमेव भाष्यार्थो लक्ष्यत इत्यर्थः। अत्र वार्त्तिककारीयं दूषणमुपन्यस्यति—तत्त्वेति। उदाहरणाभावमुपपादयति—यवादिशब्दानामिति। ननु नोदाहरणमादरणीयम्, अन्योन्यार्थप्रयोगविप्रतिपत्त्या स्पष्टान्युदाहरणानि भविष्यन्ति। कृत्वाचिन्तया अध्यारोप्य यवाद्युदाहरणमस्त्वित्याशङ्क्याह— अन्यस्यापीति। तदुक्तं वार्त्तिके— 'नैवोच्यन्ते कस्मिंश्चिद्देशे यवश्रुत्या प्रियङ्गवः। जम्बूं न वेत्तसं प्राहुर्बदरं नैव वायसम्। अध्यारोप्य विचारेण किं मुधा खिद्यते मनः॥' इति। अत्र यवादिशब्दानां प्रियङ्ग्वादिष्वार्याणामेव प्रयोगं निश्चित्य 'नैवोच्यन्ते' इत्याद्युक्तम्। आर्यावर्ते दक्षिणापथे च सतामार्याणामेव हि तेष्वप्रयोगो निश्चेतुं शक्यते; न तु तदितरदेशवर्तिनां समुद्रान्तर्वर्तिनानाद्वीपवर्तिनां च। म्लेच्छानामप्यप्रयोगः, तेषामानन्त्यात्। आर्यव्यवहारविप्रतिपत्तिविषयोदाहरणाभावादेव व्युत्पादनीयसिद्धान्तन्यायाभावादपि यथाभाष्यमधिकरणमयुक्तमित्याह— संदिग्धे त्विति। ननु अक्ताधिकरणे शर्कराञ्जनसाधनत्वेनोपादेयद्रव्यविशेषस्य वाक्यशेषान्निर्णयः; इह तु यवादिशब्दार्थस्येति भेदोऽस्तीत्याशङ्क्योक्तम्— गतप्रायत्वादिति। निर्णेतव्यविषयभेदेऽपि निर्णायकन्यायस्य 'विधिस्तुत्योः सदा वृत्तिः समानविषयेष्यते। तस्मादेकत्र [1]संदिग्धमपरेणावधार्यते॥' इत्यक्ताधिकरणे व्युत्पाद्यस्यापि तुल्यत्वात् गतप्रायतेत्यर्थः। यदुक्तं वार्तिके— 'संदिग्धेषु च सर्वेषु वाक्यशेषेण निर्णयम्। वक्ष्यत्येवमतो नात्र पृथक्कार्या विचारणा॥' इति। न ह्युपादेयविशेषनिर्णयार्थ एवाक्ताधिकरणन्यायः, किं तु विधौ निर्णेयस्य सर्वस्यापि निर्णयार्थः। अत एव 'आदित्यः प्रायणीयः पयसि चरुः' इत्यत्र देवतार्थस्य ण्यप्रत्यस्य प्रकृतिरदितिशब्दो न त्वादित्यशब्द इति 'अदितिमोदनेन' इति वाक्यशेषेण; 'यः पापयक्ष्मगृहीतः स्यात्तस्मा एतमादित्यं चरुं निर्वपेत्' इत्यत्र तु आदित्यशब्दः प्रकृतिः, स च बहुवचनान्त इति 'आदित्यानेव स्वेन भागधेयेनोपधावति' इति वाक्यशेषेण; 'सारस्वतौ भवतः' इत्यत्र सरूपैकशेषेणैकत्र सरस्वतीशब्दः प्रकृतिः, अन्यत्र सरस्वच्छब्द इति 'एतद्वै दैव्यं मिथुनं यत्सरस्वती च सरस्वाँश्च' इति वाक्यशेषेण च निर्णयोऽक्ताधिकरणसिद्ध एव तत्र तत्र व्यवह्रियते। ननु अक्ताधिकरणवाक्यशेषेण निर्णयस्तत्तद्वाक्यशेषसमभिव्याहृतविधिवाक्यमात्रगतसंदेहापाकरणार्थः। इह तु यवादिपदयुक्तसकलविधिवाक्यगतसंदेहापाकरणार्थ इत्यस्ति विशेषः। अत एव 'यत्रान्या ओषधयः' इत्यादिना वारुणप्रघासिकयवमयकरम्भपात्रविधिशेषेण 'यवमयश्चरुर्भवति' इति विधौ यवशब्दार्थनिर्णयो भाष्यकारैरुपन्यस्त इत्याशङ्क्य, स एव विशेषो न सिध्यति, वाक्यशेषस्य स्वसमभिव्याहृतविधिं विना अन्यत्रैतादृशसंशयापाकरणे सामर्थ्याभावादित्याह— वाक्यशेषाच्चेन्निर्णय इति। वाक्यशेषान्निर्णयं कुर्वतो यत्र वाक्यशेषोऽस्ति,

---

1, क. संदिग्धमितरेण०

प्रसङ्गादयुक्तमिति मत्वाऽऽचार्यैरन्यथाऽधिकरणं व्याख्यातम्। यत्रार्यम्लेच्छयोरभिधानविप्रतिपत्तिः; यथा पीलुशब्दमार्या द्रुमविशेषे प्रयुञ्जते, म्लेच्छास्तु हस्तिनि। तत्र चिन्त्यते किं तुल्यबलत्वमुतार्यप्रसिद्धिर्बलीयसीति। तत्र—

[1]लोकप्रमाणगम्यत्वाच्छब्दार्थस्योभयोरपि। सभा विप्रतिपत्तिः स्याच्छास्त्रार्थे हि बलाबलम्॥

यः शास्त्रप्रमाणको धर्मस्तत्र शास्त्राभिरेवंशब्देभ्यो म्लेच्छेभ्यस्तदभियोगशालिनामार्याणामस्तु बलीयस्त्वम्। व्यवहारगम्यस्तु शब्दार्थः; स च म्लेच्छानामप्यविशिष्ट इति प्रमाणाविशेषादविशिष्टो द्वयोरपि शब्दार्थः। यच्चार्येष्वनादित्वकारणत्वाद्व्यवस्थानं, तदपि समानं म्लेच्छेष्वपि। तस्मात्समेयमभिधानविप्रतिपत्तिः स्यादिति प्राप्ते ब्रूमः—

प्रतिपादकतामात्रं म्लेच्छेष्वप्यवगम्यते। विप्लुतस्तु शब्दार्थः शिष्टेष्वेवावधार्यते॥

न तावदेवं न्याय्यमुभावपि शब्दार्थाविति, अनेकादृष्टशक्तिकल्पनाप्रसङ्गात्, शब्दप्रयोगेऽपि चान्यतरस्याप्यनवधारणाद्व्यवहारानुपपत्तिप्रसङ्गात्कदाचित्कस्यचिदुपादाने-

---

तत्रैव यवशब्दार्थो दीर्घशूक इति निर्णयः स्यात्; यत्र नास्ति तत्र न स्यात्, वाक्यशेषाभावात्। वाक्यशेषानुगुणानन्यगणप्रसिद्ध्योरार्यप्रसिद्धित्वाविशेषेण तुल्यबलत्वस्यानिवार्यत्वात् तुल्यबलत्वेन पूर्वपक्ष्यापादितविकल्पतादवस्थादिति भावः। अभियुक्तानभियुक्तप्रसिद्ध्योरित्यनेन वाक्यशेषानुगुणाननुगुणप्रसिद्धी उक्ते। एवं यज्ञभाष्यमधिकरणं भङ्क्त्वा यथाऽऽचार्यैरन्यथाऽधिकरणं वर्णितं तदुदाहरन्नाह— तत्रेति। [1]लोकप्रमाणेति। लोकव्यवहारेण हि सर्वत्र शब्दार्थनिर्णयः। लोकव्यवहारश्च दृष्टार्थत्वादार्म्लेच्छानामविशिष्टः। अतः शास्त्रार्थे तेषां बलाबलसद्भावेऽपि शब्दार्थव्यवहारे तुल्यबलत्वात् तेषां विप्रतिपत्तिः समेत्यर्थः। श्लोकं व्याचष्टे— यः शास्त्रप्रमाणक इत्यादिना। प्रतिपादकतामात्रमिति। दृष्टार्थव्यवहाराय म्लेच्छा यथाकथंचित् शब्दार्थप्रतिपत्तिमात्रमपेक्षन्त इति तेषु प्रतिपादकतामात्रमवगम्यते। आर्यास्तु प्रत्यवायपरिहाराय शब्दस्वरूपगतस्खलनाद्यविप्लुतिमप्यपेक्षमाणा वेदप्रतिपाद्यधर्माधर्मविपर्ययपरिहाराय आयुर्वेदप्रतिपाद्यभेषजद्रव्यवीर्यविपाकादिविपर्ययपरिहाराय च शब्दार्थसंबन्धाथार्थ्यमप्यपेक्षन्त इति तेष्वविप्लुतिरप्यवधार्यते। अतः प्रबलयाऽऽर्यसिद्ध्या म्लेच्छप्रसिद्धिर्बाध्यत इति भावः। ननु प्रबलं प्रबलमित्येव दुर्बलस्य न बाधकम्; किं तु सति विरोधे। न चात्र विरोधोऽस्ति; प्रसिद्धेर्द्वयोर्बालादक्षादिवत् नानार्थत्वसंभवादिति शङ्क्य 'ऐकार्थ्यसंभवेऽनेकार्थत्वमन्याय्यम्' इति न्यायमवलम्ब्य निराकुर्वन्नेव श्लोकं व्याचष्टे— न तावदित्यादिना। अनेकादृष्टेति। अनेकार्थत्वे

---

1. लोकप्रसिद्धि०

ऽष्टदोषविकल्पापत्तेरेकत्र मुख्यत्वेनान्यत्र गौणत्वेनापि प्रयोगोपपत्तेः, गौणेऽपि प्रयोगे पार्श्वस्थानां मुख्याभिमानसंभवात्तैरेव सह म्लेच्छे मुख्यत्वस्य कथनान्मुख्याभिमानपरम्पराप्रवृत्तिसंभवात्। तत्र यदि न कथंचिदपि विशेषोऽवधार्येत, तदा अत्यभावाद्वयोरप्यभिधेयता स्यात्। अस्ति त्वभिधुरानभियुक्तयोर्विशेषः। शास्त्रस्था हि शब्दैकस्याधिगम्यधर्मांश्च गोविप्लुतिलिप्सया शब्दार्थतत्त्वं विविच्य पर्यालोचयन्ति; म्लेच्छास्तु दृष्टार्थव्यवहारस्य यथाकथंचिदुद्धेः प्रयोजनावान्नाविप्लुतिसिद्धौ यतन्ते। अतो यद्यपि प्रतिपादकतामात्रं म्लेच्छेष्वपि सिध्यति, तथाऽपि विप्लुतिसंभवान्न तेषु शब्दार्थतत्त्वसिद्धिरित्यार्यप्रसिद्धयैव निर्दोषया बलीयस्यार्थसिद्धिरिति पीलुवादिशब्दा वृक्षाद्यर्थाभिधायिन इति स्थितम्। भाष्यमप्यार्यम्लेच्छविज्ञानाभिप्रायं व्याख्येयम्। वाक्यशेषश्चाभ्युच्चयत्वेनोक्तः न मूलहेतुतयेति॥

प्रत्यर्थमेकैकशक्तिभेदेनानेकशक्तिकल्पनागौरवम्। लोकेऽनेकार्थशब्दप्रयोगे वक्तृविवक्षावगत्याऽर्थविशेषनिर्णयात् व्यवहारसिद्धावपि वेदे ततो निर्णयासिद्धेस्तदर्थानुष्ठानाभावप्रसङ्गः। प्रयोगभेदेनार्थद्वयग्रहणे अष्टदोषदुष्टो विकल्प इत्येते दोषाः प्रादुःष्युः। अत एकत्र मुख्यत्वेऽन्यत्र गौणत्वे च संभवति नानेकार्थत्वकल्पनं न्याय्यमित्यर्थः। ननु कथमिहैकार्थ्यसंभवः? हस्तिनि प्रसिद्धेर्निरालम्बनत्वप्रसङ्गादित्याह— अन्यत्र गौणत्वेनापीति। उन्नतत्वसादृश्याद्धस्तिनि गौणत्वमुपपद्यत इति भावः। ननु गौणत्वे म्लेच्छानां कथं मुख्यत्वाभिमानपरम्परा? तत्राह— गौणेऽपीति। केनचिदार्येण कंचित्प्रति हस्तिनमङ्गुल्या निर्दिश्य पीलुरक्षदुन्नतोऽयमिति सादृश्यविवक्षया 'पीलुमसुं पश्य' इति प्रयुक्ते पार्श्वस्थस्य म्लेच्छस्य मुख्यत्वभ्रमात्, तेन स्वदेशे स्वकीयेभ्यो मुख्यत्वकथनान्मुख्याभिमानपरम्परा प्रवृत्तेति भावः। ननु अत्र गौणमुख्यत्वयोर्वैपरीत्यं किं न स्यादित्याशङ्क्य परिहरति— तत्र यदीत्यादिना। पीलुवादिशब्दा इति। पीलुस्तीक्ष्णवृक्षाभिख्यो वृक्षविशेषः। 'तीक्ष्णवृक्षः शणः पीलुः' इति वैद्यनिघण्टुः। तं च श्यामाद्यौषधगणे पठित्वा 'श्यामाद्यो हन्ति गुल्मं जयति कफरुजं हृद्रुजं मूत्रकृच्छ्रम्' इति तद्गुणान् वैद्याः स्मरन्ति। भाष्यमपीति। वार्तिककारीये पीलूदाहरण इव भाष्यकारीये यववराहादुदाहरणेऽपि नानुपपत्तिः। तत्रापि हि आर्यम्लेच्छविप्रतिपत्तिरेव भाष्यकारैर्विवक्षिता। 'शास्त्रस्था वा तन्निमित्तत्वात्' इति सिद्धान्तसूत्रस्य भाष्ये— 'शास्त्रस्थाः शिष्टाः तेषामविच्छिन्ना स्मृतिः शब्दार्थेषु लोके वेदे च। तेन शिष्टनिमित्ता श्रुत्यर्थावधारणा' इत्यार्यप्रसिद्धिबलीयस्त्वन्यायव्युत्पादकतया व्याख्यातत्वेन प्रियङ्ग्वादिषु यवादिशब्दप्रयोगे म्लेच्छप्रसिद्धितायाः स्फुटीकरणात्। वार्तिककारगौरवात् पीलुशब्द इव भाष्यकारगौरवाद्यवादिशब्देऽप्यार्यम्लेच्छविप्रतिपत्तेर्विस्रम्भार्हत्वादिति भावः। तर्हि भाष्ये वाक्यशेषोपन्यासः किमर्थ इत्याह— वाक्यशेषश्चेति। सिद्धान्तसूत्रे शास्त्रस्थेत्येकवचनं कृत्वा 'शास्त्रस्था वाक्यस्थार्थप्रसिद्धिर्बलीयसी' इत्यर्थान्तरमादाय अभ्युच्चयमात्रमुपन्यस्तम्; न तु वाक्यशेषो मूलयुक्तिः, तस्य

स्मृत्याचारविरोधे वा यत्र मन्वादिनिबन्धनानामनिबन्धनानां चाचाराणां विरोधो मातुलदुहितृपरिणयनादिषु, तत्र किं तुल्यकक्ष्यत्वबाधितानां बलीयस्त्वमिति चिन्त्यते । तत्र—

बलाबलविशेषस्तु कक्ष्यान्तरितकारितः । श्रुतिस्मृत्योरिह त्वेवं न स्यात् श्रुतिमूलतः ॥

श्रुत्या हि साक्षादर्थः प्रतीयते, स्मृत्या तु श्रुतिकल्पनयेत्येकान्तरितप्रामाण्यत्वादव्यवहितप्रामाण्या श्रुतिर्बलीयसीति । तेन तत्र युक्तं यत्स्मृतेरननुष्ठानलक्षणमप्रामाण्यम् । इह त्वेवं विशेषो नास्ति, द्वयोरपि श्रुतिमूलत्वेनैकान्तरितत्वाविशेषात् । तस्मात् समा विप्रतिपत्तिरिति ॥

अत्रोच्यते—

सप्रत्ययप्रणीता हि स्मृतिः सोपनिबन्धना । तस्यास्तेन बलीयस्त्वमाचाराच्चिर्निबन्धनात् ॥

मूलयुक्तित्वाभावं दृढीकर्तुमेव वार्तिके वाक्यशेषरहितं पीलुशब्दं क्वचिच्चोदनायामदृष्टमप्युदाहृत्य केवलमार्यप्रसिद्धिबलीयस्त्वेनैव सिद्धान्तो दर्शितः ॥

अस्मिन्नेवाधिकरणे वार्तिककारैर्दर्शितं वर्णकान्तरमुपक्रमते— स्मृत्याचारविरोधे वेति । 'स्मृत्याचारविरोधे वा साम्यवैषम्यसंशये । समा विप्रतिपत्तिः स्यान्मूलसाम्याद्द्वयोरपि ॥' इति वार्तिककारीयो वर्णकान्तरारम्भश्लोकः । तस्य प्रथमपादोऽत्र सूत्रस्थानीयो लिखितः । मातुलेति । 'मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च । समानप्रवरां चैव गत्वा चान्द्रायणं चरेत् ॥' इत्यादिस्मृतिभिर्मातुलसुताविवाहो निषिद्धः । तथाऽऽचारो दाक्षिणात्यानामेव दृश्यते । आदिपदेन पितृष्वसृसुताविवाहादयो दाक्षिणात्यानाम्, औत्तराहाणामूर्णायवक्रयादयश्च गृह्यन्ते । बलाबलेति । 'श्रुतिर्बलीयसी, स्मृतिर्दुर्बला' इत्ययं विशेषः स्मृतेः श्रुत्यनुमापकत्वरूपकक्ष्याव्यवधानप्रयुक्तः । स्मृत्याचारयोस्त्वेवं बलाबलविभागो नास्ति, उभयोरपि साक्षादेव श्रुत्यनुमापकत्वेन तुल्यकक्ष्यत्वात् । अतस्तौ समबलावित्यर्थः । श्लोकं व्याचष्टे— श्रुत्या हीति । सप्रत्ययेति । प्रत्ययः स्मर्तृणां ज्ञानम्, अस्मदादीनां तेषु विश्वासश्च । 'साक्षात्कृतधर्मा ऋषयः' इति हि स्मरन्ति । तत्र साक्षात्कारशब्देन प्रत्यक्षवद्दृढं तत्त्वज्ञानं लक्ष्यते । श्रुतिश्च भवति— 'आर्षेयं वचनं प्रमाणम्' इति । धर्मप्रवक्तृत्वेन सर्वेषामाचार्यो हि मन्वादयः । तेष्वाप्तमत्वेन विश्वासे व्यवहितानामपि समानः । एवं स्मृतिर्बलीयस्त्वे कर्तृगौरवमेको हेतुरुक्तः । हेत्वन्तरप्रदर्शनार्थं सोपनिबन्धनेति विशेषणम् । नानाशाखाविप्रकीर्णानि विध्यन्तरशेषभूतार्थवादादिलिङ्गावगमितानि कर्माण्यवगत्य तत्कर्तव्यताप्रतिपादनमुपनिबन्धनम्; तत्सहितेत्यर्थः । अत्रोपसर्गेण सकलवेदज्ञानां मन्वादीनां कृत्स्नमेव स्मृत्या नानाशाखाविप्रकीर्णश्रुतिकल्पनमिति प्रामाण्ये संनिकर्षः । अवहितनानाचरितृणां विप्रकी-

प्रत्ययिततरा हि मन्वादयः स्मर्तारः । तत्स्मरणं गुणवत्तरकर्तृकत्वादितरजनचारित्र्याद्विस्रम्भणीयतरामिति व्यक्तमेतत् । अपि चाचरितॄणां जनानां स्वयमितस्ततो विप्रकीर्णपरप्रकरणादिगतश्रुत्युद्धरणे नार्थं प्रीतपशुमसामथ्यादवश्यमेते महर्षिभिरेव ज्ञात्वा स्मृत्वा समर्पितमर्थमनुतिष्ठन्तीत्यनौकार्यम् । अतश्चाचारस्य स्मृतिकल्पनेन श्रुतिकल्पकत्वमिति व्यन्तरितप्रामाण्याद्दुर्बलत्वम् । अपि चाचारेषु कर्मस्वरूपमात्रमेव प्रत्यक्षम् ; कर्तव्यता तु विमर्शपूर्वमर्थसुखादिहेत्वन्तरासंभवनिरूपणेन पारिशेष्यात्कल्पयितव्या । तां च कल्पयित्वा पश्चान्मूलकल्पनमिति विप्रकर्षः । सनिबन्धनासु तु स्मृतिषु द्राग्येव ग्रन्थतः कर्तव्यता गम्यते, मूलमात्रं तु कल्प्यमिति संनिकर्षः । सर्वेषां च स्मृतिविरुद्धाचाराणां मातुलदुहितृपरिणयनादिविषयाणां कामादिहेत्वन्तरं स्पष्टमेव दृश्यत इति न कथंचिदपि श्रुतिमूलत्वं संभावनीयम् । न चात्र विकल्पाभ्युपगमेनोभयोरपि प्रामाण्यं संभवति, वस्तुनि विकल्पासंभवात् । न हि मातुलदुहितृपरिणयनात्प्रत्यवायोत्पत्तिरनुत्पत्तिश्च संभवतीत्यवश्यमन्यतरस्याप्रामाण्य-

---

र्णवाक्यप्रतिपाद्यस्य 'धन्वन्निव प्रपा असि, स्थलयोदकं परिगृह्णन्ति' इत्यादिविध्यन्तरशेषमन्त्रार्थवादलिङ्गावगमस्य च कर्मजातस्य स्वतोऽवगत्यसंभवादादौ केनचिन्महाप्राज्ञेन विप्रकीर्णवाक्यादिकं सर्वं दृष्ट्वा तदर्थं निश्चित्य स्मृत्या समर्पितमनुतिष्ठन्त्यद्यतना इति वक्तव्यतया कल्पनीयस्मृतिव्यवधानेन प्रामाण्ये विप्रकर्ष इति दर्शितम् । निबन्धनशब्देन स्मृतिभ्यः कर्मावगतिसमय एव तत्कर्तव्यताऽपि सहावगम्यते । आचारदर्शनेन तु कर्मस्वरूपमात्रमवगम्यते । तत्कर्तव्यता शिष्टाचारविषयत्वलिङ्गेनानुमेयेति विप्रकर्षः । एवं कर्तृगौरवप्रामाण्यसंनिकर्षकर्तव्यतावगतिसंनिकर्षहेतुत्रयेण स्मृतिराचारात् बलीयसीति श्लोकार्थः । श्लोकं व्याचष्टे— प्रत्ययिततरा हि इत्यादिना । सर्वेषां चेति । नन्वेवं सति 'हेतुदर्शनाच्च' इति सूत्रोक्तन्यायसाम्येनैव मातुलसुतापरिणयनादीनामनाचारत्वस्य सिद्धत्वात्किमनेन वर्णकेन ? उच्यते— स्मृत्याचारविरोधे स्मृतिबलीयस्त्वं हि सामान्येनात्र व्युत्पाद्यते । तत्र ये स्मृतिविरुद्धा देशजातिकुलधर्मबुद्ध्या तत्र तत्र केचिदाचाराः प्रवर्तन्ते, तेष्विदं वर्णकं सफलम् । न चात्रेति । स्मृत्याचारयोः समबलत्वाभ्युपगमे हि विकल्पो वक्तव्यः ; स चानुपपन्नः ; मातुलसुतापरिणयनादिकं प्रत्यवायहेतुः, तद्धेतुश्च इति वक्तव्यतया विरोधात् । न हि ग्रहणाग्रहणयोरनुष्ठेयातिरात्राङ्गतयेवात्र विरोधपरिहारः संभवतीति भावः । ननु देशव्यवस्थयाऽपि विरोधेन विकल्पपरिहारो भविष्यति । इह हि देशव्यवस्थां स्मरन्ति । पञ्चधा विप्रतिपत्तिः ; दक्षिणतः—पर्युषितभोजनम्, अनुपनीतभार्यासहभोजनम्, मातुलपितृष्वसृदुहितृपरिणयनमिति । तथा उत्तरतः— ऊर्णाविक्रयः, शीधुपानम्, उभयतोदान्यव्यवहारः, आयुधजीवनम्, समुद्रयानमिति । तदितर इतरस्मिन् कुर्वन् दुष्यति ; न स्वदेशे, देशप्रामाण्यादिति । नैवम् । 'मिथ्यैतदिति हारीतः'

आश्वबालीयम्। तत्र गृह्यमाणनिमित्तस्याचार्यप्रामाण्यमिति सिद्धमेवंजातीयकानां दुरावारत्वम्॥

अथवा त्रिवृच्चर्वाश्ववालादेर्यत्र लोकवाक्यशेषयोरर्थविप्रतिपत्तिः तत्र 'त्रिवृद्बहिष्पवमानम्' इति। अत्र त्रिवृच्छब्दस्य त्रैगुण्यं लोकादर्थोऽवगम्यते. वाक्यशेषात्तु स्तोत्रीयानवकः। 'आदित्यः स्थाल्यणीयः पयसि चरुः' इति चरुशब्दस्य स्थाली; वाक्यशेषादोदनम्। 'आश्वबालः प्रस्तरः' इत्यश्वस्य बालः; वाक्यशेषात्तु काशः। 'ऐक्षव्यौ विधृती' इतीक्ष्वयवात्मिके लोकात्; वाक्यशेषात्तु काशमूलके। किं तत्र लोकवाक्यशेषयोस्तुल्यबलत्वमुत वाक्यशेषस्य प्रतीतिर्दुर्बलीयसीति संशयः। तत्र—

पदार्थपदसंबन्धे तुल्यते लोकवेदयोः। अदृष्टसाधनत्वे हि लोकाद्वेदोऽतिरिच्यते॥

विधुदेशत्वावदेतादवगम्यते— यदिह त्रिवृदादिशब्दाभिधेयं तद्वाक्यार्थान्वयीति; किं नु तस्याभिधेयमित्यन्वतोऽवगन्तव्यम्। तत्र लोकस्याप्यभिधेयनिर्णये वेदवाक्यशेषतुल्यत्वं ततोऽधिकं वा सामर्थ्यमस्तीत्यर्थद्वयमपि तुल्यप्रमाणकत्वाद्विकल्पेन ग्रहीतव्यमिति पूर्वः पक्षः॥

इत्यनन्तरवाक्येनैव देशभेदेनैषां प्रत्यवायहेतुत्वतद्धेतुत्वव्यवस्थाया निराकृतत्वात्॥

अत्रैव वार्तिककारीयं तृतीयं वर्णकं दर्शयितुमुपक्रमते— त्रिवृच्चर्वाश्ववालादेरिति। वार्तिके— 'त्रिवृच्चर्वाश्ववालादेर्लोकेऽन्योऽर्थः प्रतीयते। वेदे तदभियुक्तैश्च तस्मादन्यो विलक्षणः॥' इति तृतीयवर्णकविषयप्रदर्शकश्लोकस्याद्यपादोऽत्र सूत्रस्थानीयो लिखितः। लोकादिति। 'त्रिवृत्स्तोम' इत्यादेर्लौकिकप्रयोगादित्यर्थः। वाक्यशेषात्त्विति। 'त्रिवृद्बहिष्पवमानम्' इत्युक्त्वा स्तोत्रसाधनानाम् 'उपाग्नेगायतां नरः' इत्यादीनामृचां नाकमनुक्रान्तम्। शाखान्तरे च 'नवभिः स्तुवन्ति' इति श्रुतमित्येवंरूपाद्वाक्यशेषादित्यर्थः। आदित्य इति। तत्र 'अदितिर्ओदनेन' इति वाक्यशेषः। आश्वबाल इति। 'यज्ञो वै देवेभ्योऽश्वो भूत्वाऽपाक्रामत्। सोऽपः प्राविशत्। स बालधैर्गृहीतस्तं बालान्पुरुकृत्वा निवेशयति। ते बालाः काशतां प्राप्नुवन्। कार्यंऽतः प्रस्तरस्तैः।' इति वाक्यशेषः। एवम् 'ऐक्षव्यौ विधृती' इत्यत्रापि वाक्यशेषोऽवेक्ष्य पदार्थेति। पदपदार्थसंबन्धो वेदादिवल्लोकादपि बोद्धुं शक्यत इति तत्रोभयोस्तुल्यबलते[illegible] ननु धर्मविषये वेद एव ज्यायानित्युक्तं कथमिह लोकवेदौ तुल्यावेवेति चेत्। सत्यं धर्मविषये वेदो ज्यायानिति। इह तु वाक्यार्थरूपे, न पदार्थरूपे। अतः शब्दार्थनिर्णये लोकवेदौ तुल्यावेवेति भावः। ततोऽधिकं वेति। लोकप्रारम्भो हि व्युत्पत्तिमहः। ततोऽनुपसंजातविरोधित्वाल्लोक एव शब्दार्थनिर्णये बलीयान्। वाक्यशेषरूपो वेदस्तु शब्दार्थनिर्णयार्थम-

न केवलं संततिरेव भारती
सतां च धन्याऽजनि तान्प्रशंसताम् ॥ ९४ ॥

अथेति । अथानन्तरं उपनीतैः कृतोपनयनैः श्रुतिपारदृश्वभिः वेदपारगैः । 'दृशेः कनिप् ' । विशिष्टविद्याधिगमेन उज्ज्वलैः प्रकाशमानैश्च तैर्युधिष्ठिरादिभिः कुमारैः भारती भरतसंबन्धिनी संततिः कुलमेव केवलं धन्या पुण्यवती । 'सुकृती पुण्यवान् धन्यः' इत्यमरः । नाजनि न जाता । किं तु, तान् युधिष्ठिरादीन् प्रशंसतां स्तुवतां सज्जनानां भारती वागपि धन्या पुण्यवती अजनि भरतसंततिः सज्जनवाणी च पवित्रा जातेत्यर्थः । जनेः कर्तरि चिण् ॥ ९४ ॥

क्रमेण तेषामुपपादयन्मुदं
मधुव्रतानामिव लोकचक्षुषाम् ।
सरोरुहाणीव नवानि सौरभं
प्रसाधयामास वपूंषि यौवनम् ॥ ९५ ॥

क्रमेणेति । मधुव्रतानां मधुकराणामिव । 'मधुव्रतो मधुकरः' इत्यमरः । लोकचक्षुषां जननेत्राणां मुदं प्रीतिमुपपादयत् जनयत् यौवनं तारुण्यं कर्तृ तेषां कुमाराणां वपूंषि शरीराणि, सौरभं सौगन्ध्यं नवानि नूतनानि सरोरुहाणि पद्मानीव क्रमेण पर्यायेण प्रसाधयामास अलंचकार ॥ ९५ ॥

भुजैः सह द्राघिमसंपदं दधौ
विशालमालक्ष्यत वक्षसा समम् ।
निकाममेषां सह मन्द्रवृत्तिना
स्वरेण च स्निग्धमजायतेक्षणम् ॥ ९६ ॥

भुजैरिति । एषां कुमाराणां ईक्षणं चक्षुः । जातावेकवचनम् । 'ईक्षणं चक्षुरक्षिणी' इत्यमरः । भुजैर्बाहुभिः सह दीर्घस्य भावो द्राघिमा दैर्घ्यम् दीर्घशब्दात् पृथ्वादिपाठादिमनिच् । 'प्रियस्थिर' इत्यादिना दीर्घशब्दस्य द्राघ्यादेशः । तस्य संपदमुत्कर्षं दधौ भुजाश्चेक्षणानि च दीर्घाणि जातानीत्यर्थः । निकाममत्यर्थं मन्द्रा गम्भीरा वृत्तिर्यस्य तेन स्वरेण सह स्निग्धं मसृणं

चाजायत । मन्द्रः स्वरश्लेष्णानि च स्निग्धानि जातानीत्यर्थः । तथा चोक्तं सामुद्रिके— बाहुनेत्रान्तरं चैव जानुनासं तथैव च । स्तनयोरन्तरं चैव पञ्चदैर्घ्यं प्रशस्यते ॥ इति ॥ ९६ ॥

कुहूमुखानां कुशलोदयस्ततो
मदोद्गमो मन्मथगन्धहस्तिनः ।
म्रदीयसां वैजननो नभस्वतां
वनेषु मासः पदमादधे मधुः ॥ ९७ ॥

अथ कविः पञ्चभिः श्लोकैर्वसन्तं वर्णयति— कुहूमुखानामिति । ततोऽनन्तरं कुहूरालापविशेषः मुखेषु येषां ते कुहूमुखाः कोकिलाः । 'कुहूः स्यात्कोकिलालापनष्टेन्दुकलयोरपि' इति विश्वः । तेषां कुशलस्य क्षेमस्य उदयः उदयहेतुरित्यर्थः । गन्धप्रधानो हस्ती गन्धहस्ती । शाकपार्थिवादित्वात्षष्ठीसमासः । मन्मथ एव गन्धहस्ती मदगजः, तस्य मदोद्गमः मदोत्पत्तिकारणमित्यर्थः । म्रदीयसां मृदुतराणां नभस्वतां वायूनां वैजननः प्रसूतिमासः उत्पादक इत्यर्थः । 'सूतिमासो वैजननः' इत्यमरः । मधुश्चैत्रो मासः । 'स्याच्चैत्रे चैत्रिको मधुः' इत्यमरः । वनेषु पदं स्थानमादधे आहितवान् । कर्तरि लिट् । मधुमासो वनेषु प्रादुर्बभूवेत्यर्थः ॥ ९७ ॥

समीरणोत्था नवचूतरेणवो
वसन्तलक्ष्मीपटवासपांसवः ।
प्रपेदिरे मन्मथमन्त्रवादिनो
वियोगिसंमोहनचूर्णमुष्टिताम् ॥ ९८ ॥

समीरणेति । समीरणोत्थाः समीरणेन वायुना कृता उत्था उत्थानं येषां ते तथोक्ताः मारुतोद्भूता इत्यर्थः । 'आतश्चोपसर्गे' इति स्त्रियामङ् । वसन्तलक्ष्म्याः वसन्तश्रियः पटवासपांसवः पिष्टातधूलिभूताः । 'पिष्टातः पटवासकः' इत्यमरः । नवचूतरेणवः नूतनचूतपुष्पपरागाः मन्मथ एव मन्त्रवादी मान्त्रिकः तस्य । वियोगिसंमोहने विरहिविचित्तीकरणे चूर्णस्य श्रोदस्य मुष्टितां मुष्टित्वं प्रपेदिरे प्राप्नवन्तः । कर्तरि लिट् । विरहिणश्चूतपरागैः स्पृष्ट्वा मदनार्ता मुमुहुरिति भावः ॥ ९८ ॥

प्रसूनगन्धेन समस्तवीरुधां
प्रसर्पता वासितदिङ्मुखो मधुः ।

न मालतीसौरभशोभितोऽभव-
द्भवन्ति के वा भुवि पूर्णसंपदः ॥ ९९ ॥

प्रसूनेति— समस्तवीरुधां सकलल्तानां प्रसर्पता प्रसरता प्रसूनगन्धेन पुष्पसौरभेण वासितदिङ्मुखो मधुः मालतीसौरभेण मालतीकुसुमगन्धेन शोभितो नाभवत्। मालतीकुसुमानां वार्षिकत्वादिति भावः। उक्तमर्थमर्थान्तरन्यासेन दृढयति— तथा हि भुवि भूमौ के वा पुरुषाः पूर्णसंपदः संपूर्णसमृद्धयो भवन्ति ; न कोऽपीत्यर्थः। वाशब्दो वाक्यालंकारे ॥ ९९ ॥

समीरणेन ह्रियमाणमुन्मिष-
द्रजःकणं पुष्पभृशोकशाखिनः।
प्रसूनबाणेन रुषा वियोगिषु
प्रयुक्तमाग्नेयमिवास्त्रमाबभौ ॥ १०० ॥

समीरणेनेति— समीरणेन वायुना ह्रियमाणं विधूतमुन्मिषद्रजःकणं विकसत्पराग-बिन्दुकम् अशोकशाखिनः रक्ताशोकाख्यवृक्षस्य पुष्पं कर्तृ, प्रसूनबाणेन मदनेन रुषा कोपेन वियोगिषु विरहिषु विषये प्रयुक्तम्, अग्निर्देवता अस्य आग्नेयम्। 'सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः' इत्यग्नेर्ढक्। अग्निदैवतमस्त्रमिवाबभौ। अशोकपुष्पस्य रक्तवर्णत्वादाग्नेयास्त्रेणोपमानमुत्प्रेक्षा वा ॥ १०० ॥

मधुद्रवस्वेदकणानुषङ्गिणी
नवोद्गमा केसरकुड्मलावलिः।
वसन्तसंपर्कवशादुदञ्चिता-
मुवाह रोमाञ्चरुचिं वनश्रियः ॥ १०१ ॥

मधुद्रवेति। मधुद्रवा मकरन्दरसा एव स्वेदकणाः स्वेदबिन्दवः तैरनुषङ्गिणी युक्ता नवोद्गमा नवोदया केसराणां वकुलानां कुड्मलावलिः कोरकपङ्क्तिः वनश्रियो वनलक्ष्म्याः वसन्त-संपर्कवशादुदञ्चितामुद्गतां रोमाञ्चरुचिं पुलकशोभामुवाह वहति स्म। पुंयोगात् सात्त्विका भावा भवन्तीति भावः ॥ १०१ ॥

अथानिलैर्दक्षिणदिङ्मुखागतैः
कृतान्तदूतैरिव कृष्टमानसः।

महीपतिर्माधवलब्धयौवनं
स मद्रपुत्रीसहितो ययौ वनम् ॥ १०२ ॥

अथेति । अथ वसन्तप्रादुर्भावानन्तरं स महीपतिः पाण्डुः दक्षिणदिङ्मुखादागतैरत एव कृतान्तदूतैः यमकिङ्करैरिव स्थितैरनिलैर्वायुभिः कृष्टमानसः हृतचित्तः सन् मद्रपुत्रीसहितः माद्रीयुक्तः सन् माधवेन वसन्तेन लब्धयौवनं प्राप्ततारुण्यम् । 'विधौ वसन्ते वैशाखे माधवः' इति रत्नमालायाम् । वनं ययौ रन्तुमिति शेषः ॥ १०२ ॥

सुशीतलैः [1]केसरशीधुशीकरै-
रतिप्रगल्भैः कलकण्ठपञ्चमैः ।
स्मरो वसन्तश्रियमस्य पश्यत-
श्चिराय सुप्तो मनसि व्यबुध्यत ॥ १०३ ॥

सुशीतलैरिति । वसन्तश्रियं वसन्तलक्ष्मीं पश्यतोऽस्य पाण्डोर्मनसि चिराय बहुकालं मुनिशापादारभ्येत्यर्थः । सुप्तो निद्रितः स्मरो मदनः सुशीतलैः केसरशीधुशीकरैः वकुलमधुकणैः अतिप्रगल्भैः अतिप्रौढैः कलकण्ठानां कोकिलानां पञ्चमैः स्वरविशेषैश्च व्यबुध्यत बुबुधे । 'पिकः कूजति पञ्चमम्' इति अमरः । बुधेर्दैवादेः कर्तरि लिट् । वसन्तलक्ष्मीदर्शनात् पाण्डोर्मदनोद्बोधोऽभूदिति भावः ॥ १०३ ॥

प्रकीर्णपुष्पोच्चयगन्धगर्भितां[2]
स माधवीमण्डपिकामुपेयिवान् ।
तपस्विशापस्मरणात्प्रवेपिनीं
बलाद्गृहाद्बलवान् स्मरातुरः ॥ १०४ ॥

प्रकीर्णेति । प्रकीर्णस्य पर्यस्तस्य पुष्पोच्चयस्य पुष्पसमूहस्य गन्धेन गर्भितां व्याप्तामित्यर्थः । माधवीमण्डपिकामतिमुक्तलतागृहम् उपेयिवान् प्राप्तवान् । 'उपेयिवाननाश्वाननूचानश्च' इति क्वसुप्रत्ययान्तो निपातः । स पाण्डुः स्मरातुरः कामार्तः सन् तपस्विनो मुनेः शापस्य 'यमा-

---

1. केतकगर्भशीकरैः 2. ०गर्भितान्तरां

न्तिकं यास्यति भाव ईदृशे भवान्' इत्युक्तस्य स्मरणाचिन्तनादनुसंधानादित्यर्थः । प्रवेपिनीं प्रकम्पिनीमबलां माद्रीं बलात् बलात्कारेणागृह्णात् जग्राह । ग्रहेर्लङ् ॥ १०४ ॥

सुखेन पाण्डुः सुरतान्तजन्मना
परासुभावेन च मीलितेक्षणः ।
प्रसूनतल्पे निपपात तत्क्षणं
पृषत्कशय्यासदृशे मनोभुवः ॥ १०५ ॥

सुखेनेति । पाण्डुः सुरतान्तजन्मना सुरतावसानजेन सुखेन परासुभावेन निर्गतप्राणत्वेन च मीलितेक्षणः मुकुलितलोचनः सन् मनोभुवः मदनस्य पृषत्कशय्यासदृशे शरतल्पनिभे प्रसूनतल्पे पुष्पशय्यायां तत्क्षणं निपपात ॥ १०५ ॥

[1]तथागतं वीक्ष्य पतिं तलोदरी
विधाय सद्यः परिवीतवाससम् ।
नवेन शोकेन भयेन चाकुला
निपत्य चक्रन्द महीतले [2]चिरम् ॥ १०६ ॥

तथागतमिति । तलोदरी कृशोदरी तलशब्दः कृशवचनोऽप्यस्ति । तथा कुमारसंभवे प्रयोगः 'न दृश्यते तच्च तलोदरे त्वयि' इति । माद्री तथागतं तादृगवस्थं पतिं भर्तारं वीक्ष्य सद्यस्तत्क्षण एव परिवीतवाससं छादितवस्त्रं विधाय कृत्वा नवेन नूतनेन शोकेन भयेन चाकुला सती महीतले निपत्य पतित्वा चिरं बहुकालं चक्रन्द रुरोद ॥ १०६ ॥

निशम्य तत्क्रन्दितमागता वनं
क्षणेन पुत्रैः सह तापसान्वितैः ।
निकुञ्जगर्भे कुरुवीरकुञ्जरं[3]
पृथा विधिव्याबहृतं व्यलोकयत् ॥ १०७ ॥

---

1. तथाविधं 2. भृशम् 3. कुरुराजकुञ्जरम्

निशम्येति— पृथा कुन्ती तस्या माद्र्याः क्रन्दितं रुदितं निशम्य श्रुत्वा तापसान्वितैः मुनियुक्तैः पुत्रैः युधिष्ठिरादिभिः सह क्षणेन वनभागता आश्रमात्काननं प्राप्ता सती निकुञ्जस्य लतागृहस्य गर्भे अन्तरे 'निकुञ्जकुक्षौ वा क्लीबे लतादिपिहितोदरे' इत्यमरः। विधिर्दैवमेव व्याधः किरातः तेन हतं विद्धं कुरुवीर एव कुञ्जरस्तं कुरुवीरकुञ्जरं व्यलोकयत ददर्श। 'लोक दर्शने' इत्यस्माद्धातोः स्वार्थे ण्यन्तालङ्। १०७॥

[1]किमेतदित्याकुललोचना[2] हृदि
स्तनद्वयोत्कम्पिनि कुर्वती करौ।
निपत्य तस्योपरि गाढविह्वला
रुरोद पुत्राश्च युधिष्ठिरादयः॥ १०८॥

किमिति। एतत्किमभूदित्याकुललोचना कातराक्षी कुन्ती स्तनद्वयेन उत्कम्पिनि उत्कृष्टकम्पे हृदि हृदये करौ हस्तौ कुर्वती निक्षिपन्ती गाढमत्यर्थं विह्वला विवशा[3] सती तस्य पाण्डोः। 'षष्ठ्यतसर्थप्रत्ययेन' इति षष्ठी। उपरि निपत्य रुरोद विललाप। युधिष्ठिरादयः पुत्राश्च रुरुदुरिति विभक्तिविपरिणामः॥ १०८॥

निरुद्धबाष्पे रुदतो नृपात्मजा-
नभीक्ष्णमाश्वासयति द्विजव्रजे।
प्रवर्तयन्त्यश्रुजलानि पादयो-
र्निपत्य माद्री निजगाद यादवीम्॥ १०९॥

निरुद्धेति। निरुद्धबाष्पे निरुद्धाश्रुजले द्विजव्रजे विप्रसंघे रुदतः क्रन्दतः नृपात्मजान् राजपुत्रान् अभीक्ष्णमत्यर्थम् आश्वासयत्युपलालयति सति अश्रुजलानि बाष्पसलिलानि प्रवर्तयन्ती उत्पादयन्ती द्रष्टृणामिति शेषः। माद्री मद्रपुत्री पादयोः कुन्तीचरणयोर्निपत्य यादवीं कुन्तीं निजगाद उवाच; गदतेर्लिट्॥ १०९॥

दिवं प्रपन्नः पतिरेष मत्कृते
विलम्बनं मे सहते न तु क्षणम्।

---

1. किमेतदित्यार्तरवा पृथा 2. ०चेतना 3. विविग्ना

तदन्तिकं प्रेषय साध्वि मां द्रुतं
सुताननाथानिह रक्षितुं स्थिता ॥ ११० ॥

दिवमिति । एष पतिः पाण्डुः मत्कृते मदर्थं दिवं स्वर्गं प्रपन्नः प्राप्तः सन् क्षणमल्पकालमपि । 'अत्यन्तसंयोगे द्वितीया' । मे मम विलम्बनं कालक्षेपं न तु सहते नैव क्षमते । तत्तस्मात्कारणात् हे साध्वि हे पतिव्रते । अनाथानगतिकान् सुतान् रक्षितुमिह लोके स्थिता सती द्रुतं शीघ्रं मां तदन्तिकं भर्तृसमीपं प्रेषय प्रस्थापय । 'इषु गतौ' इत्यस्मात् ण्यन्ताल्लोट् ॥ ११० ॥

विचिन्त्य कार्यस्य गतिं गरीयसीं
मृतेः पृथायै विनिवृत्तचेतसे ।
निरुद्धबाष्पप्रसरा ददावसौ
यमौ रुदन्तावनुयास्यती पतिम् ॥ १११ ॥

विचिन्त्येति । गरीयसो गुरुतरस्य कार्यस्य भाविप्रयोजनस्य गतिं विचिन्त्य अनुमरणात् पुत्रसंरक्षणमेव गुरुतरमिति निश्चित्येत्यर्थः । मृतेर्मरणात् । 'जुगुप्साविराम' इत्यादिना पञ्चमी । विनिवृत्तचेतसे निवृत्तमनसे पृथायै कुन्त्यै असौ माद्री, निरुद्धः निवारितः बाष्पप्रसरः अश्रुनिर्गमः कण्ठनिर्गतः यया सा तथोक्ता सती पतिं भर्तारमनुयास्यती अनुगमिष्यन्ती सती । 'लृटः सद्वा' इति शतृप्रत्ययः । 'उगितश्च' इति ङीप् । 'आच्छीनद्योर्नुम्' इति वैकल्पिको नुंभावः । रुदन्तौ क्रन्दन्तौ यमौ नकुलसहदेवौ ददौ दत्तवती, ददातेः कर्तरि लिट् ॥ १११ ॥

अतिप्रवीणैः पितृमेधकर्मणि
द्विजातिवर्यैः सह काश्यपादिभिः ।
युधिष्ठिरो धीरमनाः स्वयं पितुः
समापयत्तत्समयोचिताः क्रियाः ॥ ११२ ॥

अतिप्रवीणैरिति । युधिष्ठिरो धर्मपुत्रः धीरमनाः स्थिरचित्तः सन् पितृमेधकर्मणि पितृमेधक्रियायां अतिप्रवीणैरतिनिपुणैः काश्यपादिभिः कृपप्रभृतिभिः द्विजातिवर्यैः ब्राह्मणश्रेष्ठैः सह तत्सहितः सन्नित्यर्थः । 'द्विजात्यग्रजन्मभूदेववाडवाः' इत्यमरः । पितुः पाण्डोः तत्समयोचिताः

तत्कालयोग्याः क्रियाः और्ध्वदेहिककर्माणि स्वयं समापयत् स्वयमेव निरवर्तयत्। न तु पुरोहित इति भावः ॥ ११२ ॥

प्रणम्य माद्री [1]प्रयता तपोधना-
न्गिरस्तदीयाः प्रतिगृह्णती शुभाः ।
क्षमस्व शाठ्यं सखि कल्मषमीर्ष्यया
ममेति कुन्त्यै परिकल्पिताञ्जलिः ॥ ११३ ॥

प्रणम्येति । प्रयता नियता माद्री तपोधनान् मुनीन् प्रणम्य अभिवाद्य तदीयाः तपोधनसंबन्धिनीः शुभा गिरः स्तुतिरूपा वाचः प्रतिगृह्णती स्वीकुर्वती सती हे सखि, हे कुन्ति, ईर्ष्यया अक्षमया। 'अक्षान्तिरीर्ष्याऽसूया तु' इत्यमरः। कल्मषं विद्वेषं मम शाठ्यं दौष्टयं क्षमस्व सहस्व। इत्यनेन प्रकारेण कुन्त्यै परिकल्पिताञ्जलिः कृतकरपुटा सती ॥ ११३ ॥

सुतान्परिष्वज्य [2]धृताश्रुशीकरे
प्रमृज्य नेत्रे [3]वदती जयाशिषः ।
प्रदक्षिणीकृत्य चितागतं पतिं
शुचिस्मिता प्राविशदाशुशुक्षणिम् ॥ ११४ ॥

सुतानिति । सुतान् युधिष्ठिरादीन् पुत्रान् परिष्वज्य आलिङ्ग्य धृताश्रुशीकरे धृतबाष्पकणे नेत्रे सुतसंबन्धिनी लोचने प्रमृज्य मार्जयित्वा। 'स्त्रनादीनां द्वित्वादिष्टा जातिः प्रायेण' इति वचनान्नेत्रे इति द्विवचनप्रयोगः। जयाशिषः जयेत्येवंरूपा आशिषः आशीर्वादान् वदती विदधाना सती चितागतं चितावर्तिनं पतिं भर्तारं प्रदक्षिणीकृत्य शुचिस्मिता शुभ्रहासा सती ईषत् शुशुक्षति शोचितुमिच्छतीति आशुशुक्षणिः अग्निः। यद्यपि 'आङि शुचेः सनश्छन्दसि' इति औणादिकसूत्रेण च्छन्दस्येवानिप्रत्ययान्तः आशुशुक्षणिशब्दः साधुः, तथाऽपि भाषायामपि तदनादरेण कवयः प्रयुञ्जते। तमाशुशुक्षणिं प्राविशत् प्रविवेश। 'शिखावानाशुशुक्षणिः' इत्यमरः ॥

नृपस्य पत्नीसहितस्य पाण्डवैः
समापिते तत्र परेतकर्मणि ।

---

1. प्रयतांस्तपो• 2. धृताश्रुणा करात् 3. ददती

॥ श्रीः ॥

॥ मद्रकन्यापरिणयचम्पूः ॥

॥ गङ्गाधरकविविरचिता ॥

॥ प्रथमोल्लासः ॥

कल्याणमव्याहृतमातनोतु
संव्यानलीलाकृदभूद्गजास्यः ।
कर्णानिलेनापसृतेंशुकान्ते
यो वल्लभायाः स्मितपल्लवेन ॥ १ ॥

॥ श्रीः ॥

वाणीं वीणाकरां नत्वा संग्रहेण यथामति ।
मद्रकन्यापरिणयचम्पूव्याख्या विरच्यते ॥

कल्याणमिति । यो गजास्यः कर्णानिलेनातिविशालनिजकर्णचालनोत्पन्नपवनेन वल्लभायाः वामाङ्कारूढवल्लभाशक्तेः अंशुकान्ते वसनाञ्चले, स्तनोत्तरीय इत्यर्थः । अपवृते सति स्मितपल्लवेन मन्दहासेन संव्यानलीलाकृत् उत्तरीयविलासकृदभूत् । 'संव्यानमुत्तरीयं च' इत्यमरः । सोऽव्याहृतमनश्वरं कल्याणमातनोत्विति योजना । अत्र हासविशेषवाचकस्यापि स्मितपदस्य हाससामान्यवाचकता ज्ञेया । विशिष्टवाचकानां पृथग्विशेषणवाचकसमवधाने सति विशेष्यमात्रपरत्वनियमात् । तथा रत्नकोशे अपत्रपाया लज्जाविशेषत्वेऽपि 'ह्रीर्लज्जाऽपत्रपा व्रीडा' इति लज्जासामान्यपरिपाटिकायां निर्देशात् । नामलिङ्गानुशासने दोहदपदस्येच्छाविशेषबोधकत्वेऽपि 'अथ दोहदम् । इच्छाकाङ्क्षा' इति सामान्यवाचकत्वेन निर्देशात् । 'मन्दस्मितं मङ्गलमातनोतु' इति सनातनप्रयोगाच्च । अत्र 'आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्' इत्याशीराद्यन्यतमस्य प्रबन्धमुखत्वादाशीर्निबद्धा । अत्र तगणस्त्वादौ निबद्धः । न च तस्य नभोदेवताकत्वेन शून्यफलकत्वमाशङ्कनीयम् ।

गण्डोड्डीनमदालिनादलहरीशालीनहृद्वल्लभा-
गाढाश्लेषनिरूढसंमदझरीपोप्लूयमानान्तरः ।
वाणीमैक्षवमाधुरीमदहरामुद्दामशब्दोल्बणा-
माकण्ठद्विरदो निरन्तरयतु श्रीकण्ठपाणिंधयः ॥ २ ॥

चमत्कारचन्द्रिकायाम्— 'ईशत्वमन्तिमलघुस्तगणो व्योमदैवतः' इति, साहित्यचन्द्रोदये— 'तगणः सर्वसौभाग्यदायकः सर्वदा भवेत्' इति, अन्यैर्बहुभिर्लाक्षणिकैश्च ऐश्वर्यफलकतयाऽभ्यर्हितत्वेनोक्तत्वात् । तथैव कुमारसंभवे—'अस्त्युत्तरस्यां दिशि' इति । भोजचम्पूप्रबन्धे— 'लक्ष्मीं तनोतु' इति । अमरुकग्रन्थे—'ज्याकृष्टिबद्ध...' इति । कादम्बर्याम्— 'आसीदशेषनरपति' इति । तर्कभाषायाम्— 'बालोऽपि यो न्यायनये' इति । कृष्णविजये— 'पायादपायात्परमस्य पुंसः' इति अन्यैर्बहुभिर्महाकविभिः प्रयुक्तत्वाच्चौ मङ्गलशब्दैराम्यैः शुभगुणैर्जगद्विदितैरिति मङ्गलवाचकानां प्रयोक्तव्यतया कल्याणपदप्रयोगात् ककारस्य ब्राह्मणवर्णत्वाच्च, अनुत्तमा वर्णगणपदादिलक्षणसंपत्तिः । अत्र संभोगशृङ्गारः । यथोक्तं दशरूपके— 'अनुकूलं निषेवेते यत्रान्योन्यं विलासिनौ । दर्शनस्पर्शनादीनि स संभोगो मुदाऽन्वितौ ॥' इति । अत्र शृङ्गाररसविशिष्टदेवताप्रार्थनया ग्रन्थस्य शृङ्गाररसप्रधानता द्योत्यते । अत्राशीरलंकारः । 'आशीर्नामाभिलषिते वस्तुन्याशंसनम्' इति । स्मितपल्लवेन संव्यानजालावृतिरिति पदार्थवृत्तिनिदर्शनालंकारः । स्मितपल्लवे संव्यानत्वनिष्ठधवलत्वाच्छादकत्वरूपधर्मारोपात् । गजास्य इति विशेष्यस्य वल्लभास्तनोत्तरीयापसरणहेतुभूतपवनोत्पादकविशालकर्णवैशिष्ट्याद्याभिप्रायसूचकत्वेन परिकराङ्कुरालंकारः । इन्द्रवज्रावृत्तम्, 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' इति लक्षणात् ॥ १ ॥

कविर्द्वितीयश्लोकेनापि गणपतिं प्रार्थयते— गण्डोड्डीनेति । गण्डात् कपोलात् उड्डीनानामुद्गतानां मदालिनां नादलहर्या झंकारपरंपरया । 'स्त्री वीचिर्लहरी चाथ' इति पद्मावतीश्चिरण्टुसारे । शालीनमधृष्टं हृद् हृदयं यस्याः सा शालीनहृद् या वल्लभाख्या शक्तिः; शालीना अधृष्टा हृद्वल्लभा हृदयप्रिया इति वा । 'स्यादधृष्टे तु शालीनः' इत्यमरः । तस्याः गाढाश्लेषण निरूढायां निष्पन्नायां संमदझर्यां हर्षवाहिन्याम्; 'प्रमोदामोदसंमदाः' इत्यमरः । पोप्लूयमानं भृशं प्लवमानमान्तरं हृदयं यस्य सः । आकण्ठं द्विरदः, श्रीः विषं कण्ठे यस्य सः श्रीकण्ठः तस्य पाणिंधयः शिशुः गजास्यः; 'श्रीर्वेषरचनाशोभासंपत्सरलशाखिषु । वाणीलक्ष्मीलवक्षेषु विषे बिल्वेऽपि कथ्यते ॥' इति शंकरः । ऐक्षवस्य इक्षुविकारस्य खण्डशर्करादेः माधुरीमदहराम्; उद्दामशब्दैः उल्बणां प्रस्फुटाम्, उत्कृष्टामित्यर्थः । 'स्फुटं प्रव्यक्तमुल्बणम्' इत्यमरः । एतादृशीं वाणीं निरन्तरयतु निबिडयतु; अविच्छिन्नां वाणीं तनोतु इति भावः । शार्दूलविक्रीडितं वृत्तम् । 'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥ २ ॥

कल्याणापाङ्गरिङ्खद्द्युतिगगनधुनीधौतदासौघमोहो
दत्तात्रेयः कृपालुः सुरविटपितटीकेतनोऽचिन्त्यभूमा ।
प्रज्ञां प्राज्ञाभिनन्द्यामविरतममृतानन्दपीयूषधारा-
संपातोन्मेषहेतुं कलयतु विधृतोदारविज्ञानमुद्रः ॥ ३ ॥

लक्ष्मीं पक्ष्मलयन्तु मे रघुपतेः कारुण्यलीलागृहा
वैदेह्यीमदमन्थरस्मितझरीसङ्गाधिकोल्लासिताः ।
उद्दामामृतसिन्धुवीचिसुषमासौभाग्यपाटच्चरा
दृक्पूरा वरमुक्तिसौधशिखरारोहैकनिःश्रेणयः ॥ ४ ॥

ब्रूमस्ते नतिवाकमेकमनसा शर्वाणि निर्वापय
प्रौढां मे भवभीतिमेधय सुधासाधारणप्रक्रियाम् ।

कल्याणेति ॥ अपाङ्गे रिङ्खन्ती चलन्ती द्युतिरेव गगनधुनी गङ्गा, तया धौतः क्षालितः दासौघानां भक्तसमूहानां मोहोऽज्ञानं यस्य तथोक्तः । 'भृत्ये दासेरदासेयदासगोप्यकचेटकाः' इत्यमरः । सुरविटपितटी केतनं गृहं यस्य, 'केतनं गेहचिह्नाङ्ककृत्यामन्त्रणकेतुषु' इति नानार्थरत्नमाला । अचिन्त्यो भूमा व्यापकत्वं यस्य; विधृतोदारविज्ञानमुद्रः करविधृतचिन्मुद्र इत्यर्थः । दत्तात्रेयः प्राज्ञैः ज्ञानिभिः अभिनन्द्यां श्लाघनीयाम् । अमृतानन्द एव पीयूषमयधारासंपातः । 'धारासंपात आसारः' इत्यमरः । तस्योन्मेषहेतुं प्रज्ञां कलयतु । स्रग्धरावृत्तम् । 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्' इति लक्षणात् ॥ ३ ॥

लक्ष्मीमिति । रघुपतेः दृक्पूराः लक्ष्मीं पक्ष्मलयन्तु निबिडयन्त्विति योजना । वैदेह्याः मदमन्थरस्मितझर्याः सङ्गेन संपर्केण अधिकोल्लासिताः वर्धिताः । उद्दामामृतसिन्धोः वीचिसुषमासौभाग्यस्य पाटच्चरा अपहारिणः, 'चोरैकागारिक ..' इत्यारभ्य 'पाटच्चरमालिम्लुचाः' इत्यमरः । निःश्रेणयः आरोहणसाधनीभूताः, 'निःश्रेणिस्त्वधिरोहिणी' इत्यमरः ॥ ४ ॥

ब्रूम इति । अत्र अरिष्टनिवृत्तिपूर्वकेष्टप्राप्तिः प्रार्थ्यते । नतिवाकं नमोवचनं ब्रूमः; निर्वापय शोषय । 'वै शोषणे । निर्वापणं संज्ञपनम्' इत्यमरः । सुधासाधारणा सुधासमाना प्रक्रिया प्रकृष्टचर्या यस्याः ताम् । 'साधारणः समानश्च,' 'प्रक्रिया त्वविकारः स्यात्' इत्यमरः । वाचमेधय

वाचं यत्कृपया जडोऽपि न चिरादारट्टघोटीलस-
द्घाटीपाटवलुण्टनैकचतुरां वाक्प्रौढिमाढौकते ॥ ५ ॥
करुणावलोकलवतो दासा यस्या जिगीषवो विश्वम् ।
अधिवसतु शारदा मे सरसा रसनाग्रपीठिकां सेयम् ॥ ६ ॥
शस्ता निस्तुलगोस्तनीस्तबकसन्माधुर्यरीढाकरी
यत्सारस्वतवैखरी जितसुरस्रोतस्विनीचातुरी ।
मत्या साप्तपदीनमामरगुरोर्धीरीहते यस्य तं
दत्तात्रेयगुरुं नमामि करुणाकल्लोलिनीवल्लभम् ॥ ७ ॥
आरट्टोद्भूतघोटीपटुतरगमनारम्भजृम्भत्सुधाटी-
कुट्टाकोदीर्णवेगस्फुरितवरपदन्यासधन्याः प्रवाचः ।

वर्धय । 'जडोऽज्ञ एडमूकस्तु' इत्यमरः । न चिरात् आशु । आरट्टनामकदेशोद्भवघोट्याः घोटकापेक्षया घोट्या वेगवत्त्वाभिप्रायः । तस्याः लसद्घाटीपाटवस्य लुण्टने चौर्ये; 'कटि लुटि स्तेये' । आढौकते प्राप्नोति । 'ढौक्ष गतौ' ॥ ५ ॥

करुणेति । मे रसनाग्रपीठिकां जिह्वाग्रपीठिकायाम् अधिवसतु । 'अधिशीङ्स्थासाम्' इत्याधारस्य कर्मत्वम् । 'रसज्ञा रसना जिह्वा' इत्यमरः ॥ ६ ॥

शस्तेति । शस्ता स्तुता 'शंस स्तुतौ' । निस्तुलस्य निःसाम्यस्य गोस्तनीस्तबकसन्माधुर्यस्य द्राक्षाफलस्तबकस्वादिम्नः रीढाकरी अवज्ञाकरी, ततोऽप्यधिकेति भावः । 'रीढावमाननाऽवज्ञा', 'मृद्वीका गोस्तनी द्राक्षा' इत्यमरः । यत्सारस्वतवैखरी यस्य गुरोः सारस्वतं निगमागमपुराणशास्त्र-काव्यनाटकालंकारादि सर्वं वाङ्मयं तस्य वैखरी स्फुटतरप्रौढिः 'स्फुटा वाग्वैखरी स्मृता' इति खारे । जिता सुरस्रोतस्विन्याः गङ्गायाः चातुरी यया तथोक्ता । यस्य धीः आमरगुरोः अमराणामयमामरः स चासौ गुरुश्चेति, तस्य मत्या साप्तपदीनं सख्यमीहते, तत्सदृशीति भावः । आमरगुरोः धीः यस्य मत्या साप्तपदीनमीहते इति वा । 'सख्यं साप्तपदीनं स्यात्' इत्यमरः । करुणाकल्लोलिनीवल्लभः समुद्रः ॥७॥

वाल्मीक्यादिमहाकवीन्प्रार्थयते— आरट्टेति । प्राञ्चः प्राचीनाः, हे प्राचेतसाद्याः! येषां वः प्रवाचः प्रगल्भवाचः आरट्टोद्भूतघोट्याः पटुतरगमनारम्भे जृम्भन्त्याः सुधाटायाः कुट्टाकः शिक्षकः,

येषामाचान्तमल्लीमधुरसलहरीवर्यमाधुर्यचर्याः
प्राञ्चः प्राचेतसाद्या मयि भवत नते वीतकम्पानुकम्पाः ॥

माहेशानशिरःसरत्सुरसरिद्घाटीभराहंक्रिया-
हुंकारोत्तरवैखरीविहरणे प्राचि प्रबन्धव्रजे ।
धारावाहिमधूलिकामधुरिमप्रागल्भ्यसौवस्तिके
जाग्रत्यप्रतने तनोति कृतुकाद्गङ्गाधराख्यः कृतिम् ॥ ९ ॥

ग्रन्थाञ्श्रीशगुणोत्तरान्प्रवचसो गुम्भन्तु संभाविताः
स्वप्रज्ञानुगुणं मितंपचवचाः स्वैरं विधत्तां कृतिम् ।
माकन्दद्रुमनन्दनीयविपिने पैके भवःपारणां
तन्वाने विरुतेन किं नु भजते पुष्पंधयो मूकताम् ॥ १० ॥

'कुट्टाकश्छेदकश्चेत्ता' इति सारे । य उदीर्णवेगः तेन स्फुरितानां वरपदानां न्यासेन धन्याः प्रशस्ताः 'सुकृती पुण्यवान्धन्यः' इत्यमरः । वेगवदतिप्रौढसाहितीरचनाकुशला इति भावः । किं च आचान्ता कवलिता मधुरसलहर्याः वर्यमाधुर्यस्य चर्या याभिस्तथोक्ताश्च, विराजन्त इति शेषः । अतिमधुरा इति भावः । तादृशवाग्विशिष्टा यूयं नते नम्रे मयि वीतकम्पानुकम्पाः निष्कम्पदयावन्तः भवत । प्रार्थनायां लोट् ॥ ८ ॥

माहेशानेति । माहेशानं महेश्वरसंबन्धि यच्छिरस्तस्मात् सरन्त्याः सुरसरितः गङ्गायाः घाटीभराहंक्रियायाः हुंकारेण उत्तरा उत्कृष्टा या वैखर्यः वाचः तासां विहरणं यस्मिन् तथोक्ते । किं च, धारावाहिमधूलिकामधुरिम्णः मकरन्दमाधुर्यस्य 'रसासवमधूलिकाः' इति सारे । यत्प्रागल्भ्यं तस्य सौवस्तिके कुशलपृच्छके, अत्यन्तमाधुर्यशालिनीति भावः । प्राचि पुरातने अप्रतने नवीने च प्रबन्धव्रजे जाग्रत्यपि कृतिं तनोति । सनातनाधुनातनप्रबन्धेषु सत्स्वपि नव्यतरप्रबन्धरचनाकुतूहलेनेति भावः ॥ ९ ॥

ग्रन्थानिति । संभाविताः संमानिताः प्रवचसः प्रगल्भवाचः कवयः । श्रीशगुणैः उत्तरानुत्कृष्टान् गुम्भन्तु रचयन्तु । मितंपचवचाः मितवागपि । 'पुष्पंधयो मिलिन्दश्च भसलश्च द्विरेफकः' इति सारे ॥ १० ॥

दत्तात्रेयो वरीयानुदयगिरिकुलक्षीरवाराशिराका-
शुभ्रांशुर्दिग्वधूटीगुणविशदपटीभूतकीर्त्तिप्रबन्धः ।
विद्वद्वृन्दारकेन्द्रो जयति वितनुते तस्य गङ्गाधराख्यः
सूनुः श्रीकान्तमद्राधिपवरतनयोद्वाहरम्यं प्रबन्धम् ॥ ११ ॥

वेदितोऽयमाविद्वद्दङ्गनागोपालमाभाणकः—

निरन्तराचरितप्रणिधानयोगसमेधितपरभागसत्त्वगुणदूरपराभूतरजस्त-
मोगन्धानुबन्धतया नित्यावदातहृदयैः निगमशिखरवचनपरिपाटीपेटि-
कागर्भमुक्तायमानजगदीशमहितापदानप्रतिक्षणानुसंधानकन्दलदकृत-
कानन्दतुन्दिलैः सनकसनन्दनादियोगिभिरचार्मणेनापरोक्षितश्चक्षुषा

दत्तात्रेय इति । विद्वद्वृन्दारकाणां विद्वद्वरिष्ठानाम् इन्द्रः श्रेष्ठः 'पुमान्वृन्दारको देवे त्रिषु श्रेष्ठमनोज्ञयोः' इति रत्नं । श्रीकान्तस्य मद्राधिपवरतनयायाः लक्ष्मणाऽऽख्यकन्यायाश्च उद्वाह-कथया रम्याम् । 'सत्यभामा जाम्बवती रुक्मिणी रोहिणी तथा । कालिन्दी लक्ष्मणा मित्रविन्दा सत्याऽष्ट भूतयः ॥' इति ॥ ११ ॥

विदित इति । अयं वक्ष्यमाणप्रकारः आभाणकः प्रवादः । विद्वद्दङ्गनागोपालानामभि-व्याप्य आविद्वद्दङ्गनागोपालं विदितः प्रसिद्धः । 'आभाणकदर्थेऽभिव्याप्तौ' 'आभाणकः प्रवादः स्यात्' इत्यमरः । निरन्तराचरितेत्यारभ्य सुखमासामासेत्यन्तेन गद्येन योगिदृग्विषयः श्रीनि-केतनः दुष्टराजपीडितया पृथिव्या प्रार्थित सन्यादवकुले कृष्णरूपेणावतीर्य दुष्टराजोन्मूलनं कृत्वा गोपाङ्गनाभिः क्रीडमानः सुखमुवासेति प्रतिपद्यते । तत्र निरन्तराचरितेन प्रणिधानयोगेन ध्यान-योगेन, 'प्रणिधानं प्रसंख्यानं ध्यानम्' इति सारे । समेधितः परभागः यस्य तत् 'परभागो गुणोत्कर्षः' इत्यमरः । तेन सत्त्वेन सत्त्वगुणेन दूरं पराभूतः रजस्तमसोर्गन्धः लेशः तस्य अनु-बन्धतया संबन्धतया रजस्तमोगन्धशून्यतयेति भावः । 'गन्धो गन्धक आमोदे लेशे संबन्ध-गर्वयोः' इति विश्वः । नित्यावदातहृदयैः नित्यशुद्धचित्तैः निगमशिखरवचनानामुपनिषद्वचसां परिपाटी क्रमः, सैव पेटिका तद्गर्भे मुक्तायमानं जगदीशस्य महितमुत्कृष्टं यदपदानम् 'अपदानं कर्म वृत्तम्' इत्यमरः । तस्य प्रतिक्षणानुध्यानेन कन्दलदकृतकानन्देन तुन्दिलैः सनकादियोगिभिः चर्मनिर्मितं चार्मणं तत्र भवतीति अचार्मणेन चक्षुषा ज्ञानदृशेत्यर्थः । अपरोक्षितः प्रत्यक्षीकृतः

अखर्वबाहागर्वखर्वीकृतसर्वगीर्वाणसमुदयनिर्वाणभीमसोमकप्रमुखमद-
मेदुरनिशाचरचण्डलुण्टाकरचितजगल्लुण्टनसमसमयसंभ्रमपरिसर-
चरदुद्धतदानवकोलाहलबधिरिताजाण्डकटाहजठरचरद्रोरूयमाणभीत-
भूतसमुदायाभयदानधौरेयापरिमेयभुजमहिमा, अनेकजननान्तरसं-
पादितसुकृतसंपातलभ्यदर्शननिरवधिकसंभ्रमसमाटीकमानकमलसंभ-
वप्रमुखनिखिलसुरवराञ्जलिपुञ्जविकीर्यमाणकुसुमविसरानवरतपरिगल-
न्दमकरन्दधारासंपातपुनरुक्तनाभिनलिनमधुरसपरिमललहरीपिच्चण्डि-
लकलशजलनिधिमध्यसीमाललामान्तरीपधामा, तरुणतरतापिच्छसुम-
गुलुच्छान्तरच्छदच्छायादायाददर्शनीयकायरुचिमायायामिनीपरिहृतम-

अखर्वेण स्फीतेन बाहागर्वेण खर्वीकृतमल्पीकृतम्। सर्वगीर्वाणसमुदयस्य निर्वाणं सुखं यैस्ते तादृशाः भीमाः सोमकासुरप्रमुखाः मदेन मेदुराः सान्द्राः 'सान्द्रः स्निग्धस्तु मेदुरः' इत्यमरः। ये निशाचरास्त एव चण्डलुण्टाकाः क्रूरदस्यवः 'चण्डस्त्वत्यन्तकोपनः' 'लुण्टाको हारिकः' इत्यमरः। तद्रचितं यज्जगल्लुण्टनं पृथिवीवेदाद्यपहरणं तत्समये तन्नानकाले ससंभ्रमं परिसरे सोमकादीनां समीपे चरतामुद्धतदानवानां कोलाहलेनोच्चध्वनिना 'कोलाहलः कलकलः' इत्यमरः। बधिरितस्य अजाण्डकटाहस्य जठरे चरतः रोरूयमाणस्याक्रन्दतः भीतभूतसमुदायस्य देवादिभूतग्रामस्य अभयदाने धौरेयः 'धूर्वहे धुर्यधौरेयधुरीणाः' इत्यमरः। अपरिमेयः भुजमहिमा भुजमाहात्म्यं यस्य तथोक्तः। अनेकान्यन्यानि जननानि जननान्तराणि 'जन्तुर्जननजन्मानि' इत्यमरः। तेषु संपादितेन सुकृतसंपातेन पुण्येन लभ्यं भगवतो यद्दर्शनं तस्मै। 'दर्शनालोकनेक्षणम्' इत्यमरः। निरवधिकसंभ्रमेण समाटीकमानानामागच्छताम्। 'टीकृ गतौ'। कमलसंभवप्रमुखसुरवराणामञ्जलिपुञ्जविकीर्यमाणेभ्यः कुसुमविसरेभ्यः 'संदोहविसरव्रजाः' इत्यमरः। ततोऽमन्दमकरन्दधारासंपातेन पुनरुक्तस्य द्विगुणितस्य नाभिनलिनमधुरसस्य परिमललहर्या पिच्चण्डिलायाः तुन्दिलायाः 'बृहत्तुन्दः पिचण्डिलः' इत्यमरः। कलशजलनिधिमध्यसीमायाः ललाममलंकारभूतम् अन्तरीपमेव धाम गृहं यस्य तथोक्तः। 'द्वीपोऽस्त्रियामन्तरीपम्' इत्यमरः। तरुणतरस्य तापिच्छसुमगुलुच्छस्य तमालगुच्छस्य तापिनं छादयतीति तापिच्छः 'छद अपवारणे' 'कालस्कन्धस्तमालः स्यात्तापिच्छः' इत्यमरः। 'गुच्छो गुलुच्छः स्तबकः' इति शारे। अन्तरच्छदस्य मध्यदलस्य च्छायादायादा च्छायाबन्धुः तत्सदृशीत्यर्थः। 'दायादौ सुतबान्धवौ' इत्यमरः। दर्शनीयः कायरुचिरेव मायायामिनी कपटरात्रिः

न्दाक्षहृदयेन्दिराकुम्भसुभगंभावुकगम्भीरिमोल्लसदुरोजपरीरम्भसंभावनानिरन्तरतरङ्गितप्रेमा, भगवान्खगपतिकेतनः श्रीनिकेतनः, धर्मसरणिदवीयोभिर्निर्मर्यादविहारैर्दुर्मदराजन्यकैर्नित्याहितमत्याहितमसहमानायाः शर्म मनागप्यनासादयन्त्या वसुमत्याः शरणमन्वेषयन्त्याः गोवेषेण नवमादीनवं निर्गन्धयितुमुद्ग्रन्थिमाहतमानुषभावो यादव्यां संततावुदयन्दयमानचेताः जङ्गमचराभिन्नजगदुज्जीवनैः पावनैः प्रणयभरितनर्मवचनचातुरीपेशलैः सरसदरहाससाकूतावलोकनप्रायैः स्मारमहोदारदर्शनमर्मसर्वनिर्वाहकैः मोहकैः वल्लवपल्लवाधरीहृदयसमुल्लासकैर्विलासैः अपूर्वसुरतनाटकपटुनटनपाटवोपदेशदेशिकतां च प्रकाशयन्नात्मनः सुखमासामासेति ॥

भगवद्देहकान्तेरतिनीलत्वादिति भावः । तया परिहृतमन्दाक्षहृदयायाः 'मन्दाक्षं ह्रीक्षपा व्रीडा' इत्यमरः । इन्दिरायाः कुम्भवत्सुभगौ भवत इति सुभगंभावुकयोः सुन्दरयोः गम्भीरिम्णोल्लसतोरुरोजयोः परीरम्भसंभावनया परिष्वङ्गरूपसंभावनेन निरन्तरं तरङ्गितः परम्परितः प्रेमा यस्य तथोक्तः भगवान् खगपतिकेतनः श्रीनिकेतनः धर्मसरणेः दवीयोभिः सुदूरैः धर्मविमुखैरित्यर्थः । 'दवीयश्च दविष्ठं च सुदूरम्' इत्यमरः । निर्मर्यादविहारैः मर्यादातीतचेष्टैः दुर्मदराजन्यकैः दुष्टक्षत्रियसङ्घैः । 'अथ राजकम् । राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात्' इत्यमरः । नित्यमाहितमत्याहितम् 'अत्याहितं महाभीतिः' इत्यमरः । असहमानायाः अत एव मनागपि ईषदपि 'किंचिदीषन्मनागल्पे' इत्यमरः । शर्म सुखम् अनासादयन्त्याः गोवेषेण शरणं रक्षकम् अन्वेषयन्त्याः मृगयन्त्याः 'शरणं गृहरक्षित्रोः' इत्यमरः । वसुमत्याः पृथिव्याः नवमुद्ग्रन्थिं रूढग्रन्थिम्; अतिदृढमित्यर्थः । आदीनवं क्लेशम् 'आदीनवास्रवौ क्लेशे' इत्यमरः । निर्गन्धयितुं निर्लेशं कर्तुम्; निर्वापणं संज्ञपनं 'निर्गन्धनमपासनम्' इत्यमरः । दयमानचेताः दयाकारिचेताः । यादव्यां यदुसंबन्धिन्यां संततौ वंशे उदयन्सन् जङ्गमस्य चराभिन्नस्य स्थिरस्य च जगत उज्जीवनैरुज्जीवकैः; कर्तरि ल्युट् । दुष्टराजोन्मूलनेन जगद्रक्षकैरित्यर्थः । प्रणयभरितानाम् 'प्रणयः स्यात्परिचये विस्रम्भप्रेमयाच्ञयोः' इति रत्नमाला । नर्मवचनानां परिहासवचनानां चातुर्यो पेशलैः मनोहरैः 'पेशलौ चारुचतुरौ' इति रत्नमाला । सरसदरहासः सानुरागहासः साकूतावलोकनं साभिप्रायेक्षणं च तत्प्रायैस्तद्भूयिष्ठैः 'प्रायो भूम्न्यन्तगमने' इत्यमरः । स्मारमहोदारदर्शनस्य मदनशास्त्रस्य 'शासनं दर्शनं शास्त्रम्' इति शारे । सर्वनिर्वाहकैः स्वरूपसर्वस्वप्रकाशकैः वल्लवपल्लवाधरीणां गोपाङ्गनानां हृदयस्य समुल्लासकैः विकासकैः विलासैः । अपूर्वसुरतनाटकस्य नटनपाटवोपदेशे आत्मनो देशिकतां च प्रकाशयन्सुखमासामास बभास इति ॥

॥ श्रीः ॥

॥ जीवन्मुक्तिकल्याणम् ॥

॥ नल्लाध्वरिविरचितम् ॥



प्रथमोऽङ्कः ।

भद्राकारपरिग्रहोचितमदारम्भप्रियंभावुकाः
स्वीकुर्वञ्शुभवासनाः कतिचिदप्याज्ञापरिष्कारिणीः ।
श्रुत्यन्ताभ्यसनैरलिव्यतिकरादात्मानमुन्मोचय-
न्स श्रीमान्कृपया महागणपतिः पुष्णातु निःश्रेयसम् ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः—

तादात्म्येन निरन्तरालमिलितां गौरीं विहारेच्छया
विस्मृत्याथ तया वियोजित इतस्तन्वंस्तदन्वेषणम् ।
सेनान्या भगवन्भवान्यपि भवानेवेत्यनूद्बोधित-
स्तल्लाभादि[नि]र्वृतो दिशतु वः श्रेयोऽर्धनारीश्वरः ॥ २ ॥

(इति पुष्पाञ्जलिं विकीर्य, नेपथ्याभिमुखमवलोक्य,) आर्ये, इतस्तावत् ।

(प्रविश्य)

नटी— अज्ज, इअम्हि । [आर्य, इयमस्मि ।]

सूत्रधारः— आर्ये, अद्य खलु भगवतो मध्यार्जुनप्रभोर्यात्राप्रत्युपस्थितैः शमदमप्रधानैर्ब्रह्मनिष्ठै-
रादिष्टोऽस्मि सामाजिकैरध्यात्मकथानुबन्धबन्धुरं किमप्यपूर्वं नाटकं नाटयितव्यमिति । तदनु-
चिन्त्यतां त्वया तथाविधं नाटकम् ।

नटी— अज्ज, किं वि मे ण पडिहाइ । [आर्य, किमपि मे न प्रतिभाति ।]

सूत्रधारः— अयि विस्मरणशीले, त्वमजैवासि प्रकृत्या ।

नटी— (सक्रोधम्) जइ एव्वं तदो अज्जस्स अणुरूवा भविस्सं । [यद्येवं तत आर्यस्यानुरूपा भविष्यामि ।]

सूत्रधारः— (सक्रोधावेगम्) मुग्धे, प्रकृत्याऽहमपि यद्यजः स्यां तर्हि तदनुरूप आचारः पक्षे त्वत्परित्यागरूप एव पर्यवस्येदिति महदनिष्टमापद्येत । तथा खल्वजानामाचारो दृश्यते ।

एकामजां लोहितशुक्लकृष्णां बह्वीः प्रजाः स्वानुरूपाः सृजन्तीम् ।
एको ह्यजस्तामनुशेत एनां जहाति चैनामपरोऽनुशुक्ताम् ॥ ३ ॥

नटी— भुत्तभोअं मं उज्झिअ अण्णाए कए वि कण्णाए संगदुअ णिव्वुदो होदु अज्जो । [भुक्तभोगां मामुज्झित्वाऽन्यया कयाऽपि कन्यया संगत्य निर्वृतो भवत्वार्यः ।]

(इति साटोपं परावर्तते ।)

सूत्रधारः— (सानुनयं हस्ते गृहीत्वा) अयि सदसद्विलक्षणे, वाचारम्भणमात्र एव प्रपञ्चो न परमार्थः । तदेहि, मा निवर्तस्व । नर्तितव्यं नाम त्वया यावत्प्रतिभासं प्रारब्धानुसारेण । ततस्तु परं स्वत एव परावर्तिष्यसे ।

नटी— (सप्रसादौन्मुख्यम्) अज्ज, मए किं णच्चिदव्वं ? [आर्य, मया किं नर्तितव्यम् ?]

सूत्रधारः— जीवन्मुक्तिकल्याणं नाम नाटकम्, यस्य कविः सुभद्रापरिणयशृङ्गारसर्वस्वचित्रवृत्तिकल्याणाद्वैतरसमञ्जर्याद्यनेकप्रबन्धनिबन्धनाभिनन्दनीयः श्रीबालचन्द्रसूर्येन्द्रनन्दनो नल्लाध्वरी ।

नटी— अज्ज, सुमराविदम्हि । विसुमरणकिदो उण मए अवराहो मरिसिदव्वो । [आर्य, स्मारिताऽस्मि । विस्मरणकृतः पुनर्ममापराधो मर्षितव्यः ।]

सूत्रधारः— अस्तु नामेदम् । प्रस्तूयतां संगीतकम् । संप्रति हि,

शारदानुग्रहवशाद्विशदीकृतमानसाः ।
हंसाभ्युदयशंसिन्यो वासराणां विभूतयः ॥ ४ ॥

नटी—

दाणिं पडिप्पहादं सुज्जालेअप्फुडीकिदप्पासिरी ।
ण खु सा राजीवतदी खमदि भमरलक्खणप्पपरिहूदिं ॥ ५ ॥

प्रथमोऽङ्कः ।

[इदानीं प्रतिप्रभातं सूर्यालोकस्फुटीकृतात्मश्रीः ।
न खलु सा राजीवततिः क्षमते भ्रमरलक्षणात्मपरिभूतिम् ॥]

सूत्रधारः—

कविरतिमनोज्ञसूक्तिः कथा जगत्पावनी वयं कृतिनः ।
परिषदियं गुणनिष्ठा भव्यस्य विधेः प्रसादविभवोऽयम् ॥ ६ ॥

(निपथ्ये)

अये भरतकुलशेखर, विधिप्रसादविभव इति मां निर्दिशञ्श्लाघनीयोऽसि ।

चोदनात्मा विधिस्तस्य प्रसादो जनको मम ।
विधिप्रसादविभवस्तस्मादहमुदाहृतः ॥ ७ ॥

सूत्रधारः— (स्मृतिमभिनीय) कथमेष प्रविष्ट एव भावो जीवामात्यस्य रमणीयचरणस्य भूमिकामादाय रङ्गमण्डपम् । आर्ये, तदावामप्यनन्तरकरणीयाय सज्जीभवावः । (इति निष्क्रान्तौ ।)

॥ प्रस्तावना ॥

(ततः प्रविशति रमणीयचरणः ।)

रमणीयचरणः—

विधिगोचरकर्मनिर्मितत्वाद्विमलोऽहं सकलाभिलाषपात्रम् ।
उपजीव्यतया ततः परेषां प्रथितः प्राथमिकः स्वयं समर्थः ॥ ८ ॥

अपि च,

स्वर्गादिनश्वरफलानभिसंधिबन्धनिर्व्यूढया भगवदर्थतयाऽन्वितो यः ।
तस्मान्निसर्गमहतः शुभकर्मराशेर्जातस्य मे किमितरेण गुणोत्तरेण ॥ ९ ॥

किं च,

अनेनैवानुभावेन मया लब्धा महोन्नता ।
सत्त्वशुद्धिरिति ख्याता कन्या कल्मषहारिणी ॥ १० ॥

(प्रविश्य)

सत्त्वशुद्धिः— आणवेदु अज्जो जं मए अणुचिट्ठिअदु । [आज्ञापयत्वार्यो यन्मयाऽनुष्ठीयताम् ।]

नटी— अज्ज, किं वि मे ण पडिहाइ । [आर्य, किमपि मे न प्रतिभाति ।]

सूत्रधारः— अयि विस्मरणशीले, त्वमजैवासि प्रकृत्या ।

नटी— (सक्रोधम्) जइ एव्वं तदो अज्जस्स अणुरूवा भविस्सं । [यद्येवं तत आर्यस्यानुरूपा भविष्यामि ।]

सूत्रधारः— (सक्रोधावेगम्) मुग्धे, प्रकृत्याऽहमपि यद्यजः स्यां तर्हि तदनुरूप आचारः पक्षे त्वत्परित्यागरूप एव पर्यवस्येदिति महदनिष्टमापद्येत । तथा खल्वजानामाचारो दृश्यते ।

एकामजां लोहितशुक्लकृष्णां बह्वीः प्रजाः स्वानुरूपाः सृजन्तीम् ।
एको ह्यजस्तामनुशेत एनां जहाति चैनामपरोऽनुशुक्ताम् ॥ ३ ॥

नटी— भुत्तभोअं मं उज्झिअ अण्णाए कए वि कण्णाए संगदुअ णिव्वुदो होदु अज्जो । [भुक्तभोगां मामुज्झित्वाऽन्यया कयाऽपि कन्यया संगत्य निर्वृतो भवत्वार्यः ।]

(इति साटोपं परावर्तते ।)

सूत्रधारः— (सानुनयं हस्ते गृहीत्वा) अयि सदसद्विलक्षणे, वाचारम्भणमात्र एव प्रपञ्चो न परमार्थः । तदेहि, मा निवर्तस्व । नर्तितव्यं नाम त्वया यावत्प्रतिभासं प्रारब्धानुसारेण । ततस्तु परं स्वत एव परावर्तिष्यसे ।

नटी— (सप्रसादौन्मुख्यम्) अज्ज, मए किं णच्चिदव्वं ? [आर्य, मया किं नर्तितव्यम् ?]

सूत्रधारः— जीवन्मुक्तिकल्याणं नाम नाटकम्, यस्य कविः सुभद्रापरिणयशृङ्गारसर्वस्वचित्रवृत्तिकल्याणाद्वैतरसमञ्जर्याद्यनेकप्रबन्धनिबन्धनाभिनन्दनीयः श्रीबालचन्द्रसूरीन्द्रनन्दनो नल्लाध्वरी ।

नटी— अज्ज, सुमराविदम्हि । विसुमरणाकिदो उण मह अवराहो मरिसिदव्वो । [आर्य, स्मारिताऽस्मि । विस्मरणकृतः पुनर्ममापराधो मर्षितव्यः ।]

सूत्रधारः— अस्तु नामेदम् । प्रस्तूयतां संगीतकम् । संप्रति हि,

शारदानुग्रहवशाद्विशदीकृतमानसाः ।
हंसाभ्युदयशंसिन्यो वासराणां विभूतयः ॥ ४ ॥

नटी—

दाणिं पडिप्पहादं सुज्जालोअप्फुडीकिदप्पसिरी ।
ण खु सा राजीवतदी खमदि भमरलक्खणप्पपरिहूदिं ॥ ५ ॥

[इदानीं प्रतिप्रभातं सूर्यालोकस्फुटीकृतात्मश्रीः ।
न खलु सा राजीवततिः क्षमते अवरलक्षणात्मपरिभूतिम् ॥]

सूत्रधारः—

कविरतिमनोज्ञसूक्तिः कथा जगत्पावनी वयं कृतिनः ।
परिषादियं गुणनिष्ठा भव्यस्य विधेः प्रसादविभवोऽयम् ॥ ६ ॥

(नेपथ्ये)

अये भरतकुलशेखर, विधिप्रसादविभव इति मां निर्दिशन्श्लाघनीयोऽसि ।

चोदनात्मा विधिस्तस्य प्रसादो जनको मम ।
विधिप्रसादविभवस्तस्मादहमुदाहृतः ॥ ७ ॥

सूत्रधारः— (स्मृतिमभिनीय) कथमेष प्रविष्ट एव भावो जीवामात्यस्य रमणीयचरणस्य भूमिकामादाय रङ्गमण्डपम् । आर्ये, तदावामप्यनन्तरकरणीयाय सज्जीभवावः । (इति निष्क्रान्तौ ।)

॥ प्रस्तावना ॥

(ततः प्रविशति रमणीयचरणः ।)

रमणीयचरणः—

विधिगोचरकर्मानिर्मितत्वाद्विमलोऽहं सकलाभिलाषपात्रम् ।
उपजीव्यतया ततः परेषां प्रथितः प्राथमिकः स्वयं समर्थः ॥ ८ ॥

अपि च,

स्वर्गादिनश्वरफलानभिसंधिबन्धनिर्व्यूढया भगवदर्थतयाऽन्वितो यः ।
तस्माच्चिसर्गमहतः शुभकर्मराशेर्जातस्य मे किमितरेण गुणोत्तरेण ॥ ९ ॥

किं च,

अनेनैवानुभावेन मया लब्धा महोन्नता ।
सत्त्वशुद्धिरिति ख्याता कन्या कल्मषहारिणी ॥ १० ॥

(प्रविश्य)

सत्त्वशुद्धिः— आणवेदु अज्जो जं मए अणुचिट्ठिअदु । [आज्ञापयत्वार्यो यन्मयाऽनुष्ठीयताम् ।]

रमणीयचरणः— वत्से, किमन्यत् ? देवस्य त्वया साहायकमाचरितव्यम् ।

सत्त्वशुद्धिः— को सो देवो ? [कः स देवः ?]

रमणीयचरणः—

सोऽयं यः स्वयमद्वितीयपदवीसाम्राज्यधौरंधरी-
मासाद्य प्रतितिष्ठति स्म महिमाकारे वभद्रासने ।
यश्च व्याधकुले वसन्निव महीपालात्मजो व्याधतां
जीवत्वं गतवान्विमोहनशतः स्वस्मात्पदाद्भ्रंशितः ॥ ११ ॥

सत्त्वशुद्धिः— अज्ज, किं पत्थुदं तस्स देवस्स । [आर्य, किं प्रस्तुतं तस्य देवस्य ।]

रमणीयचरणः— पाणिग्रहणमहोत्सवः ।

सत्त्वशुद्धिः— अज्ज, अत्थि खु तस्स पुढमो पडिग्गहो देवी, या बुद्धि त्ति अन्तःकरणं ति मणं त्ति चित्तं त्ति अ भणिअदि । [आर्य, अस्ति खलु तस्य प्रथमः प्रतिग्रहो देवी, या बुद्धिरित्यन्तःकरणमिति मन इति चित्तमिति च भण्यते ।]

रमणीयचरणः— संप्रति तस्यां वैरस्येनोपजातजिहासो देवः ।

सत्त्वशुद्धिः— हद्धि हद्धि, छाआदवाणं विअ समणिअदाणं वि ताणं ईरिसो दसापरिणामो [हा धिक्, हा धिक् । छायातपयोरिव समनियतयोरपि तयोरीदृशो दशापरिणामः ।]

रमणीयचरणः— वत्से, छायातपयोरिवेति निदर्शनो दृष्टान्तः ।

छायैषा पुनरातपोऽयमिति च स्पष्टं प्रतीतात्मनो-
रन्योन्यं व्यतिषक्तयोरपि तयोर्भेदः सुखं गृह्यते ।
अन्योन्यात्मकयोरनादिसमयादन्योन्यताद्धर्म्ययो-
र्बुद्धिर्जीव इति द्वयोरपि तयोर्भेदग्रहो दुर्लभः ॥ १२ ॥

सत्त्वशुद्धिः— अज्ज, ईरिसी अ देवी कीस देवेण विरसदाए गोअरीकिदा ? [आर्य, ईदृशी देवी कस्मादेवेन विरसतायां गोचरीकृता ?]

रमणीयचरणः— यतस्तत्संगमप्रभृति सुखमिति किंचिन्न जानाति देवः । तथा हि,

रागद्वेषकषायितस्ववपुषा बुद्ध्या समालिङ्गितः
पुण्यापुण्यमयेषु कर्मसु ततो मोहात्प्रवृत्तः स्वयम् ।
देहाद्यात्मतयाऽथ कर्मजनितं स्वर्गादिरूपं फलं
भुञ्जानो जनिहानिदुःखजलधेरावर्त आवर्तते ॥३ १ ॥

उक्तं च मां प्रति गर्भगृहं प्रविष्टेन देवेन,

संसाराध्वनि संकटे निरवधौ तापत्रयोत्पीडिते
यातायातकृता यया मम चिरादात्मेत्थमायास्यते ।
अस्माद्गर्भगृहाद्बहिर्यदि विनिर्गच्छेत किंचिन्मया
सैषाऽनर्थकरी तदैव सहसोत्सृष्टेति निश्चीयताम् ॥ १४ ॥ इति ।

सत्त्वशुद्धिः— हद्धि हद्धि । साहसव्ववसाओ देवो । अज्ज, कहं सो गब्भघरअं पविट्ठो ? इट्ठादिकारिदाए धूमादिमग्गेण चन्दलोअं गदो त्ति खु सुणिज्जइ । [हा धिक् , हा धिक् । साहसव्यवसायो देवः । आर्य, कथं स गर्भगृहं प्रविष्टः ? इष्टादिकारितया धूमादिमार्गेण चन्द्रलोकं गत इति खलु श्रूयते ।]

रमणीयचरणः— वत्से, श्रूयताम् ,

गत्वा चन्द्रमसं विभूत्यनुभवात्प्रक्षीणपुण्यस्ततो
भूलोकेऽवतरन्कपूयचरणं जित्वा मयाऽऽलम्बितः ।
श्रद्धाद्याहुतिपञ्चकेन च पथा योनिं गतो ब्राह्मणीं
गर्भागारमनुप्रविश्य दशमे मासे ततो निर्गतः ॥ १५ ॥

संप्रति च,

इन्द्रियहयं मनोमयरश्मिचयं बुद्धिसारथिसनाथम् ।
देहरथमास्थितोऽयं देवो विषयाटवीषु पर्यटति ॥ १६ ॥

सत्त्वशुद्धिः— कहं इदं वि एव्वं णाम । [कथमिदमप्येवं नाम ।]

रमणीयचरणः— वत्से, अस्यदस्ति कारणं देवीजिज्ञासायां देवस्य, यत्पुराणज्योतिर्विदामनुक्रमणम् । यथा,

बुद्धित्यागेन देवस्य स्वपदप्राप्तिरिष्यते ।
बुद्धित्यागश्च विश्वातिशायिदारान्तरान्वयात् ॥ १७ ॥ इति ।

सत्त्वशुद्धिः— अज्ज, का उण कण्णा तारिसी जाए जोएण देवस्स सपदप्पत्ती ववदिसिज्जइ । [आर्य, का पुनः कन्या तादृशी, यस्या योगेन देवस्य स्वपदप्राप्तिर्व्यपदिश्यते ।]

रमणीयचरणः— अद्यापि नावधार्यते । प्रेषितश्चावन्मया तादृशकन्यान्वेषणायापातबोधो नामाधुनिको देवानुचरः ।

सत्त्वशुद्धिः— कहं विअ एदं घडिज्जइ ? [कथमिवैतद्घटिष्यते ?]

रमणीयचरणः— किं तादृशी कन्यैव दुरुपलम्भेति तथा ब्रवीषि, आहो स्विदुपलब्धाऽपि देवस्य दुर्लभेति ?

सत्त्वशुद्धिः— तह तह अ । [तथा तथा च ।]

रमणीयचरणः— अयि वत्से,

देवोऽयं स्वपदाच्च्युतः किल कुतो भूयोऽपि तस्योदयः
श्रेयो वा तदिदं पुमर्थपरिषन्मूर्धाभिषिक्तं कुतः ।
इत्येवं यदि मन्यसे हृदि तदा मिथ्यैव ते निश्चय-
स्तत्तस्य क्व गतं पदं क्व नु गतो देवः स वा संप्रति ॥ १८ ॥

परं तु मोचनीयो देवः पाशबन्धादज्ञानवर्मण ऐन्द्रजालिकस्य । य एषः,

विक्षेपावृतिशक्तिमाञ्जडमयो मोहात्मको दुःखभू-
रक्षानप्रतिबिम्बतः प्रकटयन्नात्मानमप्यन्यथा ।
आकाशानिलहव्यवाहसलिलक्ष्मोण्यात्मभिः पञ्चभि-
र्भूतैरातनुते निजां परिणतिं पञ्चीकृतिप्रक्रमैः ॥ १९ ॥

सत्त्वशुद्धिः— अज्ज, किं सो जो देवीए तादो त्ति सुणिज्जइ । हद्धि हद्धि । दुज्जओ खु सो । [आर्य, किं स यो देव्यास्तात इति श्रूयते । हा धिक्, हा धिक् । दुर्जयः खलु सः ।]

रमणीयचरणः— (सरोषम्) वत्से, किमुच्यते दुर्जय इति ।

आत्मस्वामिनमिन्द्रजालविधिना पाशेन बध्नाति यः
पश्यैनं पशुकल्पमल्पधिषणं बद्ध्वा पदाऽऽक्रम्य च ।
छिन्दन्क्रन्दत एव तत्त्वमसिना तस्याङ्कं खण्डशो
विश्वग्रासपरस्य तेन महतो भूतस्य कुर्यां बलिम् ॥ २० ॥

सत्त्वशुद्धिः— अज्ज, मा कुप्प । अरिहिं कामादिहिं करिज्जन्तसाहाअओ सो सङ्किदव्वो त्ति तह मन्तेमि । [आर्य, मा कुप्य । अरिभिः कामादिभिः क्रियमाणसाहायकः स शङ्कितव्य इति तथा मन्त्रयामि ।]

रमणीयचरणः—

कामादयः सन्तु सहस्रमस्य सहायभूता बलिनस्तथाऽपि ।
महत्तरैरात्मगुणैर्भृतस्य ममाग्रतः स्थातुमिह क्षमः कः ॥ २१ ॥

(उभौ परिक्रामतः ।)

रमणीयचरणः— (निरूप्य) कथमित एव देवः ।

चिराय सोऽयं मृगयाप्रवृत्तः प्रमत्तया सारथिभावभाजा ।
विकृष्यमाणः परितोऽपि देव्या गुरुव्यथः संमुखमभ्युपैति ॥ २२ ॥

(ततः प्रविशति यथानिर्दिष्टो जीवः, बुद्धिश्च रथेन, विभवतश्च परिवारः ।)

जीवः—

स एष मधुरः स्वरो रुचिर एष रूपोच्चयः
सुसौरभमिदं त्वियं शिशिरता रसोऽसाविति ।
इतः श्रवणमेकतो नयनमन्यतो घ्राणम-
प्यतस्त्वगपि हन्त मां रसनमग्रतः कर्षति ॥ २३ ॥

देवि, स्तिमितगतयः क्रियन्तां वाजिनः । यतः,

धावन्तो विषयेषु सांप्रतममी रथ्यास्तव प्रेरणा-
द्व्याकर्षन्ति यथायथं तत इतस्त्वामन्ततो नामपि ।

आस्तां तावदिदं रथस्य तु महानायासयोगः परं
न ह्येष क्षमते शिरीषसुमतोऽप्यत्यन्तमापेशलः ॥ २४ ॥

कथमेषा मद्वचनमनाकर्ण्य विघूर्णते भूताविष्टेव । भवतु, एतानेवाश्वान्प्रति सान्त्वयामि ।

श्रवणरसनघ्राणत्वङ्नेत्र हन्त भवन्मुखैः
स्थितमभिहते वस्तुन्यस्तोकसाहसवृत्तिभिः ।
अलमलमितः श्रान्तं भूयः सुखेन विरम्यता-
महमुपरतो मा मा कर्षन्तु मामयमञ्जलिः ॥ २५ ॥

अथ वा न दुर्मेधेष्वेतेषु सान्त्ववादः क्रमते । हन्त हन्त,

अयं शताङ्गः परिजर्जराङ्गः पदे पदे शङ्कितभङ्गमास्ते ।
दुष्टा हयाः कष्टदशा च देवी कथं नु कल्याणमिदं भजेयम् ॥ २६ ॥

(आकाशे) रमणीयचरण, कासि भोः कासि ।

चिरादेतावन्तं समयमतिघोरे भवपथे
न किं पर्याप्तोति भ्रमणमिदमेतावदपि मे ।
कियन्तं वा कालं भ्रमयितुमितोऽपि व्यवसितं
यथासंकल्पं ते भवतु मम वा किं प्रतिहतम् ॥ २७ ॥

रमणीयचरणः— (उपसृत्य) विजयतां देवः ।

जीवः— अये रमणीयचरण,

अहं भ्रामं भ्रामं क्रकचपरुषे वै श्रुतिपथे
परिश्रान्तो नातः पदमपि सखे र्थी विचलितुम् ।
प्रभुत्वं मय्यार्ते प्रकटयसि किं सांप्रतमिदं
तवोपेक्षाया वा किमु समुचितोऽसावसरः ॥ २८ ॥

रमणीयचरणः— दासजनेऽस्मिन्न सांप्रतमेतिमात्रं वचनं कल्याणक्षेत्रवेदेश्वरस्य ।

तत्र संग्रामयतेः सोपसर्गस्यैव चुरादिषु पाठ इति चेत्, इहापि तत् समानम्; भृशादिषु हि सुमनस्, दुर्मनस्, अभिमनस् इति प्रकृतयः पठ्यन्ते। यद्येवम्, अन्वरुध्यतेतिवत् स भविष्यति। नैवम्; यद्यपि 'अनो रुध कामे' इति दिवादिषु पठ्यते, तथाऽपि यथा अरुध्यतेति दृश्यते नैवममनायतेति। तर्हि प्रत्ययार्थविशेषणपक्षे, यथा श्येन इवाचरति श्येनायते इत्यत्र आङः प्रयोग उत्कार्थत्वान्न भवति; एवं सुमनायत इत्यादौ स्वादीनामपि न भवेत्। नैवम्; तत्र हि आङर्थ एव प्रत्ययार्थविशेषणम्, इह तु तत्र स्वादीनामर्थाः; ततश्च मनायत इत्युक्ते न ज्ञायते सुष्ठु दुष्ठु अभि वा मनस्वी भवतीति स्वादयः प्रयुज्यन्ते; यथा 'पुच्छभाण्डचीवराण्णिङ्' (पा. ३-१-२०) इत्यत्र 'पुच्छादुदसने व्यसने पर्यसने च' इति पुच्छमुदस्यति उत्पुच्छयते, व्यस्यति विपुच्छयते, पर्यस्यति परिपुच्छयते, इति एवं अनुकामयते अनुकः, अभिकामयते अभिकः, अभीको वेति। अस्तु वा पूर्वं कमेः साधनेन संबन्धः। ननु चोक्तम् — पश्चादुपसर्गयोगो न घटत इति। निपाता अन्वादयो भविष्यन्ति — अनुरूपः कमिता अनुकः, अभिरूपः अभिकः, अभीको वेति। तथाऽपि, अनुकोऽनुकमिता, अभिकोऽभिकमिता, इति वक्तव्यं स्यात्; यथा— 'उत्क उन्मनाः' इति। नैवम्, सामान्येनापि विशेषाभिधानं दृश्यते; तद्यथा— 'गम्लृ सृप्लृ गतौ' इत्यत्र हि गच्छतीति गौः, सर्पतीति सर्पः इति गमनसर्पणयोर्यद्यपि महान् विशेषः, तथाऽपि गतावित्यविशेषेण निर्दिश्यते। एतेन 'नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः' (पा. ५-२-३१) इत्यादयपि व्याख्यातम्; अत्र हि नासिकायाः अवटीटनम्, अवनमनम्, अवभ्रंशः, इति नतिविशेषा नते इत्यनेन सामान्यशब्देनैवाभिधीयन्त इति। उपसर्गतो वा न दोषः; अनुरूपं कामयते, अभिरूपं कामयत इति क्रियाभागमात्रेणैव संबन्धादन्वादयः प्रत्ययार्थं विशिंषन्तः प्रकृतिभावं लप्स्यन्ते; यथा— सुमनायते, विपुच्छयते इति। विषम उपन्यासः; तत्र हि मनःपुच्छादिकायाः प्रकृतेः श्रवणं विद्यते; इह तु तद्गन्धोऽपि नास्ति; यतः परः प्रत्यय उत्पद्येत। नैवम्; इयान्, इयत्, अधुना, इत्यादावपि प्रकृतेरश्रवणात्। तत्र प्रत्ययनिमित्ता प्रकृतेर्निवृत्तिः इति चेत्, इहापि निपातननिमित्ता भविष्यति। कश्चैवमाह प्रकृतेः पर एव प्रत्ययो भवतीति? 'अव्ययसर्वनाम्नामकच् प्राक् टेः' 'विभाषा सुपो बहुच् पुरस्तात् पूर्वस्य' (पा. ५-३-७१, ६८) समासान्ताश्च सर्वे टजादयः भवन्ति। अपि च, प्रकृतिः प्रत्ययः इति रूपसिद्धिमात्रमेतत्। इदं तु अर्थवत्त्वम्—अयं शब्दोऽस्मिन्नर्थे साधुर्भवतीति। स च क्वचिदेवमुच्यते— 'अनुकाभिकाभीकः कमिता' (पा. ५—३—७४) इति; क्वचिद्वा 'नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः' इति; क्वचिदुत्कर्षः 'अनुपद्यन्वेष्टा' (पा. ५—२—९०) इति; क्वचित् 'श्रोत्रियंश्छन्दोऽधीते' 'क्षेत्रियच् परक्षेत्रे चिकित्स्यते (स्यः)' (पा. ५—२—८४, ९२) इति; क्वचित् 'उपाधिभ्यां

अवज्ञासत्याख्यानयोः' (पा. ५-२-३४) 'अलाबूतिलोमाभङ्गाभ्यो रजसि कटच्' इति; क्वचित् 'अवेः संघाते कटच्' 'दुग्धे स्तोऽजूष्टमरीसचः' इति; क्वचित् 'पशुनामभ्यः स्थाने गोष्टच्' 'द्वित्वे गोष्ठगच्' 'षट्त्वे षड्गवच्' इति; क्वचिच्च 'भवने क्षेत्रे शाकटशाकिनौ' 'स्नेहे तैलच्' इति; क्वचित् 'निष्फलतिलात्पिञ्जपेजौ' 'वाचो व्याहृतार्थायां ङक्' इति; क्वचित्, रूढितोऽर्थ-मलिर्दिष्टमेव 'वेः शालच्छकटचौ' 'संप्रोदश्च कटच्' 'अवात्कुटारच्च' 'नेर्विडज्विरीसचौ' 'कृञ्चूपिडविकचि च' (पा. ५-२-२८, २९, ३०, ३२, ३३) कचिकादेशश्च, इति। ननु च धातुः प्रथमं साधनेन संबध्यते, पश्चादुपसर्गेण; तत्कथमुच्यते? यत्रेच्छसि तथाऽस्तु, विशेष्यं हि पूर्वसिद्धं विशेषणसंबन्धमनुभवति; विशेष्यश्च धात्वर्थः, क्रियारूप उपसर्गाणाम्, उक्तं च— 'क्रियावचनो धातुः' इति; क्रिया च साध्यमुच्यते; साध्यं च साधनसंबन्धमन्तरेण न स्यात्। तदुक्तम्—

प्रयोगार्हेषु सिद्धः सन्भेत्तव्योऽर्थो विशिष्यते। प्राक् च साधनसंबन्धात्क्रिया नैवोपजायते॥
(वाक्यपदीयम्. २-१८५)

उच्यते, भाविसंबन्धयोग्यतासमाश्रयणात्। इदं चावश्यमभ्युपगन्तव्यम्; अन्यथा हि क्रियावचनो धातुः इत्यपि न स्यात्। न च 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' (पा. ३-१-७) इति सन उत्पत्तिः; तदाह—

धातोः साधनयोगस्य भाविनः प्रक्रमाद्यथा। धातुत्वं कर्मभावश्च तथाऽन्यदपि दृश्यताम्॥
(वाक्यपदीयम् २-१८६)

यदि च धातोः पूर्वमुपसर्गेण संबन्धो न स्यात्, कथमुच्यते 'विपराभ्यां जेः' (पा. १-३-१९) 'अधिशीङ्स्थासां कर्म' (पा. १-४-४६) इति? ननु पूर्वमुपसर्गसंबन्धः क्वोपयुज्यते? साधनसंबन्धमन्तरेण तद्विशेषानभिव्यक्तेः। नैवम्, फलकाले बीजसंस्कारस्येव तस्योपयोगात्; तदुक्तम्—

बीजकालेषु संबद्धा यथा लाक्षारसादयः। वर्णादिपरिणामेन फलानामुपकुर्वते॥
बुद्धिस्थादभिसंबन्धात्तथा धातूपसर्गयोः। अभ्यन्तरीकृतो भेदः पदकाले प्रकाशते॥

अङादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम्। धातूपसर्गयोः शास्त्रे धातुरेव हि तादृशः॥

क्रियाविशेषाः संघातैः प्रक्रम्यन्ते क्वचित्क्वचित्। यथा हि संग्रामयतेः सोपसर्गादटो विधिः॥
(वाक्यपदीयम्)

अतः अनुकामयते इत्यादौ धातोः प्रथममुपसर्गेण साधनेन वा संबन्धे न दोष इति। उपसर्गाणां क्रियाविशेषणत्वे त्रयी गतिः — वाचकत्वम्, द्योतकत्वम्, सहाभिधायकत्वं च; यथोच्यते —

स वाचको विशेषाणां संभवाद् द्योतकोऽपि वा। शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते॥

तत्र यदा वाचकत्वं तदा धातोः प्रथममुपसर्गेण संबन्धः; यथा — प्रतिष्ठते, निराकरोति इति। यदा द्योतकत्वं तदा साधनेन; यथा — प्रपचति, निकर्षति इति। यदा सहाभिधायकत्वं तदा धातूपसर्गयोस्तुल्यकालं साधनेन संबन्धः; यथा — अधीते, अध्यैति इति। तदुक्तम् —

स्वादिभिः केवलैर्यत्र गमनादि न गम्यते। तत्रानुभानाद् द्विविधात्तद्धर्मा प्रादिरुच्यते॥

क्वचित्संभाविनो भेदाः केवलैरभिदर्शिताः। उपसर्गेण संबन्धे व्यज्यन्ते प्रपरादिना॥

यदाऽभिधानसामर्थ्यं धातोर्नैकाकिनस्तदा। धातूपसर्गौ संभूय समर्थावर्थमाहतुः॥ इति॥

(वाक्यपदीयम्)

ननु च, प्रथमतः साधनसंबन्धे प्रपचतीत्यत्र प्रकृष्टः पचतीति स्यात्, न तु प्रकृष्टं पचतीति। तन्न, साधु पचतीत्यादावपि समानदोषत्वात्। तत्र क्रियाविशेषणत्वात् क्रियामात्रेणैव संबन्ध इति चेत्, इहापि स एवार्थः। कथं च प्रादयश्चादिवदसत्त्ववचनाः क्रियाविशेषकाः कर्तृविशेषणं भवेयुः? 'उपसर्गाः क्रियायोगे' (पा. २—४—५९) इति वचनात्। कथं पुनरसत्त्ववचनाश्चादयो भवन्ति? उच्यते —

तेषामुच्चावचार्थत्वात् सर्वसंबन्धदर्शनात्। अन्यतन्त्रतयोद्भूतेरसत्त्वार्थत्वमुच्यते॥

अथ किममी वाचकाः, उत द्योतकाः इति। तत्रैके वर्णयन्ति —

'तत्प्रयोगावसेयत्वाद्वाच्यस्तेषां स गम्यते। समुच्चयादिरर्थात्मा यथाऽन्येषां गवादिकः॥'

अन्ये त्वाहुः —

'वहुत्वभावादसत्त्वोक्तेरेकामुक्तेः परस्थितेः। गुणभावात्स्मृतेश्चैषां द्योतकत्वं सुनिश्चितम्॥' इति॥

तदेतदग्रतः प्रातिपदिकार्थनिर्णये निश्चेष्यत इति नेह प्रतन्यते॥

अथ पृथगर्थानामेकार्थीभावः समासः। स त्रिधा — प्राकृतः, वैकृतः, शेषश्च। तेषु समस्तपदानामव्ययीभावादिसंज्ञानिमित्तं पूर्वपदप्रधानादिका प्रकृतिः; तत्र भवः प्राकृतः। स चतुर्धा —

अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः, द्वन्द्वः, इति। तेषु पूर्वपदप्रधानोऽव्ययीभावः। स त्रिधा—अव्ययानाम्, अनव्ययानाम्, कर्मप्रवचनीयानां च। तत्र अव्ययानां यथा—अधिस्त्रि, उपकुम्भम्, अधितैलमृकम्, ससखि, यावदमत्रम्, बहिर्ग्रामम्, इति। अनव्ययानां यथा—अग्रेवणम्, मध्यन्दिनम्, चतुर्दशि, द्विमुनि, पारेगङ्गम्, मध्येसमुद्रम्, इति। कर्मप्रवचनीयानां यथा—अपत्रिगर्तम्, परित्रिगर्तम्, आप्रपदम्, आपाटलिपुत्रम्, अनुवनम्, अनुगङ्गम्, इति। उत्तरपदार्थप्रधानस्तत्पुरुषः। सोऽपि त्रिधा—व्यधिकरणः, समानाधिकरणः, द्विगुश्च; तत्र व्यधिकरणो यथा—राजपुरुषः, कष्टश्रितः, शङ्कुलाखण्डः, धान्यार्थः यूपदारु, वृकभयम्, कुम्भीपाकः, इति; समानाधिकरणो यथा—नीलोत्पलम्, एकपुरुषः, केवलान्नम्, पापकुलालः, अब्राह्मणः, ईषत्कडारः इति; द्विगुर्यथा—द्वैषातुरः, पाञ्चनापितिः, पञ्चगवधनः, त्रिलोकहर्म्यम्, पञ्चपूली, चतुःपात्रम्, इति। अन्यपदार्थप्रधानो बहुव्रीहिः; स त्रिधा—प्रधानसंबन्ध्यर्थः, अप्रधानसंबन्ध्यर्थः, कारकार्थश्च; तेषु प्रधानसंबन्ध्यर्थो यथा—दाक्षिणात्यस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा, एवं दक्षिणापरा, सहाग्निना वर्तते साग्निः, सवंशपुत्रः, केशेषु केशेषु गृहीत्वेदं युद्धं प्रवर्तते केशाकेशि, दण्डैश्च दण्डैश्च प्रहृत्य दण्डादण्डि, इति। प्रथमान्तमिह प्रधानमन्यपदार्थः। अप्रधानसंबन्ध्यर्थो यथा—चित्रा गावः अस्य चित्रगुः, अर्धं तृतीयमेषाम् अर्धतृतीयाः, अविद्यमाना भार्या अस्य अभार्यः, उष्ट्रस्येव मुखमस्य उष्ट्रमुखः, कण्ठे स्थिताः कालाः अस्य कण्ठेकालः, केशसंहारः चूडा अस्य केशचूडः, इति। षष्ठ्यन्तमिहाप्रधानमन्यपदार्थः। कारकार्थो यथा—आरूढो वानरो यं स आरूढवानरो वृक्षः, ऊढो रथोऽनेन ऊढरथोऽनड्वान्, एवं क्षुण्णव्रीहि मुसलम्, उपहृतपशू रुद्रः, उद्धृतौदना स्थाली, मत्तवहुमातङ्गं वनम्, इति। अत्र द्वितीयादिवाक्यं कर्मादिकारकं समासार्थः। उभयपदार्थप्रधानो द्वन्द्वः; स त्रिधा—इतरेतरविषयः, समाहारविषयः, उभयविषयश्च; तत्र भेदविवक्षायामितरेतरयोगः; यथा—धवखदिरौ, मातापितरौ, दधिपयसी, शिववैश्रवणौ, गोऽश्वौ, दशेमे मार्दङ्गिकपाणविकाः, इति। अभेदविवक्षायां समाहारः; यथा—पाणिपादम्, रथिकाश्वारोहम्, तक्षायस्कारम्, गवाश्वम्, प्रत्यष्ठात् कठकौथुमम्, उदगात् कठकालापम्, इति। विभाषितैकवद्भाव उभयविषयः; यथा—अश्ववडवौ, अश्ववडवम्, हंसचक्रवाकाः, हंसचक्रवाकम्। धवखदिरपलाशाः, धवखदिरपलाशम्, इति॥

प्रकृतेरन्यथात्वं विकृतिः, तत्र भवः वैकृतः। सोऽपि चतुर्धा—प्राधान्यविपरीतः, सामर्थ्यविपरीतः, वाक्याधिकारार्थः, अर्थान्तरगामी च। तेषु प्राधान्यविपर्ययस्त्रिधा—पूर्वपदार्थप्राधान्यविपर्ययः, उत्तरपदार्थप्राधान्यविपर्ययः, अन्यपदार्थप्राधान्यविपर्ययश्चेति। तत्र पूर्वपदार्थप्राधान्यविपर्ययोऽव्ययीभावो यथा—शाकप्रति, अक्षपरि, तिष्ठद्गु, उन्मत्तगङ्गम्,

पञ्चनदम्, सप्तगोदावरम्, इति। उत्तरपदार्थप्राधान्यविपर्ययस्तत्पुरुषो यथा—राजदन्तः, पूर्वकायः, प्राप्तजीविकः, गोगर्भिणी, अश्वशतलिका, गोवृन्दारकः, इति। अन्यपदार्थप्राधान्यविपर्ययो बहुव्रीहिर्यथा— द्वौ वा त्रयो वा द्वित्राः, एवं पञ्चषाः, आसन्नो दशानाम् आसन्नदशः, एवमदूरदशः, एवं द्विर्दश द्विदशाः, एवं त्रिदशा इति। सामर्थ्यविपर्ययस्त्रिधा— पदासामर्थ्यात्, वाक्यासामर्थ्यात्, वृत्त्यसामर्थ्यात्; तत्र पदासामर्थ्यं सापेक्षत्वे यथा—देवदत्तस्य गुरुकुलम्, ग्रामं गन्तुकामः, ज्ञातचित्तः कान्तया, निवेदितात्मा गुरुभ्यः, कृतप्रस्थानो नगरात्, निष्पन्नबुद्धिः शास्त्रेषु, इति; वाक्यासामर्थ्यमस्वपदविग्रहे यथा— ब्राह्मणेभ्योऽयं ब्राह्मणार्थः सूपः, ब्राह्मणार्था यवागूः, मासो जातस्य मासजातः, एवं संवत्सरजातः, द्वे अहनी जातस्य द्व्यहजातः, एवं द्व्यहजातः इति; वृत्त्यसामर्थ्यं संबन्धे यथा— सूर्यमपि न पश्यन्ति असूर्यंपश्या राजदाराः, पुनर्न गीयन्ते अपुनर्गेयाः श्लोकाः, श्राद्धं न भुङ्क्ते अश्राद्धभोजी ब्राह्मणः, एवमलवणभोजी भिक्षुः इति, तीर्थे ध्वाङ्क्ष इव तिष्ठतीति तीर्थध्वाङ्क्षः, एवं तीर्थकाकः इति। अर्थाधिक्यं त्रिधा— विशेषणस्य, विशेष्यस्य, समुदायस्य च; विशेषणस्य यथा— वर्षशतमायुरस्य शतायुः, जनसहस्रं बिभर्ति सहस्रंभरः, अश्रेणयः श्रेणयः कृताः श्रेणीकृताः, अपण्डितः पण्डित उक्तः पण्डितोक्तः, शस्त्रीव श्यामा शस्त्रीश्यामा, पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः, इति; विशेष्यस्य यथा— घृतेन पूर्णो घटः घृतघटः, अश्वैर्युक्तो रथः अश्वरथः, दध्नोपसिक्त ओदनः दध्योदनः, गुडेन मिश्रा धानाः गुडधानाः, अक्षेषु प्रसक्तो धूर्तः अक्षधूर्तः, शाकप्रधानः पार्थिवः शाकपार्थिवः, इति; समुदायस्य यथा— श्वभिः लेढ्यः कूपः श्वलेढ्यः कूपः, काकैः पेया नदी काकपेया नदी, खट्वायामारूढः खट्वारूढो जाल्मः, पात्र एव समिताः पात्रेसमिताः, एवं किंराजा यो न रक्षति, किंगौः यो न वहति, इति; अत्र पूर्वयोरतिशयः, शेषेषु क्षेपः समुदायस्य प्रतीयते। अर्थान्तरगमनं त्रिधा— पूर्वार्थस्य त्यागात्, अत्यागात्, त्यागात्यागाभ्यां च; तत्र पूर्वार्थस्य त्यागो यथा— तैलपायिका, शकृगोपः, अश्वकर्णः, पञ्चाङ्गुलः, करवीरः, पुंनागः, इति; अत्यागो यथा— कृष्णसर्पः, लोहितशाली, कालशाकः, गौरखरः, नरसिंहः, दन्तलेखः इति; त्यागात्यागौ यथा— सप्त पर्णान्यस्य पर्वणि पर्वणि इति सप्तपर्णः, अष्ट पदानि अस्य पङ्क्तौ पङ्क्तौ इति अष्टापदम्, शतं पत्राणामस्याः पुष्पे पुष्पे इति शतपत्रिका, दर्शने दर्शने नवैव मालिका अस्या नवमालिका, नक्तमिव मालायामस्य नक्तमालः, कृता माला अस्य पुष्पैः इति कृतमालः, इति॥

उदाहृतप्रकाराभ्यामन्यः शेषः; स चतुर्धा— सूत्रशेषः, असूत्रशेषः, ज्ञापकशेषः, एकशेषश्चेति। तेषु सूत्रशेषस्त्रिधा— गणोक्तः, वार्तिकोक्तः, सामान्योक्तश्च; तत्र 'तिष्ठद्गुप्रभृतीनि' (पा. २-१-१७) 'पात्रेसमितादयः' (पा. २-१-४८) 'मयूरव्यंसकादयः' (पा. २-१-७२)

इति गणोक्तः; यथा— आयतीगवम्, समभूमि, उदुम्बरमशकम्, पिण्डीसूरः, अहंपूर्विका, आहोपुरुषिका, इति; 'निरादयः क्रान्ताद्यर्थे पञ्चम्या,' गमिगाम्यादिकृतापकृतानामुपसङ्ख्यानम्' 'अव्ययानां बहुभ्रीहिर्वक्तव्यः' इति वार्तिकोक्तः; यथा— निष्कौशाम्बिः, ओदनबुभुक्षुः, क्रयाक्रयिका, पुटापुटिका, उच्चैर्मुखः, अस्तिक्षीरा, इति; 'सुप्सुपा' (पा. २-१-४) 'पूर्वादिनिः' 'सपूर्वाच्च' (पा. ५-२-८६,८७) 'कुशाग्राच्छः' 'समसाच्च तद्विषयात् (पा.५-३-१०५,१०६) इति सामान्योक्तः; यथा— परःशता राजानः, परःसहस्राः शरदः, पुनरुत्स्यूतं वासः, पुनर्नवं पयः, कृतपूर्वी कटम्, काकतालीयो न्यायोऽयम् इति। असूत्रशेषस्त्रिधा— नामविषयः, कृद्विषयः, तद्धितविषयश्च; तत्र 'अपरस्पराः क्रियासातत्ये,' 'पारस्करप्रभृतीनि च संज्ञायाम्,' (पा. ६-१-१४४, १५७) 'पृषोदरादीनि यथोपदिष्टम्' (पा. ६-३-१०५) इत्यादिर्नामविषयः; यथा— अपरस्पराः स्वार्था गच्छन्ति, आश्चर्यं वर्तते, पारस्करो मुनिः, कास्तीरं नगरम्, पृषोदरः कश्चिन्मयूरः पक्षी, इति; 'उपपदमतिङ्,' 'कृत्तद्धितसमासाश्च' (पा. १-२-१९, १८) 'कर्तृकरणे कृता बहुलम्' (पा. २-१-३२) इत्यादिः कृद्विषयः; यथा— कुम्भकारः, पङ्कजम्, ऊरीकृत्य, प्रजावी, अश्वक्रीती; 'द्विगोर्लुगनपत्ये' (पा.४-१-८८) 'तिककितवादिभ्यो द्वन्द्वे' (पा.२-४-६८) 'अमासान्ताः' (पा. ५-४-६८) इत्यादिस्तद्धितविषयः; यथा— पञ्चसु कपालेषु संस्कृतः पञ्चकपालः, तैकायनयश्च कैतवायनयश्च तिककितवाः, उपशरदम्, देवराजः, महोक्षः, मृगनेत्रा स्त्रियः इति। ज्ञापकशेषस्त्रिधा— विधिज्ञापितः, निषेधज्ञापितः, प्रयोगज्ञापितश्च। तत्र 'कोः कत्तत्पुरुषे,' 'ईषदर्थेऽपि,' (पा. ६-३-१०१, १०५) 'नञो नलोपस्तिङ्यपक्षेपे च' 'कारकेऽन्यस्य दुक्' 'व्यतिहारे सर्वादीनां सुब्बहुलम्,' 'संख्याविसायपूर्वस्याह्नस्याहन्यन्यतरस्यां ह्नो' (पा. ६-३-११०) 'दायाद्यं दायादे' (पा. ५-२-५) इत्यादिको विधिज्ञापितः; यथा— कटुष्णम्, अपचसि, अन्यत्कारकः, अन्योऽन्यम्, सायाह्नः, विद्यादायादः, इति। 'अलुगुत्तरपदे,' 'पञ्चम्याः स्तोकादिभ्यः' 'आत्मनः पूरणे तृतीयायाः' 'वैयाकरणाख्यायां चतुर्थ्याः' (पा. ६-३-१, २, ५, ७) 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु यथासंख्यमलुग्वक्तव्यः,' 'षष्ठ्याः अदसः फक्फिञोः,' 'अपो योनियन्मतुषु सप्तम्याः' इत्यादिर्निषेधज्ञापितः; यथा— ब्राह्मणाच्छंसी, आत्मनातृतीयः, वरस्मैपदम्, पश्यतोहरः, आमुष्यकुलिका, अप्सुयोनिः इति। 'जनिकर्तुः प्रकृतिः' 'तत्प्रयोजको हेतुः' (पा. १-४-३०, ५५) 'अपोनप्त्रपात्रप्तृभ्यां घः' (पा. ४-२-२७) 'यथातथाचान्तः,' 'वर्तमानसामीप्ये वर्तमानवद्वा' (पा. ३-३-१३१) 'अपरस्पराः क्रियासातत्ये' (पा. ६-१-१४४) इत्यादिः प्रयोगज्ञापितः; यथा — भूतहर्ता, दण्डनायकः, तनूनपात्, याथातथ्यम्, यत्नगौरवम्, क्रियासाफल्यम्, इति। एकशेषस्त्रिधा— सरूपाणाम्, असरूपाणाम्, सरूपासरूपाणां च। तत्र सरूपाणां भिन्नार्थानामभिन्नार्थानां

भिन्नाभिन्नार्थानां च ; भिन्नार्थानां यथा— अक्षौ, मासौ, पक्षौ, वादौ, गावौ; अभिन्नार्थानां यथा— वृक्षौ, प्लक्षौ, इति; भिन्नाभिन्नार्थानां यथा— अश्विनौ, पुष्पवन्तौ, गावौ, सारस्वतौ, युवाम्, यूयम्, इति। असरूपाणां सर्वनाम्नाम्, संबन्धिनाम्, सहचारिणां च; सर्वनाम्नां यथा— स च देवदत्तश्च तौ, एतौ च यज्ञदत्तश्च एते, अयं च त्वं च युवाम्, अमू च त्वं च यूयम्, त्वं चाहं च आवाम्, स च आवां च वयम्, इति; संबन्धिनां यथा— माता च पिता च पितरौ, स्वसा च भ्राता च भ्रातरौ, पुत्रश्च दुहिता च पुत्रौ, पिता च मातामहादयश्च पितरः, भ्रातरौ च स्वसारश्च भ्रातरः, पुत्राश्च दुहितरौ च पुत्राः, इति; सहचारिणां यथा— दस्रश्च नासत्यश्च दस्रौ, देवदत्तश्च विष्णुमित्रश्च विष्णुमित्रौ, शौण्डश्च धूर्तादयश्च शौण्डाः, अर्धर्चैश्च गोमयादयश्च अर्धर्चाः, पुरोडाशश्च धानादयश्च पुरोडाशाः, छत्री च पदात्यादयश्च छत्रिणः। सरूपासरूपाणां भिन्नशब्दानां, भिन्नवचनानां, भिन्नलिङ्गानां च; भिन्नशब्दानां यथा— गार्ग्यश्च गार्ग्यायणी च गार्ग्यौ, वात्स्यश्च वात्स्यायनश्च वात्स्यौ, प्रथमश्च प्रथमानन्तरश्च प्रथमौ, भीमश्च भीमसेनश्च भीमौ, वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ, श्रीमांश्च लक्ष्मीवांश्च श्रीमन्तौ, इति; भिन्नवचनानां यथा— देवश्च दत्तश्च दैवदत्तौ, तौ च देवदत्तश्च देवदत्ताः; एवं विष्णुमित्राः; कृष्णश्च सारश्च कृष्णसारौ, तौ च सारश्च कृष्णसाराः; एवं नीललोहिताः; अपारश्च पारश्च अपारपारौ, तौ च पारपारश्च पारपाराः; एवमपारपाराः, इति; भिन्नलिङ्गानां यथा— कुक्कुटश्च कुक्कुटी च कुक्कुटौ, श्वशुरश्च श्वश्रूश्च श्वशुरौ, गावश्च गावश्च गाव इमाः, वत्सकाश्च वत्सिकाश्च वत्सका इमे, अश्वाश्च अश्वाश्च अश्वा एते, शुक्लश्च शुक्ला च शुक्लं च तदिदं शुक्लम्, तानीमानि शुक्लानि, इति। कथं पुनरेकशेषः समासविशेषो भवति? संक्षेपाभिधाने सति द्वन्द्वसमानार्थत्वात्; तथा हि— असरूपाणां द्वन्द्वः, सरूपासरूपाणामेकशेष इति। कोऽनयोः समानोऽर्थः? येयं युगपदधिकरणवचनता— पदार्थानां सह विवक्षेत्यर्थः; तदाह—

अनुस्यूतेव भेदान्यामेका प्रत्ययोपजायते। यस्यां सहत्वितरां तामाहुर्द्वन्द्वैकशेषयोः॥

इति। तत्र यदा प्रयोगैकतया बुद्ध्याऽनेकमर्थमवगत्य यथावगतमेवाभिधातुमध्यवस्यते, तदैकज्ञानावच्छेदानिरूपितभेदस्यास्य भागशोऽभिधानासंभवादवयवशब्दाः संघस्वविषया विज्ञायन्ते; तद्यथा— धवखदिरौ वृक्षौ इति। यद्येवम्, यथा धवखदिरपलाशमिति द्वन्द्वस्य समूहार्थत्वादेकवचनम्, एवमेकशेषस्यापि प्राप्नोति। नैवम्; द्वन्द्वः समाहारेतरेतरयोगयोः, एकशेषः पुनरितरेतरयोग एव; तस्य हि समाहारपक्षे भिन्नार्थप्रतिपादकानेकशब्दनिवृत्तौ वचनमपि यद्यनेकार्थं न भवेत् केनानेकार्थः प्रतीयेत? न हि वृक्ष इत्युक्ते वृक्षश्च वृक्षश्च वृक्षश्चेति कश्चिदप्यवैति; तस्मादाम्नातोऽपि द्वन्द्वसमानार्थतया समाहार एकशेषोऽनभिधानादप्रयोगार्ह एवेति विज्ञायते।

द्वन्द्वे तु यद्यपि एकवचनान्नानेकार्थावगतिः, तथाऽपि अनेकशब्दश्रुतिनिबन्धनाऽसौ भविष्यतीति समाहारेऽपि न दोषः। एकशेषेऽपि यत्रानेकार्थाभिधानसामर्थ्यं कथंचिद्भवति, भवत्येव तत्र समाहारैकवचनम्; यथा— शुक्लं वस्त्रं शुक्ला शाटी शुक्लः पटः इति तदिदं शुक्लमिति। यथा तर्ह्येकस्यैव शब्दस्यानेकार्थाभिधानसामर्थ्यादेकशेषे शब्दान्तराणां निवृत्तिः, एवं द्वन्द्वेऽपि कस्मान्न भवति? यदि भवेत्, एकशेषादविशेषः प्रसज्येत। समाहार एकवचनं विशेष इति चेत् अनेकार्थो न गम्येत; न हि पलाशमित्युक्ते धवश्च खदिरश्च पलाशश्चेति कश्चिदप्यवैति। अथ, यथा पितरौ भ्रातरावित्यादिषु शब्दान्तरनिवृत्तावपि तदर्थोऽवगम्यते तथा प्लक्षन्यग्रोधौ धवखादिरावित्यादिषु द्वन्द्वेष्वपि कस्मान्न भवति? उच्यते— शब्दशक्तिरेषा भवति हि कश्चिदेकोऽपि शब्दो द्वयोरभिधायकः; यथा— रोदसीशब्दो द्यावापृथिव्योः; कौचित् पुनर्द्वावेवैकमर्थमभिदधाते; यथा— अधीते, अध्येति, इति। अत एव शब्दशक्तिदर्शी मुनिः केषुचिदेवं विरूपेष्वेकशेषमारभते— 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्,' (पा. १-२-६८) 'पिता मात्रा' (पा. १-२ ७०) इति; अन्येषु तु द्वन्द्वमेवाभ्यनुजानाति॥

ननु च, 'चार्थे द्वन्द्वः' (पा. २-२-२९) स्मर्यते; स यथा समाहारेतरेतरयोगयोः, तथा समुच्चयान्वाचययोरपि प्राप्नोति। नैवम्, समुच्चयान्वाचययोः पदानामसामर्थ्यात्। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवतीति; तथाहि— गौश्चाश्वश्च गच्छतीत्यादिरेककियापेक्षः समुच्चयः, भिक्षामट गां चानयेत्यादिरनेककियापेक्षः अन्वाचयः; एवं च बाह्यार्थापेक्षया पदानां परस्परमसामर्थ्यम्; समर्थश्च पदविधिर्भवति। समाहारेतरेतरयोगयोस्तु समूहत्वात् समूहस्य च समूहिरूपत्वादवयवानां सति सामर्थ्ये समानो भवत्येव; यथा— धवखदिरपलाशम्, धवखदिरपलाशाः, इति। एवं तर्हि समूहस्यैकत्वात् समाहारवदितरेतरयोगेऽप्येकवचनमेव प्राप्नोति। नैवम, समाहार एव परस्परानुप्रवेशादिव समधिगताभेदानामुपसर्जनीकृतावयवः समुदायोऽभ्यनुज्ञायते, यस्यानभिव्यक्तावयवत्वादेकवचनमिव नपुंसकत्वमपि प्राप्नोति; इतरेतरयोगः पुनरवयवभेदानुघातः सङ्घातः, तस्य प्रत्येकवर्तिपदैरभिधीयमानत्वात् समुदायसंख्यानिबन्धनैकवचनमवयवेभ्यः प्रस्तूयते। तत्र यथा पचतीत्यादौ अभिश्रयणादिक्रियाकलापः प्रत्यवयवं परिसमाप्यते, तथा समुदायार्थोऽपि प्रतिपदं साकल्येन परिसमाप्यते। अतः एकैकस्य पदस्य समुदायनिबन्धनः संस्कारो भवति। कथं पुनर्धवादयो निर्धारितार्थभेदाः पदान्तरस्यार्थमभिधातुं क्षमन्ते? प्रवृत्तिनिवृत्तिसमारोपात्; यथोक्तम्— 'यदि प्रक्षरतीति प्लक्षः, न्यग्रोधोऽप्येवम्, यदि न्यग्रोहतीति न्यग्रोधः प्लक्षोऽप्येवम्' इति। साहचर्यादिवशेन वा परस्परूपापत्तिः; यथा— 'सप्तमी शौण्डैः, 'अर्धर्चाः पुंसि' ते विष्णुमित्राः, छत्रिणो गच्छन्तीति। तत्र यथा शौण्डार्धर्चादयः

॥ ओम् ॥

शिवाभ्यां नमः ॥

श्रीगुरुभ्यो नमः ॥

॥श्रीजगद्गुरुधामसेवाशतकम्॥

॥ ब्रह्मविद्यासंपादकेन श्रीनिवासमखिना विरचितम् ॥

अद्राक्षं भाग्ययोगादमृतकरकलाकोलदंष्ट्रावतंस-
श्रीमूर्त्यंशावतारस्फुटविमलयशःपूर्णदिक्चक्रवालम् ।
पुण्यद्वासन्तिकश्रीतटतरुकुसुमाक्षीणसौगन्ध्यवेणी-
चूर्णीभङ्गानुषङ्गामलशिशिरतलं कालटिक्षेत्रवर्यम् ॥ १ ॥

अद्राक्षं भाग्ययोगादतुलितविभवं धाम चूर्णीतटान्ते
यद्भूशालेयोऽध्यवात्सीत्स्वगुरुमुनिराडार्ययाऽन्वर्थनामा ।
आद्यस्तेषां पितेवालभत तनुभवं पारहंस्याभिरामं
यः श्रीकण्ठं विकुण्ठावतरमुखनिषेव्याङ्घ्रिपाथोजयुग्मम् ॥ २ ॥

अद्राक्षं भाग्ययोगादपि यदरिधरक्रोडदुर्दर्शभूम
श्रीपादाब्जं पुरारेरतिसुलभमभूद्धल्वजानां च यत्र ।
आ कैलासात्पुराणेऽप्यविदितमहिमा शैशवश्रीविलासो
यत्रैवासीन्नराणामपि सुलभतरः पक्किमाद्भाग्यवृन्दात् ॥ ३ ॥

अद्राक्षं भाग्ययोगात्पटुवटुचटुलाटोपरम्यं पुरारेः
स्वैरं रूपं व्यहार्षीद्यदनु सह गणैः प्राक्तनैरव्रजानाम् ।

यन्मौञ्जीमञ्जुमध्यं मसृणकरधृतापाढमात्तैणचर्म
श्रीमद्भस्मत्रिरेखोज्ज्वलनिटिलतटादृष्टदुर्वृत्तदृष्टि ४ ॥

अद्राक्षं भाग्ययोगान्नियतगिरिसुताचार्धबिम्बोकबद्धं
रूपं तत्कामजेतुः समुदितमभवद्यत्र सेव्यं पुनीन्द्रैः ।
प्राप्ता घोरैस्तपोभिः शिवपुरमपि यन्नान्वविन्दन्पुराणं
नाद्याप्यासर्गदृष्टं श्रुतमपि न तथा ध्येयमन्यत्र सिद्धम् ॥ ५ ॥

अद्राक्षं भाग्ययोगादधिभु शिवगुरोर्ब्रह्मणः सत्यभूमं-
धाम श्रीपद्मनाभालयसमनुगतं दिव्यमार्यानुषङ्गम् ।
पारे यद्व्याहृतीनामपि नियतमहो सेवितं ब्रह्म नेष्टैः
कौमारं यत्र रौद्रं समजनि जगतां सद्गुणानां समृद्ध्यै ॥ ६ ॥

अद्राक्षं भाग्ययोगादपि सुरसरितोऽवागतेः शंकरश्री-
मौलिप्रान्तावरोधस्फुटमदवितते: प्राप्तपातालभूमेः ।
प्रत्यग्लक्ष्या प्रकामादृतशिवगुरुसच्छंकार्याङ्घ्रिपद्मा
पुण्यक्षेत्रानुषक्तां विलसति गुणतो यत्र चूर्णीं प्रकृष्टा ॥ ७ ॥

अद्राक्षं भाग्ययोगादपि सुरसरितो दुर्मदोद्वेगपाक-
प्राप्तेशश्रीकपर्दान्तरनिबिडगुहादम्भकारागृहाया:
सानन्दं स्नानपानोत्तरणविहरणैः शंकरेणादृतायाः
चूर्णीं बाभ्रायमाना भगुणितमहसा यत्र रुद्राम दिव्यम् ॥ ८ ॥

अद्राक्षं भाग्ययोगादपि किल जनने रुद्रमूर्तेः पुराणे
विष्णोर्वा वेधसो वा यदसुलभमभूच्छैशवं भूरिलीलम् ।
सार्वात्म्येऽप्यब्जमौलेरकृतकवचसाऽनूदितं नैव यत्र
स्पष्टं क्षेत्रे तदेतत्कलिमलकलनादावकालां नेभूमम् ॥ ९ ॥

अद्राक्षं भाग्ययोगादवनि व्रतपोराशिनिक्षेपभूमिं
त्रैयक्षाक्षीणरक्षोदयगुरुचरणाम्भोजविन्यासधन्याम् ।
दुर्वृत्तद्वैतविद्यामुखरमुखमिलोच्चाटनास्त्रप्रवेकं
निर्धूताहःप्रचारं गृहमखिलगुरोः कालटिक्षेत्रवर्यं ॥ १० ॥

अद्राक्षं भाग्ययोगादपि कलजशुचा पद्मनाभेन चार्यै-
र्योगीन्द्रैः सन्निषेव्यां दुरधिगमं यत्तपोभिर्महद्भिः ।
सद्विद्याकल्पकल्पातुलनिखिलजगद्देशिकाङ्घ्रियब्जरेणु-
श्रीभिक्तं यत्र चित्तं विलसति सुलभं सर्वतो मादृशोऽपि ॥ ११ ॥

अद्राक्षं भाग्ययोगाद्द्विजवरगृहिणीमात्रदारिद्र्यहान्यै
हन्ताधिब्रह्मचर्यं मृदुवचनगुणैर्यः श्रियं विन्ययुङ्क्त ।
वाणीमत्याश्रमस्थोऽप्यजयदतितरां प्राप्तसर्वज्ञपीठः
कोऽप्यार्यापाणिपोष्योऽप्यजयत गुरुराड्यत्र तद्धाम दिव्यम् ॥ १२ ॥

अद्राक्षं भाग्ययोगादधिवटनिकटं मौनमुद्रासनाथा
या चिन्मुद्रा पुराणी सनकमुखमहायोगिहृद्या व्यराजीत् ।
सा यत्रानर्गलोद्यत्सुरपुरतटिनीनिर्झरौपम्यरम्य-
श्रीवाग्लक्ष्मीसनाथा जयति महसि तद्यत्र जातं पदं तत् ॥ १३ ॥

अद्राक्षं भाग्ययोगादतिशयितवटोपान्तशान्तार्च्यमूर्तेः
सौलभ्यादप्यमौनादकृतकवचनव्याहतेरापरोक्ष्यात् ।
विख्याता जन्मभूमेर्विलसति भुवि या तस्य लोकैकवन्द्या
सर्वाचार्यस्य चूर्णीमनु विमलतरां तां महायोगिसेव्याम् ॥ १४ ॥

अद्राक्षं भाग्ययोगादखिलगुरुपदाम्भोजसेवानुभाव-
प्रध्वस्ताविद्यबोधोदयविमलमुनिस्वान्ततुल्याच्छनीरा ।

आनीता नातिदूरान्निजगृहसविधं मातुरर्थे जरत्याः
श्रीलोकाचार्यवर्यैः प्रवहति नियतं यत्र चूर्णी नदीना ॥ १५ ॥

अद्राक्षं भाग्ययोगान्नियतवृषगिरीशानसेवाद्रताया
देव्याः श्रीमातुरर्थे पशुपतिरुदभूज्ञाथितो देशिकेन्द्रैः ।
बाभात्यद्यापि देवः श्रितजनशुभदो नातिदूरे च यस्मा-
त्तत्ताद्दक्कालटीति त्रिजगति विदितं जन्मदेशं गुरूणाम् ॥ १६ ॥

अद्राक्षं भाग्ययोगादकुतकवचसामन्तकैर्बुद्धवादै-
रा सेतोरा च शीताचलवरतटतः पाटिते वेदवादे ।
दैत्यान्जित्वेव देवः सरसिजनयनः साधु यो ब्रह्मविद्यां
प्रत्याहार्षीन्महात्मा स सकलजगतीदेशिको यत्र जातः ॥ १७ ॥

अद्राक्षं भाग्योगान्निखिलनिगमगीर्वार्धिमाथोपलब्ध-
श्रीमत्पीयूषधामायितमुनिगणराद्सूत्रसद्भाष्यरत्नम् ।
वेदा निश्वासतो व प्रमथकुलपतेर्यन्मुखादाविरासी-
ल्लोकाचार्यस्य किंचित्त्रिभुवनविदितं पावनं जन्मधाम ॥ १८ ॥

अद्राक्षं भाग्ययोगादतुलमपि यशो यद्दिशो दक्षिणस्या
विप्राणां या प्रतिष्ठा श्रुतिनिकरगिरां यच्च सौभाग्यमग्र्यम् ।
ज्ञानस्यैकावलम्बं प्रथममपि पदं यच्च वैराग्यभूमा
सर्वं तद्धैकमूर्ति प्रकटमुदभवद्यत्र योगीन्द्ररूपम् ॥ १९ ॥

अद्राक्षं भाग्ययोगात्तटतरुनिकरच्छायधूतार्कतापे
श्रीचूर्णीरम्यवेणीनिचयपरिहृताशेषतापप्रतापम् ।
क्षेत्रे क्षत्रान्तकश्रीभृगुकुलतिलकस्याश्रितं कोणमेकं
कालव्याख्यं प्रसिद्धं प्रवरकलिचरक्षान्तिकृत्क्षेत्रवर्यम् ॥ २० ॥

अद्राक्षं भाग्ययोगात्कतिचन कलिराड्दत्तहस्तावलम्बा
येऽधीत्याप्यागमान्तानपि कुशलधियो हन्त नास्तिक्यनिष्ठाः ।
सांख्याः संख्यावदग्र्या बुधगणमहितास्तत्त्वसंख्यानदक्षा
वेपन्ते संस्मरन्तः क्षणमपि विमलं यत्र जातं शिवांशम् ॥ २१ ॥

अद्राक्षं भाग्ययोगात्कचन जिनवचः क्वापि तद्वोक्तिभङ्गी
क्वाप्याः कौलप्रकर्षः कचन बहुलिताः पाशुपत्यैक्यनिष्ठाः ।
तर्कासक्तिः क्व चापि प्रथिततरमतोऽप्येकतः पाञ्चरात्रं
व्याधूय ब्रह्मविद्या सकलमिदमभूद्यत्र योगीन्द्रमूर्तौ ॥ २२ ॥

अद्राक्षं भाग्ययोगाच्छ्रुतिगणशरणाभाग्यवृन्दैकमूर्तौ
काले सांकर्यचिन्तामणिगणविभवे म्लेच्छभाग्यैकमूले ।
संपूर्णस्वाधिराज्येऽप्यहह परिगते पञ्चसाहस्रिकाम-
प्यब्दानां यत्प्रभावाज्जयति न विगुणा शांकरी ब्रह्मविद्या ॥ २३ ॥

अद्राक्षं भाग्ययोगादपि विमतशतास्कन्दिते वैदिकेऽध्व-
न्याः पूर्णे म्लेच्छदर्पे समनुसरति च प्राय आर्येऽप्यनार्यान् ।
वृद्धे तन्त्रिप्रलापे शमदमविभवे कालतः क्वापि लीने
कर्मन्दीन्द्रावतारादगणितविभवं क्षेत्रवर्यं तदेतत् ॥ २४ ॥

अद्राक्षं भाग्ययोगाच्छिव शिव बहुधाऽधीत्य वेदाननन्ता-
नप्याचार्येष्वधीना व्रतनियमपराः प्राप्तगार्हस्थ्यमध्याः ।
कर्मैकायत्तचित्ताः कलिमलहतये नेश्वरं संस्मरन्तो
मुग्धाः सर्वे द्विजाढ्या यदुदितमहसाऽप्युद्धृता दोषवार्धेः ॥ २५ ॥

अद्राक्षं भाग्ययोगादपि कमलदलात्पल्लवेभ्यः शिरीषा-
द्यद्योगीन्द्रान्तरङ्गादतिमृदुलमहो यच्च वा हंसतूलात् ।

कौशेयाद्वा मणेर्वा मसृणतरतलं पादपद्मं यतीन्दोः
प्राप्तं यत्रानुपांसु क्षितिमनु मनितं क्षेत्रमेतत् तदेतत् । २६ ॥

अद्राक्षं भाग्ययोगादपि जडवसतिः क्रूरकर्मा पलाशी
ग्राहो भूयो नृशंसश्चरणतलयुगं प्राप्य दिष्ट्या यदीयम् ।
संप्राप्तो देवयोनिं विगतशमलभीर्विष्णुतीर्थेऽथ तेन
स्तन्मुद्राभद्रपांसुं हरिभगविनुतं जन्मदेशं तमीशम् ॥ २७ ॥

अद्राक्षं भाग्ययोगादपि वटनिकटे यो गुरूणां मुनीना-
माद्यः श्रीदक्षिणास्यो दिशमनु विदधे चाक्षुषीमेव दीक्षाम् ।
भूयस्तिष्येऽवतीर्णः सकलगुरुतनुः स्पार्शनीं यत्र दीक्षां
चक्रे तस्याः प्रकाम मुनिवरविनुतं देशमेतं दिशायाः ॥ २८ ॥

अद्राक्षं भाग्ययोगादधिरजतगिरि प्रोल्लसद्ब्रह्मवर्च-
स्तादक्षानन्वगृह्णात्सनकमुनिमुखान्दक्षिणां प्राप्य भूयः ।
देव्या नानट्यमानो ह्यधिकनटकभं वाग्विहोत्रान्मुनीन्द्रा-
न्भूयो यत्रावतीर्णो मुनिकुलतिलकीभूय तानेव दिष्ट्या ॥ २९ ॥

अद्राक्षं भाग्ययोगादपि जगदखिलं व्याकुलं बुद्धपिण्डै-
र्मुण्डैः काषायिचण्डैर्द्विजकुलहृदयोच्छेदिपाषण्डशौण्डैः ।
श्रीभूतिक्षामतुण्डैः श्रुतिशिखरगिरां दुश्चिकित्सैश्च गण्डैः
स्वस्थं यज्जातजातामलवचनझरीसौधधारामिषेकैः ॥ ३० ॥

अद्राक्षं भाग्ययोगाच्छुभमखिलगुरोर्धाम यस्यावतारा-
दृष्टश्चक्री कपाली कुहचन न परः कुम्भकारात्स्वतन्त्रः ।
निष्कर्मा ध्याननिष्ठोऽस्मृतभुवनगतेर्जङ्गमात्मा प्रजाता-
द्भ्रात्यावासं करेभ्यः प्रकटमवनिनो भूपतिभ्यो जरन्तः ॥ ३१ ॥

अद्राक्षं भाग्ययोगात्पदमखिलगुरोर्दुर्लभं रात्युरस्ता-
द्दृक्षा रुद्राक्षमाला शिव शिव महितं भस्मसाङ्गं विभूतिं ।
लिङ्गार्चा सा विवृक्ता बत मत शिव हा शाङ्करी लिङ्गपूजा
वेदास्ते सापवादाः कलिबलकलिता हन्त ते बुद्धवादाः ॥ ३२ ॥

अद्राक्षं भाग्ययोगान्मुनिनिकरतपोवैभवप्राणनाडी
तुच्छम्लेच्छोक्तिमूर्च्छाविवशबुधगणानन्दसंजीविनी या ।
शान्तेर्विश्रान्तिभूमिः श्रुतिगणनलिनीबालभानुप्ररोहो
जज्ञे यत्राद्भुतं तद्यमिकुलविनुतं शांकरं किंचिदोजः ॥ ३३ ॥

अद्राक्षं भाग्ययोगाच्छमदमसकलाम्नायसिद्धान्तसार-
श्रद्धासौशील्यलोकोपकरणकरुणाभङ्गयोगानुषङ्गाः ।
स्थैर्यं स्नैग्ध्यं प्रपन्नेष्वतुलितविभवा भक्तिरर्धेन्दुमौलौ
तोके यत्क्षेत्रजाते समुदितमभवत्सर्वमेतत्परं च ॥ ३४ ॥

अद्राक्षं भाग्ययोगात्पदमखिलगुरोः संयमीन्दोः महार्घ-
दस्मार्षं तस्य दिव्यं चरितमतिनरं लोकरक्षैकदक्षम् ।
व्याहार्षं तस्य किंचिन्नमनमपि शिशू राघवस्येव कीशो
व्यस्मार्षं सर्वमन्तः सहजमपि सहाविद्यया दुःखजातम् ॥ ३५ ॥

अद्राक्षं भाग्ययोगाच्छिवगुरुमुनिराडाश्रमं पुण्यपुण्यं
व्यस्राक्षं नित्यबुद्धिं तनुकरणमुखानात्मवस्तुष्वनाद्याम् ।
नालाक्षं नाथपादाम्बुजबहलरजः सादरं मूर्ध्नि कुर्वे-
न्त्रासाङ्क्षं जन्मजन्मार्जितसुचरितभोगपाकानुभूत्यै ॥ ३६ ॥

अद्राक्षं भाग्ययोगाद्धरितमणिसदृक्षाच्छतृण्याभिरामां
भास्वन्माहेन्द्रनीलच्छदसुभगझरीरम्यचूर्णीसनाथाम् ।

माणिक्योल्लास्यशोकप्रसवलतावलितां सत्खनीं कांचिदेनां
श्रीलोकाचार्यरत्नोदयगुणमहितां कालटिक्षेत्रसंज्ञाम् ॥ ३७ ॥

अद्राक्षं भाग्ययोगात्कपिल इव मुनिर्देवहूत्यै जनन्यै
यत्रार्यायै महात्माऽखिलभुवनगुरुः प्राददाद्ब्रह्मविद्याम् ।
सेवां कैलासनाथाश्रयमहिरगणाधीशितॄणां यथेच्छं
सिद्धां वैकुण्ठयात्रामपि च निरवहद्व्योमयानेन यत्र ॥ ३८ ॥

अद्राक्षं भाग्ययोगाच्छ्रुतिगणगदितः कोऽपि भिक्षुः पुराणः
स्पष्टं यत्रैव वर्णी प्रतिदिनमचरद्भैक्षमाश्चर्यचर्यः ।
विद्यानाथोऽपि विद्याग्रहणमुचितान्याप वेदव्रतानि
प्रत्यक्षं शिक्षयन्द्रागिव मुखजकुलाचारमाचार्यराजः ॥ ३९ ॥

अद्राक्षं भाग्ययोगाच्छिवगुरुमुनिराड्दिव्यभाग्योदये श्री-
लोकाचार्येऽपि भिक्षा यतिनियमनिहिता साधु यामिः सतीभिः ।
ताभिर्गार्हस्थ्यमग्र्यं समजनि गृहिणां यत्र सिद्धं द्विजानां
नो वर्ण्यं तत्पुराणैरपि मितवचसां यत्र नैवाधिकारः ॥ ४० ॥

आद्राक्षं भाग्ययोगादसुलभममरैरन्यतः क्वापि लोके
कैलासेऽप्राकृतत्वादधिगतगिरिशस्पष्टदुर्वर्णपूर्तेः ।
सूर्ये तेजोमयत्वाच्छ्रुतिशिखरतले भावनामात्रकत्वाद्
हृत्पद्मे मांसलत्वाच्छिवचरणरजो यत्र सर्वैर्निषेव्यम् ॥ ४१ ॥

अद्राक्षं भाग्ययोगादनितरसुलभा यत्र भागीरथिष्ठा
रुद्राणीपीनवक्षोरुहघुसृणरसापङ्कमग्नेव मुद्रा ।
यत्पादांभोरुहस्य स्फुटमपि च नरैः पञ्चसाहस्रतिथ्य-
प्रायानेहःसमुत्थैरपि सुलभतरा राजमानेव सिद्धा ॥ ४२ ॥

VENKATESWARA ORIENTAL INSTITUTE
LIBRARY
TIRUPATI

The Journal

OF THE

Sri Sankaragurukulam

Srirangam

VOL. III. NO. 9.

THE SEARCH AFTER LIGHT.

By the late Prof. K. Sundararama Aiyar M. A.

Goethe died asking for "more light". Has more and truer light,—rational or spiritual—been vouchsafed to the west which is pre-eminently powerful in the world today and has taken upon itself the proud and gigantic task of guiding and developing India's destiny in the future? The answer would seem to be,—Not yet. For the interests of western states, national and imperial, are found to remain as the primary aim and exclusive occupation of their statesmen, presidents, and monarchs; What is this but to proclaim that the late President Wilson's magnificent dream in the laying of the foundation of the League of Nations *viz.*, to make the world safe for democracy—has proved a gigantic failure. The ideal he aimed at was that narrow national interests and pre-occupations were to give place in the future to the comprehensive pursuit of the interests of humanity at large, The policy of militant pacificism which the democracies and dictators now ruling Europe pursue to-day is a clear proof of the fact that President Wilson's hopes and efforts have proved but the baseless fabric of a vision. If a society which can contribute unerringly its resources of energy, wisdom, and humanity in its endeavours to preserve the peace and welfare of men is to maintain itself free from the fear of revolution or dissolution, it can only be through the concerted action of leaders

to whom is vouchsafed the light of Heaven manifesting itself in all its passionless perfection of joyous hope and disinterested sympathy so as to discover how to build up the successive steps and stages of the evolving fabric of practical social and political life with courage, prudence and hopefulness.

We have always with us men who hold that the human reason working itself but in the forms of scientific discovery and mechanical invention is quite enough for the building up of our future fabric of civilisation. Let us turn our attention for a while and consider how man's faculty of reason manifests itself at the present epoch through the genius of scientists. The West can certainly boast that its science has conquered matter in all its three regions of earth, water, and air. Scientists are also emphatically proclaiming the nature and significance of the attitude of mind by the possession or cultivation of which all their triumphs over matter (or Nature) have been accorded to them as a laurelled coronet or crown revealing itself in all its inherent glory and splendour. Scientists have now come forward boldly to proclaim that, while hitherto the conflict between religion and science has been regarded as irreconcilable by the mind of the populace at large and even by most of their enlightened leaders, they are themselves in a position to avow or even assert in bold and clamant tones, that it is to their attitude of "*Faith*" that they owe the mechanical inventions which have shed a lustre on their names for all future time. This statement might shock the minds and consciences of the clericals in Europe. But the scientists are not at all thereby disconcerted. For they speak not from mere hypothetical assumptions as their basis,—but from "*Faith*"; and they understand "*Faith*" to mean the attitude of earnestness and devotion which has given them the inspiration for their discriminative wisdom in the collection and preparation of their marvellous materials, for their deliberate carefulness in the making up of their synthetic comparisons and calculations, and for the intrepid ingenuity with which they deduce their conclusions. Hence there is not the slightest trace of that unlovely egotism which from first to last animates the minds and emotions of the clericals who preach the popular creeds, and makes them assume the airs of supermen who hold within the palms of their hands the privilege of conferring the eternal and supernal bliss which soars above all the lowly states and stages of life in this purely material world. This rare excellence and virtue may itself be regarded as justifying the claim put forward on behalf of our notable men of science in various quarters that they have either reached or beheld the summit of divine beauty or perfection in their own individual experience, or at least found within the region of their common concern the

thoughts and sentiments which help to promote their appreciation or comprehension of each other's attainments and triumphs and thereby to form them into a separate, though unique congregation or brotherhood of soaring intellectual lights honoured and adored in common among all the civilised nations and communities of the world.

There is doubtless a large amount of truth in the modern man's idea or jeer that the traditional religion which the theological mind has promoted among the masses of every civilised people, on the earth has made them querulously seek their own separate and special liberation from the bondage of sin, sensualism, and sorrow which has brought with it the limitations of life in the phenomenal world. Prof. Einstein has recently said :—"An individual who should survive his physical death is beyond my comprehension, nor do I wish it otherwise ; such notions are for the fears or absurd egoism of feeble souls." The philosopher, Bergson, too, who has approached the topic in the true scientific spirit, has said :—"In truth, if we are sure, absolutely sure, of survival, we could not think of anything else." To the former our answer is exactly that which the divine lord, Sri Krishna, gave to Arjuna in the "Divine Lay" (II. Slokas 12 and 13) :—"Never was there a time when I, you, and these kings were not. Neither shall there be a time when all of us shall cease to be. As the individual has in this same body the states of childhood, youth and old age, even so he gets another embodiment. The wise man has no illusions in this matter" Like Einstein to-day, Arjuna laboured under the materialistic illusion that no individual can survive when his body dies. So, Sri Krishna had to resort to rationalistic arguments in order to remove his doubts. If the thinking mind of the individual to-day could exist only in association with a body, we can have no awareness of our personal identity when the body which we have in childhood and youth has passed and that of our manhood has taken its place; also, later on this second body (of our manhood) has also to pass away and give place to the decrepit body of old age. If the scientist argues against this doctrine that, as youth, manhood, and old age are only states of the body and that to the body alone attaches the awareness of its identity, we must, in reply, point out in this connection the significance of the state of sleep which, according to the scientist's view, can only be one of the states of the body. Hence, in that state, too,—*i.e.*, while it lasts—there must attach to the body the same awareness of its identity that we have been speaking of ; and so we are landed in a serious quandary contradicting a universal experience of humanity at large, and so contradicting also Bergson's view that, "if we are absolutely sure of survival we could not think of anything else."

What does this "*we*" of Bergson here mean, of whose "survival after death" he speaks? Does he mean *both* the individual and his body, or only the former? As death means the leaving behind of the body to be burnt or buried, the "pleasures" to which he refers cannot get attached to it after that final catastrophe. Hence, the "survival" he mentions can only belong to the individual in the future, whatever its form and whatever may occur to him in the body which is dispensed to him therein. Life in this new body must necessarily have its own allotted share of "pleasures",—pleasures as "intense" and as necessary as those which are allotted to him in the present one, pleasures which equally owe their own value and "intensity" to the "attention centred upon them" by himself.

The stray observations above put forth are not at all to be understood as having for their purport the unjustifiable vilipending of science or the equally undue extolling of the aims or accomplishments, ethical and spiritual, of India's marvellous soul in its constitution and essence of the Absolute Bliss of Love which, irrespective of time, place, and circumstance is identical with the innermost experience of the Self in man which is behind all his wanderings across and amid the beating billows of the seemingly shoreless ocean of the Samsaric limitations which bind him to the status and stages of life allotted to him during his confinement in the world of phenomenal being.

RAMAYANA PROBLEMS.

By Bharatakalanidhi Vidyasagara Vidyavacaspati
Professor P. P. Subrahmanya Sastri B. A. (Oxon), M. A. (*Madras*)
Presidency College, Madras, Curator, Govt. Oriental Mss. Library, Madras.

It has been a fashion with Indologists, eastern and western, to hold that both our Epics, the Ramayana and the Mahabharata, are heavily interpolated and that the originals of Valmiki and Vyasa were considerably shorter than what we have today. In respect of the Ramayana, the Bala and the Uttara Kandas, the first and the last, are held to be additions made by hands later than Valmiki. It is also held that Valmiki who was the first to conceive the sloka metre would have composed the entire Ramayana only in the sloka—Anushtubh—metre and that the long-metre stanzas occurring particularly at the end of many cantos are not the compositions of Valmiki but interpolations by later hands.

Valmiki's Ramayana has come down to us in three recensions, the North-western, the Bengal and the Bombay-Madras or the Southern recension. Pre-

fessor Macdonnel states that about one third of the stanzas in each recension occurs in neither of the other two and that the Bombay recension* has in most cases preserved the oldest form of the text". All these recensions in fact, all manuscripts in palm leaf or paper purporting to contain the entire Ramayana, contain the Bala and the Uttara Kandas as integral parts. Indeed there is no historical or literary evidence to the fact of the Ramayana ever having existed without the first or the last and seventh Kandas. More later.

We shall now take up the problem of the long-metre stanzas in the Ramayana. Of the 648 cantos in the Ramayana,* it is interesting to note that 408 cantos have long-metre stanzas at the end of the canto, whilst 240 cantos only close with the anushtubh metre. The following table gives at a glance the distribution of cantos with anushtubh metres at the end :—

Kanda	No. of cantos.	No. closing with anushtubh metre.	No. closing with long metre.
Bala	77	61	16
Ayodhya	119	13	106
Aranya	75	21	54
Kishkindha	67	22	45
Sundara	68	21	47
Yuddha	131	29	102
Uttara	111	73	38
	648	240	408

* All references are to the Edition of the Ramayana Text in two Volumes published by T. R. Krishnacarya from Kumbakonam, Second Edition 1929. This represents the Southern Recension.

It is also noteworthy that the Bala and the Uttara Kandas contain the greatest percentage of cantos which end with anushtubh metre while the so-called integral parts of the Ramayana Kandas II to V appear to specialise in having long-metre stanzas to mark the close of the canto.

An examination of the body of the text reveals some interesting facts. The Bala Kanda is peculiar in that it does not contain a single long metre stanza in the body of a canto. In the Ayodhya there are at least two cantos which contain long-metre stanzas in the body of the canto. The Aranya Kanda has the distinction of an entire canto being completely in long-metre. In the Kishkindha Kanda, five cantos have long-metre stanzas in the body whilst one of these omits it at the end. The Sundara Kanda has six cantos, all composed fully in long-metre stanzas and eight other cantos which contain long-metre stanzas distributed in the body whilst one of these latter omits it at the end. In the Yuddha Kanda we have two cantos entirely of long-metre stanzas and seventeen other cantos interspersed with long-metre stanzas in the body whilst two of the latter omit it at the end. The Uttara Kanda is again peculiar in that though it contains six cantos with long-metre stanzas in the body of canto, four of these close with the popular anushtubh metre.

Thus we see long-metre stanzas, not only at the end of a canto, but also in the

beginning and in the middle, singly and in groups, not to speak of whole cantos being composed entirely in long-metre.

Whatever tampering one might attempt in restoring Valmiki to his original, it would indeed be difficult to escape some at least of the numerous long-metre stanzas being considered as integral parts of Valmiki's original. Indeed it could be shown that without the help of most of these long-metre stanzas, Valmiki's Ramayana would easily dwindle itself into an emasculated and disintegrated travesty of the original. More of this in our next article.

REVIEWS

ASPECTS OF ADVAITA

G. SRINIVASA AIYAR, M.A., B.L., *Retd. High Court Judge, Bangalore.*

Aspects of Advaita.

i. **BRAHMAN AND MAYA** *by K. Sundararama Iyer M. A.,*

ii. **ADVAITA AND MODERN THOUGHT** *by Dewan Bahadur K. S. Ramaswamy Sastri B.A., B.L., Published by the Sri Vani Vilas Press, Srirangam.*

Price Rs. 2/-

Professor K. Sundararama Iyer's name is familiar to the general public for over two generations. He was well known as a Lecturer in the Kumbakonam College for over twenty years. His public lectures were listened to with great attention by a large number of educated people. He was frequently contributing very learned articles to the journals on philosophical subjects.

The present work contains his ten lectures on Advaita. Six lectures of his illustrious and secholarly son on Vedanta and Modern Thought are also published with those of his father.

Mr. Sundararama Iyer says that in these ten lectures his purpose is to give brief statements regarding the leading tenets of Sri Sankara's Advaita doctrine, and the interpretation of the Vedanta. But one finds that the learned Professor has given a clear and lucid exposition of the fundamentals of the Advaita philosophy. He has also given a summary of the arguments in works like Advaita Siddhi to prove the nature of Ajnana, the Pramanas (Pratyaksha, Arthapatti, Sruti &c.) for its existence, its Asraya (abode) and Vishaya (object).

The one remedy for the never-ending disease of Samsara is the enquiry, "Who am I?" "Whose is the Samsara" &c. Veda exhorts to man his real nature and guides him along the path to the goal of

life ; it is an independent source of knowledge like Partyaksha and Anumana, but it is also the supreme authority in the light of which we have to test all other sources of knowledge ; it is eternal and Anadi and not even Vasudeva is its author ; he is only the revealer of it ; it is the breath of God and is not to be regarded as different from His person.

The sentences of the Vedanta are discussed in the Brahma Sutras. The true purport of the Vedanta as determined by the six tatparyalingas is to show that the individual Soul is one with Brahman. The fundamental feature of the Advaita is that Experience—the Absolute Self—means a realisation that is ever present and always possible for us, even while we are here, and that this realisation results from the well-known Mahavakyas.

A person who has reached the highest stage of spiritual progress attains Mukti the moment he is taught the meaning of passages like "Neti, Neti"; some who have not reached that stage get the same result from the teaching of the Mahavakyas. The man still lower in stage requires the process of Sravana and Manana and it is for him that the Bhashyas are written.

The essential nature of Brahma (Svarupalakshana) is Existence, Knowledge and Bliss (Satyam, Jnanam, and Anandam); they all denote only one object. It is eternal, unconditioned, the pure Being and Intelligence in its essence. Brahman is also the efficient and material cause of the world (Abhinnanimittopadanakarana) and hence the universe has no existence apart from its identification with Brahman. The source of the misery of Samsara is the ignorance of the true nature of Brahman and it is stultified by the knowledge of Brahman obtained from the inquiry into the true purport of the Vedanta. This ignorance (Ajnanam) is in some places spoken of as Prakriti, Maya, Avyakta, Akshara, Akasa &c., and is the positive root-cause (Bhavaroopa Moolakarana) of the universe. Ajnana or Maya is not mere non-entity (like the horn of a hare) but positive in nature (Bhavaroopa) and is not a permanent Reality and is liable to be stultified ; it is not without parts, nor is it possessed of parts ; it cannot exist apart from Atman, nor can it remain in inseparable association with it. If such inseparable association existed, it would follow that when Maya is stultified, Atma also should be stultified. Maya is therefore called Anirvachaniya, a phenomenon inexplicable in its origin and nature. It is different from Sat and Asat (Sadasadvilakshana). Ajnana is Anadi, its Vishaya and Asraya is Atman. This Ajnana of Atman is the cause of the superimposition of Ahankara, mind, material body (Sthula Sarira) Prana &c. Even external objects are identified with the Self. Though it is impossible for the Svaprakasa Vastu being identified with Ajnana, still it is a matter of daily experience (Naisargikoyam Lokavyavahara-

ha). This imagined (kalpanika) relationship between the Self and the non-Self is Anadi, and through it the Atman illuminates the non-Self. This Ajnana is destroyed by the Charama Vritti which arises from the knowledge of the true purport of the Mahavakyas.

Karma is intended to produce purity of mind since desires &c., keep us from the blissful realisation of Brahman. Upasana produces Ekagrata. It is however the cognition of the identity of Brahman and the Self that destroys the Ignorance.

This is in substance the fundamental doctrine and is lucidly explained by the learned Professor.

The six lectures forming the second part of the book also deal with Advaita. The learned lecturer is a worshipper at the feet of Sri Sankara, the propounder of the doctrine of Nirguna Brahman, the doctrine of the identity of self with Brahman &c. He deals with the observations of some of the modern scholars on the Advaita.

This book must be considered as one of the very best books on the subject and Mr. T. K. Balasubrahmanya Iyer must be congratulated for publishing it. The book is well got up and though small, much matter of importance to Advaitins is compressed into it.



ஸௌதாமினீ நாடகம் :—ரிடயர்ட் டிஸ்ட்ரிக்ட் ஜட்ஜ் பிரம்மஶ்ரீ K. S. ராமஸ்வாமி சாஸ்திரிகள் இயற்றியது. விலை அணா 8.

இப்புஸ்தகம் ப்ரஹ்மஶ்ரீ K. S. ராமஸ்வாமி சாஸ்திரிகளால் எளிய நடையில் எழுதப்பட்டு அனுபவத்தில் நாம் கைக்கொள்ளவேண்டிய அநேக தர்மங்களை நன்றாக விளக்கத்துக்காட்டுகிறது. கதைகள் மூலமாயும் காட்சிகள் மூலமாயும் வெளிப்படும் விஷயமானது தனது பிரியநாயகியின் வார்த்தையைப்போல் ஸுலபமாய் மனதில் பதிந்துவிடும். இந்நாடகத்தில் முக்கியமாக வாதகஸ்தினைக்கொடுமையையும் மேனாட்டுக் கல்வியாலுண்டாகும் கெடுதல்களையும் நன்றாக விளக்கி நமமுடைய பெரியோர்கள் கைக்கொண்ட பழக்கவழக்கங்களை அவலம் பித்தால்தான் நம் நாடு மேன்மையடையும் என்பதை நன்றாக விளக்குகிறார். வாதகஸ்தினைக்கொடுமை தாங்காது தாய்தந்தையர் நிலங்களையும் வீடுகளையும் விற்கவும், அதைக்கண்டு ஸஹியாது பெண் உயிர்துறப்பதுமூலமாய் வாதகஸ்தினைக்கொடுமையை நன்றாய் சித்திரிக்கிறார். வாதஸ்தினை விஷயமாய் இரண்டு பாத்திரங்கள் மூலமாப் பூர்வபக்ஷஸித்தாந்தங்கள் செய்து, மேடையில் படாடோபமாய் பிரஸங்கம் செய்பவர்களும் தன் விஷயத்தில் அதை ஒழிக்க முயலுவதில்லையென்பதை காண்பிக்கிறார். அந்தந்த பாத்திரங்களுக்குத் தகுந்தபடி அங்கங்கே ஸம்ஸ்கிருத வார்த்தைகளையும் ஆங்கிலவார்த்தைகளையும் ப்ரயோகித்திருக்கிறார். அங்கங்கே வாசிப்போர் மனதுக்கிசைந்தபடியாய் சொல்நடை சித்திரக்கதையும் கையாண்டிருக்கிறார். உதாரணம் பாகம் (பக்கம் 5) தேசபக்தி பழுத்து வாதகஸ்தினையாக முடிந்தது. வாதகஸ்தினை, அப்புறம், போக தகஸ்தினை, பிறகு வரப்போக தகஸ்தினை. (பக்கம் 8) நவக்ரஹ சாஸ்திரிகள்—இப்பொழுது சனி எட்டாமிடம். வேத மூர்த்தி அய்யர்—அது என்ன ப்ரயோஜனம். சனிக்கும் எட்டாத இடமில்லவாவேணும். இப்புஸ்தகத்தை ஒவ்வொருவரும் வாசிப்பதால் நம் நாட்டைப்பிடித்துக்கொண்டிருக்கும் வாதகஸ்தினைப்பேயானது முற்றிலும் அகலலாம்.

வெங்கடராம சாஸ்திரி.

The Journal

OF THE

Sri Sankaragurukulam

Srirangam

VOL. III. JULY—SEPTEMBER 1941 NO. 10.



Editor :
Gurubhaktasikhamani,
Sastraprasarabhushana,
T. K. BALASUBRAHMANYA AIYAR.
B. A.
Founder, Sri Sankara-
gurukulam, Srirangam.

Literary Adviser :
Bharatakalanidhi
Vidyasagara,
Vidyavacaspati,
P. P. SUBRAHMANYA SASTRI,
B. A. (Oxon) M. A.
Curator, Govt
Oriental Mss. Library
& Professor of
Sanskrit, Presidency
College, Madras.

ANNUAL SUBSCRIPTION { INLAND Rs. 6/—Post Free.
FOREIGN SH. 12/—

CONTENTS.

Original Articles.

1	सौख्योपदेशप्रार्थना	By R. Krishnaswamy Aiyar M.A., B.L.	18—19
2	शुश्रूषापद्धतिः	Do.	20—21
3	शिवतारकपञ्चरत्नस्तवः	By Pandit Ramanatha Sastri	21—22
4	श्रीगणेशमालिनीस्तवः	Do.	22—23
5	काव्येषु धर्मनिरूपणम्	By K. S. Venkatarama Sastri	23—28
6	अभिज्ञानशाकुन्तलानुभवः	By Mimamsaratna A. V. Gopalachariar, M. A., B. L.	29—32

Rare & Hitherto Unpublished Works.

7	सौन्दर्यलहरी	By Sri Sankara Bhagavatpadacharya with three commentaries — Lakshmidhara, Saubhagyavardhini and Arunamodini	9—16
8	तत्त्वकौस्तुभः	By Sri Bhattoji Dikshita	9—16
9	मयूखावली	A commentary on the Sastra Dipika of Parthasarathi Misra By Sri Appayya Dikshita	79—86
10	बालभारतम्	By Agastya Pandita with the commentary of Salva Timmayah Dandanatha	95—102
11	मद्रकन्यापरिणयचम्पूः	By Sri Gangadharakavi	9—16
12	जीवन्मुक्तिकल्याणम्	A Drama By Sri Nalladhvari	9—16
13	शृङ्गारप्रकाशः	By Maharajadhiraja Bhoja	71—78
14	श्रीजगद्गुरुधामसेवाशतकम्	By Sri Nadukkaveri Srinivasa Sastrigal	75—86
15	**Reviews.**		
	i. *The Dvaita Philosophy and its place in the Vedanta.* By Vidvan R. Raghavendrachar M. A. R. Krishnaswami Aiyar M. A., B. L., Advocate, Tinnevelly		13—18
	ii. *Sita a Liar ?—Stuff and Nonsense* By R. Narayana Aiyar I. C. S. (Retd.)		19—20
	iii. *Sri Subrahmanya Tattvam* By Brahmasri N. Subrahmanya Aiyar		20—22
	iv. *Lalitopakhyana Vimarsam*	Do.	22—23
	v. *Laghusankarasamhita*	By A. Rangaswami Sastri	23—24
16	**News and Notes.**		24—27
17	**Books Received.**		27—28
18	**Our Exchanges.**		28

LIFE MEMBERS.

It is with much pleasure that we announce that in response to our appeal the following members have become *Life-Members* of our Journal.


1. H. H. Sri Bodhendra Narayana Bharati Swamiji of the Nelamavu Mutt, North Kanara.

2. Sir V. T. Krishnamachariar K. C. I. E. Dewan of Baroda.

We hope more lovers of our Literature and Culture will follow.



श्रीशंकरगुरुकुले अष्टलक्ष्मीमण्डपे विराजमाना
विद्यालक्ष्मीः, यशोलक्ष्मीश्च ॥



श्रीशंकरगुरुकुले [illegible]
अन्नलक्ष्मीः, [illegible] ॥



॥ श्रीः ॥

या वर्णपदवाक्यार्थस्वरूपेण विवर्तते । अनादिनिधनाऽनन्ता सा मां पातु सरस्वती ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैतेकथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

यस्मिन्वस्तुन्यखिलभुवनं सैन्धवं सिन्धुमध्ये
तृष्ट्यम्ब्वग्निश्वसनगगनं जीवभावक्रमेण ।
यस्मिँल्लीनं यदिदमखिलं सच्चिदानन्दरूपे
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः॥

॥ सौख्योपदेशप्रार्थना ॥

श्रीशाङ्किवाटीपुरवास्तव्येन एम्.ए., बि.एल्., बिरुदभाजा
श्री. रा. कृष्णस्वामिशर्मणा विरचिता ॥

आ बाल्याच्छ्रुतिसंप्रदायविधुरे सत्कर्मदूरे पथि
भ्राम्यन्नद्य विमूढधीः पुनरपि स्वाचारमार्गे रतः ।
कृत्याकृत्यविवेकशून्यहृदयस्तत्स्वादमूढं श्रये
श्रीमँल्लोकगुरो मदीयमनसः सौख्योपदेशं कुरु ॥ १ ॥

सत्कर्माणि किमाचरेयमथवा किं देवताराधना-
मात्मानात्मविवेचनं किमु करोम्यात्मैकनिष्ठां किमु ।
इत्यालोचनसक्त एव जडधीः कालं नयामि प्रभो
श्रीमँल्लोकगुरो मदीयमनसः सौख्योपदेशं कुरु ॥ २ ॥

किं वा स्वाश्रितपोषणाय विविधक्लेशान्सहेयानिशं
किं वा तैरभिकाङ्क्षितं प्रतिदिनं संपादयेयं धनम् ।
किं ग्रन्थान्परिशीलयेयमिति मे कालो वृथा यात्यहो
श्रीमँल्लोकगुरो मदीयमनसः सौख्योपदेशं कुरु ॥ ३ ॥

भार्यायाः पतिरात्मजस्य जनको भ्रातुः समानोदरः
पित्रोरस्मि तनूभवः प्रियसुहृद्बन्धुः प्रभुर्नाऽन्यथा ।
इत्येवं प्रविभाव्य मोहजलधौ मज्जामि देहात्मधीः
श्रीमँल्लोकगुरो मदीयमनसः सौख्योपदेशं कुरु ॥ ४ ॥

रथ्यापङ्गुगकीटवद्भवशाद्दुःखं सुखं भावय-
न्कान्तापत्यमुखेक्षणेन कृतिनं स्वात्मानमाध्यायतः ।

वैराग्यं किमुदेति शान्तमनसाऽभ्यायासलभ्यं मम
श्रीमँल्लोकगुरो मदीयमनसः सौख्योपदेशं कुरु ॥ ५ ॥

कामक्रोधमदादिदग्धहृदयाः प्रज्ञाविहीना अपि
त्वत्पादाम्बुजसेवनेन विमलाः संसारपाथोनिधिम् ।
तीर्त्वा यान्ति सुखेन सौख्यपदवीं ज्ञानैकसाध्यां यतः
श्रीमँल्लोकगुरो मदीयमनसः सौख्योपदेशं कुरु ॥ ६ ॥

आत्मानं यदि चेन्न वेत्सि सुकृतप्राप्ते नरत्वेऽधुना
नूनं ते महती विनष्टिरिति हि ब्रूते श्रुतिः सत्यगीः ।
आत्मप्रापकमार्गबोधरहितः कं वा शरण्यं भजे
श्रीमँल्लोकगुरो मदीयमनसः सौख्योपदेशं कुरु ॥ ७ ॥

संसाराम्बुधिवीचिभिर्बहुविधं संचाल्यमानस्य मे
मायाकल्पितमेव सर्वमिति धीः श्रुत्योपदिष्टा मुहुः ।
सद्युक्त्या च दृढीकृताऽपि बहुशो नो देति यस्मात्प्रभो
श्रीमँल्लोकगुरो मदीयमनसः सौख्योपदेशं कुरु ॥ ८ ॥

यज्ज्ञानात्सुनिवर्तते भवसुखभ्रान्तिर्निरूढा क्षणा-
द्यद्ध्यानात्किल दुःखजालमखिलं दूरीभवेदञ्जसा ।
यल्लाभादपरं सुखं किमपि नो लब्धव्यमास्ते विभो
श्रीमँल्लोकगुरो मदीयमनसः सौख्योपदेशं कुरु ॥ ९ ॥

सत्यभ्रान्तिमनित्यदृश्यजगति प्रातीतिकेऽनात्मनि
त्यक्त्वा सत्यचिदात्मके निजसुखे नन्दामि नित्यं यथा ।
भूयः संसृतितापतप्तहृदयो न स्यां यथा च प्रभो
श्रीमँल्लोकगुरो मदीयमनसः सौख्योपदेशं कुरु ॥ १० ॥

॥ शुश्रूषापद्धतिः ॥

श्रीशालिवाटीपुरवास्तव्येन एम्. ए., बि. एल्. विरुदभाजा
श्री. रा. कृष्णस्वाम्यायेण विरचिता ।

नाहं वेदमधीतवान्न हि मया तच्चोदितं वा कृतं
प्रीणीयात्कथमीश्वरोऽनवरतं काम्येषु सक्ते मयि ।
मुख्योऽहं किल पापिनां भवसुखभ्रान्त्या विमूढो भृशं
शुश्रूषां करवाणि ते कथमहं स्वामिंस्त्रिलोकीगुरो ॥ १ ॥

नाभ्यस्तः पदवाक्यशास्त्रनिचयो वेदार्थनिर्णायकः
शास्त्रं नापि पराशरादिमुनिभिः प्रोक्तं मयाऽऽलोकितम् ।
वेदानामुपबृंहणं परिचितं नो वा पुराणादिकं
शुश्रूषां करवाणि ते कथमहं स्वामिंस्त्रिलोकीगुरो ॥ २ ॥

कार्यं कर्म परेशचोदितमिति श्रद्धाविनीतात्मना
नानाजन्मसु कर्म येन चरितं तत्तुष्टिमात्रेच्छया ।
शुद्धान्तःकरणेन तेन कृतिनैवार्हां विधातुं मुदा
शुश्रूषां करवाणि ते कथमहं स्वामिंस्त्रिलोकीगुरो ॥ ३ ॥

सुप्रीतः श्रुतिकीर्तनस्मृतिपदाम्भोजातसंसेवना-
पूजावन्दनदासभावसखितास्वात्मार्पणैरीश्वरः ।
येषां संदयते ह्यनन्यशरणैस्तैरेव साध्यां परां
शुश्रूषां करवाणि ते कथमहं स्वामिंस्त्रिलोकीगुरो ॥ ४ ॥

सम्यक्कायविशोषणेन तपसा चान्द्रायणाद्येन वा
जित्वा काममदादिवैरिनिवहं प्राणांश्च रुद्ध्वा हृदि ।

नैजं तत्त्वमवेक्षितुं हि यतते यस्तेन कर्तुं क्षणां
शुश्रूषां करवाणि ते कथमहं स्वामिंस्त्रिलोकीगुरो ॥ ५ ॥

नित्यानित्यविवेचनं विषयजे भोगे वितृष्णां दृढां
लब्ध्वा शान्तिदमोपरागसहितश्रद्धासमाधींश्च यः ।
मुक्त्यै देशिकपादपद्ममयते तस्यापि या दुष्करा
शुश्रूषां करवाणि ते कथमहं स्वामिंस्त्रिलोकीगुरो ॥ ६ ॥

॥ शिवतारकपञ्चरत्नस्तवः ॥

मधुरापुरीवास्तव्येन व्याकरणसाहित्यशिरोमणिना
पं. श्रीरामनाथशास्त्रिणा विरचितः ॥

तारकारातिजनकं तारकाधीशशेखरम् ।
तारकाख्याङ्कितैः पद्यैस्तारकार्थं स्तवीम्यहम् ॥ १ ॥

वेदाश्वयुक्तरथमाभरणीकृताहिं सत्कन्निकावचनमादृतरोहिणीशम् ।
पाणिस्फुरन्मृगमथार्द्रजटाकलापं वन्दे पुनर्वसुपतीधरमित्यवासम् ॥ २ ॥

पुष्यद्रुमप्रणयमेदुरशैलकन्याश्लेषप्रियं शतमखादिसुरामिवन्द्यम् ।
वीराढ्यफल्गुनकरामिहतोत्तमाङ्गं सर्वोत्तरं प्रणिपतामि पिनाकहस्तम् ।

चित्रापदानचरितं सुखचित्स्वरूपं स्वातीतजन्मसुकृतैः पुरुषैरवाप्यम्
देवं विशाखजनकं श्रितकामधेनुराधाप्रियार्चितपदं सततं भजेऽहम् ॥४॥

ज्येष्ठं सुरं दिविषदां जगदादिमूलं आषाढदण्डिनमुमाहृदयब्रजेशम् ।
ध्यायामि वैश्रवणमित्रमगाधनिष्ठं गीर्वाभिधाश्रवणमिषवरमाधिशान्त्यै ॥

भक्तं मृकण्डुतनयं परिपाल्य कालात्तस्मै स्वभक्तपदमक्षयमप्यदाद्यः ।
देवं भवन्तमखिलार्तिहरं विहाय त्राताऽस्ति को मम विपद्विनिवारणेऽपि ॥ ६ ॥

श्रीरामनाथकविना रचितं स्तवं ये भक्त्या पठन्ति शिवतारकपञ्चरत्नम् ।
ते मृत्युभीतिमपधूय शिवप्रसादादानन्दरूपमपवर्गपदं भजन्ते ॥ ७ ॥

॥ श्रीगणेशमालिनीस्तवः ॥

[पण्डित रामनाथशास्त्री, व्याकरणसाहित्यशिरोमणिः, मधुरा]

प्रारम्भे विबुधवराः स्मारं स्मारं यमेव कृतकृत्याः ।
सारं शिवयोः प्रेम्णां हेरम्बं तं सदाऽहमवलम्बे ॥ १ ॥

प्रणतमनुजिघृक्षुः पुष्कराकुञ्चनेन प्रणवमनु समानं दर्शयन्नात्मरूपम् ।
फणधरमणिभूषः फालचन्द्राभिरामो गणपतिरनिशं मे मानसे संनिधत्ताम् ॥ २ ॥

मदलुलितकपोलभ्रान्तभृङ्गाभिभृङ्गव्युदसनकृतकर्णस्फालनक्रीडनेन ।
विदलितदुरितौघं विश्रुतं वेदशीर्षे मदवनमभिलष्यन्नौमि मातङ्गशीर्षम् ॥ ३ ॥

पदनलिनगलद्भिर्दीप्तरागैः परागैर्विदधतमपरागं भक्तलोकान्तरङ्गम् ।
मुदमति वितरन्तं मोदकैर्मोदमानं सदयहृदयभावं संततं चिन्तयामि ॥ ४ ॥

हिमधरतनयास्यामिख्यराजीवमित्रं शमलशमनशौण्डोद्दण्डशुण्डाप्रकाण्डम् ।
शमधनसमुपास्यं साम्जास्यं सलास्यं किमपि महितमेकं स्तात्पुरस्तान्महस्तत् ॥५॥

सुलभममलबुद्धेर्मूलभूतं समृद्धेः कुलभरणधुरीणं कुङ्कुमालेपशोणम् ।
मलभरमालिनं मे मानसं मार्जुकामः कलभवरमुपास्से कन्धरादूर्ध्वदेशे ॥ ६ ॥

अमरपदमवाप्तुं पादपद्माश्रितानामभयवरदहस्तं दिव्यतेजः प्रशस्तम् ।
इभवदनसमाख्यं भाग्यमैशं समीडे शुभदनयनपातं शैलकन्याङ्कपोतम् ॥ ७ ॥

करधृतवरबीजापूरचापेक्षुचक्रस्फुटदपलशरं दाडिमश्रीहिपाशात्मदन्तम् ।
द्विरदवदनमिन्धां दैवतं सेव्यमानं स्वरविषविधेयुख्यैर्निजैरैः कार्यासिद्धये ॥ ८ ॥

भजनरतजनानां भद्रदाने विनिद्रं भुजगपतिकरीचिभ्राजमानाखिलाङ्गम् ।
व्यजनवदतिदीर्घव्यायतश्रोत्रजालं गजनरवररूपं गाहतामन्तरङ्गम् ॥ ९ ॥

कुटिलमतिविदूरं छन्दसामेकसारं कटिलसदहिसूत्रं भूरिकारुण्यनेत्रम् ।
निटिलनयनसूनो नौमि धर्मैकसैनोजटिलहृदविशं त्वां पाहि मां दीननाथ ॥१०॥

॥ काव्येषु धर्मनिरूपणम् ॥

(कल्लिडैकुरिचि, व्याकरणशिरोमणि, श्रीवेङ्कटरामशास्त्रिणा श्रीशंकरगुरुकुले कृतः उपन्यासः)

अयि माननीयतमा अध्यक्षमहाशयाः, पूज्यतमाः सभासदश्च !

समयेऽस्मिन्नेतस्यां महापरिषदि संगतानामधिगतसाहित्यसारसर्वस्वानां विद्वन्मूर्धन्यतमानां श्रीमतां भवतां चरणावभिवाद्य, सप्रश्रयं साञ्जलिबन्धमभ्यर्थये । 'धर्मपरिज्ञाने काव्यानां कीदृशी उपकारता' इत्यमुं विषयमधिकृत्यास्मिन्महासदसि, सन्मनःशोधनायैव यत्किंचिद्भाषितुं प्रक्रान्तोऽस्मि । विद्वच्चूडाध्यतमानां भवतां संनिधावल्पज्ञस्य मम भाषणं, प्रद्योतनस्य पुरतः खद्योतप्रकाशवत्, यद्यपि परिहासास्पदमेव, अथापि विज्ञाय भवतां दोषज्ञतां, संस्कृतप्रणयितां च, मदीयानामपि दोषाणां निर्हरणमाकाङ्क्षमाणेनास्मिन्विषये प्रावर्तिषि । अतो मदीयां प्रार्थनामुररीकृत्य, संशोध्य च मदीयान् दोषाननुगृह्णीयुरित्यभ्यर्थये ॥

इह खल्वपारे संसाराध्वनि बंभ्रम्यमाणानां प्राणिनिकायानां मध्ये, मानुष्यकमेव प्रशस्ततमं जन्मेति सर्वैरप्यनुभूयमानेऽस्मिन्विषये नैव वक्तव्यं किंचित् । मानवशरीरं सृष्ट्वैव प्रजापतिरप्यात्मानं कृतकृत्यममन्यतेति हि वेदविदां प्रवादः । तत्र किं कारणमिति परं विमृष्टव्यं भवति । कृते च विमर्शे, विद्वद्भिरित्थमेव निरूपणादि—श्रुतिस्मृतीतिहासपुराणादिभिः सम्यक् विज्ञाय धर्मस्य याथात्म्यम्, अनुष्ठाय च स्वस्योचितं धर्मं श्रुतिचोदितेन वर्त्मना, उत्तमां च गतिं गन्तुं शक्नुवन्ति मानवा एव, नान्ये प्राणिनः । इत एव मानवजन्मनः प्राशस्त्यं सर्वत्रोद्घुष्यते । तत्रापि गङ्गादिदिव्यतीर्थपवित्रितायां, धर्मसस्यक्षेत्रभूतायामस्यां भारतभूमौ जन्म, प्राक्तनबहुजन्मार्जितसुकृतविशे-

यैरेव लभ्यते। सम्यगनुवर्णितं चैतत् कविकुललालामभूतेन श्रीहर्षेण—'वर्षेषु यद्भारतमार्यधुर्या वदन्ति गार्हस्थ्यमिवाश्रमेषु। तत्रापि पत्युर्वारेवध्वयाऽहं शर्मोर्मिकिम्मीरितधर्मलिप्सुः।' इति। अत्र हि पुरन्दरदूत्या समुदीरितमिन्द्रलोकवैभवं निराकृत्य, भारतवर्षवासमेव आत्मनः प्रियतमं मन्यते पतिशुश्रूषणासक्तहृदया दमयन्ती। तत्र हेतुमप्युदीरयति—शर्मोर्मिकिम्मीरितधर्मलिप्सुरिति। यथा हि सुक्षेत्रे उप्तान्येव बीजानि फलं जनयन्ति, एवमेव च धर्मोऽपि पुण्यभूमावनुष्ठित एव फलाय भवति। तादृशस्य च धर्मस्य लक्षणं प्राह भगवान् जैमिनिः—'चोदनालक्षणोऽर्थो धर्मः' इति। अनेन च सूत्रेण धर्मस्य अपौरुषेय वेदप्रामाण्यप्रतन्त्रमुक्तं भवति। य एवाऽवश्यकर्तव्यत्वेन वेदे विधीयते स एव धर्मः, यश्च निषिध्यते सोऽधर्मः। तौ च धर्माधर्मौ राज्ञः शासनमिवोपदिशति—'सत्यं वद, धर्मं चर, न सुरां पिबेत्' इत्यादिका च श्रुतिः। 'श्रुतिः स्मृतिर्ममैवाज्ञा' इत्युक्तिश्च श्रुतिस्मृतीनामीश्वरशासनत्वमवगमयति। यथा वा लौकिकी राजाज्ञाऽपि नोल्लङ्घ्यते राजदण्डभिया, एवमेव ईश्वरशासनमपि नोल्लङ्घनीयम्। इयानेवात्र भेदः—राजशासनातिक्रमे कारागृहवासादिकं दण्डं सद्य एवानुभवति, ईश्वराज्ञोल्लङ्घने तु कालान्तरे इति। तादृशाच्च वेदाद्धर्माधर्मावधिगन्तुं पार्यन्ते केचिदेव विद्वांसः पूर्वोत्तरमीमांसापरिशीलनैः। लौकिकीमपि राजाज्ञामधिगन्तुं प्रभवन्ति प्राड्विवाका एव व्यवहारनिपुणाः क्वचिदिति वेदपौरुषेये वेदे किमु वक्तव्यम्?। एतदर्थमेव ह्यास्याकीनाः प्राक्तनाः पुरुषधौरेयाः साक्षात्कृतमहेश्वराः अस्मत्पूर्वपुण्यपुञ्जप्रेरिता महात्मानो मुनयः स्मृतीतिहासपुराणादिषु श्रुत्यर्थमेव सम्यङ्निरूपयामासुः। यथा वा अमात्यवर्या महाराजशासनं सम्यङ्ज्ञात्वा इतरानपि प्रबोधयन्ति, एवं प्राचीना महर्षयोऽपि ईश्वरसाक्षात्कारेण वेदार्थं सम्यगवबुध्य उपाख्यानैरस्मानपि प्रबोधयन्ति। यथा वा लोके कश्चन सुहृत् स्वस्निग्धाय स्वानुभवप्रदर्शनपूर्वकमसकृत् सन्मार्गं प्रबोधयति, एवमेवैते महान्तोऽपि सुहृद्बुद्ध्या अस्मानपि ज्ञापयन्ति। व्याकरणस्मृतिप्रणेतारं भगवन्तं पाणिनिं सुहृत्पदेनैव व्यपादिक्षति भगवान् भाष्यकारः। यथा—वेदमधीत्य त्वरिता वक्तारो भवन्ति। वेदान्तो वैदिकाः शब्दाः, सिद्धा लोकाच्च लौकिकाः। अनर्थकं व्याकरणं इति। तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद्भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे—इमानि प्रयोजनानि, अध्येयं व्याकरणं इति। 'सत्यं वद' इति श्रुत्या योऽर्थः संगृहीतः स एवार्थः पुराणे हरिश्चन्द्रोपाख्यानेन प्रपञ्च्यते। आख्यायिकया यादृशी धर्माचरणे निश्चिता बुद्धिर्जायते, न तादृशी भयानकोपदेशमात्रेण केवलेन। अत्यन्तं सूक्ष्मतमा अपि अर्थाः आख्यायिकया बोध्यमाना मनसि सम्यगवगाहं लभन्ते। किं च अत्यन्तगभीरत्वाद्वेदवाक्यानां, तन्निगूढमभिप्रायं यथावदधिगन्तुं न पार्यते। कदाचित् विपरीतार्थभ्रमोऽपि संजायते। पुराणादीनि तु उपक्रमादिभिः षड्विधैस्तात्पर्यलिङ्गैर्निर्णीतमर्थं सम्यक् प्रतिपादयन्ति। आधुनिकास्तु पुराणादीनां प्रामाण्यं प्रत्याख्याय, वेदेऽपि पूर्वापरवाक्यसंदर्भापरिशीलनेन एकदेशश्रवणेनैव धर्मतत्त्वमवधारयन्ति। तथा चाधर्मोऽपि तेषां धर्मवदवभासते। तेन च महाननर्थो भवति। अत एव ह्युक्तम्—'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरेदिति॥' एवं यद्यपि पुराणानि कथारूपेणैव धर्मसूक्ष्ममवबोधयन्ति, धर्मतत्त्वं च सम्यगवगतं भवति, अथापि धर्माचरणे स्वारसिकी प्रवृत्तिर्न तेभ्योऽपि भवति। सा तु काव्यपरिशीलनादेव। शब्दप्रधानो हि वेदः, पुराणं त्वर्थप्रधानम्।

साध्यां धर्मबोधनं तु क्लेशेनैव भवति । काव्यं तु व्यङ्ग्यप्रधानम् । अलक्तसन्निवेशलालित्यवत् एव धर्माचरणे प्रवृत्तिर्जायते । यथा वा लोके निरतिशयसौन्दर्यवती सालङ्कारा च काचन रमणी कटाक्षवीक्षणादिभिरेव स्वकान्तमावर्जयन्ती वाचा किंचिदप्युक्त्वैव स्वाभिलषितं सर्वं संपादयति, एवमेव काव्यमपि सरसैः सालंकारैः कवितावितिशयैरेव श्रोतारं सत्संस्कारवर्जयद्वारे प्रवर्तयति, निवर्तयति चाधर्मात् । एतदेव आह—'यद्वेदान् प्रभुसंमितादधिगतं शब्दप्रधानाद्धिरं यत्तार्थप्रवणात्पुराणवचनादिष्टं सुहृत्संमितात् । कान्तासंमिततया तया सरसतामापाद्य काव्यश्रिया कर्तव्ये कुतुकी बुधो विरचितस्मारे स्पृहां कुर्महे ॥' इति । एवं च भयानुनयाभ्यां प्रवर्तकत्वं वेदपुराणादीनाम् । काव्यात्तु सकुतूहलप्रवृत्तिरिति विशेषः । 'काव्यालापांश्च वर्जयेत्' इति वचनस्य च त एव विषयाः, येषु गुणाधिकानां पावनचरितं नानुवर्ण्यते । न केवलं काव्येषु, शास्त्रेष्वप्येषैव कथा । तत्रापि धर्मविरोधीनि शास्त्राणि परित्यजन्त एव । अन्यच्च—श्रुतिस्तावत्सागरस्थानीया । यद्यपि समुद्रो वन्दनीय एव, अथापि न तस्य लिलं पिपासाशामकं भवति । तदेव जलं जलधरैः सरसतामापाद्य स्वादु पानीयं भवति । एवमेव अर्णवस्थानीयवेदप्रतिपादितमेवार्थं सरसतामापाद्य काव्यमेघो वर्षति चेत् को वा न प्रवर्तेत । 'चतुर्विधफलप्राप्तिः काव्याद्ल्पधियामपि' इति काव्यस्य प्राशस्त्यं मनुनाऽपि वर्ण्यते । तस्मात् सर्वेषामपि काव्यानां धर्मबोधनायैव प्रवृत्तिरिति विनिश्चितोऽर्थः ॥

तत्र श्रीमद्रामायणं तावत् सर्वेषामपि काव्यानां मूलभूतत्वात्, आदौ प्रवृत्तत्वात् अत्युत्तमत्वाच्च, आदिकाव्यमित्युच्यते । यत्र वर्णितस्य मात्रामेकामादाय काव्यानि सर्वाण्यपि सहृदयहृदयाह्लादकानि विश्रुतानि च भवन्ति, तस्य च महिमा केन वा वर्णयितुं शक्यते । तत्र च बहवो धर्मा निरूपिता वर्तन्ते । 'रामो विग्रहवान् धर्मः' इति धर्ममूर्तेः श्रीरामचन्द्रस्य चरितं किलानुवर्ण्यते । संध्योपासनं तावत् 'अहरहः संध्यामुपासीत' इति श्रुतावुपदिष्टं वर्तते । स्मृतावपि तद्विस्तरतः प्रतिपादितम् । यथा—'ब्रह्मणोपास्यते संध्या विष्णुना शंकरेण च । कस्मात्तोपासचेद्वेत्तौ श्रेयस्कामो द्विजोत्तमः ॥' अकरणेऽनर्थं चावेदयति—'योऽन्यत्र कुरुते यत्नं धर्मकार्येऽपि वै द्विजः । विहाय संध्याप्रणतिं स याति नरकायुतम् ॥' इति । तत्र कालातिक्रमेऽपि महान्दोषोऽभिहितः—'यः संध्यां कालतः प्राप्तामालस्यादतिवर्तते । सृर्यहत्यामवाप्नोति उलूकत्वमियात्ततः ॥' इति । पुराणेषु च देवीभागवतादिषु आख्यायिकयैतदर्थः प्रपञ्चितः—'ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः । प्रज्ञां यशश्च कीर्तिं च ब्रह्मवर्चसमेव च ॥' इति । यागादिकर्मकृतं यशः, त्यागादिकर्मकृता कीर्तिः । एवं श्रुतिस्मृतिपुराणादिषु उपदिष्टमिममर्थमसकृत्प्रस्तौति वाल्मीकिः । यथा—'प्रभातायां तु शर्वर्यां विश्वामित्रो महामुनिः । अभ्यभाषत काकुत्स्थं शयानं पर्णसंस्तरे ॥ कौसल्यासुप्रजा राम पूर्वा संध्या प्रवर्तते । उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ तस्यर्षेः परमोदारं वचः श्रुत्वा नृपात्मजौ । स्नात्वा कृतोदकौ वीरौ जेपतुः परमं जपम् ॥ इति [बाल. २३—१, २, ३] 'एष ते राम गङ्गाया विस्तरोऽभिहितो मया । स्वस्ति प्राप्नुहि भद्रं ते संध्याकालोऽतिवर्तते ॥' [बाल. ४४—२०] 'तृप्तिराश्चर्यभूतानां कथानां नास्ति मे विभो । कर्मकालो मुनिश्रेष्ठ लम्बते रविमण्डलम् ॥ तच्छरीरोत्तरासंगः संध्यामन्वास्य पश्चिमाम् ॥' इति । एवं किमर्थं वा वाल्मीकिर्दुर्दुरनुवर्णयति रघुनाथस्य संध्योपासनवृत्तान्तम् ? अतः कवेरेकमाशयोऽभिव्यज्यते । सर्व-

कर्मफलप्रदस्य नित्यमुक्तस्य भगवतो वासुदेवस्य अवतारभूतो दाशरथिरपि यथाविधि कर्म अनुतिष्ठति चेदितरोऽपि अधिकारी अवश्यमनुतिष्ठेत् इति । लोकसंग्रहार्थमेव हि महात्मनां कर्माचरणप्रवणता । 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन । नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥' इति किल वासुदेवोऽपि ब्रवीति ॥

कविसार्वभौमः कालिदासोऽपि कुमारसंभवे इममेवाभिप्रायमभिव्यञ्जयति रसभरितैः स्वीयवाग्विलासैः— 'ईश्वरोऽपि दिवसात्ययोचितं मन्त्रपूर्वमनुतस्थिवान् विधिम्' इति । अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनो यस्य भगवतो माहात्म्यं निरतिशयमनुवर्ण्यते शतरुद्रीयादिषु, यो बहिःक्रियायां कर्मैव भवति, न तु कदाचिदपि कर्ता, तादृशोऽपि महेश्वरः नवोढया स्वभार्यया पर्वतराजकुमार्या सह गिरिसानुषु रममाणः, 'पार्ष्णिमुक्तत्रसुधास्तपस्विनः पावनाम्बुरचिताञ्जलिक्रियाः । ब्रह्म गूढमभिसंध्यमाहृताः शुद्धये विधिविदो गृणन्यमी ॥ तन्मुहूर्तमनुमन्तुमर्हसि प्रस्तुताय नियमाय मामपि । त्वां विनोदनिपुणः सखीजनो वल्गुवादिनि विनोदयिष्यति ॥' इति स्वदिरङ्गतारामपि तां कथंचिदाश्वास्य अवश्यकर्तव्यतावुद्ध्या मन्त्रपूर्वं यथाविधि अनुतस्थिवान् इति । एवं वधूवरयोः प्रथमसंभोगवर्णनावसर एव प्राक् संध्योपासनावृत्तान्तमनुवर्णयति । संध्याकाले संप्राप्ते इतरत्सर्वमपि परित्यज्य तदेवानुष्ठातव्यमित्येव कवेराशयोऽनेनाभिव्यज्यते । एवमनुवर्णनेन धर्माचरणे यथाऽस्माकं बुद्धिरवतरति न तथाऽन्यत्र वाक्यशतैरपि ॥

आदिकविर्वाल्मीकिः श्रीराघवस्य पितृभक्तिमन्यादृशमनुवर्णयति— 'अतोषयन्महाराजमकुर्वन्वा पितुर्वचः । मुहूर्तमपि नेच्छेयं जीवितुं कुपिते नृपे ॥ अहं हि वचनाद्राज्ञः पतेयमपि पावके । भक्षयेयं विषं तीक्ष्णं मज्जेयमपि चार्णवे ॥ न ह्यतो धर्मचरणं किंचिदस्ति महत्तरम् । यथा पितरि शुश्रूषा तस्य वा वचनक्रिया ॥' (अयो. १८–१५, २८; १९–२२) इति । अन्यत्र च—यज्ञरक्षणानन्तरं विश्वामित्रेण धनुर्दर्शनाय मिथिलामानीतो राघवः गुरोर्वचनगौरवादेव शिवचापं बभञ्ज । द्विधा भग्ने च धनुषि स्वप्रतिज्ञायाः परिपूरणात् प्राप्तामन्दानन्दो जनकः सद्य एव वैदेहीं राघवाय दातुमुपचक्रमे । तदानीं श्रीरामस्य मनःप्रवृत्तिमित्थमनुवर्णयति भगवान् वाल्मीकिः— 'दीयमानां न तु तदा प्रतिजग्राह राघवः । अविज्ञाय पितुश्छन्दमयोध्याधिपतेः प्रभोः । ततः श्वशुरमामन्त्र्य वृद्धं दशरथं नृपम् । मम पित्रा त्वहं दत्ता रामाय विदितात्मने ॥' इति । धनुर्भङ्गेन स्वयमेव प्राप्तायाः सर्वलक्षणलक्षितायाः सुशोभनायाः सीतायाः दर्शनेन राघवस्य मनसि न कश्चिदपि विकारः समजनि । पितुर्निर्देशेनैव सीतां पाणीतवान्, न तु स्वयमेव । अनेन रामस्य पितरि भक्तिः कथमिवाभिव्यज्यते । वृत्तान्तं चेमं सीतामुखेनैवानुवर्णयता वाल्मीकिना सीतायाः पातिव्रत्यमप्यनेन प्रादर्शि । एवमन्येऽपि बहवो धर्माः सम्यङ्निरूपिताः । एवमितरेष्वपि काव्येषु धर्मप्रबोधनसंदर्भान् किंचिदिव प्रदर्शयामः ॥

तत्र धर्मस्तावदधिकारिभेदाद्बहुधा विभिन्नो वर्तते । यस्य यो धर्मः श्रुत्या विहितः स एव तेनानुष्ठेयः । न तत्रास्माभिर्गुणदोषविचारणा कार्या । कुत्रचित् स्वधर्माचरणे क्लेशः स्यात्, अन्यत्र स न स्याद्, अथापि स्वधर्म एवानुष्ठेयः । गीतायां स्पष्टीकृतोऽयमर्थो भगवता वासुदेवेन—'सहजं

कर्म कौन्तेय सदोषमपि न त्यजेत् ॥' इति । न केवलमिदमेव, साकल्येन परधर्माचरणापेक्षया वैकल्येनापि स्वधर्माचरणमेव श्रेयः इत्यप्युपदिशति हृषीकेशः— 'श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् । स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥' 'अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि । ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥' 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ॥' 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥' इति । किं बहुना ? स्वधर्मे पार्थं प्रवर्तयितुमेव किल निखिलाऽपि गीता कृष्णस्य मुखारविन्दान्निःसृता । शम्बूकोपाख्यानेन च इममेवाभिप्रायमाविष्करोति भगवान् वाल्मीकिः । गुरुभ्रात्रादीनां वधे दोषदर्शनादेव किल विरराम समरादर्जुनः । तं च गीतोपदेशेन स्वधर्मे प्रवर्तयति भगवान्वासुदेवः ॥

इत्थं श्रुतिस्मृत्यादिभिरुपदिष्टं धर्मं कस्यचन धीवरस्य मुखेन प्रकटीकरोति कविसार्वभौमः कालिदासः । स्वभर्तृगृहं प्रति प्रस्थितायाः शकुन्तलायाः हस्ताद्दुष्यन्तनामाङ्कितमङ्गुलीयकं मध्येमार्गं दैववशात् शचीतीर्थे प्रभ्रष्टम् । तच्च मत्स्योदरनिपतितं सत् यदृच्छया जालैर्मत्स्यग्राहिणः कस्यचन धीवरस्य हस्ते आपतितम् । स च तद्विक्रयाय राजवीथीमनुप्राप्तस्तस्करबुद्ध्या रक्षिभिर्गृहीतः । तदधिगमप्रकारजिज्ञासया पृष्टेन च धीवरेण— 'अहं जालोद्वालादिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि' इत्यभिहिते सत्युपहसति स्यालः— 'विशुद्ध इदानीमाजीवः' इति । विशुद्ध इत्यस्य विपरीतलक्षणया निकृष्ट इत्यर्थः । इत्थं स्वधर्मे दोषवत्तया निन्दिते सति तदसहमान इव धीवर उत्तरं ब्रूते— 'सहजं किल यद्विनिन्दितं न खलु तत्कर्म विवर्जनीयम् । पशुमारणकर्मदारुणोऽप्यनुकम्पामृदुरेव श्रोत्रियः ॥' इति । पद्यं चेदं 'सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्' इति गीताश्लोकं शब्दतोऽपि अनुकरोति । परं तु तत्र केवलमुपदेश एव । अत्र तु कवेः कल्पनाविशेषेण अन्यादृश आनन्दोऽपि समुद्भवति । हिंसादोषयुक्तमपि यज्ञादिकं स्वधर्मबुद्ध्या श्रोत्रिय आचरति । न तावता तस्य घातुकत्वम्, अपि तु मृदुरेव भवति । अभ्युपगम्य च यज्ञीयहिंसायां दोषत्वामित्थमभिहितम् । वस्तुतस्त्वस्या दोषत्वमेव नास्तीति 'अशुद्धमिति चेन्न शब्दात्' इत्यधिकरणे सिद्धान्तितमाचार्यपादैः । तदित्थं सर्वथाऽपि स्वधर्मोऽनुष्ठेय इत्यमुमर्थमत्यन्तपामरस्य धीवरस्य मुखेनाविष्कुर्वता महाकविना मानवानां तात्कालिकी स्वधर्माचरणप्रवृत्तिश्च सम्यगभिव्यज्यते ॥

मन्वादयो हि महात्मानस्तपःप्रभावेन वेदं प्रत्यक्षीकृत्य मन्त्रद्रष्टारः श्रुत्यर्थमेव स्मृतिरूपेण संकलयामासुः । महाकविश्च कालिदासो रघुवंशे 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्' इत्युपमानेनामुमर्थं प्रकाशयति । यथा श्रुतिप्रोक्तान्मार्गात् स्मृतिरीषदपि नान्यतोऽपसर्पति, एवमेव सुदक्षिणाऽपि नन्दिन्या मार्गमन्वगच्छत् । देवानां मानवानां चान्योन्यमुपजीव्योपजीवकभावो वेदे पुराणादिषु च स्पष्टं निरूपितः । यथा वेदे— 'इतः प्रदानं देवा उपजीवन्ति अमुतः प्रदानं मनुष्याः' इति । गीतायां च— 'देवान्भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्त श्रेयः परमवाप्स्यथ ॥' इति । काव्ये च रघुवंशे दिलीपवर्णनाव्याजेनानुवर्णयत्येतमेवार्थम्— 'दुदोह गां स यज्ञाय सस्याय मघवा दिवम् । संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥' इति । किं च गीता-

वाम्— 'यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः । भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥' इति भगवता यत्पार्थायोपदिष्टं तदेव महता स्वारस्येनानुवर्णयति कविः । पूज्यायाः सुरभेरपूजनमेव हि दिलीपस्य सुतोत्पत्तिं प्रत्यवघातात् । ततश्च गुरुनिदेशात्तत्सुतां नन्दिनीं सम्यगाराधयति स्म महाराजः । तेन च तुष्टान्तरा नन्दिनी— 'दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपयुङ्क्ष्व' इत्यवदत् । सद्य एव स्त्रीः पयः पातुमभ्यनुजानाति स्म । अथापि स महाराजो न दोग्धुमैच्छत् । अन्वीक्षैनाम्— 'वत्सस्य होमार्थविधेश्च शेषं गुरोरनुज्ञामधिगम्य मातः । ऊधस्यमिच्छामि तवोपयोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ।' इति । अहो कीदृशो वा दिलीपस्य गुरौ भक्त्यतिशयः; कीदृशी च वैदिके कर्मणि श्रद्धा । इन्दुमतीविरहशोकेन नष्टधैर्यमजमाश्वासयति बहुभिरुपदेशैर्भगवान् वसिष्ठः । तत्रायमेकः— 'मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः । क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसौ ॥' सर्वेऽपि वयं चिरजीविनः; केचिदेव हि जन्मान्तरसुकृतपरिपाकवशान्मृत्युवश्या भवन्तीति किलास्माकमभिमानः । न तथा मन्यध्वम् । 'संयोगा विप्रयोगान्ताः' 'जातस्य हि ध्रुवो मृत्युः' इत्यादिबहुप्रमाणवशात् शरीरवतां मरणं तावत् स्वतः सिद्धमेवेति न तत्र किमप्याश्चर्यम् । अपि तु वियोगस्वभावकं शरीरं प्राप्यापि ये तावत् वशीकृतमृत्यवश्चिरायुषश्च भवन्ति, तत्रैव आश्चर्यम् । प्राणास्त्वायत्तं सदा बहिर्गच्छन्त एव वर्तन्ते । एकवारं बहिर्गतो वायुः पुनरप्यागतीत्यत्र को वा निश्चयः? 'पुनः पुनर्वशमापद्यते मे' इति किल मृत्युरेव ब्रवीति । उपनिषदोऽप्येतमर्थं महता क्लेशेनैव निरूपयन्ति ॥

किं च 'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥' 'धर्मज्ञसमयः' 'वेदो धर्ममूलं तद्विदां च स्मृतिशीले' इत्यादिभिः श्रुतिस्मृतिवत् सदाचारोऽपि प्रमाणं भवतीति प्रत्यवादि । तत्र च 'दृष्टो धर्मव्यतिक्रमः साहसं च महताम्' इति धर्मव्यतिक्रमेण तेषां महत्त्वमाक्षिप्य इत्थं समर्थितम्— 'तेषां तेजोविशेषेण प्रत्यवायो न विद्यते' इति । ज्ञानबलात्तु तेषां विपरीताचरणमपि न दोषाय भवति । यथा वा वह्निना दग्धं बीजं न प्ररोहति, एवं कर्मबीजमपि तेषां ज्ञानाग्निना प्रदग्धं सन्न किमपि फलं जनयति । अथापि दुर्बलैरस्माभिः स आचारो नानुसर्तव्यः । एतच्च कल्पितेतिवृत्ते दशकुमारचरित्रे सम्यक् निरूपयत्याचार्यदण्डी । मरीचिनाम्ने कस्मैचिन्मुनये स्वस्यामनुरक्ताय काममञ्जरी नाम काचन वारयुवतिरित्थमुपदिशति— 'तत्त्वदर्शनोपबृंहितश्च यथाकथंचिदप्यनुष्ठीयमानाभ्यां नार्थकामाभ्यां बाध्यते । बाधितोऽपि चाल्पायासप्रतिसमाहितस्तमपि दोषं निहत्य श्रेयसेऽनल्पाय कल्पते । तथा हि— पद्मनाभस्य षोडशसहस्रान्तःपुरविहारः, प्रजापतेः स्वदुहितर्यपि प्रणयप्रवृत्तिः, पराशरस्य दाशकन्यादूषणं इत्यादि । अमराणां च तेषु तेषु कार्येष्वासुरविप्रलम्भनानि ज्ञानबलाच्च धर्मपीडामावहन्ति । धर्मपूते च मनसि नभसीव न जातु रजोऽनुषज्यते' इति ॥

(क्रमशः)

अभेदज्ञानशाकुन्तलानुभवः ॥

मीमांसारत्नं, एम्., ए., बि. एल्., ए. बि. गोपालाचार्येण विरचितः ॥

(पूर्वतोऽनुवृत्तः)

अष्टौ रसाः । ते च तत्र तत्र किंचिदूनाः बहु वा प्रत्यक्षीभवन्ति सप्ताङ्कघटितेऽस्मिन्प्रबन्धे । शमरसजलधिरीशः । अष्टौ रसाः हृद्यप्रबन्धस्य अष्ट तनवः । ब्रह्मानन्दलेशत्वं तत्सजातीयत्वं चोक्तं रसानाम् । जीवनं सहृदयानां प्राणनं च स्वकाव्यरसैः । यथा नाटकस्याष्टौ रसप्रपञ्चास्तनवः, तथा श्रीनटराजस्याष्टौ प्रपञ्चरूपतनवः । अष्टानां रसानां शान्तिरूपब्रह्मरसाङ्गत्वं विवृतं संकल्पसूर्योदयदशमाङ्के— 'जुगुप्सां देहादौ विषयरसभोगेषु हसनं प्रकोपं निद्रादौ परपरुषवादादिषु भयम् । शुचं योगालाभे फलपरिणताकृतमपि प्रयच्छत्युत्साहं दुरितविरतौ ब्रह्मणि रतिम्' ॥ इति । 'निर्वाणपरमा शान्तिरधिजिगमयिष्यते' नाटकान्तभरतवाक्ये । श्रवणोपकारकं शब्दगुणमाकाशम् । आकाशे तत्पूर्वोक्तचन्द्रसूर्यप्रभाव्याप्तिः । आकाशे अवस्थाय तत्र संचारिणौ च तौ । तथा च आकाशस्य तयोश्च आधाराधेयभावः । 'दिशः श्रोत्रम्' इति ; भगवतः श्रोत्रं आकाशः, चक्षुषी चन्द्रसूर्यौ । भगवच्चक्षुःश्रोत्रयोः सहपठनं कृतं द्वितीयपादे इत्यौचिती रक्ष्या । कालस्य मूर्त्यष्टकमध्येऽपठनेऽपि कालरूपिणि भगवति कालस्याप्यन्तर्भावम्, तस्य भगवदधीनत्वं च प्रदर्शयितुं कालस्य भगवत्तनुभूतचन्द्रसूर्यविहितत्वं चतुरमुक्तं कविना । विश्वंभरा भगवती पृथ्वी सर्वभूतप्रकृतिः विश्वमाता । 'पृथिवी विश्वस्य धारिणी' । 'यया प्राणिनः प्राणवन्तः' इति वायोर्ग्रहणम् । रसेनोपक्रम्य प्राणेनोपसंहियते । 'नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि' इत्यन्वहं शान्तिपाठं पठामः । सहृदयस्य रसाः प्राणाः, रसाः प्रबन्धप्राणाः । 'प्रत्यक्षाभिः प्रपन्नः' । प्रत्यक्षैर्बृंहद्भिः कार्यैरदृश्यमीशरूपं भूतयोनि सुसूक्ष्मं कारणं परिदृश्यते । अतिबृंहन्ति ईशकार्याणि प्रत्यक्षाणि दृष्ट्वा, विस्मयाविष्टैर्हृष्टरोमभिरस्माभिस्तत्कारणमीश्वरः सोत्कण्ठं दिदृक्षितव्यो निदिध्यासितव्यः । प्रपन्नशब्देनातिबृंहतामेतेषां कार्याणामीशाश्रयं विना नान्या गतिरित्यनन्यगतिकत्वं बोध्यते । 'महाभूतानि, विश्वव्याप्तज्योतिषी चन्द्रसूर्यौ च ईशं प्रपद्यन्ते ; अल्पा वयं कथं तं न प्रपद्येम' इति काव्यभिप्रेतो निपुण उपदेशः ॥

अथ काव्यमार्गदर्शीतिहासद्वयतत्कर्तृपरयोजनाक्रमसूचनम् । रसाष्टकानुभावयित्रा काण्डसप्तकघटितेन स्वयशःकायभूतरामायणेन शोभमानः कवीशो वाल्मीकिः प्रार्थ्यते कविताशक्तिलब्धये । अस्मिन्नान्दीश्लोके ईश्वरतन्वष्टकं सप्तभिर्वाक्यैः संगृहीतम् । कविसृष्टिष्वाद्या उत्तमा प्रथमा च रामायणकृतिः । आदिकाव्यमिति तन्नाम । ध्वनिशास्त्रहृद्वर्त्मना यथाविधि भूयो हुतं शोधकरसिकहृदये रसरूपहविस्तत्काव्येन । विदुषां भूमिदेवानां तर्पकं काव्यरूपहविः । देवानां तर्पकं हुतरसहविः । 'हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा' । सदसद्व्यक्तिहेतूनां सतां सहृदयानां हृदयमग्निवत्काव्यसुवर्णस्य शुद्धिपरीक्षकम्, तद्वोक्तृ च ।

रसरूपं रसिकविद्वदुद्देश्यं हविः वहति तापयति सत्काव्यम् । पठितॄन्, श्रोतॄन्, रससागरे अवगाहयति । आचन्द्रार्कं स्थायि रामायणं भारतं च तत्प्रणेतृकवियशश्च । चन्द्रसूर्यवंशप्रशस्तिवर्णके ते काव्ये, स्वप्रभया विश्वभासके विश्वतोनिरासके, दिगन्तेषु सर्वश्रुतिषु व्याप्ते, श्रुत्युपबृंहणार्थाय गीते । सर्वकाव्यानां प्रजाभूकवीनां च प्रकृतिभूते इति सर्वभूतप्रकृतित्वं तयोः । भूतानि कवयः । 'परं कवीनामाधारम्' । इतिहासद्वयरूपैः प्राणिनां रसिकानां जीवनमुज्जीवनं च । 'प्रातर्द्यूतप्रसङ्गेन मध्याह्ने स्त्रीप्रसङ्गतः । रात्रौ चोरप्रसङ्गेन कालो गच्छति धीमताम् ॥' इति वचनं स्मर्तव्यम् । 'श्लोक एको विधातव्यश्चन्द्रनामाङ्क एव सः । नान्दीश्लोके तथा यत्नः कर्तव्यः कविभिः सदा ॥ यथैव चन्द्रनामाङ्को लक्ष्यते व्यज्यतेऽथवा । चन्द्रायत्ततया नाट्यप्रवृत्तरससंपदाम् ॥' चन्द्रवंशललाममूतो राजा अत्र नायकः । भारतमस्य नाटकवस्तुनो मूलम् । 'महाभारतचन्द्रमाः' इति महाभारतं चन्द्रत्वेन रूपितम् । अत्र 'प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहिता महीयसाम्' इति नाटकान्तभरतवाक्ये श्रुतिमहिता महीयसां सरस्वतीति पुण्यां वेदैश्च संमितां व्यासप्राचेतससरस्वतीं तुष्टाव कविः । सा महितकविसरस्वती अत्र नाटकोपक्रमे नान्दीश्लोके 'या या' इति सविस्मयं सानन्दं स्मारं स्मारमभ्यस्यते । 'मच्छन्दादेव ते ब्रह्मन् प्रवृत्तेयं सरस्वती' इति सरस्वतीजानिप्रयुक्तरामायणश्लोकपदानुसारः कृतः कविना 'सरस्वती प्रवर्तताम्' इति भरतवाक्ये । महीयसां प्राचां सरस्वतीव स्वनाटकसरस्वत्यपि प्रवर्ततामिति तत्र कविमनोरथः । नाटकान्तिमश्लोके दृश्यमानो व्यासवाल्मीक्योर्महितसरस्वतीप्रस्तावो नान्दीश्लोकेऽपि तस्य कविबुद्धिस्थत्वं द्रढयति, उपक्रमोपसंहारयोराभिरूप्यौचित्यात् । इयमेव रीतिरन्वस्मियत उत्तरचरिते, यत्र 'इदं गुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे' इत्यादिकाव्यगुरवे नमोवाकमाकलय्य तद्वाकसदृक्षवाचं विन्देमेति नान्दीश्लोके आशास्य, 'शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम्' इत्यादिकाव्यप्रशंसयैव नाटकमुपसंजहार कविर्भवभूतिः । अत्रान्तिमाङ्के 'वल्मीकार्धनिमग्नमूर्तिः' इति स्पष्टं वाल्मीकेः कविबुद्धिसंनिहितत्वं प्रदर्श्यते । अभ्यर्कबिम्बं स्थितो वाल्मीकिः सूर्यवंशकथागानाभिमुखः ॥

अथ नायकनायकीनाटकपरयोजनासूचनानि परामृशामः । या स्रष्टुः सृष्टिराद्येति स्त्रीरत्नसृष्टिभूतशकुन्तलाबोधनम्, काव्यरत्नसृष्टिरूपशाकुन्तलनाटकबोधनं च सुगमम् । अप्सरःसंभवत्वेन शकुन्तलाया बोधनं च स्पष्टम् । 'वहति विधिहुतं या हविः' 'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति छन्दोगानां कविबुद्धिस्थम् । भारतचक्रवर्तिभरतसंभवप्रदर्शनं नाटकप्रयोजनेष्वेकम् । प्रत्यङ्गं भरतजनिर्भावित्वेन वा भूतत्वेन वा प्रस्तूयते । 'योषिद्वा गौतम अग्निः' । विवाहविधिनैव राज्ञा संगमं रोचयामास शकुन्तला । 'वैवाहिकीं क्रियां सन्तः प्रशंसन्ति प्रजाहिताम् । लोकापवादशान्त्यर्थं विवाहं विधिना कुरु ॥' इति शकुन्तलावचनं भारते ।

'जग्राह विधिवत्पाणिमुवाच च तया सह' इति च तत्र विधिना विवाह ऊचे। 'गान्धर्वेण विवाहेन बह्वयो राजर्षिकन्यकाः। श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः॥' इत्यत्र नाटके गान्धर्वरूपविधिना परिणय उक्तः। 'विधिहुतम्'; कामभावमधःकृत्य धर्मप्रजार्थत्वबुद्ध्या श्रद्धया हुतम्। 'दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः। अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव॥' इति छन्दोवती वाग्शरीरिणी प्रवदते कण्वं प्रति। 'या च होत्री'। भर्त्रा सह इयं चिराय चतुरन्तमहीपपत्नीभूत्वा सुबहून्यज्ञानाजहार। भूयोऽस्मिन्नाटके यज्ञयजनसम्बन्धः। पतिपत्न्योः परम्परानन्यत्वं लोकवेदसिद्धम्। 'सहत्वं सर्वकर्मसु' इति लोकवेदप्रसिद्धो न्यायः। संनियोगशिष्टन्यायश्च स्मर्तव्यः। 'या च होत्री' इत्युभयोरपि ग्रहणं सुकरम्। अत्र दम्पतिकर्तृकयज्ञप्रस्तावेनोपक्रम्य नाटकान्ते 'त्वमपि विततयज्ञः स्वर्गिणो भावयालम्' इति काश्यपाश्रमे संयोजितदम्पत्योः सततयज्ञप्रवर्तनानुशासनेनोपसंहृतम्। 'या च होत्री' इति पतिकर्तृकगर्भाधानमपि गृह्येत। 'ये द्वे कालं विधत्तः'; चन्द्रवज्जगत्प्रह्लादकः, तपनवत्प्रतापवांश्च राजा। 'भास्करेण प्रभा यथा' 'ज्योत्स्नेव शशिदीधितेः' इतिवन्नभोभूता तदनन्या शकुन्तला। प्रभाप्रभावतोरनन्यत्वं प्रसिद्धम्। 'राजा कालस्य कारणम्' इति भारते स्मर्यते। राजवत्तन्महिष्यपि कालविधात्री स्यात्। इत्थं च 'ये द्वे कालं विधत्तः' इत्यनेन नायकनायिकयोर्ग्रहणं सुकरम्। 'श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्'; भरतचक्रवर्तिमातृत्वेन, दुष्यन्तपत्नीत्वेन, कालिदासनाटकनायिकात्वेन च शकुन्तला तद्विषयेयं कृतिश्च विश्वप्रसिद्धे। पाश्चात्यदेशेष्वपि सुप्रसिद्धे। 'यामाहुः सर्वभूतप्रकृतिरिति।' राज्ञीत्वेन सर्वप्रजानां मातेव शकुन्तला, यथा तस्या भर्ता राजा प्रजानां पितेवाभूत्। 'यया प्राणिनः प्राणवन्तः'। वात्सल्यनिर्भरा शकुन्तला मातृवत् प्रजानां प्राणाः। 'आत्मैव दाराः सर्वेषाम्' इति रामायणे वसिष्ठवचनम्। शाकुन्तलरूपकृतिविषयेऽपि सप्तापि विशेषणवाक्यानि रामायणमहाभारतकृतिविषय इव संयोज्यानि॥

यद्यपि भविष्यद्दीर्घविरहस्यावकाशदानाय नान्दीश्लोके उमामूर्तिं निर्दिदिक्षोः, देवीवत्सः कालिदासः स्वप्रियमातरं न विस्मर्तुं प्रभवेत्। नान्दीश्लोकं पठित्वा, अनुपदमेव 'आर्ये' इति परोक्षेणापि सूत्रकारमुखेन देवीं मातरं संबोधयतीव कविर्नाटकारम्भे वाग्भिक्षाप्रार्थनाय। 'आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा'। 'आर्ये' इति देव्याह्वयनेन प्रस्तावनामुपक्रममाणः 'आर्ये तवास्मि' इति देव्यै स्वदास्यनिवेदनेन प्रस्तावनामुपसंहरति कालिदासः कविरिति नैपुण्यमवधेयं रसिकलोकानुभाव्यं च। मालविकाग्निमित्रीयान्ते भरतवाक्ये 'त्वं मे प्रसादसुमुखी भव देवि नित्यम्' इति कविर्देवीं मातरं गूढं गाढं प्रार्थयामासेव। सप्तमाङ्के दाक्षायणीनामकीर्तनम्, तत्पात्रप्रवेशः तन्मुखेन, आशिषामनुग्रहश्च जाघट्यते। शक्तिरिति तन्नामनिर्देशपूर्वकं तत्प्रार्थनया नाटकमुपसंहियते॥

अभिरूपभूयिष्ठा परिषदियम् । अभिरूपभूयिष्ठा परिषदभिरूपभूयिष्ठेन नाटकेनाराधनीया। यादृशी परिषत्तादृश्या तदाराधककृत्या भवितव्यम् । अभिरूपशब्दो बुधे मनोज्ञे च पठितः । मनोज्ञभूयिष्ठेन नवेन कालिदासीयेन नाटकेन आराधनीया विद्वद्भूयिष्ठा परिषत् । बुधपरिषन्मनोज्ञमिदं नाटकं भूयादिति मनोरथः । 'उपन्थातव्यम्' इति परिषद्भटकविद्वत्सु देवत्वबुद्धिः, नाटकनाटेनन तत्पूजाभनोरथश्च व्यज्यते । रङ्गमाराधयामः इत्यत्रार्थं भावः सूच्यते । 'देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषम्' इति नाट्यादेर्देवाराधकचाक्षुषक्रतुत्वं निरूपितमनेन कविना नाट्योपाध्यायगणदासंज्ञुस्तेन । भूमिदेवा विद्वांसोऽस्य नाटकक्रतोर्द्रष्टारो भावुकाः । 'एतदेवामुं दृष्ट्वा तृप्यन्ति' इति दर्शनमात्रेण तर्प्यमाणत्वं देवस्वभावः । एतन्नाटकप्रयोगे क्रतुत्वबुद्धिर्व्यज्यते कविना— 'सुविहितप्रयोगतया आर्यस्य न किमपि परिहापयिष्यते' इत्यनन्तरवाक्यवचनेन । प्रयोगशब्दः क्रतुप्रयोगे, नाटकप्रयोगे कविकर्तृकशब्दार्थालंकारध्वन्यादिशब्दप्रयोगे च सुश्लिष्टः; त्रयोऽप्यर्थाः अत्र कविबुद्धिस्थाः । 'प्रयोगश्चित्रोऽयं भवरसभुजामप्यभिमतः' 'प्रस्तोष्यन्त्यवधिं प्रयोगपदवीसारस्यसारस्य नः' इति प्रयुज्यमाननाटके प्रयोगशब्दः प्रायोजि संकल्पसूर्योदये । अत्राप्यनुपदमेव वक्ति सूत्रधारः 'कृतमं प्रयोगमाश्रित्य' इति । प्रयोगविधिः कृत्स्नाङ्गविशिष्टाङ्गिक्रतुविधायको विधिः । 'तत्र कर्मणि विपर्यणीनमन्मन्त्रमूहकुशलाः प्रयोगिणः' इति माघः । 'क्षणक्षयितविबुद्धाः कल्पयन्तः प्रयोगानुदधिमहति राज्ये काव्यतन्त्रे दुर्विगाहे । गहनमपररात्रप्राप्तबुद्धिप्रसादाः कवय इव महीपाश्चिन्तयन्त्यर्थजातम्' इति माघे । 'प्रयोगानर्थगुणसाधुशब्दगुम्फान्, वाच्यलक्ष्यव्यङ्ग्यरूपमभिधेयजातं तर्कयन्तः विचारयन्तः' इति श्रीमल्लिनाथसूरिव्याख्या। 'चिन्तासु संवर्गविशेषलाभे संदर्भणे चाथ पदैः पदानाम् । पुनर्विमर्शे च भवन्कवीनामानन्दसीमा वचसामभूमा' इति श्रीमन्नीलकण्ठदीक्षिताः शिवलीलार्णवे सुविहितप्रयोगस्फुरणे निरतिशयानन्दो भवति कवयितुरिति स्वानुभवमावेदयन् । अत्र नाटकारम्भ एव आदिकाव्यगुरुं वाल्मीकिं रामायणं च कविः स्मरति, स्मारयति चास्मान्। बालकाण्डे अश्वमेधसर्गे 'यथा सर्वं सुविहितं न किंचित्परिहीयते,' 'यथोक्तं तत्सुविहितं न किंचित्परिहीयते', 'यथोक्तं तत्करिष्यामो न किंचित्परिहास्यते' इति त्रिरभ्यस्तानां शब्दानां प्रायेणेहानुकरणं पश्यामः । उपगतसमाससंधियोगसममधुरोपनतार्थवाक्यबद्धरामायणवत् परिहीणलेशरहितसुविहितप्रयोगैकान्तता आशास्यते कविना स्वनाटककृतेः । अश्वमेधसर्गे आदिकविरपि काव्यारम्भे स्वकाव्यस्य परिहीणलेशराहित्येन सुविहितप्रयोगैकान्तवचां आशशासेव पुनः पुनरित्थं पठनेन । रामायणकविहृदयस्थोऽयं भावविशेष आवेद्यतेऽस्माकमनेन महाकविना व्यञ्जनावृत्त्या आदिकाव्यपठितशब्दानेव स्वनाटकप्रस्तावनायां प्रयुञ्जानेन । शान्तिः शान्तिः शान्तिः इतिवत् त्रिः विघ्नाभावसहितमङ्गलसिद्धयाशासनपाठोऽकारि कल्याणबुद्धिना महर्षिणा रामजनिप्रबोधकाश्वमेधकर्तारमिव रामायणकाव्यजनुष्यपि । रामयशःशरीरं खलु रामायणम् ॥

(क्रमशः)

परम् । वर्णाश्रमादिनिष्ठानां मायया प्रकल्पितम् । विधयश्च निषेधाश्च श्रुतिस्मृत्यादिरूपिणः । मायया देवदेवस्य सत्यवत्परिकल्पितः । धर्माधर्मौ तयोर्विप्राः फले तत्साधनान्यपि । कल्पितानि महामोहाद्ब्रह्मणो न स्वभावतः । रागद्वेषादयो दोषाः शान्तिदान्त्यादयो गुणाः । वैदिकास्तान्त्रिकाकारा अपभ्रंशास्तथैव च । स्वतन्त्रस्याम्बिकाभर्तुर्मायया प्रकल्पिताः । यद्यदस्तितया भाति यद्यन्नास्तितया तथा । तत्तत्सर्वं महादेवे मायया परिकल्पितम् । इति सर्वं मुनीन्द्राणां मायासंकल्पकल्पितम् । सूतपुत्रोऽभिधायेदं शिवाभिन्नतया जगत् । शंभोः सामर्थ्यसंपत्तिं जगदे शक्तिकल्पिताम् । चिन्मात्राश्रयमायायाः शक्त्याकारे द्विजोत्तमाः । अनुप्रविष्टा या साऽपि निर्विकल्पा स्वयंप्रभा । सदाकारा सदानन्दा संसारच्छेदकारिणी । सा शिवा परमा देवी शिवाभिन्ना शिवंकरी । जगत्कारणतापन्नः शिवोऽयं मुनिसत्तमाः । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । सर्वज्ञत्वं गतो यस्तु शिवः साक्षादुपाधिना । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । ईशितृत्वं तथा यस्तु शिवः साक्षादुपाधिना । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । यस्तु रुद्रत्वमापन्नः शिवः साक्षादुपाधिना । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । यस्तु विष्णुत्वमापन्नः शिवः साक्षादुपाधिना । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । यस्तु ब्रह्मत्वमापन्नः शिवः साक्षादुपाधिना । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । सदाशिवत्वमापन्नः शिवः साक्षादुपाधिना । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । ईश्वरत्वं गतो यस्तु शिवः साक्षादुपाधिना । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । हिरण्यगर्भत्वं यस्तु शिवः साक्षादुपाधिना । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । सूत्रात्मत्वं गतो यस्तु शिवः साक्षादुपाधिना । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । विराड्रूपं स्वराड्रूपं शिवः साक्षादुपाधिना । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । सम्राड्रूपं गतो यस्तु शिवः साक्षादुपाधिना । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । इन्द्रादिलोकपालानां रूपं यः प्राप्तवान्शिवः । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । देवादीनां गतो यस्तु रूपं शंभुरुपाधिना । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । मनुष्यत्वं तिर्यगादिस्थावरौषधिरूपताम् । वनस्पतीनां रूपत्वं भक्ष्यभोज्यादिरूपताम् । नदीनदसमुद्रादिक्ष्माभृद्विद्युत्स्वरूपताम् । सर्वाकारं गतो यस्तु शिवः साक्षादुपाधिना । सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः । एषा सा साक्षिणी शक्तिः शंकरस्यापि शंकरी । शिवाभिन्ना तया हीनः शिवः साक्षान्निरर्थकः । न शिवेन विना शक्तिर्न शक्तिरहितः शिवः । उमाशंकरयोरैक्यं यः पश्यति स पश्यति । उमाशंकरयोर्भेदं ये पश्यन्ति नराधमाः । अधोमुखोर्ध्वपादास्ते यास्यन्ति नरकार्णवम् । यथा मातापितृभ्यां तु वर्धन्ते मानवा भुवि । तथैवाभ्यामिदं कृत्स्नं वर्धते नात्र संशयः । पञ्चधाऽवस्थितिः शंभोरीशानादिप्रभेदतः । देव्याः शक्तेः प्रभावेणेत्येवं सूतो मुनीञ्जगौ । अर्थोऽयमेवागमेषु चतुःशत्यामपि श्रुतः । परोऽपि शक्तिरहितः शक्तः कर्तुं न किंचन । शक्तः स्यात्परमेशानि शक्त्या युक्तो भवेद्यदि । परमादिशिवाचार्यैः सिद्धान्ते त्रैपुरे तथा । निरूपितोऽयमेवार्थः सकलागमनिश्चितः । एक एव जगत्स्वामी देवः परशिवः स्वयम् । निर्गुणो निष्कलो नित्यः शुद्धो बुद्धो महेश्वरः । तस्य शक्तिरियं साक्षाच्छक्तिः श्रीशांभवी स्मृता । त्रिपुरा नाम विज्ञेया तदभिन्ना जगन्मयी । सैव त्रिजगतां माता देवदेवी महेश्वरी । देवदेवी महा-

शक्तिरियं सर्वार्थसिद्धिदा । ललिता श्रीमहादेवी महात्रिपुरसुन्दरी । पितामहमहेशाद्या अस्याः पुत्रा वरानने । अनयैव पुरा प्राप्ता ब्रह्मणा सृष्टिकर्तृता । विष्णुः पालनकर्तृत्वं प्राप्तवानेतया शिवः । पुरा देवीमिमां नित्यां संपूज्य त्रिपुरेश्वरीम् । प्राप्ताः परार्धमिष्टार्थान्ब्रह्मविष्णुशिवादयः । त्रिपुरोपासनाद्दिव्यं शक्तपालुब्धजे क्षमाः । सिद्धलक्ष्मीर्महालक्ष्मीरादिलक्ष्मीरियं शिवा । महानित्या महासिद्धा देवीयं सर्वकामदुक् । वागीश्वरी महालक्ष्मीर्दुर्गा श्रीपार्वती तथा । संज्ञाः शच्यादयो देव्याः पुण्यश्लोक्या वरानने । निर्मला निष्कला नित्या सत्यानन्दा निरञ्जना । निराधारा निर्गुणेयं महात्रिपुरसुन्दरी । अस्या उपासका ये तु त एव भुवि दुर्लभाः । एतां देवीमिमां व्याख्यां प्राहुरत्रयन्तवेदिनः । कविलो मानवान्प्राह एतां प्रकृतिमीश्वरीम् । आहुः श्रीपार्वतीं देवीं शैवभक्ता वरानने । आहुरेनां महालक्ष्मीं नारायणपरायणाः । आहुरेनां महावाणीं भक्ता ब्रह्मणि मानवाः । दुर्गामाहुरिमां देवीं केचित्कालीं महेश्वरीम् । प्राहुः श्रीभैरवीं केचिद्भद्रकालीमथापरे । शिवशक्तिस्वरूपेयं महात्रिपुरसुन्दरी । साक्षात्कामदुघा नृणां ज्ञानदा मुक्तिदायिनी । सत्यं सत्यं पुनः सत्यं विद्यते नात्र संशयः । एवं बृहन्नारदीये पुराणे विनिरूपितम् । यथा हरौ जगद्व्यापी तस्य शक्तिस्तथा मुने । देहशक्तिर्यथाऽङ्गानि स्वाश्रयं व्याप्य तिष्ठति । उमेति केचिदाहुस्तां शक्तिं लक्ष्मीति चापरे । भारतीत्यपरे चैनां गिरिजेत्यब्धिजेति च । दुर्गेति भद्रकालीति चण्डा माहेश्वरीति च । कौमारी वैष्णवी देवी केचिदैन्द्रीति चापरे । ब्राह्मीति विद्याऽविद्येति मायेति च तथापरे । प्रकृतिश्च परा चेति वदन्ति परमर्षयः । सर्वत्र शक्तिरूपेण देव्येकैव प्रवर्तते । इत्येवं भगवत्पादैरम्बास्तोत्रे प्रपञ्चितम्— 'त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं त्वं चेतनाऽसि पुरुषे पवने बलं त्वम् । त्वं स्वादुताऽसि सलिले शिखिनि त्वमूष्मा निःसारमेतदखिलं त्वदृते यदि स्यात् ॥ ज्योतींषि यद्दिवि चरन्ति यदन्तरिक्षं सूते पयांसि यदहर्धरणीं बिभर्ति । यद्वाति वायुरनलो यदुदर्चिरास्ते तत्सर्वमम्ब तव केवलमाज्ञयैव ॥ ' अयमर्थस्तथा देवीमाहात्म्येऽपि प्रपञ्चितः । आचार्याणां मतं चैतच्छिवः शक्त्येति वादिनाम् । संमतः परमार्थोऽयं पुराणागमदृश्वनाम् । उपास्तेः फलदातृत्वं तस्याः सूतेन भाषितम् । उपासते ये परमां सर्वलोकैकमातरम् । तेऽभीष्टं सकलं यान्ति विद्यां मुक्तिप्रदामपि । पार्वती परमा देवी ब्रह्मविद्याप्रदायिनी । विशेषेणैव जन्तूनां नात्र संदेहकारणम् । लक्ष्मीरागादिरूपैषा शिवा खलु मुनीश्वराः । मर्तैकीव तया सर्वमचिरादेव सिध्यति । अस्या एव प्रसादेन ब्रह्मेन्द्रादिविभूतयः । अनया रहितं सर्वमसदेव न तद्भवेत् । एतामेव समाराध्य श्रद्धया सद्द्विजातयः । लभन्ते काङ्क्षितं सर्वं नान्यथा मुनिपुंगवाः । शैवा भागवतास्तेषामुपभेदावलम्बिनः । अस्या आराधनेनैव लभन्तेऽभीप्सितं फलम् । दिगम्बरास्तथा बौद्धा अपभ्रंशावलम्बिनः । अस्या आराधनेनैव लभन्तेऽभीप्सितं फलम् । यथा तथा शिवामेकां यो वा को वाऽऽदरेण तु । आराधयति सोऽभीष्टं लभते फलमास्तिकाः । करुणासागरामेनां यः पूजयति शांकरीम् । किं न सिध्यति तस्येष्टं तस्या एव प्रसादतः । आगमेष्वयमेवार्थो बहुधा प्रकटीकृतः । कामेश्वर्याः प्रसादेन भुक्तिं मुक्तिं च विन्दति । यत्रास्ति भोगो न हि तत्र मोक्षो यत्रास्ति मोक्षो न हि तत्र भोगः । शिवापदाम्भोजयुगार्चकानां भुक्तिश्च मुक्तिश्च करस्थितैव । निगमागमसंसिद्धं देवीचरणपूजनम् । प्रतिपादयतामेतदाचार्याणां च संमतम् । किं च, आब्रह्मस्तम्बपर्यन्तं शक्तिराक्रम्य तिष्ठति । शक्त्या विरहितं चैतत्स्थितिं न लभते जगत् । तथा सार्वात्म्यमस्याश्च

मार्कण्डेयेन भाषितम् । शक्तिसंपूरितं यस्मात्तस्माच्छक्तिमयं जगत् । निर्णीय निखिलं तत्त्वं निगमागमतोपितम् । सर्वज्ञाचार्यचरणाः शक्तिं स्तोतुं समुद्यताः ॥ अत्र तत्रभवन्तः संततसमुन्मिषितनिरतिशयकविताचातुरीधुरीणावतंसन्तः समस्तनिगमागमानिकुरुम्बक्षीरनीरानिधिनितान्तनिर्मथननिर्णीतनिखिललेखलोकतत्त्वप्रकाशनभज्जज्जनतमोऽन्धितस्वान्तसारसविकसनविश्वस्वन्तः सकललोकनिर्मोणभरणहरणादिकारणसच्चिदानन्दस्वरूपपरमहेश्वरावतरन्तः सुदुस्तरापारसंसारसागरमग्नोन्मग्नदीनजनावनदीक्षितवीक्षावन्तो भगवन्तो भगवत्पादाचार्यास्तत्रभवतीं विचित्रविविधविश्वपपरिणमनातिकौशलवतीं भजज्जनव्यसनसमुत्तारणकारणवतीमिन्द्रोपेन्द्रचन्द्रादिवृन्दारकवृन्दवन्दितपादारविन्दद्वयां खिलवेदवृन्दसानन्दसंप्रतिपादितस्वचरितार्णवाकर्णनपरिपूर्णकर्णानां सम्यगाभिधानां हेलालास्यलालितचतुःषष्टिकलां चन्द्रकलां हैमवतीमुमां समस्ततन्त्रसंपर्शिनी, 'चतुर्वर्गफलायत्तं चतुर्वेदात्तनायकम् । काव्यं कल्पान्तरस्थायि कल्पतेऽनल्पभूतये । किं बहुना ? चतुर्वर्गचिन्तामणिरियं कविता नाम, तस्मात्कर्तव्यं श्रोतव्यं व्याख्यातव्यं च' इत्याद्यभियुक्तोक्तेश्चतुर्विधपुरुषार्थनसार्थवाहेन, 'रसो वै सः' इति श्रुतिप्रतिपाद्यसर्वरसभावात्मकतया निर्भरानन्दप्रवाहिना, कटाक्षवीक्षणमन्दहासमधुरभाषणादिभिः कान्तमभिरञ्जयन्ती व्यञ्जनाव्यापारेणैव सर्वं कार्यं कारयन्ती कामिनीव व्यञ्जनाभिधानाभिधाव्यापारेणैव रामादिवद्वर्तितव्यं न रावणादिवदित्यादिहिताहितप्रवृत्तिनिवृत्तिनिष्पादकतया 'कृत्ये प्रयत्नं सरसं वितन्वन्वेदादिविद्या यदिहादिशेत । कुर्वंश्च दृष्टानि यशोमुखानि श्रेयांसि तार्तीक न करोति काव्यम् ॥' इति वचनाच्छब्दार्थप्रधानप्रभुसुहृत्संमितरूपोपदेशान्तरातिशयितमहिम्ना 'यत्र ब्रह्मरसास्वादः स्वयमेवानुभूयते । वाग्गुम्भे तादृशे तु स्यात्साधनी प्रीतिरुत्तमा ॥' इति वचनाद्रसिकजनाह्लादनचतुरेण श्रव्यप्रबन्धेन 'प्रतिभातिशयो यत्र कवितानर्तकीसखः । रसनारङ्गमासाद्य काव्यं नाटयतु स्फुटम् ॥ प्रतिभातिशयो नाम भूयसां तपसां फलम् । तथा तदनुरूपाणां तस्यापि प्रसरो गिराम् । तस्यापि काव्यरूपत्वमनवद्यं विभूषणम् । तादृशीं प्रतिभां प्राप्य कवयन्ति कवीश्वराः । तत्काव्यं नायकोत्कर्षाज्जयत्याचन्द्रतारकम् । अभव्यं भव्यतामेति काव्यं नायकसंपदा । ....इयामीभूतं रसश्रिया ॥' इत्यादिवचनप्राचुर्यादशेषकल्याणगुणवतीं भगवतीं हैमवतीमुदाहरणीकृत्य स्तुतिद्वारा निगमनिगूढं तत्तत्त्वं प्रकाशयितुमिच्छन्तः 'काव्यं यशसे' इत्याद्यालंकारिकवचनप्रामाण्यात्तस्य दृष्टादृष्टरूपकीर्त्याद्यशेषपुरुषार्थसाधनत्वम् 'काव्यालापांश्च वर्जयेत्' इति निषेधस्मृतेरनायकदुर्नायकघटितासत्काव्यविषयत्वं चाकलयन्तः 'आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्' इत्याचार्यदण्डिवचनादाशीराद्यन्यतमस्य प्रबन्धप्रारम्भोपयोगित्वमवगच्छन्तः प्रारिप्सितनिष्प्रत्यूहपरिसमाप्तिप्रचयगमने समाशासन्तः स्वप्रबन्धप्रधानप्रतिपाद्यम् 'यः शिवो नामरूपाभ्यां या देवी सर्वमङ्गला । तयोः संस्मरणात्पुंसां सर्वतो जयमङ्गलम् ॥' इत्यादिवचनान्नामस्वरूपाभ्यां सकलकल्याणात्मकमनुस्मरणमात्रसंपादितसमस्तमङ्गलं परमाशिवसंवलितं भक्तजनवत्सलं भगवतीरूपं वस्तु निर्दिशन्तः स्वस्य निरन्तरायं तदीयानन्तगुणगणमणिगणनासामर्थ्यमभ्यर्थयन्तः तदीश्वरीनिरतिशयप्रसादसमासादितस्वभाषितकार्तार्थ्यं प्रार्थयन्तस्तदभिमुखीकरणायादौ विशिष्टेष्टदेवतारूपतत्प्रसादमाशंसन्ते— शिव इत्यादि। वैशिष्ट्यं चेह देवतायाः सकलागमसंप्रतिपाद्यतया विष्ण्वादिसर्वदेवतोपास्यत्वात् । इष्टत्वं च कृत्स्नाभीप्सित-

प्रापणप्रवीणनिरीक्षणत्वात्, 'भयात्त्रातुं दातुं फलमपि च वाञ्छासमधिकं शरण्ये लोकानां तव हि चरणावेव निपुणौ' इति वक्ष्यमाणत्वात्। देवतात्वं च 'स तस्मिन्नाकाशे स्त्रियमाजगाम बहु शोभमानामुमां हैमवतीं तां होवाच' इत्यादिश्रुतिप्रसिद्धत्वात्, बाह्यान्तरपूज्यतयाऽरुणोपनिषत्प्रतिपाद्यत्वाच्च। प्रसादश्चाभिमतविषयप्रवणतैवेत्यवगन्तव्यम्। आशंसनमाशीरिच्छा। एतत्सर्वं च 'तमीश्वराणां परमं महेश्वरम्' इत्यादिश्रुतेरशेषभुवननिर्माणादिकारणब्रह्मादिनिदानस्यापीशानस्य परमेश्वरीसान्निध्ये सति जगन्निर्माणादिकार्यकरणकर्मण्यता, तद्भावे लौकिकलोकवदौदासीन्यं च प्रमाणप्रमाणीकरणार्थेन तर्केण प्रथमत एव प्रतिपादयद्भिः, तथा तत्तद्व्याख्यातृभिः स्वस्वमहिम्नैव सर्गादिकर्तृत्वेन प्राप्ताभिमतानां हरिहरब्रह्मादीनामपि परमेश्वरीमुपासकत्वं तत्प्रसादाद्वैभवत्वं चागमप्रसिद्धं प्रकटयद्भिः, तत्राप्यनेकजन्मजातसंजातसुकृतजातानां प्रणम्रस्तवनादिविधानसामर्थ्यं व्यतिरेकेण तद्भाक्तां तदसामर्थ्यं च निरूपयद्भिः, तद्द्वारा चात्मनोऽतिभक्त्या भगवतीमभिमुखयद्भिः, 'सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा' इति यदिष्यद्भिर्भगवत्पादैराविष्कृतमिति देवतायां भगवत्यां सर्वोत्कृष्टाभ्यर्हितः। अत्रादौ 'विद्यासु श्रुतिरुक्षा रुद्रैकादशिनी श्रुतौ। तत्र पञ्चाक्षरी तस्यां शिव इत्यक्षरद्वयम्॥' इत्यादिपुराणवचनावशेषविशेषशब्दविशिष्टस्य, 'शिवः शूली महेश्वरः' 'श्रेयसे शिवं भद्रम्,' 'शिव एको ध्येयः शिवंकरः,' 'शरा मोक्षार्थिभिः सर्वैः शिव एव शिवंकरः। ध्येयः सर्वं परित्यज्य शिवादन्यत्तु दैवतम्॥' इत्यादिकोशश्रुतिस्मृत्यादिप्रसिद्धदेवताकल्याणसमर्पणाधायिनोऽनन्तकल्याणगुणवचनस्य, 'शिवेति मङ्गलं नाम यस्य वाचि प्रवर्तते। भस्मीभवन्ति राजेन्द्र महापातककोटयः॥' इति वचनान्न अभिवदनमात्रेणैव समस्तदुरितविदारकस्य शिवशब्दस्य तथा च शं सुखं तनुते, 'ऊष्माणः सुखवदश्रीर्निर्वाणनिधयः क्रमात्' 'शो वल्मीके शिवे कूर्मे' इत्यादेश्छन्दःशासनकोशप्रसिद्धेः समग्रसौख्यप्रदानप्रख्यातस्य लक्ष्मीबीजस्य प्रबन्धप्रधानाभिधेयभगवतीप्रकाशकषोडशाक्षरीमन्त्रालंकारकरालाबीजप्रधानस्य स्मरणमात्राभिमतेष्टप्रदातुः प्रथमोष्मणः, तथा सुधाबीजत्वेन बहुकृतेष्टवर्षधुर्यतयाऽतिकृपालुवालविलोचनशैलभूपालबालालीलाविलासेन कालिदासेन कविकुलशिरोमणिना रघुवंशकाव्यमुखे 'वागर्थाविव' इति श्लोके प्रथमोपात्ततया, तथा भूवादिसूत्रे 'भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते' इत्यभिधाय 'माङ्गलिकाचार्यो मङ्गलार्थं मध्यतो वकारं प्रयुङ्क्ते' इत्युक्त्वा भगवद्भिर्भाष्यकृद्भिर्भाषितमङ्गलार्थत्वस्य वकारस्य च पाणिनिवह्निरीयतया निर्देशात्, तथा 'प्रकृत्या यगणो नित्यं श्रीकरः कथ्यते बुधैः। करोत्यर्थानादिलघुर्यगणो वारिदैवतः॥' 'यो वार्यादिलघुर्धीमान्' इत्यादिवचनैरमृतमयत्वेनाखिलमनोरथसंधानसमर्थतया 'यामिनीवेन्दुना मुक्ता नारीव रमणं विना। लक्ष्मीरिव ऋते त्यागान्न वाणी भाति नीरसा॥' इति वचनाद्विष्ण्वादिसर्वदेवतात्मकनवरसालंकारम् 'कृत्वा काव्यमजाप विश्वमहितां कीर्त्तिं कविग्रामणीः श्रीहर्षः श्रियमद्भुतां हरिहरो लोकोऽर्जुनक्ष्माभुजः। मृत्योरक्षरपाचकार मलयक्ष्मामण्डलाखण्डलस्तर्क्किचिन्न विलोक्यते न किल यत्काव्यास्समुन्मीलति॥' इत्यादिनाऽतिप्रशस्ततयाऽशेषकवीश्वरादृतं व्यञ्जनावृत्त्यैव धर्माधर्मप्रवर्तनानिवर्तनासाधारणकारणं काव्यप्रबन्धमेव सर्वनिबन्धनातिशयितं मन्वानेनादिकविना भगवता वल्मीकजन्मना महत्यादिकाव्यकवयितृसुचरितफले रामायणाभिधेये प्रबन्धे 'तपःस्वाध्यायनिरतम्' इति प्रथमादृतस्यातिसौम्यस्य यगणस्य चोपादाना-

देवतप्रबन्धाध्येतॄव्यापकपाठकानां समस्तसमीहितावाप्तिर्भवतीप्रसादान्निरन्तरायं भवतीति सूचितम्। वर्णगणाद्यशेषदोषदूषणनिपुणयोर्देवतामङ्गलाभिधानयोः कृत्स्नार्थोपष्टम्भप्रवीणता कियती वक्तव्या? न हि समूलघातं घातुकान्निहत्यातिरिक्तजलायुष्कर्मठस्य प्रभोस्तत्संस्मरणमात्रेणैव दुर्जनपलायने जाते तस्याश्रितसज्जनपरिपालनदार्ढ्यमसङ्गतं वक्तव्यम्। यदाहुः 'मङ्गलार्थाभिधाने च देवनामाङ्कनेऽपि वा। गणो न दुष्यो वर्णश्च देवताधिष्ठिताश्रयात्॥' 'भद्रादिवाचकं यद्भवति पदं यच्च देवतावाचि। तदनिन्द्यमाहुरार्याः काव्यादौ वर्णतोऽपि गणतोऽपि॥' इति। आहुश्च भाष्यकाराः 'सिद्धे शब्दार्थसंबन्धे' इत्यत्र सिद्धपदव्याख्यानावसरे—'माङ्गलिक आचार्यो मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युः' इति। प्रसादकृतोऽप्याहुः 'आदौ मङ्गलार्थे शब्दे प्रयोज्ये श्रीशब्दप्रयोगोऽध्येतॄणां लक्ष्मीसौभाग्यादि भूयादित्येवमर्थम्' इति। शिवशब्दोऽयमपि सिद्धयादिसङ्गलशब्देषु लक्षणदीपिकायां परिगणितो द्रष्टव्यः। न च श्लोकशतनिबद्धस्य ग्रन्थस्याकाव्यरूपत्वात्काव्यादौ कर्तव्येयं वर्णगणादिमीमांसा नात्रोपकृष्यत इति वाच्यम्। 'व्यङ्ग्यप्रधानमुत्तमं काव्यम्,' 'अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यम्,' 'शाणोल्लीढमिव ज्वलद्द्युति पदं बन्धोऽर्धनारीश्वरश्लाघालङ्घनजाङ्घिको दिवि लतोड्डिन्येव चार्थोद्गतिः। किंचिच्चूर्णितचन्द्रमण्डलगलत्पीयूषबिन्दुह्रदो रसस्तत्किंचित्काविकर्ममर्म न पुनर्वाग्विडम्बाडम्बरः॥' इत्यादिकाव्यलक्षणलक्षितत्वेनाप्यस्य रामायणादेरिव काव्यशब्दभाजनत्वोपपत्तेः, व्यङ्ग्यप्रधानतयोत्तमकाव्योक्तियोग्यतावगतेश्च। न हि सर्गनिबन्धनाभावोऽकाव्यताप्रयोजकः, 'अस्मन्निबन्धनं सूर्यशतकादिकमपि काव्यमेव' इति विद्यानाथोक्तिव्याघातापत्तेः, सूर्यशतककर्तुर्मयूरकवेः काव्यकर्तृषु श्रीहर्षादिषु 'काव्यं यशसे—' इत्यादिश्लोकतात्पर्यविवरणार्थोपपत्तेषु परिगणनाविधायककाव्यप्रकाशकारोक्तिविरोधापत्तेश्च। वस्तुतस्तत्तानन्दलहरी सौन्दर्यलहरीति व्यवहारेण, एतत्प्रबन्धव्याख्यात्रा लक्ष्मीधरेण तत्र तत्र 'अहः सूते सख्यम्—' इत्यादिश्लोकेषूत्तमं काव्यमित्येव कथनेन, अपरेण व्याख्यात्रा रामकविनोन्मीलनादिपरिच्छेदभेदोक्त्या चेदं मेघसंदेशवत्काव्यं भवितुमर्हत्येव। किं चास्य काव्यरूपता 'कवीनां संदर्भस्तवकमकरन्दैकरसिकम्' 'शिवे शृङ्गारार्द्रा' इत्यादेर्या देव्या नवरसात्मककाव्यप्रबन्धार्पणौत्सुक्यं वर्णयतां 'शरज्ज्योत्स्ना—' इत्यादिश्लोकत्रयेण भगवत्यनुग्रहात्काव्यकर्तृत्वं कथयताम् 'दयावत्या दत्तं द्रविडशिशुरास्वाद्य तव यत्कवीनां प्रौढानामजनि कमनीयः कवयिता' इति वदिष्यतामाचार्याणां संमतैवेति दिक्। ननु प्रबन्धप्रधानफलभाजो नायकस्यात्रानधिकृतत्वान्नेदं काव्यमित्यवसीयत इति वक्तुं न युक्तम्, सकलजगत्कारणभूतायाः हरिहरादिसर्वदेवतोपासितायाः भगवत्या एवात्र नायिकात्वेनाभिमतत्वात्। न च लोके स्त्रीनायककाव्यानुपलब्धिः, रामायणस्यैवोपलब्धत्वात्। रामायणे हि 'काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्' इति वदतो मुनेः सीताया एव नायिकात्वेनाभिमतत्वात्। आहुश्च तद्व्याख्यातारः 'सीतायाश्चरितमित्यनेन तस्याः प्रबन्धनायिकात्वं सूचितम्; तेन प्रबन्धस्य लक्ष्मीप्राधान्यं द्योतितम्; तस्यैवोपपादकं रामायणमिति कृत्स्नस्य सीतायाश्चरितत्वेऽपि रामायणव्यपदेशो रामचरितस्य तदुपयुक्तत्वज्ञापनार्थः' इति॥


अत्र भगवतिपदं देवतासंमुखीकरणार्थमध्याहर्तव्यमिति लक्ष्मीधरः । तदसारम्, आचार्यप्रबन्धं व्याख्यातुमुद्युञ्जतः प्रथमत एव तत्र दोषोद्भाटनरूपस्वातिजघन्यस्याश्रुतपदानुसंधानलक्षणस्याध्याहारस्य कल्पनानर्हत्वात्, शिवः शक्त्येत्यादिवाक्यस्य संबुद्ध्यपेक्षां विनैव परिपूर्णतयाऽपरिपूर्णतावस्थालक्षणाशङ्काध्याहारस्य प्रवेशाभावाच्च । न च 'स च यत्र क्वचिदवास्थितस्याप्यविरुद्धः' इति शाङ्करदीपिकायामुक्तत्वाद्व्यपेतवाक्यश्रुतपदानयनरूपस्य तस्य प्रवेशः संभवत्येव, यथा विश्वजिद्याये फलसंबन्धविधातरि ज्योतिष्टोमवाक्यश्रुतस्वर्गकामपदाध्याहारस्तद्वदिति वाच्यम्, अस्यैव प्रथमश्लोकादेव देवीसंबुद्ध्यन्तवतां पूर्वतरश्लोकान्तरगतानामवावाप्तसमवकाशात्, तत्कल्पनाप्रयोजनाभावाच्च । न च संमुखीकरणमेव तत्प्रयोजनम्, तस्य चानुपयुक्तत्वमिति वक्ष्यमाणत्वात्, संबोधनप्रधानस्य युष्मच्छब्दस्यात्र प्रयोगाभावेन तत्कल्पनानवकाशाच्च । न चोत्तरवाक्ये तत्प्रयोगोऽस्तीति वाच्यम्, पूर्ववाक्ये संबोधनमपहायान्यत्र तत्कल्पने वाक्ययोरसांगत्यप्रतीतेः । न च यथा 'अथातो धर्मजिज्ञासा,' 'अथातो ब्रह्मजिज्ञासा' इत्यादौ पार्थक्यिकसूत्रान्तराभावेऽप्यश्रुतपदानुसंधानरूपकर्तव्यपदाध्याहारो भाष्यकारादिभिरङ्गीकृतः, तद्वदत्रापि भविष्यतीति वाच्यम्, सूत्राणां श्रुत्यनुगृहीतन्यायरूपत्वेन तत्र तव्यप्रत्ययान्ताध्ययनश्रवणविधिगर्भस्थस्यैव कर्तव्यपदस्य तयोरैकार्थ्यावगमायाध्याहारोऽङ्गीकृतः । तदुक्तं विवरणाचार्यैः 'मूलमूलिनोः समानार्थकत्वाय कर्तव्यपदमध्याहर्तव्यम्' इति । अन्यत्राप्युक्तम् 'अध्ययनश्रवणविधिसामानार्थकत्वाय कर्तव्यमिति पदमध्याहर्तव्यम्; अध्याहृतं च भाष्यकृता 'धर्मजिज्ञासा कर्तव्या' 'ब्रह्मजिज्ञासा कर्तव्या' इति; तथा च धर्मब्रह्मणोर्ज्ञानाय विचारः कर्तव्य इति सूत्रयोः श्रौतार्थः संपद्यते' इति । प्रकृते च भगवतिपदाध्याहारमूलवचनान्तरानुपलम्भात् । न च 'परोऽपि शक्तिरहित शक्तः कर्तुं न किंचन । शक्तः स्यात्परमेशानि शक्त्या युक्तो भवेद्यदि ॥' इति चतुःशतीयवचनस्यैवैतच्छ्लोकप्रणयनमूलत्वेनात्यमहेशानिपदापरपर्यायभगवतिपदाध्याहरणं साध्येवेति वाच्यम्, 'सत्यज्ञानमयी साक्षात्परब्रह्मस्वरूपिणी । ब्रह्मविष्णुमहादेवा अस्याः पुत्रा वरानने ॥ चतुर्थोऽहं महेशानि सुतस्तस्या महेश्वरि । तस्याः पतिर्ब्रह्मरूपी स्वयं साक्षात्सदाशिवः । सैव साक्षाज्जगद्धात्री सैव विश्वेश्वरेश्वरी ॥' इति दक्षिणामूर्तिसंहितोक्तेः स्वजायां महेश्वरीं प्रति स्वपितृशिवसामर्थ्यप्रकटना महेशानेन; तत्र पारोक्ष्योक्तिरूपत्वेनात्र तन्मूलताकल्पने पारोक्ष्योक्तिप्रसङ्गनात् । न चेष्टापत्तिः, शक्तिभगवत्यभेदबोधकयुष्मच्छब्दघटितोत्तरसंदर्भविरोधापत्तेः । तस्मान्नाध्याहारकल्पना युक्ता । ननु च 'उपर्यध्यधसः सामीप्ये' इत्यनुशासनादधि समीपादाह्रियत इति व्युत्पत्त्याऽध्याहारशब्दोऽत्र समीपश्रुतपदानुसंधानलक्षणानुषङ्गार्थोऽस्त्विति वाच्यम्, 'संनिधानमनुषङ्गः स्यादध्याहृतिरसंनिधौ' इति वेदभाष्यकारोक्तलक्षणव्यवहारोच्छेदाङ्गीकारेऽपि पूर्वतरश्लोकान्तराणामभावात्, उत्तरश्लोकेषु भगवतीवाचकसंबुद्ध्यन्ताभावात्, भावे वोत्तरश्रुतानां पूर्वत्रानुषङ्गनस्य शास्त्रकारासंमतत्वात्, तादृशार्थस्यानुषङ्गपदार्थीभावानर्हत्वाच्च तत्कल्पनानौचित्यात् । अत एव व्याकरणादौ 'उपदेशेऽजनुनासिक इत्', 'हलन्त्यम्' इत्यादौ पूर्वसूत्रोपात्तानामेव पदानामनुषङ्गो नोत्तरश्रुतानामित्यलमतिप्रसङ्गेन ॥

यत्तूक्तं रामकविना—अत्र श्लोके भगवत्याः संबुद्धिपदं नास्ति, अतोऽध्याहर्तव्यमिति ये


केचिदाहुस्ते भ्रान्ताः, 'हरि' इति पदस्य संबुद्धिरूपेण वर्तमानत्वात् 'हरिर्नो कपिलास्त्रिषु' इति वचनात्कपिलवाचिनो हरिशब्दस्य भेद्यलिङ्गत्वात्; तत्र च 'क्रादेर्क्रादक्तिनो ङीष्वक्तव्यः' इति ङीषि कृते 'हरी' इति दीर्घान्तो गौरीशब्दसमानार्थः। तस्य संबुद्धौ हे गौरीतिवद्धे हरीति भवति, इति। तदप्यचारुतरम्, हरीशब्दस्य भगवतीवाचकत्वाभावात्, लक्ष्याव्यताकल्पनेऽप्रयुक्तदोषापत्त्या परोक्तमध्याहारदोषं परिहर्तुमुद्यतस्यात्मनो व्यवहितपदान्वयरूपदोषापाताच्च। न चाकाङ्क्षायाः संनिधानाद्बलीयस्त्वात् 'यस्य येनार्थसंबन्धो दूरस्थेनापि तेन सः। अर्थतोऽप्यसमर्थानामानन्तर्यमकारणम्॥' 'अर्थतोऽप्यसमर्थानामानन्तर्येऽपि संबन्धः' इति मीमांसावार्त्तिकसूत्राभ्यां न व्यवहितपदान्वयनं दोष इति वाच्यम्, आचंकारिकैस्तदनभ्युपगमात्। न च तत्रैव संबुद्ध्यन्तत्वेनान्वीयतामिति वाच्यम्, वाक्ययोरसांगत्यप्रतीतेः। यच्चोक्तं त्रिपुरसुन्दरीमहाभट्टारिकायाः 'बालार्कमण्डलाभासाम्' इत्यादिध्यानेषु कपिलवर्णस्य प्रसिद्धत्वाद्धरिशब्दप्रयोग इति, तदप्यज्ञानविलसितम्, 'पलाशपुष्पसंकाशां जपापुष्पसमप्रभाम्। उद्यद्भानुसमप्रख्यां पद्मरागसमद्युतिम्॥ देवीमारक्तसर्वाङ्गीम्' इत्यादिना मन्त्रचिन्तामण्यादिषु देव्या रक्तवर्णवत्ताप्रसिद्धेः, 'कवीन्द्राणां चेतःकमलवनबालातपरुचिं भजन्ते ये सन्तः कतिचिदरुणामेव भवतीम्।' 'हिरं सर्वामुर्वीमरुणिमनिमग्नां स्मरति यः,' 'पावकाब्धौ निमग्नं यो हिरं भूमिं विचिन्तयेत्,' 'अनाद्यन्ता शंभोर्जयति करुणा काचिदरुणा,' 'प्रकृत्या रक्तायास्तव सुदति दन्तच्छदरुचेः' इत्यादिश्लोकेषु भगवतीस्वरूपं वर्णयतामाचार्याणां देव्याः कपिलरूपतानङ्गीकारात्। 'यानि सौम्यानि शोणानि शृङ्गाररसभाञ्जि च। तान्यम्बाशक्तिपातेन संपन्नानीति निश्चयः॥' इत्यागमवचनमूलक-'प्रवालेषु पद्मरागेषु कुङ्कुमेषु बालादित्येषु तटित्सु वह्निशिखासु' इत्यादिना देव्यारुण्यप्रतिफलनवर्णनारूप-'प्रकृत्या रक्तायाः' इति श्लोकीयस्वोक्तिविरोधापत्तेश्च। यच्चोक्तं कपिलकपिशपाटलरक्तादीनां प्रायिकत्वादैक्यमेवेति, तदपि धीवर्गे वर्णभेदं परिगणयतोऽमरसिंहस्यासंगतत्वाद्वैलक्ष्यभेद। न च कपिलवर्णे रक्तवर्णस्यापि प्रतिभानाल्लक्षणयाऽस्य तद्वाचकत्वं भविष्यतीति वाच्यम्, वाच्यार्थानुपपत्त्यादिलक्षणाबीजाभावेऽपि लौहित्यलक्षणामङ्गीकृत्य भगवतीरूपार्थकल्पने गौरवापत्तेः, अभिधाबोधितत्वेन वर्णान्तरस्य परिहरणीयत्वात्। न च बालार्कमण्डलस्य कपिलवर्णताऽङ्गीकर्तुं शक्या, 'शोणानि भौमतीक्ष्णांशुताम्रकुङ्कुमतक्षकाः। गुञ्जेन्द्रगोपखद्योतविद्युत्कुञ्जरबिन्दवः। दम्बिम्बाधरजिह्वासृङ्मांससिन्दूरधातवः॥' इत्यादिना रक्तान्परिगणयता 'तरुणतरणिकान्तिव्रातसंसर्गरङ्गत्कमलदलनिकायप्रायकामप्रभोर्मिः। अभिनवरविरश्मिद्योतिताभ्रच्युभृच्छिखरलसदशोकस्तेरपुष्पोपमानः॥' इत्यादिना रक्तानामुपमानीकरणचातुरीमुपदिशता काव्यकल्पलताकृताऽरुणारुणस्य रक्तवर्णताकथनेन तद्विरोधापत्तेः। 'वहन्ती सिन्दूरं प्रबलकबरीभारतिमिरत्विषां वृन्दैर्बन्दीकृतमिव नवीनार्ककिरणम्' इति सीमन्तमध्यवर्ति सिन्दूरं काव्यकल्पलतायां शोणत्वेनोपवर्णितं नवीनार्ककिरणत्वेनोत्प्रेक्षितवतामाचार्याणामसंमतत्वाच्च। किं च भगवत्युपासकस्य हरेराभिधानाभावाच्च न हरिपदस्य संबुद्धिपरता वक्तुं शक्या। न चादिशब्देन विष्णोर्ग्रहणमित्युक्तमेवेति वाच्यम्, आदिशब्दस्य श्रुतिस्मृतिकोशादिषु विष्णुवाचकत्वादर्शनात्। न च तथाऽपि सर्वेषामादित्वात्, आदित्वादादिरिति योगबलेन कल्प्यत इति वाच्यम्, व्याख्येयप्रबन्धप्रतिपाद्यदेव्यौत्कटचहानिप्रसङ्गात्, 'ब्रह्मविष्णुमहादेवा अस्याः

पुत्रा वरानने' इत्याद्यागमवचनेभ्यस्तदसिद्धेश्च । यच्च नारायणस्यादिशब्दवाच्यत्वानयनाय 'अप एव ससर्जादौ' इत्यादिस्मृत्युपन्यसनं कृतं तदपि न, 'अस्याज्ञया जगत्सृष्टा विरिञ्चिः पालको हरिः । संहर्ता कालरुद्राख्यो ब्रह्मणस्मै पिनाकिने ॥' इत्यादिवचनेभ्यः पालनाधिकृतस्य विष्णोः सर्जनाधिकाराभावात् । न चादिसृष्टजलशायित्वादादिर्नारायण इति लक्षणयोच्यत इति वक्तुं युक्तम्, क्लिष्टकल्पनाप्रयोजनाभावात् । 'इन्द्रश्च विश्वे च देवाः' इत्याद्यारण्यकोपनिषदुक्तेन्द्रादिकथनयोग्यस्य तस्य हरिपरताकल्पनानौचित्याच्च । न च 'आदिनारायणः' इत्यादिप्रयोगात्तत्परत्वं कल्प्यम्, 'आदिशक्तिः,' 'आदिलक्ष्मीः' इत्यादिप्रयोगात्तत्परत्वकल्पनस्याप्युचितत्वात् । वस्तुतस्तु, 'विष्णु शिवः सुरज्येष्ठो मनुश्चन्द्रो धनाधिपः । लोपामुद्रा तथाऽगस्त्यः स्कन्दः कुसुमसायकः । सुरगीशो दौहित्रेयो दत्तात्रेयो महामुनिः । दुर्वासा इति विख्याता एते मुख्या उपासकाः ॥' इत्यादिमानवोल्लासादिवचनेभ्यः सर्वेषूपबर्हणोपासकाग्रगण्यत्वेन मन्त्रप्रथमखण्डऋषित्वेन च 'हरिस्त्वामाराध्य–' इति वक्ष्यमाणोक्त्या च प्रथमोपात्तस्य हरेः संबुद्धिपदलाभलोभेन प्राधान्यमपहाय तस्यविज्ञानमग्रहणादादिसृष्टत्वग्रहणे शक्तिशिवयोरुत्पत्तिप्रतिपादकत्वकथनोपक्रमभङ्गादाचार्यतात्पर्यपर्यालोचनाधिक्यानं न भवेदिति न हरिपदं संबुद्धिकरणार्थकं प्रवेक्तुमर्हतीति परस्य भ्रान्ततामापादयितुं प्रवृत्तोऽयं स्वयमागमरहस्यापरिशीलनाद्भ्रान्तः सन् 'भीषयितुं गतो बिभाय' इति लोकन्यायमनुसरतीत्यलमतिशोधनेन ॥

वैष्णवाश्चमास्तु— संबुद्धिपदमीमांसामकुर्वाणाः पूर्वोक्तेभ्यमतानुवादितयाऽस्मदुक्तोत्तरैः पूज्या एवेति न पृथक्चिन्तितव्यम् । वस्तुतस्त्वत्र न संबुद्धिवाच्यकपदापेक्षा, तत्कल्पने 'शिवः शक्त्या–' इत्यायुक्तेः पारोक्ष्यप्रसङ्गभङ्गद्वारा शक्तिभगवत्योर्भेदप्रतीतिप्रसङ्गात् । न चेष्टापत्तिः, उत्तरसंदर्भविरोधापत्तेः; शक्तिपदस्य भगवतीपरत्वाङ्गीकारेऽपि 'त्वया' इत्यनुच्यमाने संदेहानिवृत्तेः, शक्तिशिवयोर्माहात्म्यवर्णनार्थं भगवतीसंमुखीकरणानुपपत्तेश्च । न च पौराणिककथावदिदमप्यन्यार्थं भविष्यतीति शङ्कनीयम्, करिष्यमाणयुष्मच्छब्दव्यवहारेण तयोरभेदावगमात् । अथापि तद्भेदबोधनार्थमेव त्वामित्युत्तरवाक्ये युष्मच्छब्दोपादानात्, आचार्यैर्लघुस्तवे 'माया कुण्डलेनी–' इत्यादिनाऽभेदस्योक्तत्वात्, संबोधनकाङ्क्षा न विरमतीति यद्यभिसंधिस्तर्ह्यत्र डवतुप्रत्यान्तं भवतीति पदमेव तत्पदत्वेनोच्यताम् । न ह्यस्मिन्योजनेऽध्याहारादयो दोषाः प्रतिभान्ति । न च तेऽन्तपदाभावः शङ्क्यः, शक्तशब्दस्य निष्ठान्तस्य श्लिष्टतयैव भवनार्थकथनशक्तत्वात्; प्रत्युत तत्प्रयोगे पौनरुक्त्यं दुष्परिहरं भवेत्, 'गतार्थानां प्रयोगे पौनरुक्त्यं दोष इति वामनः' इति तत्र तन्निरासात्पदोक्तेः । अतः 'भवति' इत्येतदेव संबुद्धिपदं योजनीयम् । तथा चायमर्थः— भाति प्रकाशते स्वयंप्रकाशरूपत्वादिति भवती; यद्वा भासयत्युपासकलोकं सर्वमिदं चेति भवती, तस्य भासा सर्वमिदं विभाति' इति श्रुतेः । भातेर्डवतुप्रत्यये ङित्त्वसामर्थ्यादभस्यापि टेर्लोपे उगितश्च' इति ङीपि संबुद्धौ नदीह्रस्वः । हे भवति स्वयंप्रकाशरूपे भक्तजनवत्सले भगवति, तदार्धोक्तिरिहादिसर्वदेवत्वेऽप्यत्वार्थोपयोगीदं संबोधनम् । अथ वा, भवति जायते त्रिपुरसुन्दर्यारूपेण जगदनुग्रहायेति वा, भवत्यनया शंभुः शक्तिमानिति वा भवती । सर्वादिगणे उगित्त्वेन



द्वितीयः परिच्छेदः ॥



अथातो ब्रह्मजिज्ञासा ॥ १ ॥

द्वितीये तु परिच्छेदे माध्वाधिकरणस्थितेः ।
प्रदर्श्यते खण्ड्यते च प्रायशो विदुषां मुदे ॥

वेदान्तविचारशास्त्रं नारम्भणीयम्, विषयाभावात् । न च ब्रह्म विषयः, तद्धि स्वप्रकाशं जीवाभिन्नं निर्गुणं चेति सर्वोपनिषद्भिः सिद्धम् । न च तत्र निरूपणीयं किंचिदस्तीति पूर्वः पक्षः । स्यादेवम्, यदि ब्रह्म निर्गुणं जीवाभिन्नं च स्यात् । न त्वेवम् ; 'तद्विजिज्ञासस्व । तद्ब्रह्मेति' इति श्रुत्या जिज्ञासापदमद्वयर्थस्य मननापरनामधेयस्य विचारस्य विषये धर्मिणि ब्रह्मपदं श्रावितम् । तच्च [1]गुणपूर्णत्ववाचकम्, 'अथ कस्मादुच्यते ब्रह्मेति ? बृहन्तो ह्यस्मिन्गुणाः' इति श्रुतेः । ततश्चाल्पगुणाज्जीवसंघाद्भिन्नमेव ब्रह्मात्र विषय इति शास्त्रमारम्भणीयमिति सिद्धान्त इति माध्वाधिकरणशरीरम् ॥

तत्र पूर्वपक्षस्तावदयुक्तः, वस्तुतो जीवाभिन्नस्यापि ब्रह्मण आवृतत्वेन विचार्यत्वोपपत्तेः । त्वया हि 'पुंस्त्वादिवत्' इत्यधिकरणे जीवस्वरूपानन्दोऽप्यानन्द इत्यनेन भावरूपाज्ञानेन आवृतः, ब्रह्मस्वरूपतद्गुणगणादिकमप्यावृतं; परमेश्वरापरोक्षज्ञानेन तु मुक्तावभिव्यज्यत इति स्वीकृतम् । तथा सिद्धान्तेऽपि तुच्छः, ब्रह्मणो गुणपूर्णत्वस्याप्यसिद्धेः, 'बृहन्तो हि' इति [2]श्रुतेस्त्वत्कल्पितत्वात् । अभ्युपेत्य ब्रूमः—व्यावहारिकगुणपूर्तिरेव तदर्थः, 'साक्षी चेता केवलो निर्गुणश्च' इत्यादिश्रुतेः । गुणानां पारमार्थिकत्वेऽपि ब्रूमः—त्वन्मते विरुद्धधर्मैर्भेदो[3] न सिध्यति, त्वया विरुद्धधर्मसंकरस्य बहुधा स्वीकारात् । तथा हि—ईश्वरः स्वयमेकः सन्नपि आनन्दमयाधिकरणोदाहृतान्नमयप्राणमयादिरूपेण, गुहाधिकरणोदाहृतशुभकर्मफलभोक्त्रात्मान्तरात्मरूपेण, 'न संख्योपसंग्रहात्' इत्यधिकरणोदाहृतपञ्चपञ्चजनरूपेण, 'न स्थानतोऽपि' इत्यधिकरणोदाहृतविश्वतैजसप्राज्ञरूपेण चानेकः ।

---

1. पूर्णगुणत्ववाचकम् 2. श्रुतेर्विकल्पितत्वात् 3. ०वैर्विरोधो

वाऽशरीरी सन्नपि 'अरूपवदेव हि तत्प्रधानत्वात्' इत्यधिकरणोक्तरीत्या परव्यूहावतारविनाना-शरीररूपः। अत एव पुराणादिषु रामकृष्णाद्यवतारभेदश्रवणं लौकिकैर्भ्रान्त्या गृहीतस्य भेदस्यानु-वादकमिति तृतीयस्य चतुर्थे 'सर्वथाऽपि त एवोभयलिङ्गात्' इत्यधिकरणे अनुव्याख्यानन्याय-सुधयोरुक्तम्। एवमानन्दमयावयवी सन्नपि तदीयशिरःपक्षमध्यपुच्छावयवरूप इत्यादि त्वया स्वीकृतम्। तथा 'एक आत्मनः शरीरे भावात्' इत्यधिकरणे खाण्डवदाहतत्प्रशमादि कृतवतोः सेव्यसेवकभावादिविरुद्धगुणशालिनोरत्यन्ताभेदः बाधितः। तत्कथं जीवब्रह्मणोर्भेदः सिध्येत्? ननु विरुद्धधर्मेण भेदः सिध्यतीत्युत्सर्गः; अत्यन्ताभेदबोधकप्रबलप्रमाणबलात्तु भेदे बाधिते भेदप्रति-निधिना विशेषेणेश्वरस्याचिन्त्यशक्त्या वा तत्र तत्र निर्वाहः क्रियत इति चेत्, समं प्रकृतेऽपि, जीवब्रह्मणोरप्यभेदसाधकानां सहस्रशः सत्त्वात्। श्रूयते ह्यमृतबिन्दूपनिषदि— 'तद्ब्रह्माहमिति स्मृतम्। तदस्म्यहं वासुदेवः' इति। कैवल्योपनिषदि—'तत् त्वमेव त्वमेव तत् चिन्मात्रोऽहं सदाशिवः। तद्ब्रह्माद्वयमस्म्यहम्' इत्यादि। उत्तरतापनीये—'स्वात्मबन्धहरः सर्वदा द्वैतरहित आनन्दरूपः सर्वाधिष्ठानसन्मात्रो निरस्ताविद्यातमोमोहोऽहमेवेति तस्मादेवमेवेममात्मानं परं ब्रह्मानुसंदध्यात्' इति, 'नात्र काचन भिदाऽस्ति नैवात्र काचन भिदाऽस्ति' इत्यादि च। परम-हंसोपनिषदि—'परमात्मात्मनोरेकत्वज्ञानाद्भेद एव विभग्नः' इति। एवं श्रुत्यन्तरेष्वपि द्रष्टव्यम्। विष्णुपुराणे द्वितीयेंऽशे षोडशेऽध्याये—'एकः समस्तं यदिहास्ति किंचित्तदच्युतो नास्ति परं ततोऽन्यत्। सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम्॥' इत्यादि। ब्रह्मगीता-सूतगीताशिवगीतादौ च प्रसिद्धमेवाद्वैतं लाघवं चोपबृंहकमिति दिक्। किं च 'भेदप्रतिनिधि-र्विशेषः' इति रिक्तं वचः; सोमपूतिकयोर्हि भेदात्सोमाभावे पूतिकः प्रतिनिधीयत इत्युचितम्। इह तु भेदविशेषयोर्द्वयोरपि स्वरूपात्मकत्वाभ्युपगमात्कथं भेदाभावे विशेषलाभः? एवं गुणाना-मपि स्वरूपात्मकतायाः 'उभयव्यपदेशात्त्वहिकुण्डलवत्' इत्यधिकरणे निर्णीतत्वात् सगुणं ब्रह्मेति शब्दो निर्गुणत्वपर्यवसाय्येव। तथा च विरुद्धगुणाध्यासस्यासिद्धिर्व्यभिचारश्चेति [1]कल्प्यो भेदः। न च 'नाहमीश्वरः' इत्यादिप्रत्यक्षेण तत्सिद्धिः, तस्य व्यावहारिकभेदविषयत्वात्, 'नाहमणुर्नाहं ज्ञानम्' इत्यादिप्रत्यक्षस्य त्वयाऽपि भ्रमत्वस्वीकाराच्च। न च 'उत्तमः पुरुषस्त्वन्यः' इत्यादि-भिर्भेदसिद्धिः, 'अन्योऽन्तर आत्मा' इत्यादिवदुपपत्तेः; तत्र हि, 'अनन्योऽप्यन्यशब्देन तथैको बहुरूपवान्। प्रोच्यते भगवान्विष्णुरैश्वर्यात्पुरुषोत्तमः॥' इति वचनं त्वद्भाष्य एवोदाहृतम्। यत्तु नवीनमाध्वेन शब्दान्तरादिकं जीवब्रह्मभेदसाधकतयोपन्यस्तम्, तत्तुच्छम्, 'आत्मान्तरात्मा-नौ द्वौ, विश्वादयस्त्रयः, व्यूहाश्चत्वारः, आनन्दादयः पञ्च, पञ्चजनाश्च पञ्च, अवतारा गुणा-श्चानन्ताः, सर्वे च विष्णुना सह सविशेषाभिन्नाः' इति तत्तदधिकरणे उक्तम्। त्वदीयोक्तस्थलेषु

1. कल्यो

व्यभिचारस्योद्भटत्वात्। पूर्वतन्त्रेऽपि कर्मभेदकतामात्रस्य भेदस्यौपाधिकतायाश्च स्वीकारात्। न चैन्द्राधिपत्ययागयोः प्राजापत्ययागानां वाऽनौपाधिको भेदः संभवति स्वीकृतो वा, संप्रतिपन्नदेवताकतया तन्त्रेण त्यागस्वीकारात्, देवतोद्देशेन द्रव्यत्यागस्यैव यागत्वात्, तदैक्यस्य युक्तिनिरूढत्वात् ग्रन्थारूढत्वाच्च। तन्त्ररत्ने '[1]क्रियाणामाश्रितत्वाद्द्रव्यान्तरे विभागः स्यात्' (जै. ६-१-११) इत्यधिकरणे वरदराजीये च शब्दान्तरसंज्ञाधिकरणयोः स्पष्टमेतत्॥ १॥

जन्माद्यस्य यतः॥ २॥

उदाहृतश्रुतिस्थब्रह्मपदस्य जीवपरत्वमाशङ्क्य निराक्रियते। तथा हि—ब्रह्मशब्दो जीवे रूढः, 'बृह जातिजीवकमलासनशब्दराशिषु' इति धातोरुत्पन्नत्वात्। ब्रह्मणि तु गुणमूर्तिवशात् प्रयुज्यमानो यौगिकः। एवं च रूढेर्बलीयस्त्वात् 'तद्विजिज्ञासस्व तद्ब्रह्मेति' इत्यत्र ब्रह्मपदं जीवपरमेव। तत्कथं जीवातिरिक्तस्य विचार्यतेति पूर्वपक्षः। सत्यं रूढिर्बलीयसी। किं तु बाधादिह त्यज्यते। 'यतो वा इमानि भूतानि' इति हि जगज्जन्मादिकारणत्वं जिज्ञास्यब्रह्मणो लक्षणं श्रुतम्। तच्च विष्ण्वेकनिष्ठम्। न तु जीवे संभवति। उक्तं च स्कान्दे—'उत्पत्तिस्थितिसंहारा नियतिर्ज्ञानमावृतिः। बन्धमोक्षौ च पुरुषाद्यन्मात्स हरिरेकराट्॥' इति। सूत्रेऽपि जन्माद्यष्टकं गृह्यते। अतः परिपूर्णगुणो विष्णुरेव ब्रह्मशब्देन योगतो गृह्यत इति सिद्धान्तः इति माध्वाधिकरणशरीरम्॥

तत्र पूर्वपक्षस्तावदशुद्धः, शरीरबृंहकत्वादिकृत्प्रयोगेणैवोपपत्तौ जीवे रूढिकल्पनायोगात्। प्रथमाधिकरणे, 'आनन्दमयोऽभ्यासात्' 'सर्वत्र प्रसिद्धोपदेशात्,' 'गुहां प्रविष्टावात्मानौ हि' इत्याद्यधिकरणेषु च ब्रह्मशब्दस्याज्ञरूढिर्जीवे, विद्वद्रूढिस्तु विष्णावेवेति त्वदुक्तेश्च, उदाहृतधातोरप्रामाणिकत्वाच्च। चतुर—कमठ—माठर—कौरव्य—कौण्डिन्य—मार्कण्ड—माण्डव्य—मौद्गल्य—पौष्यायण—पौत्रायण—चौत्रायण—सौकरायण—पाराशर्यायण—माध्यंदिनायन—काषारव—कौषारव—कौषायण—काषायण—बृहदुद्दालक—औद्दालकायन—कौशिक—सौपर्ण—वत्स—गौपवन—भार्गवेय—आग्निवेश्य—चतुर्वेदसंहिता—चतुर्वेदशिखेन्द्रशुम्नपरमेत्यादिश्रुतय इति, तदनुसारीणि अध्यात्मनारायणाध्यात्मसंहिता—बृहत्संहिता—महासंहिता—नारायणतन्त्र—ब्रह्मतन्त्र—पुरुषोत्तमतन्त्र—मायावैभव—ब्रह्मतर्क—भविष्यत्पर्ववचनानीति चात्यन्ताप्रसिद्धवचनाभासान् कल्पयता प्रतारकापशदेन माध्वेन वराकेण हि धातुरयं कल्पितः, न तु पण्डितान् प्रत्युपन्यासार्हः। तथा सिद्धान्तोऽप्यसंगतः, ब्रह्मशब्दस्य जीवे रूढत्वे 'यतो वा' इत्यादिनाऽनूदितस्य जगत्कर्तुर्विष्णोर्जीवाभेद एव हि वाक्यार्थः स्यात्। तथा च 'तत्त्वमसि' इत्यादिवाक्यतुल्यार्थमेव 'यतो वा' इत्याद्यपि स्यात्। बाधस्तु प्रथमसूत्र एवोद्धृतः॥

---

1. क्रियाणामनन्तत्वात्

शास्त्रयोनित्वात् ॥ ३ ॥

जगज्जन्मादिकारणत्वं न विष्णुलक्षणम्, जगत् अनेककर्तृकं विचित्रकार्यत्वात् प्रासादादिवत् इति शिवादीनामपि जगत्कर्तृत्वसिद्धौ सत्यां शिवादिष्वनिष्व्याप्तेरिति प्राप्ते, सिद्धान्तः। जगत्कारणत्वस्य धर्मादिवच्छास्त्रैकगम्यत्वात् शास्त्रस्य च विष्ण्वेकनिष्ठत्वान्नोक्तदोषः। अनुमानं त्वप्रयोजकं श्रुतिबाधितं चेति माध्वाधिकरणशरीरम् ॥

अत्र सिद्धान्तो दुरुपपादः, शिवविरिञ्चपराणामपि श्रुतीनां प्रसिद्धत्वात्। अत एवानुमानमपि नाप्रयोजकं नापि बाधितम्। एतच्चोत्तराधिकरणभङ्गे स्फुटीभविष्यति ॥

तत्तु समन्वयात् ॥ ४ ॥

अस्तु शास्त्रैकगम्यता, तथाऽपि शास्त्रत एव शिवविरिञ्चयोरपि जगत्कर्तृत्वप्रतीतेरतिव्याप्तिरेवेति पूर्वपक्षः। सम्यग्विचारितादुपक्रमादितात्पर्यलिङ्गरूपादन्वयात् तद्धेतुकात् समन्वयवचनवृत्त्या सर्वशास्त्रस्य तत्परत्वरूपादन्वयाच्च विष्ण्वाख्यं ब्रह्मैव कारणतया शास्त्रगम्यमिति सिद्धान्त इति माध्वाधिकरणशरीरम् ॥

अत्र सिद्धान्तो दुरुपपादः। तथा हि—श्वेताश्वतराणां मन्त्रोपनिषदि शिव एव जगत्कर्ता प्रतीयते—'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः। तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी ॥' इति मन्त्रेण हि सर्वेषां कारणवाक्यानां शिवपर्यवसानमुक्तम्। तत्र तम आसीदिति श्रुत्यन्तरोक्ततमोऽङ्कितकालानुवादो यदा तम इति। तत्कालवर्तित्वं च शिवस्येत्युक्त्या शिवे सर्वेषां कारणवाक्यानां पर्यवसानमुक्तम्। तदक्षरमिति मुण्डकादीनां, तत्सवितुरिति गायत्र्याः, प्रज्ञा च तस्मादिति तदैक्षत बहु स्यामित्यादीनाम्। किं च, क्षरं प्रधानममृताक्षरं हरः, भावाभावकरं शिवम्, भूयः स सृष्ट्वा पतयस्तथेशः, एको ह रुद्रो न द्वितीयाय तस्थुः, ईशानो ज्योतिरव्ययः, मायिनं तु महेश्वरम् इति हर—शिव—ईश—रुद्र—ईशान—महेश्वरादिशब्दस्वरसात् श्वेताश्वतरसंदर्भः शिवपर एव। उपबृंहितं च तथैव कौर्मशैवस्कान्देषु। तथा अथर्वशिखायामपि—'शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्य, समाप्ताथर्वशिखा' इत्युपसंहृतम्। 'ब्रह्मविष्णुरुद्रेन्द्राः संप्रसूयन्ते' इति प्राचीनवाक्येन 'कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुः' इत्यनेन च मूर्तित्रयनियामकस्तुरीयः शंभुरित्युक्तम्। माण्डूक्ये च—'प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते' इति। आनुशासनिके 'स एव भगवानीशः' इत्युपक्रम्य, 'सोऽसृजद्दक्षिणादङ्गाद्ब्रह्माणं लोकसंभवम्। वामपार्श्वात्तथा विष्णुं लोकरक्षार्थमीश्वरः। युगान्ते चैव संप्राप्ते रुद्रं प्रभुरथासृजत्॥' इति। पाराशरपुराणे—'तस्यासाधारणी मूर्तिः साम्बा चन्द्रा-

र्धशेखरा' इत्यारभ्य 'ब्रह्मविष्णुमहेशानास्तं ध्यायन्ति निरन्तरम्।' इति॥ पाद्मे शिवराघवसंवादे—'य एकः शाश्वतो देवो ब्रह्मवन्द्यो महाशिवः। दक्षिणेनासृजत्पुत्रं ब्रह्माणं वामतो हरिम्। पृष्ठदेशे महेशानं त्रीन्पुत्रानसृजत्प्रभुः॥' इति। तथा 'प्रजापतिर्वा इदमेक आसीत्। नाहरासीन्न रात्रिरासीत्। सोऽस्मिन्नन्धे तमसि प्रासर्पत्' इत्यादिना विरिञ्चस्यापि जगत्कर्तृत्वं प्रतीयते। तत्कथं विष्णोरेव तथात्वमिति स्वबुद्धिभवं लिख्येत्। अस्मत्सिद्धान्ते तु एकस्यैवाद्वितीयस्य नानालीलाविग्रहाः। सर्वेषां पूज्यत्वाविशेषेऽपि 'न हि निन्दा' न्यायेन कस्यचिन्निकर्षोक्तिः। उक्तं हि भागवते चतुर्थस्कन्धे सप्तमाध्याये—'आत्ममायां समाविश्य सोऽहं गुणमयीं द्विजाः। सृजन्रक्षन्हरन्विश्वं दधे संज्ञां क्रियोचिताम्॥ तस्मिन्ब्रह्मण्यद्वितीये केवले परमात्मनि। देहात्मबुद्धिभूतानि भेदेनाज्ञोऽनुपश्यति॥' स्कान्दे उमागीतायां षष्ठेऽध्याये—'ब्रह्मविष्णुमहेशाद्याः शिवध्यानपरा अपि। परमात्मविभागस्था न जीवव्यूहसंस्थिताः॥ ब्रह्मविष्णुमहेशानां तथा तेषां द्विजर्षभाः। आविर्भावविशेषाणां पुण्यपापादयो न हि॥' इति। तस्मादद्वैतसिद्धान्तावलम्बनमपहाय श्रुतीनामेकवाक्यता दुरुपपादेति स्थितम्॥

ईक्षतेर्नाशब्दम्॥ ५॥

ब्रह्मणः सर्वशास्त्रस्थशब्दप्रवृत्तिनिमित्तसकलगुणपूर्तिसिद्धये वाच्यवृत्त्या कृत्स्नशास्त्रविषयता पूर्वसूत्रे समन्वयादित्यत्रार्थान्तरतया दर्शिता। तत्र संशब्दार्थभूतं वाच्यत्वमिहाक्षिप्य समर्थ्यते। 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतिभिर्ब्रह्मणो वाच्यत्वनिषेधात् न तत्र समन्वय इति प्राप्ते, सिद्धान्तः—ब्रह्म अशब्दं न, किं तु वाच्यमेव। कुतः? ईक्षतेः। 'परात्परं पुरिशयं पुरुषमीक्षते' इति प्रश्नोपनिषदि ब्रह्मण ईक्ष्यत्वं श्रुतम्। ईक्षणं चोपनिषदस्य वचनमूलकमेव। तच्च वाच्यत्वं विना न संभवति। न च लक्षणया निर्वाहः, वाच्यसंबन्धप्रतीतिमूलश्रुतेरन्तरायोगात्। तस्मात्परिशेषाच्छक्तिरेव॥

गौणश्चेन्नात्मशब्दात्॥ ६॥

ननु ईक्षणीयत्वेनोक्तः सत्त्वादिगुणको जीवोऽस्तु। न, 'आत्मन्येवात्मानं पश्येत्' इति तस्मिन्नात्मशब्दश्रवणात्॥ नन्वात्मशब्दोऽपि जीवे मुख्योऽस्तु। नेत्याह—

तन्निष्ठस्य मोक्षोपदेशात्॥ ७॥

पाद्मे—'चेतनस्तु द्विधा प्रोक्तो जीव आत्मेति च प्रभो। जीवा ब्रह्मादयः प्रोक्ता आत्मैकस्तु जनार्दनः॥ इतरेष्वात्मशब्दस्तु सोपचारः प्रयुज्यते। तस्यात्मनो निर्गुणस्य ज्ञाना-

न्नोक्त उदाहृतः ॥ सगुणास्त्वन्ये प्रोक्तास्तज्ज्ञानान्नैव मुच्यते । परो हि पुरुषो विष्णुस्तस्मान्मोक्षस्तस्मात्स्मृतः ॥' इति ॥

हेयत्वावचनाच्च ॥ ८ ॥

आत्मशब्दो न गौणपरः, 'तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथ' इत्यत्र हेयत्वेनानुक्तेः ॥

स्वाप्ययात् ॥ ९ ॥

'स आत्मन आत्मानं कृत्स्नमात्मन्येव विलापयति अथात्मैव भवति' 'स देवो बहुधा भूत्वा निर्गुणः पुरुषोत्तमः । एकीभूत्वा पुनः शेते निर्दोषो हरिरंकराट् ॥' इति स्वस्यैव स्वस्मिन्नप्ययवचनात् 'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥' इति श्रुतेश्च । एवं हि तदर्थः—अदो मूलरूपं पूर्णम् । इदमवताररूपं च पूर्णम् । तत् पूर्णं सृष्टिकाले पूर्णान्मूलरूपादुद्रिच्यते । प्रलये च पूर्णस्य स्वस्य पूर्णमवतारूपमादाय स्वीकृत्यैकीभूय मूलरूपमन्यत्रालीनं स्वयमेव शिष्यत इति । गौणो ह्यपूर्णः अन्यस्मिंश्च लीयते । अयं तु न तथेति भावः ॥ न चेदं शाखान्तरैर्विरुध्यत इत्याह—

गतिसामान्यात् ॥ १० ॥

'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥' इति कठश्रुतेः ॥

श्रुतत्वाच्च ॥ ११ ॥

सिंहावलोकनन्यायेन वाच्यत्वे हेतूपन्यासपरमिदं सूत्रम् । तस्माच्छ्रुतिप्रतिपाद्यत्वात्सर्वपदावाच्ये लक्षणाया अपि दुरुपपादत्वात् वाच्यमेव ब्रह्मेति माध्वाधिकरणशरीरम् ॥

इदं च माध्वोक्तेनैवाधिकरणान्तरेण विरोधान्न्यायविरोधाच्चाशुद्धमेव । तथा हि—अतत्त्वे तत्त्ववादिना माध्वेन 'तथाऽन्यप्रतिषेधात्' इति सूत्रे सांप्रदायिकं तथाऽन्येत्यकारान्तं पाठं विहाय तथाऽन्यादिति तान्तं पठित्वा रचितेऽधिकरणे ध्येयं ब्रह्मैव नेति निर्णीतम् । तेनोपासनाविधिषु प्रविष्टानां ब्रह्मादिशब्दानां तद्वाच्यं नेत्यर्थात्सिद्धम्, उपास्यसमर्पकपदवाच्यत्वे उपास्यत्वापत्तेः । अत एव हि केनोपनिषदि 'यन्मनसा न मनुते' इति मन्त्रस्य संनिधावाम्नायमानं

'यद्वाचानभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥' इति मन्त्रान्तरं ब्रह्मणो वाच्यत्वं प्रतिक्षिपति । तस्माद्वाच्यमिति वक्तव्याऽभ्युपगन्तव्यम् । तथा च सृष्ट्यादिवाक्यस्थब्रह्मात्मनारायणादिपदानामपि तद्वाच्यं न भवतीति कथं तस्य जगत्कर्तृत्वादिसिद्धिः । न चोपास्यसमर्पकपदावाच्यत्वेऽपि सृष्ट्यादिवाक्यस्थपदवाच्यता संभवत्येवेति वाच्यम्, त्वन्मते सृष्ट्यादिवाक्यानामपि उपासनापरत्वात्, 'आध्यानाय प्रयोजनाभावात्' इत्यधिकरणे त्वया तथैव सिद्धान्तितत्वात् । तथा च त्वन्मतं निरूप्यमाणमित्थं पर्यवस्यति—'वाङ्मनसातीतमुपासनानन्तरं मुच्यमानानां मुक्तानां च साक्षात्कारस्यैव विषयभूतं परं ब्रह्म 'तदेव त्वं विद्धि' इत्यादिभिः कैश्चिदेव वचनैर्लक्षणया प्रतिपाद्यम् । तस्य प्रतिबिम्बविशेषस्तु जीववदनादिः कर्ता उपास्यश्च एक एव सृष्ट्यादिश्रुतिभिस्तदनुसारिगुणादिभिश्च शक्त्या प्रतिपाद्यः' इति । अत एव 'यतो वाचो निवर्तन्ते अप्राप्य' इत्युक्तम्, अप्राप्येत्यस्य दृश्यत्वपरतया अप्राप्येत्यस्य शक्तिनिषेधपरत्वात् । प्रसिद्धं चेदं ब्रह्मगीतादौ न्याय्यं च, सर्वेषां पदानां ब्रह्मणि शक्तौ पर्यायत्वापत्त्या सहप्रयोगायोगात् । लाक्षणिकानां तु तत्तल्लक्षयनिवृत्त्यै सहप्रयोगः प्रसिद्धो लक्षणवाक्येषु सोऽयमित्यादिवाक्येषु च । उक्तं च—'लक्ष्यार्थैक्याविशेषेऽपि व्यवच्छेद्यविभेदतः । ज्ञानानन्दादिशब्दानां पर्यायत्वर्थता न हि ॥' इति, 'अनवतीतभेदस्याधरत्वप्रतियोगिते । अवच्छिनत्ति यद्वस्तुदुपलक्षितबोधतः ॥ भेदभ्रमनिवृत्तिर्हि सोऽयमित्यत्र दृश्यते । अतोऽनेकपदादानं श्रुतौ न हि विरुध्यते ॥' इति च । न च शक्यसंबन्धग्रहार्थं प्राथमिकोपस्थितिः कथमिति वाच्यम्, विशिष्टघटकस्य चिदंशस्यापि शक्त्यैवोपस्थितौ सत्यां जडत्वावच्छिन्नं मिथ्येति बोधिते सति तर्काच्छुद्धोपस्थितौ सत्यां भागत्यागस्य सुकरत्वात् इत्यन्यत्र विस्तरः । विधिशेषेऽपि ब्रह्मादिपदानां शक्तिः कथं ग्राह्येति तु न प्रपञ्च्यते, यूपाहवनीयादिशब्दतौल्यादुभयसंमतत्वाच्चेति दिक् ॥

यत्त्विह 'ईक्षतेः' इति सूत्रस्यावतरणे मध्वभाष्ये 'न तच्छब्दगोचरम्' इति प्रयुक्तम्, तत्र गोचरशब्दस्य स्त्रीत्वं प्रामादिकम्, नित्यपुंस्त्वात् । तथा च लिङ्गानुशासने 'पुमान्' इत्यधिकारे सूत्रितम्—'घाजन्तश्च' इति । उदाहृतं च वृत्तिकृद्भिः—'गोचरो विषयः' इति । प्रयुक्तं च श्रीहर्षेण—'परेखाबलयच्छलेन या न परेषां ग्रहगस्य गोचरः' इति । न केवलमिहैव प्रमादः, किं तु प्रायेण मध्वादिभिरपशब्दा एव प्रयुज्यन्ते । तत्र दिङ्मात्रमुदाहरामः—भारततात्पर्यनिर्णये स्वर्गारोहणपर्वाख्ये द्वात्रिंशेऽध्याये 'हरिं वदन्तीति समर्थयित्वा' इत्युक्तम् । अत्र समर्थ्येति युक्तम् । तथाऽनुव्याख्याने 'मिथ्याया: साधकत्वं च न सिद्धं प्रतिवादिनः' इत्यत्र मिथ्येति वक्तव्ये मिथ्याया इति । तथा तत्रैव द्वितीयाध्याये 'अर्थत्वमर्यतैव स्यात्' इत्यत्र 'अर्यः स्वामिवैश्ययोः' इति व्याकरणविरुद्धमर्यमाणस्य प्रतिपादनार्थमर्यपदम् । तथा 'सभासभास्वत्प्राभीकपूर्वैस्तु स्पर्धिनामपि' इति श्लोके प्राभीकेति दीर्घकारं प्राभीकपदम् ।

तथा सांख्याधिकरणे 'साक्षादनुभवारूढं शक्यतेऽपोदितुं कचित्' इत्यत्रापवदितुमिति वक्तव्ये अपोदितुमिति। तथा तत्रैव 'स्वनाशार्थं च को यतेत्' इत्यत्र यतेतेति वक्तव्ये यतेदिति। तथा 'विशेषकाल एवैतत्सृष्ट्यादीच्छा सदातता' इत्यत्र सदातनीति वक्तव्ये सदातनेति प्रयुक्तम्। यत्तु 'जयतीर्थेन—' गोचरशब्दस्य स्त्रीत्वमाशंस्य; प्रज्ञशब्दात् करोतीत्यर्थे ईकक् वक्तव्यः; अपोदितुमिति छान्दसं संप्रसारणम्; यतेदिति परस्मैपदं बाहुलकात्; सदातनेति नेमौ तुट्ट्युलौ, किं तु भवार्थे तनप्रत्ययः' इत्यादिग्रन्थेन तत्र तत्र तत्त्वप्रकाशिकान्यायसुधयोः वर्णितम्, तत्तु द्वयोरपि भ्रान्तत्वप्रतारकत्वादिदार्ढ्यायैवावहति। अन्यथा हि मध्वग्रन्थे पाठान्तरकल्पनादिकुशकाशावलम्बनं स्यात्; व्याख्यातृग्रन्थात्तु बलादपि गत्तमिति पुलार्थं पुरश्चरणं कृत्वा भर्तृप्रपञ्चमपि यापितवतीति न्यायापातः। किं च जयतीर्थोऽपि प्रायेणापशब्दान् प्रयुङ्क्ते। तथा च तत्त्वप्रकाशिकायां तृतीयश्लोके 'स्वान्तध्वान्तनिकृन्तने' इत्युक्तम्; निकर्तन इति तु युक्तम्। सप्तमश्लोके 'रथ्याद्विर्लभ्यते यथा' इति प्रयुक्तम्। रथ्यापामिरिति प्राप्नोति। तथा प्रथमसूत्रे शापस्य स्वहतगोनिर्भर्तृमात्रविषयत्वादिति, द्वित्रिशाखानिर्णायकत्वादिति, प्रसिद्धार्थस्य विरोधैकापोद्यत्वादिति च प्रयुक्तम्। स्वहतगवीति द्वित्रशाखेति विरोधैकापवाद्यत्वादिति च प्राप्नोति। 'छन्दोऽभिधानान्न' इत्यधिकरणे गायत्रीनिर्णयोऽवश्यापेक्षित इति 'लिङ्गभूयस्त्वात्तद्धि' इत्यधिकरणे प्रधानस्य प्राबल्यात्तदवश्यापोदितमिति च कृत्याकृत्यविवेकवैधुर्येण प्रयुक्तम्। न हि 'लुप्तेदवश्यमः कृत्ये' इति विहितो लोपः निष्ठान्ते उचितः। तथा 'छन्दोभिधानान्न' इत्यन्यत्रापि बहुषु स्थलेषु समर्थयत्सूत्रमिति प्रयुक्तम्। समर्थयमानमिति तु प्राप्तम्। सांख्याधिकरणे सुधायां मे चैतन्यमिति व्यवहारमात्रमिति प्रयुक्तम्। 'अभ्युपगमेऽप्यर्थाभावात्' इति सूत्रे तत्त्वप्रकाशिकायां मे ज्ञाता जन्ध्येतिवदिति प्रयुक्तम्। ममेति तु प्राप्नोति, पदात्परत्वाभावेन मन्यादेशायोगेः। पूर्वमीमांसा तु शब्दादिभिर्न ज्ञायत इति 'शब्दादेव प्रमितः' इत्यधिकरणे स्फुटीकरिष्यते इति दिक्। तदेवं मध्वाभिमता पञ्चाधिकरणी अनूद्य दूषितेति उत्तरस्य ग्रन्थस्य प्रथमाध्यायशेषस्य प्रवृत्तिं परे इत्थमाहुः। विष्णोः शास्त्रगम्यत्वे समन्वयो हेतुतयोक्तः। स चोपक्रमादितात्पर्यलिङ्गरूपः तद्यावत्तत्तद्वाक्यविशेषानुदाहृत्य पूर्वोत्तरपक्षप्रथनेन विष्णोरेवोपक्रमादिरिति न्यायेनैव स्थाप्यते तावत्समन्वयासिद्ध्या विष्णोः शास्त्रगम्यताऽपि न सिध्यति। अन्यथा शैवा अपि शिवपरत्वं समन्वयादित्युपन्यासमात्रेण कथं न ब्रूयुः। अतः समन्वयसिद्ध्यर्थमध्यायशेष आरभ्यत इति। अत्रेदं वक्तव्यम्—उपरितनेषु सर्वेष्वधिकरणेषु विष्णौ समन्वयप्रपञ्चनरूपः सिद्धान्तस्तावद्संगतः, सृष्ट्यादिवाक्यप्रतिपाद्यत्वं विष्णोर्न संभवतीति पञ्चमाधिकरणखण्डन एवोक्तत्वात्। गुणाः सर्वे ध्यानायेति ध्येयं च ब्रह्म नेति ज्ञेयस्य परब्रह्मणोऽनन्तकल्याणगुणैरपूर्णतेति गुणाः स्वरूपेणात्यन्तभिन्ना इति च तत्तदधिकरणस्थितत्वात् सिद्धान्तानां परस्परव्याघातस्योद्भटतयोपपादनानपेक्षत्वाच्च। तथा तत्तद्वाक्यानां तत्तदधिकरणपूर्व-

सिद्धान्तस्तु—

वाक्यैकत्वं विधिस्तुत्योर्विषयैक्यादते न हि। तेनात्र वाक्यशेषस्या प्रतिपत्तिर्बलीयसी॥

यदि लौकिकोऽर्थो विध्युद्देशेनाश्रीयते, अन्यार्थो वाक्यशेषोऽन्यार्थश्च विध्युद्देश इति न कथंचन संबन्धः स्यात्। तस्माद्यत्र वाक्यशेषः 'त्रिवृद्बहिष्पवमानम्' इत्यादिषु, तत्र तावत्तदनुगुण एवार्थः समाश्रयणीय इत्येतावदिहाधिकरणे स्थितम्। यदा चैवं वाक्यशेषवशात्स्तोत्रीयानवकमपि वाच्यमित्यवधारितम्, तदा यत्र वाक्यशेषो नास्ति—'त्रिवृदग्निष्टु-

---

प्रवृत्तत्वात् स्तुत्यर्थमेव प्रवृत्तत्वाच्चोपादित्सादेवचमाकर्षकतया नेतव्य इति भावः। तुल्यप्रमाणकत्वादिति। यद्यपि लोकाधिकत्वपूर्वपक्षे लौकिक एवार्थो ग्राह्य इति न विकल्पः, तथाऽपि तस्मिन् पूर्वपक्षे 'समा विप्रतिपत्तिः स्यात्' इति पूर्वपक्षसूत्रमननुगुणम्। 'किं समा विप्रतिपत्तिः स्यात्? न स्यात्, लोकप्रतिपत्तेरेव बलीयसी' इति काका क्षेपेण योजनीयमित्यभिप्रेत्य सूत्राक्षराण्यस्य तदनुगुण्येन तुल्यबलत्वावष्टम्भपूर्वपक्ष एवोपसंहृतः॥

वाक्यैकत्वमिति। यद्यपि स्तुतिप्रधानो वाक्यशेषोऽन्यपरः, तथाऽपि विधिस्तुत्योः समानविषयत्वनियमात् स्तुतिविषयस्यार्थस्यान्यथानुपपत्त्या विधिविषयत्वप्रतीतेः, तस्य चोपसंहारगतस्यापि विध्युद्देशेनाग्रहणे निरालम्बनत्वेनार्थवादानर्थक्यापत्तेः 'आनर्थक्यप्रतीहतानां विपरीतं बलाबलम्' इति न्यायाद्बलीयस्त्वमिति भावः। किं च वाक्यशेषे सर्वत्र नान्यपरत्वनियमः, त्रिवृद्वाक्यशेषस्य स्तोत्रीयानवकानुक्रमणस्य च तद्विधानार्थत्वादित्यपि द्रष्टव्यम्। ननु दशमे 'त्रिवृदग्निष्टोमः' इत्युदाहृत्य किमग्निष्टोमगतसर्वसंख्याधिकारिका त्रिवृत्संख्यास्तोमरूपसंख्यामात्रविकारिका वा इति संदिह्य 'त्रिवृद्वसुः' इत्यादौ लोके त्रिवृच्छब्दस्य त्रैगुण्यवाचित्वदर्शनात् त्रिवृत्त्वस्य संख्यात्वसामान्येन ऋत्वङ्गगतसर्वसंख्याकार्ये निवेशप्रतीतेः सर्वसंख्याविकारित्वेऽपि 'त्रिवृति संख्यात्वात् सर्वसंख्याविकारः स्यात्' इति सूत्रेण पूर्वपक्षयित्वा 'त्रिवृद्बहिष्पवमानम्' इत्येतदनन्तरं स्तोत्रीयानवकाम्नानात् त्रिवृच्छब्दस्य च स्तोत्रीयानवकवाचित्वप्रतीतेरिहापि स्तोत्रीयानवकसंख्यारूपस्तोमरूपैव पञ्चदशत्वादिसंख्या त्रिवृत्संख्यया वाध्यत इति 'स्तोमस्य वा तद्धितत्वात्' इति सूत्रेण सिद्धान्तयिष्यते। तेन गतार्थ इह त्रिवृच्छब्दविचारः। तथा दर्शपूर्णमासयोरेव 'सौर्यं चरुं निर्वपेत्' इत्यादौ चरुशब्दो लौकिकप्रसिद्ध्या स्थालीवचन इति पूर्वपक्षं कृत्वा 'ओदनो वा प्रयुक्तत्वात्' इति सूत्रेण वेदयाज्ञिकप्रसिद्धिभ्यामोदनवचन इति सिद्धान्तयिष्यते। तेन गतार्थमत्रत्यं चरुशब्दार्थनिर्णय इत्याशङ्क्याह— यदा चैवमिति। यत्र वाक्यशेषस्तत्र भवतु त्रिवृच्छब्दस्य स्तोत्रीयानवकवाचित्वम्, चरुशब्दस्यौदनवाचित्वं च; यत्र नास्ति तत्र लौकिकप्रसिद्धेर्बलीयस्त्वात् त्रैगुण्यवाचित्वं, स्थालीवचनत्वं च स्यादित्यधिकशङ्कापरिहारार्थं वाक्यशेषिकं तदधिकरणमुक्तम्। तत्रेत्थं त्रिवृदधिकरणे तत्परिहारः— यद्यपि लोके त्रैगुण्यवाची त्रिवृच्छब्दः, तथाऽपि वेदे क्वचिद्वाक्यशेषेण स्तोत्रीयानवकत्वमपि दृष्ट्वा य

दम्निरोमः' इत्यादिषु, तत्राप्यनेनैवार्थेन भवितव्यं रूढित्वादिति दशमे वक्ष्यते। चरुशब्दो-ऽप्योदनस्थाल्योः परस्परसंबन्धित्वाद्वाक्यशेषावधारितौदनवचनत्वेन स्थाल्यामन्यार्थं चानेकार्थत्वमिति प्रतिबद्धशक्तिकः लाक्षणिकः। तेनासत्यपि वाक्यशेषे 'सौर्यं चरुं निर्वपेत्' इत्यादावप्योदनवचनत्वमेवेति दशमे वक्ष्यते। आश्वत्थौदुम्बरीशब्दावपि काशतन्मूलयो रूढत्वादन्यत्रापि तदर्थावेव भवतः। न चात्र 'संदिग्धेषु वाक्यशेषात्' इत्यनेन गतत्वम्, असंदेहात्। इह हि वाक्यशेषात्प्रागनन्तरमेव गृहीतं वाक्यशेषेण बाध्यते, न तु प्रथमं संदिग्धं तेन निर्णीयत इति॥

वाचक इति स्थिते, यत्र वाक्यशेषे नास्ति, तत्रापि रूढित्वौदनत्वसामान्याभ्यां एवार्थो ग्राह्यः। तज्ज्ञापनार्थमेव हि 'त्रिवृद्विष्णवमानम्' इत्यत्र त्रिवृच्छब्दः। अन्यथा केवलं बाहुल्यवमानमित्युपक्रम्य स्तोत्रीयानवकसंख्यासिद्धेः त्रिवृद्ग्रहणं निष्फलं स्यात्। अतो वाक्यशेषरहितस्थलेऽपि 'त्रिवृदभिष्टुत्' इत्यादावयमेव त्रिवृच्छब्दार्थो ग्राह्य इति ज्ञापनेनैव तत्साफल्यमुपपादनीयमिति। चर्चाधिकरणे द्वितीयं तत्परिहारः— वाक्यशेषवति स्थले चरुशब्दस्यौदनवचनत्वे निश्चिते स्थाल्यां तत्संबन्धाल्लक्षणोपपत्तौ न तस्यामपि शक्तिः कल्पनीया। अतो वाक्यशेषरहितस्थले चरुरोदन एव, मुख्यार्थत्वादिति। अतस्त्रिवृच्चर्चाधिकरणयोरेतदधिकरणाधीनफलविचारार्थत्वान्न ताभ्यामस्य गतार्थतेति भावः। रूढत्वादिति। काशानामश्ववालपरिणामत्वश्रुतेरर्थवादमात्रत्वादश्ववालशब्दः काशेषु रूढ एवेति भावः। वाक्यशेषात् प्रागिति। 'तेजो वै घृतम्' इति वाक्यशेषाभावेऽप्यञ्जनसाधनत्वेन तैलादीनामिव घृतस्यापि श्रवणादस्ति तत्र घृततैलादिसाधारण्यव्यवस्थिताञ्जनसाधनद्रव्यप्रतीतिरूपः संदेहः। इह तु वाक्यशेषाभावे स्तोत्रीयानवकरूपस्यार्थान्तरस्यानुन्मेषान्न संदेहः। किं तु केवलया लोकप्रसिद्ध्या त्रैगुण्यमेवार्थः प्रतीयत इति विपर्ययो निराकार्य इति भेद इत्यर्थः। यद्यपि न्यायैक्ये निराकार्यविषयभेदमात्रेण अगतार्थत्वं न भवति, तथाऽपि निराकार्यतैलाधलविशये सति तद्वत्त्वेव। ततश्च विधिस्तुत्योः समानविषयत्वनियमस्य संदेहनिरासेऽपि न बलवद्विपर्ययनिरासेऽपि सामर्थ्यमित्यधिकशङ्कानिराकरणार्थत्वेनेदमधिकरणं सार्थकम्। न चैवं विपर्ययनिराकरणेऽपि समर्थस्य न्यायस्य संदेहनिरासे सामर्थ्यं कैमुतिकन्यायसिद्धमित्यनेनाधिकरणेन गतार्थत्वादुक्ताधिकरणमनारम्भणीयं स्यादिति वाच्यम्। 'अक्काः शर्करा उपदधाति' इत्यत्र अर्थादञ्जनसाधनत्वेन तैलादिवद्घृतस्यापि प्रतीतेः। 'एकं वृणीते' 'द्वौ वृणीते' इतिवत् 'तेजो वै घृतम्' इत्यस्यावयुत्यनुवादेन स्तावकतया विधिसमानविषयत्वमुपपद्यत इत्यधिकशङ्कानिरासेन तत्साफल्यात्। अत्र वाक्यशेषानुग्रहवद्यवराहादिशब्दार्थविचारे, तद्रहितपीलवादिशब्दार्थविचारे, स्तुत्याचारबलाबलविचारे, त्रिवृच्चर्वादिशब्दार्थविचारे च 'तेष्वदर्शनात्' इति पूर्वपक्षसूत्रस्य 'शास्त्रस्था वा' इति सिद्धान्तसूत्रस्य योजनं न्यायसुधादिषु द्रष्टव्यम्। विस्तरभयात्सूत्रार्थो नेह लिख्यते॥

आर्यप्रसिद्धयविरोधे म्लेच्छप्रसिद्ध्यर्थापत्तिप्रमाणकत्वम् ॥ २ ॥

कोकिलादिषु तु प्रतीयेताविरोधात्प्रमाणेन ॥ १० ॥

॥ जैमिनीयन्यायमाला ॥

कल्प्यः पिकादिशब्दार्थो ग्राह्यो वा म्लेच्छरूढितः । कल्प्य आर्येष्वसिद्धत्वादनार्याणामनादरात् ॥ २० ॥

ग्राह्या म्लेच्छप्रसिद्धिस्तु विरोधादर्थने सति । विकतेनेत्यादिशब्दानां कोकिलाद्यर्थता ततः ॥ २१ ॥

अर्थाबोधादप्रमाणं पिकाद्यम्भनचोदना । मैवं म्लेच्छप्रसिद्धाऽपि तद्बोधाविरुद्धया ॥ २२ ॥

आर्यप्रसिद्धिविरोधे म्लेच्छप्रसिद्धेरप्रामाण्यमुक्तम्। इदानीं किं म्लेच्छप्रसिद्धिरित्येवाप्रमाणमुत बलवद्विरोधादप्रमाणम्? अविरोधे तु तस्या अपि भवत्येवाभिधेयनिर्णये प्रामाण्यमिति चिन्त्यते। पिकनेमशतताम्रसादिशब्दा न क्वचिदार्याणां प्रसिद्धाः; म्लेच्छानां तु कोकिलादिषु प्रसिद्धाः। तत्र यद्यप्रमाणकेन म्लेच्छप्रसिद्धिस्ततस्तेषां निरुक्तादिवशेनार्थकल्पनम्। अथ तु सा प्रमाणम्, ततः सैव आश्रयिष्यते। तदत्र म्लेच्छप्रसिद्धिः प्रामाण्ययोग्या न वेत्येतावदधिकरणशरीरम्। सत्यपि तु प्रामाण्ये किं म्लेच्छगतत्वाद्दुर्बला, निरुक्तादिद्वारा शास्त्रस्थत्वाद्बलीयसी उतेतरेव दुर्बला स्यादित्यत्र, म्लेच्छप्रसिद्धिस्तु कृत्स्नत्वाद्बलीयस्त्वेतत्पासङ्गिकम्। सिद्धान्तपक्षे त्वेतदप्रासङ्गिकं स्वरूपगतमेव बलाबलं प्रमाणद्वारकाज्ज्याय इति। तेनैव न्यायेनात्रापि प्रयोक्तृद्वारा बलाबलात्कल्पकल्पत्वेन स्वरूपगतमेव

कोकिलादिषु तु प्रतीयेताविरोधात्प्रमाणेन ॥

कोकिलादिष्विति। पिकशब्दः कोकिले, नेमशब्दोऽर्धे, सतशब्दः शतच्छिद्रदारुपात्रे, तामरसशब्दः पद्मे च म्लेच्छानां प्रसिद्धः। ननु कथमतदेवाधिकरणशरीरम्? वार्त्तिके म्लेच्छप्रसिद्धेः प्रामाण्यमभ्युपेत्यापि ततः स्मृतितः श्रुतेरिव वैदिकपदार्थनिर्णयेदम्पर्येण प्रवृत्तस्य निरुक्तस्य बलीयस्त्वात्तत एव वैदिकपदार्थनिर्णयो युक्त इति पूर्वपक्षान्तरं कृत्वा म्लेच्छप्रसिद्धया कोकिलादिषु पिकादिशब्दानां शक्तिः कल्प्येति कल्पनकल्प्यत्वदूषणस्य प्रमेयबलाबलस्य निरुक्तम्लेच्छप्रसिद्धिरूपप्रमाणबलाबलाद्बलीयस्त्वान्म्लेच्छप्रसिद्ध एव तेषामर्थो ग्राह्य इति सिद्धान्तो दर्शितः। अतस्तदप्यस्मिन्नधिकरणे व्युत्पाद्यमित्याशङ्क्य शिष्टाकोपाधिकरणे व्युत्पादितं नेह व्युत्पाद्यम्; वार्त्तिके तु शिष्यबुद्धिवैशद्यार्थं तस्यैव स्मारणं कृतमित्याह— सत्यपि तु प्रामाण्य इति। म्लेच्छप्रसिद्धेः म्लेच्छप्रसिद्धित्वेनैवाप्रामाण्यम्। तस्यां

ज्यायो भवति; तेन गतप्रायमिह प्रसङ्गत उक्तं भाष्यकारेण। प्रामाण्यसंभवासंभवमात्रं तु म्लेच्छप्रसिद्धेर्विचार्यते। तत्र पूर्वः पक्षः—

म्लेच्छेषु हि पदार्थानां विप्लुतिर्भूयसी यतः। ततस्तेषु प्रसिद्धेऽर्थे न विस्रम्भः कथंचन॥

पदानि पदार्थाभिधानभ्रंशप्रायाः एव म्लेच्छेषु बाहुल्येन; तेषु कथमिवाविप्लुतिपदार्थविधारणम्। अतोऽप्रमाणं म्लेच्छप्रसिद्धिः। न हि ते दृष्टार्थव्यवहारित्वाच्छब्दार्थाविप्लवे यत्नं कुर्वन्ति। तस्माद्विप्लुतिसंभवात्तेषु प्रसिद्धोऽर्थो न विस्रम्भणीयः। निरुक्तादिद्वारेण त्वर्थकल्पनं पिकादीनामिति॥

सिद्धान्तस्तु—

पदानि तावदेतानि वेदादिष्वेव दर्शनात्। अविप्लुतानि तेषां च भाव्यमर्थेन केनचित्॥
नित्येनार्थेष्वसौ नास्ति यतो म्लेच्छेषु विप्लुतिः। म्लेच्छप्रसिद्ध एवार्थस्तेषामिति हि निर्णयः॥

पिकादिपदानि तावद्वेदतदङ्गादिषु दृष्टत्वादविप्लुतानि। तदेषां नित्येन केनचिदर्थेन भवितव्यम्। न चामीषामार्येष्वर्थः कश्चिदस्ति, यत्र गुरूणि भूत्वा म्लेच्छप्रसिद्धेऽर्थे गौणभ्रान्त्यादिनिमित्तप्रयोगमात्रे विप्लुतिं गच्छेयुः। न ह्यसति गुरुत्वे गौण्यादिसंभवः। तस्मान्म्लेच्छप्रसिद्ध एवार्थोऽमीषां नित्योऽध्यवसीयते। अतः तत्सिद्धमविरुद्धेषु प्रसिद्धवाचकेषु म्लेच्छानामभिधेयनिर्णये प्रामाण्यमिति॥

विप्लुतिभूयस्त्वदर्शनेन पिकादिशब्दव्यवहारेऽपि तच्छब्दज्ञानपर्यन्तात्। अतो निःशङ्कानिरुक्तादेव वैदिकपिकादिशब्दार्थो ग्राह्य इति पूर्वपक्षं कृत्वा सिद्धान्तमाह— पदानि तावदिति। एतानि म्लेच्छैः प्रयुज्यमानान्येव पिकादिपदानि वेदेषु निरुक्तादिषु च दृश्यन्ते। अतस्तेषां नित्यानां म्लेच्छेष्वप्यविप्लुतानां नित्येन केनचिदर्थेन भाव्यम्। न चार्येषु तेषां कश्चिदर्थः कल्पोऽस्ति, यमवलम्ब्य यवबराहादिवत् गौणप्रयोगमूलभ्रान्तिपरम्परया म्लेच्छेषु विप्लुतिं कल्पयेम। तस्मान्म्लेच्छेष्वविप्लुतानां पिकादिपदानां वैदिकपदत्वेनावश्यंभाव्यर्थस्तत्प्रसिद्ध एव ग्राह्यः विरोधिप्रसिद्ध्यन्तराभावादित्यर्थः। श्लोकौ व्याचष्टे— पिकादिपदानीति। ननु असत्यां वैदिकप्रसिद्धौ निरुक्तादेवार्थनिर्णयो युक्तः। निरुक्तस्य वैदिकपदार्थनिर्णयार्थत्वेनैव वेदाङ्गतया निरुक्तेनार्थं निर्णीय वैदिकार्थानुष्ठानादेवापूर्वसिद्धयवगमादित्याशङ्क्याह— न ह्यसति गुरुत्व इति। यत्र लोकप्रसिद्धितो नार्थनिर्णयः, तत्रैव निरुक्तान्वेषणम्, अन्यथाऽऽर्यप्रसिद्धिमत्स्वपि वैदिकपदेषु निरुक्तान्वेषणप्रसङ्गात्। तेष्वपि तदन्वेषणे लोकवेदाधिकरणन्यायाविरोधात्। अतः

पिकादिशब्दानामर्थान्तरशक्तिकल्पन्यभावात् म्लेच्छप्रसिद्धेर्गौणप्रयोगमूलत्वकल्पनं न दुष्कमित्यर्थः। अधिकरणार्थमुपसंहरति— तत्सिद्धमिति ॥

॥ कल्पसूत्राधिकरणम् ॥ ७ ॥

प्रयोगशास्त्रमिति चेत् ॥ ११ ॥ नासंनियमात् ॥ १२ ॥ अवाक्यशेषाच्च ॥ १३ ॥ सर्वत्र च प्रयोगात् संनिधानशास्त्राच्च ॥ १४ ॥

॥ जैमिनीयन्यायमाला ॥

अपौरुषेयाः कल्पाद्याः कृत्रिमा वा न कृत्रिमाः। श्रुतिस्मृत्योर्धर्मबुद्धेः स्वतो मात्वं यतः समम् ॥ २३ ॥
पुंनामोक्तेः पौरुषेयाः काठकाद्यसमत्वतः। तत्रोपकेभिरे केचिदापस्तम्बादिकर्तृताम् ॥ २४ ॥
कल्पे सर्वतिथौ दर्शकार्यत्वोक्तेः श्रुतिर्न सा। न कल्पे साध्यवेदत्वप्रहाणाद्दुर्बलत्वतः ॥ २५ ॥

अथ कल्पसूत्राण्युदाहृत्य किं प्रमाणमप्रमाणं वेति भाष्ये विचारितम्। ननु स्मृत्यधिकरण एव सर्वेषामेव वेदातिरिक्तानां प्रामाण्याप्रामाण्यानि चिन्ता कृता। तत्र केचिदाहुः— तत्राशब्दतया पूर्वपक्षमुक्त्वा शब्दानुमानेन सिद्धान्तितम्। एतानि च वैदिकार्थनिबन्धनत्वात्प्रत्यक्षशब्दानीति न तत्रोदाहरणम्। स्मृतयो हि प्रायेणेतस्ततो विप्रकीर्णपर-

प्रयोगशास्त्रमिति चेत् ॥

गतार्थत्वशङ्कावसरदानाय भाष्याक्षरप्रतीतमधिकरणस्वरूपं दर्शयति— कल्पसूत्राणीति। श्रुतिसिद्धं क्रतुप्रयोगं पठनेन स्फुटीकुर्वन्तो बोधायनीयादयः कल्पाः। स्वकृताभिः संज्ञापरिभाषाभिरपवर्गापवादैश्च लक्षणमुखेन तज्ज्ञापकान्याश्वलायनीयादीनि सूत्राणि। तदुक्तं वार्त्तिके— 'सिद्धरूपप्रयोगो यैः कर्मणामनुगम्यते। ते कल्पा लक्षणार्थानि सूत्राणीति प्रचक्षते ॥ १ ॥ कल्पनेन प्रयोगाणां कल्पोऽनुष्ठानसाधनम्। सूत्रं तु सूचनात्तेषां द्वयं कल्यप्रयोगकम् ॥ २ ॥ कल्पाः पठितसिद्धा हि प्रयोगाणां प्रतिक्रतु। बोधायनीयदाराहमासकादिप्रबन्धवत् ॥ ३ ॥ स्वसंज्ञापरिभाषाभिर्यदुत्सर्गापवादवत्। हेतुदृष्टान्तवत्सूत्रं तल्लक्ष्यव्यापि लक्षणम् ॥ ४ ॥ आश्वलायनकं सूत्रं बीजावापकृतं तथा ॥ द्राह्यायणीयलाटीयकात्यायनकृतानि च ॥ ५ ॥' इति। भाष्यात्प्रतीतं विचारं प्रदर्श्य तत्र स्मृत्यधिकरणेन गतार्थतामाशङ्कते— नन्विति। वेदातिरिक्तानामिति। वेदव्यतिरिक्तानि यानि विद्यास्थानानि धर्मशास्त्रपुराणेतिहासकल्पसूत्रादिरूपाणि तेषां सर्वेषामित्यर्थः। अशब्दतया मूलवेदरहिततया। शब्दानुमानेन मूलवेदानुमानेन। वैदिकार्थनिबन्धनत्वात् वेदपरिपठितक्रतुप्रयोगनिबन्धनत्वात्। स्मृतीनां तद्वैलक्षण्यं दर्शयति—स्मृतयो हीति। विप्रकीर्णश्रुतयो नानादेशविप्रकी-

प्रकरणपठितवाक्यशेषगतसिद्धवन्निर्देशानुपपत्तिकल्पनातिरोहितप्रायविधिमूलाः। तद्यथा 'नयनं दक्षिणं दीक्षितः पूर्वमङ्क्ते सव्यं हि मनुष्याः पूर्वमञ्जते' इति प्रसिद्धवत्सव्यस्य पूर्वमञ्जनं निर्दिश्यम्, तच्च दृष्टप्रयोजनाभावात्प्रमाणान्तरेणाप्राप्तमित्यनुपपत्त्या विधिः कल्प्यते। तथा 'तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति, तस्माद्ब्रूणाविज्ञातेन ब्रह्महा' इत्येवंविधं स्मृतीनां मूलम्। अत एव चैषु स्मार्तत्वप्रसिद्धिः, प्रत्यक्षश्रुतावविहितत्वात्। दर्शपूर्णमासादिषु तु प्रत्यक्षविधिसद्भावाच्छ्रौतत्वम्। इत्येव च किल मनसि निधायेत्यभिप्रेत्य गौतमेनोक्तं 'प्रत्यक्षश्रुतिविधानाद्गार्हस्थ्यस्य' इति; न तु स्मृतिसम्भारयैवानुष्ठेयत्वम्, अन्धपरम्परादोषात्। अत एव प्रत्यक्षश्रुतिविरोधे स्मृतेरननुष्ठानम्। स्मृतयो हि सिद्धवन्निर्देशानुपपत्तिकल्पित-

---

र्णासु शाखासु पठ्यमानानि विधिवाक्यानि, परप्रकरणगतानि दर्शपूर्णमासप्रकरणगतामलवद्वासोव्रतकलापवित्रधानादीनि, प्रसिद्धवन्निर्देशकल्प्यान्युदाहरिष्यमाणसव्यनयनाञ्जनप्राथम्यविध्यादीनि। एत एव विप्रयो विप्रकीर्णवाक्यहेतुभिस्तिरोहितप्रायाः। दीक्षित इति। दीक्षितं प्रस्तुत्य 'यदाञ्जे चक्षुरेव मार्ष्टव्यस्य वृङ्क्ते' इत्यत्र दीक्षाचिह्नमञ्जनं विधाय, 'दक्षिणं पूर्वमाङ्क्ते' इति तस्मिन्नञ्जने दक्षिणनयनप्राथम्यं पाठानन्तरं पठितोऽयं 'सव्यं हि' इति प्रसिद्धवन्निर्देशः। तत्र मानुषाणां सव्याञ्जनप्राथम्ये दृष्टमूलाभावात् विध्यन्तरशेषात्रैव विधिकल्पनमित्यर्थः। तस्मादपि वध्यमिति। 'अग्नाविष्णवित्रवाहस्रजुष्टेन त्वष्ट्रे[illegible] स्वाहा' इति पाक्षीयतन्त्रयोगाभ्यासमन्त्रशेषोऽयमर्थवादः— 'देवा वै ब्रह्मचारमजिघाँसन्[illegible] तं न प्रतिप्रायच्छन्। तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति' इति। अयमेव— 'कस्यांचिद्वध्यस्त्रियामन्यादन्यं प्राणशक्तं शरणं प्रपन्न, तेन स वधोद्युक्तः प्रति न प्रदातव्यः। सर्वथा प्राणभयाद्रक्षणीय एव' इति विधिरनुमीयते। तस्माद्ब्रूणेति। 'अविज्ञातो वा एष गृह्यते यदाग्नेयग्रहस्त्र्या गृह्यति' इति विधिशेषोऽयम्— 'तस्माद्ब्रूणेणाविज्ञातेन ब्रह्महा' इति। द्वादशवार्षिकं ब्रह्महत्याप्रायश्चित्तं ब्राह्मणहनन एव; ब्राह्मणीहनने तु तत्रैव वार्षिकमुपपातकप्रायश्चित्तम्। गर्भिणी चेद्ब्राह्मणी हता, तदा गर्भः स्त्री पुमानेवमविज्ञाते ब्रह्महत्याप्रायश्चित्तातिदेशार्थो विधिः स्मृतिषु निबद्धोऽनेन वाक्यशेषेण अनुमीयते। अत एवेति, नानाशाखाविप्रकीर्णत्वेन परप्रकरणगतत्वेन विध्यन्तरशेषार्थवादोन्नेयत्वेन च गूढविधिमूलत्वरूपवैलक्षण्येन मन्वादिभिरुक्तधर्माः स्मार्तव्यवहार इत्यर्थः। प्रत्यक्षविधिसद्भावादिति। अविप्रकीर्णश्रुतपथब्राह्मणादिगताधीयमानश्रुतिसद्भावादित्यर्थः। न त्विति। 'प्रत्यक्षविधानाद्गार्हस्थ्यस्य' इति गौतमवचनं गार्हस्थ्य एव प्रत्यक्षविधानम्, अन्यस्यानुमेयवेदविधानमित्येतदर्थकं न भवति, किं तु अधीयमानविधानार्थकमेव, नित्यानुमेयवेदवादेऽन्धपरम्परादोषस्योक्तत्वादित्यर्थः। प्रत्यक्षश्रुतिविरोधे स्मृत्यर्थस्य कथमननुष्ठानम्? तद्विरोधेऽपि स्मृतीनां विप्रकीर्णमूलश्रुत्यनुमापकत्वस्य प्राक् समर्थितत्वादित्याशङ्क्य तत्रैव समर्थितं तासामननुष्ठापकत्वलक्षणमप्रामाण्यं स्मारयति—

विधिमूलतयाऽपि संभाव्यन्ते । कल्पना च प्रत्यक्षश्रुतिविरोधेऽनुपपन्ना । तेनाविरुद्धविषयवद्विरुद्धविषयेऽपि न्यायाभासेन विधिं कल्पयित्वा, किमियं स्मृतिः प्रवर्तिता, किं वा 'अग्निहोत्रं जुहुयादाद्यन्ते द्युनिशोः सदा' इत्यादिप्रत्यक्षश्रुतेरेव विधिं दृष्ट्वेति विचिकित्सोदयाद्यावत्तद्विषयः प्रत्यक्षविधिर्नोपलभ्यते तावत्तदनादरेण प्रत्यक्षोपलब्ध एवानुष्ठेय इति । तेन स्मृतय एव तत्रोदाहरणं, न कल्पसूत्राणि ॥

किं च, नैषामिह प्रामाण्याप्रामाण्यचिन्ता, किं तु स्वतन्त्राणामेव वेदवत्प्रामाण्यमुत स्मृतिवत्परतन्त्राणामिति ॥

यद्वा भवतु नामैषामपि तत्र विचारस्तेषामपि तु मन्वादीनामिह स्वातन्त्र्यनिराकरणम् । अथवाऽन्यतोऽवधारणम् । तेषां हि 'षडङ्गमेके' इति वेदत्वस्मरणात्स्वातन्त्र्यशङ्का जायते । अथवा शाकपार्थिवन्यायेन श्रुतिमूलत्वेन प्रामाण्ये निरस्ते संप्रति वेदवत्

अत एव प्रत्यक्षेति । ननु श्रुतिकल्पकत्वाभिप्राये कथमननुष्ठापकत्वमित्याकाङ्क्षायां तत्र हेतुं समर्थितमननुष्ठापकत्वं विवृणोति— स्मृतयो हीति । स्मृतयो न केवलं विप्रकीर्णविधिवाक्यमूलाः, किं तु प्रसिद्धवन्निर्देशान्यथानुपपत्तिकल्पितविधिमूला अपि सन्ति । एवं प्रत्यक्षश्रुतिविरुद्धस्मृतौ किमियं प्रसिद्धवन्निर्देशं दृष्ट्वा तदन्यथानुपपत्त्या विधिं कल्पयित्वा तन्मूलेनाहननप्रायश्चित्तस्मृतिवत्प्रवृत्ता, उत प्रत्यक्षश्रुतिं दृष्ट्वेति संदेहो भवति । एवं च प्रत्यक्षश्रुतिमूला चेत् प्रत्यक्षश्रुतिद्वयविरोधे विकल्पो भवतु नाम । सिद्धवन्निर्देशान्यथानुपपत्तिकल्पितविधिमूला चेत् प्रत्यक्षश्रुतिविरोधे तथाविधविधिकल्पनमन्याय्यमिति न्यायाभासमूला सा स्मृतिर्बाध्येति मूलशैथिल्यसंदेहात्तथाविधस्मृताववननुष्ठानलक्षणमप्रामाण्यं भवेदेवेत्यर्थः । तेन स्मृतय एवेति । स्मृत्यधिकरणे हि 'धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्' (जै. १. ३. १.) इति पूर्वपक्षसूत्रे अशब्दमित्यनेनोक्तस्य मूलश्रुत्यभावरूपपूर्वपक्षबीजस्याधीयमानश्रुत्येकदेशेषु कल्पसूत्रेष्वभावादष्टकादिस्मृतय एव तत्रोदाहरणानि, न कल्पसूत्राणीत्यर्थः ॥

भवतु नाम कल्पसूत्राणामपि स्मृत्यधिकरणविषयत्वम्; तथाऽपि न गतार्थता । न हीह कल्पसूत्राणां केवलं प्रामाण्याप्रामाण्यविचारः क्रियते; किं तु तेषां संप्रतिपन्नवेदवत् मूलान्तरानपेक्षं स्वातन्त्र्येण प्रामाण्यमस्ति न वेति विचार्यते । अतो न गतार्थतेत्याह— किं चेति ॥

एवमस्याधिकरणस्य कल्पसूत्रमात्रविषयत्वमाश्रित्यागतार्थता प्रतिपादिता । इदानीं पूर्वपक्षन्यायतौल्यात् मन्वादिस्मृतीनामपीह विषयतामाश्रित्य पक्षान्तरमाह— यद्वेति । निरुक्तादीन्यङ्गानि अत्रोदाहरणम् । 'षडङ्गं वेदमेके' इति तेषां वेदत्वस्मरणस्य पूर्वपक्षबीजस्य सद्भावादिति

स्वातन्त्र्येण प्रामाण्यमाशङ्क्य निराक्रियते । तदेतानि चत्वार्यपि विचारस्थानानि समानन्यायानि सह विचार्यन्ते किमेषां स्वातन्त्र्येण प्रामाण्यं संभवति न वेति । तदर्थं च किमेषां पौरुषेयत्वमपौरुषेयत्वं वेति चिन्तनीयम् । तत्रावगतिस्तावदेतेभ्यो धर्माधर्मविषया जायते । सा च स्वतः प्रमाणम् । तद्यदि पौरुषेयत्वं शाक्यादिग्रन्थानाम् ततः पुरुषदोषादप्रामाण्यापत्तेर्दृष्टप्रामाण्यहानिः स्यात् । अतो दृष्टानुगुण्यादपौरुषेयत्वम् । मन्वादीनां त्वदिगतिमेव प्रामाण्यम् । तत्किमेषामेवापौरुषेयत्वं कल्प्यताम्, उत वाक्यान्तरं कल्पयित्वा तस्य च नित्यत्वकल्पनामिति ? दृष्टानुसारित्वादपौरुषेयत्वकल्पनं न्यायः । अङ्गानां तु 'मन्त्रब्राह्मणयोर्वेदनामधेयं षडङ्गमेके' इति स्मरणादृढनेवापौरुषेयत्वम् । कल्पसूत्राणां तु पठितपाठप्रत्यक्षवेदार्थोपनिबन्धनाच्छाखान्तरतुल्यत्वादपौरुषेयत्वम् । न हि सकलजनप्रत्यक्षवेदवाक्यविषयमर्थं वदतामेषां पुरुषैः प्रणयनं संभवति । मन्वादिभिस्तु समाख्यानं काठकादिवत्प्रवचननिमित्तत्वेनाप्युपपन्नम् ; तन्निमित्ता चैषां लोकानां कर्तृत्वस्मृतिः । भवति चात्र प्रयोगः—

बौद्धाध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
बौद्धाध्ययनसामान्यादद्यतनाऽध्ययनं यथा ॥

तृतीयं पक्षमाह— अथवेति । शाक्यादिग्रन्थविषयत्वेनागतार्थतेति चतुर्थं पक्षमाह— अथवेति । एवं 'केचित्' इत्यादिना प्राचीनानामगतार्थतायां चत्वारः प्रकारा दर्शिताः । इदानीं वार्तिककाररीतिमनुसृत्य कल्पसूत्रमन्वादिस्मृतिषडङ्गशाक्यादिग्रन्थसाधारण्येन सर्वविषयस्वातन्त्र्यविचारः प्रवर्त्यत इत्यगतार्थतामाह— तदेतानीति । सा च स्वतः प्रमाणमिति प्रामाण्यस्वतस्त्वस्य प्रथमपादे व्यवस्थापितत्वेनौत्सर्गिकस्य प्रामाण्यस्य कारणं विना निराकरणं न युज्यत इति भावः । एवं च प्रामाण्याननुगुणपौरुषेयत्वकल्पनायोगात् तदनुगुणमपौरुषेयत्वमेव कल्पयितुं युक्तमित्याह— तद्यदीति । ननु तन्मूलवेदकल्पनेनापि प्रामाण्यमुपपादयितुं शक्यमित्याशङ्क्य तेषामेवापौरुषेयत्वकल्पनया प्रामाण्योपपादनसंभवे तन्मूलस्य तन्नित्यत्वस्य कल्पनं गौरवपराहतमित्याह— तत्किमेषामिति । पठितपाठेति । अधीयमानवेदेषु पठितानामेव कर्मप्रयोगाणां पाठेन प्रत्यक्षवेदार्थनिबन्धनादित्यर्थः । प्रत्यक्षवेदार्थनिबन्धनं विप्रकीर्णशाखावादे स्मृतीनामपि तुल्यमित्याशङ्क्य ततो वैलक्षण्यप्रदर्शनाय पठितपाठेनेत्युक्तम् । बुद्धादिग्रन्थेषु बौद्धमानवमाशकादिव्यवहारादपि बुद्धादिकर्तृकत्वं न शङ्कनीयम्, कठादिशाखासु कठादिसमाख्यावत् प्रवचननिमित्तत्वेनापि तदुपपत्तेरित्याह— बुद्धेति । ननु बौद्धागमादयो बुद्धादिकर्तृका इति कर्तृस्मृतिपरम्परा कथमित्याह— तन्निमित्ता चेति । 'गन्धनावक्षेपणसेवनसाहसिक्यप्रतिषेधाक्षकथनोपयो-

अनैषुरेभिः सह दुःखितां पृथां
पुरं कुरूणां शतशृङ्गतापसाः ॥ ११५ ॥

नृपस्येति—पाण्डोः अपत्यानि पुमांसः पाण्डवाः । 'तस्यापत्यम्' इत्यण् । तैः पत्नी-सहितस्य माद्रीयुक्तस्य नृपस्य राज्ञः तत्र तस्मिन् परेतकर्मणि प्रेतकार्ये श्राद्धादौ समापिते निर्वर्तिते सति शतशृङ्गतापसाः दुःखितां पृथां कुन्तीं एभिः पाण्डवैः सह । सहयोगे तृतीया । कुरूणां पुरं हास्तिननगरं अनैषुः निन्युः । नयतेर्लुङि सिचि वृद्धिः । 'नीवह्योः' इति द्विकर्मकत्वम् ॥ ११५ ॥

चिराय पाण्डोर्निधनेन तादृशो
विजृम्भमाणां शुचमम्बिकासुतः ।
तदात्मजानामुपलालनोत्सवै-
र्जहौ पितृव्यस्य च दर्शनेन ते ॥ ११६ ॥

चिरायेति—अम्बिकासुतो धृतराष्ट्रः तादृशः तथाविधस्य सौभ्रात्रवत इत्यर्थः । 'सदा-दिषु दृशः' इत्यादिना चकारात् किन् । 'आ सर्वनाम्नः' इत्याकारः । पाण्डोर्निधनेन मरणेन चिराय बहुकालात् विजृम्भमाणां वर्धमानां शुचं शोकं तदात्मजानां पाण्डुपुत्राणामुपलालनानि उप-सान्त्वनान्येव उत्सवाः तैः जहौ तत्याज । जहातेर्लिट् । 'आत औ णलः' औकारः । ते पाण्डवाश्च पितृव्यस्य पितुर्भ्रातुर्धृतराष्ट्रस्य ; 'पितृव्यमातुल...' इत्यादिनिपातनात् साधुः । दर्शनेन विलोक-नेन शुचं जहुरिति विभक्तिविपरिणामः ॥ ११६ ॥


सततमभितसत्त्वः पाण्डवेषु द्वितीयः
पथि पथि मृदुपांसौ क्रीडतो राजधान्याः ।
व्यहरत शतसंख्यान्पीडयन्धार्तराष्ट्रान्
सुत इव विनतायाः शैशवे काद्रवेयान् ॥ ११७ ॥


इति अगस्त्यपण्डितकृतौ बालभारते महाकाव्ये
आदिपर्वणि द्वितीयः सर्गः ॥

सततमिति—अमितसत्त्वः अपरिमितबलः पाण्डवेषु द्वितीयः भीमः; 'यस्मिंश्च निधारणम्' इति सप्तमी। धीयतेऽस्यामिति धानी। 'करणाधिकरणयोश्च' इति ल्युट्। राज्ञां धानी राजधानी। 'कृद्योगा च षष्ठी समस्यत इति वक्तव्यम्' इति समासः। अस्या राजधान्याः हास्तिननगर्याः। 'प्रधाननगरी राज्ञां राजधानीति कथ्यते' इति शब्दार्णवे। मृदुपांसौ मृदुलपरागे पथि पथि मार्गे मार्गे, वीप्सायां द्विरुक्तिः। क्रीडतः रममाणान् शतं संख्या येषां ते शतसंख्याः तान्। धृतराष्ट्रस्यापत्यानि धार्तराष्ट्राः; 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यण्। तान्। शैशवे बाल्ये; 'प्राणभृज्जातेः' इत्यादिना अञ्। विनतायाः सुतो गरुत्मान् कद्रूः अपत्यानि पुमांसः कादृवेयाः नागाः। 'स्त्रीभ्यो ढक्' 'ढे लोपोऽकद्वाः' इत्यत्र 'अकद्वाः' इति प्रतिषेधाद्वकारस्य लोपाभावः। तान् पीडयन् सततमनारतं व्यहरत व्यक्रीडत्। हरतेर्डित्त्वादट्। सततमित्यत्र 'समो वा हिततत्योः' इति समो मकारलोपः। मालिनीवृत्तम्, 'वसुमुनैर्विरतीयं मालिनीनामधेयम्' इति लक्षणात्॥

इति श्रीमद्राजाधिराजराजपरमेश्वरकर्णाटेश्वरश्रीकृष्णरायसार्वभौमशिरःप्रधानसकलागमपारावार-
पारीण श्रीसाल्वतिम्मयदण्डनाथविरचितायां मनोहराख्यायां बालभारतव्याख्यायां

द्वितीयः सर्गः॥


ORIENTAL
LIBRARY



॥ तृतीयः सर्गः ॥

जातु जह्नुदुहितुर्जले चिरं पद्मगन्धिनि विहृत्य निर्गतैः ।
पौरवैः पटगृहेषु भूषितैर्भुक्तवद्भिरुषितं तटे सुखम् ॥ १ ॥

वृत्तस्तनी विशालाक्षी मत्तद्विरदगामिनी ।
मत्तकाशिनि मच्चित्ते कृत्तिवासःप्रिये वस ॥

जात्विति—जातु कदाचित्, जह्नुदुहितुः गङ्गायाः, पद्मगन्धिनि कमलामोदवति, जले चिरं विहृत्य क्रीडित्वा, निर्गतैः जलान्निष्क्रान्तैः, भूषितैः अलंकृतैः भुक्तवद्भिः अभ्यवहृतवद्भिः, पौरवैः पूरोर्गोत्रापत्यैः पाण्डवैः, धार्तराष्ट्रैश्चेत्यर्थः । तटे गङ्गातीरे, पटगृहेषु पटवेश्मसु, सुखं यथा भवति तथा उषितं स्थितम्; भावे क्तः । 'वचिस्वपि' इत्यादिना संप्रसारणम् । 'वसतिक्षुधो-रिट्' इतीडागमः । अस्मिन् सर्गे रथोद्धतावृत्तम्, 'रोनराविह रथोद्धता लगौ' इति लक्षणात् ॥

तत्र वारिविहृतिश्रमालसं निद्रया परवशं वृकोदरम् ।
सिन्धुशीकरभृतः सिषेविरे मन्थरा दिनविरामवायवः ॥ २ ॥

तत्रेति—तत्र भागीरथीतीरे, वारिविहृतिश्रमेण जलक्रीडायासेन अलसं मन्दं, निर्व्यापारमिति यावत् । अत एव निद्रया परवशं, वृकोदरं भीमं सिन्धुशीकरभृतः गङ्गातुषारधारिणः, मन्थरा मनोहराः, दिनविरामे दिनान्ते वायवः, प्रायेण सायंसमये मल्लिकादिकुसुमानि विकसन्तीति तत्संस्पर्शाद्वायूनां सुरभित्वद्योतनार्थं दिनविरामग्रहणम् । सिषेविरे सेवितवन्तः ॥ २ ॥

आयताभिरहितं[1] सुयोधनस्तं सुषुप्तमवबध्य वल्लिभिः ।
भोगिनद्धमिव मन्दरं हरिः सिन्धुगर्भपयसि न्यपातयत् ॥ ३ ॥

1, आयताभिरभितः

आयताभिरिति—सुयोधनः सुप्तं निद्रितम्; 'सुविनिर्दुर्भ्यः सुपिसूतिसमाः' इति क्तस्य वम्। अहितमभित्रं भीमम्, आयताभिर्दीर्घाभिः वल्लिभिः अवबध्य संयम्य, हरिर्विष्णुः, भोगिना वासुकिना, नद्धं बद्धं मन्दरं मन्दरगिरिमिव, सिन्धुगर्भपयसि गङ्गाजले, अन्यत्र समुद्रान्तर्जले, न्यपातयत् पातयामास; किङ्करैरिति शेषः। 'मन्थानं मन्दरं कृत्वा योक्त्रं कृत्वा च वासुकिम्' इति पुराणे ॥ ३ ॥

स प्रबुध्य सरितः समुत्थितश्छिन्नबन्धनशतः स्वपन्पुनः।
विद्विषा कुरुसुतेन मोचितैरुद्विषाग्निभिरदश्यतोरगैः ॥ ४ ॥

स इति— स भीमः, प्रबुध्य जागरित्वा, सरितो गङ्गायाः सकाशात्, समुत्थितः, छिन्नबन्धनशतः, पुनः स्वपन् संविशन्, विद्विषा शत्रुणा, कुरुसुतेन सुयोधनेन, मोचितैस्त्याजितैः, उद्विषाग्निभिः उद्गतविषाग्निभिः, उरगैः सर्पैः, अदश्यत दष्टः। 'दंश दशने' इत्यस्माद्धातोः कर्मणि क्तः। 'अनिदिताम्' इति नकारलोपः ॥ ४ ॥

तान्स्फुरद्दशनकोटिभीषणानुत्फणानदयदष्टमर्मणः।
तत्क्षणं स्वपनविघ्नकारिणो मत्कुणानिव पिपेष मारुतिः ॥ ५ ॥

तानिति—मारुतिर्भीमः, स्फुरन्तीभिः प्रकाशमानाभिः दशनकोटिभिः दंष्ट्राग्रैः भीषणान् भयंकरान्, भीषयतेर्नन्द्यादित्वात् ल्युः। उद्यताः फणा येषां तान्। अदयं निर्दयं यथा भवति तथा, दष्टानि मर्माणि यैस्तान्, स्वपनविघ्नकारिणः निद्राविघ्नदायिनः तानुरगान् मत्कुणान् खट्वाकीटानिव। 'अथ मत्कुणः खट्वाकीटे निर्विषाणगजे' इति रत्नमालायाम्। तत्क्षणं पिपेष चूर्णितवान्; 'पिष संचूर्णने' इत्यस्माद्धातोर्लिट्। उरगविशेषणानि यथासंभवं मत्कुणपक्षे योज्यानि ॥ ५ ॥

स्वेन हन्तुमपरेद्युरुत्सुको वत्सलः किल सजग्धिमाचरन्।
दुर्मतिः कबलगोपितं विषं मारुतात्मजमसावभोजयत् ॥ ६ ॥

स्वेनेति—दुर्मतिः दुर्बुद्धिरसौ सुयोधनः अपरेद्युरपरस्मिन् दिने, 'सद्यःपरुत्' इत्यादिना निपातनात्साधुः। हन्तुं भीमं हिंसितुम्, उत्सुकः सन् वत्सलः प्रेमवान् किल, सजग्धिं सहभोजनम्, आचरन् कुर्वन्। 'सजग्धिः सहभोजनम्' इत्यमरः। मारुतात्मजं भीमं स्वेन आत्मना, कबले ओदनपिण्डे गोपितं छादितं, विषं गरलम्, अभोजयत् भोजयामास। 'निगरणचलनार्थेभ्यश्च' इति चरस्मैपदम्। 'गतिबुद्धि' इत्यादिना अण्यन्तकर्तुः कर्मत्वम् ॥ ६ ॥

दुःसहेन गरलेन विह्वलं गाढरज्जुनहनं स तं शठः ।
शातशूलवति जाह्नवीपयस्यातिकिङ्करशतैरपातयत् ॥ ७ ॥

दुःसहेनेति—शठो दुष्टः स दुर्योधनः दुःसहेन सोढुमशक्येन। 'ईषदुःसुषु' इत्यादिना खल्। गरलेन विषेण। 'क्ष्वेलस्तु गरलं विषम्' इत्यमरः। विह्वलं विधुरं गाढरज्जुनहनं दृढरज्जुबन्धनं, तं भीमं, शातशूलवति निशितशूलयुते, जाह्नवीपयसि गङ्गाजले, आप्तानामिष्टानां किङ्करशतैः भृत्यानां शतैः, अपातयत् पातयामास ॥ ७ ॥

शैलवद्गुरुतरो बलाद्विधेः शूलकोटिभिरविक्षतः पतन् ।
आससाद विषलुप्तचेतनो नागलोकमनिलस्य नन्दनः ॥ ८ ॥

शैलवदिति—शैलवत् पर्वत इव, गुरुतरो गरीयान्, अनिलस्य नन्दनो भीमः विधेर्बलात् दैववशात्, शूलकोटिभिः शूलाग्रैः, अविक्षतः अविद्धः सन् पतन्, विषेण लुप्तचेतनो नष्टसंज्ञः सन्, नागलोकमाससाद प्राप ॥ ८ ॥

तत्र सर्पशिशुभिर्विहारिभिस्तस्य दत्तवपुषः पुरातनम् ।
स्थावरं सपदि जङ्गमेन तन्नूतनेन विषमभ्यभूयत ॥ ९ ॥

तत्रेति—तत्र पाताले, विहारिभिः क्रीडद्भिः; गृह्या देत्वात् णिनिः। सर्पशिशुभिः दष्टवपुषः क्षतशरीरस्य भीमस्य, पुरातनं चिरंतनम्। 'सायंचिरम्' इत्यादिना ट्युप्रत्ययः तुडागमश्च। स्थावरं स्थिरम्। 'स्थेशभासपिसकसो वरच्'। तत् दुर्योधनदत्तं विषं, नूतनेन जङ्गमेन, जङ्गम्यत इति जङ्गमं चरं, जङ्गम्यतेः पचाद्यच् 'यङोऽचि च' इति यङो लुक्। तेन जङ्गमेन। 'चरिष्णु जङ्गमश्चरम्' इत्यमरः। विषेण, सपदि तत्क्षण एव, अभ्यभूयत अभिभूतम्। 'विषस्य विषमौषधम्' इति न्यायादिति भावः ॥ ९ ॥

लब्धसंज्ञमवमुक्तबन्धनं तं दशद्भुजगदर्पहारिणम् ।
वायुसूनुमवगम्य वासुकिः प्रीतिमाननयदात्मनो गृहम् ॥ १० ॥

लब्धेति—वासुकिः सर्पराजः, लब्धसंज्ञं प्राप्तचेतनम्, अवमुक्तबन्धनं परित्यक्तरज्जुं, दशतां दंशनं कुर्वताम्; 'दंशसञ्जस्वञ्जां शपि' इति नलोपः। भुजगानां दर्पहारिणं दर्पनाशकं, तं भीमं, वायुसूनुं वायुनन्दनम्, अवगम्य ज्ञात्वा प्रीतिमान्, आत्मनः स्वस्य, गृहमनयत् नेनाय ॥ १० ॥

तत्र मारुतहितं चिकीर्षतः शासनेन पवनाशनप्रभोः ।
आपिबत्स दशकुम्भसंभृतं[1] कुञ्जरायुतबलावहं रसम् ॥ ११ ॥

तत्रेति—तत्र गृहे, स भीमः, मारुतहितं वायुप्रियं, चिकीर्षतः कर्तुमिच्छतः, पवनाशनप्रभोः वासुकेः, शासनेन आज्ञया, दशसु कुम्भेषु घटेषु, संभृतं पूरितं, कुञ्जराणां गजानाम्, अयुतस्य दशसहस्रस्य, बलावहं बलप्रापकं रसस्य आस्वाद्यत इति रसः तं रसं पेयद्रव्यविशेषम्, आपिबत् पपौ। 'पा पाने' इत्यस्माल्लङि 'पाघ्रा' इत्यादिना पिबादेशः ॥ ११ ॥

तृप्तिमानुरगदर्शितं गतस्तल्पमष्टदिवसानि संविशन् ।
सिन्धुरोधसि निपीतपाथसः साम्यमाप निभृतस्य वार्मुचः ॥ १२ ॥

तृप्तिमानिति—भीमः तृप्तिमान्, उरगदर्शितं वासुकिदर्शितं तल्पं शय्यां, गतः सन्, अष्टदिवसानि दिनानि; 'क्लीबे दिवसवासरे' इत्यमरः। अत्यन्तसंयोगे द्वितीया। संविशन् स्वपन्, सिन्धुरोधसि समुद्रतीरे निपीतपाथसः निपीतजलस्य, निभृतस्य निश्चलस्य, वार्मुचो जलदस्य साम्यं सादृश्यमाप प्राप्तवान् ॥ १२ ॥

तावदम्भसि निपात्य मारुतिं सौबलेन सह कौरवात्मजः ।
पूर्वमाश्रितजनाभिनन्दितां प्रीतिमाप महतीं ततः पुरीम् ॥ १३ ॥

तावदिति—कौरवात्मजः सुयोधनस्तावत्, मारुतिं भीमम्, अम्भसि जले, निपात्य पातयित्वा सौबलेन सुबलस्यापत्येन शकुनिनाम्ना मातुलेन सह, पूर्वं प्राक्, आश्रितैः सेवितैर्जनैरभिनन्दितां महतीं प्रीतिमाप। ततस्तदनन्तरम्, आश्रितजनैः पुराऽऽश्रितलोकैः, अभिनन्दितां पुरीं हास्तिननगरं प्राप ॥ १३ ॥

यादवी च तनयं सहेतरैर्वाशितेव कलभं विचिन्वती ।
अभ्रमत्प्रतिदिनं पुराद्बहिः काननेषु सरसीषु सिन्धुषु ॥ १४ ॥

यादवीति—यादवी कुन्ती च इतरैः सुतैः सह, तत्सहितेत्यर्थः। तनयं भीमं, वाशिता करिणी; 'वाशिता करिणीनार्योः' इति रत्नमालायाम्। कलभं करिपोतमिव, विचिन्वती गवेषयन्ती, प्रतिदिनं दिने दिने, पुरात् नगरात्, बहिः 'अपपरिबहिरञ्चवः पञ्चम्या' इति ज्ञापकात् बहिर्योगे पञ्चमी। काननेषु वनेषु, सरसीषु सरःसु, सिन्धुषु नदीषु, अभ्रमत् विचचार। 'भ्रमु अनवस्थाने' इत्यस्मात् भौवादिकाल्लङ् ॥ १४ ॥

---

1. दशकुम्भसंभृतं

शङ्किता सुतवधं सुयोधनाद्विह्वला विदुरभाषितामृतैः ।
सा निदाघमिहिरातपाहता धौरिवेन्दुकिरणैरुदश्वसत् ॥ १५ ॥

शङ्कितेति—सुयोधनात् सुतवधं भीसवधं शङ्किता विशङ्कमाना, अत एव विह्वला विवशा, सा कुन्ती, विदुरस्य भाषितानि वचनानि 'तव सुतः समागमिष्यति, शुचं विमुञ्च' इत्येवंरूपाणि, तैरेवामृतैः पीयूषैः, निदाघे ग्रीष्मे, मिहिरातपेन सूर्यतेजसा, आहता धौराकाशश्, इन्दुकिरणैः चन्द्रांशुभिरिव, उदश्वसत् उच्छ्वसितवती । 'श्वस प्राणने' इत्यस्माल्लङ् ॥ १५ ॥

स प्रबुध्य नवमेऽह्नि सारवान्वासुकिप्रहितभोगिधारितः[1] ।
निर्जगाम तरसा रसातलाज्जाह्नवीजलपथेन पाण्डवः ॥ १६ ॥

स इति—सारवान् बलवान् स पाण्डवो भीमः, नवमे नवानां पूरणे, अह्नि दिवसे, प्रबुध्य जागरित्वा, वासुकिना प्रहितैः प्रेषितैः भोगिभिः सर्पैर्धारितः सन्, जाह्नवीजलपथेन गङ्गाजलवर्त्मना; 'ऋकपूः' इत्यादिना समासान्तः । रसातलात् पातालात्, तरसा रंहसा; 'तरसी बलरंहसी' इत्यमरः । निर्जगाम निर्ययौ ॥ १६ ॥

तान्विसृज्य वहनालसैः फणैः पन्नगान्प्रणमतो गतः पुरम् ।
भ्रातृपौरधृतराष्ट्रजन्मनां हर्षविस्मयशुचश्चकार सः ॥ १७ ॥

तानिति—स भीमः, वहनेन धारणेन, अलसैः मन्दैः, फणैः स्फटाभिः 'स्फटायां तु फणा द्वयोः' इत्यमरः । प्रणमतो नमस्कुर्वतः, तान् पन्नगान् भुजगान् विसृज्य त्यक्त्वा, पुरं नगरं, गतः सन्, भ्रातृपौरधृतराष्ट्रजन्मनां, भ्रातरो युधिष्ठिरादयः पौरा नागरिकाः धृतराष्ट्रजन्मानो दुर्योधनादयस्तेषां, यथाक्रमं हर्षविस्मयशुच आनन्दाश्चर्यशोकान् चकार । 'मुत् प्रीतिः प्रमदो हर्षः' 'विस्मयोऽद्भुतमाश्चर्यम्' इत्युभयत्राप्यमरः ॥ १७ ॥

लब्धविद्यमथ गौतमात्पितुर्जातु शन्तनुसुतः कृपं कृती ।
पाण्डुसूनुधृतराष्ट्रजन्मनामस्त्रशिक्षणविधौ गुरुं व्यधात् ॥ १८ ॥

लब्धविद्यमिति—अथानन्तरं, जातु कदाचित्, कृती कुशलः; 'इष्टादिभ्यश्च' इति इनिः । शंतनुसुतो भीष्मः, गौतमात् गौतमापत्यात् पितुर्जनकात् लब्धविद्यं प्राप्तविद्यं कृपं कृपा-

1. ०भोगिवाहनः

चार्यं पाण्डुसूनुधृतराष्ट्रजन्मनां पाण्डवधार्तराष्ट्राणाम्, अस्त्रशिक्षणविधौ अस्त्रशिक्षणक्रियायां, गुरुमाचार्यं, व्यधात् विहितवान्। दधातेर्लुङ्॥ १८॥

तेन तेषु धनुषि प्रगल्भतां लम्भितेष्वपि सरित्सुतः क्षितौ।
अन्वियेष गुरुमन्यमुच्चितं वस्तु वाञ्छति गुणोत्तरं जनः॥ १९॥

तेनेति—तेन कृपेण, तेषु पाण्डवधार्तराष्ट्रेषु, धनुषि विषये, प्रगल्भतां प्रौढतां लम्भितेषु प्रापितेषु सत्स्वपि, सरित्सुतो भीष्मः, क्षितौ भुवि, उच्चितमुत्कृष्टम्, अन्यं गुरुमाचार्यम्, अन्वियेष अन्विष्टवान्। तथा हि— जनो लोकः गुणैरुत्तरं श्रेष्ठं वस्तु वाञ्छति काङ्क्षति॥ १९॥

पौरवः परशुलक्षणान्मुनेर्द्रोणमाप्तसकलास्त्रसंपदम्।
आनिनीषुरभवन्महौजसं सोऽपि हास्तिनपुरं तदाऽऽययौ॥ २०॥

पौरव इति—पौरवो भीष्मः, परशुः लक्षणं चिह्नं यस्य स तथोक्तः। 'लक्षणं नाम्नि चिह्नेऽपि' इति विश्वः। तस्मान्मुनेः जामदग्न्यात्, आप्ता स्वीकृता सकलास्त्रसंपत् समस्तायुधसमृद्धिर्येन तं तथोक्तम्। महौजसं द्रोणं द्रोणाचार्यम्, 'द्रोणः कृपीपतौ काकभेदे' इति रत्नमालायाम्। आनिनीषुः आनेतुमिच्छुरभवत्। तदा तस्मिन् काले, सोऽपि द्रोणः, हास्तिनपुरम् आययौ; यदृच्छयेति शेषः॥ २०॥

भार्यया सहकुमारयाऽन्वितो विक्रमानुगतयेव विद्यया।
सत्कृतो विधिवदापगासुतं कुम्भयोनिरिदमाह संसदि॥ २१॥

भार्ययेति—सह कुमारेण वर्तत इति सहकुमारया भार्यया पत्न्या, विक्रमेण पराक्रमेणानुगतया धनुर्विद्ययेव, अन्वितः अनुगतः, कुम्भयोनिर्द्रोणः, विधिवत् विध्यर्हं यथा भवति तथा, 'तदर्हम्' इति वतिप्रत्ययः। सत्कृतः पूजितः सन्, संसदि सभायाम्, आपगासुतं भीष्मम्, इदं वक्ष्यमाणम्, आह उवाच॥ २१॥

अग्निवेश्यमृषिमस्त्रलब्धये प्रश्रितः परिचरन्मया सह।
बाल्य एव दृढबद्धसौहृदो मां प्रति द्रुपद एवमब्रवीत्॥ २२॥

अग्निवेश्यमिति—प्रश्रितो विनीतः। 'विनीतप्रश्रिताः समाः' इत्यमरः। द्रुपदो द्रुपदाख्यो राजकुमारः, अस्त्रलब्धये धनुर्विद्याप्राप्तये अग्निवेश्यमग्निवेश्याख्यमृषिं, मया सह, परिचरन् सेवमानः, बाल्ये शैशव एव, दृढं यथा भवति तथा बद्धं सौहृदं सख्यं येन स तथोक्तः सन्, मां प्रति मामुद्दिश्य, कर्मप्रवचनीययोगे द्वितीया। एवं वक्ष्यमाणप्रकारेण, अब्रवीत्॥ २२॥

येनामितंपचपचेलिमजगज्जनभागधेयविवर्तेन बालकजनयातना-
प्रदानेकतानपूतनातनुपातनाविष्कृतप्रतापशैशवेन विकटशकटदानव-
पटुमदपाटनप्रकटितपदपाटवेन घृणारिक्ततृणावर्तपरमार्त्तिदानप्रवृत्त-
कीर्त्तिमता निर्दयार्दितगर्दभासुरेण धेनुकासुरगात्रविशसनासिधेनुका-
यमानबाहुना अघनिदाघभिदाजलदागमेन विशिष्टशिष्टबाधकदुष्टमुष्टि-
कमुष्टीमुष्टिरणस्पष्टमहारिष्टदानदिष्टेन नृशंसकंसहिंसनप्रथितप्रशंसनेन
सततमत्सरकुत्सितचरितवत्सकासुरमदभर्त्सनकुतोत्साहेन विबुधजना-
लीकरचनाकुतुकधकलम्बितदम्भनगभञ्जनजृम्भितदम्भोलिगुम्भेन वृ-
षभासुरवृषभासुरवृषभीषणपृषदंशकोग्रवृत्तिना नरकपतनकारणसाधु-

येनामितंपचेत्यारभ्य सुखसातत्यमापादितेत्यन्तमन्वयः । अमितंपचस्य अधिकस्य पचेलिमस्य पक्वस्य जगज्जनभागधेयस्य निखिलजनभाग्यस्य विवर्त्तेन रूपान्तरेणैव स्थितेन जगद्भागधेयमेव कृष्णस्वरूपेण भासत इति भावः । उपादानविषमसत्ताकार्यापत्तिर्विवर्त्तः । बालकजनयातनाप्रदाने; 'यातना तीव्रवेदना' इत्यमरः । एकतानायाः जागरूकायाः; 'एकतानोऽनन्यवृत्तिः' इत्यमरः । पूतनायास्तनुपातनेनाविष्कृतः प्रकाशितः प्रतापो यस्मिंस्तत् तादृशं शैशवं यस्य तथोक्तेन विकटशकटदानवस्य भीषणशकटासुरस्य; 'विकटः पृथुले रम्ये विशालविकरालयोः' इति रत्नमाला । पटुमदपाटनेन प्रकटितं पदपाटवं यस्य तथोक्तेन । घृणारिक्तस्य दयाशून्यस्य तृणावर्त्तासुरस्य परमार्त्तिदानेन; 'आर्त्तिः पीडा धनुष्कोट्योः' इत्यमरः । धेनुकासुरगात्रविशसने असिधेनुकायमानो बाहुर्यस्य तथोक्तेन तन्मारकेणेति भावः । 'क्षुरिका चासिधेनुका' इत्यमरः । अघो अघासुर एव निदाघः घर्मः; 'घर्मो निदाघः स्वेदः स्यात्' इत्यमरः । जलदागमेन वर्षासमयेन । विशिष्टशिष्टबाधकस्य निखिलसाधुहिंसकस्य दुष्टमुष्टिकस्य मुष्टिकाख्यासुरस्य मुष्टीमुष्टिरणे महारिष्टं मरणं तदाने दिष्टेन दैवेन; 'दैवं दिष्टं भागधेयम्' इत्यमरः । नृशंसकंसस्य; 'नृशंसो घातुकः क्रूरः' इत्यमरः । हिंसनेन प्रथितं प्रशंसनं प्रशस्तिर्यस्य तथोक्तेन । सततं मत्सरस्य द्वेषिणः; 'मत्सरोऽन्यसुभद्वेषे तद्वत्कृपणयोस्त्रिषु' इत्यमरः । कुत्सितचरितस्य वत्सकासुरस्य मदभर्त्सने न्यक्कारे । विबुधजनालीकरचनायां कुतुकं यस्य तथोक्तेन; 'अलीकं त्वप्रियेऽनृते' इत्यमरः । धकासुरेण लम्बितस्य आश्रितस्य दम्भनगस्य दाम्भिकरूपपर्वतस्य गर्वस्य वा भञ्जने दम्भोलिगुम्भेन वज्रपाटवेन । वृषवत् वृषभवत् भासुरो यो वृषभासुरः स एव वृषः मूषिकः तस्मिन् भीषणपृषदंशकस्य मार्जारस्य उग्रवृत्तिना; 'वृषो धरे मूषिके च शुक्ले च वृषभे वृषः' इति मेदिनी । 'पृषदंशक आखुभुक्' इत्यमरः । नरकपतनकारणं

नरकपतनकृन्नरकपातनचर्यामहौजसा क्रूरचाणूरजीवश्वसनप्रसनोदीर्णदृक्कर्णेन तरुणारुणकिरणारुणनैजचरणकुट्टनव्रणितप्रवणफणासहस्रकालियमदघोरणीहरणधुरीणेन भीषणहेषानिर्घोषभीषितघोषवास्तव्ययोषापुरुषार्भकखरतरखुरधरट्टघट्टनदलदिलातलघोट्टाणतनुकेशिदनुज-विनाशकीनाशपाशनीकाशेन तार्तीयीकेऽपि युगे धर्मं कार्तयुगं खेलयता विशृङ्खलं निखिलानपि खलान् खिलीकुर्वता निजावयवनिर्विशेषमवता जगज्जगती निर्णिक्तसीमातिरिक्तसुखसातत्यमापादिता ॥

तस्य वृषाकपायीहृदयप्रियंभावुकस्य—

यत्साधुनराणां कपतनं शिरःपतनं; 'पुंसि कः कं शिरोऽम्बुनोः' इत्यमरः। तत्कर्तुः नरकस्य असुरस्य पातनचर्यायां महौजसा; 'ओजो दीप्तौ बले स्रोतः' इत्यमरः। जीवश्वसनस्य प्राणानिलस्य प्रसने उदीर्णदृक्कर्णेन प्रौढेरगेण; 'उदीर्णं उद्भटोदार उदात्तः' इत्यमरः। तरुणारुणस्य तरुणादित्यस्य 'अरुणो भास्करेऽपि स्यात्' इत्यमरः। कुट्टनेन प्रहारेण व्रणं व्रह्म; 'व्रणं क्रमनिम्नोर्न्यां व्रह्मे ना तु चतुष्पथे' इत्यमरः। मदघोरण्याः परंपरायाः धुरीणेन धुर्येण; 'धूर्वहे धुर्यधौरेयधुरीणाः' इत्यमरः। भीषणेन हेषानिर्घोषेण करणेन; 'अश्वानां हेषा ह्रेषा च निःस्वने' इत्यमरः। भीषिताः घोषे वास्तव्याः; 'वसेस्तव्यत्कर्तरि णिच्च' इति वसधातोः कर्त्रर्थे तव्यप्रत्यये वास्तव्याः वासं कुर्वन्तः योषापुरुषार्भकाः येन तस्य भीषितघोषवास्तव्ययोषापुरुषार्भकस्य खरतराः ये खुरधरट्टाः; 'शफं क्लीबे खुरः पुमान्' इत्यमरः। 'धरट्टश्चक्रिकायन्त्रे' इत्यमरः। तद्घट्टनेन दलत् इलातलं भूतलं यस्य घोट्टाणतनोः अश्ववपुषः केशिदनुजस्य केशिनामकासुरस्य विनाशे कीनाशपाशनीकाशेन यमपाशसदृशेन; 'घोट्टाणा अपि काम्भोजाः पारशीका वनायुजाः' इति शारे। 'कृतान्ते पुंसि कीनाशः' इत्यमरः। तृतीया संख्या यस्य सः तार्तीयीकः तस्मिन्युगे द्वापरयुगेऽपि कार्तयुगं धर्मं कृतयुगधर्मं विशृङ्खलं यथा तथा खेलयता प्रवर्तयतेत्यर्थः। निखिलानपि खलान् खिलीकुर्वता शिथिलयता तत्संहर्त्रेत्यर्थः। जगद्भुवनं निजावयवसदृशमवता येन कृष्णेन भगवता जगती पृथिवी; 'जगती रत्नगर्भा च' इत्यमरः। निर्णिक्तस्य निष्कल्मषस्य; 'निर्णिक्तं शोधितं शुद्धम्' इत्यमरः। सीमातिरिक्तसुखस्य निष्प्रमाणसुखस्य सातत्यं नैरन्तर्यमापादिता प्रापिता ॥

तस्येति। वृषाकपायाः लक्ष्म्याः हृदयस्य प्रियो भवतीति प्रियंभावुकस्य; 'वृषाकपायी श्रीगौर्योः' इत्यमरः ॥

आसीदशेषविनुता द्वारवती नाम भूषणं क्षोण्याः ।
नैलिम्पलोकरीढाचतुरिमसौभाग्यपेशला नगरी ॥ १२ ॥

पुंसो विलासभवनं परमस्यासीज्जगन्निवासस्य ।
तद्वर्णनाप्रसक्तौ कस्य कवेर्वा प्रगल्भते वाणी ॥ १३ ॥

महतो यस्याः क्रमशो गारुडमाणिक्यहीरवृणिजालैः ।
दलकिसलयसुमशोभां वहतो वरणस्य सालता युक्ता ॥ १४ ॥

गोपुरकन्दरमार्गे गतिवशतो यत्र चञ्चलाक्षीणाम् ।
आनीरसहासदृष्टेः कृशितस्येन्दोः सुपूर्णता क्रमशः ॥ १५ ॥

अथ नगरवर्णना—आसीदिति । द्वारवती नाम द्वारवतीति प्रसिद्धा 'नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने' इत्यमरः । नैलिम्पलोकस्य स्वर्गस्य रीढायां तिरस्कारे; 'निलिम्पाः स्वर्गिणः सेन्द्राः' इति सारे । 'रीढाऽवमाननाऽवज्ञा' इत्यमरः । चतुरिमा चातुर्यं यस्य तत्तथोक्तेन सौभाग्येन पेशला मनोहरा 'चारौ दक्षे च पेशलः' इत्यमरः ॥ १२ ॥

पुंस इति । जगन्निवासस्य परमस्य पुंसः यद्विलासभवनमासीत् तादृशनगरवर्णनाप्रसक्तौ कस्य कवेर्वाणी प्रगल्भते प्रौढा भवतीत्यनेन नगरस्य प्रौढकविवाचामप्यगोचरसौभाग्यवत्ता सूचिता ॥ १३ ॥

महत इति । यस्या नगर्याः गारुडमाणिक्यहीराणां मरकतपद्मरागवज्रमणीनाम्; 'हीरः सिंहारिवज्रेषु हीरा लक्ष्मीः पिपीलिका' इति रत्ने । वृणिजालैः क्रमशः दलकिसलयसुमशोभां पत्रपल्लवसुमशोभां वहतः महत उन्नतस्य वरणस्य; 'प्राकारो वरणः सालः' इत्यमरः । सालता सालनामता युक्ता । अत्र प्राकारस्य मूलभागे गारुडरत्नैः मध्ये पद्मरागैः अग्रभागे वज्रमणिभिश्च निबद्धत्वात् तत्तन्मणिप्रभाभिः पत्रपल्लवसुमशोभाकरतया वृक्षवद्भासमानत्वात्सालनामता युक्तेति भावः; 'साली द्वये मत्स्यभेदे प्राकारे सर्जरद्रमे' इति रत्ने ॥ १४ ॥

गोपुरेति । यत्र नगरे कृशितस्येन्दोः कला विशिष्टप्रतिपच्चन्द्रस्येति यावत् । गोपुरस्य पुरद्वारस्य सौधस्य वा; 'पुरद्वारं तु गोपुरम्' इत्यमरः । गतिवशतः गमनवशात्; एतेन पुरद्वारस्य सौधानां चन्द्रमण्डलाधिकोन्नतिः सूचिता । चञ्चलाक्षीणां पौरस्त्रीणां सहासदृष्टेः सास्मितावलोकनात्क्रमशः सुपूर्णता कलापुष्कलत्वमासीत् । चञ्चलाक्षीणामित्यनेन प्रत्यहं क्षणकालावलोकनाच्चन्द्रस्य

वनपालिकास्वचन्द्रालोकगलद्वारिपूरसंपूर्णे ।
हिमकरकान्तावापे तोयद्धतिर्यत्र न तरुसेकार्था ॥ १६ ॥

किं च—

या रम्या चन्द्रपार्णिधमविमलमहाचन्द्रशालाविशाला
रम्भाऽहंभावरीढाचतुरिमविदिता सुन्दरीवृन्दरीतिः ।
सान्द्रोद्यन्नारिकेला लगदलिकुहलीगन्धिला यत्र वन्या
वर्णाः स्वाचारपूर्णास्तिलकयति भुवं सर्वसंपत्खनी सा ॥१७॥

यत्राखण्डलनीलकुट्टिमरुचिः कादम्बिनीप्रक्रियां
धारायन्त्रमुखोन्नमज्जलततिस्त्वासारपर्यायिकाम् ।

क्रमवृद्धिः, सितासितनयनकान्तेः हीनप्रभायाश्च संपर्केण वर्धितत्वात्कलङ्कवैशिष्ट्यमपि सूचितमिति भावः ॥ १५ ॥

वनेति । यत्र हिमकरकान्तावापे चन्द्रकान्तशिलानिर्मिते आलवाले ; जात्येकवचनम् ; 'स्यादालवालमावालमावापः' इत्यमरः । वनपालिकानां वनगोपिकानां आत्मचन्द्राणामालोकनाद्दर्शनात् गलद्वारिपूरैः संपूर्णे सति तोयद्धतिः वनपालिकाविरचिताम्बुहरणं तरुसेकार्था वृक्षसेकः प्रयोजनं यस्यास्तथोक्ता नाभूत् । एतेन घटचेटीनामपि चन्द्रसदृशमुखलावण्यशालितोक्ता ॥ १६ ॥

या रम्येति । या चन्द्रपार्णिधमाभिः इन्दुमण्डलसन्निभाभिः विमलमहाचन्द्रशालाभिः विशाला ; 'चन्द्रशाला शिरोगृहम्' इत्यमरः । यत्र सुन्दरीवृन्दस्य रीतिः प्रकारः ; 'रीतिः स्त्रन्दे प्रकारोऽथ' इति सारे । रम्भाया अहंभावस्याहंकारस्य रीढायां तिरस्कारे ; 'रीढाऽवमाननाऽवज्ञा' इत्यमरः । चतुरिम्णा चातुर्येण विदिता प्रसिद्धा । यत्र वन्या वनसमूहः ; 'वन्या वनसमूहे स्यात्' इत्यमरः । सान्द्रा उद्यन्तः नारिकेलाः यस्यां तथोक्ता ; 'नारिकेलस्तु लाङ्गली' इत्यमरः । लगन्तः चलन्तोऽलयः यासु ताभिः । 'लगि गतौ' । कुहलीभिः पूगमञ्जरीभिः गन्धिला गन्धवती ; 'कुहली पूगपुष्पिका' इति सारे । वर्णा ब्राह्मणादयश्च स्वाचारेण पूर्णाः सन्ति । सर्वसंपदां खनिः ; 'खनिः स्त्रियामाकरः स्यात्' इत्यमरः । सा नगरी भुवं तिलकयत्यलंकरोति ॥ १७ ॥

यत्रेति । यस्मात् यत्र आखण्डलनीलकुट्टिमानामिन्द्रनीलशिलानिबद्धभुवां रुचिः कादम्बिन्याः प्राक्रियां मेघमालारीतिं चारु चरीकरीति अतिशयेन करोतीत्यर्थः । धारायन्त्राणां जलयन्त्राणां मुखोन्नमज्जलततिस्तु मुखोद्गतजलसंततिस्तु आसारपर्यायिकामासारसदृशीम् ; 'धारासंपात आ-

रीतिं चारु चरीकरीति विकसद्गर्जाधुरं मार्जना
नृत्यत्केकिगणा च सौधपटली सद्वार्षिकाडम्बरम् ॥ १८ ॥

किं च—

यत्रोद्दाममदेभगण्डविगलद्दानाम्बुजम्बालितः
प्रेङ्खोलत्पटुघोटिकाखुरपुटीकुद्दालसंकुट्टनैः ।
उद्भूताभिरमितधूलिकास्तबकितः पौरीमुखेन्दुप्रभा-
लोकद्राक्षितचन्द्रकान्तसलिलैः पन्थाः परिक्षाल्यते ॥ १९ ॥

यत्र विन्ध्यनगसक्तौन्नत्यमदव्यत्ययापादिकां गगनचरवाताप्या-
ततवृत्तजालकसंभेदपटुगर्भगरीयसीं समाक्रान्तेरबलाध्वक्रमशंसनीयां
करदर्शितग्रथितरत्नाकरस्वरूपविस्मयनीयां वृत्तिं प्रथयामास कौम्भसू-
नवीं सौधवीथिका ॥

सारः' इत्यमरः । रीतिं प्रकारम् ; 'प्रकारस्यन्दयो रीतिः' इत्यमरः । चरीकरीति । मार्जना मुरजध्वनिः ; 'मार्जना मुरजध्वाने गुधिलो मर्दलध्वनिः' इति सारे । विकसद्गर्जायाः मेघशब्दस्य धुरं चरीकरीति । एतेन तत्रत्यानामनवरतगीतवाद्यादिभोगवत्त्वं सूच्यते । तस्मान्नृत्यत्केकिगणा च सौधपटली सद्वार्षिकस्य समीचीनवर्षाकालस्य आडम्बरं संरम्भं चरीकरीति ; 'आडम्बरोऽस्त्री संरम्भे गर्जिते तूर्यनिःस्वने' इति रत्नमाला ॥ १८ ॥

यत्रेति । प्रेङ्खोलन्त्यश्चलन्त्यः पटवस्तीक्ष्णाश्च ; 'अथ त्रिषु पटुस्तीक्ष्णे नीरोगे निपुणेऽपि च' इति रत्नमाला । घोटिकानां खुरपुट्य एव कुद्दालाः भूविभेदकाः तत्कृतसंकुट्टनैः छेदनैः ; 'कुट्ट छेदने' । उद्भूताभिः अमितधूलिकाभिः स्तबकितो निरन्तरीकृतः उद्दामानामुन्नतानां मदेभानां गण्डविगलद्दानाम्बुभिः जम्बालितः कर्दमितः पन्था राजमार्गः पौरीणां पुरस्त्रीणां मुखेन्दुप्रभाणामालोकेन दर्शनेन ; 'आलोको दर्शने द्योतौ' इत्यमरः । द्राक्षितानां द्रवीकृतानां चन्द्रकान्तानां सलिलैः परिक्षाल्यते ॥ १९ ॥

यत्र विन्ध्येति । सौधवीथिका कौम्भसूनवीं कुम्भसूनुरगस्त्यः तत्संबन्धिनीं वृत्तिं व्यापारं प्रथयामासेति संबन्धः । तदेव श्लेषेण प्रतिपादयति—विन्ध्यनगसक्त्यौन्नत्यमदस्य व्यत्ययापादिकां, विन्ध्यपर्वतादिकौन्नत्यमित्यर्थः । अन्यत्रागस्त्यरीतिस्तु विन्ध्योधभावोपसंहारिणी । गगन-

यत्र पुनः सर्वसुलभेतरामृतस्थानविचयनजागरूकतया तृणीकृतपरलोकाः पुरुषोत्तमललामभूतवर्तनवर्धितपुण्यजनकौतुकाः विततनिजास्यसंभवविशदवर्णपरिपाटीविपाटितनिखिललोकतमःसंचयाः वरशतमखशस्त्रोन्नतिप्रकटितनैजपक्षगरिमाणः संततविनतानुकूलसंचाराः समुन्नतारमेयचर्यावलोकनभयपलायितनिलीनभुजङ्गाः द्विजपुङ्गवाश्चकासामासुः ॥

चरेण वायुमण्डलचारिणा वातेन आप्यानां प्राप्तुं योग्यानां तावदुन्नतानामित्यर्थः । आततानां विस्तृतानां वृत्तजालकानां वर्तुलगवाक्षाणाम् ; 'जालं समूह आनायो गवाक्षक्षारकावपि' इत्यमरः । संभेदेन संबन्धेन पटुभिरुत्कृष्टैः गर्भैः वासगृहैः गरीयसी श्रेष्ठा ; 'गर्भः कुक्षौ वासगृहे' इति सारे । अन्यत्र गगनदारस्य वातापेरसुरस्य आततानां वृत्तानां दुश्चरित्राणां जालकस्य संभेदे भेदने पटुना गर्भेण उदरेण । समाक्रान्तेन इल्वलानामिल्वलानामकनक्षत्राणाम् ; 'इल्वलास्तच्छिरोदेशे' इत्यमरः । अध्वक्रमेण शंसनीयां तारापथव्यापिनीमित्यर्थः । अन्यत्र समाक्रान्तो निरुद्धः इल्वलासुरस्याध्वक्रमः दुर्मार्गप्रवृत्तिः तेन शंसनीयाम् । करैर्द्युतिभिः दर्शितं प्रथितानां रत्नानामाकरं स्थानभूतं यत्स्वरूपं तेन दर्शनीयाम् ; 'करो वर्षोपले हस्ते भानौ तटिति वारिधौ । उपदायां द्युतौ श्रेष्ठे शुण्डायां प्रत्यये घने ॥' इति सारे । अन्यत्र करतलदर्शितप्रथितरत्नाकरस्य समुद्रस्य ॥

यत्रेति । यत्र पुनरिति चकासामासुरित्यन्तेन विप्राणां गरुडस्य च श्लेषः । सर्वेषां सुलभेतरस्य दुर्लभस्य अमृतस्थानस्य मुक्तिपदस्य विचयने जागरूकतया ; 'आन्वीक्षणं विचयनं मार्गणम्' इत्यमरः । तृणीकृतपरलोकाः अनादृतस्वर्गादिलोकाः यैस्तथोक्ताः । अन्यत्र अमृतस्थानस्य पीयूषवासस्य, परलोकः शत्रुलोकः । पुरुषोत्तमानां ललामभूतेन मुख्येन वर्तनेन वर्धितं पुण्यजनानां सज्जनानां कौतुकं येषां तथोक्ताः । अन्यत्र पुरुषोत्तमस्य विष्णोः ललामभूतवर्तनेन केतुभूतस्थित्या वर्धितं खाण्डितम्, पुण्यजनानां रक्षसाम् ; 'ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु' 'वर्धनं छेदनेऽथ द्वे' 'यातुधानः पुण्यजनः' इत्यमरः । विततेभ्य उच्चारणसमयविस्तृतेभ्यो निजास्येभ्यः संभवो येषां तथोक्तानां विशदानां व्यक्तानां वर्णानां परिपाटी क्रमस्तया विपाटितनिखिललोकतमःसंचयाः विघटितजनाज्ञानसमूहाः विशदो धवले वाच्ये शुचौ त्रिषु गुणे तु ना' इति रत्नमाला । 'वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाऽक्षरे' 'परिपाटी अनुक्रमः' 'लोकस्तु भुवने जने' 'राहौ ध्वान्ते गुणे तमः' इत्यमरः । अन्यत्र निजवदनासितकान्त्या परिहृतजगदन्धकार इत्यर्थः । वरशतमखेषु बहुयज्ञेषु शस्त्राणां शंसनयन्त्राणाम् ; 'शस्त्री तु छुरिका शस्त्रं शंसा वाक्येऽस्त्रलोहयोः' इति रत्नमाला । उन्नत्या प्रभावेण प्रकटितः नैजपक्षस्य स्वीयवृन्दस्य द्विजसमूहस्येत्यर्थः, गरिमा श्रेष्ठत्वं येषां तथोक्ताः ; 'गुरुस्तु गीष्पतौ श्रेष्ठे' इति नानार्थे । 'पक्षः सहायगरुदन्तिकसाध्यभित्ति-

किं च, ते पुनरन्यूनाः कलानिधयः, दूरापेतजाड्यस्थितयः प्रचेतसः, विगतविषमदृष्टयः सर्वज्ञाः, पङ्कजातादरविधुराश्चतुरानना, मलिनाध्वविध्वंसकाः शुचयः, दक्षिणाशापराङ्मुखाः समवर्तिनः, उज्झितसुरासक्तयो मखवन्तः, अचञ्चलरुचयो घनाः, सुस्थिराः सदागतय इति विचित्रवृत्तयः ॥

मित्रेषु चुल्लिविवरेषु नृपकुञ्जरे च। वृन्दे कचादुपरि नासदले च पक्षद्वारे बले च गजपार्श्वविरोधयोः स्यात् ॥' इति रत्नमाला। अन्यत्र शतमखशरस्य वज्रायुधस्य उन्नत्यां माहात्म्ये प्रकटितौजपक्षगरिमा निजपक्षेण वज्रायुधमपि तिरस्कृतवानिति भावः। सततं विनतानां नम्राणामनुकूलः संचारः समीचीनचर्या येषां तथोक्ताः। अन्यत्र विनता तार्क्ष्यजननी। समुन्नतायाः उत्कृष्टायाः आत्मीयचर्यायाः अवलोकनात् भयेन पलायिताः निलीनाश्च भुजङ्गा विटा येषां तथोक्ताः। 'वेश्यापतिर्भुजङ्गः स्यात्' इत्यमरः। सदाचारसंपन्नानां दर्शने आचारहीना भीता भवन्तीति भावः। अन्यत्र समुन्नतात्मीयचर्यायाः उन्नतखगगतिविशेषस्य; भुजङ्गाः सर्पाः। द्विजपुङ्गवाश्चकासामासुः ॥

किं चेति। ते पुनर्द्विजा अन्यूनाः पूर्णाः कलानिधयः चन्द्राः विद्यानिधयश्च। चन्द्रे कलानां न्यूनता दृश्यते, नगरवासिषु तद्रहितत्वात्कलानिधय इति रूपकम्। 'कान्तौ शिल्पे वृत्तवृद्धौ चन्द्रांशे कलने कला' इति वैजयन्ती। दूरापेता जाड्यस्य शैत्यस्य जडभावस्य च स्थितिर्येषाम्। प्रचेतसो वरुणाः, प्रकृष्टमनस्काश्च। 'जडः स्तब्धे बुद्धिहीने हिमप्रस्तेऽपि वाच्यवत्' इति रत्नमाला। विषमदृष्टिरहिताः सर्वज्ञा ईश्वराः पण्डिताश्च। पङ्कजाते पापसंघे पापोत्पत्तौ वा आदररहिताः चतुरं शास्त्रोपन्यासचतुरमाननं येषां तथोक्ताः। 'पङ्कोऽस्त्री कर्दमैनसोः' 'चतुरौ दक्षधीमन्तौ' इति रत्नमाला। अन्यत्र पङ्कजाते कमले आदरवान् ब्रह्मा। मलिनाध्वनः कलुषमार्गस्य विध्वंसकाः शुचयः शुद्धाश्च। अन्यत्र शुचिरग्निः तस्य कृष्णवर्त्मत्वात् मलिनाध्वविध्वंसकता नास्तीत्यर्थः। 'पावके शुचिः मास्यमात्ये चाप्युपधे पुंसि मेध्ये क्लीबे त्रिषु' इत्यमरः। दक्षिणाशापराङ्मुखाः दानद्रव्यप्रतिग्रहापेक्षारहिताः। समेन अवैषम्येण वर्तनं येषां तथोक्ताः। अन्यत्र समवर्ती यमस्तु दक्षिणाशाभिमुखः। उज्झिता सुरासक्तिर्मदिरासक्तिर्यैस्ते। मखवन्तः यागशीलाः। इन्द्रस्तु सुरेषु आसक्तः; 'सुरो देवो सुरा मद्ये' इति रत्नमाला। अचञ्चलरुचयः स्थिरानुरागाः। घनाः प्रौढाः अन्यत्र घनाः मेघास्तु चञ्चलरुचिविशिष्टाः। 'अभिष्वङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियाम्' इत्यमरः। 'कठिनाधिकसान्द्रेषु वाच्ये मध्यममानयोः। मुस्तामुद्गरमेघेषु त्रिषु क्लीबे पुमान्घनः॥' इति रत्नमाला। सुस्थिराः निश्चलहृदयाः सतामागतिर्येषु तथोक्ताः। अन्यत्र सदागतिः वायुस्तु चपलत्वात् स्थिरो न भवतीत्यर्थः ॥

यामुदारबहुधर्मसमुदयोदयैकायतनमहापुष्पवद्वंशविभूतिशंसनीयाः देवमणिप्रभाध्रुवरोचमानशुक्तिजातशोभाबन्धुरगन्धर्वनिवहनित्याधिष्ठितविशङ्कटकटकसंपदधिकाः आसन्नाश्रितवर्णातिशयसंपादनालंकर्मीणसानुरागान्तराः घनपरंपराभरणप्रकाशितोत्तुङ्गशृङ्गसंगताः अभ्रान्तसंमर्दनिजपादमूलपतितगद्गदलदत्यरवाहिनीशङ्कुलप्राणनायत्तगभीररसस्थितयो महीभृत अध्यासांचक्रिरे ॥

यामिति । यामित्यारभ्य अध्यासांचक्रिरे इत्यन्तं क्षत्रियाणां पर्वतानां च प्रकृताप्रकृतश्लेषः । उदाराणामुत्कृष्टानां बहुधर्माणां समुदयस्य य उदय उत्पत्तिस्तस्य एकायतनं मुख्यस्थानं यौ महापुष्पवद्वंशौ सूर्यचन्द्रवंशौ तयोर्विभूत्या संपदा शंसनीयाः राजानः । अन्यत्र शैलास्तु धर्मसमुदयोदयस्य चापसमूहोत्पत्तेः एकायतनानां चापनिर्माणयोग्यानामिति यावत् । महतामपुष्पवद्वंशानामुत्कृष्टवेणूनां पुष्पोद्भेदस्य वेणूच्छेदहेतुत्वादिति भावः । 'घोरे त्रिष्वथ धर्मोऽस्त्री पुण्ये सौम्यस्वभावयोः । चापन्यायाध्वराहिंसायज्वाचारयमेषु ना ॥' इति रत्नमाला । देवमणेः कण्ठमूलावर्तस्य शुक्तीनां वक्षोगतावर्तानां च जातस्य समूहस्य शोभायाः । अथ वा पूर्वोक्तावर्तेभ्यो जातयोत्पन्नया शोभया वा बन्धुरैः गन्धर्वनिवहैः अश्वसङ्घैः नित्याधिष्ठितस्य विशङ्कटस्य विस्तृतस्य कटकस्य राजधान्याः संपदा अधिकाः 'आवर्तो रोमजो देवमणिस्त्वेष निगलजः । द्वावुरस्यौ शिरस्यौ द्वौ द्वौ द्वौ रन्ध्रोपरन्ध्रयोः । एकः फालेऽप्यपाने च दशावर्ता ध्रुवाः स्मृताः । कण्ठजो रोचमानश्च स्वामिसौभाग्यवर्धनः ॥ वक्षस्थाः शुक्तयस्तिस्रो जयदा ऊर्ध्वलोमकाः ।' इत्यश्वलक्षणे । 'वाजिवाहार्वगन्धर्वाः' 'विशङ्कटं पृथु बृहत्' इत्यमरः । 'कटकं वलये सानौ राजधानीनितम्बयोः' इति विश्वः । अन्यत्र देवमणीनां शुक्तिजातानां मौक्तिकानां प्रभाभिः बन्धुरेण गन्धर्वनिवहेन देवजातिभेदेन; कटकस्य सानुप्रदेशस्य । 'बन्धुरं सुन्दरे नम्रे' इत्यमरः । आसन्नाश्रितानां समीपवर्तिनां वर्णानां द्विजादिवर्णानामतिशयसंपादने अलंकर्मीणं समर्थं सानुरागं च अन्तरं हृदयं येषां तथोक्ताः । स्वाश्रितवर्णपोषणैकतानहृदया इति यावत् । अन्यत्र आसन्नाश्रितवस्तूनां वर्णातिशयस्य नीलरक्तादिवर्णाधिक्यस्य संपादने सानोर्मणिमयप्रस्थस्य रागः प्रभा अन्तरे अवकाशे येषां तथोक्ताः; पर्वताः सानुदेशरत्नप्रभया स्वाश्रितवस्तूनां वर्णोत्पादकरत्नमयसानुप्रभाविशिष्टा इति भावः । 'कर्मश्मोऽलंकर्मीणः' इत्यमरः । 'रागोऽनुरागो मात्सर्ये लाक्षादौ रक्तिमत्विषोः' इति सारे । घनानां प्रौढानां परंपरायाः भरणे प्रकाशितं यत्तुङ्गं तस्य शृङ्गं प्रभुत्वं तेन संगताः । अन्यत्र घनपरंपरा मेघपङ्क्तिः । 'शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके । विषागोत्कर्षयोश्चापि शृङ्गं स्यात्कूर्चशीर्षयोः ॥' इति विश्वः । अभ्रान्तं संमर्दे युद्धे निजपादमूलपतितानां गद्गदेन भीत्या गलमूलस्थवचनेन वदतां

जीवः—(सनिर्वेदम्) अतिचारिण्या बुद्ध्या सह संसरतो मम कल्याणे का न्यूनता नाम । यथा,

रथ्याना जनुषः पराङ्मुखतया नित्यं प्रवृत्त्युन्मुखा-
न्भूयः प्रेरणकर्मणा स्वयमपि प्रोत्साहयन्ती मुहुः ।
स्वस्थं मां विषमेष्वनर्थबहुलेष्वाकृष्य चाकृष्य च
भ्राम्यन्ती कृपया ह्रिया च रहिता नाद्यापि विश्राम्यति ॥ २९ ॥

रमणीयचरणः— देव, समक्षमेव देव्याः कथमेवमाक्रोशः क्रियते ।

जीवः— एषा संप्रत्यात्मानमपि न जानाति । पश्य पश्य,

कासारान्तरमास्थिता जलझरी कुल्याऽध्वना निःसृता
केदाराभिगता यथैव हि तदाकारेण संपद्यते ।
तद्वद्बुद्धिरपीयमिन्द्रियचयद्वारा बहिर्निर्गता
व्याप्य स्वान्विषयांस्तदाकृतिगणेनाकारिता वर्तते ॥ ३० ॥

रमणीयचरणः— तर्हि न खेदावसरो देवस्य ।

दीर्घा प्रदीपवलयस्य मरीचिकेव बुद्धिर्बहिः प्रसृमरा विषयान्प्रयातु ।
आरुह्य गच्छतु भवानपि तां प्रमाता दोलाविहृत्यनुभवेन विनोद्यमानः ॥ ३१ ॥

जीवः— को नाम विनोदः संसारविषवल्लरीबीजन्यासेन प्रमातृभावेन । तथा हि,

प्रमातृत्वावेशे सति भवति कर्मस्वधिकृतिस्ततः कर्तृत्वं स्यात्तदनु फलभोक्तृत्वमपि च ।
विमुक्तस्यानेन ध्रुवमखिलदुःखप्रशमनं विमुक्त्यर्थोपायस्तदनुसरणीयः प्रथमतः ॥ ३२ ॥

रमणीयचरणः—(किंचिदिव परावृत्य) वत्से सत्त्वशुद्धे, एहि वन्दस्व देवम् ।

सत्त्वशुद्धिः—(उपसृत्य) देव, पणमामि । [देव, प्रणमामि ।]

जीवः—वत्से, अभिमतेन युज्यस्व ।

सत्त्वशुद्धिः—अहिमदा मे देवी । [अभिमता मे देवी ।] (इति बुद्धेरङ्कमारोहति ।)

जीवः—अहो, सत्त्वशुद्ध्याः संस्पर्शमात्रेण प्रसन्ना देवी प्रकृतिस्था च संवृत्ता ।

बुद्धिः—वच्छे सत्तसुद्धे, अविरलं मं परिस्सजेहि । [वत्से सत्त्वशुद्धे, अविरलं मां परिष्वजस्व ।]

सत्त्वशुद्धिः—(तथा करोति)

बुद्धिः—वच्छे, अज्जउत्तो वि संभाविअदु परिस्सङ्गेण [वत्से, आर्यपुत्रोऽपि संभाव्यतां परिष्वङ्गेण ।]

जीवः—देवि, मा मैवम् । यतस्त्वयि परिष्वक्तायामहमपि परिष्वक्त एव ।

ध्यायतीव जनस्त्वेष ध्यायन्त्यां त्वयि वल्लभे ।
चलतीव चलन्त्यां च न स्वतन्त्रः स्वयं क्वचित् ॥ ३३ ॥

बुद्धिः—ईरिसो अहिणिवेसो अत्थि जणस्स अज्जउत्तस्स । [ईदृशोऽभिनिवेशोऽस्मिज्जने आर्यपुत्रस्य ।]

जीवः—किमेतदुपचारः ।

नीरक्षीरवदाद्ययोरुपनतः सम्बन्धतोरेकता
विश्लेषस्य कथा कथंचिदपि न स्वप्नेऽपि संभाव्यते ।
किं च त्वद्गुणसारतामवैमतः कोऽपि क्वचित्ते च
प्रायेण व्यपदेशयाजनमहं जातो जगन्मण्डले ॥ ३४ ॥

बुद्धिः—एदं वि णाम अज्जउत्तस्स पडिग्गहप्पहावो । कहं अण्णहा मुद्धप्पकिदीए वि मह तह तह प्पहासंभवो । [एतदपि नामार्यपुत्रस्य परिग्रहप्रभावः । कथमन्यथा मुग्धप्रकृतेरपि मम तथा तथा प्रथासंभवः ।]

जीवः—

मुग्धा तव प्रकृतिरस्तु तवेयता किमायातमायतविशालशिलोलदृष्टे ।
मूढः पितेति तनयोऽपि कथं तथा स्यादुल्लालयन्नयितसमस्तफलाकलापः ॥

अपि च,

मुग्धे देवि परिग्रहस्त्वमिति यत्तेनानुभावेन मे
जीवो जीवति इति प्रशस्तिरियती विश्वं यया व्याप्यते ।
नो चेदेवमपाणिपादवपुषः सत्ताऽवशिष्टस्य ते
कान्तस्यास्य गुणोज्झितस्य सुजने नामापि गृह्णातु कः ॥ ३५ ॥

रमणीयचरणः—देव्यायत्त एव देवस्य सांसारिकः सर्वो व्यवहार इत्येतल्लिखितपठितमेव लोकानाम् ।

जीवः—अयि देवि,

तावत्संसृतिविभ्रमो मम भवेद्यावच्चया संगमो
विश्लेषो यदि मज्जनेव ध्रुवं मन्ये किमन्यत्तदा ।

किं पश्यामि किमु स्पृशामि किमहं जघ्रामि जिघ्रामि किं
किं वा नाम शृणोमि किं मुनरहं भुञ्जामि यत्तेजतः ॥ ३७ ॥

बुद्धिः—सह रूढमूलो ममदाहिणो अज्जउत्तस्स एवं वाहरेइ । [नन्वि रूढमूलो ममताभिमान आर्यपुत्रमेवं व्याहारयति ।]

जीवः—देवि, अहंताभिमान इति वक्तव्यम् ।

रमणीयचरणः—ईदृशमिदं दाम्पत्यस्य निरतिशयस्य सहजो देवस्य देवस्य वा ।

सत्त्वशुद्धिः—एवं एदं । [एवमेतत् ।]

जीवः—रमणीयचरण, कुतः प्रक्षान्तवेग इव स्थो दृश्यरोः ?

रमणीयचरणः—अवसितो विषमो जागरिन्तानां वनेचेलाः; प्रत्यासन्नश्च स्वप्नारामः । ततश्च,

स्वप्नारामस्य सांनिध्यात्सुप्तेष्विन्द्रियवायुषु । प्रक्षान्तस्पन्दबाधो रथोऽयमवतिष्ठते ॥ ३८ ॥

जीवः—कथं संनिहितः स्वप्नारामः ? (परितो दृष्टिं प्रसार्य)

कुटजवकुलपल्लीकुन्दमन्दारतानामधुरिपलपालीमांसलाङ्गावकाशा ।
समदशकुनिवृन्दास्पन्दनादाभिरामा स्फुरति दिगुपनयं स्वामिनारामसीमा ॥ ३९ ॥

अये रमणीयचरण, इहस्थेन त्वया परिवाल्यतामेष रथः । यावदहममुमारामं प्रविश्य सत्त्वशुद्धिद्वितीयया देव्या सह विहरामि ।

रमणीयचरणः—तथा । (इति स्थितः ।)

जीवः—(देव्या सत्त्वशुद्धया च सह नाडीद्वारा स्वप्नारामप्रवेशं नाटयित्वा) देवि, अत्रायं पुरुषः स्वयंज्योतिरत्रभवत्याः साहायकमपेक्षते ।

बुद्धिः—पिअं मे । [प्रियं मे ।]

जीवः—(समन्ताद्वलोक्य) अहो अस्य स्वप्नारामस्य रमणीयकम् । देवि, दृश्यतामाभिरूप्यमारामस्य । इह हि,

मरकतमणिच्छायाः केचिन्महीरुहराशयः कनकनिकषस्निग्धाश्चान्ये परे स्फटिकस्फुटाः ।
दलमिदुपलश्यामाश्चैके कुसुम्भविडम्बिनः कतिचिदितरे नानावर्णाः सुवर्णफलोद्गमाः ॥

अपि च,

क्वचित्प्रतिनवाङ्कुरं क्वचन पल्लवोल्लासवत्क्वचिद्विकचकुड्मलं कुहचिदच्छगुच्छच्छवि ।
क्वचित्फलभरानतं क्वचन भृङ्गसंघातभृत्सुहृद्भवति गन्धवद्वनमिवेदमानन्दनम् ॥ ४१ ॥

इन्त इन्त दृष्टनष्टस्वरूपाणि पूर्वदृष्टसरूपाणि प्रतिक्षणोन्निद्रव्यक्त्याकृतिजात्यन्यथात्वभाङ्मयूखानि वस्तूनि । तथा हि,

हस्तीत्याकलितः क्षणेन स महानद्रिः समापद्यते
सद्यः स द्रुमतामुपैति स पुनः पक्षिप्रथां गाहते ।
अज्ञातं शतयोजनान्तरितमप्यध्यक्षमालक्ष्यते
वस्तु प्राप्तिमदप्यपूर्वमिव संप्राप्तव्यमास्ते पुनः ॥ ४२ ॥

देवि, दीयतामितो दृष्टिः ।

बालातपस्पन्द्रिकया तरुण्या संश्लिष्यते संप्रति निर्विरोधम् ।
द्वित्रेव किंचिन्मुकुलीकृतानि वापीमिरब्जोत्पललोचनानि ॥ ४३ ॥

बुद्धिः—(विलोक्य विस्मयस्तैमित्यं रूपयति)

(नेपथ्ये कलकलः ।)

जीवः—(कर्णं दत्त्वा, सोल्लासम्)

शुककेकिकोकिलमधुव्रतध्वनैरविभाव्यमाननिजभेदवैभवम् ।
ललितस्वरक्रमविशेषलक्षितं सुतनोरिव व्यवहृतं निशम्यते ॥ ४४ ॥

देवि, आरामसीमायामवधारय श्रुतिम् ।

बुद्धिः—(अश्रुतिमभिनीय साङ्गभङ्गं तिष्ठति ।)

जीवः—सत्त्वशुद्धे, देवी निद्रालसेव लक्ष्यते । धारयस्व तावदेनाम् ।

सत्त्वशुद्धिः—(तथा करोति ।)

(पुनर्नेपथ्ये)

आरामभेव मायोत्थं स्वप्ननिर्माणलक्षणम् । मम सर्वेऽपि पश्यन्ति न मां पश्यति कश्चन ॥४५॥

जीवः—(श्रुत्वा) अतिगभीरमनोहरं वचनम् ।

(पुनर्नेपथ्ये)

उपर्युपरि संचरन्नपि न कश्चिदक्षेत्रविद्विरण्यनिधिमन्तरे विनिहितं यथा विन्दति ।
न विन्दति तथैव मामहरहर्भजन्नप्यहो विमोहपिहितो जनस्तदिह कस्य किं वा ब्रुवे ॥४६॥

जीवः—(श्रुत्वा) असंशयं निरतिशयरूपलावण्यसौन्दर्यपर्यवसानभूमितया स्वस्यानुरूपरमणानुपलम्भसंभूतमारामाभिमानिन्या निगूढायाः कस्याश्चित्कन्यकाया वचनमेतदिति मे निश्चयः। इन्त इन्त,

अकृत्रिममनोज्ञोऽयमक्षराणामनुक्रमः । अखण्डानन्दपदवीमध्यारोपयतीव माम् ॥ ४७ ॥

वत्से सत्वशुद्धे,

मीनस्त्रीव महानदीतटभुवोः स्वच्छान्तवृद्धात्मयोः
पर्यायेण गतागतं विदधती देवी निकामक्लमा ।
एषोऽहं च तथा तथा व्यवहरन्प्राप्तोऽस्मि राम श्रमं
व्योमाग्रे परिघण्डलानि विचरन्नाथो यथा पक्षिणाम् ॥ ४८ ॥

यदतिसंनिहितेऽस्मिन्नतिमुक्तात्समण्डपे निद्रालसां देवीं सुखशायिनीं विधेहि । अहमप्यारामविराम-
भुवमभिगम्य निर्धारितशब्दप्रवृत्तिमूलस्तदेवातिमुक्तात्समण्डपमनुप्रवेक्ष्यामि ।

सत्वशुद्धिः—(तथा करोति ।)

जीवः—(परिक्रम्यावलोक्य च, सहर्षाश्चर्यसंभ्रमौत्सुक्यम्) हन्त, सफलमद्य संजातं जन्म ।

इयं सा कल्याणी सुललितलतामूलनिलया पयोदेनारूढा तडिदिव जगन्मोहनतनुः ।
अवस्थाभेदेन स्थितिमुपगता काचिदधुना तदानन्दस्फूर्तिः सुतनुरिति संमोहयति माम् ॥

हन्त, न पर्याप्नुवन्ति सहस्रमपि लोचनानि सहस्रलोचनस्य सौन्दर्यमस्या निर्वर्णयितुं, वर्णयितुं
वा वाचोऽपि वाचस्पतेः । तथा ह्यस्याः,

श्रीर्विन्दुः शरदिन्दुरास्यगलितो दृक्कोण इन्दीवरं लेखा हासरुचां सुमान्यधरभूसंपल्लवः पल्लवः ।
अंशो मेरुरसंशयं मृगदृशो वक्षोजयोरुच्चयोस्तन्मन्ये वपुरेकदेशविभवो विश्वश्रियोऽपि श्रियः ॥

अपि च,

पादौ पद्मभुवः श्रियः सहचरौ पाणी शिवव्रञ्जनौ
केशाः केशवदिव्यरूपसुहृदः श्रुत्यन्तरङ्गे दृशौ ।
एतस्यास्त्रिजगत्यचुम्बितचमत्कारावलम्बादृते-
रङ्गं सर्वमनङ्गमङ्गलमहो वर्ण्येत किं केन वा ॥ ५१ ॥

किं बहुना,

करम्बयति चेदियं कमलगर्वसर्वंकषाम्पाङ्गपरिपाटिकाकलमलं सुराणां श्रिया ।
अथ स्वरसमात्मना यदि कदाचिदालिङ्गनं तरङ्गयति जीवतो मम स एव मोक्षोत्सवः ॥

का पुनरेषा भवेत् । अथ वा भवतु या काचिदेषा । पश्चादशेषं विचारयिष्यामि । सर्वथा
तावदेनया संप्रत्येष संवृत्तः । (इति परिक्रम्य, निष्क्रान्ताः सर्वे ।)

इति प्रथमोऽङ्कः ।

॥ विष्कम्भकः ॥

(ततः प्रविशत्यसूया ।)

असूया—अणत्तम्हि अण्णाणवम्भणा हेरदजालविआ महाराएण । जह, [आत्मनाऽस्यज्ञान-ब्रह्मणा महेन्द्रजालविदा महाराजेन । यथा,] 'असूये, इतो गत्वा मद्वचनादुच्यतां वत्सा बुद्धिः, नक्तं त्वयि प्रणयायान्यसक्तो देवः । तदप्रमत्तया त्वया भवितव्यम्' त्ति । अण्णं अ. [इति । अन्यच्च] 'अस्ति तस्य शुद्धिरिति तदायाः प्रियसखी । असंनिहितायां तस्यां तदात्वोचितवेषया त्वया तत्र गन्तव्यम्' त्ति । तदो मए वि भीएं णिअवेसं उज्झिअ सोम्म-वेसो गहीओ । इदं उण एत्थ चिन्तणिज्जं । भट्टिदारिआए णिच्चसंगदाए अत्तसुद्धीए कहं विस्सेसो भविस्सदित्ति । [इति । ततो मया बीभत्सं निजवेषमुज्झित्वा सौम्यवेषो गृहीतः । इदं पुनरत्र चिन्तनीयम् । भर्तृदारिकया नित्यसंगतायाः सत्त्वशुद्धेः कथं विश्लेषो भविष्यतीति । (परिक्रम्यावलोक्य च) को एसो खलिदगई इदो एव्व अभिवट्टइ । अहवा, असुक्खदंसिदाए आवादबोहो त्ति णं तक्केमि । [क एष स्खलितगतिरित एवाभिवर्तते । अथवा, असूक्ष्मद-र्शितयाऽऽपातबोध इत्येनं तर्कयामि ।]

(ततः प्रविशत्यापातबोधः ।)

आपातबोधः—

तातस्याध्ययनस्य मातुरपि मे शक्तेः प्रसादोदया-
द्विक्रान्तस्य न नाम रूपविषये नासादितं किंचन ।
विद्यास्थानतिमबसंभृततनोराम्नायकाण्डो गिरेः
क्षुण्ण एव मया पुनः सरणयः स्वर्गापवर्गस्पृशः ॥ १ ॥

असूया—(उपसृत्य) वच्छ आवादबोह, कुत्थ पत्थिदो सि । [वत्स आपातबोध, कुत्र प्रस्थितोऽसि ?]

आपातबोधः—(स्वगतम्) कैषा परिचितस्येव मे नाम गृह्णाति । भवतु, पृच्छामि । (प्रकाशम्) कां पुनरत्रभवतीमवगच्छामि ?

असूया—(स्वगतम्) कहं उण एदस्स पडिवत्तव्वं । [कथं पुनरेतस्य प्रतिवक्तव्यम् ।] (विचिन्त्य) एव्वं भणिस्सं । [एवं भणिष्यामि ।] (प्रकाशम्) वच्छ, तुह वा कहं पडिहाइ । [वत्स, तव वा कथं प्रतिभाति ?]

आपातबोधः—भगवती साधनसंपत्तिरिति मे मतिः ।

असूया—(स्वगतम्) एसो दिट्ठिआ मह सम्मं णाअदे [एष दिष्ट्या मम सम्मतः] तस्मादेनं अवतुल्य व्यवहरिष्यामि] (प्रकाशम्) अह इं। [अथ किम्।]

आपातबोधः—(सहर्षम्) अहो प्रवर्त्तव्या चेतना स्वयमुद्भूतैव। भो भगवते, अत्रभवतीं खल्वन्वेषयामि सत्त्वशुद्ध्या नियोगेन।

असूया—को णिओओ? [को नियोगः?]

आपातबोधः—सत्त्वशुद्धिरमात्यरमणीयचरणस्यानुसरणेन ब्रह्मजिज्ञासायाः समीपं प्रतिष्ठमाना मामेवमाह, 'वत्स, मद्वचनादुच्यतां प्रियसखी साधनसंभारैः। एकाकिनी देवी मदागमनपर्यन्तं त्वयाऽभिरक्षणीयेति।'

असूया—(स्वगतम्) कहं एआइणी भट्टिदारिआ? ता एसो अवसरो एव्व मए ताए सल्लविदुं [कथमेकाकिनी भर्तृदारिका? तर्ह्येष एवसर एव मम तया संलपितुम्।] (प्रकाशम्) कहिं दाणिं देवो देवी अ? [कुत्रेदानीं देवो देवी च?]

आपातबोधः—अतिमुक्तात्तमण्डपेऽर्धबुद्धः देवो वर्तते, देवस्तु ब्रह्मचर्यनाम्नि प्रथमाश्रमेऽमात्यरमणीयचरणेन सह संलपन्नास्त इति किंवदन्ती।

असूया—वच्छ, कहिं पत्थिदो सि मए पुच्छिदो सि। [वत्स, कुत्र प्रस्थित इति मया पृष्टोऽसि।]

आपातबोधः—

आम्रावस्य गिरेरन्ते काचिदप्राकृताकृतिः। गुहायां निहिता दृष्टा कन्या सामान्यतो मया॥
अद्भुतं तद्रूपमिति चित्रमारोप्य देवस्य प्रदर्शयितुं प्रस्थितोऽस्मि।

असूया—अहं वि णिओअं असुण्णं करिस्सं [अहमपि नियोगमशून्यं करिष्यामि।

(उभौ परिक्रम्य निष्क्रान्तौ।)

इति मिश्रविष्कम्भः॥

(ततः प्रविशतो जीवो रमणीयचरणश्च।)

रमणीयचरणः—ततः, ततः।

जीवः—

ततः स्वप्नारामावधिभुवि गता मन्थरगता वरारोहा या मे तडिदिव पुरः प्रादुरभवत्।
तयाऽथ प्रत्यक्षं सुदृढमुपगूढाङ्गक इव क्षणेन स्तब्धोऽहं तदुपरि न जानामि किमपि॥

रमणीयचरणः—अपि नामेदं मोहनम ?

जीवः—मा तावदेवं मंस्थाः ।

सस्नेहं परिरम्भसंभ्रमदृशाऽऽरम्भे विलोलभ्रुव-
स्तस्यास्तुङ्गपयोधरक्षितिधरासङ्गातिभारादिव ।
आनन्दाम्बुनिधेरगाधपयसो मध्ये निमग्नस्तदा
बाह्यं किंचन किंचनान्तरमहं नावेदिषं वस्तुतः ॥ ४ ॥

रमणीयचरणः—अथापि लोको न श्रद्दधाति ।

जीवः—(सामर्षम्)

दृष्ट्वा सा वरवर्णिनी त्रिभुवनोत्तीर्णां तदालिङ्गना-
दानन्दानुभवो निरन्तरतरः स्पष्टो ममासीत्तदा ।
अत्यर्थं विचिकित्सया किमधुना उक्त्वा दशायामस-
ल्लोको विप्रतिपद्यते यदि भवत्वेतावता का क्षतिः ॥ ५ ॥

रमणीयचरणः—नूनमेवमनुभूतं दैवेन । साक्षिणा पुनरत्र भवितव्यम् ।

जीवः—नन्वनुभव एव साक्षी । किं साक्षिणः साक्ष्यन्तरापेक्षया । न खलु दीपो दीपान्तरमपेक्षते स्वयं प्रकाशितुमन्यं प्रकाशयितुं वा ।

रमणीयचरणः—देव, किंरूपोऽनुभवः ।

जीवः—अनुभवरूप एव ।

रमणीयचरणः—विशिष्याभिधीयताम् ।

जीवः—अभिहितोऽपि विशेषो न प्रतिभाति भवादृशस्य ।

रमणीयचरणः—कुतो न प्रतिभाति । बुभुक्षितं न प्रतिभाति किंचिदिति खलु प्रवादः । न चाहं बुभुक्षितः, यतो विधिहुतदधिमधुपयोघृतप्रायहविर्विवर्तविग्रहोऽस्मि ।

जीवः—हन्त, तर्हि प्रष्टव्यो भवान्कीदृशानि तानि द्रव्याणीति ।

रमणीयचरणः—दधि मधुरं मधु मधुरं क्षीरं मधुरं घृतं च मधुरं तत् ।

जीवः—कीदृशं माधुर्यम् ?

रमणीयचरणः—

माधुर्यमनुभवैकप्रतिपत्तव्यं न शक्यमभिधातुम् ॥ ६ ॥

बहुवचनान्यथानुपपत्तिसमधिगम्यान् सहचारिणो भिन्नरूपान् धूर्तगोमयादीनुपाददते, तथा धवादिशब्दाः प्रतीतार्थभेदाः साहचर्यादिनिमित्तानुरोधेन खदिरादीनुपाददते। तथा हि— एकवृत्तिपदावरोधप्रतीतसाहचर्यौ धवखदिरौ; अत एव तयोरेव प्रत्ययवचनिवेशाद्बहुवचनं न भवति। कथं पुनर्धवादीनामर्थान्तराभिधानं शक्यमध्यवसातुम्? यावता लोकः पदसमुदायादर्थसमुदायमवैति, नावयवात्। यदप्युक्तम्— प्रवृत्तिनिवृत्तिसमारोपादिति, तदप्यसारम्; न हि प्रक्षरतीति व्युत्पत्त्या न्यग्रोधः प्लक्षः, नापि न्यग्रोहतीति व्युत्पत्त्या प्लक्षो न्यग्रोधो भवति; रूढानां हि धर्मनियमाय यथाकथंचिद्व्युत्पत्तिः क्रियते, न तु व्युत्पत्तिवशेन रूढयोऽवतिष्ठन्ते। नापि प्रकृतिप्रत्ययवदन्वयव्यतिरेकसमधिगम्या धवादीनां समुदायार्थता। यदप्युच्यते— शौण्डार्चादिवत् धवशब्दः साहचर्यादिलक्षणया खदिरमुपादत्ते इति, तदपि न सम्यक्; सति श्रुत्यर्थसंभवे लक्षणाया अयोगात्; न च खदिरार्थो धूर्तगोमयादिवल्लक्षयितव्यः, तस्य खदिरशब्देनैव साक्षादभिधानात्। एवं तर्हि, यदा धवखदिरादयः समुदायाः प्रविभागेनान्वाचिख्यासिताः, तदा तमेव समुदायं प्रत्याय्यतयाऽभिसंधायावयवा उपादीयन्ते, न त्ववयवार्थप्रतिपादनाभिप्रायेण। अतस्तस्यां युगपदधिकरणवचनतायां समीहितायां समुदायपरत्वादवयवप्रयोगस्य, तेषामवयवानां प्रत्येकमनेकार्थत्वमुच्यते। किं पुनः प्रयोक्तुरभिप्रायमनुरुध्यन्ते शब्दाः? येन तदभिसंधानात् समुदायमभिदध्युः। नेत्याह; अन्यत्राप्यवयवाभिधायिनां शब्दानामवयवमुखेन समुदायाभिधानसामर्थ्यं दृश्यते; यथा— सुरभि कुवलयम्, यन्मधुरं राजतनम्, इति; यदि हि सुरभिमधुरशब्दौ गन्धरसमात्राभिधायिनावपि गन्धरसादिसमुदायान् कुसुमफलविशेषादीनवयवमुखेन नाचक्षाते, कुवलयादिभिः सह सामानाधिकरण्यं विरुध्येत। सत्येतत्; अस्ति समुदायाभिधानसामर्थ्यमवयवशब्दानाम्, किं तु सुरभि कुवलयम् इत्यादौ सामानाधिकरण्येन तदवधार्यते; द्वन्द्वे तु निबन्धनमशक्यमवधारयितुमिति तस्यानुपपत्तिः। नैवम्, समुदायाभिधानस्य प्रक्रान्तत्वात्। यद्येवं पट्टीमृत्पात्रीति समानाधिकरणलक्षणः पुंवद्भावः प्राप्नोति। उच्यते; अथेह कस्मान्न भवति दर्शनीयाया माता दर्शनीयामाता? अथ मतमेतत्— प्राक् समासाद्यत्र सामानाधिकरण्यम्, इहापि न दोषो भवति; न हि प्राक् समासात् सामानाधिकरण्यमत्र विद्यते। ननु च वाक्येऽपि समुदायप्रक्रमेणैवावयवपदानां प्रयोगात्, कथमुच्यते प्राक् समासात् सामानाधिकरण्यं नास्तीति? समुदायप्रक्रमस्य निर्निबन्धनत्वेनाप्रतीयमानत्वात्; कुवलयादिशब्दसामानाधिकरण्यं हि सुरभिप्रभृतीनामसमासेऽपि समुदायतानिबन्धनम्; इह त्वेकार्थीभावः समुदायाभिधाने निमित्तमिति वाक्ये सामानाधिकरण्याप्रसिद्धिः। एवमपि, विप्रतिषिद्धेषु युगपदधिकरणवचनताया अनुपपत्तिः; यथा—सुखदुःखे, जननमरणे, शीतोष्णे, इति; सुखादिप्रतिघातेन हि दुःखादयः, दुःखादिप्रतिघातेन च सुखादय इति। नैवम्; सर्व एव शब्दा विप्रति-

षिद्धाः ; प्लक्षन्यग्रोधावित्यत्रापि हि प्लक्षशब्दः प्रयुज्यमानः प्लक्षार्थं संप्रत्याययति, न्यग्रोधार्थं निवर्तयति ; न्यग्रोधशब्दः प्रयुज्यमानो न्यग्रोधार्थं प्रत्याययति, प्लक्षार्थं निवर्तयति । तत्र चेयुक्ता युगपदधिकरणवचनता दृश्यते, इहापि युक्तं दृश्यताम् । एवमपि शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानं प्राप्नोति । ततः किम् ? युगपदधिकरणवचनतायां अनुपपत्तिः— प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधा इति ; यथैव हि शब्दानां पौर्वापर्यं तद्वदर्थानामपि स्यात् । नैवम् ; एवं सति, द्विवचनबहुवचनयोरप्यनुपपत्तिः ; प्लक्षशब्दो हि सार्थको निवृत्तः, न्यग्रोधशब्द उपस्थितः ; स चैक एकार्थ इति तस्मादेकवचनमेव प्राप्नोति । विग्रहे खल्वपि युगपदधिकरणवचनता दृश्यते, किं पुनः समासे ; तद्यथा— 'द्यावा ह क्षामा,' 'द्यावा चिदस्मै पृथिवी सन्नमेते' (ऋ. ७-६-११, २-६-९) इति । समुदायात् सिद्धमिति चेत्, तन्न, समुदायस्यैकार्थत्वात् ; एकार्था हि समुदाया भवन्ति ; तद्यथा—शतं यूथं वनमिति । नायमेकार्थः ; किं तर्हि ? द्व्यर्थो बहुर्वाऽपि ; प्लक्षोऽपि द्व्यर्थः, न्यग्रोधोऽपि द्व्यर्थः । यद्येवमनेकार्थत्वात् 'बहुषु बहुवचनम्' (पा. १-४-२१) इति बहुवचनं प्राप्नोति । तन्न, बहुत्वाभावात् ; याभ्यामेवात्रैको द्व्यर्थस्ताभ्यामेवापरोऽपि । यद्येवमन्यवाचकेन शब्देनान्यस्य वचनं नोपपद्यते । एवं तर्हि प्लक्षस्य न्यग्रोधत्वात् न्यग्रोधस्य च प्लक्षत्वात् स्वशब्देनैवाभिधानं भविष्यतीति । कथं पुनः प्लक्षोऽपि न्यग्रोधः न्यग्रोधोऽपि प्लक्षः स्यात् ? यावता कारणाद्रव्ये शब्दसंनिवेशो भवति । कारणाद्रव्ये शब्दसंनिवेश इति चेत्, कारणमुक्तं पुरस्तात्— यदि प्रक्षरतीति प्लक्षः न्यग्रोधेऽप्येतद्भवति, यदि न्यङ्रोहतीति न्यग्रोधः, प्लक्षेऽप्येतद्भविष्यतीति । दर्शनं वै हेतुः ; न च न्यग्रोधे प्लक्षशब्दो दृश्यते । दर्शनं हेतुरिति चेत्, तुल्यमेतद्भवति ; प्लक्षेऽपि न्यग्रोधशब्दो दृश्यते । नन्वेतद्ब्रवीमि— नैष लोके संप्रत्ययोऽस्ति, न हि प्लक्ष आनीयतामित्युक्ते न्यग्रोध आनीयते । द्वन्द्वविषयमेवैतद्द्रष्टव्यम् ; युक्तं पुनर्यान्नियतविषया नाम शब्दाः स्युः ? बाढं युक्तम्, अन्यत्रापि दर्शनात् ; तद्यथा— समानेऽपि रक्ते वर्णे गौर्लोहित इति भवति, अश्वः शोण इति ; समाने शुक्ले वर्णे गौः श्वेत इति भवति, अश्वः कर्क इति । यदि तर्हि प्लक्षोऽपि न्यग्रोधः न्यग्रोधोऽपि प्लक्षः, एकेनैवोक्तत्वादपरस्य प्रयोगोऽनुपपन्नः । अनुक्तः प्लक्षेण न्यग्रोध इति कृत्वा न्यग्रोधशब्दः प्रयुज्यते । कथमनुक्तः ? यदिदानीमेवोक्तं प्लक्षोऽपि न्यग्रोधः न्यग्रोधोऽपि प्लक्ष इति । सहभूतावन्योऽन्यस्यार्थमाहतुः, न पृथग्भूतौ । किं पुनः कारणम् ? शब्दशक्तेः स्वभावः ; प्रतिनियता हि वृत्तिवाक्ययोः शब्दानामभिधानशक्तिः ; तद्यथा— शबलीश्यामा देवदत्तेति । 'उपमानानि सामान्यवचनैः' (पा. २-१-५५) इति समासे शबलीशब्देनावच्छिद्यमानविशेषवरुद्धः श्यामाशब्दो यद्यपि न सामान्यवचनः, तथाऽप्यसौ देवदत्तायामुपमीयमानायां वर्तते शबलीव श्यामा देवदत्तेति ; तदिदमुक्तम्— 'प्रागभिसंबन्धाद्यः सामान्यवचनः' इति समासमभिसंबन्धशब्देन दर्शयति ; यतस्तत्र विनिवृत्तविशेषान्तराकाङ्क्षाणि

यथासमीहितविशेषावरुद्धानि पदानि । सोऽयं वृत्तिवाक्ययोर्विशेषः । किं च, निष्कौशाम्बिः, निर्वाराणसिरिति भेदे सति निरादीनां न क्रान्ताद्यर्थसंभवः । अपि च, गौरखरवदरण्यम्, लोहित-शालिमान् ग्राम इति । 'प्राग्वृत्तेर्जातिवाचित्वं न च गौरखरादिषु ।' यथा— स्निग्धकिसलय-मरण्यम्, मत्तमातङ्गं वनमिति । 'वृत्तिरन्यपदार्थे या तस्या वाक्येष्वसंभवः ॥'

एवं च प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधाः इति द्वन्द्वेऽपि सहभूतयोरेवान्यार्थाभिधानं भवि-ष्यति, न पृथग्भूतयोरिति । अथवा, इह कौचित् प्लक्षन्यग्रोधौ प्राथमकल्पिकौ; कौचित् क्रियया गुणेन वा प्लक्ष इवायं प्लक्षः, न्यग्रोध इवायं न्यग्रोध इति। तत्र प्लक्षाविति युक्ते संदेहः स्यात्— किमिमौ प्लक्षावेव, आहोस्वित् न्यग्रोधावेव, अथवा प्लक्षन्यग्रोधाविति । तत्रासंदेहार्थो न्यग्रोधशब्दः प्रयुज्यते । सेयं युगपदधिकरणवचनता दुःखा दुरुपपादा च । यद्यपि चास्या ज्ञापकं 'द्यावा ह क्षामा' इति, तदपि छान्दसम् । इदं तर्हि ज्ञापकमस्तु 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' 'पूर्वः दक्ष-वडवौ' (पा. २-४-२६, २७); यदि ह्यत्र कुक्कुटमयूर्यौ इत्यादिषु सहविवक्षा न स्यात्, अनर्थकः सूत्रारम्भः स्यात् । ननु च, तत्पुरुषस्योत्तरपदार्थप्रधानत्वात्तत्र परवल्लिङ्गतातिदेशोऽनर्थकः । नानर्थकः, तत्पुरुषस्य क्वचित् पूर्वपदार्थप्रधानत्वात्; यथा— अर्धं पिप्पल्याः अर्धपिप्पली, पूर्वं कायस्य पूर्वकायः, उत्तरं शरीरस्य उत्तरशरीरम्, इति । यद्येवम्, प्राप्तो जीविकां प्राप्तजीविकः, निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः, अलं कुमार्यै अलंकुमारिः, इत्यत्रापि परवल्लिङ्गता प्राप्नोति । एवं तर्हि, द्वन्द्वेन सह निर्देशाच्चार्थाविषयोऽत्र तत्पुरुषो गृह्यते; यथा— क्रयाक्रयिका, पुटापुटिका, फलाफलिकेति, अश्वमतल्लिका, कुमारीतल्लजकः, गोप्रकाण्डम् इति । अत्र हि, यथा खदिर-वेति युगपदधिकरणवचनतायाम्, तथा समानाधिकरणतायामपि विशेषणविशेष्यभावेन संमूर्छन्ताविवान्योन्यमर्थौ भवतः । तथा हि— प्रयोजनवत्तया महत्त्वाश्रयश्चासावल्पत्वेन लघुत्वात् क्रयिका चेत्युपपद्यते नीलोत्पलादेर्विशेषणविशेष्यभावः । एवं फलाफलिका, पुटा-पुटिकेति । अश्वमतल्लिकेत्यत्राश्वशब्दः प्रवर्तमानः सर्वाश्वावग्रहरूपेण प्रवर्तते; मतल्लिकाशब्दः प्रशंसावचनः प्रवर्तमानो विशिष्टावग्रहरूपेणावच्छिनत्ति । यदि वा, मतल्लिकेत्येतत् प्रशंसावचनं न्यूनाधिकभावमनपेक्ष्य प्रवर्तमानमनेनैव धर्मेण सर्वयोग्यं सत् अश्व इत्येतेन विशिष्टायां योग्यतायां नियम्यते । ततो यथा— शुक्लः कृष्णश्चायं मृगः सारङ्गः शबल इति वा, तथा अश्वमतल्लिकेत्ये-तदुभयरूपोऽर्थ इत्युभयमुभयेन संनिवेश्यते । एवं कुमारीतल्लजकः, गोप्रकाण्डम् इति । यद्येवम्, अर्धपिप्पलीत्यादिषु षष्ठीसमासापवादेषु परवल्लिङ्गता न प्राप्नोति । नैवम्; तत्रापि अर्धं च तत् पिप्पली चार्धपिप्पलीति, पूर्वश्चासौ कायश्च पूर्वकाय इति सामानाधिकरण्यमेव परमार्थः । अत एव यत्र सामानाधिकरण्यस्यासंभवः, तत्र षष्ठीसमास एव भवति; यथा—वेदार्धं दक्षिणं मेरोः,

स्वरार्थम्, चूडिकार्थम्, पणार्थम् इति। न च अर्थादीनामेवैष नियमः, यतोऽन्यत्रापि सामानाधिकरण्यस्य विवक्षाऽविवक्षाभ्यामुभयथा तत्पुरुषो भवति; तद्यथा— अग्रहस्तः, हस्ताग्रम्, तलपादः, पादतलम् इति ॥

ननु च, 'चार्थे द्वन्द्वः' (पा. २-२-२९) इत्युच्यते; चश्चाव्ययम्, तेन समासस्याव्ययसंज्ञा प्राप्नोति। नैष दोषः; पाठेनाव्ययसंज्ञा क्रियते; न च समासस्तत्र पठ्यते। मा भूत्पाठे संज्ञा, तथाऽप्यभिधेयवल्लिङ्गवचनानि भवन्ति; यश्चेहार्थोऽभिधीयते, न तस्य लिङ्गसंख्याभ्यां योगोऽस्ति। नेदं वाचनिकम्— अलिङ्गता, असंख्यता च। किं तर्हि? स्वाभाविकमेतत्। तद्यथा—समानमीहमानानामर्थीयानानां च केचिदर्थेन युज्यन्ते, अपरे न; न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुम्, कश्चिद्वाऽनर्थक इति सर्वैरनर्थकैः। तत्र किमस्माभिः शक्यं कर्तुम्; यत्प्राक् समासाच्चार्थस्य लिङ्गसंख्याभ्यां योगो नास्ति, समासे च भवति; स्वाभाविकमेतत्। अथवा, आश्रयतो लिङ्गवचनानि भविष्यन्ति, यथा गुणवचनेषु। गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति। तद्यथा, शुक्लं वस्त्रम्, शुक्ला शाटी, शुक्लः कम्बलः, शुक्लौ कम्बलौ, शुक्लाः कम्बलाः इति। यदसौ द्रव्यं श्रितो भवति समासस्तस्य यल्लिङ्गं वचनं च तत्समासस्यापि भविष्यति। अथेह कस्मान्न भवति— याज्ञिकश्चायं वैयाकरणश्च, कठश्चायं बह्वृचश्च, औक्थिकश्चायं मीमांसकश्चेति? शेष इति वर्तते, अशेषत्वान्न भविष्यति। यदि शेष इति वर्तते— "उपास्नातं स्थूलसिक्तं तूष्णींगङ्गं महाह्रदम्। द्रोणं चेदशको गन्तुं मा त्वा तापां कृताकृते ॥" इत्येतन्न सिध्यति। नैष दोषः; अन्याद्धि कृतमन्यदकृतम्। चार्थे द्वन्द्ववचने असमासेऽपि चार्थसंप्रत्ययादनिष्टं प्राप्नोति— "अहरहर्नयमानो गामश्वं पुरुषं पशुम्। वैवस्वतो न तृप्यति सुराया इव दुर्मदी ॥" 'इन्द्रस्त्वष्टा वरुणो वायुरादित्यः' इति। नैष दोषः; इह 'चे द्वन्द्वः' इतीयता सिद्धम्; कथं पुनश्चे नाम वृत्तिः स्यात्? शब्दो ह्येषः; शब्देऽसंभवादर्थे कार्यं विज्ञास्यते। सोऽयमेवं सिद्धे सति यदर्थग्रहणं करोति, तस्यैतत्प्रयोजनम्; यथैवं विज्ञायेत— चकृतेऽर्थे चार्थ इति। कः पुनश्चकृतोऽर्थः? समुच्चयः, अन्वाचयः, इतरेतरयोगः, समाहारः इति। तत्र द्वयोः सापेक्षत्वात् समासो न भवति, द्वयोस्तु भवतीति प्रतिपादितं पुरस्तात्। ननु चैवम्, चकृतोऽर्थश्चार्थ इति पक्षे प्लक्षन्यग्रोधावित्यत्र प्लक्षश्च न्यग्रोधश्चेति विग्रहः प्राप्नोति; यावता प्लक्षश्च न्यग्रोधश्चेत्युक्ते गम्यत एतत्— प्लक्षोऽपि न्यग्रोधसहायः, न्यग्रोधोऽपि प्लक्षसहाय इति। तत्र को दोषः स्यात्? प्लक्षौ च न्यग्रोधौ चेति यदुक्तं तन्न घटते। युगपदधिकरणवचनताप्रदर्शनमात्रपरमेतत्, न त्वयमेव परमार्थः। एवं हि क्रियमाणे एकश्च विंशतिश्च एकविंशतिः, द्वौ च विंशतिश्च द्वाविंशतिरिति द्विवचनं बहुवचनं च प्राप्नोति। किं पुनरेकविंशतिरित्यादयो द्वन्द्वाः?

बाढम् । एकाधिका विंशतिरिति पक्षे हि संख्यास्वरो न प्राप्नोति ; स हि शतसहस्रमिति षष्ठी-समासे मा भूदिति द्वन्द्व एवाभ्यनुज्ञायते । यद्येवमितरेतरयोगपक्षे द्विवचनम्, समाहारपक्षे तु नपुंसकत्वं प्राप्नोति । नैवम् ; 'लिङ्गमशिष्यं लोकाश्रयत्वात्' इति समाहारेऽपि नपुंसकत्वं न भविष्यति । अथ द्वादशेत्रापि समाहारः कस्मान्न भवति ? आ दशभ्यः संख्याः संख्येय एव वर्तन्ते ; अतः इङ्भूतावयवसमुदायतयामितरेतरयोग एव प्राप्नोति ; यथा 'अधिकरणैतावत्त्वे च' (पा. २-४-१९) दशेमे मार्दङ्गिकपाणविका इति ॥

तदेतत् कृत्तद्धितसमासभेदाद्विभक्तावयवं त्रिधा प्रातिपदिकमभिहितम् । अथाविभक्तावयवमुच्यते । तदपि त्रिधा—नामरूपम्, अव्ययरूपम्, निपातरूपं च । तत्रानपेक्षितशब्दव्युत्पत्तीनि सत्त्वभूतार्थाभिधायीनि च नामानि । तानि त्रिधा—एकार्थानि, अनेकार्थानि, एकानेकार्थानि चेति ; तत्र, एकार्थानि यथा—वृक्षः, कुण्डम्, कुमारी, ङित्थः, शुक्रः, शीघ्रः, इन्द्रः, शक्रः, पुरन्दरः, कोष्ठः, कुसूलः, इति । अनेकार्थानि यथा— अक्षाः, माषाः, पादाः, अवयः, हरयः, गावः, भूतयः, पुण्डरीकम्, पुष्करम्, साम, ललाम, इति । एकानेकार्थानि यथा—दस्रौ, नासत्यौ, पुष्पवन्तौ, उभौ, रोदसी, रोदस्यौ, दाराः, वर्षाः, आपः, वनम्, पङ्क्तिः, सेना, इति । प्रायेणालिङ्गसंख्याशक्तीन्यव्ययानि ; तान्यपि त्रिधा—द्रव्यवचनानि, गुणवचनानि, संबन्धवचनानि चेति ; तेषु द्रव्यवचनानि यथा— स्वः, प्रातर्, दिवा, दोषा, नक्तम्, सायम्, विहायसा, भूः, शम्, शंयोः, मयः इति ; गुणवचनानि यथा— उच्चैः, नीचैः, सुष्ठु, अपष्ठु, मुधा, अद्धा, मृषा, मिथ्या, अलम्, बलवत्, पृथक्, विष्वक्, इति । संबन्धवचनानि यथा— समया, निकषा, बहिः, अन्तः, अन्तरेण, ऋते, आरात्, युगपत्, साकम्, सार्धम्, अमा, सह, इति । असत्त्ववचनाश्चादयो निपाताः । तेऽपि त्रिधैव—स्वतन्त्राः, परतन्त्राः, विशेषपरतन्त्राश्च ; तेष्वस्त्यादयः स्वतन्त्राः ; यथा—अस्ति, असि, अस्मि, एहि, ब्रूहि, मृदुहि, मन्ये, जाने, पश्य, पश्यत, स्यात्, इति ; कर्मप्रवचनीयाश्चादयः परतन्त्राः—वृक्षमनु विद्योतते, उपार्जुनं योद्धारः, अप त्रिगर्तेभ्यो वृष्टो देवः, अभिमन्युरर्जुनतः प्रति, यदत्र मां प्रति स्यात्, अधि ब्रह्मदत्ते पञ्चालाः, अहं च त्वं च वृत्रहन्, (ऋ. ६-४-२३) 'वायुर्वा त्वा मनुर्वा त्वा' (तै. सं. १-७-७-२), 'अहमेव पशूनामीशे,' सरोजामिव ते मुखम्, 'न नूनमस्ति नो श्वः' (ऋ. २-४-१०) 'कस्विदेकाकी चरति' (तै. सं. ७-४-१८-१) इति । गतिप्रादयो विशेषपरतन्त्राः ; यथा— प्रकरोति, पराकरोति, ऊरीकरोति, गुडुगुधाकरोति, कारिकाकरोति, खाट्-करोति, पटपटाकरोति, तिरस्करोति, पुरस्करोति, श्रद्धा, अन्तर्धिः, इति ॥

अथानुकरणम् । तदपि त्रिधैव—साध्वनुकरणम्, असाध्वनुकरणम्, अव्यक्तानुकरणं

च । तत्र प्रथमं सार्थकं, निरर्थकं च । तयो. सार्थकं यथा— द्विः पचत्वित्याह, अग्नी इत्याह, पचतीत्याह; अत्र सार्थकत्वात् 'तिङ्ङतिङः', (पा ८—१—२८) इति निघातः 'ईदूदेद्विवचनम्', (पा १—१—११) इति प्रगृह्यत्वम्, तिङन्तत्वादप्रातिपदिकत्वे सुबुत्पत्तिश्च न भवतीति । निरर्थकं यथा— 'चुः पूजायाम्' 'अपिः पदार्थसंभावनाऽन्ववसर्गगर्हासमुच्चयेषु, (पा. १ ४-९४, ९६) 'चः समुच्चये'; अत्रार्थस्यानुकरणात् स्वस्वरूपत्वाच्च प्रातिपदिकत्वे सुपः श्रवणं भवतीति । द्वितीयम्— अशक्तिजम्, अपभ्रंशश्च; तत्राशक्तिजं यथा— अहो लुलक इति वक्तव्ये शक्तिवैकल्यात् अहो लुलक इत्याह; अपभ्रंशो यथा—हेरयो हेरय इति वक्तव्ये असुरा हेलयो हेलय इति वदन्तः पराबभूवुः । तृतीयं— निरुल्लेख, सोल्लेखं च; तयोः निरुल्लेखं यथा— पटत्पटदिति करोति, पटपटायते । सोल्लेखं यथा— तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्दाद इति; दाम्यत, दत्त, दयध्वमिति तदेतत्त्रयं शिक्षेत्—दमं दानं दयामिति ॥

प्रत्ययविशेष एव शक्तिसंख्याविभागकृद्विभक्तिः । सा त्रिधा— तिङ्विभक्तिः सुब्विभक्तिः, अव्ययविभक्तिश्च । तासु तिङ्विभक्तिः षोढा— परस्मैपदविभक्तिः, आत्मनेपदविभक्तिः, सार्वधातुकविभक्तिः, आर्धधातुकविभक्तिः, व्यक्तकालविभक्तिः, अव्यक्तकालविभक्तिश्च; तासु परस्मैपदविभक्तिर्यथा— पचति, पचतः, पचन्ति; आत्मनेपदविभक्तिर्यथा—पच्यते, पच्येते, पच्यन्ते; सार्वधातुकविभक्तिर्यथा—व्यपच्यत, व्यपच्येतां, व्यपच्यन्त; आर्धधातुकविभक्तिर्यथा—पपाच, पक्ता, पक्षीष्ट; व्यक्तकालविभक्तिर्यथा—अपाक्षीत्, अपचत्, पक्ष्यते; अव्यक्तकालविभक्तिर्यथा—पचतु, पचेत्, अपक्ष्यत इति । सुब्विभक्तिरपि षोढा— कारकविभक्तिः, संबन्धविभक्तिः, शेषविभक्तिः, उपपदविभक्तिः, प्रधानविभक्तिः, संबोधनविभक्तिश्च; तासु कारकविभक्तिर्यथा—कटं करोति, दात्रेण लुनाति, ब्राह्मणाय ददाति; संबन्धविभक्तिर्यथा—विद्यया यशः, यूपाय दारु, गवां कृष्णा संपन्नक्षीरतमा इति; शेषविभक्तिर्यथा—मातुः स्मरति, वृक्षस्य पर्णं पतति, माणवकस्य पितरं पन्थानं पृच्छति; उपपदविभक्तिर्यथा—वृक्षं प्रति विद्योतते विद्युत्, नमो देवेभ्यः, ऋते देवदत्तात्; प्रधानविभक्तिर्यथा—देवदत्तः पचति, चैत्रेण पच्यते, वीरः पुरुषः इति; संबोधनविभक्तिर्यथा—हे देवदत्त, व्रजामि देवदत्त, आगच्छ देवदत्त, इति । तद्धितप्रत्ययाविशेषोऽव्ययविभक्तिः । सा द्विधा—विभक्तिकार्यवती, अविभक्तिकार्यवती च । विभक्तिकार्यवती 'प्राग्दिशो विभक्तिः' (पा. ५—३—१), इति । सा त्रिधा-विभक्त्यादेशरूपा, प्रत्ययादेशरूपा, प्रत्ययरूपा च; तासु विभक्त्यादेशरूपा यथा—'पञ्चम्यास्तसिल्' 'सप्तम्यास्त्रल्' 'इदमो हः', 'किमोऽत्', (पा. ५—३—७, १०, ११, १२) भवान्दीर्घायुरायुष्मान्देवानांप्रियएतैर्योगे तेऽन्यासां चेति; यथा—सर्वस्मात्, सर्वतः, यस्मिन्, यत्र, तं भवन्तम्, ततो भवन्तम्,

एतेन दीर्घायुषा अत्र दीर्घायुषा, इहायुष्मते ...स्मै आयुष्मते, कस्य देवानां प्रियस्य क्व देवानां प्रियस्य, इति ; प्रत्ययादेशरूपा 'तसेश्च' (५–३–८) तसिः । स च 'प्रतियोगे पञ्चम्यास्तसिः' 'अपादाने चाहीयरुहोः', 'अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः', 'षष्ठ्या व्याश्रये', (पा. ५–४–४४, ४५, ४६, ४८) 'आद्यादिभ्यश्च सर्वविभक्तिः', इति ; यथा—अभिमन्युरर्जुनतः प्रति. शैलतोऽवतरति, शीलतोऽतिगृह्यते, देवा अर्जुनतोऽभवन् ; आदौ आदितः, प्रमाणेन प्रमाणतः, इति ; प्रत्ययरूपा— 'सर्वैकान्यकिंयत्तदः काले दा', 'इदमोर्हिल्', (पा. ५–३–१५, १७), 'प्रकारवचने थाल्' 'था हेतौ च च्छन्दसि', 'इदमस्थमुः', 'किमश्च' (पा. ५–३–२३, २६, २४, २५) इति ; यथा—सर्वदा एतर्हि ; सर्वथा, प्रकथा. इत्थं, कथम्, इति । अविभक्तिकार्योऽपि त्रिधा—शब्दोक्ता, अर्थोक्ता, प्रयोगोक्ता च ; तासु शब्दोक्ता यथा— 'सप्तमीपञ्चमीप्रथमाभ्योऽस्तातिः', (पा. ५–३–२७) 'देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्', (पा. ५–४–५६) इति ; यथा—पुरस्ताद्वसति, पुरस्तादागतः, पुरस्ताद्रमणीयम्, देवत्रा गच्छति, मनुष्यत्रा वसति, पुरुषत्राऽभिनिविशते, इति ; अर्थोक्ता 'बहुल्पार्थाच्छस् कारकादन्यतरस्याम्', 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' (पा. ५–४–४२, १७) इति ; यथा— बहु देहि बहुशो देहि, बहुभ्यो देहि बहुशो देहि, द्वौ द्वौ देहि द्विशो देहि, द्वाभ्यां द्वाभ्यां देहि द्विशो देहि, माषं माषं देहि माषशो देहि, पञ्च वारान् देहि पञ्चकृत्वो देहि, इति ; प्रयोगोक्ता — 'तेन तुल्यं क्रिया चेद्वतिः', 'तत्र तस्येव' (पा. ५–१–११५–११६) ; यथा— अग्निना तुल्यमयं वर्तते अग्निवत्, देवमिव भवन्तं पश्यामि देववत्, ब्राह्मणेन तुल्यमस्मै दीयते ब्राह्मणवत्, व्याघ्रेण तुल्यमस्माद्बिभेति व्याघ्रवत्, मथुरायामिव पाटलिपुत्रे प्रासादाः मथुरावत्, श्रोत्रियस्येवास्य शुक्ला दन्ताः श्रोत्रियवत् । तद्धितविभक्तिरिति वक्तव्ये अव्ययग्रहणम्, अधिक्षि, प्रत्युरसं, पारेगङ्गम्, पुरा, स्वयं, साक्षात्, इत्येवमादीनामुपसंग्रहणार्थमिति ॥

'प्रथमानिर्दिष्टं समास उपसर्जनम्' 'एकविभक्ति चापूर्वनिपाते' (पा. १–२–४३, ४४) । तत् त्रिधा— विशेष्यरूपम्, विशेषणरूपम्, तुल्यरूपं च ; तत्र विशेष्यरूपं यथा— पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः, पूजितोऽश्वः अश्वकुञ्जरः, गर्भिणी गौः गोगर्भिणी, स्तोकोऽग्निः अग्निस्तोकः, कायस्य पूर्वं पूर्वकायः, अर्धं पिप्पल्याः अर्धपिप्पली इति ; विशेषणरूपं यथा— राज्ञः पुरुषः राजपुरुषः, दन्तानां राजा राजदन्तः, कष्टं श्रितः कष्टश्रितः, जीविकामापन्नः आपन्नजीविकः, नीलमुत्पलं नीलोत्पलम्, उत्तमः पुरुषः पुरुषोत्तमः इति ; तुल्यरूपं यथा— शखीव श्यामा शखीश्यामा, खञ्जश्चासौ कुब्जश्चेति खञ्जकुब्जः, निर्गतः कौशाम्ब्याः निष्कौशाम्बिः, चित्रा गावोऽस्य चित्रगुः, अर्धं तृतीयमेषाम् अर्धतृतीयाः, के सब्रह्मचा-

रिणोऽस्य किंसब्रह्मचारी इति। ननु च अर्धं तृतीयमेषामिति अन्यपदार्थो नोपपद्यते; स हि तत्र स्यात्, यत्र येषां पदानां समासः, ततोऽन्यस्य पदस्यार्थो भवति। नैष दोषः; अवयवेन विग्रहः, समुदायः समासार्थः। नन्वेवं सति, 'असिद्वितीयोऽनुससार पाण्डवम्' संकर्षणद्वितीयस्य बलं कृष्णस्य वर्धताम्'। इत्यादिषु द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। नैवम्, असिर्द्वितीयो यस्येत्यन्यपदार्थेनैक एवोच्यते; यथा— 'जनार्दनस्त्वात्मचतुर्थ एव' इति। यदि वा, द्वितीयशब्दोऽयमस्ति तीयान्तः संख्यापूरणः; अस्ति चाव्युत्पन्नः सहायवाची, तस्येह ग्रहणम्— असिर्द्वितीयः असिसहाय इत्यर्थः। आत्मचतुर्थ इति कोऽयं समासः? नन्वन्यपदार्थः— आत्मा चतुर्थः अस्येति। आत्मना चतुर्थ इति तत्पुरुषः कस्मान्न भवति? 'आत्मनः पूरणे' (पा० ५-३-७) इति तृतीयाया अलुक्प्रसङ्गात्। यद्येवम्, अलुक् न वक्तव्यः; आत्मना चतुर्थ इति वाक्यं भविष्यति; आत्मचतुर्थ इति च वृत्तिः; न चात्मचतुर्थ इत्युक्ते बहुव्रीहौ तत्पुरुषे वाऽर्थभेदो विद्यते, उभयथाऽपि चतुःसंख्योपलक्षित-समुदायप्रतीतेः। नैवम्; एवं सति, राज्ञः सखा राजसखः इत्यप्युक्ते संबन्धादेतद्गन्तव्यम्— नूनं राजाऽस्य सखा; राजसखेति चोक्ते गन्तव्यमेतत्— राज्ञः सखाऽयमिति। ततश्च बहुव्रीहितत्पुरुषयोरन्यतरो न प्राप्नोति। नैवम्; अस्त्यत्र विशेषः— तत्पुरुषे समासान्तो भवति; यथा— 'स्वस्ति सोमसखाय ते'; बहुव्रीहौ न भवति; यथा— 'वृत्रं जहि मरुत्सखे' इति। इहापि तर्ह्यस्ति विशेषः— तत्पुरुषे आत्मनाचतुर्थसाध्यमेतत्; बहुव्रीहावात्मचतुर्थसाध्य-मेतदिति। अपि च, अन्यथाजातीयः प्रत्यक्षेणार्थसंप्रत्ययः, अन्यथाजातीयः खल्वनुमानेन भवति; तत्रायं राज्ञः सखा, आत्मना चतुर्थ इति प्रत्यक्षेण; संबन्धस्योभयानिष्ठत्वात् नूनं राजाऽप्यस्य सखा, आत्माऽप्यस्य चतुर्थ इत्यनुमानेन। एवं बहुव्रीहावपि द्रष्टव्यम्। अथ यथाऽऽत्मचतुर्थ इति समुदायस्यैकार्थत्वादेकवचनम्, एवमर्धतृतीया इत्यत्रापि कस्मान्न भवति? अन्येऽपि ह्येकार्था एव समुदाया भवन्ति; तद्यथा— शतं, यूथं, वनमिति। विषम उपन्यासः; आत्मचतुर्थ इत्यत्र हि बहुव्रीहिणोपसर्जनीकृतप्रतीयमानपरसंख्येयसमानाधि-करणात्मचतुर्थशब्दशक्त्यभिधेयो जनार्दन एकोऽस्येत्यन्यपदस्यार्थः प्रतिपाद्यते; इह तु अर्धतृतीयशब्दशक्त्यभिधेयाश्रयः संख्येयाः। तत्र यद्येकवचनं वाक्ये वृत्तौ वा भवति, केषां तदर्धं तृतीयं भवति? नन्वेवमपि, अर्धतृतीया द्रोणा इति द्रोणशब्दः समुदाये वृत्तो नार्धे वर्तते। नैष दोषः; समुदायेषु वृत्ताः शब्दाः अवयवेष्वपि वर्तन्ते; तद्यथा— पूर्वे पञ्चालाः, उत्तराः कुरवः इति। अथ, द्वौ द्रोणावर्धाढकं च कर्तव्यमर्ध-तृतीया द्रोणा इति। न कर्तव्यम्। समुदाये शब्दाः प्रवृत्ताः तेष्ववयवेषु वर्तन्ते, योऽवयवस्तं समुदायं न व्यभिचरति; यथा—द्रोणार्धं द्रोणम्, आढकार्धमाढकम् इति।

अद्राक्षं भाग्ययोगादमलमखिलभूदेशिकस्याश्रमं तं
चूर्णी यत्र प्रसिद्धा मलयगिरितटाद्या प्रतीचीनवेणी ।
याऽपि प्राचीनवेणी सरसदुपगता वेगवत्याख्ययाऽथो
क्षेत्रं हालास्यसंज्ञं सरिदपि कृतमालाभिधाना समिन्धे ॥ ४३ ॥

अद्राक्षं भाग्ययोगात्तुवरकसरलाशोकपुन्नागपूग-
श्रीभूर्जारिष्टचूतोज्ज्वलरसपनसश्रीफलैर्नारिकेलैः ।
वृक्षैरभ्रंकषाग्रैर्विलसति निबिडं मुग्धदुर्दर्शसूर्य-
क्षेम श्रीमद्गुरूणां पदमतिमहितं यच्चिरात्केरलेषु ॥ ४४ ॥

अद्राक्षं भाग्ययोगाद्यदिह वृषगिरेरस्त्यवाच्यां प्रसिद्धं
पाश्चात्याम्भोधितीरादपि किल पुरतो योजनानां त्रयेण ।
यत्तीरेऽप्युत्तरस्मिन्नतिसुरसरितश्चूर्णिकायाश्च पश्चा-
द्धालास्यादद्रिराजादपि च मलयतस्तत्पदं देशिकेन्दोः ॥ ४५ ॥

अद्राक्षं भाग्ययोगान्मुरजिदपि पुराऽनाप्नुवन्यत्सुखिन्नः
क्रोडीभूतोऽपि भूताधिपपदनलिनं सेवितुं तत्सदैव ।
संजातो यत्र पद्मोदरसुभगतरं गौरवं पादयुग्मं
भक्त्या नित्यं सिषेवे विवरणकुदहो पद्मपादो यतीन्द्रः ॥ ४६ ॥

अद्राक्षं भाग्ययोगात्सहजनिगमगीरन्तसिद्धान्तसंवि-
त्प्रत्यङ्निष्ठैकरस्यः कुमतिशतकृतोन्मत्तमूकादिनामा ।
पुत्रः प्राभाकरोऽयं गुरुमवृत मुदा प्राप्तसंन्यासयोगो
विज्ञातो दिव्यहस्तामलकसदभिधो जन्म तस्मात्र यस्मात् ॥ ४७ ॥

अद्राक्षं भाग्ययोगादपि जननवशात्सद्मकन्यां महार्हां
तुङ्गाभङ्गैरभङ्गैः शिवगुरुपदसंप्राप्तितः साधुभद्राम् ।

रम्यश्रीकृष्णवेणीं स्फुरदमृतरसां नर्मदां मज्जतां द्रा-
ग्गोदां शैशिर्ययोगात्तटतरुकुतमालां नदीं चूर्णिकाख्याम् ॥ ४८ ॥

अद्राक्षं भाग्ययोगादखिलगुरुरहो पारहंस्येऽपि तिष्ठ-
न्यत्र श्रद्धातिरेकादकृत विधियुतं मातृयज्ञं प्रहर्षात् ।
यान्निन्दन्तो विमूढा अविहितचरिता दूरतो वैदिकेभ्यो
याता अद्यापि दृष्टास्तदिदमखिलभूसद्गुरोर्जन्मधाम ॥ ४९ ॥

अद्राक्षं भाग्ययोगात्तदभयपवनेः शांभवं धाम दिव्यं
व्यञ्जन्ती यत्र चित्रं प्रवहति लहिमी चूर्णिका शान्तमूर्तिः ।
प्राक्पश्चाच्चापि यादोगणबहालितभीर्भन्त्रबद्धेव नागी
याऽद्याप्याज्ञां यदीयामनुसरति गुरोर्धाम जन्मानुभावम् ॥ ५० ॥

अद्राक्षं भाग्ययोगात्पदमखिलगुरोर्जन्मना धन्यधन्यं
भूयो मन्ये किमन्यैर्बत नियमशतैः क्षेत्रयात्राश्रमैर्वा ।
यत्र श्रीयोगिसम्राट्पदजलजयुगीपांसुलेशोऽपि लभ्यः
सर्वं तत्रैव तीर्थं फलमपि सकलं कर्मणां सिद्ध्यश्च ॥ ५१ ॥

अद्राक्षं भाग्ययोगाच्छिवगुरुभवनं पावनं विश्रुतार्थं
यातायातेषु यत्रामृतकरमकुटस्योल्लस-मर्त्यमूर्तेः ।
नासानीव्राग्रवृक्षेष्वपि गिरिदुहिता क्वापि लीना कपर्दा-
भावाद्रङ्गां दिदृक्षुः किल गगनचरी यत्र संभाव्यते स्म ॥ ५२ ॥

अद्राक्षं भाग्ययोगादुदभवदमलं यत्र वेदान्तिभाग्यं
यत्तन्नास्तिक्यकक्षज्वलयहुतवहोल्लसज्ज्वालमालम् ।
निर्दग्धानाद्यविद्याविभवमतुलितानन्दसान्द्रप्रकाशं
सुस्पर्शं शान्तियोगात्प्रबलगुणमणिव्रातनित्यानुषङ्गात् ॥ ५३ ॥

अद्राक्षं भाग्ययोगादपि गृहशुकगीःख्यातविद्याप्रकर्षो
मीमांसासारवेदी बुधभुवनमहामण्डनो मण्डनार्यः ।
येन श्रीवादकेलीविजयपरिणताप्तितात्याश्रमश्री-
र्व्यारराजीत्तदेतत्किल भुवनगुरोर्विश्रुतं जन्मधाम ॥ ५४ ॥

अद्राक्षं भाग्ययोगादपि शिरसि दधद्विश्वरूपो यदाज्ञां
श्रद्धालुर्व्याचचक्षे श्रुतिशिखरवचोमालिकासारसान्द्रम् ।
सद्विद्यावार्त्तिकं तु द्वयनयमकुटीभूषणं भीषणं य-
द्वैतिव्रातस्य तस्याखिलभुवनगुरोर्जन्मदेशं तमेतम् ॥ ५५ ॥

अद्राक्षं भाग्ययोगादचकलदमलां यश्च नैष्कर्म्यसिद्धिं
मीमांसावार्तिकानामपि च रचयितुः कर्मकौशल्यं प्रपन्नः ।
यद्वाणीरम्यधाटीसुरसरिदमलासारपूराभिषेक-
प्रध्वस्तानाद्यकर्मा पदमिदमतुलं तस्य सद्देशिकेन्द्रोः ॥ ५६ ॥

अद्राक्षं भाग्ययोगाच्छ्रुतिहृदयविदामग्रणीर्योगिराजो
येन श्रीविश्वरूपो न्ययमि पुरवरे शारदापीठमग्र्ये ।
तुङ्गाभङ्गानुषङ्गप्रतिकलकलितस्वाश्रमध्यानयोगे
शृङ्गेरीधाम्नि तस्य श्रुतिशिखरगुरोः पावनं जन्मदेशम् ॥ ५७ ॥

अद्राक्षं भाग्ययोगात्करतलबदरीकृत्य वेदान्तसारं
यो वृत्तैस्तोटकाख्यैर्जगदुपकृतये ब्रह्म सत्यं व्यचारीत् ।
सर्वाचार्योक्तिभङ्गीविवरणनियमो विश्रुतस्तोटकार्यो
यत्सेवालब्धविद्यः पदमिदमतुलं तस्य जन्मानुभावात् ॥ ५८ ॥

अद्राक्षं भाग्ययोगादगणितविभवाच्चित्सुखाख्या यमीन्द्रा
यत्पादद्वन्द्वसेवाविमलितधिषणाः संबबन्धुः प्रबन्धान् ।

अद्राक्षं श्रीविलासोदयपरिकलिताचूडपादावतंसान्
श्रीमच्चञ्जन्मदेशं सकृदपि भजतां शाश्वतानन्दमात्रम् ॥ ५९ ॥

अद्राक्षं भाग्ययोगादमृतकरकलाकोमला यस्य वाणी
श्रोतॄणां स्वान्तमन्तः सरसयति दृषत्तुल्यमप्यादरेण ।
ऐकात्म्यानन्दवार्धेरपि किल महती बृंहिका चित्रचित्रं
तस्याचार्याधिराजो अजिनचयहरं धाम दृष्टावतारम् ॥ ६० ॥

अद्राक्षं भाग्ययोगाद्बुधगणविदिताखण्डपाण्डित्यभीमो
नास्तिक्योत्थिप्तकौतस्कृतबहलकथादर्पवैलासधामा ।
चण्डः श्रीहर्षशर्मा विबुधकुलपतिर्न्यक्कृतो यैः सलीलं
तेषां श्रीसद्गुरूणां त्रिभुवनविदितं धाम बाल्यानुषङ्गम् ॥ ६१ ॥

अद्राक्षं भाग्ययोगाद्यदमलवचनात्क्षीणरक्षानुषङ्गा-
नास्तिक्यं कर्मपाशः श्रुतिविमुखगतिः सांख्यतन्त्रानुषक्तिः ।
कर्मैकान्त्यं पुरारेरभजनमखिलानात्मनित्यत्ववादो
द्वैतभ्रान्तिश्च सर्वं गगनकुसुमतां याति तज्जन्म यत्र ॥ ६२ ॥

अद्राक्षं भाग्ययोगाद्यदतुलवचनानन्तजप्यप्रभावा-
दद्याप्याः शिष्टचेष्टाविधुरनिजमगीर्बाह्यजल्पैकवादाः ।
उच्चाटयन्ते पिशाचा इव नियमजुषा पण्डितप्रष्ठगोष्ठ्या
तस्येदं देशिकेन्दोरनुपमविभवं विश्रुतं जन्मधाम ॥ ६३ ॥

अद्राक्षं भाग्ययोगादपि जननभुवं काप्यहो किष्कुपार्श्वे
लोकाचार्यस्य यस्मात्समजनि जगतां जन्मदुःखप्रणाशः ।
चित्रं जन्मैकमासीच्छिवगुरुमुनिराट्प्रार्थितं कामजेतु-
र्यस्मै पद्मावितानप्रकटनकलितानन्तजन्मोपरोधम् ॥ ६४ ॥

अद्राक्षं भाग्ययोगात्पदमखिलगुरोर्यत्र चित्तं व्यलोकि
क्षेत्रात्क्षेत्रान्तरेऽयं भवति विनिमयः स्यान्मृदो दोहदाय ।
अस्माद्यत्पिण्डमात्रं समजनि कुहचालक्तकप्याब्धिलोका-
न्यत्सर्वान्निष्प्ररोहान्व्यतनुत विमलज्ञानसंपत्प्रदानात् ॥ ६५ ॥

अद्राक्षं भाग्ययोगाच्छ्रुतमपि बहुधा यत्पुराणेषु शंभु-
र्योगाचार्यैकमूर्तिः कपटमुनितनुर्ब्रह्मविद्यावदान्यः ।
संजायेवानुतिष्ठं हरिरिव भगवान्द्वापरे व्यासयोगी
वेदाचार्यस्तदेवं फलितमपि वचो यत्र शंभोर्वतारात् ॥ ६६ ॥

अद्राक्षं भाग्ययोगाच्छिवगुरुगृहिणीपावनोत्सङ्गशायी
यत्रेशः स्पन्दते स्म प्रथममरमुरो घट्टयन्साधु भूमौ ।
जानुभ्यामप्यचारीदथ ननु जननीहस्तदत्तावलम्बः
एकद्वान्यत्र पादान्स्खलितबहलितं साधु विन्यास्थदारात् ॥ ६७ ॥

अद्राक्षं भाग्ययोगात्पदमखिलगुरोर्यत्पद्माम्भोजसेवा-
भाग्याच्छ्रीपद्मपादाभिधनियमिपतेर्जाह्नवी पादपद्मे ।
मोदाच्छ्रीकान्तपादाविव निजजनकौ पद्महस्तोपतस्थे
भाग्यं स्वं संस्मरन्ती गुरुचरणसमाश्रंगतः पवित्रमं स्याक् ॥ ६८ ॥

अद्राक्षं भाग्ययोगात्पदमखिलगुरोर्यत्र मर्त्यावतारो
यत्रासिन्नन्महात्मा विदितरसमहेशानतत्त्वेषु मुख्यः ।
सिद्धानामग्रगण्यो नियमिकुलपतिः ख्यातिगोविन्दनाथो
हेरम्बं रत्नगर्भं शिशिरकरकलामौलिलिङ्गं स्म दत्ते ॥ ६९ ॥

अद्राक्षं भाग्ययोगाद्दृढमखिलगुरोर्यं श्रिता ब्रह्मविद्या
शंभोर्विष्णोर्विधेर्वा मुनिगणतिलकाच्छ्रीवसिष्ठाच्च शक्तेः ।

तत्पुत्राद्धादरेवां शुकमुनिगणपाद्गौडपादान्महर्षे-
र्गोविन्दाच्चन्द्रमौलीश्वर इव भगवान् रत्नगर्भेण सत्रा ॥ ७० ॥

अद्राक्षं भाग्ययोगादधितटमपि चादक्षिणे चूर्णिकाया
नद्याः प्रत्यङ्मुखत्वात्समुचितमुदितं दक्षिणे तीर एव ।
क्षेत्रं क्षेत्रज्ञतत्त्वप्रकटनपरमाचार्यवर्यस्य सिद्धं
श्रीमज्जन्मैकशुद्धं चिरमधिवसतां निष्प्रपञ्चात्मसिद्धयै ॥ ७१ ॥

अद्राक्षं भाग्ययोगादखिलसुरसमाराध्यपादारविन्दं
तेजो मर्त्यावतारं जगदुपकृतये प्राप्य तत्त्वानुरोधात् ।
अम्बां तातं द्विजेन्द्रान्गुरुवरमपि चात्यादरात्सेवमानं
दृष्टं यत्रैव रामादिवदमलतरं न च्युतं धर्ममार्गात् ॥ ७२ ॥

अद्राक्षं भाग्ययोगादधिनिजकृति यं जेगिषव्यो मुनीन्द्रः
श्रीकण्ठांशावतारं प्रकटयतितरां द्वैतगोहापनुत्त्यै ।
रुद्रस्यैवोक्तिभङ्ग्या स्वयमपि च ससन्नद्य तिष्ये प्रसक्ते
व्याहार्षीद्यं च देशं शशलमिति महत्तद्गुरोर्जन्मभूमिम् ॥ ७३ ॥

अद्राक्षं भाग्ययोगादतुलमलयजाङ्कूरसंस्पन्दरम्यं
रम्या ह्यन्यङ्गवीनादपि मधुरतरा यत्र वाभाति चूर्णी ।
संपुष्पद्वृक्षवाटीपरिकलितमहातिथ्यसंतृप्तभृङ्ग-
त्वङ्गत्संगीतधारावितरितहृदयं श्रीगुरोर्जन्मदेशम् ॥ ७४ ॥

अद्राक्षं भाग्ययोगादनुलघुविपिनं शांकरं धाम दिव्यं
सत्वं यद्दर्शनेन प्रभवति विशतां यत्र चेतोविलासः ।
आनन्दश्चावगाढे समुदयति जलं चूर्णिकाया अमन्द-
स्तत्किं ब्रूमः पुरारेरपि नृषु महितां तां कृपां हेतुशून्याम् ॥ ७५ ॥

अद्राक्षं भाग्ययोगाद्यदुकुलपतिरप्यर्कपुत्रीं भुजङ्गा-
भोगासंगाविलाङ्गीं शमनसहभुवं लंत्यजन्नेव दूरे ।
प्राप्तः प्राप्तेशपादां सुसहजमधुरां संनिधत्ते नितान्तं
यस्योपान्ते तदेतत्त्रिभुवनपटलीसद्गुरोर्जन्मधाम ॥ ७६ ॥

अद्राक्षं भाग्ययोगाच्छिवगुरुभवनोपान्तगां साधु चूर्णीं
व्यात्युक्षीं विप्रवालैर्द्रविडशिशुतनुयत्र देवो व्यतानीत् ।
यद्वेणी केरलीनामिव लसति भुवः केरलानां प्रतीची-
वैधर्म्याच्छर्मदेयं शमधननिचयस्येत्यभुङ्क्त तदीयैः ॥ ७७ ॥

अद्राक्षं भाग्ययोगात्सुकृततरुफलं श्रीगुरोर्जन्मदेशं
यो वेदाचार्यसूक्तिप्रबलजलनिधेर्मन्थने नन्दशोऽभूत् ।
श्रुत्यन्तानां दशानामपि च विवरणान्यादिशो येन कृत्स्ना-
न्यादौ व्याचष्ट गीताः श्रुतिशिखरगिरः सारसंदर्भरम्याः ॥ ७८ ॥

अद्राक्षं भाग्ययोमात्तमखिलजगतीदेशिकेन्दोर्विहारं
साहस्रं यश्च नाम्नां व्यवृत नु हरेर्यः चक्रे भुजङ्गान् ।
भाष्यं चाथर्वणानां निषदि नरहरेः स्तोत्रमापादमस्तं
विष्णोरन्यच्च कुर्वन्व्यजयत हरिमीडेस्तयं चापरं च ॥ ७९ ॥

अद्राक्षं भाग्ययोगात्पशुपतिचरणाम्भोजचिन्तानुवृत्त्यै
स्तोत्रं ह्यापादमस्तं प्रथममथ तथाऽऽमस्तपादं द्वितीयं ।
चक्रे शंभोर्भुजङ्गान्प्रथममहिभृतः साम्बिकस्य द्वितीयं
पूजां तां मानसीमप्यचकलदमलां योऽस्य तं जन्मदेशम् ॥ ८० ॥

अद्राक्षं भाग्ययोगाद्गुरुकुलतिलकस्याश्रमं साधुसेव्यं
योऽस्तौद्देवीं भुजङ्गैर्व्यतनुत लहरीं साधु सौन्दर्यपूर्वाम् ।

भूयः कल्याणवृष्टिस्तवममलतरं संस्तवं सर्वमातु-
र्भास्वत्सर्वोपचारामपि गुणमहितां मानसीं नित्यपूजाम् ॥ ८१ ॥

अद्राक्षं भाग्ययोगाच्छिवगुरुतनयस्याश्रमं सर्वपुण्यं
पश्यन्नुच्चावचं यः प्रतिपुरुषमहो कर्मणां पाकभेदम् ।
तस्तार ब्रह्मविद्यां प्रकरणकरणैर्मन्दमध्याधिकारि-
क्षेमाकाङ्क्षी जगत्यां मुनिगणगणितो ह्यात्मबन्धुर्य एकः ॥ ८२ ॥

अद्राक्षं भाग्ययोगाद्भवनमपि वनीभूतमार्यासुतस्य
श्रीमान्यः स्वानुभूतिं व्यशदयदमलैः श्रीशिवोऽहंपदाङ्कैः ।
पद्यैः पद्माङ्घ्रिमुख्येष्वतिविशदकृपः पामराज्ञेयभूतिः
पाण्डित्यश्रीफलाढ्यः पशुपतिचरणैकान्त्यधन्यो मुनीन्द्रः ॥ ८३ ॥

अद्राक्षं भाग्ययोगाद्भवनमपि जगद्देशिकस्यातिरम्यं
श्रीविद्यारण्ययोगिप्रवरमखिकुलाधीश्वराद्याश्च यस्य ।
शिष्याः शिष्यप्रशिष्या इति भुवि विदिता नूनमेकैकशो ये
पर्याप्ता ब्रह्मविद्यां स्थिरयितुमधिभु स्फीतमब्दान्सहस्रम् ॥ ८४ ॥

अद्राक्षं भाग्ययोगात्पदममलमहो यत्र चेन्नाभविष्य-
ल्लोकाचार्यावतारः स्फुटमधिभुवनं वैदिको नाचलिष्यत् ।
नो बुद्धाडम्बरो वा भरतभुवनतोऽनङ्क्ष्यदप्यार्यवाणीं
दीप्रां के वाऽपठिष्यन्नपि ऋषिकुलजा म्लेच्छजालैकलग्नाः ॥ ८५ ॥

अद्राक्षं भाग्ययोगान्निखिलगुरुपदाम्भोजविन्यासदेशं
नामं नामं च मूर्ध्ना क्षणमिव सकलं साधु विस्मृत्य दृश्यम् ।
ब्रह्मानन्दाब्धिवीचीविहरणविशदात्मापरोक्ष्यो यथेव
प्राप्तं सिद्धिं सुखस्य प्रबलकलिकलाद्दुर्लभं माद्दशानाम् ॥ ८६ ॥

अद्राक्षं भाग्ययोगात्पदमतुलसुखं श्रीगुरोर्गार्यदूरे-
यद्दीक्षामात्रतोऽपि स्फुटमखिलमलं निर्गमार्यचारित्रलक्ष्म्याः ।
चित्रं यन्नाहमोऽपि स्फुटमिह वसतेः साद्भुतेनोपकर्तुं
लोकान् किं तत्र वाच्यं परमिह हि मुधा पौरुषं तस्य धाम्नः ॥ ८७ ॥

अद्राक्षं भाग्ययोगात्पदमिदमखिलाचार्यजन्मातिपुण्यं
पण्यं भक्त्यैकमूल्यं श्रुतिगणविपणीविस्तृतं क्रय्यमेकम् ।
ज्ञानाख्यं तत्र मन्ये सुलभमथ नु चेत्पाचयेद्भोजयेद्वा
कश्चित्तत्रास्ति दक्षिः स्फुटमपि च कलौ ब्रह्मविद्या स्थिरा स्यात् ॥ ८८ ॥

अद्राक्षं भाग्ययोगाद्गृहमखिलगुरोर्यश्च लीलावशेन
व्याचष्टाधीतिहासं प्रकरणमतुलं जातु मानस्तुजातम् ।
मन्ते प्रापञ्चसारं व्यतनुत जगतां सिद्धये सप्तकोटिं
ज्ञानाङ्गं योगराजं व्यतनुत यमिनां सिद्धये सिद्धिकल्पम् ॥ ८९ ॥

अद्राक्षं भाग्ययोगात्पदमखिलगुरोर्हन्त तिष्ठे प्रवृद्धे
रागाङ्घ्रिध्याननिघ्नाः शमलमपि मुहाऽनुक्षणं चार्जयन्तः ।
कुर्वन्तो नीचसेवां परमशिवपदं संत्यजन्तः प्रयत्ना-
त्काले यत्रानुवेलं भुवि सुलभतराः सर्वतो दुर्लभाश्च ॥ ९० ॥

अद्राक्षं भाग्ययोगाच्छिवगुरुगुरुराजाश्रमं साधुसेव्यं
शास्त्रेणान्वाश्रमो यत्सवनमनुविशन्यं समाप्ताश्रमोऽस्मि ।
चित्रं शास्त्रादयज्ञश्चिरवरिवसितानन्तयज्ञाधिराजो
यत्रासं धन्यधन्यः सह गुरुचरणासक्तिपूर्णैर्द्विजेन्द्रैः ॥ ९१ ॥

अद्राक्षं भाग्ययोगाद्गुरुवरभवनं यत्र मामन्वसार्षु-
ब्रह्माणो ब्रह्मनिष्ठाकलमकुलमहादोहदाङ्घ्रयब्जरेणोः ।
लोकाचार्यस्य भक्ता अतिबकनिकरं राजहंसा इवैके
वाञ्छन्तो ह्युत्तरीतुं कलिमलजलधिं संयमीन्द्रप्रसादात् ॥ ९२ ॥

अद्राक्षं भाग्ययोगादखिलमलहरं विष्टपाचार्यधाम
स्पष्टं यत्रेष्टलब्ध्या अपि यमिनिवहस्यावरीभावकाङ्क्षी ।
सिद्धिश्चेयं हि जागद्गुरवपदसरोजातविन्यासधन्यं
तुल्यं तुङ्गातरङ्गाश्रयशिशिरतलेनश्यभृङ्गस्य धाम्ना ॥ ९३ ॥

अद्राक्षं भाग्ययोगादपि तृणनिवहेष्वात्मबुद्धिप्रकर्षात्
मावं भावं गुरूणां वचनमधिजगत्सत्यमेवाद्वितीयम् ।
प्राप्य श्रीजन्मदेशं त्रिभुवनगुरोर्यान्यवात्सं दिनानि
त्रीण्यप्येतानि मध्ये मम परिगणितान्यायुषो जीवनाख्यः ॥ ९४ ॥

अद्राक्षं भाग्ययोगाद्यदिह कुलगुरोर्धाम लोकैकवन्द्यं
सा काष्ठा तन्मुहूर्तं तदिह कुलधनं सा प्रतिष्ठा पितॄणाम् ।
तच्छ्रेयः सा तपस्या तदुदितमतुलं शोधनं कालदोषे
तन्नूनं ब्रह्मविद्यानिधिकलनकलासिद्धसिद्धाञ्जनोद्गम् ॥ ९५ ॥

अद्राक्षं भाग्ययोगाच्छुभमखिलगुरोर्धाम सर्वार्थपोषं
शोषंभावं प्रपन्नाः कटुकरटरटद्वैतरूक्षाः पराकाः ।
संसाराम्भोधिमग्ना अपि सरसमहानन्दसान्द्राः प्रपन्नाः
यत्कीर्त्या द्वैपायनीयां किल विशदयता येन कर्मन्दिराजा ॥ ९६ ॥

अद्राक्षं भाग्ययोगाच्छुभमखिलगुरोरादिमं जन्मदेशं
कावेर्या नातिदूरे य इह परिणतः श्रीमहीशूरपुर्वाम् ।
या मूर्तिस्तस्य गङ्गामनु विमलमहाभाष्यसारप्रवक्त्री
सद्यस्तुङ्गातटान्ते कलिमलहतये पर्यणंसीत्तथैव ॥ ९७ ॥

अद्राक्षं भाग्ययोगाद्गुरुजननभुवं तच्च मे जन्म भूयः
स्याच्चेदास्तां न दूये यदपि च नियतं दुर्विदाःकर्मपाकात् ।
श्रीमद्योगीन्द्रपादार्पणधृतविभवे कापि देशे तदास्तां
पुण्यैतत्क्षेत्रसेवाफलबलकलितं जङ्गमे स्थावरे वा ॥ ९८ ॥

अद्राक्षं भाग्ययोगाच्चिरमुकृतफलं क्षेत्रमाचार्यमौळे-
र्भूयस्तत्पादपांसूत्करपरिकलिताक्षीणरक्षाबलस्य ।
संकल्पः पूर्यतां द्राक् परमतबहलाडम्बरोन्मूलनेन
शुक्लेरीश्रीगुरूणामपि मयि करुणा कल्पतां कल्पवल्ली ॥ ९९ ॥

अद्राक्षं भाग्ययोगात्पदमतुलभवारण्यकालाग्निभीमं
भीमांशाचार्यवर्यावतरपरिमिलत्कीर्तिकान्तारिलाक्षम् ।
कस्तूरीं पङ्कमध्येऽप्यधिकरटकुलं कोकिलं राजहंसं
कंचिन्मध्ये बकोटेष्विव परिलसितं कुत्रचित्केरलान्तम् ॥ १०० ॥

जयतु जगद्गुरुमहिमा जयतु श्रुतिशिखरसद्विद्या ।
जयतु श्रीगुरुसूक्तिर्जयतु ब्रह्माद्वयं तत्सत् ॥


इति संस्मृत्य जगद्गुरुपादाब्जं किमपि निरमायि ।
श्री श्रीनिवासमखिना श्रीकालटिसेवने शतकम् ॥

श्रीमत्त्यागराजमखिराट्चरणसरोजातसेवनधुरीणः ।
गुरुधामसेवनशतं व्यधादिदं श्रीनिवासमखी ॥

वैदिककुलावतंसाः श्रीगुरुचरणाब्जभक्तिभरनम्राः ।
अनुगृह्णन्तः कृपया गृह्णन्तः पाठन्तु वचनमिदम् ॥

इति श्रीमत्कौण्डिन्यकुलजलधिकौस्तुभ श्रीमन्मेधादक्षिणास्यकृपासमुल्लसितसकलकलाविलास श्रीमन्मिश्रजायेमहादेवदीक्षितेन्द्रवंशावतंस श्रीवैयाकरणसार्वभौम श्रीरामयज्वतनूजेन श्रीसीताम्बागर्भशुक्तिमुक्ताफलेन श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यचतुरधिकशतप्रबन्धनिर्वाहालंकर्मीण श्रीमदप्पय्यमखीन्द्रवंशावतंसषड्दर्शनीवल्लभपारमेश्वरोपनिषन्मार्गप्रवर्तक श्रीमहामहोपाध्याय श्रीत्यागराजमखिचरणसरोजसेवापरायणेन प्रत्यगर्थपरशिवनिष्ठापरपारमेशपादजलजपांसुपरमाणुना श्रीपरसमयपञ्चाननपाञ्चजन्यपण्डितश्री-

श्रीनिवासमखिनां कृतिषु श्रीजगद्गुरुधामसेवाशतकं संपूर्णम् ॥



ॐ

The Journal
OF THE
Sri Sankaraguru kulam
Srirangam

VOL. III. NO. 10.

REVIEWS

THE DVAITA PHILOSOPHY AND ITS PLACE IN THE VEDANTA.

R. KRISHNASWAMY AIYAR, M.A., B.L., *Advocate, Tinnevelly.*

THEDVAITA PHILOSOPHYANDITS PLACE IN THE VEDANTA—*By Vidvan H. N. Raghavendrachar M. A.—Studies in Philosophy No. 1 published by the University of Mysore, Price Rs. 3.*

This is an exceedingly well-written book from the pen of a very learned scholar who deservedly occupies a chair in the Philosophy Department of the Mysore University. I have not come across a clearer exposition of the Dvaita Philosophy in the English language and I am confident that the method of exposition adopted in this book is not only admirable but is incapable of being improved. In an Introductory chapter the claim of the Vedanta to be a system of philosophy is discussed and justified. To understand the Dvaita system, a proper understanding of the Advaita and Visishtadvaita systems which it criticises is necessary and they are therefore dealt with in the Second and Third chapters. The next chapter which covers nearly one half of the book is devoted to the main theme, namely, the elucidation of the principles of the Dvaita system. The concluding chapter is intended to show how the Dvaita system is free

from the defects found in the schools of philosophical thought which have gone before and how "Vedanta thought reached its culmination in Dvaita Vedanta" (p, 11),

The author set himself the somewhat difficult task of presenting the position of each system "as it would be done by the exponents of the same system" (p. 11) and he has fairly succeeded in accomplishing this task with commendable skill and accuracy without indulging in harsh words which sometimes mar the beauty of really beautiful works. He has been able to give us a very interesting analysis of the three systems, mainly because he has practically confined himself to a re-statement of the propositions enunciated by the respective thinkers in almost their very words except for the translation into English. As pointed out by Prof. A. R. Wadia in his short and expressive Foreword, the author is not only a born Dvaitin but is a Dvaitin by conviction also. This may account for a few inaccuracies which have crept into the book when he deals with other schools of thought and it may not be out of place to refer to some examples.

In the footnote on page 36, it is said 'the Advaita thinkers *somehow assume* that the things that occupy the same point of space are identical." I should think that this is an axiomatic proposition and not an assumption at all, much less an inexplicable assumption peculiar to the Advaitin. Does the Dvaitin or anybody else say that more than a single thing can possibly occupy the *same* point of space ?

In the footnote on page 43, it is stated "That *asat*, for example, the horn of a hare, is not an object of knowledge is one of the convictions of Advaita." Is anybody else convinced otherwise ? The author says on page 138 "knowledge apprehends its object as 'is'. An object 'is' if it exists at a particular point of time and space" and on page 139 "That which does not exist in time and space is unreal, *asat*. A hare-horn does not exist in time and space. It is unreal." Even to the Dvaiti, therefore, the *asat* cannot be an object of knowledge.

On page 59, the Cchandogya passage सदेव सोम्य इदमग्र आसीत् has been translated thus, "There was only *Sat*, O Somya, before this (the world) began. The translation is clearly inaccurate for the nominative is *Idam* and *not* Sat. The correct translation, accepted by the Advaitin, is "O Somya, in the beginning, this was only *Sat*,"

On page 70 the author says that the *order* of discipline in the Advaita system is Manana, Nididhyasana and Sravana. There may be a difference of opinion among the Advaita thinkers as to which of these is the principal and which the accessory but the order accepted by all is only Sravana, Manana, and Nididhyasana.

In the same page he translates Jivanmukti as "Freedom in Bondage" which is

a self-contradictory expression. It is really Freedom even when embodied. In the footnote on the same page the author says that "there is a veil of a little Avidya" in Jivanmukti and quotes the expression अविद्यालेशानुवृत्त्या from the Vivarana Prameya Sangraha. He mentions the same idea on page 210: "According to Advaita, after realisation the individual *ought* to have liberation but he does *not* have it because his Karma called Prarabdha is not destroyed. Under this circumstance he must exhaust the karma by enjoying the fruit of it, and this period of enjoyment is the period of Jivanmukti. This means that, though on the part of the individual the discipline is full, he is *prevented* from having mukti because of karma." This is an entire misreading of the state of Jivanmukti as described by the Advaitin. The Jivanmukta *is* a mukta even now and has *not* to wait for mukti till the dissolution of the body which alone has to obey the laws of karma. The Advaitin explains that realisation and liberation are not distinct in point of time and are really simultaneous as in fact they are really one and that the body continues to exist for some time just as a wheel keeps rotating till the impetus which started the motion is exhausted. His realisation therefore is not in the least "veiled" or ineffective.

The auther says in page 117 that "unlike the other Vedantins" Madhvacharya realised the value of the Mahabharata, I do not think that their realisation of its value is any the less than Madhvacharya's. That Sri Sankaracharya has commented upon Srimad Bhagavad Gita, Sanatsujatiya and Vishnu Sahasranama, three vital portions of the Mahabharata is sufficient answer to this claim.

On page 169, the author enumerates *seven* indicia for ascertaining the meaning of a particular passage. It is usual to have only *six* by clubbing together Upakrama and Upasamhara as a single criterion in the sense of consonance between the opening and the conclusion.

It is stated in page 175 "Advaita holds that the Upanishadic statements that teach Advaita alone are pramana." This is a misleading statement. The Advaitin only says that the Upanishadic statements are alone Pramana for enunciation of the absolute Truth of the Oneness of Brahman. *Cf.* तं त्वौपनिषदं पुरुषं पृच्छामि.

On page 213, the author says "the so-called mukti of the Self, according to Advaita, is the complete annihilation of the Self", a positive misstatement. The self who realises that he is no more bound by Samsara and is ever free and is identical with Brahman is in no sense annihilated. A prisoner who is freed from the prison is certainly not said to be annihilated. There is a lot of difference between the statements "He is a prisoner no more" and "The prisoner is no more."

In defending Sri Madhvacharya against the charge of inventing texts in support of his position, the author besides advance-

ing the theory that they are now lost hits back by saying (p. 238) that Sabara Swamin, Sankaracharya and Ramanujacharya have quoted unfamiliar texts. He loses sight of the fact that an ancient text available to a particular author may not be available to a later author. It can not be that a text was available to Madhvacharya alone and not to any of the scholars who have gone before him or have come after him and who have worked in the same field. In the context in which Sankaracharya is said to have quoted unfamiliar texts, Brahma Sutra Bhashya III–ii–18 अत एव चोपमा सूर्यकादिवत्, there are two quotations 'यथा ह्यकं ज्योतिरात्मा.....' and 'एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥' the latter is directly in point and is verse 12 of Brahma Bindu Upanishad. A better scholar than myself may be able to locate the former also.

The proper province of a review is only to point out how efficiently or inefficiently an author has dealt with the subject which he has taken up for discussion. As a Dvaitin by birth and by conviction, the present author has naturally and necessarily immense faith in the words of Madhvacharya and his commentators. I do not think that it is legitimate on the part of a reviewer to question the reasonableness of that faith or even the merits of the system as believed in by the author. The questions therefore whether the Advaita or Visishtadvaita system is in any way defective and whether such defects if any have been successfully obviated in the Dvaita system are beside the point. Further a consideration of such questions will be a fruitless task as nobody is going to turn a Dvaiti or a non-Dvaiti on a reading of the book or of this review.

Prof. Wadia has rightly remarked that "it is not possible to hope that Vidvan Raghavendrachar's exposition will carry conviction to confirmed Advaitins and Visishtadvaitins." I am not sure if the author has not in some places given a peculiar turn to Dvaita Vedanta which may not carry conviction even to confirmed *Dvaitins*. They may agree to the statement that "Brahman of Dvaita Vedanta is a higher conception than Nirguna Brahman of Advaita and Isvara of Visishtadvaita" but will demur to the statement that Dvaita Vedanta is "in fact a real example of Monism" (p. 241). I feel sure also that no orthodox Dvaitin will subscribe to any of the statements—

> "Somehow the Acharyas *first* arrived at pure philosophical conclusions and *next* they found that they were completely identical with the systematised upanishadic thoughts.....So in their exposition they are not directed by authority; but *they* direct it" Pp. 14–15.

> "These systems represent the different *stages* of the *growth* of the same Vedanta thought. Advaita represents the first stage, Visishtadvaita the second and Dvaita Vedanta the third" p. 15.

"The philosophical reflection in India has *reached* its culmination in Dvaita Vedanta" p. 219

"The old things must be interpreted consistantly with *new* ideas" p. 9.

"For the *first* time after the appearance of the Darsanas, the real merit of the study and teaching of philosophy is fully recognised" (in Dvaita Vedanta) p. 209.

The very word Vedanta implies that its primary source is the Veda and any system therefore claiming allegiance from any thinking mind must claim to be as ancient as the Veda itself. All the systems are one in saying that the Veda proclaims the Truth and proclaims it once and for all time. Each one of them may say that it is itself that correctly expounds the Truth laid down in the Vedas and that the others are deviations or perversions. Truth, for example the fact that two plus three make five, is eternally true and is therefore decidedly static. It does not admit of any development or growth or of any stages. It would have been more accurate therefore to call these systems as expositions of Vedanta in the phases which presented themselves or appealed most to the several Acharyas as Truth.

The attempt of the author to comprehend all the three systems under the single name of Brahma-*Advaita* (p. 10) is certainly commendable but I fear that in his attempt to do so he will have to dilute a great deal the fundamentals of the Dvaita philosophy to admit of its being called a phase of Advaita. We are generally too conservative to accept any such interpretation of our Acharya's teachings to suit modern tastes. The three systems differ in the very definition of Brahman, in the enunciation of its relation to the world and to the Jivas, in the conception of Moksha and in ever so many vital points. Brahman as the Adhishthana of the universe as understood by the Advaitin is quite different from Brahman conceived of as the Nimitta and Upadana of the universe by the Visishtadvaitin and has nothing to do with Brahman conceived of as the efficient cause only by the Dvaitin. Even in the conception of Reality, they differ. The Advaitin calls a thing real only when it *is*, irrespective of time and place; the Visishtadvaitin and the Dvaitin would call a thing real even if it only *seems to be* at a particular time and at a particular place. The Advaitin does not grant the existence of a Jiva as such apart from its essential nature as Brahman; the Visishtadvaitins enunciate the eternal existence of all Jivas as distinct from Brahman though conceived of as a part of Its body and the existence of a special class of Jivas known as Nitya Suris who have never known bondage; the Dvaitin in addition to this postulates another class of Jivas who are equally eternal but are Mukti-ayogyas, that is, must ever remain bound without any hope of liberation, an obviously non-Hindu idea

evidently due to the influence of the Portuguese Christians of the west coast who lived close to where Madhvacharya was. It is futile therefore to attempt to bring all these systems together under a single name of Brahma-Advaita. The old name of Vedanta is quite sufficient to imply that all the three systems aim at an elucidation of the Truth as laid down in the Vedas.

The author is of opinion that "the fact that the three Acharyas differed simply points to the fact that their interests differed" (p. 10) and that it is "not due to the lack of philosophical insight" (p. 9) When the Dvaitin is prepared to accept distinction among the Jivas even in the state of Mukti according to one's "capacity" (p. 211), it is certainly not too much to say that the difference among the Acharyas is as much due to their respective innate "capacities." If the "historical order" of the systems has to be given any significance, a conclusion directly opposite to that of the present author (p. 219) may equally legitimately be drawn. It is admitted by all Hindu schools of thought that, from the past to the present, from Krita to Kali, from the beginning of Kali to its end, there is no doubt change but the change is from good to bad and bad to worse. In short, there is deterioration and not progress. Instead of assuming with the author a development of Vedanta thought and a culmination in the Dvaita system, can we not with equal justice say that there has been an increasing poverty of thought and there has been a deterioration from Advaita to Visishtadvaita, from Visishtadvaita to Dvaita, from Dvaita to the Neo-Vedantism of the modern day and that the "culmination" will be reached when the darkness of Kali will envelop even the word Vedanta? It seems to me therfore safer not to attach much significance to the historical order in assessing the value of any system.

It is idle and irrelevant to decide which is the system which really represents Truth, for Truth is Experience and *not* Exposition. There are bound to be as many systems of philosophy as there are persons available to expound them according to their own capacities and according to the capacities of their hearers. The Ultimate Truth transcends all systems and is a matter for realisation and not discussion and the knower of the Ultimate Truth will not care whether he is called an Advaiti, Visishtadvaiti or a Dvaiti. All the same we are quite in agreement with the author when he says that "without a study of this Vedanta one's knowledge of Indian thought is not complete." We heartily welcome this interesting book as a very valuable contribution towards such a study.

AN UNTRUTH—THE VERY STUFF OF TRUTH.

SITA A LIAR?—STUFF AND NONSENSE!"
By R. Narayana Aiyar I.C.S. (Retd.)

This is a neat little brochure of 16 pages well written by Mr. R. Narayana Aiyar I. C. S., who has evidently studied very closely and intelligently the whole of Ramayana and has appreciated the wealth of gems that lie hidden in that vast ocean of Ramayana literature. Of late the critical study of Ramayana has become very popular and all sorts of questions about the various characters in the great poem are being discussed both in the Press and in the Platform. Is Kaikeyi good or bad? Is Sita a liar? Has Rama's conduct been always above reproach? What was the intolerable adharma of Ravana which brought about his destruction? Why did not Kausalya follow Rama into the forest after the death of Dasaratha? Did Hanuman act up to the injunctions of Sri Rama during his visit to Lanka? Was Vibhishana's surrender for the sake of Moksha?—these are some of the questions agitating the minds of scholars. Of these several questions, the subject of this brochure has of late been discussed threadbare in the columns of the *Hindu* and the *Aryadharma* and this brochure is the view of a keen and sympathetic student of the Ramayana couched in beautiful English in terse language and to the point. He is quite straightforward and says "let us make no bones about it; it was a mendacious statement" and says thus is proved the truth of the proverb "womankind is ready-witted." He proceeds to investigate the question in the spirit of Paley's dictum "our task is not to praise or censure, our task is to understand." He admits that "this is a solitary instance of a 'Lie Direct' from Sita's lips." He is not satisfied with the superficial view "if Hanuman as a spy was under no obligation to enlighten 'Lanka,' Sita as a prisoner was under no more obligation to enlighten her guards." He is sure that this "lie must have been uttered for some deeper and less obvious purpose." So, he dives deeper and finds out a novel and very cogent justification for Sita's guarded words to the Rakshasis. Trijata, after narrating her dream had adjured them to take refuge with Sita from the coming wrath of Sri Rama and Sita had pledged her word that should the dream-experience of Trijata come true, she would give them her protection. Within a few minutes of this gracious *Abhayapradana*, a messenger had hailed from Sri Rama with a token and he was a monkey! The pledge became thus binding upon her. Though it is true that Trijata advised the Rakshasis to seek the protection of Sita from Rama's anger, the succour promised by Sita related to all danger from whomsoever it threatened. In the present instance they were faced with danger from their own master, Ravana. So, in order to protect them

from Ravana's wrath she would tell them nothing which would necessitate their disclosing to Ravana that they had slept at their post of duty. If an untruth on her part could alone help them to keep Ravana ignorant of it, she must even have recourse to it. Her शरणागतरक्षण code sanctioned it. Mr. Narayana Aiyar concludes this most interesting brochure with the following wise remarks. "If our shallow search and judgements cannot fathom the actions of the great and good, we can at least avoid a censorious attitude. What applies to Sita's untruthfulness is not the Smritivakya commonly cited in justification of it:—

विवाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे ।
विप्रस्य चार्थेऽप्यनृतं वदेयुः पञ्चानृतान्याहुरपातकानि ॥

but rather this from the Tirukkural—

"பொய்ம்மையும் வாய்மையிடத்த புரை தீர்ந்த நன்மை பயக்குமெனின்."

Even falsehood has the nature of truth, if it confer a benefit that is free from fault. Here is high authority that Sita's untruth ranks on a par with Truth that is to say, no stigma attaches to it, it is of the very stuff of truth."

ஸ்ரீ ஸுப்ரஹ்மண்யதத்வம் :—பிரஹ்மஸ்ரீ அருட்கவி க. ஸுப்ரஹ்மண்யய்யர் அவர்கள் இயற்றியது. Sri Brahma Vidya Vimarsini Sabha, 178, Lloyd's Road Royapettah, Madras. விலை ரூ. 1–8–0

ஸ்ரீ ஸுப்ரஹ்மண்ய தத்வமென்னுமிந்நூலானது, ஸ்ரீ ப்ரஹ்மவித்யா விமர்சினி ஸபையின் அக்ராஸனாரான ப்ரஹ்மஸ்ரீ அருட்கவி க. ஸுப்ரஹ்மண்யய்யர் அவர்களால் தன் குரு கிருபையாலும், ஈச்வரானுக்ரஹத்தாலும், பலநூல்களை பரிசீலனம் செய்து எழுதப்பட்டிருக்கிறது. இக்கலியில் மத வேறுபாடின்றி யாவராலும் போற்றப்படும் தெய்வம் ஸ்ரீ ஸுப்ரஹ்மண்யர் என்பதில் யாருக்கும் கொஞ்சமேனும் ஸந்தேகமிருக்காது. இக்கலியுகவரதனை ஸ்ரீ ஷண்முகரின் சரிதையில் பொதிந்து இடக்கும் அநேக விஷயங்கள் இந்நூலில் ஆசிரியரால் நன்கு விளக்கப்பட்டிருக்கின்றன. ஸ்ரீ ஸுப்ரஹ்மண்ய தத்வம் என்பதை வியாஜமாகக்கொண்டு பல அரிய தத்வங்கள் கூறப்பட்டிருக்கின்றன. நம் புராணங்களெல்லாம் வேதங்களின் கருத்துக்களை நன்றாக விளக்குவதற்கும், முக்யமாக வேதத்தில் அனதிகாரிகளான ஸ்திரீகள், சூத்ரர்கள் முதலானவர்களுக்காகவே மேம்பட்டிருக்கின்றன. ஆதலால்தான் வால்மீகிமுனிவர், குசலவர்களுக்கு ஸாங்கமாக வேதத்தை அத்யயனம் செய்வித்தபிறகு அதன் தாத்பர்யத்தை அறிந்துகொள்வதற்காக ராமாயணத்தை சொல்லிவைத்தார் என்று கூறப்பட்டிருக்கிறது. புராணங்களின் உதவியில்லாமல் வேதங்களின் உட்கருத்துக்களை ஸுலபமாக நாம் அறிந்துகொள்ளமுடியாது. வேதத்தின் பிரிவுகளான கர்மகாண்டம், உபாஸனாகாண்டம், ஞானகாண்டம் இம்மூன்றிலும் கூறப்படும் உண்மைக் கருத்துக்களைத் தன் தபோமஹிமையால் அறிந்துகொண்டு ஸ்ரீ வேதவ்யாஸர் நம்முடைய க்ஷேமத்திற்காக அநேக உபாக்யானங்களுடன் புராணங்களை இயற்றியிருக்கிறார். இவைகளில் முக்யமாக

ஸுதஸம்ஹிதை, பாரதத்தில் மோக்ஷ பர்வா இவைகளில் ஞானகாண்டார்த்தம் நன்கு விளக்கப்பட்டிருக்கிறது. இப்புராணங்களில் ஸ்காந்தம் சங்கரஸம்ஹிதை சிவரஹஸ்யகண்டத்தில் விரிவாக ஸ்ரீ ஷண்முகரது திருவிளையாடல்கள் சொல்லப்பட்டிருக்கின்றன. ஈசனது திருவிளையாடல்கள் ஒவ்வொன்றும் ஒவ்வொரு தத்துவத்தைக் காண்பிக்கின்றன. பாமரர்களுக்கு அவைகள் தங்களுடைய வியவஹாரம் போல காணப்பட்டாலும், வாழ்க்கையில் அநேக தர்மங்களையுபதேசிப்பதுடன் ஜீவர்கள் ஸம்ஸார வாழ்க்கையினிருந்து விடுபட்டு மோக்ஷ ஸாம்ராஜ்யத்தையடைவதற்குவேண்டிய அநேக வழிகளையும் காண்பிக்கின்றன. உதாஹரணமாக அத்யாத்மராமாயணமானது, ஸ்ரீ ராமசரித்ரம் ஜீவர்கள் முக்தியையடையவேண்டிய வழிகளைக் காண்பிப்பதாகச் சொல்லுகிறது. இதுபோல ஸ்ரீ ஷண்முகரது சரித்ரத்திலும் அநேக ரஹஸ்யங்கள், அநேக தத்வங்கள் அடங்கியிருக்கின்றன. இவைகளையே இந்நூலாசிரியர் நன்றாக நிரூபித்திருக்கிறார்.

உபநிஷத்துக்களெல்லாம் ப்ரஹ்மத்தை ஞானஸ்வரூபமாக வர்ணிக்கின்றன, இது குஹன் ஒருவருக்கே விசேஷமாகப் பொருந்துமென்பது அவருடைய பல பெயர்களாலும், சரித்ரங்களாலும் ஸ்பஷ்டமாகத் தெரிகிறது. புத்தியாகிற குஹையினிருந்து கொண்டு அதற்கும் ப்ரேரகனாக ஸாக்ஷியாக ப்ரகாசிப்பதால்தான் குஹன் என்ற பெயர் ஏற்பட்டது. ஆலமரத்தடியில் தக்ஷிணாமூர்த்தியவஸரமாக உட்கார்ந்துகொண்டு மௌனத்தாலும் சின்முத்ரையாலும், ஸனகாதி முனிவர்களுக்கு தத்வத்தையுபதேசித்த தன் பிதாவான பரமேச்வரனுக்கும் ப்ரணவார்த்தத்தையுபதேசித்து சிவகுரு, ஞானபண்டிதன், ஸ்வாமிநாதன் என்னும் பெயர்களையடைந்து விளங்கும் ஸுப்ரஹ்மண்யர் ஞானவடிவம் என்பதில் என்ன ஸந்தேஹம்? இவ்விதம் அநேக நாமாக்களுடைய ரஹஸ்யார்த்தம் இக்ரந்தத்தில் நன்கு விவரிக்கப்பட்டிருக்கிறது. உபோத்காதத்தில் ஸ்ரீ ஷண்முகப்பெருமானது திவ்ய சரித்ரம் பத்தொன்பது ஸ்லோகங்களால் வடமொழியிலும், பிறகு தமிழிலும் கூறப்பட்டிருக்கிறது. பிறகு ஸம்பவகாண்டம், ஆஸுரகாண்டம், ப்ரமாமேஹேந்த்ரகாண்டம், யுத்தகாண்டம், தேவகாண்டம் இந்த ஐந்துகாண்ட கதைகளின் தத்வார்த்தங்கள் விமர்சிக்கப்பட்டிருக்கின்றன. ஆங்காங்கு அநேக அத்வைதவேதாந்த மதப்ரக்ரியைகள் ப்ரதிபாதிக்கப்பட்டிருக்கின்றன.

ப்ருஹதாரண்யகம் முதலான உபநிஷத்துக்களில் ஸாத்விகமான இந்த்ரிய விருத்திகளே தேவர்களாகவும், தாமஸமான இந்த்ரிய விருத்திகளே அஸுரர்களாகவும் வர்ணித்து நம் சரீரத்திலேயே ஒருவருக்கொருவர் யுத்தம் நடப்பதாகச் சொல்லப்பட்டிருக்கிறது. இதையே மூலப்ரமாணமாக வைத்துக்கொண்டு ஸ்ரீ ஷண்முக சரித்ரத்தில் வரும் இந்த்ரன் முதலான தேவர்கள், சூரபத்மன் முதலான அஸுரர்கள். இன்னும் வள்ளி, தேவஸேனை முதலான ஒவ்வொருவருடைய தத்வங்களையும் சொல்லியிருக்கிறார். ஜீவனுக்கு மாயையின் ஸம்பந்தத்தாலேற்பட்ட அஹங்காரம் ஞானத்தாலழிவதையே சூரபத்மஸம்ஹாரம் குறிக்கிறது. கச்யபரை ஜீவனுகவும், அவருக்கு மாயை என்ற அஸுரப்புதல்வியின் ஸம்பந்தத்தாலேற்பட்ட சூரபத்மனை அஹங்காரமாகவும் வர்ணித்து ஞானவடிவமாகிய ஸுப்ரஹ்மண்யரால் அது நசிப்பதாகச் சொல்லிறார்.

சூரபத்மனின் மாதாவுக்கு மாயை என்று புராணத்தில் கூறப்படும் பெயரானது இவ் விஷயத்தில் மிகவும் பொருத்தமாயிருக்கிறது. பிறகு வள்ளி தேவசேனை கலியாணங்களின் தத்வமும், ஸ்கந்தகிரி, திருத்தணிகை, வள்ளிமலை முதலிய ஸ்தல விசேஷங்களின் தத்துவமும் கூறப்பட்டிருக்கிறது. ஆங்காங்கு சங்கர ஸம்ஹிதையிலிருந்து சுலோகங்களும், திருப்புகழ், கந்தரலங்காரம் முதலியவைகளிலிருந்து தமிழ்ச் செய்யுள்களும் மேற்கோள்களாக காட்டப்பட்டிருக்கின்றன. முடிவில் அகஸ்திய ஸம்ஹிதையில் இருப்பதாகச் சொல்லப்படும ஸ்ரீ ஸுப்ரஹ்மண்யாராதன க்ரமமானது ஆவரண பூஜையுடன் வடமொழியில் அச்சிடப்பட்டிருக்கிறது. நிர்குணஷ்டோத்தரசதநாமாவளியும் சேர்க்கப்பட்டிருக்கிறது. இந்நூலை வாசிப்பதன் மூலம் ஸ்ரீ ஷண்முகரது திவ்ய சரித்திரத்தையும் அத்வைத வேதாந்த மதத்தின் அநேக ரஹஸ்யங்களையுமறிந்துகொள்வதால் ஸ்ரீ ஸுப்ரஹ்மண்யரிடம் பக்தியானது மேலும் மேலும் அபிவிருத்தியடைந்து அவரது பரிபூர்ண கிருபைக்கு பாத்திரமாக ஹேதுவாகும்.

***

லலிதோபாக்யான விமர்சம்:—by N. Subrahmanya Aiyar, Sri Brahma Vidya Vimarsini Sabha, 178, Lloyd's Road, Rayappetta, Madras. Price 0-4-0

ஸ்ரீ லலிதோபாக்யானமென்பது ப்ரஹ்மாண்ட புராணத்தில் அடங்கியுள்ளது. ஸ்ரீ மஹாவிஷ்ணுவானவர் குதிரையின் சிரஸ்ஸையடையப்பெற்று தேவியின் கிருபையால் ஸ்ரீ லலிதாம்பாளின் பெருமைகளை ஸ்ரீ அகஸ்தியமாமுனிவருக்கு உபதேசிக்கிறார். சூரபத்மனின் உபத்ரவம் தாங்கமாட்டாமல் தேவர்களெல்லோரும் தங்கள் ஸைன்யத்தை தலைமைவஹித்து நடத்தி யுத்தத்தில் அஸுரர்களை ஸம்ஹரிப்பதற்காக குமாரனை வேண்டி, காமனை பரமேச்வரிடம் அனுப்புகிறார்கள். சங்கரருத்ரனுடைய நெற்றிக்கண்ணிலிருந்து கிளம்பிய அக்னியால் தஹிக்கப்பட்டு காமன் சாம்பலாகிறான். இவ்விதம் காமன் அழிந்ததும் அந்த சாம்பலிலிருந்து கோபமேயுருவெடுத்த மஹாடம்பனென்ன பண்டனென்னும் அஸுரன் உண்டாகிறான். காமம் தடைபட்டால் கோபமுண்டாவது இயற்கையின் பதையே இது காண்பிக்கிறது. ஒருவன் ஒரு பொருளில் ஆசைவைத்து அவரிடம் பலமுமிருந்து அந்த வஸ்து அவனுக்கு கிட்டாமல்போனால் அவன் மனதில் முதலிலுண்டான காமமானது கோபமாக மாறுமென்பதை நாம் அனுபவத்திலேயே பார்க்கலாம். அந்த சாம்பலிலிருந்து உண்டான பண்டாஸுரன் தேவர்களை ஹிம்ஸிக்கவே பரதேவதையானவள் ஸ்ரீ லலிதாம்பாளாக ஆவிர்பவித்து பண்டாஸுரனையும் அவனைச் சேர்ந்தவர்களையும் ஸம்ஹாரம்செய்து மறுபடியும் மன்மதனை உயிர்ப்பித்து அனுக்ரஹம் செய்வதுதான் இவ்வுபாக்யானத்தில் கூறப்பட்டிருக்கும் கதையின் ஸாரம். இந்நூலில் ஆசிரியர், ஸ்ரீ பாஸ்கராராயர் ஸ்ரீ லலிதாஸஹஸ்ரநாமபாஷ்யத்தில் விவரித்திருப்பதையனுசரித்து இவ்வுபாக்யானத்தில் காணும் ஒவ்வொரு பாத்திரத்தினுடைய தத்வத்தையும் நன்றாக ஆராய்ந்து அத்வைத வேதாந்த சாஸ்திரத்தின் அநேக உண்மைகளை வெளியிட்டிருக்கிறார். ப்ரஹ்மஞானத்தால் அவித்யையும் அதன் விருத்திகளும் அழிந்து ஜீவபாவம் நீங்குவதையே பண்டாஸுரவதம் குறிப்பதாகச் சொல்லுகிறார். இவ்வுபாக்யானத்தில் மூப்

பத்திரண்டு அத்யாயங்கள் இருப்பதற்கு பல காரணங்களை இதில் எடுத்துக்காட்டியிருக்கிறார். இந்நூலின் கடைசியில் நாகரி லிபியில் ரச்மிமாலாஸ்தோத்திரமும் சேர்க்கப்பட்டிருக்கிறது. இத்தேசியிடம் அத்யந்தம் பக்தியுள்ளவர்களுக்கு இந்நூல் மிகவும் உபகாரமாயிருக்கும்.

***

லகுசங்காரஸம்ஹிதை என்னும் ஸ்காந்தஸப்தசதீ:-ஆங்கரை ப்ரஹ்மஸ்ரீ ரங்கஸ்வாமி சாஸ்திரிகளால் வடமொழியில் தொகுத்துத் தமிழிலும் மொழிபெயர்க்கப்பட்டது.

ஆங்கரை ரங்கஸ்வாமி சாஸ்திரிகள்
7, சோலையப்பன் தெரு, குடமூக்கு.
விலை 0—12—0

ஸ்ரீ வியாஸபகவான் அருளிச்செய்த பதினெண்மஹாபுராணங்களில் ஸ்காந்தமொன்றே மற்றெல்லாவற்றையும்விட மிகவும் பெரியது. லக்ஷம் கிரந்தங்களடங்கிய இம்மஹாபுராணம், ஸநத்குமாரஸம்ஹிதை, ஸூதஸம்ஹிதை, ப்ரஹ்மஸம்ஹிதை, விஷ்ணுஸம்ஹிதை, சங்கரஸம்ஹிதை, சூரஸம்ஹிதை என்று ஆறு ஸம்ஹிதைகளாகப் பிரிக்கப்பட்டுள்ளது. இவைகளில் ஐந்தாவதான ஸ்ரீ சங்கரஸம்ஹிதையில் ஸ்ரீ ஸ்காந்த லீலைகள் விசேஷமாக வர்ணிக்கப்படுவதால் தான் இப்புராணத்திற்கு ஸ்காந்தமென்னும் பெயர் ஏற்பட்டது. சாதாரணமாக புராணங்களெல்லாம் மிகவும் விரிவாயிருப்பதால் அவைகளை ஆதியோடந்தம் வாசிப்பவர் இக்காலத்தில் மிகவும் சிலரே. ஆதலால் கதைகளை ஒன்றுகூடவிடாமல் புராணார்த்தத்தை மிகவும் ஸங்கிரஹித்து எளிய நடையில் மிகவும் ஸ்வாரஸ்யமாக தமிழில் மொழிபெயர்ப்புடன் கிரந்தங்களை இயற்ற முன் வருவார்களையால் அவர்களுடைய இந்த ப்ரயத்தினை யார்தான் வரவேற்கமாட்டார்கள். இதுவிஷயத்தில் கும்பகோணம் ராமமந்திரம் வேதாந்த பாடசாலை ப்ரதானாத்யாபகர், ஆங்கரை ப்ரஹ்மஸ்ரீ ரங்கஸ்வாமி சாஸ்திரிகள் மூன் சொன்னபடி ஸ்காந்த மஹாபுராணத்திலுள்ள ஸ்ரீ சங்கரஸம்ஹிதையை ஸங்கிரஹித்து லகுசங்காரஸம்ஹிதை என்னும் நூலை வடமொழியிலியற்றியிருப்பதை எல்லோரும் வரவேற்கத்தக்கது. இந்நூலில் 700 சுலோகங்களிருப்பதால் ஸ்காந்தஸப்தசதீ என்னுமற்றொரு பெயர் கொடுக்கப்பட்டிருக்கிறது. இதுபோலவே இந்நூலாசிரியரால் ஸ்ரீமத் பாகவதத்தில் ஸங்கிரஹமாக **ஸுதரா** என்னும் க்ரந்தத்தில் **ஸுதராபாகவதம்** என்னும் க்ரந்தம் செய்யப்பட்டிருக்கிறது.

இக்காலத்தில் நம்மில் அநேகருக்கு நம் ப்ராசீனஸாஸ்த்ரங்களிலும் புராணேதிஹாஸங்களிலும் நம்பிக்கை குறைந்ததற்கு முக்யகாரணம் மேனாட்டுப் படிப்பே என்பதை எல்லோரும் ஸங்கோசமில்லாமல் ஒப்புக்கொள்வார்கள். உபநயனத்திற்கு முன்னாலேயே நம் சிறுவர்களை ஆங்கிலப் பள்ளிக்கூடங்களில் சேர்த்து அந்தப் படிப்பைக் கற்றுக்கொடுப்பதால் மேனாட்டுப் பழக்கவழக்கங்கள் சிறுவயதிலேயே அவர்கள் மனதில் நன்றாக பதிந்துவிடுகின்றன. நம் மததத்வங்களையும் புராணக் கதைகளையுமறிய அவர்களுக்கு அவகாசமே கிடைப்பதில்லை. 'ஐந்தில் வளையாதது ஐம்பதிலும் வளையாது' என்பதுபோல் பிற்பாடு என்னசொன்னாலும் அவர்கள் மனதில் ஏறுவதில்லை. ஆதலால் நம் சிறுவர்களுக்கு பால்யத்திலேயே நம்மதக் கல்வியைப் புகட்டவேண்டும். இவ்விஷயத்தில் ப்ரஹ்மஸ்ரீ சாஸ்திரிகள் பாலர்

களுக்குப் புரியும்படியான எளிய நடையில் இந்நூலை எழுதி பெரிய உபகாரம் செய்திருக்கிறார்கள். இந்நூலைச் சிறுவர்களுக்கு மேன்மேலும் பாலையில் ப்ரவேசம் ஏற்படுவதற்கு பாடபுஸ்தகமாக வைக்கலாம். சிறுவர்களுக்கு உதவியாயிருக்கும்பொருட்டு இதைத் தமிழிலும் மொழிபெயர்த்திருக்கிறார்கள். இதை வாசிப்பதன் மூலம் சிறு வயதிலே அவர்கள் மனதில் தெய்வபக்தி ஏற்பட்டு விருத்தி, நற்பாகும் முதலியவை களின் விசேஷங்களையும் தெரிந்துகொள்வார்கள். தக்ஷதக்ஷிணாம்னாதத்தில் பாலமேச்வரை சிந்தித்த தக்ஷன் கேட்ட கேள்விகளுக்கெல்லாம் தக்ஷி சொல்லும் பதிலிலிருந்து ஈச்வரரைப்பற்றிய அநேக விஷயங்கள் அறிந்துகொள்ளக்கூடும். இவ்விதம் சிறுவர்களுக்கு மிகவும் பயன்படக்கூடிய தான ப்ரஹ்மஸ்ரீ சாஸ்திரிகளுடைய இந்த ப்ரவிருத்தியானது எல்லோராலும் மிகவும் கொண்டாடத்தக்கது.

NEWS AND NOTES

VYASA PUJA.

This year's Vyasa Puja took place on the 8th of July, Sri Kasi Paramahamsa-parivrajaka Sri Madhavananda Sarasvati Swami wrote from Benares that he was coming to Sri Sankaragurukulam specially to perform the Vyasa Puja in the presence of Sri Sankarabhagavatpadacharya here and to stay here for the Chaturmasya. On his arrival just two days before the Vyasa Puja he was welcomed and was accommodated in the *Santi Kuteeram*. On the Vyasa Puja day there was a grand assemblage of Acharyabhaktas. The Swamiji performed the Puja in accordance with the proscribed rites and at its conclusion Gurubhaktasikhamani T. K. Balasubrahmanya Iyer requested the Swamiji to stay here for the Chaturmasya and gave a short exposition of the necessity of the performance of the Vyasa Puja and the significance of the observance of Chaturmasya. He further extolled the devotion of the Swamiji who had come all the way from Benares eager to perform the Vyasa Puja in the sannidhi of the original Guru Sri Sankarabhagavtpada. Much enthusiasm was displayed and the Swamiji after performing the पुनः पूजा distributed to the bhaktas assembled the Vyasa Puja prasadams and the Ganges water brought by him from Benares. A large number of

Brahmins were fed on the occasion. The Swamiji has brought also a brass *kudam* full of Ganges water and presented it to the temple for Abhishekam to the Moola Murti on the ensuing Sri Sankara Jayanti day.

LECTURES.

The Ramayanam lectures by Kalladakurichi Siromani Venkatarama Sastrigal continued regularly every Sunday. On the 2nd of August the lecture was on Sita Kalyanam. It was a fine exposition giving out the beauty of every word in the Ramayana. Sri T. K. Balasubrahmanya Iyer, while congratulating the Sastrigal on his exposition, detailed further the beauties contained in the sloka इयं सीता and prayed to Lord Sri Sankara to bestow all prosperity on the lecturer. The lectures which were delivered only once a week *i.e.*, every Sunday, were so much liked that it was arranged to have them on two days of the week *viz.*, Thursday and Sunday.

***

On the 10th of July Brahmasri P. Ramanatha Sastrigal, the staunch Brahmachari of Panaiyur who is closely following the duties of a Brahmachari as prescribed in the Smritis, delivered a lecture on Sandhyavandana expounding beautifully well the Shastraic rules on Snana (bath), Vastradharana (dress), Pundradharana (wearing the customary caste-marks), Sikha (tuft of hair on the head), Maunji (the belt of Kusa grass round the waist), Krishnajinam (deer skin), giving out at the same time their rationale. It was an instructive lecture and was much appreciated. Sri T. K. Balasubrahmanyaiyer complimented the Sastrigal on his instructive lecture and said that the value of the lecture was considerably enhanced by the lecturer himself following the injunctions of the Sastras closely as expounded by him, in accordance with the maxim that example is better than precept.

***

On the 7th August Kumbakonam Sri Jagadguru Mutt Asthana Vidvan Atmavidyabhushanam Brahmasri Jagadeeswara Sastrigal delivered a lecture on the greatness of our Bharatadesa. After lecturing in detail on the greatness of our ancient Maharshis and the various smritis enacted by them for our observance and the immense good resulting to us by our closely following those smritis, he exhorted the audience to follow the shastras and honour the Sanatana Dharma. In the end Brahmasri T. K. Balasubrahmanyaiyer complimented the Sastrigal on his lecture and said that though in these days several people follow adharmic ways, still the greatness of our Bharatadesa can never be effaced by any body since this is the only country where Vedas Puranas, Smritis, sacred rivers and holy places of pilgrimage are to be found scattered all over. The very object of

starting the Sankaragurukulam here, is, with the idea of training up at least two Vidyarthis in the wake of our ancient Maharshis so that they may in later days become great sages themselves and protect our country from all irreligious ways.

***

SRI SANKARAGURUKULAM PUJA FUND SCHEME.

The details of this scheme were given in the 8th issue of this Journal. We are glad to report that till the end of this quarter 333 subscribers have joined the scheme and that 62 of them have paid in full. Their names are given below :—

1 Sri M. Dwarakanatha Iyer, Retd. Tahsildar.
2 „ P. R. Sundararaja Iyer B.A., B.L., Pudukotah
3 „ K. S. Jayarama Iyer B.A., B.L., Madras
4 „ M. Ramakrishna Iyer, Sholavandan
5 „ Dr. K. Narayanaswamy Iyer, Trichy
6 Srimati B. C. A. Rukmini Ammal, Bhikshandarkoil
7 Sri T. S. Sankara Iyer, Trichy
8 „ S. A Yajnasami Iyer, Ammangudi
9 „ M. Krishnaswami Reddiar, Manakkal
10 Do Do
11 „ S. Kalyanasundaramier Srirangam
12 „ Dr. T. Narasimhalu L.M.S., Bellary
13 „ S. P. Haran, Bombay
14 Srimati T. Visalakshi Ammal, Bhikshandarkoil
15 „ P. N. Natesa Iyer, Poona
16 „ Sadasivabrahmananda Sarasvati Swamigal
17 „ L. S. Parthasarathi Iyer, Judge
18 „ Gunavantlal Vidyashankar, Trichy
19 Sri G. V. Vyaghrapuri Iyer, Tennur
20 „ M. Subrahmanyaiyer, Retd. Dt. Judge, Anathandavapuram
21 „ S. Ranganathan, Madras
22 „ Dr. M. Subbiah, Srirangam
23 „ Divan Bahadur K. Sundaram Chettiar, Retd. High Court Judge, Salem
24 „ M. S. Sitaramier, Coimbatore
25 „ P. V. Anantanarayanaiyer, Royapetta
26 „ C. V. Reddi B. A., Bezwada
27 „ K. Balasubrahmanyaiyar, Mylapore
28 „ P. R. Subrahmanyaiyer, Trichy
29 „ M. Patanjali Sastrigal, High Court Judge, Mylapore
30 „ Sachivottama Sir C. P. Ramaswami Iyer, Dewan, Travancore
31 „ O. A. A, R. Arunachalam Chettiar, Pallattur
32 „ Hasudi Ramasastri, Merchant, Shimoga
33 „ R. Srinivasaiyer, Advocate, Trichy
34 „ R, V. Rajagopalaiyer, Mylapore
35 „ P. Margabandu Iyer, Salem
36 „ K. Natesaiyer, M.A., Trichy
37 „ S. K. Subrahmanyaiyer, Mylapore
38 „ R. Kandasubrahmanyaiyer, Srirangam
39 „ R. Venkataramier, Madras
40 „ Radhabhikshu Swamigal, Karathur
41 „ K. V. Srinivasachariar, Agent, Sringeri Mutt
42 „ B. M. Visvanathaiyer, Sholavandan
43 „ M. Sambamoorthi, B.A., B.L., Salem
44 „ T. Sundaramiyer, Retd. Judge, Salem
45 „ S. A Pattabhirama Chettiar ,,
46 „ R, Lakshmi Narasaiyer ,,
47 „ M. Venkatachalaiyer, Madura
48 „ Diwan Bahadur K. S. Ramaswamy Sastrigal, Madras
49 „ K Sundararamaiyar, Kumbakonam
50 „ R. Subbaratnam Iyer, Trichy
51 „ M. K. Seetharama Chettiar, Sendamangalam
52 „ S. N. Padmanabha Chettiar & P. R. Jayagopala Chettiar } Salem

53 Sri N. Swaminathaiyer L.M.S., Cuddalore
54 „ G. Ramabhadra Iyer Retd. Tahsildar, Trivandrum
55 „ K. Ramakrishna Bhatt, Tirthahalli
56 „ B. V. Pandit, Nanjangud
57 „ M. S. Varadarajaiyer B.A., B.L. Trichy
58 „ V. A. L. Narasimhaiyar, Srirangam
59 „ D. R. Subrahmanyaiyer, Ranigunj
60 „ S. R. Gopalaiyer, Bezwada
61 „ Morarji Karbhai, Bangalore
62 „ S. N. Subrahmanyaiyer, Madura

Out of the sum of Rs. 6200/- collected from the above gentlemen, Rs. 6000/- has been paid towards the cost of the house purchased for the temple for Rs. 10,000/- and the balance of Rs. 200 is deposited by the subscribers themselves in the Kulitalai Bank as a fixed deposit in the name of the Sri Sankaragurukulam. We appeal once again to all the subscribers to pay up their subscriptions as early as possible so that the sale transaction may be completed.

BOOKS RECEIVED

SANSKRIT.

वास्तुविद्या सव्याख्या Trivandrum Sanskrit Series No. 142 with the commentary of K. Mahadeva Sastri. Price 1-4-0

पाशुपतसूत्रम्, भगवत्कौण्डिन्यविरचितभाष्योपेतम् Trivandrum Sanskrit Series No. 143. Price Rs. 2-0-0

अग्निवेश्यगृह्यसूत्रम् Trivandrum Sanskrit Series No. 144. Price Rs. 2-0-0

श्रीविद्यानित्याह्निकम् Compiled by Brahmasri N. Subrahmanya Iyer with a Foreward by Brahmasri C. Sankararama Sastri M.A., B.L., Price Rs. 2-0-0

श्रीहनुमदष्टकं, श्री आञ्जनेयाष्टकं, श्रीहनुमत्पञ्चरत्नं, श्रीहनुमत्कीर्तनं, श्रीजम्बुनाथाष्टकम्, श्रीअखिलाम्बिकाष्टकम् By Sri M. S. Krishnaswami Iyer *Grantha Script* 0-1-0

SANSKRIT—TAMIL.

सौन्दर्यलहरी of Sri Sankarabhagavatpada with the Tamil Translation of Sri G. V. Ganesa Iyer and a poetical Tamil translation by Veerai Kaviraja Pandita and with an English Foreword by Dewan Bahadur K. S. Ramaswami Sastrigal. Price Rs. 2-0-0

लघुशंकरसंहिता alias **स्कान्दसप्तशती** Translated into Tamil by Angarai Rangasami Sastri. Sri Janardana Printing Works Ltd., Kumbakonam. 0-12-0

தானேகவே ஹிந்தி அல்லது ஹிந்துஸ்தானி கற்கும் வழி. முதல் பாடம். By திருஞ் ணமூர்த்தி 0-3-0

ENGLISH.

Studies in Philosophy No. 1— The Dvaita Philosophy and its place

in the Vedanta by Vidwan H. N. Raghavendrachar M. A., with a foreword by Mr. A. R. Wadia B. A., (Cantab) Bar-at-law. Published by the University of Mysore. 3-0-0

Sri Vidya Saparya Vasana of Brahmasri N. Subrahmanya Iyer. Translated into English by Sri A. Nataraja Iyer B. A, with a foreword by Prof. S. V. Venkateswara M. A. and an introduction by Dewan Bahadur K. S. Ramaswami Sastrigal B.A., B.L. 3-0-0

The National College, Trichinopoly
Annual Report for 1939—40

The High School, Srirangam
Annual Record for 1940—41.

Presidential address of Rao Saheb N. Natesa Iyer B.A., B.L., at the A. I. V. S. S. conference at Melur

Do. at Rameswaram.

TAMIL.

ஸ்ரீ ஸுப்ரஹ்மண்ய தத்வம் with Avarana Puja and Nirguna Ashtottarasatanamavali by Brahmasri N. Subrahmanyaiyer with a Foreward by Sri T. P. Meenakshisundaram M.A., B.L., M.O.L. 1-8-0

லலிதோபாக்யான விமர்சம் (Tamil) and ரச்மிமாலா ஸ்தோத்ரம் (Nagari) 0-4-0

ஸ்ரீ கிருஷ்ண சரித்திரம்—ஒரு யோகியின் சரித்திரம் By Sri S. Ayyadurai Iyer Retd. Sub Magistrate. 0-2-0

பாண்டவர்களின் சரித்திரம் என்பது அர் ஜுனயோகியின் சரித்திரம் by Do. 0-2-0

ஸ்ரீ ஸதாசிவபிர்ம்மேந்திராள் சரிதம் ஸெளர் ஸ்ரீ ஸதாசிவபிர்ம்மேந்திர ஸைபேயா ரால் எழுதி வெளியிடப்பட்டது 0-6-0

தானுகவே தெலுங்கு கற்றுக்கொள்ளும் வழி. மூதல் பாடம் by M. Krishnamurti

காலடி சங்கராசார்யர் மஹோத்ஸவம் —விக்ரமன்

OUR EXCHANGES.

Aryadharmam, Kumbakonam.

Brahmavidya : The Adyar Library Bulletin, Adyar.

The Sanskrit Sahitya Parishat Patrika, Calcutta.

The Divine Life, Rikhikesh.

The Vedanta Kesari, Mylapore.

The Mysore Sanskrit College Magazine, Mysore.

The Kalpaka, Tinnevelly.

The Quarterly Journal of the Mythic Society, Bangalore.

Madhuravani, Belgaum.

The Poona Orientalist, Poona.

The Journal of Oriental Research, Madras.

The Indian Thinker, Trivandrum.

The Journal of the Oriental Institute, Tirupati.

JUST PUBLISHED

ASPECTS OF ADVAITA

1. **Brahman and Maya.**
2. **Advaita and Modern Thought**

BY

K. SUNDARARAMA AIYAR M. A.

&

Diwan Bahadur
K. S. RAMASWAMY SASTRI B.A., B.L.,

Cr. 8vo. pp. 270. Half Calico bound.
Price Rs. **2**/—. Postage extra.

SRI VANI VILAS PRESS,
SRIRANGAM.

Journal of Oriental Research,
MADRAS.

STARTED IN 1927

AND

WORKING SUCCESSFULLY FOR THE CAUSE OF ORIENTAL RESEARCH AND LEARNING

FOR THE LAST 12 YEARS

CONDUCTED BY A

Distinguished Editorial Committee

PRESIDED OVER BY

Sir P. S. Sivaswami Aiyar, LL.D., K.C.S.I., C.I.E.

CONSISTING OF OTHER EMINENT SCHOLARS *viz.*,

Mahamahopadhyaya S. Kuppuswami Sastri, M.A., I.E.S.,

Prof. M. Hiriyanna, M.A., L.T.,

Prof. P. P. S. Sastri, B.A. (Oxon), M.A., (Madras)

Dr. A. Sankaran, M.A., Ph.D., I.T.,

Dr. T. R. Chintamani, M.A., Ph.D., and others

AND

HIGHLY APPRECIATED BY

Eminent Foreign Scholars like Dr. Hermann Jacobi, Dr. L. D. Barnett, Dr. J. Jolly, O. Strauss, Dr. F. O. Schrader, Dr. Wilhelm Printz and Dr. Sylvain Levi

AND BY LEADING INDIAN DAILIES AND JOURNALS like the "Hindu", "Madras Mail", "Bombay Chronicle", the "Indian Antiquary" and the "Indian Review"

ISSUED IN FOUR QUARTERLY PARTS containing very learned Articles by Eminent Scholars and Students of Research.

ANNUAL SUBSCRIPTION

Inland: Rs. 6. Foreign: 10 sh.

Each Part separately Rs. 2. Postage inclusive

For Particulars apply to:—

"Ashrama", Luz, Mylapore, Madras } Mr. K. BALASUBRAMANYA IYER, B.A., B.L., *Managing Editor.*

THE ADYAR LIBRARY

Director: Dr. G. Srinivasa Murti, B.A., B.L., M.B. & C.M., Vaidyaratna.

BRAHMAVIDYA

THE ADYAR LIBRARY BULLETIN
APPEARING FOUR TIMES A YEAR

Editor: PROF. C. KUNHAN RAJA, M.A., D. PHIL. (OXON.)


Rates of Subscription:

LIFE SUBSCRIPTION	Rs.	100
OR	$	50
OR	£	10

	PER ANNUM	SINGLE COPY
INDIA & CEYLON	Rs. 6	Rs. 2—8
U. S. A.	$ 3	$ 1-25
BRITISH EMPIRE	Sh. 12	Sh. 5
OTHER COUNTRIES	Rs. 9	Rs. 3—8

All Communications to be addressed to:

THE DIRECTOR,
Adyar Library,
ADYAR, Madras, S. India.



Printed at the SRI VANI VILAS PRESS,
& Published at the Sri Sankaragurukulam, Srirangam,
by Gurubhaktasikhamani
T. K. BALASUBRAHMANYA AIYAR B. A.

The Journal

OF THE

Sri Sankaraguru kulam

Srirangam

VOL. III. OCTOBER—DECEMBER NO. II.



Editor :
Gurubhaktasikhamani,
Sastraprasarabhushana,
T. K. BALASUBRAHMANYA AIYAR,
B. A,
Founder, Sri Sankara-
gurukulam, Srirangam.

Literary Adviser :
Bharatakalanidhi
Vidyasagara,
Vidyavacaspati,
P. P. SUBRAHMANYA SASTRI,
B. A. (Oxon) M. A.
Curator, Govt.
Oriental Mss. Library
& Professor of
Sanskrit, Presidency
College, Madras.

ANNUAL SUBSCRIPTION { INLAND Rs. 6/—Post Free.
FOREIGN SH. 12/—

CONTENTS.

Original Articles.

1	श्रीभगवत्पादस्तुतिः	By Sri Sankara Sastri, Kallidaikurichi	34–
2	शिवगिरीशस्तुतिः	By Ramakavi	36–
3	उपन्यासस्य सारांशः	By Sri Sacchidananda Tirtha Swami	39–
4	काव्येषु धर्मनिरूपणम्	By K. S. Venkatarama Sastri	42–
5	अभिज्ञानशाकुन्तलानुभवः	By Mimamsaratna A. V. Gopalachariar M.A., B.L.	43–

Rare & Hitherto Unpublished Works.

6	सौन्दर्यलहरी	By Sri Sankara Bhagavatpadacharya with three commentaries — Lakshmidhara, Saubhagyavardhini and Arunamodini	17–
7	तत्त्वकौस्तुभः	By Sri Bhattoji Dikshita	17–
8	मयूखावली	A commentary on the Sastra Dipika of Parthasarathi Misra By Sri Appayya Dikshita	87–94
9	बालभारतम्	By Agastya Pandita with the commentary of Salva Timmayah Dandanatha	103–110
10	मद्रकन्यापरिणयचम्पूः	By Sri Gangadharakavi	17–24
11	जीवन्मुक्तिकल्याणम्	A Drama By Sri Nalladhvari	17–24
12	शृङ्गारप्रकाशः	By Maharajadhiraja Bhoja	79–86

Original Articles in English.


13	*Raghuvamsa—A Study*	By Mimamsaratna A. V. Gopalachariar M.A., B.L.	29—37
14	*Pandit Subrahmanya Sastry*—An Appreciation		37—39
15	Reviews.		39—40
16	News and Notes.		4
17	Books Received.		43—4
18	Our Exchanges.		44



श्रीशंकरगुरुकुले अष्टलक्ष्मीमण्डपे विराजमाना
धान्यलक्ष्मीः. सन्तानलक्ष्मीश्च ॥



श्रीशंकरगुरुकुले अष्टलक्ष्मीमण्डपे विराजमाना
धैर्यलक्ष्मीः सिंहलक्ष्मीश्च ॥



॥ श्रीः ॥

या वर्णपदवाक्यार्थस्वरूपेण विवर्तते । अनादिनिधनाऽनन्ता मा मां पातु सरस्वती ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैतेकथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

दृष्टान्तो नैव दृष्टस्त्रिभुवनजठरे सद्गुरोर्ज्ञानदातुः
स्पर्शश्चेत्तत्र कल्प्यः स नयति यदहो स्वर्णतामश्मसारम् ।
न स्पर्शत्वं तथाऽपि श्रितचरणयुगे सद्गुरुः स्वीयशिष्ये
स्वीयं साम्यं विधत्ते भवति निरुपमस्तेन वा लौकिकोऽपि ॥

॥ श्रीभगवत्पादस्तुतिः ॥

[कल्हिडैककुरिञ्चि ब्रह्मश्री शंकरशास्त्रिभिर्विरचिता ।]

गुरुवरशंकर भवते महते कुर्वे नमांसि भूयांसि ।
उरुतापं हर मनसः पुरुषार्थं न परं विभो देहे ॥ १ ॥

अपदानं वर्णयितुं विभेमि दूरं वचोमनसोः ।
अपनुद भीतिं वाचो विषयं कुरुयेत्यनुक्षणं याचे ॥ २ ॥

अथवाऽपदानवर्णनमसुकरमित्येव वा भाति ।
यस्मिन्कुण्ठीभवति स्मृतमात्रे मे विशोषिता जिह्वा ॥ ३ ॥

कति कवयः कति सुतपः कति वा सुधियो भवन्ति लोकेऽस्मिन् ।
नाहं तादृशमहिमा तस्मादस्माद्विरज्यते हि मया ॥ ४ ॥

वैराग्यमेव पुंसां साधनसंपत्सु गण्यते प्रथमम् ।
यदभावे शान्त्याद्या न फलन्तीति ब्रवीषि गुरुराज ॥ ५ ॥

नास्तिक्यं ह्रासयितुं प्रादुर्भूतस्त्वमेव कुशलोऽसि ।
तीव्रविरक्तिसमेतं शरणं प्राप्तं विधातुमेनं माम् ॥ ६ ॥

शंकरदेशिकसत्तम शमदमसहनादयो यथा मे स्युः ।
अनुगृह्णेय तथाऽहं किं किं न लभे विभो भवत्कृपया ॥ ७ ॥

आलम्बे तव चरणद्वन्द्वं कमलानुकारि गुरो ।
अलमन्येन यदन्यो मुक्त्यै दर्शयति गुरुपदे एव ॥ ८ ॥

गुरुरेव प्राप्तव्यो विज्ञानार्थं सदाऽऽदरेण यता ।
इति वेदान्तवचांसि प्राहुस्तस्माद्भवन्तमहं शरणम् ॥ ९ ॥

तुहिनगिरिवरगुहायामन्तर्धानं गताश्रितः पुंसाम् ।
लोचनदूरोऽपि भवान् स्फुरसि मूर्तिं प्रतिष्ठितां प्राप्य ॥ १० ॥

मन्त्रात्मानो देवाः सर्वेऽपि प्रमान्ति मन्त्रैः स्वैः ।
बिम्बेऽस्मिन् संनिहितो मन्त्रैः पूर्वैर्गुरूदितैर्भासि ॥ ११ ॥

शंकरयतिवर गुरुराट् शं तनु मनसो रुजं परां शमय ।
भवरोगपीडितं मां विद्या त्रिपौषधैः सुखय ॥ १२ ॥

संसारदावतप्तं मृडय ज्ञानेन मां परं सुधया ।
दैवी वागपि नान्यः पन्था इत्याह देशिकोत्तंस ॥ १३ ॥

भवसागरपतितं मां तारय चिन्मुद्रिकाग्रहस्तेन ।
मा स्म त्यजः प्रमग्नं प्रपन्नवानस्मि तव पदाम्भोजम् ॥ १४ ॥

काषायाम्बरसंवृतदेह गुरो केन हेतुना धत्से ।
एतं वेषं मन्ये सुलभं ज्ञानं वेदशमिव ॥ १५ ॥

यस्मादुपरतिशब्दः संन्यासेऽसिद्ध एवास्ति ।
त्यागेनैवामृतत्वं प्राप्ताः इत्याह वेदपुरुषोऽपि ॥ १६ ॥

यतिनामपि सर्वेषामेष हि वेषः किमर्थमायातः ।
अथवा विहितः शास्त्रे मन्ये शास्त्रं न चोदनीयमिति ॥ १७ ॥

विस्तरतो वक्तुमलं नास्मिन्समये ततस्तु शास्त्रेण ।
विहितत्वात्काषायं वसनं धत्से गुरुप्रकाण्ड विभो ॥ १८ ॥

तस्माद्विहितं कर्मानुष्ठातुं नैव शक्यते हि मया ।
अतोऽप्यवाश्रयणीया मम भवदीया कृपैव परिपूर्णा ॥ १९ ॥

इति श्रीभगवत्पादस्तुतिः संपूर्णा ।

॥ शिवगिरिस्तुतिः ॥

[रामकविभणिता]

अनवरतं परिचरता श्रितजनदुःखानि तूलवल्लुनता ।
शिवगिरिशिखरनिकेतः पशुपतिदयितो व्यपोहयञ्जयति ॥ १ ॥

अन्ते वसता महता संजीवनभेषजप्रयोगकृता ।
रघुवर इव यो रक्षति सकरुणमार्तान्हनूमता सततम् ॥ २ ॥

दक्षाऽभिषिक्तगात्रो हरिरिव गोपीगृहेषु यदुपुत्रः ।
स जयति चित्रचरित्रः शिवगिरिशिखरे शशाङ्कधरपुत्रः ॥ ३ ॥

शैलोन्नते कुमारः शक्तिधरः परमकरुणया पूर्णः ।
परिरक्षति हरिचरितान्पशुपतितनयः पशून् स कृष्ण इव ॥ ४ ॥

शूरः शिखिपत्रयुतः सुरवैरिनिराकरिष्णुभुजवीर्यः ।
गिरिवरदार्शितविभवो हरिरिव शिवबालकोऽद्भुतचरित्रः । ५ ॥

अद्राक्षं शिवशैले रुद्राक्षालंकृतं कुमारगुरुम् ।
विद्रावितशोकभयं रुद्रायापि प्रणीतपरबोधम् ॥ ६ ॥

गङ्गाभृतमनलतनुं शिवमिव तुङ्गाद्रिमङ्गलनिकेतम् ।
परिभावितविधिमदनं पार्वत्यानन्दनं स्तुवे स्कन्दम् ॥ ७ ॥

विपदटवीदावदहनं विध्वंसितशोकमोहशलभगणम् ।
कुङ्कुमशोणं तेजः शंकरजनितं चकास्ति शिवशैले ॥ ८ ॥

विबुधारिधूमकेतुं विषयाशीविषविदष्टजीवातुम् ।
भववारिराशिसेतुं कुक्कुटकेतुं भजामि गुहदेवम् ॥ ९ ॥

तरुणारुणसङ्काशं तारकमुखघोरदनुजकीनाशम् ।
करुणापेशलमनिशं शरणं करवाणि देवमेवेशम् ॥ १० ॥

शरभेदितारिपुहृदयं शोणितकैरवसुन्दरीहृदयम् ।
शिवधन्वीश्वरनिलयं कलये हृदि कार्तिकेयममितदयम् ॥ ११ ॥

निजपदभक्तिविधेयं सुरसमरेभं भुवीश्वरैर्ध्येयम् ।
वल्लीलोचनपेयं गिरिवास्तेयं स्मरामि गाङ्गेयम् ॥ १२ ॥

आहतदिव्यमयूरं गालत्सद्वधिरहारकेयूरम् ।
सौन्दर्यविजितमारं शैलविहारं भजे शिवकुमारम् ॥ १३ ॥

दिव्यमयूरारूढं दयिताद्वितयेन गाढमुपगूढम् ।
देदीप्यमानमूर्तिं ध्याये तं कार्तिकेयगुरुकीर्तिम् ॥ १४ ॥

प्रोषितपापारण्यं तापत्रयहारिभूरिकारुण्यम् ।
सुरारिपृतनाकर्मण्यं सुब्रह्मण्यं स्तुवे सुरवरेण्यम् ॥ १५ ॥

अज्ञानतिमिरदलनं प्रज्ञानकलाबोधिलहृदब्जम् ।
भासा विजितकृशानुं भानुसमानं भजामि हरसूनुम् ॥ १६ ॥

परमपवित्रचरित्रे पर्वतराजन्यकन्यकापुत्रे ।
रमतां सदा मतिर्मे बर्हिणपत्रे मनोज्ञशुभनात्रे ॥ १७ ॥

सौन्दर्यविजितमारे सारसरुचिचोरलोचने शूरे ।
रमतां सदा मतिर्मे शैलविहारे सदाशिवकुमारे ॥ १८ ॥

शिवगिरिशिखराश्लेषिणि मणिभूषणदीप्तिरचितहरिचापे ।
रमतां हृदयशिखी मे शिखिवाहबलाहके कृपावर्षे ॥ १९ ॥

शिवगिरिनन्दननिलये मधुरयशोगन्धवासितदिगन्ते ।
मानसमधुव्रतो मे शरदमलचन्द्रे सदा रमताम् ॥ २० ॥

मधुरसवासितवातैः कुसुमालिभिः समाहृतशरीरे ।
मानसमधुव्रतो मे वसतु सदा स्कन्दरूपमन्दारे ॥ २१ ॥

शिवगिरिशिखरोल्लासे वदनद्युतिचन्द्रिकाहृतध्वान्ते ।
करुणामृतधारसाढ्ये गुहचन्द्रे मे मनः सदा रमताम् ॥ २२ ॥

शिवगिरिनाथमुखेन्दोर्ज्योत्स्नापीयूषपायिनौ सुखिनौ ।
यातावनिमिषभावं न तु निर्विण्णौ मदीक्षणचकोरौ ॥ २३ ॥

मदनोद्वेगविधायिनि मधुसौरभमोहितालिपटलवृते ।
रमतां हृदयपिको मे गुहसहकारे विचित्रपत्रयुते ॥ २४ ॥

जय जय शिवशैलपते जय जय धिषणाप्रमेयदिव्यगते ।
जय जय मयूरवाहन जय जय दीनार्तिभञ्जन दयाब्धे ॥ २५ ॥

प्रासैः प्रयासघटितैः कर्णौ किं ते कदर्थयामि विभो ।
मर्षय मे कटुकवितां हर्षय दीनं कटाक्षपातेन ॥ २६ ॥

विरसपदपत्रशकलैः ग्रथिता कथमीश पद्यमालेयम् ।
वरकविमधुमयगीतिस्रग्धरकण्ठस्य ते मनो विनुयात् ॥ २७ ॥

विरसाऽपि नुतिरियं मे हरशैलाधीश करुणयाऽऽद्रियताम् ।
परुषामपि ननु केकां पत्रमयूरस्य मन्यसे मधुराम् ॥ २८ ॥

रौति मयूरो मधुरं किं वा कुकनाकुरासि तयोः प्रीतः ।
विगुणत्वमपि मदीयं सद्गुणत्वं यातु नाथ तव कृपया ॥ २९ ॥

दुःखदवानलमध्ये खिद्यन्तं मां कटाक्षमेघस्ते ।
सुखयतु करुणावर्षैः शिखिताण्डवमातनोतु हृदयं मे ॥ ३० ॥

इति शिवगिरीशस्तुतिः संपूर्णा ॥

श्रीरङ्गस्य श्रीशंकरगुरुकुले श्रीमदप्पयदीक्षितजयन्तीमहोत्सवसभायां (५-१०-१९४१)

श्रीसच्चिदानन्दतीर्थस्वामिभिः कृतस्य

॥ उपन्यासस्य सारांशः ॥

श्रीगुरुभ्यो नमः ॥

अयि भोः सभास्तारः ! श्रीरङ्गं नामेदं वैष्णवक्षेत्रमेवेति सार्वजनीनमेतत् । वैष्णवक्षेत्रे च शिवावतारभूतानां भगवत्पादानां संनिधाने किं निमित्तम् ? तथा शिवावतारभूतानामेव श्रीमदप्पयदीक्षितेन्द्राणां जयन्तीमहोत्सवादेनाचरणस्य वैष्णवक्षेत्र एव समावेशने को नाम हेतुः ? इति विचिकित्सायां बहवोऽत्र बहुधा विप्रतिपद्यन्ते ॥

तत्र केचन वदन्ति— वैष्णवानामपि शिवभक्तिमुत्पादयितुमेव भगवत्पादानामत्र संनिधानम्, दीक्षितेन्द्राणां च दिनाचरणसमावेशनं समभूदिति । तथा हि— सुन्दरतमेऽस्मिन्मन्दिरे अमृतशिलामयपरमरमणीयदिव्यमूर्त्तिरूपेण प्रादुर्भावे सति वैष्णवानामपि कदाचित्तद्दिदृक्षासंभवात्तादृशदिव्यमूर्तिदर्शनादिना तेषामपि शिवभक्तिजननद्वारा तेऽपि कृतार्थीकरणीया इत्यभिप्रेत्यैव भगवत्पादा वैष्णवक्षेत्रेऽस्मिन् संन्यदधुरिति ॥

अन्ये निगदन्ति— विष्णुशिवयोः परस्परं सौहार्दमेव । भक्तानामेव विष्णुशिवयोरन्यतरोत्कर्षसमर्थनाय वृथा कलहः इति सूचयितुमेवेति । अयमाशयः— वैष्णवाः खलु शिवोत्कर्षमसहमाना भागवनादितत्तद्ग्रन्थप्रमाणीकरणपूर्वकं शिवादीनां जीवकोटिप्रविष्टत्वमुपपाद्य विष्णोरेव सर्वेश्वरत्वं सर्वोत्कृष्टत्वं च व्यवस्थापयन्ति । शैवाश्च शिवोत्कर्षप्रतिपिपादयिषया विष्णुब्रह्मादीनां शिवाज्ञापरिपालकत्वेन ततो निकर्ष एवेति बहुविधश्रुतिस्मृतिपुराणाद्यवलम्बनेन शिवोत्कर्षमेव सर्वथा समर्थयन्ति । तदित्थं विष्णुभक्ताः शिवभक्ताश्च स्वस्वमतसमर्थनाय वृथैव कलहायन्ते । अधुना च ब्राह्मणद्वेषिभिरनेकैः सनातनधर्मे सर्वथा पीड्यमाने सति नायं सजातीयकलहः साधीयान् । परं तु मतकलहं विहाय ब्राह्मणजातीयैः सुसंघटितैर्भवितव्यम् । ब्राह्मण्यस्य च मूलभूतस्य सर्वथा रक्षणं कर्तव्यम् । अन्यथा तु परस्परं कलहायमानेष्वस्मासु छिद्रान्वेषिणो विजातीयाः पदाक्रमणेन ब्राह्मण्यमेव समूलमुन्मूलयेयुः । आश्रयपदार्थविरोधे खलु आश्रितानां विरोधो युक्तः स्यात् । यन्निमित्तमयं कलहः, तयोः विष्णुशिवरूपयोरावयोः परस्परं सौहार्दे सत्यस्मदाश्रिता यूयं किमिति कलहायध्वे ? इति बोधयितुमेव शिवावतारभूता भगवत्पादाः स्वयमेव श्रीरङ्गनाथसंनिधौ स्वकीयदिव्यमूर्तिमाविरकार्षुरिति ॥

अपरे तु संगिरन्ते— यात्रिकाणां दर्शनसौकर्यार्थमेवात्र सांनिध्यमिति । दाक्षिणात्यास्तावद्वाराणसीयात्रायामनेनैव मार्गेण जिगमिषन्ति । औत्तराश्च सेतुयात्रायै इदमेव यात्रास्थानमङ्कुर्वन्ति । तदित्थमुभयेऽपि यात्रिका यत्र संमिलन्ति, तत्रैव संमेलनस्थानमेव सर्वभक्तानामनुग्रहाय साधकतमं स्यादिति पर्यालोच्य तदर्थमेव श्रीमद्भगवत्पादाः स्वयमेव वैष्णवक्षेत्रेऽस्मिन् दिव्य-

मङ्गलमूर्त्तिरूपेण प्रादुर्बभूवुरिति । पूर्वोक्तहेतुत्रयेऽपि यादृशो दीक्षितेन्द्रजयन्तीमहोत्सवादिनाचरणस्य वैष्णवक्षेत्रे समावेशनेऽपि पूर्वोक्तहेतुत्रयमेव कारणमिति हि समर्थयन्ति ॥

वयं तु नेदं हेतुत्रयमपि क्षोदक्षमं मन्यामहे, वैष्णवानां विष्णुभक्त्यैव चरितार्थतया अस्मिञ्जन्मनि शिवभक्तेरसंभावितत्वात् ; शैवैर्वैष्णवानां कलहशमनस्य प्रकारान्तरेणापि कर्तुं शक्यत्वात् ; यात्रिकाणां दर्शनसौलभ्यकरणस्य च त्रिभक्षेत्रे जम्बुकेश्वरस्थाने सांनिध्येनापि संभवाच्च । तस्माद्भगवत्पादानामत्र सान्निध्यकरणे, दीक्षितेन्द्राणामत्रैव जयन्तीमहोत्सवादिनाचरणे चात्यन्तमुपपन्नमुचिततरं च किमपि निमित्तान्तरमेव गवेषणीयम् । अन्यथा हि त्रिशिरःपुरे प्रचाल्यमानया संस्कृतसाहित्यपरिषदा वैष्णवक्षेत्रेऽस्मिन्, तत्रापि भगवत्पादसंनिधौ, दीक्षितेन्द्रादिनाचरणं क्रियमाणं कथमुपपन्नं स्यात् ॥

अत्रैवं ब्रूमः । अस्मदाचार्यपादानां सर्वेऽपि ग्रन्थाः सामस्त्येन श्रीरङ्गक्षेत्रस्थश्रीवाणीविलासयन्त्रालयादाविर्भूय यथा प्रचारं प्राप्नुवन्ति, न तथा स्थलान्तरेषु । कुत्र हि नाम समुपलभ्यते शांकरग्रन्थावली सामस्त्येन विना श्रीरङ्गक्षेत्रम् । अतश्च स्वप्राणभूतानां ग्रन्थानां श्रीरङ्ग एव प्रतिष्ठितत्वात्स्वग्रन्थप्रचारस्थले श्रीरङ्गक्षेत्र एव स्वयमपि संनिधाय भक्तजनानां सर्वेषामनुग्रहः कर्तव्य इत्यभिप्रेत्यैव श्रीभगवत्पादा दिव्यमङ्गलविग्रहरूपेण श्रीरङ्गक्षेत्र एवास्मिन्नाविरभूवन् । अयमेव च हेतुर्भगवत्पादानां वैष्णवक्षेत्रसमावेशे इति हि दृढीयान्नः प्रत्ययः । इत्थमेव दीक्षितेन्द्रग्रन्थानामपि भूयसा प्रचारणादेव दीक्षितेन्द्रादिनाचरणमपि संस्कृतसाहित्यपरिषदाऽत्रैव कर्तुं निरणायि ॥

अन्यच्च, भगवत्पादाः स्वग्रन्थप्रचारस्थाने संन्यदधुरिति हेतुना श्रीशंकरगुरुकुलं नाम विद्यास्थानं यथा गुरुभक्तशिखामणिबालसुब्रह्मण्यद्वारा आत्मानमलभत, तथा दीक्षितेन्द्रग्रन्थप्रचारस्थानत्वादीक्षितेन्द्रकुलमिति संज्ञया किमपि विद्यास्थानमत्रैव आविर्भविष्यति वा इति संभावनाया अप्यस्त्येवावकाशः । सर्वथा दीक्षितेन्द्राणां जयन्तीमहोत्सवादिनाचरणं संस्कृतसाहित्यपरिषदाऽत्रैव क्रियमाणं सम्यगेवोपपन्नम् ॥

अस्यां च परिषदि श्रीमदाचार्येन्द्रकृतानिखिलग्रन्थानां मुद्रापणप्रचारणादिना श्रीशंकरगुरुकुलनिर्मापणादिना च भगवत्पादसेवामनवरतमाचरन्तोऽन्वर्थीकृतगुरुभक्तशिखामणिबिरुदाः श्रीमन्तो बालसुब्रह्मण्यार्या अध्यक्षस्थाननिर्वाहार्थं युष्माभिरुपलब्धा इति महदिदं युष्माकं भागधेयम् । संदर्भेऽस्मिन् दीक्षितेन्द्रमाहात्म्यं किंचिदिव वर्णयितुमस्माकमप्यवकाशो लब्ध इति महदेतदानन्दस्थानम् । अतः दीक्षितेन्द्रमाहात्म्यमधिकृत्य किंचिदिव संक्षेपतः प्रस्तूयते ॥

अयि आस्तिकशिखामणयः, विदितचरमेवेदं सर्वेषाम्, यत् धर्मग्लानावधर्माभ्युदये च सति करुणावरुणालयो भगवान् तदा तदा स्वयमवतीर्य साधूनां परित्राणं स्वयमेव करोतीति । साधुपरित्राणं च द्वेधा संभवति, बाह्यरिपूणामुपमर्दनेन, आन्तरवैरिणामुन्मूलनेन च । तत्र रामकृष्णाद्यवतारा भूयसा बाह्यरिपुसमुन्मूलनद्वारैव साधुजनपरित्राणोपयोगिनो बभूवुः । श्रीशं-

कराचार्योद्यवतारास्तु आन्तरारिपुनिबर्हणद्वारैवेति सूक्ष्मधियां नेदं दवीयो नाम । तत्रापि प्रवृत्तिधर्मरक्षणमेव प्रधानोद्देश्यं रामकृष्णाद्यवतारस्य । श्रीशंकरभगवत्पादादीनामवतारस्तु निवृत्तिधर्मरक्षणमेव परमोद्देश्यमाकलयति ॥

श्रीशंकरभगवत्पादादयो हि नियमिमूर्धन्या यथा निवृत्तिप्रधानमाश्रमं परिगृह्य निवृत्तिनिष्ठां स्वयमाचरणपूर्वकं परेभ्योऽपि प्रादीदृशन्, तथैव श्रीमदप्पयदीक्षितेन्द्रादयोऽपि परमेश्वरांशावतारभूता महापुरुषा गृहस्थाश्रमं परिगृह्य प्रवृत्तिमार्गं स्वयमाचरणपूर्वकमितरेभ्योऽपि प्रादर्शयन् । यद्यपि श्रीमन्तो दीक्षितेन्द्रादयो बहूनां वेदान्तनिबन्धानामुपनिबन्धनद्वारा तदधिकारिणां निवृत्तिनिष्ठामपि दर्शयन्ति स्म; श्रीमदाचार्येन्द्राश्च स्वयं निवृत्तिनिष्ठा अपि 'वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयताम्' इत्यादिना प्रवृत्तिमार्गमपि तत्तदधिकारिभ्यः प्रादर्शयन्नेव, तथाऽपि प्रवृत्तिमार्गपरिरक्षण एव दीक्षितेन्द्राणां प्राधान्येन प्रवृत्तिः, निवृत्तिमार्गरक्षण एव श्रीमदाचार्येन्द्राणां प्राधान्येन प्रवृत्तिरिति च नेदमतिपरोक्षं नाम प्रेक्षावतां तदुभयचरित्रविमर्शनव्यसनिनाम् । श्रीमद्भगवत्पादा ईश्वरावतारभूता एवेति विषये 'चतुर्भिः सह शिष्यैस्तु शंकरोऽवतरिष्यति' इति शिवरहस्यवचनं यथा प्रमाणम्, तथैव अंशावतारप्रकरणे तत्रैव 'दीक्षितोऽपि भवेत्कश्चिच्छैवश्छन्दोगवंशजः' इत्यादिवचनं दीक्षितेन्द्राणामंशावतारत्वे प्रमाणं भवति । आङ्गलसंवत्सररीत्या षोडशशताब्द्यामेव श्रीदीक्षितेन्द्राणामवतारः । एतेषामवतारप्रयोजनं च बहुविधमस्ति । गृहस्थधर्माणां साकल्येन स्वयमनुष्ठानपूर्वकं परेषामप्यनुष्ठापनं कृत्वा भगवत्प्रतिज्ञातधर्मसंस्थापनमेकम् । अद्वैतविद्याप्रचारो द्वितीयः । व्याससूत्राणां द्वैतविशिष्टाद्वैतपरतयाऽपि कैश्चिद्योजितानां तत्र स्वारस्यभङ्गमुपपाद्याद्वैतमत एव स्वारस्यातिशयस्य आविष्करणद्वारा शंकरमतस्य पुनः प्रतिष्ठापनम्, शिवपारम्यप्रतिपादनेन शिवभक्तिमार्गप्रवर्तनम्, तथा स्वकीयामानुषचरित्रप्रदर्शनेन नास्तिकानामपि वैदिकमार्गेषु श्रद्धोत्पादनमित्येवमादि । शिवपारम्यप्रदर्शनमपि तेषां न तावन्मात्रे विश्राम्यति, अपि तु परमेश्वरविषयिणीं भक्तिमुत्पाद्य तत्प्रसादलब्धाभ्यामद्वैतवासनाभाविर्भावायितुमेव । इदमपि तैरेव शिवार्कमणिदीपिकाख्ये ग्रन्थे सुस्पष्टमुद्घोषितम्—'यद्यप्यद्वैत एव श्रुतिशिखरगिरामागमानां च निष्ठा साकं सर्वैः पुराणैः स्मृतिनिकरमहाभारतादिप्रबन्धैः ।' 'तथाऽप्यनुग्रहादेव तरुणेन्दुशिखामणेः । अद्वैतवासना पुंसामाविर्भवति नान्यथा ॥' इत्यादिना । अत एव सगुणब्रह्मवादेऽनार्थैव तैः प्रदर्शिता—'शिवं विष्णुं वा यमभिदधति शास्त्रमखिलं विषयं तदिष्टं ग्राह्यं नः सगुणमपि तद्ब्रह्म भजताम्' इति ॥

श्रीमतां भाष्यकाराणामन्तर्गर्भिता आशयविशेषा दीक्षितेन्द्रैर्यथा स्फुटीकृताः, न तथाऽन्यैः । आनन्दमयाधिकरणे हि पुच्छब्रह्मवादसिद्धान्तो यद्यपि श्रीमदाचार्यैः प्रसाधितस्तथाऽपि तदीयवादे सूत्राणि न स्वरसानि, परं तु आनन्दमयब्रह्मवाद एवेति बहूनां स्वरसत एव समुन्मिषन्ती शङ्का दीक्षितेन्द्रैरेव सूत्रस्वारस्यविवरणपूर्वकं समूलमुन्मूलिता । पुच्छब्रह्मवादे असाधारणयुक्तयो भाष्यसूचिता अपि दीक्षितेन्द्रैरेव स्फुटीकृता इति महदुपकृतमत्र दीक्षितवर्यैः । इत्थं बहुविधशङ्कानिराकरणपूर्वकं परिमलन्यायरक्षामण्यादिग्रन्थजातमनुगृहीतवतां तेषामुपकारभरो न

केनापि विस्मर्तुं पार्यते संस्कृतज्ञेन । इत्थं प्रगल्भपाण्डित्यवतामप्येतेषां प्राचीनाचार्येषु तद्वचनेषु वा कतिधा गौरवबुद्धिरासीत्, कियती च विनीतताऽभूदिति च तत्तद्ग्रन्थपरिशीलिनां स्फुटमेव । तदित्थमद्वैतविद्याजीवातुभूतानां श्रीशंकरावताराणां महापुरुषाणामेषां निरन्तरस्मरणेन दिनमेवेदं सुदिनं समजनि । इत्थमेव प्रतिवत्सरमपि दीक्षितेन्द्रपुण्यदिनाचरणेन निरन्तरं तत्स्मरणेन च सर्वे कृतार्थीभवन्तु इत्याशास्यते ॥

॥ काव्येषु धर्मनिरूपणम् ॥

(कल्लिडैक्कुरिचि, व्याकरणशिरोमणि, श्रीवेङ्कटरामशास्त्रिणा श्रीशंकरगुरुकुले कृतः उपन्यासः)

(पूर्वतोऽनुवृत्तः)

नैषधे च श्रीहर्षः नलस्य राज्ञो गुणवर्णनाव्याजेन बहून् धर्मान्निरूपयति । यथा— 'अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः' इति । आदावध्ययनम् पश्चान्मीमांसोबलनार्थावबोधः, ततो धर्मानुष्ठानम्, अनन्तरमितरेषामप्यनुष्ठापनम्' इत्येतैश्चतुर्भिरंशैरेव विद्यायाः पूर्तिमसूसुचत् । एत एव धर्मा आचार्यत्वप्रयोजका भवान्त । 'आचिनोति हि शास्त्रार्थमाचारे स्थापयत्यपि । स्वयमाचरते यस्तु तमाचार्यं प्रचक्षते ॥' इति हि स्मृतिकारा वदन्ति । दानमहिम्नोऽनुवर्णने चायं कविरन्यादृशं कंचन प्रकारमाश्रयति । यथा— लोके तावदेकैकोऽपि मानवो वाञ्छत्यपारमैश्वर्यम् । तत्र गुणदोषान् परं न कोऽपि विचारयति । क्रियमाणे च सम्यक् विमर्शे संपदो विपद एव भवन्ति । कुतः ? पूर्वजन्मसु स्वार्जितेन कर्मणैव सर्वोऽप्यनन्तं भोगमिह जन्मन्यनुभवति । एवं चेदानीमैश्वर्यानुभवेन, महता प्रयासेन प्राग्जन्मसु संचितं सुकृतं किल व्ययीक्रियते । अतः किं कर्तव्यमिति चेत्, इतोऽपि महत्तरसुकृतसंपादकं सत्पात्रदानमनुष्ठाय स्वयमप्यनुभवतु । एवं सति ता एव संपदोऽनन्तरेष्वपि जन्मसु तस्योपकारका भवन्ति इतीममर्थं प्रदर्शयत्ययं श्लोकः— 'पूर्वपुण्यविभवव्ययलब्धाः संपदो विपद एव विमृष्टाः । पात्रपाणिकमलार्पणमासां तासु शान्तिकविधिर्विधिदृष्टः ॥' इति । इतमेव दानस्य महिमानं प्रकारान्तरेणाप्यनुवर्णयत्ययमेव कविः— 'दानपात्रमधमर्णमिहैकप्राहि कोटिगुणितं दिवि दायि । साधुरेति सुकृतैर्यदि कर्तुं पारलौकिककुसीदमसीदत् ॥' इति । लोके तावदल्पकुसीदकामनया, केवलं पत्रे यत्किंचिल्लिखितं विश्वस्य नानोपायैर्महता प्रयासेन संपादितं स्वकीयं वित्तं सर्वमपि यस्मै कस्मैचित्प्रयच्छन्ति । तत्र कुसीदमपि न शतांशादाधिकं लभ्येत । 'वृद्धिमिच्छतो मूलतो हानिः' इते न्यायेन कदाचिन्मूलस्यापि हानिः स्यात् । अनुभवामो वयमिदं सर्वमद्यापि । एवं सत्यपि कुसीदप्रत्याशया पत्रं गृहीत्वा प्रभूतं धनमप्यर्पयामो वयम् । तदेव वित्तं सत्पात्रे दीयते चेदमुष्मिन् लोके तदेव मूलं बहुशतगुणाधिकं भवति । लौकिकव्यवहारे पत्र-

मिवाऽऽपि श्रुतिस्मृत्यात्मकमीश्वरशासनं जागर्ति । ईश्वराज्ञाया नियतत्वान्न कदाचिदपि लोकवत्तत्र मूलं हीयेत । श्रीनीलकण्ठदीक्षिता अपीममेवाभिप्रायमस्मान्वनुकम्पया ब्रुवन्ति शान्तिविलासे—'कृच्छ्रा-लब्धं धनमपि शतांशाधिकप्राप्तिलोभात्पत्रे किंचिल्लिखितमुपलभ्यैव सर्वं त्यजामः । शास्त्रैः सिद्धे बहु-शतगुणाधिक्यलाभे परत्र व्यर्थाशंकाकलुषितमनसो नोत्सृजामोऽर्थलेशम् ॥' इति । अन्यत्र च— 'एष ह्येव साधु कर्म कारयति तं यमुन्निनीषते, एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते' इत्युपनिषद्भिरुपदिष्टमर्थं सम्यगभिप्रदर्शयति महाकविः; यथा— 'पुण्ये मनः कस्य मुनेरपि स्यात् प्रमाणमास्ते यदघेऽपि धावत् । तच्चिन्ति चित्तं परमेश्वरस्तु भक्तस्य हृष्यत्करुणो रुणद्धि ॥' (नैषधं ८–१७) । प्रकृत्या पापकृत्येष्वपि मनः प्रवर्तत एव । परमेश्वर एव स्वभक्तानां मनांसि तस्माद्वार-यति । एवमतिदुरूहा अनेके धर्मसूक्ष्माः, श्रुतिभिः समुपदिष्टाः, स्मृतिभिः प्रतिबोधिताः, काव्येषु सहृदयहृदयंगमया रीत्या अभिप्रकाशिता विराजन्ते । तदित्थं सम्पादयन्तो वाचकवरेण्यानां धर्मा-भिरुचिम्, संपादयन्तश्च स्वस्वोचितेषु धर्मेषु स्वारसिकीं प्रवृत्तिम्, आह्लादयन्तश्च सहृदयानां हृदयम्, समावर्जयन्तश्च विदुषामपि मनांसि, संप्रापयन्तश्च चतुर्विधानपि पुरुषार्थान्, अहो ! कियदिवोपकुर्वन्ति काव्यमणयः । 'चतुर्विधफलप्राप्तिः काव्याद्दल्पधियामपि' इत्याप्ततमानां महर्षीणां सूक्तिरेवात्र प्रमाणं भवितुमर्हति । तस्मात् धर्मप्रचारणफलाकाङ्क्षिण एव महाकवयः काव्यान्येतानि व्यरीरचन्निति संक्षेपः ॥

अभिज्ञानशाकुन्तलानुभवः ॥

मीमांसारत्नं, एम्. ए., बि. एल्., ए. वि. गोपालाचार्येण विरचितः ॥

(पूर्वतोऽनुवृत्तः)

भारतचक्रवर्तिभरतोत्पत्तिः प्रधानफलमेतन्नाटकवस्तुभूतदाम्पत्यस्य । 'दिष्ट्या धर्मपत्नी-समागमेन पुत्रमुखदर्शनेन च आयुष्मान् वर्धते' इति मातलेः सभाजनाक्षराणि सप्तमाङ्के दक्षम-रीचिसंभवदिव्यमिथुनप्रणामावसरे । 'दारकसहिता शकुन्तला वां पादवन्दनं करोति' इति शकु-न्तलावचनं नाटकान्ते । 'आखण्डलसमो भर्ता जयन्तप्रतिमः सुतः' 'अवश्यं ते दीर्घायुर्वत्स उभयकुलनन्दनो भवतु । दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान् । श्रद्धा वित्तं विधिश्चेति त्रितयं वः समागतम् ॥' 'भाविनमेनं चक्रवर्तिनं पुत्रमवगच्छतु भवान् । पश्य । रथेनानुत्सात-स्त्रिभितगतिना तीर्णजलधिः पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः । इहायं सत्त्वानां प्रसभदम-नात्सर्वदमनः पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात् ॥' इत्यादिकं काश्यपोक्तं च भाव्यम् । उपक्रमादारभ्य भाविचक्रवर्तिपुत्रप्राप्तिर्भूयो भूयः प्रस्तूयतेऽत्र नाटके । रामादिपुत्रजन्मप्रयोजकदश-रथाश्वमेधस्मरणेनेदं नाटकमारभ्यत इत्यवधेयम् ॥

'नवेन नाटकेन'। असंकोचन्यायान्नित्यं नवं भूयादिदं नाटकमित्याशयः। सहस्रवार-मनुभूतमपि नवं नवं भूयात्। 'अनाघ्रातं पुष्पं किसलयमलूनं कररुहैरनाविद्धं रत्नं मधु नवमना-स्वादितरसम्...न जाने भोक्तारम्' इति शकुन्तलाविषये दुष्यन्तस्येव नवशाकुन्तलनाटककृति-विषयेऽपि रसिकभोक्तृलाभविषये कवेर्धिन्ताऽपि व्यज्यत इव। 'अचिरप्रवृत्तमुपभोगक्षमं ग्रीष्म-समयम्' इत्यत्रोक्तं नाटककृतिविषयेऽपि सुश्लिष्टम्। 'तदेव रम्यं रुचिरं नवं नवं तदेव शश्व-न्मनसो महोत्सवम्' इति श्रीभागवतान्ते गीतं शुकेन। श्रीभागवतस्य नित्यनवत्वमनोरथो व्यञ्जित इव ऋषिणा काव्यान्ते ॥

'आ परितोषाद्विदुषाम्'। बहुवचनेन अवच्छेदकावच्छेदेन सर्वविदुषां परितोष आशा-स्यते। एकस्यापि विदुषोऽसंतोषं विगानं च न सहेत कविः। 'विदुषाम्'। विदुषामेव परितोष आकाङ्क्ष्यते, न मूढानां परप्रत्ययनेयबुद्धीनाम्। 'आर्यामिश्राः प्रमाणम्' इति मालविकाग्निमित्र-प्रस्तावनायां परिषद्भटकार्यविद्वज्जना नाटककृतेः साधुत्वे प्रमाणीकृताः। सदसद्व्यक्तिहेतवः सन्तः स्वकाव्यं श्रोतुमर्हन्ति इति परीक्षकविद्वच्छ्रवणशोधनादिकमभ्यार्थ्यत महाकाव्यारम्भे। पुरा किल विद्वांसः परिषदि मिलिता नवं काव्यं कवेः पुरतो गायकगीयमानमनुबभूवुः। कविप्रथमपद्धतिं रामायणं कुशीलवकुशलवाभ्यां महातपस्विभ्यां काव्यनायकराजपुत्राभ्यां गीयमानं प्रथममृषिपरि-षदः शुश्रुवुः; कमण्डल्वादिपारितोषिकांश्च परितुष्टाः प्रददुर्गायककुमारेभ्यः। अनन्तरं रथ्यासु राजमार्गेषु च मिलिता जनास्तदशौषुः। चरमं च हैमे महामण्टपे रामराजपरिषत् तत् शुश्राव। 'स चापि रामः परिषद्गतः शनैर्बुभूषया श्रोतृमना बभूव' इति रामो राजा सिंहासनं शनैरुज्झित्वा श्रोतृगोष्ठीजनमध्यमुपससाद। आर्षादिकाव्यश्रवणे सिंहासनस्थत्वमनुचितमिति मत्वा सिंहासन-गतत्वं विहाय परिषद्गतत्वं रोचयामासेव ॥

'परितोषात्'। तोषमात्रेण न संतुष्येत् कविः; परितोषं काङ्क्षति। बलवदिति सर्वत्र अन्वय इष्ट इव कवेः। आ बलवत्परितोषात् आ बलवद्विदुषां परितोषात्, बलवदपि शिक्षितानाम्, आत्मनि बलवदप्रत्ययं चेतः। अत्रोपक्रमे उपात्तो बलवच्छब्दो भूयः पठ्यतेऽस्मिन्नाटके। कवेर्मनसि बलवत्परिवर्ततेऽयं प्रस्तावनाप्रारम्भपठितो बलवच्छब्दः। 'आत-पलङ्घनाद्बलवदस्वस्था शकुन्तला' 'बलवदन्वस्थशरीरा शकुन्तला दृश्यते' बलीयांस्ते तापः' 'बलीओ मे अहिणिवेसो' 'णिग्घिण तवइ बलीयम्' 'बलवदुत्कण्ठितोऽस्मि' 'बलवत्तु दूयमानं प्रत्याययतीव मे हृदयम्' 'बलवदशरणोऽस्मि' 'बलवद्गृहीतोऽस्मि' इति पुनःपुनरिममभ्यस्यमानं पश्यामः। प्रस्तावनानिवेशिताः शब्दा अर्थाश्च गाने पल्लवीवत् भूयः उत्तरत्रानुवर्तन्ते। अत्र प्रस्तावनायां समासेनोक्तमुत्तरत्र व्यस्यते। 'इदं हि विदुषां लोके समासव्यासधारणम्' 'आ अपरितोषात्' इति पदच्छेदोऽप्यभिमत इव कवेः। अतलंबुद्धिरूपापरितोषाकथिकः परितोषः काङ्क्ष्यते। परितोषस्यार्यमाणता प्रार्थ्यते। सप्तमाङ्कारम्भे 'उभयमप्यपरितोषम्' इति मातलि-वचने अपरितोष इत्यस्य अतर्कभाव इत्यर्थः। 'उभयोरप्यपरितोषः' इति च पाठः। तृप्त्य-भावः परितोषराहित्यं। 'यः पिबेत् पुटकेन रामचरितामृतसागरम्। अगस्त्यं मुनिं वन्दे प्राचेत-

समकल्मषम्' ॥ रसघनवस्त्वनुभवे तृप्तता कल्मष इति ध्वन्यत इव तत्र । 'न ततर्ष समायान्तं पश्यमानो नराधिपः' इति देवकुमाररूपकुमारदर्शने दशरथानुभवस्य अतृप्तित्वेन वर्णनमप्यत्र प्रमाणम् । 'भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम्' इति पद्मनाभमुखपद्मविनिःसृतगीतामृतश्रोत्रर्जुनस्यानुभवोऽप्यत्र संवदति । नाटकान्तिमाङ्कनिवेशितमिदं मातलिवचनं प्रस्तावनाप्रथमश्लोकेऽपि आ अपरितोषात् इति पदच्छेदस्य कविहृदयस्थतां बलवत्प्रत्याययतीव । 'वृणीमहे ते परितोषणाय' इति शास्त्रीयकर्मणामारम्भे ईश्वरपरितोषः फलत्वेन आशास्यते । विपश्चिदिति श्रुतिप्रसिद्ध ईश्वरो विद्वत्स्वग्रणीः । अर्थात्तत्परितोषोऽपि नाटकारम्भे आशास्यत इव कविना । 'अन्धीभूय गुणागुणेषु तरवो वातावधूता इव श्लाघन्ते यदि भारतीं रसवतीमज्ञास्ततः किं फलम् । जानन्त्यङ्गथचमत्कृती रसवतीरर्थौचितीरादरादन्तः शर्म यदश्नुते सहृदयः सा जीवनाडी कवेः ॥' इत्युक्तरीत्या सहृदयहृदयान्तस्तोषो जीवनाडी कवेः । अन्तस्तोष अपेक्ष्यते, न वाचा श्लवनम्, यदहार्दमपि भवेत् । को ह्येव कविरन्यात् कः प्राण्यात्, यद्येष विद्वद्धृदयाकाशे आनन्दो न स्यात् । न स्वप्रत्ययमात्रादात्मनि, आत्मकृतिषु च आत्मनः प्रत्ययो भवितुमर्हति । परविद्वत्प्रत्ययनेयबुद्धय एव वयमात्मकृतेः साधुत्वे । परकृतेः साधुत्वेऽस्मत्प्रत्ययः प्रमाणं भवितुमर्हति । अस्मत्कृतेः साधुत्वे तु परविद्वत्प्रत्यय एव प्रमाणम् । 'सर्वः कान्तमात्मानं पश्यति' 'अन्या मध्यस्थचिन्ता हि विमर्दोभ्यधिकोदया' इत्यादिकं भाव्यम् । 'तेन हि पण्डितपरितोषप्रत्ययमात्रा ननु मूढजातिः' इति मालविकाग्निमित्रे विदूषकस्य परिहासोक्तिः । 'मूढः परप्रत्ययनेयबुद्धिः' इति तत्र प्रस्तावनोक्तं न स्वग्रन्थविषयस्वप्रत्ययस्यप्रामाणिकतागमकम् । भावुकाः नाट्यरसाभिज्ञाः भगवद्भजनभावनारसिकाश्च । भावुकसभ्यभक्तपरितोषाय नटति भगवान् नटराजः, नवनीतनटो गोकुलबालो गोपालश्च । 'अवरोपितगोपभूमिकावान् स नटः संप्रति देवकीसुतः सन् । परितोषितभावुकः स्ववृत्त्या श्रुतिलक्ष्यां महतीं प्रियामवेन्दत् ॥' इति यादवाभ्युदये नारदनर्तनगानं वर्णितम् । 'परितोषाद्विदुषाम्' इत्यस्य प्रतिबिम्बनमिव 'परितोषितभावुकः' इति । 'रङ्गे धामनि लब्धनिर्भररसैरध्यक्षितो भावुकैः' इति दशावतारस्तोत्रभूमिकाश्लोकोऽप्यत्र भाव्यः । 'पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः' इति निगमकल्पतरुशाखारूढः शुकः रसिकविद्वद्मन्दानन्दाभिनन्दनमादावेव तानाहूय प्रार्थयते । लयश्च परितोषस्य काष्ठा । आ परितोषात् आ विद्वन्मनोलयम् ॥

'नातिचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयताम्' । नातिचिरप्रवृत्तं नवं नाटकमुपभोगक्षमे ग्रीष्मसमये प्रथमं नाटयितव्यम् । नवावतीर्णो ग्रीष्मसमयः । प्रवृद्धस्य ग्रीष्मस्य नोपभोगक्षमता । अस्मिन्नाटके अङ्कचतुष्टये ग्रीष्मसमयो वर्तते, षष्ठे वसन्तः । ग्रीष्मसमयस्य अस्मिन्नाटके भूयोऽधिकृतत्वम्, अनुस्यूततया आपञ्चमाङ्कमनुवर्त्यमानत्वम्, व्यज्यत इव अधिकृत्य शब्देन । नटीं प्रति ग्रीष्मसमयमधिकृत्य गाननिदेशः प्रस्तावनायां कृतः कविमपि नाटके ग्रीष्मसमयमधिकृत्य गातुं नियोजयतीव । स्वकल्पितसूत्रधारमुखेन आत्मानमपि अत्र अस्य नाटकस्य भूयोभागे ग्रीष्मसमयमधिकृत्य गातुं नियुङ्क्ते इव । 'शब्दानुशासनमधिकृतं वेदितव्यम्' इति महाभाष्यवाक्यप्रयुक्तं अधिकृतशब्दमत्र स्मरतीव कविस्तदर्थं

च्छन्दं प्रयुञ्जानः । पाणिनिसूत्रेषु अधिकारशब्दः प्रसिद्धः । यद्यदत्र प्रस्तावनायां सूत्रधारमुखेन निगद्यते कविना, तत्सर्वं वर्तिष्यमाणस्य नाटकनिबन्धस्य सूत्रमिव भवति । नाटकाङ्कसप्तकमपि भाष्यभूतमिव प्रस्तावनायां सूत्रधारप्रयुक्तसूत्रकल्पनिगदानाम् । शाकुन्तलनाटकसूत्रधारः सूत्रकारसदृशः । 'स्तनन्यस्तोशीरं प्रशिथिलमृणालैकवलयं प्रियायाः सावाधं ह्रदपि कमनीयं वपुरिदम् । समस्तापः कामं मनसिजनिदाघप्रसरयोर्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु ॥' इत्यादिकं वर्तिष्यमाणं कविगानमिह भाव्यम् । तापकत्वरूपापराधे समानेऽपि ग्रीष्ममदनयोः, मदनेन सुभगमपराध्यते युवतिविषये । मदनस्य अपराधोऽपि सुभगो न दुर्भगः । ग्रीष्मस्य तु 'सलिलावगाहेषु पाटलिसंसर्गसुरभिवनवातेषु प्रच्छायनिद्रासु' इति कतिपयांशेष्वेव सुभगत्वं भूयोंशेषु तस्य दुर्भगत्वमेव इति निपुणं व्यञ्जयतीव कविः ग्रीष्मविषयश्लोके सुभगशब्दस्य प्रथमनिवेशनेन ॥

संसारतापत्रयार्तानां शान्ते आश्रमपदे समस्ततापनिर्वापणं लभ्येत । यद्यपि मदनतापः सुभग इव भवति अस्य नाटकनायकस्य स्वयौवने विषयैषिणः, भवभवानीकटाक्षेण मदनतापादिसर्वभवतापोपशमभूतापुनर्भव एव पुरुषार्थकाष्ठात्वेन सुदृढमाशास्यतेऽनेनैव नाटकान्ते 'ममाप्ययं क्षपयतु नीललोहितः पुनर्भवम्' इति सर्वतापक्षयरूपब्रह्मनिर्वाणप्रार्थनेन । परमनिर्वाणाशासनं क्रियते कविना स्वकृते नाटकनिर्वहणे । भोगरसेषु गाढं निमज्ज्य तत उन्मज्ज्य परिणामे तीव्रविरागिणौ मोक्षकाङ्क्षिणौ भवत इमौ लोकोत्तरौ नाटकनायकदंपती इति कवेर्निपुण उपदेशः; यः स्पष्टीकृतो रघुवंशमहाकाव्यारम्भे यौवने विषयैषिणाम् । वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥' इति । यदुक्तं रघूणां विषये तत्तुल्यं पुरूणामपि । मुमुक्षूणां शमदमादिसाधनसंपन्नानां न कोऽपि भेदो ग्रीष्ममदनतापयोः । उभयोरपि दुर्भगत्वमेव तेषाम् । तत्रापि मदनस्य दुर्भगत्वमैकान्तिकमात्यन्तिकं च । 'असक्तः सुखमन्वभूत्' इति गायता अनेन कविना धर्माविरुद्धकामानुभवमार्गः सम्यक् प्रदर्श्यते । 'असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु' इति गीतं भगवता । 'असक्ति.' इत्युपदिष्टा असक्तिः न सार्वत्रिकी; पुत्रदारगृहादिष्वनभिष्वङ्गमात्रमलम् । न तत्र सङ्गात्यन्ताभावो निर्बध्यते, धर्माविरुद्धस्य कामस्य अहं सोऽस्मि इति भगवत्प्रशस्तत्वात् ॥

अस्मिन्नाटके नायिका शकुन्तला शैशवे अभ्यस्तशमधर्मिणी । तपोवनसंवर्धितायाः शान्तशान्तायाः शकुन्तलायाः सहधर्मचरीत्वं वानप्रस्थाश्रमनिर्वहणे ध्रुवं नायकस्य उपकुर्यात् । 'स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः प्रतिदिनमथवा ते वृत्तिरेवंविधैव । अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं शमयति परितापं छायया संश्रितानाम् ॥' इति वर्णयिष्यमाणं छायापादपौपम्यं ग्रीष्मसमये स्फुटावगमम् । छायावृक्षो नायकः प्रजानां परितापं शमयति ॥

'ग्रीष्मे राजन्यः' इति अग्न्याधानस्य ग्रीष्मसमयो विहितः कालः क्षत्रियस्य । शकुन्तलया पत्न्या सह आहिताग्निना राज्ञा बहवो यज्ञाः करणीयाः । 'त्वमपि विततयज्ञः स्वर्गिणो भावयाज्यम्' इति काश्यपेन आदिश्यते नाटकान्ते । 'वहति विधिहुतं या हविः' इति नाटकारम्भे

यज्ञहोमादिभिरुपक्रम्य विततयज्ञः स्वर्गिणोऽलं साधय' इति यज्ञवितानेन देवताभावनोपवेशेन चोपसंहियते देवानां चाक्षुषक्रतुभूतं कान्तमिदं नाटकम् । मध्ये च भूयान् यज्ञादिप्रस्तावः 'सायन्तने सवनकर्मणि संप्रवृत्ते' इत्यादिश्लोकेषु ॥

'उपभोगक्षमम्' । अत्र भूमिकायां कीर्तितस्योपभोगक्षमत्वस्योत्तरत्र मध्ये मध्ये विचार्यमाणत्वं पश्यामः । शकुन्तलाया उपभोगक्षमत्वं भूयो मीमांस्यते परिणयात्पूर्वं परं च । 'वट्टफलदाए उवभोगक्खमो एसो बाल सह आरो' इति शकुन्तला वक्ति प्रथमाङ्के । बालसहकारान्तरितस्तत्रावस्थितो भावी शकुन्तलाया उपभोगक्षमः सहकारी युवा । अविदिततया तमपि कान्तसहकारतरुमाश्रयिष्यमाणं सूचयति तस्या वाक् । 'असंशयं क्षत्रपरिग्रहक्षमा' इति शङ्कापूर्वकं शकुन्तलायाः स्वोपभोगक्षमत्वं निर्णीयते राज्ञा । 'आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्' इति तृतीयाङ्के शङ्कोत्तरं निश्चीयते । 'इदमुपनतमेतद्रूपमक्लिष्टकान्ति प्रथमपरिगृहीतं स्यान्नवेत्यव्यवस्यन् । भ्रमर इव निशान्ते कुन्दमन्तस्तुषारं न च खलु परिभोक्तुं नापि शक्नोमि हातुम्' इत्यादिकं भाव्यम् । उपभोगक्षमत्वकीर्तनं तन्मीमांसनं उत्तरत्र च भूयो वर्तिष्यमाणमत्र उपोद्घाते सूत्रभूतपदेनानेन सूत्रकारमुखेन निपुणं सूच्यते कविना । 'सूचनात्सूत्रम्' इति सूत्रपदं निरुच्यते वेदान्तग्रन्थेषु । 'बह्वर्थसूचनात्सूत्रम्' । नाटकान्ते अपुनर्भवरूपमोक्षस्यैव ज्ञानिनां उपभोगक्षमत्वं इति मुमुक्षुदशापन्नेन नायकेन अवसीयते । स्त्रीरत्नभूतशकुन्तलाकामुकेन चिरविरहितया प्रियतमया लोकोत्तरपुत्रकेण सहेदानीमेव संयोजितत्वेन प्रमोदकाष्ठामनुभवता मयाऽपि, ईश्वरदम्पतिप्रसादलभ्य अपुनर्भव एव भृशं काङ्क्ष्यते इति व्यज्यते नाटकान्ते ममापि इति । एतन्नाटकान्तो वेदान्तसंमितः, गीतासंमितश्च । 'परिणामरमणीयाः' इति तस्यापि सूचनं क्रियत इव कविना । किमन्यद्रमणीयतरमस्ति ततः ॥

'सुभगसलिलावगाहाः' । अभिधावृत्त्या व्यञ्जनावृत्त्या चापेक्षितबह्वर्थसमर्पकोऽयं श्लोकः । ग्रीष्मसमये उपभोगक्षमामनोज्ञा अंशा वाच्यवृत्त्या समर्प्यन्ते । यस्मिन् क्षेत्रे शकुन्तला अजायत, यत्र तस्याः परिणयो निर्वृत्तः, यत्र च कान्तेन सह तया द्वित्रा मासाः सुखमतिवाहिताः, तत्काश्यपतपोवनमप्यनेन श्लोकेन वर्णितं भवति । अनुमालिनीतीरमाश्रमः । प्रच्छायकुसुमफलवृक्षषण्डमण्डितं काश्यपतपोवनं सुरभिशीतवनवातसेवितम् । मालिनीतरङ्गाणां कणवाहिना अरविन्दसुरभिणा पवनेन सेव्यते काश्यपाश्रमः श्रमनाशनः । 'सुखशीतः सुगन्धिश्च पुष्परेणुवहोऽनिलः' 'विवृद्धविटपैर्वृक्षैः सुखच्छायैः समावृतम् । षट्पदाघूर्णिततलं लक्ष्म्या परमया युतम् ॥' 'मारुतान्दोलितास्तत्र द्रुमाः कुसुमशोभिनः । पुष्पवृष्टिं विचित्रां व व्यसृजंस्ते पुनः पुनः' ॥ इति भारतदृष्टं कण्वतपोवनवर्णनं ध्रुवमत्र स्मर्यते कविना । तपे दिनान्तो रमणीयः, दिनारम्भश्च सलिलावगाहैः सुभगः । दिनमध्यं च प्रच्छायानां तरूणामधः सुलभया निद्रया सुभगम्, मध्याह्ने नदीतीरवनेषु सुरभिवनवातैरासेव्यत्वमपि सुभगं भवति ॥

अस्मिन्नाटके प्रथमाङ्कादारभ्य अङ्कचतुष्टयं काश्यपाश्रमे भवति । सप्तमाङ्कोऽपि सगोत्र-

काश्यपाश्रमे भवति । तत्रैव नाटकनिर्वहणं दृश्यते । पञ्चमषष्ठाङ्कौ हास्तिनपुरे भवतः । तत्रापि षष्ठोऽङ्कः उद्यानवने भवति ॥ 'सुभगश्चित्रकूटोऽयं' इति सीतारामनिवासभूत आश्रमो वर्ण्यते भरतमुखेन आदिकविना । अत्र सुभगपदेन कण्वाश्रमसंनिवेशवर्णनमुपक्रमते कविः । अन्यच्च स्वारस्यमभिप्रेयते कविना सुभगपदनिवेशनेन । हेमन्तवर्णने आदिकविः काव्यमार्गदर्शी 'छायासलिलदुर्भगाः', जलान्यनुपभोग्यानि, 'सुभगो हव्यवाहनः' इति गायति । तद्भानं मनसि निधायावानुगानं क्रियते कविनेति सुस्फुटम् । हेमन्ते छायासलिले दुर्भगे, शीतातुराणां हव्यवाहः सुभगः । ग्रीष्मे छायासलिले सुभगे, सुभगाः वनवाताः । ग्रीष्मे सुभगसुभगाः सलिलावगाहाः, नदीतीरवनसुगन्धिवाताश्च, सुसुखनिद्राप्रदायितरुच्छायानि च सुभगसुभगानि । 'दृश्यते हि जाह्नवीह्रदनिमग्नानां सर्वाङ्गशैत्योपलब्धिः, निदाघसमये च सकलशरीरपरितापोपलब्धिः', इति श्रीशांकरसूत्रभाष्यम् । 'रम्यान्तरः कमलिनीहरितैः सरोभिः' इति श्लोकोऽप्यत्र भाव्यः ॥

प्रकृतनाटकवस्तुविषयेऽपि अयं सुभगश्लोकः सुश्लिष्टः । सुभगाः भोगस्रोतोवगाहाः सुभगसलिलावगाहाः ॥ 'रमणीयः खलु नवाङ्गनानां मदनविषयावतारः' इति मालविकाग्निमित्रे । 'सूते शैशवयौवनव्यतिकरो गात्रेषु ते सौरभम् भोगस्रोतसि कान्तदोशिककरग्राहेण गाहक्षमः' इति श्रीगुणरत्नकोशे भोगस्रोतसि कान्तदोशिककरग्राहेण लक्ष्म्याः अवगाहनं विचित्रं वर्णितम् । सलिलं भोगरसस्रोतः । दम्पत्योः भोगरसस्रोतोवगाहस्य सौभाग्यं द्योत्यते सुभगपदेन । 'धर्मविरुद्धकामोऽस्मिन्भरतर्षभ' इति असङ्गैकान्तो भगवानपि तादृशधार्मिककामे स्वत्वं अभिमनुते । सुरभिवनवाताः भोगानुकूलाः रतिश्रान्त्यपक्रान्तिहेतवः । 'श्रीमल्लताभवनमौषधयः प्रदीपाः, शय्या नवानि हरिचन्दनपल्लवानि । अस्मिन् रतिश्रमनुदश्च सरोजवाताः स्मर्तुं क्षमन्ति न दिवः सुरसुन्दरीभ्यः ॥' 'रुचिरपल्लवपुष्पलतागृहैरुपलसज्जलजैर्जलराशिभिः' । 'रमयति संततमुत्सुकतामयं धृतिमतीरुपकान्तमपि स्त्रियः' इति भारवेः हिमवद्गिरिप्रान्ततपोवनवर्णनम्, 'विकचकमलगन्धैरन्वयन्भृङ्गमालाः सुरभितमकरन्दं मन्दमावाति वातः । प्रमदवनमाद्यद्यौवनोद्दामरामारमणरभसखेदविच्छेददक्षः ॥' 'परिमलरुचिराभिर्न्यक्षतास्तु प्रभाते, युवतिभिरुपभोगान्नीरुचः पुष्पमालाः' इति माघे प्रभातवर्णनम्, 'सेव्यमानौ सुखस्पर्शैः सालनिर्यासगन्धिभिः । पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः' इति दिलीपसुदक्षिणयोः वसिष्ठाश्रमयानमार्गे सुगन्धिवनवातसेव्यमानत्ववर्णनम्; 'उद्यानायातविद्याधरमिथुनरतिश्रान्त्यपक्रान्तिहेतुः तिम्यद्वास्तुषारैः सुरयुवतिनिश्वासविश्वासभूमिः । नीहारस्त्विट्कलङ्कप्रतिबदनपदन्यस्तकस्तूरिकोद्यन्नेपाली-डपालीपरिमलमिलितः स्पन्दते मन्दवातः' इति संकल्पसूर्योदये नेपालवनवर्णनम्, 'इमामुमां वेलां प्रायेण लवावरुपवरुमालिनीतीरेषु सखीजना शकुन्तला गमयति, तत्रैव तावत् गच्छामि ॥'

(क्रमशः)

पठिताद्भवतेः 'जगितश्च' इति ङीपि नदीह्रस्वः । अथ वा, भवं संसारं भक्तजनानां कल्याणं वा तनोतीति भवती, संसारस्य कल्याणस्य वा कल्पिकेत्यर्थः । भवं शिवं तनोति समर्थमिति वा भवती । भवस्य संसारस्य कल्पनाद्वा भवती । तनोतेरौणादिको डिप्रत्ययः । ततः 'कृदिकारादक्तिनो ङीष्वा वक्तव्यः' इति ङीष्, नदीह्रस्वः । तस्याः संबुद्धिर्हे भवति । निराकारस्यापि परमेश्वरस्य जायाभावापत्त्यादिसंसारकल्पिके देवि । उक्तं चाचार्यैः सकलजननीस्तवे— 'सुता दक्षस्यादौ किल सकलमातस्त्वमुदभूः सदोषं तं हित्वा तदनु गिरिराजन्यतनया । अनाद्यन्ता शंभोरपृथगपि शक्तिर्भगवती विवाहाज्जायाऽभोत्यहह तव को वेत्ति चरितम् ॥' इति । शिवः, असङ्गत्वात्प्रकृतिमलैरनाक्रन्दितानन्तसुखचिन्मात्ररूपः । अथ वा, शेतेऽनेनेति शिवं कल्याणम् । 'शीङ् स्वप्ने' इति धातोरौणादिको वन्प्रत्ययो ह्रस्वश्च निपातनादिति व्याख्यासुधाकारः । तदस्यास्तीति शिवः कल्याणगुणाकरः शंकरः, 'अथ वाऽशेषकल्याणगुणैर्युक्तः स ईश्वरः । शिव इत्युच्यते सद्भिः शिवतत्त्वार्थवेदिभिः ॥' इति पुराणवचनात् । अथ वा, शिवमस्त्यस्याः, शिवो वाऽस्ति भर्तृत्वेनास्याः, शेते हरिहररुद्रेश्वरभूतस्थट्टायां कशिपुरूपे सदाशिव इति वा, शिवाऽत्यानुकूल्यवती सर्वमङ्गलात्मिका गौर्यस्यास्ति पत्नीत्वेनेति शिवः, 'उमासहायं परमेश्वरं विभुम्' 'न शिवेन विना शक्तिर्न शक्तिरहितः शिवः' 'उमाशंकरयोरैक्यं यः पश्यति स पश्यति' इति श्रुतिस्मृतिभ्याम् । अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययः । 'शिवं भद्रं शिवः शंभुः शिवा गौरी शिवाऽभया' इति शाश्वतः । अत्रादौ शक्तिसाहित्येनैवेश्वरस्य नामापि श्रूयते । अन्यथा नेति वक्ष्यमाणशक्तिप्राधान्यप्रतिपादनाय तत्साहित्येनैवाऽस्मिन्ध्यात इष्टार्थसिद्धिरितरथा नेत्युमासहायमित्यादिश्रुतितात्पर्यं पर्यालोचयद्भिर्भगवत्पादैस्तयोरत्यानुकूल्यसूचको निगूहितभागवततत्त्वः शिवशब्द एव गूढाभिसंधिना प्रयुक्त इत्यवगन्तव्यम् । आहुश्च पौराणिकाः— 'तस्मात्सह तया शक्त्या हृदि पश्यन्ति ये शिवम् । तेषां शाश्वतिकी सिद्धिर्नेतरेषामिति श्रुतिः ॥' इति । उक्तं चाम्बास्तवे— 'अज्ञातसंभवमनाकलितान्यवाचं भिक्षुं कपालिनमवाससमद्वितीयम् । पूर्वं करग्रहणमङ्गलतो भवत्याः शंभुं क एव बुबुधे गिरिराजकन्ये ॥' इति । अथ वा, वशते कामयते, वष्टि प्रकाशत इति वा शिवः । कामनार्थाद्दीप्त्यर्थाच्च वशतेरर्शआद्याचे वर्णव्यत्ययेन रूपसिद्धिः । यदाहुः शब्दाभियुक्ताः— 'हिंसिधातोः सिंहशब्दो वश कान्तौ शिवः स्मृतः । वर्णव्यत्ययतः सिद्धः पश्यकः कश्यपो यथा ॥' इति । अथ वा, मनुष्याणां शिवमिच्छति, भक्तजनाञ्छिवयतीति वा शिवः । 'तत्करोति' इति ण्यन्तात्पचाद्यच् । एवम् 'समेधयति यज्ञित्यं सर्वार्थानामुपक्रमम् । शिवमिच्छन्मनुष्याणां तस्माद्देवः शिवः स्मृतः ॥' इति भारते । अथ वा, शेरतेऽस्मिन्मुनिमनांसीति शिवः, 'सर्वनिघृष्वरिष्वलष्वशिव—' इत्यादिना औणादिको वन्प्रत्ययान्तो निपातः । यद्वा, शेते सुखेन बिन्दुरूपेण त्रिकोणे षड्विंशकत्वात्मकत्वादिति शिवः । यद्वा, 'शिः शंभौ शिवशान्त्योः' इति नानार्थात् शीन् शान्तान्, 'शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च । ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥' इति गीतासूक्तत्वात् शीन् शमदमादिसंपन्नान्ब्राह्मणान्वाति 'ब्राह्मणो भगवान्रुद्रः' इति स्मृतेः, स्वयमपि ब्राह्मणत्वेन भक्तवत्सलतया तदाधिपत्यं प्राप्यागच्छतीति

शिवः, 'सोमोऽस्माकं ब्राह्मणानां राजा' इत्यादिश्रुतेः । 'वा गतिगन्धनयोः' इति धातोः 'आतोऽनुपसर्गे कः' इति कप्रत्ययः । यद्वा, 'रुद्रो वा एष यदग्निस्तस्यैते द्वे तनुवौ घोराऽन्या शिवाऽन्या' इति श्रुतेः शिवाख्याऽनुग्राहिका तनुरस्यास्तीति शिवः, 'या ते रुद्र शिवा तनूरघोराऽपापकाशिनी' इति श्रुतेः । एवंविधः परमेश्वरः । शक्नोति कार्यनिष्पादन इति शक्तिः, तया । केवलचितो विकारराहित्यात्कारणत्वासंभवात्तदभेदाध्यासेन नियमेन तत्परतन्त्रतया देवस्य सर्वजगदुत्पत्तिस्थितिलयकारणत्वनिर्वोढृतया वर्तमानत्वाच्छक्तिशब्दाभिधेयया ऽऽवरणविक्षेपात्मिकया मायया, 'ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम्' इति श्रुतेः । युक्तो यदि, ऐन्द्रजालिको मन्त्रादिभिरिव संयुक्तश्चेत्तर्हि प्रभवितुं प्रकर्षेण भवितुं, 'आत्मन आकाशः संभूतः' इति श्रुतेः । आकाशादिप्रपञ्चं निर्मातुं तद्रूपेणावस्थातुं वा शक्तः समर्थः शक्तिमांश्च भवतीत्यभिसंधिः । यदिरेवकारार्थो वा । युक्त एव शक्त इत्यर्थः । एतेन वादिभिरभिमताः कालस्वभावनियत्यादीनां जगत्कारणत्ववादाः परास्ताः । तथा च श्रुतिः— 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम् । संयोग एषां न त्वात्मभावात्' इति । 'स ईक्षत बहु स्यां प्रजायेयेति' 'सोऽकामयत बहु स्यां प्रजायेयेति' 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिश्रुतिभ्योऽविद्याशबलितस्यैव जगन्निर्माणशक्तत्वादिति भावः । उक्तमेवार्थं व्यतिरेकमुखेण द्रढयति— नेत्यादि । एवं न चेत् एवंप्रकारया शक्त्या युक्तो न यदि, दीव्यति क्रीडतीति देवः नानाविधप्रपञ्चसर्जनक्रीडनेच्छावानिति भावः । अत एव कामनाक्रीडार्थकयोः शिवदेवपदयोरन्वयव्यतिरेकोपात्तयोर्न पार्थक्यं पौनरुक्त्यापत्तिश्चेति मन्तव्यम् । किं चैतेन 'लोकवत्तु लीलाकैवल्यम्' इति न्यायसिद्धोऽर्थो नित्यमुक्तस्यापि परमेश्वरस्य जगन्निर्मातृत्वनियन्तृत्वादिकं सर्वं निरभिसंधिकमेव लीलारूपम्, यथा समस्तसुखासक्तस्य प्रभोर्मृगयादिविलास इति सूचितः । तथा च श्रुतिः— 'क्रीडार्थं सृष्टिरित्यन्ये भोगार्थमपि चापरे' इति । स्मृतिरपि 'क्रीडतो बालकस्येव चेष्टां तस्य निशामय' इति । स्पन्दितुं किंचिच्चलितुमपि, सृष्ट्यादिकं तु दूरापेतमिति भावः । 'स्पदि किंचिच्चलने' इति धातुः । न कुशलो न समर्थः । खल्वित्यवधारणे संभावनायां वा । तथा निश्चीयते संभाव्यते चेत्यर्थः । 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥' इति श्रुतेः । 'निषेधवाक्यालंकारजिज्ञासानुनये खलु' इति कोशादस्य नञर्थकताङ्गीकारे शक्तिसंयोगे स्पन्दितुं समर्थ एवेत्यभिसंधिः । 'निर्विकल्पो निरञ्जनः' 'आकाशवत्सर्वगतश्च नित्यः' इति श्रुतेर्निराकारस्वापरिच्छिन्नस्य विभोरीश्वरस्य परिच्छिन्नपदार्थवृत्तिस्पन्दनायोगात्; 'तमेकनेमिं त्रिवृतम्' इत्यादिश्रुतेः, इति वेदान्त्यभिमतोऽर्थः ॥

शिं स्वप्नं वाति गच्छतीति व्युत्पत्त्या शिव उदासीनोऽस्वतन्त्रः । यद्वा, उपदेशेन वाति ब्रह्मादीनिति शिवः, 'स पूर्वेषामपि गुरुः कालेनानवच्छेदात्' इति योगसूत्रात्पुरुषविशेषः परमेश्वरः 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' इति योगसूत्रनिर्दिष्टः, शक्त्या समर्थया 'अजामेकाम्' इत्यादिश्रुतिप्रतिपाद्यया सत्त्वरजस्तमोगुणात्मिकया प्रकृत्या युक्तो यदि, अन्धपङ्गुन्यायेन मिलितश्चेत्, तर्हि प्रभवितुं तत्साहित्यात्स्वयमपि स्रष्टृत्वादिव्यवहारं प्राप्तुं भोगा-

नन्वुभवितुं चेत्यर्थः । 'अर्थवती हि सा, न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिध्यति, शक्तिविरहितस्य प्रवृत्त्यनुपपत्तेः' इति सांख्यशास्त्रीयोक्तिभिरिति भावः । सत्त्वरजस्तमोगुणात्मिका प्रकृतिरेव क्लेशकर्मविपाकाशयैरपरामृष्टं पुरुषशब्दवाच्यमीश्वरमधिष्ठाय महदहंकारपञ्चतन्मात्रादिक्रमेण जगत्सृजति, बीजमिव संस्कृतं क्षेत्रमधिष्ठायाङ्कुरादिक्रमेण वृक्षादि । पुरुषस्तूदासीन एव वर्तत इति सांख्यसिद्धान्तः । आहुश्च— 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥' इति । एवं न चेत् प्रकृतियुक्तो न यदि तर्हि, दीव्यति जडप्रकृतिकत्वात्स्वपिति प्रकृत्याऽन्धपङ्गुन्यायेनाधिष्ठितः सन् गच्छतीति वा देवः पुरुषः, क्रीडार्थेषु दीव्यतेरनुशासनात् । स्पन्दितुं किंचिदपि कर्तुं न कुशलः खलु समर्थो न भवत्येव, उदासीनत्वादिति सांख्यमतोऽर्थः ॥

एतद्ग्रन्थप्रतिपाद्यसांख्यमतानुसारिदेवतापक्षीयार्थस्तु— शिवः सकलकल्याणगुणाकरः, 'माया च शुद्धविद्या च महेश्वरसदाशिवौ । तस्याः पतिर्ब्रह्मरूपी स्वयं साक्षात्सदाशिवः ॥' तत्र 'कशिपुश्च सदाशिवः' इति वचनात्पञ्चविंशतितत्त्वात्मा परमेश्वरः कशिपुत्वेन प्रतिपाद्यः, 'तन्मध्ये बैन्दवं स्थानं तत्रास्ते परमेश्वरी । सदाशिवेन संयुक्ता' इति वचनाद्बैन्दवस्थानगतः 'संहारश्च हरायत्त उत्पत्तिर्भवनिर्मिता । रक्षा तु मृडसंलक्ष्या सृष्टिस्थितिलये शिवः । नियुक्तः परमेशान्या जगदेवं प्रवर्तते ॥' इत्यागमात्सृष्ट्यादिनियुक्तभवमृडहराणां महेश्वरस्य च कारणभूतः सदाशिवः कैलासवासी परमात्मा । अत एव नोत्तरवाक्यस्थहरपदेन पौनरुक्त्यम् । शक्त्या, 'श्रियं लक्ष्मीमौपलाम्बिकां गां षष्ठीं जयामिन्द्रसेनेत्युदाहुः' इत्यायुष्यसूक्तसहकृत, 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ' इति श्रुत्युपबृंहित, 'तस्याङ्कमण्डलारूढा शक्तिर्माहेश्वरी परा । महालक्ष्मीरिति ख्याता श्यामा सर्वमनोहरा ॥' इत्यादिशैवपुराणप्रसिद्धया 'पराऽस्य शक्तिर्विविधैव श्रूयते' 'आविरासीन्महादेवी गौरी गिरिवरात्मजा' इति श्रुतिस्मृतिनिर्दिष्टाभिधेयया स्वस्य जायाभावमापन्नया समर्थया हैमवत्या युक्तो यदि संयुक्तश्चेद्विहरमाणो यदि तर्हि प्रभवितुं प्रकृष्टो भवितुं प्रपञ्चनिर्माणरूपसंतानं कर्तुं प्रभूभवितुं च शक्तः समर्थः । शक्तिः शक्ता वा देव्यस्यास्तीति वा शक्तः शक्त्यभिन्नश्चेति तयोरविनाभावो वाऽर्थः, 'शक्तिशक्तिमतोर्भेदं वदन्त्यपरमार्थतः । अभेदमनुपश्यन्ति योगिनस्तत्त्वचिन्तकाः ॥' इति कौर्मोक्तेः; जायासंयुक्तलौकिकपुरुषवदेवेति भावः । अत्र त्वया युक्तश्चेत्प्रभवितुं शक्त इति वक्तव्ये शक्त्या युक्तो यदीति पारोक्ष्योक्तिस्तस्याः शक्तिपदसूचितसामर्थ्यातिशयद्योतनार्थेत्यवगन्तव्यम् । इदं चासंदिग्धे संदिग्धवचनं स्थूणानिखननन्यायेनेशस्य तत्साहित्यदृढीकरणार्थम्; 'वेदाः प्रमाणं चेत्' 'यदि प्रविशेत्··· चरित्वा प्रविशेत्' इत्यादिना लोकवेदयोः प्रसिद्धत्वात् । उक्तं च शाबरभाष्ये— 'संनिपातश्चेद्यथोक्तमन्ते स्यात्' इति सूत्रव्याख्यानावसरे 'नन्वयं संनिपात एव व्यक्तमसंदिग्धे संदिग्धवचनमेतद्यथा— ईजाना बहुभिर्यज्ञैर्ब्राह्मणा वेदपारगाः । शास्त्राणि चेत्प्रमाणं स्युः प्राप्तास्ते परमां गतिम् ॥' इति । प्रायुङ्क्त च श्रीभोजः— 'उच्चैर्गतिर्जगति सिध्यति धर्मतश्चेत्' इति । शक्तियुक्त एव शक्त इत्यर्थः । 'सा शिवा परमा देवी शिवाभिन्ना शिवंकरी । जगत्कारणतापन्ना शिवोऽयं मुनिसत्तमाः ॥' सा

तस्यापि भवेच्छक्तिरूपया हीनो निरर्थकः ।' इत्यारभ्य 'एषा सा साक्षिणी शक्तिः शंकरस्यापि शंकरी । शिवाभिन्नस्तया हीनः शिवः साक्षान्निरर्थकः ॥' इत्यादिसूतसंहितोक्तिरिति भावः । लौकिकजायापतिशक्तिदृष्टान्तशक्तियुक्तत्वसाधनाभ्यां शिवस्य जगत्सर्गसाधकानुमानेऽनुकूलतर्कमाह— **न चेदिति** । एवं न चेन् जायया शक्त्या युक्तो न यदि देवोऽपि जगत्सर्जनसमर्थोऽपि, देवमस्यास्तीति देव इति व्युत्पत्त्येन्द्रियबलवानपीत्यभिसंधिः । 'देवमाख्यातमिन्द्रियम्' इति विश्वः । स्वयंप्रकाशस्वरूपः क्रीडापरतन्त्रो वा स्पन्दितुं चलितुं संततसृष्ट्युत्पादनपोषणलेशमपि विधातुं च न कुशलः शक्तः । कुशलमस्यास्तीति कुशलः क्षेमवांश्च कल्याणरूपोऽपि न, ब्रह्मचारिबद्धिधुरवदेव वेति भावः । अत्र 'सोमः पवते जनिता मतीनां जनिता पृथिव्या जनितोताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः' इत्यादिश्रुतिषु उमया सहितः सोम इति व्युत्पत्तेः 'सृष्टिस्थितिविनाशानां हेतुभूते सनातनि । गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥' इति देवीमाहात्म्योक्तेः, सृष्ट्यादिकारणीभूतोमासाहित्येनैवेशस्याग्म्यादिदेवसृष्टिविधानसामर्थ्योक्तिरित्यभिप्रायः । उक्तं च चतुःशत्याम्— 'परोऽपि शक्तिरहितः शक्तः कर्तुं न किंचन । शक्तः स्यात्परमशानि शक्त्या युक्तो भवेद्यदि ॥' इति । यद्वा, एवं न चेद्देवो न खलु कुशलोऽपि । शक्तिसाहित्याभावे क्रीडाया द्विनिष्ठत्वादेकस्य क्रीडाविशेषासंभवात् स्वं क्रीडनार्थकदेवीसाहित्यसूचकदेवपदवाच्यो न भवत्येव । तथा चतुरः कुत्सितं शलते संवृणोतीति कुशल इति व्युत्पत्त्या स्वकीयचर्माम्बरत्वादिगम्बरत्वादिलोकप्रसिद्धकौत्सित्यावरणार्थककुशलपदवाच्योऽपि न भवत्येव । स्पन्दितुमपि शक्तो नेत्यर्थः । चर्माम्बरत्वादिदेवकौत्सित्यावरणस्य देवीकृतत्वादिति ह्यूहतोऽर्थः । तदुक्तमम्बास्तुतौ— 'चर्माम्बरं च शवभस्मविलेपनं च भिक्षाटनं च नटनं च परेतभूमौ । वेतालसंहतिपरिग्रहता च शंभोः शोभां वहन्ति गिरिजे तव साहचर्यात् ॥' इति । अथ वा, कुशं तृणविशेषं लात्यादत्तेऽनुगृह्णातीति वा कुशलो न, तृणमात्रमप्यादातुमनुग्रहीतुं च शक्तो न, किमुत सृष्ट्यादिकं कर्तुमित्यभिसंधिः । अथ वा, कुशमपि लाति खण्डयतीति कुशलः, सोऽपि न । तृणमात्रमपि खण्डयितुं शक्तो न, किमुत त्रिपुरसंहारजलंधरवधादिकं कर्तुमित्यभिसंधिः । यद्वा, कुशं विषापरपर्यायं जलं लात्यादत्त इति कुशलः सोऽपि न । सकलजगत्संहरणोद्युक्तकालकूटपानं विधाय तत्कण्ठे धर्तुं न क्षमत इत्यभिसंधिः । उक्तं च सकलजननीस्तवे—'विधेर्मुण्डं दत्त्वा यदकुरुत पात्रं करतले हरिः शूलप्रोतं यदगमदसाभरणताम् । अलंचक्रे कण्ठं यदपि गरलेनाम्ब गिरिशः शिवस्थायाः शक्तेस्तदिदमखिलं ते विलसितम् ॥' इति । यद्वा न कुशल एव, यदि कुशलस्तर्हि नखलुकुशल एव, नखं नखरं लुनाति च्छेदयतीति नखलुर्नखच्छेदकः शस्त्रविशेषः । इदं चोपलक्षणं खड्गादीनाम्, स इव कुशलः । यथाऽतितीक्ष्णधारो नखादिच्छेदनसमर्थोऽपि नखत्वादिः पौरुषहस्तव्यापारमन्तरा नखादिच्छेदं कर्तुं न शक्नोति, एवं समर्थोऽप्ययं देवो भवव्यापारमन्तरा न शक्नोतीति भावः । अत एवाहुः— 'सहकारशक्तिविरहिणी सहजशक्तिरनुकारिणी' इति । उक्तं च चर्चास्तवे— 'इच्छानुरूपमनुरूपगुणप्रकर्षा संकर्षणि त्वमभिनृत्य यदा बिभर्षि । जायेत नस्त्रिभुवनैकगुरुस्तदानीं देवः शिवोऽपि भुवनत्रयसूत्रधारः ॥' इति । स्पन्दितुं पादप्रक्षेपरूपं

ताण्डवादिकं च कर्तुं त्वत्सामर्थ्यं विना न शक्त इत्यर्थः । तदुक्तमम्बास्तवे— 'कल्पोपसंहरण-केलिषु पण्डितानि चण्डानि खण्डपरशोरपि ताण्डवानि । आलोकनेन तव कोमलितानि मातर्लो-स्यात्मना परिणमन्ति जगद्विभूत्यै ॥' अत्रोत्तरवाक्यं न वक्तव्यमेव । शिवः शक्त्येत्याद्यन्वयेनै-वोभयमेलनाभावे सृष्ट्याद्यभावरूपस्य व्यतिरेकस्य लभ्यमानत्वात्, आर्थिकार्थस्य शाब्दतायां पौनरुक्त्यस्य दुष्परिहरत्वात् । सत्यम्; उक्तानुमाने दार्ढ्यसंपादनाय वह्निसाधकानुमाने यदि वह्निर्न स्यादित्यादिवदत्रापि प्रमाणानुग्राहकज्ञानविशेषरूपं तर्कं शिष्यानुजिघृक्षया प्रकाशितवन्तो भगवत्पादाचार्याः । इति देवतापक्षीयोऽर्थः ॥

किं च, शिवः शिवशब्दः, शक्त्या मातृकाकोशप्रसिद्धेः कृतगुणयोरकारेकारयोरुत्पन्नेनैका-रेण युक्तो यदि लक्षणया तत्प्रकृतिभ्यामकारेकाराभ्यां युक्तो यदि, तर्हि सकललोकानुग्रहार्थं देवता-वाचकपदतया निष्पत्तुं शक्तः समर्थः, शक्तिशक्तिमतोः शिवयोराभिधायकश्च भवति । अकारेकार संयोगाभावे शिव् इत्येवंरूपतया स्वस्वरूपानिष्पत्तेर्निरर्थक एव भवतीत्यर्थः । एवं न चेत् इकाराकारयुक्तो न चेत्, देवः कान्त्यर्थकोऽयं शब्द स्पन्दितुं निष्पत्तुं समस्तजङ्गलात्मिकां देवतां समभिधातुं च कुशलो न खलु न क्षम इति शब्दपरार्थः ॥

अथ च, 'शब्दजातमशेषं तु धत्ते शक्त्या बलभा । अर्थस्वरूपमखिलं धत्ते मुग्धेन्दुशेखरः॥' इति वायुसंहिताबलाच्छिवशब्देन लक्षणया वा शिवोऽस्ति धारयितृत्वेनास्येति व्युत्पत्त्या वा शिवशिरोधृतोऽभिधेयसंघ उच्यते । शक्तिशब्देन पूर्ववदेव तच्छिरोधृता शब्दशक्तिरुच्यते । तथा च शिवः अर्थसंघः शक्त्या शब्दसंघेन युक्तो यदि 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः' इत्यनुशासनात्तयोर्नित्यसंबन्धात् 'अर्थं बुद्ध्वा वाक्यरचना' इति न्यायाच्च शब्दविरहितस्यार्थस्यासार्थक्यात्परमेश्वरः पार्वत्यैव संबद्धश्चेत् तर्हि प्रभवितुं नानाविध-प्रकाशेन विद्वद्ग्राह्यं कर्तुं शक्तः समर्थः शक्तिमांश्च भवति । 'शक्तं पदम्' 'समर्थः पद-विधिः' इति पाणिनिनिर्देशात् समर्थः शक्तः स्वकार्यानिर्वर्तने क्षम इत्यर्थः । 'स्वार्थप्रतिपादनं हि स्वकार्यं शब्दानाम्' इति न्यासकारः । आहुश्च—'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते । अनिर्विद्धमिव ज्ञानं सर्वं शब्देन भासते ॥' इति । एवं न चेत् दीव्यत्यनया व्यवहरतीति देवः व्यवहारयोग्योऽर्थसंघः स्पन्दितुं तं विना ईषत्कालमप्यवस्थातुं व्यवहारक्षमीभवितुं च न कुशलः खलु समर्थो न । शब्दोऽप्येवमर्थं विना यदृच्छाशब्दवत्त्याज्य एवेति सूचितम् । इत्यर्थपरार्थः ।

अथ वा, शिवः शब्दप्रपञ्चः, शक्त्या 'शब्दानां जननी त्वमत्र भुवने वाग्वादिनी-त्युच्यसे त्वत्तः केशववासवप्रभृतयोऽप्याविर्भवन्ति ध्रुवम् । लीयन्ते खलु यत्र कल्पविरमे ब्रह्मा-दयस्तेऽप्यमी सा त्वं काचिदचिन्त्यरूपमहिमा शक्तिः परा गीयसे ॥' इति लघुस्तोत्रोक्तया, परस्य शब्दब्रह्मणः प्रधानावस्थारूपया शक्तिरिति शाक्तैः, चितिरिति शैवैः, कुण्डलिनीति योगिभिः, प्रकृतिरिति सांख्यैः, ब्रह्मेति पाराशरिभिः, बुद्धिरिति बौद्धैः, स्वशक्त्युन्मिषितगोत्वाद्युपाधिरहित-महासत्तेति जातिवादिभिः, तथाविधोपाधिरहितं केवलं द्रव्यमिति द्रव्यवादिभिश्चैकोऽप्यनेकनाम-

भिर्व्यवह्रियमाणया निजैकाश्रयमायाख्यशक्तिकल्पितानेकोपाधिभेदभिन्नस्वरूपया पराशक्त्या युक्तो यदि तर्हि प्रभवितुं पश्यन्तीमध्यमावैखरीरूपेणाविर्भवितुं मध्यमावस्थायां च विमर्शबिन्दुरूपयोर्वाच्यवाचकरूपशब्दार्थरूपं नित्यतत्संबन्धरूपं चाप्तुं च शक्तः ; एवं न चेत् पराशक्तियुक्तो न यदि देवः शब्दब्रह्म स्पन्दितुं तालुओष्ठादिस्थानकरणप्रयत्नैर्निष्पत्तिं प्राप्तुं च न कुशलः खलु शक्तो नेत्यर्थः । ' वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा । द्योतयार्था च पश्यन्ती सूक्ष्मा वागनपायिनी ॥ ' इति तल्लक्षणम् । इति शब्दोत्पत्तिनिरूपणपरार्थः ।

अथवा, ' उभयस्यास्य देवस्य विग्रहे यन्त्रकल्पना । विना यन्त्रेण चेत्पूजा देवता न प्रसीदति ॥ ' इति श्रुतिस्मृतिभ्यां देवतादेहरूपयन्त्रपरार्थस्तु—' चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः । नवचक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपुः ॥ ' इत्यागमाच्छिवशब्देन नवयोन्यात्मके श्रीचक्रे वर्तमानं शिवात्मकं चक्रचतुष्टयमुच्यते । शक्तिशब्देन चावशिष्टं शक्त्यात्मकं चक्रपञ्चकमुच्यते । तथा चायमर्थः—शिवस्तदात्मकं चक्रचतुष्टयं शक्त्या तदात्मकेन चक्रपञ्चकेन युक्तो यदि मिलितश्चेत् तर्हि प्रभवितुं प्रकर्षेण भवितुं वसुकोणदशारयुग्माद्यनेकप्रकारेण विस्तारं प्राप्तुं सृष्टिस्थितिलयान्कर्तुं वा शक्तः समर्थः । शिवशक्त्यात्मकोऽपि भवितुमित्यर्थः । अथवा, ' त्रिकोणरूपिणी शक्तिर्बिन्दुरूपः शिवः स्वयम् । अविनाभावसंबन्धस्तस्माद्बिन्दुत्रिकोणयोः ॥ ' इत्यागमवचनाच्छिवशब्देन बिन्दुरुच्यते, शक्तिशब्देन तदात्मकं त्रिकोणमुच्यते । तथा चायमर्थः—शिवो बिन्दुः शक्त्या त्रिकोणेन युक्तो यदि श्लिष्टश्चेत् तर्हि वसुकोणाद्यनेकप्रकारेण विस्तारं प्राप्तुं सृष्ट्यादिकं कर्तुं च शक्तः । अस्मादेव चक्रादुत्पत्तिस्थितिलयादेर्वक्ष्यमाणत्वादिति भावः । एवं न चेत् शिवशक्त्यात्मकचतुष्कपञ्चकरूपं चक्रद्वयं बिन्दुत्रिकोणद्वयं वा मिलितं न यदीत्यर्थः । देवी च देवश्च देवौ पार्वतीपरमेश्वरावस्यास्मिन्वा स्त इति देवः, देवयोः शरीररूपं नित्यनिवासस्थानं वा चक्रमित्यर्थः । मत्वर्थीयोऽच्प्रत्ययः । यद्वा दकारोऽयं हलन्त्वाच्छिववचनः, एकारोऽयं चाच्त्वान्मातृकाकोशे शक्तिरिति प्रसिद्धेश्च शक्तिवचनः । तथा च दकारैकारवाच्यौ पार्वतीपरमेश्वरौ वाति गच्छति स्वीयतया नित्यनिवासरूपत्वादिति भावः । शिवयोर्नित्यनिवासभूतं सकलशक्तिदेवलोकात्मकत्वेन श्रुतिप्रसिद्धं चक्रं स्पन्दितुमपि विस्तारं प्राप्तुं सृष्ट्यादिकं संभावयितुमपीत्यर्थः । अपिः संभावनायाम् । कुशलः लोकानां स्वपरिज्ञानपूजनाभ्यां क्षेमप्रदाता न खलु । अन्यथा स्वस्वरूपानिष्पत्तेरित्यर्थः । चक्रोत्पत्तिपूजाभिज्ञस्य फलं श्रुतिसिद्धम्—'इह चामुत्र चान्वेति विद्वान्देवासुरानुभयान् । यो वै तां ब्रह्मणो वेद अमृतेनावृतां पुरीम् । तस्मै ब्रह्म च ब्रह्मा च आयुः कीर्तिं प्रजां ददुः ॥ ' इति । यद्वा, कुशलः, कुशब्देन भूमिरुच्यते, ' गोत्रा कुः पृथिवी ' इति कोशात्, ' शं कल्याणे सुवर्णे च ' इति कोशादक्षीणसुवर्णवाचिना शवर्णेनाक्षीणसुवर्णरूपो मेरुरुच्यते, कैलासमध्यवर्त्ययं लकारो लाघवात्कैलासमाह । तथा च कुश्च शश्च लश्च कुशला भूमेरुकैलासाः सन्त्यत्र प्रस्तारूपेणेति कुशलः, भ्वादिप्रस्तारभावमापन्नः, स्पन्दितुं विस्तारं प्राप्तुं न खलु शक्त इत्यर्थः । नात्र विशेष्यीभूतचक्रशब्दस्य नपुंसकत्वाल्लिङ्गान्तरगतैर्देवादिपदैस्तदभिधानं विरुद्धमिति शङ्कनीयम्, कलत्रदारादिपदैः स्त्र्यभिधानस्य सर्वसंमतत्वात् । न च तत्र ' नियतलिङ्गानां न विशेष्यलिङ्गता ' इति न्यायानुगतिरस्तीति वाच्यम्,

अत्रापि विभक्तिविपरिणामस्य 'लिङ्गमनित्यं लोकाश्रयत्वाल्लिङ्गस्य' इति भाष्यकारोक्तेश्च गतेराश्रयणीयत्वात्, शब्दतश्चक्लिनिरूपणाभावाच्च। वस्तुतस्तु नपुंसकलिङ्गस्य स्त्रीपुंसाधारण्यान्नपुंसक एव यत्किंचिदुभयोश्चिह्नमस्तीति नपुंसकस्य न पुंल्लिङ्गपदविशेषणता दोषाय। अत एव व्याकरणे 'तस्येदम्', 'तस्यापत्यम्', 'तदस्य संजातम्' इत्यादौ सर्वसाधारणं नपुंसकमेव पाणिनिना प्रयुक्तमिति युक्तोऽयं विशेषणविशेष्यभावः। इति यन्त्रपरार्थः॥

अतः, अमूम्। एवमीश्वरस्यापि सृष्ट्यादिशक्तिप्रदात्रीं श्रुतिषु प्रत्यक्षसिद्धां त्वाम् अपरोक्षानुभवरूपिणीं भवतीम्। सार्वविभक्तिकस्तसिः। उक्तं च भट्टपादैः—'इदमस्तु प्रत्यक्षं समीपतरवर्ति चैतदो रूपम्' इतीदमः प्रत्यक्षार्थकत्वम्। उक्तम् चैकावलौ—'यदिदं किंचेति लोकवेदयोर्दर्शनात्, एवमिदमदसावपि यच्छब्दःसंनिधानेन प्रसिद्धिं परामृशतः, इतरथा प्रत्यक्षायमाणमर्थम्' इति। यत्तूक्तं लक्ष्मीधरेण—'अतोऽस्माद्धेतोः' इति, तच्चिन्त्यम्। अतो हेतोरित्युक्ते कुतो हेतोरित्याकाङ्क्षा यच्छब्दविषयेति। न च दृश्यते पूर्ववाक्ये यच्छब्दः। अवश्यं च तत्प्रयोगेण भाव्यम्। उत्तरवाक्यस्थस्येदमो यच्छब्दस्य पूर्ववाक्ये तच्छब्दोपादाननिवारण इव यच्छब्दोपादाननिवारणसामर्थ्याभावात्। न चाध्याहारात्तल्लाभः, यतो हेतोरीश्वरस्यापि शक्तिसाहित्याभावे प्रभवनासामर्थ्यमतो हेतोरित्यर्थसांगत्यं च भविष्यतीति वाच्यम्, अस्मदुक्तरीत्या समीचीनगतौ सत्यामगतिककल्पनारूपस्याध्याहारस्य कल्पनानर्हत्वात्। आचार्यप्रबन्धव्याख्यानोद्यतस्याध्याहारकल्पनारसिकस्य तव तत्रत्यस्वारस्यभञ्जनपूर्वकमनन्ताध्याहारं कुर्वतः पाण्डित्यस्य रसिकजनविसंवादितापत्तेश्च। अथ वा, अस्तु वा हेतुत्वम्। अथापि हेतुः कुत्रान्वियात्? हरिहरादीनां देव्याराधने वा, अकृतपुण्यस्य प्रणमनस्तवनाप्रभवने वा? नाद्यः, हर्यादीनां देवीसमाराधनस्य शक्तिसाहित्याभावप्रयुक्तशिवदौर्बल्याशङ्कामूलकत्वाभावात्, तदाशङ्कापूर्वकतद्विधानस्यानुपयोगाच्च। स्वेषां सृष्ट्यादौ निरतिशयसामर्थ्यावाप्त्यपेक्षत्वात्तदुपासनस्य हेत्वन्वयेऽपि शब्दास्वारस्याच्छिवस्य प्राधान्यहानिः प्रसज्येत। न द्वितीयः, शिवस्त्वत्साहित्यं विना किंचिदपि कर्तुं न शक्नोति, अतः अकृतपुण्यः प्रणामादिकं कर्तुं कथं शक्नोतीत्यत्रापि हेत्वनपेक्षणात्, आम्रप्रश्नकोविदारोत्तरयोरिवासांगत्यप्रतीतेश्च। वस्तुतः सांनिध्यादाराध्यामित्यनेनैवान्वेतुमाकाङ्क्षते। न च तत्र हेतूपयोगः, प्रत्युत संभूयोपासितव्याविति तात्पर्यम्। 'त्वामाश्रिता महाभागे प्राप्नुवन्त्यचिरेण माम्। केवलं त्वामनादृत्य मां भजन्ते विचेतसः॥ न यान्ति मम सायुज्यं कल्पकोटिशतैरपि।' इति स्कान्दपुराणावगतं प्रथमार्धेन सूचयित्वा द्वितीयार्धे संभूय तदुपासनं विधातृहरिहराद्युपासकान्प्रदर्शयताम् 'न शिवेन विना शक्तिः' इत्यारभ्य 'वर्धते नात्र संशयः' इत्यन्तानि सूतसंहितावचनानि पर्यालोचयतामाचार्याणामभिप्रायविरोधादुपेक्ष्यं तत्। अतोऽस्मद्योजनैव साधुः। हरति भक्तानां दुःखमिति हरिर्विष्णुः, हरः कालरुद्रः। यत्तूक्तं रामकविना लक्ष्मीधरेण च—हरः शिव इति, तत्र, प्रपञ्चलयाधिकृतस्य कारणपुरुषस्य हरस्य शिवशब्दवाच्यत्वाभावात्; शिवपदव्याख्यानावसरे शिवशब्दार्थं सदाशिवं बिन्दुरूपं द्रुहिणहरिहरेशानकारणमुक्त्वाऽत्र हरपदस्य शिवमभिधेयीकुर्वतः पूर्वोत्तरविरोधागमाविस्मृत्योः प्रसञ्जनात्। उक्तं च—'संहारश्च हरायत्त उत्पत्तिर्भवनिर्मिता। रक्षा तु

मृडसंलक्ष्या सृष्टिस्थितिलये शिवः । माया च शुद्धविद्या च महेश्वरसदाशिवौ ॥' इति । विशेषेण रिञ्चति सृजति प्रपञ्चमिति विरिञ्चः । पचाद्यच् । 'विरिञ्चो द्रुहिणः शि.....' इति शब्दार्णवे । आदिशब्देनेन्द्रादयो गृह्यन्ते । तैर्विष्णुरुद्रब्रह्मादिभिराराध्याम् । अपिशब्दादन्यैश्चाराध्यां सृष्ट्यादिकर्तृभिः सेव्याम्, सर्वेषामप्यविद्यासंवलितसत्त्वादिति भावः । त्वां मायाऽविद्यादिपदवाच्यामघटितघटनापटीयसीं भवतीम् । उक्तं चेदं सकलजननीस्तवे—'शिवस्त्वं शक्तिस्त्वं त्वमसि समयस्त्वं समयिनी त्वमाज्ञा त्वं दीक्षा त्वमभयमणिमादिर्गुणगणः । अविद्या त्वं विद्या त्वमसि निखिलं त्वत्किमपरं पृथक्त्वत्तः किंचिद्भगवति न वीक्षामह इमे ॥' इति । लघुस्तोत्रेऽपि 'माया कुण्डलिनी' इत्यादि । वक्ष्यन्ति चाचार्याः—'महामाये विश्वं भ्रमयसि' इति । कृतं पुण्यं येन स न भवतीत्यकृतपुण्यः । अनेकजन्मार्जितसुकृतपुञ्जतथा विविधतपश्चरणोपासनादिभिः प्राप्तचित्तशुद्धिः कृतवेदान्तपरिश्रमो यो न भवति स पुमान्, प्रणन्तुं नमस्कर्तुं त्वत्स्वरूपं परिज्ञातुं चेत्यर्थः । तदनन्तरं स्तोतुम्, अहो माये कियती ते सामर्थ्यसंपत्तिः, 'ज्ञानिनामपि चेतांसि देवी भगवती हि सा । बलादाकृष्य मोहाय महामाया प्रयच्छति ॥' इति मार्कण्डेयोक्तेः । यन्महतोऽप्यावृणोतीति स्तोत्रं कर्तुं च । वेति विकल्पे समुच्चये वा, उभयत्र कोशप्रसिद्धेः । कथं केन प्रकारेण प्रभवति समर्थो भवति, न कथंचिदपीत्यर्थः । अनेकजन्मजातसंपादितपूर्वोपासनाभिः कृतवेदान्तपरिश्रमः सद्गुरुकटाक्षसमासादितस्वस्वरूपः 'अहं ब्रह्मास्मि' इति ज्ञानवान्परिहृतमायाजालो यः स एव त्वत्स्वरूपं परिज्ञाय त्वदीयविनोदे पुनर्माये मां मा प्रवेशयेति प्रणन्तुं त्वदीयकौशलं स्तोतुं च शक्तो भवति, नान्य इति भावः । उक्तं च मार्कण्डेयेन—'विष्णुः शरीरग्रहणमजमीशान एव च । कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥' इति वेदान्त्यभिमतोऽर्थः प्रथमः ॥

सांख्यपक्षे—अतः अमूं हरिहरविरिञ्चादिभिः सत्त्वतमोरजःप्रधानैरपि देवैराराध्यां त्रिगुणात्मिकायास्तवैकैकं गुणं प्रत्येकमुपादाय सेव्याम् । तदीयगुणोपादानमेव तस्या आराधनेति भावः । उक्तं च भागवते—'सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । सृष्ट्यादये हरिविरिञ्चहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥' इति । त्वां मूलप्रकृतिरूपिणीं भवतीम् । अत्रोक्तमन्यास्तवे—'यामामनन्ति मुनयः प्रकृतिं पुराणीं विद्येति यां श्रुतिरहस्यविदो गृणन्ति । तामर्धपल्लवितशंकररूपमुद्रां देवीमनन्यशरणः शरणं प्रपद्ये ॥' इति । मार्कण्डेयेन चोक्तम्—'महाविद्या महामाया महामेधा महास्मृतिः । महामोहाऽसि भवती महादेवी महेश्वरी ॥ प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ।' इति । अकृतपुण्यः 'सत्त्वात्संजायते ज्ञानम्' इति स्मृतेस्त्वदीयसत्त्वगुणसमवायज्ञानरहितः, प्रणन्तुं स्तोतुं वा समर्थमप्युदासीनमेव सन्तं पुरुषमाविष्टायाचेतनैव सती विचित्रविविधप्रपञ्चसर्जनभारं वहन्ती, अविहिततदूषणमनवरतसौभाग्यमेव कामयमाना पतिव्रताशिरोमणिस्त्वमिति नमस्कारस्तवने विधातुं कथं प्रभवति, न कथंचिदपीत्यर्थः । अनवरताभ्यस्तकापिलतन्त्रः सद्गुरूपदिष्टः सूक्ष्मदर्शी यः स एव तत्र शक्तो नान्ये पामरा इति भावः । उक्तं च मार्कण्डेयेन—'हेतुः समस्तजगतां त्रिगुणाऽपि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा । सर्वाश्रयाऽखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥' इति । इति सांख्याभिमतोऽर्थो द्वितीयः ॥

वक्ष्यमाणादितदेवतान्तरपरत्वस्य सिद्धान्तिना क्रियमाणं निराकरणमप्यनुपपन्नम् । विष्णुपराणामपि देवतान्तरपरत्वस्य त्वन्मतेऽपि दुर्वारत्वात् । त्वया हि 'ज्योतिरुपक्रमात्तु' इत्यधिकरणे कृत्स्नः कर्मकाण्डो ब्रह्मपरोऽपीति स्वीकृतम् । 'केन स्यात्' इति वाक्यं चार्थत्रयपरमिति 'स्तुतये-ऽनुमतिर्वा' इत्यत्र सिद्धान्तितम् । ब्रह्मादिदेवताप्रतिपादकाः सूक्तमन्त्रास्तत्तदुत्तमसकलदेवता-विषयत्वेनाभिमतार्था इति अङ्गावबद्धाधिकरणे स्थापितम् । किं बहुना ; 'यस्य त्रीण्युदितानि' इति जल्पता बलित्थेत्यादिमन्त्रा देवतान्तरपरा अपि वायुपरा इति, वराकमध्वप्रतिपादका इति च स्वीकृतम् । एवं च तत्र तत्रैकार्थ्यं त्यजतस्तव विष्णुलिङ्गैर्विष्णुपरत्वमात्रमेव स्यात्, न तु शिवादि-परत्वाभावोऽपि । एवं च विष्णुलिङ्गानां देवतान्तरलिङ्गानां च प्राबल्यदौर्बल्यविचारोऽपि मुधैव, उभयोर्विरोधविरहात् । किं च, प्रायः सर्वेष्वधिकरणेषु साधारणेन ब्रह्मलिङ्गेन विष्णुपरत्वं निर्णयसि । पूर्वपक्ष्यभिमतदेवतान्तरलिङ्गानां प्रवृत्तिनिमित्तताद्यधीन्यादिभिर्विष्णावेव सावकाशतां च वक्ष्यामस्तत्र स्फुटीभविष्यति । तच्चायुक्तम्, ब्रह्मलिङ्गानां शिवेऽपि संभवात्, [1]देवतान्तरलिङ्गाना-मपि शिव एव सावकाशतायाः सुवचत्वाच्च । न [2]ह्यद्यापि विष्णौ समन्वयः सिद्धः, तत्सिद्ध्यर्थ-मेव त्वया प्रथमाध्यायशेषस्यारब्धत्वात् । तथा चोपक्रान्तसाधनीयार्थविस्मरणेन तस्यैव सर्वत्र हेतूकरणमत्यन्तमयुक्तम् ॥

स्यादेतत् । ब्रह्मशब्दो विष्णुपर एव । उक्तं ह्यनुव्याख्याने—'स्वयं भगवता विष्णु-ब्रह्मेत्येतत्पुरोदितम् । स विष्णुराह हीत्यन्ते देवशास्त्रस्य तेन हि ॥ आद्यन्तं देवशास्त्रस्य स्वयं भगवता कृतम् । मध्यं तदाज्ञया शेषपैलाभ्यां कृतमञ्जसा । अतस्तत्रैव विष्णुत्वसिद्धेर्ब्रह्मेत्य-सूचयत् ॥' इति । टीकायां च—'स विष्णुराह हि, स ब्रह्मेत्याचक्षते इति निरन्तरसूत्रद्वयेन' इत्यादि वर्णितमिति चेत्, न, त्वत्कल्पितदेवशास्त्रस्य तदन्तर्गतसूत्रद्वयस्य च शिवविष्ण्वोरभेदपर-तयाऽपि सुयोजत्वात्, श्वेताश्वतराद्यनुरोधेन शिवो ब्रह्मेत्यस्य चतुर्थसूत्र एवोपपादितत्वात् । तदिह सिद्धान्तस्य बाधः, पूर्वपक्षस्य दुरुद्धरत्वम्, विष्णुपरत्वे साध्ये ब्रह्मलिङ्गानां व्याप्यत्वासिद्धिश्चेति दूषणत्रयमुत्तराधिकरणेषु प्रायेण योज्यम् । विशेषस्तु तत्र तत्र वक्ष्यते ॥

आनन्दमयोऽभ्यासात् ॥ १२ ॥

तैत्तिरीयाः समामनन्ति—'तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्मा-ऽऽनन्दमयः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा' इति । तत्रानन्दमयो हिरण्यगर्भः, तस्यानन्दमयशब्दानुगतार्थशतानन्द-नामकत्वात् । रुद्रो वा, 'यश्चासावादित्ये' इति सूर्ये प्रोतत्वावगमात्, अष्टमूर्तेश्च तत्संभवात् ।

1. अवतारा० 2. ह्येषामपि

प्रकृतिर्वा, विकारार्थकमयट्श्रुतेः । सर्वजीवा वा, 'बृह जातिजीवकमलासनशब्दराशिषु' इति धात्वर्थबलात् । सर्वथाऽपि न विष्णुः, निर्विकारत्वात्, तस्यानन्दमयं प्रति अवयवत्वोक्तेश्च, अभेदेऽवयवावयविभावासंभवात् इति पूर्वः पक्षः । तस्यायं संग्रहः—'विधिरीशः प्रकृतिर्वा जीवो वा नैव विष्णुरानन्दमयः । तत्र मयडुक्तविकृतेर्विरहात्तस्मादसीमपुरुषत्वाच्च ॥' इति । सिद्धान्तस्तु आनन्दमयो विष्णुरेव । कुतः? 'असन्नेव स भवति । असद्ब्रह्मेति वेद चेत्' इत्यादिना आनन्दमये ब्रह्मशब्दाभ्यासात्[1]; हिरण्यगर्भप्रभृतीनामपूर्णतया तत्र ब्रह्मशब्दस्य मुख्यवृत्त्ययोगात् । अन्यत्र ब्रह्मरूढिः, विष्णौ तु विद्वद्रूढिरिति सैव प्रबला । सूत्रे आनन्दमय इत्युपलक्षणम्; आनन्दमयादयः पञ्चापि विष्णुरेवेति विवक्षितम्, सौत्रेषु विषयनिर्देशप्रदेशेषु तुल्यन्यायानां विषयान्तराणामवश्यमुपलक्षणीयत्वात्, अन्यथा सूत्रकोट्याऽपि सर्वशास्त्रनिर्णयालाभात । अस्ति चेह न्यायतौल्यम्, 'येऽन्नं ब्रह्मोपासते । ये प्राणं ब्रह्मोपासते । आनन्दं ब्रह्मणो विद्वान् । विज्ञानं ब्रह्म चेद्वेद ।' इति ब्रह्मशब्दाम्नानेन 'एतमन्नमयमात्मानमुपसंक्रामति' इत्यादिप्रतिपर्यायमात्मशब्दमुक्तप्राप्यत्वयोः श्रवणेन चान्नमयादीनां पञ्चानामपि विष्णुरूपत्वात् ॥

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १३ ॥

प्राचुर्ये मयट् । आनन्दप्रचुरः प्रचुरानन्द इत्यर्थः । एवमन्नमयादावपि । स्यादेतत्; अप्राकृतविग्रहे विष्णावन्नप्राचुर्यार्थो न युज्यते इति चेत्, न; अन्नशब्दो ह्ययम् 'अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति' इति मन्त्रे भूताद्यत्वतदत्तृत्वपरतया निरुक्तः । न च प्रसिद्धान्ने भूतात्तृत्वं संभवति । तथा च प्रचुरभूतोपजीव्यत्वं तदत्तृत्वं चार्थो लभ्यते । प्राणमयत्वं प्रचुरजीवयितृत्वं, मनोमयत्वं प्रचुरबोधकत्वम् । न च 'अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुध्यन्ताम्' इत्यत्रान्नमयादिशब्दानां कोशपरत्वादिहापि तेषां तत्परत्वं शक्यम्, तत्र प्रकरणे ब्रह्मशब्दाद्यभावेन शुद्धिप्रार्थनालिङ्गेन च तेषां कोशपरत्वेऽपि इह ब्रह्मपरत्वात् । न चान्नमयादीनां ब्रह्मत्वाभ्युपगमे 'एकमेवाद्वितीयम्' इत्यादिश्रुतिविरोधः, एकस्यैव ब्रह्मणो बहुरूपत्वेन पञ्चतोक्तेः[2] ॥

यदुक्तमानन्दमयो विष्णुरिति, तत्र हेत्वन्तरपरं सूत्रम्—

तद्धेतुव्यपदेशाच्च ॥ १४ ॥

'यदेष आकाश आनन्दो न स्यात्' इत्यानन्दरूपो विष्णुर्लोकप्रवर्तकत्वेनोक्तो यत इत्यर्थः ॥

---

1. ब्रह्मशब्दाभ्यासात्
2. पञ्चतोपपत्तेः

किं च,

मान्त्रवर्णिकमेव च गीयते ॥ १५ ॥

'ब्रह्मविदाप्नोति परम्' इति सूचनया परब्रह्मतज्ज्ञानतत्प्राप्तिकथने शङ्कात्रयमुदेति—किं तद्ब्रह्म, कथं च तद्वेदनम्, कीदृशी च तत्प्राप्तिः इति। तत्राद्यशङ्कापनोदाय लक्षणमुक्तम्—'सत्यं ज्ञानम्' इति। 'यो वेद' इति वेदनम्, 'सोऽश्नुते' इति प्राप्तिः। अतो मन्त्रवर्णैकरूप्याय परमेव ब्रह्मान्नमयादिशब्देन गीयत इति। न चावयवावयवित्वविरोधः, 'स शिरः, स दक्षिणः पक्षः, स उत्तरः पक्षः, स आत्मा, स पुच्छम्' इति चतुर्वेदशिखायां तस्यैवावयवत्वोक्तेः। 'शिरो नारायणः पक्षौ दक्षिणः सव्य एव च। प्रद्युम्नश्चानिरुद्धश्च संदोहो वासुदेवकः॥ नारायणोऽथ संदोहो वासुदेवः शिरोऽपि वा। पुच्छं संकर्षणः प्रोक्त एक एव तु पञ्चधा॥ अङ्गाङ्गित्वेन भगवान्क्रीडते पुरुषोत्तमः। ऐश्वर्यान्न विरोधश्च चिन्त्यस्तस्मिन्जनार्दने॥ अतर्क्ये हि कुतस्तर्कस्त्वप्रमेये कुतः प्रमा॥' इति बृहत्संहितायाम्। न चैवम् 'अन्योऽन्तर आत्मा' इत्यादिषु श्रुतस्यान्यशब्दस्यानुपपत्तिः, 'अनन्योऽप्यन्यशब्देन तथैको बहुरूपवान्। प्रोच्यते भगवान् विष्णुरैश्वर्यात्पुरुषोत्तमः॥' इति ब्रह्माण्डोक्त्या तत्समर्थनात्॥

हिरण्यगर्भादीनामानन्दमयत्वे बाधकोपन्यासार्थं सूत्रम्—

नेतरोऽनुपपत्तेः ॥ १६ ॥

न ह्यन्यज्ञानान्मोक्ष उपपद्यते, 'नान्यः पन्थाः' इति श्रुतेः। तत्रैव सूत्रान्तरम्—

भेदव्यपदेशाच्च ॥ १७ ॥

'ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः' इत्यादिषु हिरण्यगर्भादिभ्यो भेदव्यपदेशादित्यर्थः॥

ननु जीवः परस्मान्न भिद्यते, आत्मत्वात्, परमात्मवत्। नेत्याह सूत्रकारः—

कामाच्च नानुमानापेक्षा ॥ १८ ॥

यथाकाममनुमातुं शक्यत्वात् श्रुतिविरुद्धमनुमानं न ग्राह्यमित्यर्थः। न च श्रुतीनां व्यावहारिकभेदपरता, अस्मिन्नेव प्रकरणे 'सोऽश्नुते सर्वान् कामान्सह ब्रह्मणा' इति ब्रह्मसहभावोक्त्या मोक्षकालेऽपि भेदसिद्धेः इत्यर्थे सूत्रान्तरम्—

अस्मिन्नस्य च तद्योगं शास्ति ॥ १९ ॥

अस्य जीवस्य तद्योगं ब्रह्मसाहित्यं श्रुतिः शास्ति । तस्मादानन्दमयशब्दोपलक्षितान्नमयादिपञ्चात्मको विष्णुरेवेति माध्वाधिकरणशरीरम् ॥

अत्र दोषत्रयं दत्तमेव । किं च, ब्रह्मशब्दस्य विष्णावेव विशेषरूढिरिति कुतः ? 'तदेव ब्रह्म परमं कवीनाम्' इति श्रुतेरिति चेत्, न, तस्या अपि विष्णुमात्रपरत्वासिद्धेः । 'यमन्तः समुद्रे कवयो वयन्ति' इति प्रसिद्धतल्लिङ्गात्तत्सिद्धिरिति चेत्, न, 'प्रजापतिश्चरति गर्भे अन्तः' 'हिरण्यगर्भ इत्यष्टौ' इति प्रजापतिहिरण्यगर्भश्रुतिभ्यां विरिञ्चैकपरत्वस्य सुवचत्वात् । तथा 'हिरण्यगर्भ इत्यष्टौ' इत्यनेनानुगृहीतात् 'य ईशे अस्य द्विपदश्चतुष्पदः' इति पशुपतित्वलिङ्गात् 'पुरुषस्य विष्णोः सहस्राक्षस्य महादेवस्य धीमहि' इत्युपसंहाराच्छिवपरा साऽस्तु । तस्माच्छ्रुतीनामनेकार्थत्वं ब्रुवता त्वयाऽत्रापि तथैव वाच्यम् । तर्हि तदेव ब्रह्मेत्यवधारणं कथं योज्यमिति चेत्, त्वन्मते भूमशब्दरीत्या पुरुषभेदेनार्थव्यवस्थासंभवात् । नन्वेवं 'ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण आनन्दः' इति ब्रह्मप्रजापत्योरानन्दे उत्कर्षापकर्षौ कथं स्यातामिति चेत्, ब्रह्मानन्दमययोरवयवावयविभावबलादिति गृहाण । 'अन्योऽन्तर आत्मा' इति साक्षाद्भेदश्रवणमविगणयतस्तव भेदकश्रवणस्यार्किंचित्करत्वाच्च । अत एव जीवब्रह्मणोरपि भेदस्त्वया दुःसाध इति प्रथमाधिकरणशब्दन एवावोचाम ॥

किं च त्वन्मते स्वस्मात्स्वस्योत्कर्षापकर्षाविष्टावेव, समयपादे वैशेषिकनिराकरणप्रसङ्गे 'नन्वेवं सति स्वस्मादपि स्वमुत्कृष्टोऽपकृष्टश्चेत्यागतम् । को नेत्याह' इति सुधायामुक्तत्वात् । यत्तु 'सोऽश्नुते' इत्यत्र ब्रह्मणा सह साहित्यं भोक्तेऽप्युक्तमिति, तन्न, तस्य जीवन्मुक्तिपरत्वात् । तथा हि—सह सुखपदार्थान्भुङ्क्ते । कथम् ? ब्रह्मणा ब्रह्मरूपेण अभिव्यक्तब्रह्मानन्दे सर्वानन्दानामन्तर्भावादिति भावः । उक्तं हि—'यावानर्थ उदपाने' इत्यादि । तथा च स्कान्दे ब्रह्मगीतायां तैत्तिरीयार्थकथनावसरे उपबृंहितम्—'सोऽश्नुते सकलान्कामानक्रमेण सुरर्षभाः । विदितब्रह्मरूपेण जीवन्मुक्तो न संशयः ॥' इति । तथाऽऽनन्दमयादीनां कोशत्वं स्थूलारुन्धतीन्यायेन तदुपन्यासश्चेत्यपि तत्रैवोपबृंहणेन स्फुटीकृतमिति दिक् । अत एव सूत्राणि पुराणानुरोधात् न्यायदार्ढ्याच्चान्यथैव व्याख्यातानि श्रीशंकरभगवत्पादैः । माध्वमतखण्डनमात्रोद्देशेन प्रवृत्तेऽस्मिन्ग्रन्थे विस्तरभयात्तद्विवेचनं न कृतम् ॥

अन्तस्तद्धर्मोपदेशात् ॥ २० ॥

'अन्तः प्रविष्टं कर्तारमेतम्' 'अन्तश्चन्द्रमसि मनसा चरन्तम्' 'सद्देव सन्तं न विजानन्ति देवाः' 'इन्द्रस्यात्मानं दशधा चरन्तम्' इति श्रूयते। अत्रान्तःप्रविष्टो विष्णोरन्य एव, विष्णुर्वेति संशये 'इन्द्रो राजा' 'सप्त युञ्जन्ति' इत्यादिश्रवणादन्य इति प्राप्ते विष्णुरेवेति सिद्धान्तः। कुतः? ब्रह्मर्षोपदेशात्। 'अन्तः समुद्रे मनसा चरन्तम्' 'यस्याण्डकोशं शुष्ममाहुः प्राणमुत्तमम्' इति समुद्रशायित्वब्रह्माण्डवीर्यत्वरूपविष्णुलिङ्गादित्यर्थः॥

'इन्द्रस्यात्मानम्' इति षष्ठीबलेनापीन्द्रादन्य एवात्र ग्राह्यः। न च राहोः शिर इतिवत्कथंचित् षष्ठी, मुख्ये बाधकाभावादित्यभिप्रायकं सूत्रम्—

भेदव्यपदेशाच्चान्यः ॥ २१ ॥

इति माध्वाधिकरणशरीरम्। खण्डनं तु—'अन्तश्चन्द्रमसि मनसा चरन्तम्' 'अन्तरादित्ये मनसा चरन्तम्' इत्यष्टमूर्तेः शिवस्यापि लिङ्गमस्ति। 'प्रजापतिश्चरति गर्भे अन्तः' इति प्रजापतिशब्दरूपा श्रुतिश्च हिरण्यगर्भपराऽस्तीत्यादि पूर्ववत्॥

आकाशस्तल्लिङ्गात् ॥ २२ ॥

'अस्य लोकस्य का गतिरित्याकाश इति होवाच' इति श्रुतौ भूताकाश इति प्राप्ते 'स एव परोवरीयानुद्गीथः स एषोऽनन्तः' इत्यादिब्रह्मलिङ्गाद्विष्णुरेवाकाशः, प्रवृत्तिनिमित्तबाहुल्यात् तत्राकाशश्रुतेः साधकाशतेति माध्वाधिकरणम्। दोषत्रयं तूक्तम्॥

अत एव प्राणः ॥ २३ ॥

'तद्वै त्वं प्राणो अभवः महान् भोगः प्रजापतेः भुजः करिष्यमाणः यस्त्वाम् प्राणतो नव' इति श्रुतौ प्राणः प्रसिद्धेर्वायुरिति प्राप्तम्। 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ, अहोरात्रे पार्श्वे' इत्यादिलिङ्गाद्विष्णुरिति सिद्धान्तः। खण्डनं तूक्तमेव॥

ज्योतिश्चरणाभिधानात् ॥ २४ ॥

'विमे कर्णापतयतो विचक्षुर्वीदं ज्योतिर्हृदय आहितं यत्' इति मन्त्रे श्रुत्यभिसूक्त्वात्प्रसिद्धेश्चाग्निरेव ज्योतिःशब्दार्थ इति प्राप्ते कर्णादिविरुद्धचरणेन कर्णाद्यपरिच्छेद्यवैभवरूपेण विष्णुरेव ज्योतिः। ज्योतिःशब्दस्य पूर्वोत्तरमन्त्रगताग्न्यादिशब्दानां च प्राग्वद्विष्णौ साधकाशतेति माध्वाधिकरणशरीरम्। खण्डनं प्राग्वत्॥

छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात् तथा हि दर्शनम् ॥

छान्दोग्ये श्रूयते—'गायत्री वा इदं सर्वं भूतं यदिदं किं च वाग्वै गायत्री वाग्वा इदं सर्वम्' इत्यादि । तत्र गायत्री छन्दोविशेष एवेति प्राप्ते विष्णुरेवेति सिद्धान्तः । गायत्र्यादिशब्दार्थभूतोऽसाविति चेतोर्पणार्थं हि तथा निगद्यते । तथा हि दर्शनं—'गायति च त्रायति च' इति ॥

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २६ ॥

'एतावानस्य महिमा । अतो ज्यायांश्च पूरुषः । पादोऽस्य सर्वा भूतानि' इति पुरुषसूक्तमन्त्रो हि 'तदेतदृचाऽभ्युक्तम्' इत्यादिना अत्र संवादायोदाहृतः । एवं च भूतादिपादव्यपदेशो विष्णावेव संगच्छते । अतोऽपि स एव गायत्रीति सूत्रार्थः ॥

स्यादेतत् । अस्मिन्नेव प्रकरणे 'यदतः परो दिवो ज्योतिर्दीप्यते' इति श्रूयते । तत्र ज्योतिषो दिवः परत्वोक्त्या गायत्र्यास्तु 'त्रिपादस्यामृतं दिवि' इति द्युस्थितत्वोक्त्या परस्परविरोधात् ज्योतिर्गायत्रीशब्दयोरन्यतरस्य विष्णुपरत्वं त्याज्यमित्याशङ्क्य समाधत्ते सूत्रकारः—

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ २७ ॥

विवक्षाभेदेन सप्तमीपञ्चम्योरेकत्र सुयोजत्वादित्यर्थः । अत्रापि प्राग्वद्दोषत्रयं स्पष्टम् ॥

प्राणस्तथाऽनुगमात् ॥ २८ ॥

ऐतरेयकब्राह्मणे श्रूयते—'ता वा एताः शीर्षं श्रियः श्रिताश्चक्षुः श्रोत्रं मनो वाक्प्राणः—' इत्यादि । तत्र प्राणो वायुरेवेति प्राप्ते विष्णुरेवेति सिद्धान्तः । कुतः ? तथाऽनुगमात् ; विष्णुलिङ्गानामस्मिन् प्राणेऽनुस्यूतेरित्यर्थः । तथाहि—'तं देवाः प्राणयन्त तं भूतिरिति देवा उपासांचक्रिरे' इति देवोपास्यत्वं ब्रह्मलिङ्गम् । तथा—'ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव प्राण ऋचः इत्येव विद्यात्' इति सर्ववेदोक्तत्वमपि ब्रह्मलिङ्गम् । 'एतद्ब्रह्म ब्रह्मणो लोके ब्रह्मेमं पुरुषमुदरं ब्रह्म' इत्यादिब्रह्मशब्दाभ्यासाच्च ।

स्यादेतत् । 'तमिन्द्र उवाच—ऋषे प्रियं वै मे धामोपागा वरं ते ददामीति । स होवाच—त्वामेव जानीयामिति । तमिन्द्र उवाच—प्राणो वा अहमस्म्यृषे' इति विश्वामित्रं प्रति इन्द्रेण प्राग आत्मतयोपदिष्टः । स कथं परमात्मा स्यादित्याशङ्क्यार्थं सूत्रम्—

न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् ॥ २९ ॥

विष्णुलिङ्गानां बहुत्वात्प्राबल्यमित्यर्थः ॥

नन्वेवमपि इन्द्रेण मयि प्राण इति वक्तव्ये अहमिति कथमुक्तमित्याकाङ्क्षायां सूत्रम्—

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ ३० ॥

यथाऽन्तर्यामिदृष्ट्या वामदेवः 'अहं मनुरभवम्' इत्यादि प्रायुङ्क, न त्वभेदाभिप्रायेण तथेहापीति भावः । 'शास्त्रमन्तर्यामिसंविच्छास्त्रं परं पदम्' इति भागवते । 'तत्तन्नाम्नोच्यते विष्णुः सर्वशास्तृत्वहेतुतः । न क्वापि किंचिन्नाभास्ति तमृते पुरुषोत्तमम् ॥' इति च पाद्मे ॥

स्यादेतत् । उक्तः प्राणो न विष्णुः 'प्राणो वाव तदभ्यार्च्छत् प्राणो ह्येषः' इत्युपक्रम्य 'तस्माच्छतं वर्षाणि पुरुषायुषो भवन्ति' इति शतायुष्ट्वरूपजीवलिङ्गान्नानात् 'प्राण उदक्रामत्त प्राणः प्राविशत्' इति उत्क्रमणप्रवेशादिमुख्यप्राणलिङ्गाच्चेति चेत्, न, लिङ्गानां तदन्तर्यामिविषयत्वात् । किमर्थमन्तर्यामिकथनमिति चेत्, अन्तर्बहिः सर्वत्र चेति त्रेधाऽप्यधिकारिभेदेनोपासनार्थमित्याह—

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥

'केषांचित्सर्वगत्वेन केषांचिद्धृदये हरिः । केषांचिद्बहिरेवासावुपास्यः पुरुषोत्तमः ॥'

इति ब्राह्मे । अत्रापि दोषत्रयं प्राग्वत् । किं च 'शास्त्रदृष्ट्या तूपदेशः' इति सूत्रं जीवब्रह्मणोरभेदमेवाह । बाधकाभावस्तूक्तः । लाघवसहकृताः श्रुतिस्मृतयश्च साधिकाः ॥

इति तत्त्वकौस्तुभे द्वितीयपरिच्छेदे प्रथमाध्यायस्य प्रथमः पादः ॥



॥ प्रथमाध्यायस्य द्वितीयः पादः ॥

ऐतरेयके श्रूयते—'एतं सर्वेषु भूतेषु' इति। तत्र सर्वगतत्वेनाम्नायमानः आदित्यो वा, सर्वजीवा वा, विष्णुर्वेति संशये आदित्य इति प्राप्तम्, 'तस्यैतस्यासावादित्यो रसः' 'यश्चासावादित्ये' इत्यादिषु प्राचीनवाक्येषु बहुधा आदित्यश्रुतेः। अथवा सर्वे जीवाः सर्वगताः 'चक्षुर्मयः श्रोत्रमयः' इत्याद्युत्तरवाक्यात्। सिद्धान्तस्तु विष्णुरेवेति। अत्र हेतुमाह—

सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥

सर्वेत्युक्तो विष्णुरेव, विष्णावेव प्रसिद्धब्रह्मशब्दस्य सर्वगतत्वस्य चोपदेशात्। श्रूयते हि—'एतमेव ब्रह्मेत्याचक्षते' इति। स्मर्यते च—'वासुदेवात्परः को नु ब्रह्मशब्दोदितो भवेत्। स हि सर्वगुणैः पूर्णस्तदन्ये तूपचारतः॥' इति। 'यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥' इत्यादिश्रुतिषु हि विष्णोरेव सर्वगतत्वं प्रसिद्धम्॥

विवक्षितगुणोपपत्तेश्च ॥ २ ॥

'को नु ब्रह्मशब्दोदितो भवेत्, स योऽतो श्रुतः' इत्यादिना वक्तव्यानां गुणानां विष्णावेव भावादित्यर्थः॥

अनुपपत्तेस्तु न शारीरः॥ ३ ॥

जीवस्याणुत्वेन सर्वगतत्वानुपपत्तेरित्यर्थः॥

कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥

'आत्मानं परमै शंसति' इति वाक्यशेषे कर्तृतयोक्ताज्जीवात्कर्मतयोक्तस्य भेदादित्यर्थः॥

शब्दविशेषात् ॥ ५ ॥

ब्रह्मशब्दोपदेश इह शारीरस्याग्रहणे हेतुतयोच्यते। पूर्वं तु विष्णोर्ग्रहणे॥

स्मृतेश्च ॥ ६ ॥

'अहमात्मा गुडाकेश सर्वभूताशयस्थितः' इत्यादिस्मरणादित्यर्थः॥

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न, निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

सर्वभूतेष्वित्यल्पाश्रयत्वोक्तेश्चक्षुर्मयत्वादिना जीवव्यपदेशाच्च न विष्णुरिति चेत्, न, तस्यैवैवमुपास्यत्वात्, व्योमवत्सर्वगतत्वेऽप्यर्भकौकस्त्वसंभवाच्च॥

कल्पानां तु नित्यब्रह्मयज्ञविधिविषयत्वादपि नित्यता । श्रूयते हि—'यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्' इति । कथं ह्यनित्यानां नित्यविधिविषयत्वम् । तस्मादेषां नित्यविधिविषयत्वात्स्वातन्त्र्यमिति प्राप्ते, ब्रूमः—

नैतेषां पौरुषेयाणां स्वातन्त्र्यमुपपद्यते । स्पष्टं च पौरुषेयत्वं दृढकर्तृस्मृतेर्बलात् ॥

पुरुषपरम्परयैव ह्येषु कर्तारः स्मर्यन्ते, न काठकादिवत्प्रवचनेन परिहर्तुं शक्यन्ते । तत्र हि प्रवक्ताख्यानमात्रम्, अत्र तु पारम्पर्येणैव सर्वेषामविगीतस्मरणादनित्यत्वसंभवः । 'षडङ्गमेक' इति पक्षमतोपन्यासात्पूर्वपक्षोक्तिमात्रम् । नानाशाखागतलिङ्गादिकल्पित श्रुत्यर्थोपसंहारस्य कल्पसूत्रानपेक्षैः कर्तुमशक्यत्वात्तादर्थ्येनार्थवन्निबन्धनं नानर्थकम् ॥

एवंविधाश्च ग्रन्थाः प्रतिमन्वन्तरं क्रियमाणा येनकेनचित्सर्वं कालमविच्छिन्नपारम्पर्येण प्रवर्तन्ते । ते च वेदार्थकल्पनात्कल्पा इति नित्यवेद समाख्यया ब्रह्मयज्ञाङ्गतया विधीयन्त इत्यनित्यत्वेऽपि ग्रन्थव्यक्तीनां नित्यविधिविषयत्वोपपत्तिः । तस्मान्नैषां स्वातन्त्र्येण प्रामाण्यमिति शाक्यादिनिबन्धनानां सिद्धं धर्मे प्रमाणाभासत्वम् ॥

गेषु कृञः' इति पाणिनिना कृञ्धातोः प्रकथनार्थत्वस्याप्यनुशासनात् कर्तृस्मृतिः प्रवर्तकत्वविषयेत्यर्थः ॥

कल्पानां त्विति । 'ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामादच्छादिर्दर्शः' इत्युपक्रम्य 'यद्ब्राह्मणानि' इत्याद्यामातम् । अतो नित्यवेदविषयत्वात्कल्पानां नित्यत्वमवगम्यते । अन्यथा तदंशे वेदस्यानित्यसंयोगप्रसङ्गादित्यर्थः ॥

नैतेषामिति । अनादिवृद्धपरम्परागता कर्तृस्मृतिरनुवर्तते । सा च न प्रवक्तृविषयतया व्याख्यातुं शक्या । न हि ज्ञानमपि शब्दवत् व्याख्यायते । अतः स्वतन्त्रकर्तृविषयस्मृत्या दृढया पौरुषेयत्वमेषामविचलमित्यर्थः । ननु पठितपाठरूपाः कल्पाः पौरुषेयत्वे निष्फलाः स्युः; अतः शाखान्तरत्वमेषामवश्यमभ्युपेयमिति शङ्कां परिहरति—नानाशाखागतेति । वेदार्थकल्पनादिति; वेदार्थस्य ग्रथनादित्यर्थः । नित्यवेद समाख्ययेति । गवां प्रवाहनित्यत्वात् गवादिपदवतीनां चोदनानामिव नानित्यसंयोगप्रसङ्ग इति भावः । एवं कृतस्य विचारस्य फलमाह—शाक्यादीति । शाक्यादिग्रन्थाः सर्वथा न प्रमाणानीति यन्मात्रमुक्तं तस्य प्रतिष्ठापनम्, स्मृतिकल्पसूत्रादिषु यत् प्रत्यक्षश्रुतिविरुद्धस्य हेयत्वमुक्तं, यस्य प्रतिष्ठापनं चात्र पौरुषेयत्वव्यवस्थापनफलमित्यर्थः ॥

कल्पादिषु तु यानि प्रत्यक्षश्रुतिविरुद्धानि वचनानि, तेषामप्रामाण्यम्; यथा 'अविशेषादुभौ वा' इति सर्वपुरोडाशानां चतुर्धाकरणवचनम्; संनिहितं च शास्त्रम् 'आग्नेयं चतुर्धा करोति' इति। तथा 'स कृताकृतः' इति सवनीये पुरोडाशे विकल्पवचनं पूर्वपक्षमूलं, न वचनमूलम्, 'अन्यत्र तदर्थवादवचनात्' इत्याश्वलायनवचनात्। तथा 'यावद्भूयं

प्रत्यक्षश्रुतिविरुद्धं कल्पसूत्रोक्तं किंचिदुदाहरति—अविशेषादिति। 'आग्नेयं चतुर्धा करोति' इति प्रत्यक्षश्रुतिः। तत्र आग्नेयमिति देवताहितः, न तु संबन्धमात्रहितः। 'अग्नेर्ढक्' इति सूत्रेण विहिते निर्णीतविशेषे देवतासंबन्धार्थके संभवति 'सर्वत्राग्निकालभ्यां ढक्वक्तव्यः' इति वार्तिकसिद्धस्यानिर्णीतविशेषस्य संबन्धसामान्यस्य ग्रहणायोगात्। ततश्च आग्नेयपुरोडाशस्यैव चतुर्धाकरणं नैत्वग्नीषोमीयपुरोडाशस्यापीति न्यायस्थितेः। एवं सत्यप्यग्निसंबन्धमात्रे लक्षितोऽयमिति न्यायाभासमाश्रित्याग्निसंबन्धाविशेषादाग्नेयाग्नीषोमीयावुभावपि वा चतुर्धा कुर्यादिति कल्पान्तरमपि कल्पसूत्रकारैराश्रितम्। इदं तेषां पौरुषेयत्वेन प्रत्यक्षश्रुतिविरोधात् त्यक्तव्यमित्येतदस्य विचारस्य फलमित्यर्थः। तथा स कृताकृत इति। अग्नीषोमीयपशौ 'पशुमालभ्य पुरोडाशं निर्वपति' इति यद्देवत्यः पशुस्तद्देवत्यः पुरोडाशयागोऽपि विहितः। सोऽग्नीषोमीयविकृतौ सवनीयपशावपि प्राप्तः। तस्य करणमकरणं चोपपद्यत इति कल्पसूत्रकारैरुक्तम्—'स कृताकृतः' इति। अकरणं कथमुपपद्यत इत्याकाङ्क्षायां तैरेवोक्तम्—'अन्यत्र तदर्थवादवचनात्' इति। अयमाशयः—अग्नीषोमीयपशौ पशुपुरोडाशयागस्य वपोद्धरणप्रयुक्तपशुच्छिद्रापिधानार्थत्वमुक्तम्। 'ऊर्ध्वं पुरोडाश ऊर्ध्वमेव पशूनां मध्यतो दधात्यथो पशोरेव छिद्रमपिदधाति' इत्येवं पशुपुरोडाशस्य प्रकृतौ छिद्रापिधानार्थत्वश्रवणात् सवनीयपशुच्छिद्रापिधानस्य 'धानाः करम्भः परीवापः पुरोडाशः' इति विहितसवनीयहविर्भिरपि संभवात् सवनीयपशुपुरोडाशः कृताकृत इति। एवं यागे विनियुज्यमानेन पुरोडाशेन पशुच्छिद्रापिधानासंभवादसमर्थमेतदर्थवादवचनमिति तदवलम्ब्य कृताकृतत्ववचनं न्यायाभासमूलम्॥

'यावद्भूपं वेदिम्' इत्यापस्तम्बेन त्रिप्रमुतमुक्त्वं क्रतुमुपक्रम्योक्तम्। 'प्राच्येकादशिनि संमीयते यावद्भूपं वेदिमुद्धन्ति' इति प्रकृतौ यूपैकादशिन्यां यूपान्तर्वेदिबहिर्वेद्यन्तराले तिरश्चीनं मीयन्ते। तस्मिन् क्रतौ वेद्याः पुरस्तात् प्राच्यो मातव्याः। यावति प्रदेशे यूपा वर्तन्ते तावत्पर्यन्तं वेदिरुद्धननीया इति तदर्थः। अत्र 'यावद्भूपं वेदिमुद्धन्ति' इति वचनं 'तथा यूपस्य वेदिः' इति तृतीयाध्यायाधिकरणपूर्वपक्षमूलम्। तत्र हि 'अर्धमन्तर्वेदि मिनोत्यर्धं बहिर्वेदि' इति यूपमानदेशविधिवाक्ये अर्धमन्तर्वेदीत्यनेन यूपार्धमानाङ्गत्वेन वेदिर्विधीयते। अर्धान्तरमन्तर्वेदि बहिर्वेदि वेत्यनियमः। 'अर्धं बहिर्वेदि' इति च पक्षप्राप्तानुवाद इति पूर्वपक्षः। पाक्षिकानुवादस्यात्यन्तजघन्यत्वादन्तर्वेदिबहिर्वेदिशब्दाभ्यां लक्षितोऽन्तरदेशो यूपमानाङ्गत्वेन चोद्यते, न तु वेदिर्यूपार्धमानाङ्गत्वेनेति सिद्धान्तः। ततश्च यावद्भूपप्रदेशं वेदिमानविधानमिदं यूपार्धमानेति व्यक्तयावदङ्गभूतवेदिलाभार्थं प्रवृत्तमित्युदाहृताधिकरणपूर्वपक्षमूलम्। यद्यपि तदधिकरणसिद्धान्तरीत्या यूपमाना-

वेदिमुद्धन्ति' इति वेदेर्यूपाङ्गत्ववचनम्। 'जाघनीभिश्च पत्नीः संयाजयन्ति' इति जाघनीनां समुच्चयवचनं द्वादशाधिकरणपूर्वपक्षमूलम्, न वचनमूलम्। तत्र हि संनिहितं शास्त्रम्—'जाघन्या पत्नीः संयाजयन्ति' इति। 'विवक्षितं चैकत्वमुपादेयगतत्वात्' इति द्वादशे वक्ष्यते। तथा 'पुरोडाशं पर्यग्निकरोति' इति संनिहिते शास्त्रे 'सर्वाणि हवींषि' इति वचनं च दशमाधिकरणपूर्वपक्षमूलम्, न वचनमूलम्, 'पशुः पुरोडाशविकारः स्यात् पर्यग्निकरणदर्शनात्' इत्यष्टमेऽभिधानात्। तदिदमुक्तम्-'सर्वत्र च प्रयुक्तत्वात्संनिधानशास्त्राच्च' इति॥

क्षभूतान्तरालदेशलाभार्थं [1]प्राचीनशालायामेव वेद्या यावद्यूपता विधीयते, न तु कृत्स्नयूपमानोपयुक्तदक्षिणोत्तरदेशतयाऽपीति वक्तुं शक्यम्। अत एवात्र यूपावटदेशे प्रादेशविशालेऽप्यर्धप्रादेशमात्रविशालैव बेदिर्मातव्येति व्याख्यातम्; तथाऽपि मीमांसाविरोधं परिजिहीर्षतां तव्याख्यानम्। यावद्यूपमिति सौत्रशक्तिपर्यालोचनया तु प्राचीनतया तिरश्चीनतया च यावत्ता विवक्षितेत्यवसीयत इत्यभिप्रेत्येदं सूत्रं तदधिकरणपूर्वपक्षमूलमित्युदाहृतम्॥

सर्वजाघनीसमुच्चयवचनं द्वादशाध्यायाधिकरणपूर्वपक्षमूलम्। तत्र षड्वेकादशिन्याद्येषु सर्वपशुजाघनीसमुच्चयं[2] पूर्वपक्षं कृत्वा जाघनीसंस्कारार्थत्वे हि समुच्चयः स्यात्। न च प्रकृतिवदाग्नीषोमीये '[3]जाघन्या पत्नीः संयाजयन्ति' इति वाक्यं जाघनीसंस्कारार्थम्, येन बहुपशुकेषु तत्समुच्चयः स्यात्। किं तु दर्शपूर्णमासयोराज्यं जाघनी चेत्युभयं विकल्पेन पत्नीसंयोजनद्रव्यतया विहितम्। तथैव तद्विकृतौ पशावपि। तदुभयप्राप्तौ जाघनीनियमार्थमिदं वचनम्। अतो न जाघनीनां समुच्चयः। तस्माद्दर्शपूर्णमासयोर्जाघनीक्रयापेक्षणेऽपि पशौ जाघनीशब्देन क्रयानपेक्षणात्पशुबहुत्वे यथाकथंचिज्जाघन्या पत्नीसंयाजाः कार्या इति सिद्धान्तितम्। 'सर्वाणि हवींषि पर्यग्निकरोति' इति वचनं चमसाधिकरणपूर्वपक्षमूलम्। ग्रहैकत्वाधिकरणे 'ग्रहं संमार्ष्टि' इत्यत्र ग्रहैकत्वं न विवक्षितम्, ग्रहैकत्वोभयोद्देशेन संमार्गविधाने वाक्यभेदापत्तेः। अतः सोमावत्तैकादिनिर्हरणप्रयोजनस्य सर्वग्रहापेक्षितत्वादेकवचनस्य तद्ग्रहैकत्वविषयतयाऽर्थवत्त्वोपपत्तेः सर्वेषां ग्रहाणां संमार्ग इति सिद्धान्तिते तर्हि ग्रहत्वमध्याविवक्षितं कृत्वा चमसादीनामपि संमार्गोऽभ्युपेयः सोमपात्रत्वाविशेषादिति चमसाधिकरणे पूर्वपक्षः कृतः। तन्मूलं श्रुतपुरोडाशत्वाविवक्षया दधिश्रृतसाधारण्येन सर्वहविःपर्यग्निकरणवचनम्। 'पशुः पुरोडाशविकारः स्यात् पर्यग्निकरणदर्शनात्' इत्याष्टमिकाधिकरणविरुद्धं चेदम्। तत्र हि—पर्यग्निकरणसादृश्येन पशोः पुरोडाशविकारत्वं पूर्वपक्षं कृत्वा पर्यग्निकरणसादृश्यं बहिरङ्गम्, पशुप्रभवत्वमन्तरङ्गमित्यन्तरङ्गसादृश्येन सामान्यविकारत्वं सिद्धान्तितम्। ननु 'अविशेषाद्द्वौ वा' इत्यादीनि प्रत्यक्षश्रुतिविरुद्धत्वादप्रमाणानीत्येतद्वार्तिककारैर्नोक्तम्। कथमप्रमाणानीति निश्चित्योच्यत इत्याशङ्क्य भाष्योक्तमेवेदं स्पष्टत्वात् तैर्न व्याख्यातमिति दर्शयितुं भाष्यमुदाहरति—तदिदमुक्तमिति। भाष्यकल्पसूत्रकाराः सत्यवाचः,

---

1. प्राचीनतायामेव 2. सर्वजाघनीसमुच्चयं, 3. जाघन्याः पत्नीसंयाजा यजन्ति

तेषां वचनानि प्रमाणानीति शङ्कामुद्भाव्य तत्परिहारार्थं सर्वत्र चेत्यादिवाक्यम्। अस्यार्थो भाष्ये स्वयमेव विवृतः। आचार्यवचनं हि भवति—'पूर्वपक्षे सर्वासु तिथिषु अमावास्यया कर्तव्या' इति। संनिहितं च शास्त्रम् 'पौर्णमास्यां पौर्णमास्या यजेत; अमावास्यायाममावास्यया यजेत' इति। तेन श्रुतिविरुद्धवचनान्न सत्यवाच इति। एवं भाष्ये एकस्य प्रत्यक्षश्रुतिविरुद्धकल्पसूत्रवचनस्योदाहरणम् 'अविशेषादुभौ वा' इत्यादीनामप्युपलक्षणम्, तुल्यन्यायत्वादित्यभिप्रायेण तदिदमुक्तमित्युक्तम्॥

॥ होलाकाधिकरणम् ॥ ८ ॥

अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात् ॥ १५ ॥ अपि वा सर्वधर्मः स्यात्तन्न्यायत्वाद्विधानस्य ॥ १६ ॥ दर्शनाद्विनियोगः स्यात् ॥ १७ ॥ लिङ्गाभावाच्च नित्यस्य ॥ १८ ॥ आख्या हि देशसंयोगात् ॥ १९ ॥ न स्यादेशान्तरेष्विति चेत् ॥ २० ॥ स्याद्योगाख्या हि माथुरवत् ॥ २१ ॥ कर्मधर्मो वा श्रवणवत् ॥ २२ ॥ तुल्यं तु कर्तृधर्मेण ॥ २३ ॥

॥ जैमिनीयन्यायमाला ॥

होलाकादेर्व्यवस्था स्यात्साधारण्यमुताग्रिमः। देशभेदेन दृष्टत्वात् साम्यं मूलसमत्वतः ॥ २६ ॥
प्राच्यादिपदयुक्ताया श्रुतेरनुमितौ पदे। अर्थाबोधादमात्वं चेन्न सामान्यानुमानतः ॥ २७ ॥

स्मृतीनामाचाराणां च विरोधाविरोधयोः प्रामाण्याप्रामाण्ये प्रतिपादिते। स्वातन्त्र्यं च स्मृतीनां निरस्तम्। इदानीं केषांचिदाचाराणां स्मृतीनां च व्यवस्थाऽव्यवस्था वेति चिन्त्यते। होलाकादयो हि कैश्चिदेव प्राच्याद्यभिमानिभिरनुष्ठीयन्ते न सर्वैः।

अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात्॥

स्मृत्याचारप्रामाण्यविचारप्रसङ्गात् तद्व्यवस्थितिविचार इति प्रासङ्गिकीं संगतिमाह—स्मृतीनामिति। होलाकादय इति। होलाकादयः प्राच्यैरनुष्ठीयन्ते; आह्निकैवुकादयो दाक्षिणात्यैः; गणपूजादयः प्रतीच्यैः; उद्वृषभव्रतादय उदीच्यैः। फाल्गुनपौर्णमास्यनन्तरं प्रतिपदि क्रियमाणो वसन्तोत्सवो होलाका। स्वस्वकुलक्रमागतकरञ्जवृक्षादिस्थावरदेवतापूजनमाह्निकैवुकम्।

गृह्याणि, मानवातिरिक्ताश्च स्मृतयः कैश्चिदेव काश्चित्पठ्यन्ते न सर्वैः। तदेतान्स्मृत्याचारानुदाहृत्य विचार्यन्ते—किमेते तेषामेव धर्मा उत सर्वेषामिति। तदर्थं च किं तेषां स्मृतिर्मूलभूता व्यवस्थितविषया शक्यते कल्पयितुं उत सर्वसाधारण्येनैवेति। तत्र—

लिङ्गव्यवस्थया लिङ्गी व्यवस्थां प्रतिपद्यते। धूमो हि यत्र तत्रैव वह्निर्नान्यत्र मीयते॥

स्मृत्याचारलिङ्गगम्या श्रुतिर्न प्रत्यक्षा। तच्च लिङ्गं केषुचिदेवोपलभ्यते। अतस्तद्विषयतयैव श्रुतिरनुमातुं शक्यते। न हि तस्याः सर्वविषयत्वे प्रमाणमास्ति। व्यवस्थितविषयत्व एव स्मृत्याचारयोरुपपत्तेः। यदि च साधारणी श्रुतिः स्यात्ततस्तन्मूलौ स्मृत्याचारावपि

मातृगणपूजनं गणपूजा। ज्येष्ठपौर्णमास्यां क्रियमाणं वृषभाणामभ्यर्चनपूर्वं धावनमुद्वृषभयज्ञः। **गृह्याणि मानवातिरिक्ताश्च स्मृतय इति**। गौतमीयगोभिलीये छन्दोगैरेव गृह्येते। वासिष्ठछन्दयो बह्वृचैरेव, आपस्तम्बबोधायनीयादयस्तैत्तिरीयैरेव, शङ्खलिखितोक्तं वाजसनेयिभिरेव गृह्यते। **किमेते तेषामिति**। किं छन्दोगादीनामेव गौतमाद्युक्ता धर्माः, उत सर्वेषां बह्वृचादीनामपीत्यर्थः। अत्र सर्वसाधारण्यासाधारण्यविचारो गृह्यस्मृत्युक्तसर्वधर्मविषयो न भवति; स्थालीपाकादिषु शाखान्तराधिकरणन्यायसिद्धस्य सकलशाखाम्नातसमस्ताङ्गोपसंहारस्य पूर्वपक्षेऽप्यविचार्यत्वात्, उपनयनोपाकरणमहानाम्नीव्रतादीनां तत्तद्वेदाध्ययनाङ्गसंस्काराणां तत्तदध्ययनानुग्राहकोपकारभेदेन प्रतिशाखं व्यवस्थिततया सिद्धान्तेऽपि तव्यवस्थितेरविचार्यत्वाच्च। 'बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्तितम्। तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत्॥' इति स्मरणस्य तद्विषयत्वाच्च। किं तु ये पुरुषधर्मा गौतमापस्तम्बाद्युक्ताः 'अधेनुं धेनुभव्येति ब्रूयात्' 'अभद्रं भद्रमिति' 'कपालं भगालमिति' 'मणिधनुरितीन्द्रधनुः' (गौ. धर्म. ९. २०, २१, २२, २३) इत्यादयः, 'माल्यालिप्तमुख उपलिप्तकेशश्मश्रुरक्तोऽभ्यक्तो वेष्टित्युपवेष्टिती काञ्चुक्युपानही पादुकौ' (आप. धर्म. १. २. ८.) इत्यादयश्च तन्मात्रविषयाः॥

व्यवस्थितधर्मत्वसिद्ध्यर्थं व्यवस्थितविषयश्रुत्यनुमानसंभवमुपपादयन् पूर्वपक्षमाह—**लिङ्गव्यवस्थयेति**॥

ननु लिङ्गं पक्षधर्मतामपेक्ष्य बोधकत्वात् पक्ष एव लिङ्गिसाधकमस्तु; स्मृत्याचारौ त्वनुपपत्त्या श्रुतिकल्पकौ। सा चानुपपत्तिर्होलाकादिकर्तव्यताबोधकश्रुतिसद्भावमात्रेणापि शाम्यतीति न व्यवस्थासिद्धिरित्याशङ्क्याह—**न हीति**। साधिकारैव श्रुतिरनुमेया, अनुष्ठानपरिज्ञाने कल्पितश्रुत्यनुष्ठानानिवृत्तेः। अधिकारिविशेषश्च कल्पकस्मृत्याचारबलादेव लभ्यते चेन्नान्यतोऽन्वेषणीयः। लभ्यते च गृह्यस्मृत्युक्तधर्माणां तत्तत्परिग्रहे छन्दोगादिः, आचारप्राप्तहोलाकादिधर्माणां प्राच्यादिराधिकारी। अतोऽत्र मूलश्रुतेः सर्वविषयत्वे नास्ति प्रमाणम्। प्रत्युत व्यवस्थितविषयत्व एवेति

सर्वपुरुषगामिनौ स्याताम्। यदि बालस्यादिनिमित्तमितरेषामनाचरणं तदा स्यादपि साधारणानुमानम्। यत्तु नियमेन प्राच्याद्यभिमानिनामाचरणमितरेषां चानाचरणं न तत्साधारण्यानुमानेऽवकल्पते। तस्माद्व्यवस्थितमेषां धर्मत्वमिति प्राप्ते, अभिधीयते—

विशेषाभावमात्रेण प्रसिध्येत्सर्वधर्मता। विशेषणाद्व्यवस्था स्यात्तच्च नेहोपपद्यते॥

यदुक्तं सर्वधर्मत्वे प्रमाणं नास्तीति तदयुक्तम्। न हि सर्वधर्मत्वादिना प्रमाणमुपन्यसितव्यम्, उभयवादिसिद्धेनैव विधिनाऽस्ति विशेषोपादाने सर्वधर्मत्वसिद्धेः। व्यवस्थादिना तु वक्तव्यं विशेषे प्रमाणम्। तच्च नास्ति। तथा हि—स्मृतयस्तावत्साधारण्येनैव सिद्धयतीति न तेषु चरणविशेषोपादानमस्ति। स्मृत्यनुसार्येव च श्रुतिकल्पनमिति तदपि साधारणं न्याय्यम्। पाठव्यवस्था तु कर्तुः तच्चरणत्वात्। कर्ता हि छन्दोगः स्वशिष्यांश्छन्दोगान् स्वग्रन्थमध्यापयामास। तेऽप्यन्यांश्छन्दोगानित्येवं गौतमीयस्य छन्दोगैः

इवकारयुक्तः पाठः साधुः। अपिशब्दयुक्तपाठे अपिशब्द एवकारार्थः, अव्ययानामनेकार्थत्वात्। व्यवस्थितविषयत्व एव स्मृत्याचारयोरुपपत्तिं व्यतिरेकमुखेन दृढीकरोति—यदि चेति। नन्वन्येषामनाचरणमालस्यादिनाऽप्युपपद्यत इत्यन्यथासिद्धम्, ततश्च व्यवस्थिताचरणं न व्यवस्थितश्रुत्यनुमापकमित्याशङ्क्याह—यदि हीति। प्राच्यादीनामेवैते धर्माः, नान्येषामित्यभिमन्यमानानामनाचरणमालस्यादिमूलत्वेन न संभावयितुं शक्यमित्यर्थः। एवं च [1]प्रभाकरेण [2]विवरणटीकायां यदुक्तम्—'होलाकादिपदार्थः कर्तव्यः इत्येतावन्मात्रविषयमूलश्रुत्यनुमानेऽपि तस्यानुष्ठेयता सिध्यति, योग्यस्य शक्तस्याधिकारिणोऽर्थादपि सिद्धेः। न चान्येषामकरणाद्व्यवस्थितविषयश्रुत्यनुमानम्, अन्यैर्न कर्तव्यमिति श्रुत्यनुमानं वा, तस्यालस्यादिनाऽप्युपपत्तेः' इति। तन्निरस्तम्। प्राच्यादीनामेवायं धर्मः, न त्वन्येषामित्यभिमानेनान्येषामनाचरणनियमस्य व्यवस्थितविषयश्रुतिं विना अनुपपत्तेरित्याह—यच्चिति॥

विशेषाभावमात्रेणेति। यदुक्तम्—सर्वधर्मत्वे प्रमाणं नास्तीति, तत्रापोद्यतम्। स्मृत्याधारकल्प्यश्रुतिषु केषांचिद्व्यावर्तकस्य विशेषणस्याभावेनैव त्रैवर्णिकत्वादिना ये योग्याः शरीरेन्द्रियषाढवेन युक्ताः षण्ढपतितप्रतिलोमत्वादिराहित्येनानिषिद्धाश्च तथाभूतसर्वविषयत्वलाभात्। किं तु व्यवस्थितविषयत्व एव एवंभूतविशेषणापेक्षा। तदत्र न संभवतीत्यर्थः। तदसंभवमुपपादयति—तथा हीत्यादिना। स्मृतिमूलश्रुतिषु छन्दोगादिविशेषणं स्मृतिबलात्तावन्न प्राप्नोति, स्मृतिषु तथा विशेषणाभावात्। छन्दोगादिपरिग्रहविशेषादपि न प्राप्नोति, गौतमादेश्छन्दोगादिरूपत्वेन छन्दोग-

---

1. प्राभाकरेण 2. विवरणादि॰

पाठः। तथाऽऽपस्तम्बग्रन्थस्य तैत्तिरीयैः। एवं गृह्यग्रन्थानामपीति व्यवस्थितधर्मविषयकमप्रमाणकम्। आचाराणां तु सर्वाचारित्वनुगतमनाचरितृभ्यश्च व्यावृत्तमाकृतिव्यक्तिगुणसंस्थानादिकं न किंचिद्विशेषणं संभवति, यदुपादाय होलाकाद्यधिकारं विशिष्यात्। तथा प्राच्यादिशब्दाख्याऽपि व्यभिचारिणी, अदेशज्ञानामपि केषांचिद्व्यवहारात्। चिरविनिर्गतत्रपौत्रादीनां चाऽत्यासन्नेऽपि समाख्यायामाचरणात्। तस्मादसति विशेषणे सर्वधर्मस्मारकाणां स्मृतीनां चेति सिद्धम्॥

रूपतच्छिष्यतच्छिष्याध्ययनपरम्परयाऽप्यप्रयोजकस्य परिग्रहविशेषस्य मूलश्रुतौ विशेषकल्पनासामर्थ्याभावात्। आचारकल्पश्रुतिष्वपि विशेषणं न संभवति. होलाकाद्याचरितृष्वनुगतानतिप्रसक्तस्य विशेषणस्य दुर्वचत्वादित्यर्थः। चरणानां तच्छाखाध्यायिनः छन्दोगादयः। आकृतिर्जातिः; यथा—'राजा राजसूयेन' इत्यत्र क्षत्रियत्वम्। व्यक्तिर्द्रव्यम्; यथा—'वैश्वामित्रो होता' इत्यत्र वैश्वामित्रः। गुणो रूपादिः; यथा—'शुक्लो होता' इत्यत्र शौक्ल्यम्। संस्थानमविकलाङ्गत्वादि; यथा—'अन्यूनानतिरिक्ताङ्गा ऋत्विजः' इति। आदिशब्देन क्रियामयादिगृह्यते। क्रिया—'यावद्वोऽश्नान् प्रतिगृह्णीयात्' इत्यत्र प्रतिग्रहः। आमयः—'यः पापयक्ष्मगृहीतः स्यात्' इत्यत्र यक्ष्मा। अत्र जातिः स्वतोऽनुगता; व्यक्त्यादयस्तत्तज्जात्यवच्छेदेन। ननु [1]प्राच्यादिसमाख्या एव उपपदं स्यादित्याशङ्क्याह—प्राच्यादीति। प्राच्यत्वादिकं न होलाकाद्यनाचरितृव्यावृत्तम्, तदाचरित्रनुगतं च; प्राच्यादिष्वपि केषांचिदालस्यादिना तदनाचारदर्शनात्, [2]प्रागादिदेशभ्यश्चिरनिर्गतानामन्यत्र वसतां ये पुत्रादयः तेषामप्याचारदर्शनाच्च। न हि ते प्राच्यादयो भवन्ति। 'तत्र जातः' 'साऽस्य निवासः' 'तत आगतः' इति पाणिनिनोक्तानां तद्देशजातत्वतन्निवासित्वतदागतत्वरूपाणां 'द्युप्रागपागुदक्प्रतीचो यत्' इति सूत्रविहितयत्प्रत्ययार्थानामभावादित्यर्थः। अव्यवस्थिताश्च प्राग्देशादयः, यः प्राग्देश इत्युच्यते तस्यैव तदक्षिणदेशं प्रत्युदग्देशत्वात्। न च 'विन्ध्यात्तु दक्षिणा देशा दक्षिणापथसंज्ञकाः' इति विन्ध्यमवधीकृत्य दक्षिणापथसंज्ञावत् क्वचित् क्वचिद्देशेऽनादिवृद्धव्यवहारासिद्धप्रागादिसंज्ञाऽस्ति। नापि शरावतीमवधीकृत्य शाब्दिकपरिभाषाङ्कितप्रागुदक्संज्ञावत् क्वचित्क्वचित्परिभाषिता साऽस्ति। मध्यदेशमार्यावर्तं वाऽवधीकृत्य प्रागादिसंज्ञा भविष्यन्तीति चेत्—न, 'हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि। प्रत्यगेव प्रयागाच्च मध्यदेशः स उच्यते॥' इत्युक्तलक्षणान्मध्यदेशात् 'आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमागयोः' इत्युक्तलक्षणादार्यावर्तात्तदुदग्देशस्य शिष्टनिवासस्याभावात्। एवं कल्पश्रुतिष्वपपदासंभवात् व्यवस्थिताचारगृह्यस्मृतिप्राप्ता धर्माः सर्वसाधारणा इत्यभिप्रेत्योपसंहरति—तस्मादिति॥

---

1. प्राच्याद्युपपदं 2. प्राच्यादि॰

॥ व्याकरणाधिकरणम् ॥ ९ ॥

प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात् ॥ २४ ॥ शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम् ॥ २५ ॥ अन्यायश्चानेकशब्दत्वम् ॥ २६ ॥ तत्र तत्त्वमभियोगविशेषात्स्यात् ॥ २७ ॥ तद्दर्शनिश्चानुरूप्यत्वात् ॥ २८ ॥ एकदेशत्वाच्च विभक्तिव्यत्यये स्यात् ॥ २९ ॥

॥ जैमिनीयन्यायमाला ॥

प्रयोगाद्यादिषु साधुत्वे प्रयोगे वा न कश्चन । नियमोऽत्रास्ति वा नास्ति व्याकृतेर्मूलवर्जनात् ॥ २८ ॥
साधूनेव प्रयुञ्जीत गव्याद्या एव साधवः । इत्यस्ति नियमः पूर्वपूर्वव्याकृतिमूलतः ॥ २९ ॥
अश्वालम्भनशास्त्रस्य दन्त्यतालव्यसंशयात् । अनात्वेऽदन्त्यनिर्णीतिरालोकव्याकृतेर्बलात् ॥ ३० ॥

स्मृत्याचारविरोधे स्मृतेर्बलीयस्त्वमाचारेष्वप्यभियुक्ताचारस्य बलीयस्त्वं स्थितम् । इदानीं शब्दापशब्दविभागेऽपि किं व्याकरणस्मृतेस्तदभियुक्तानामाचारस्य चेतरलोकव्यवहारात् बलीयस्त्वं संभवति न वेति चिन्त्यते । तदिहैकस्मिन्नर्थे प्रयुज्यमानान्गोगावीगोण्या-

---

प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात् ॥

संगतिप्रदर्शनार्थं वृत्तानुवादपुरःसरं विचारविषयं दर्शयति—स्मृत्याचारेति । स्मृत्याचारविरोधे स्मृतिबलीयस्त्वं स्मृत्याचारविरोधवर्णके व्युत्पादितम् । अभियुक्तानभियुक्ताचारविरोधे अभियुक्ताचारबलीयस्त्वं पीलुशब्दादिविषयकवर्णके व्युत्पादितम्। इदानीं व्याकरणस्मृतितदभियुक्ताचारयोः शब्दापशब्दविभागेऽप्यनभियुक्ताचारात् बलीयस्त्वं संभवति न वेति चिन्त्यत इत्यर्थः । सामान्येन स्मृतितदभियुक्ताचारयोरुक्तेऽपि बलीयस्त्वे केनचिद्धेतुना व्याकरणस्मृतितदभियुक्तप्रयोगरूपाचारयोर्बलीयस्त्वमाक्षिप्य तत्समाधानं क्रियत इत्याक्षेपिकी संगतिरनेन दर्शिता । स्मृत्याचारविरोधानन्तरं प्रवृत्तः सर्वोऽपि विचारः प्रासङ्गिक इत्यभिप्रेत्य तत्प्रसङ्गकेन मूलविचारेणेयं संगतिरुक्ता । ननु किमस्य विचारस्य फलम्? कश्च सामान्यतः सिद्धेऽपि स्मृतितदभियुक्ताचारबलीयस्त्वे क्वचिद्विशेषे तदाक्षेपहेतुः? इत्याकाङ्क्षायां फलफलिविषयया संशयपरम्परया तद्द्वयं दर्शयति—तदिहेति । तत्र प्रथमः फलसंशयः । अत्र किं व्याकरणानुगता एव प्रयोक्तव्याः, उत गाव्यादयोऽपि इत्येतावदेव संशयकोटिद्वयम् । साधवोऽसाधव इति विशेषणद्वयं तु द्वैतीयीकतदर्थसंशयकोटिद्वय-

भद्र मत्पितुरनन्तरं महीं शासतो मम समुद्रमेखलाम् ।
अर्धराज्यपरिभोगभाजनं[1] त्वां विधास्य इति सख्यमीदृशम् ॥ २३ ॥

भद्रेति—हे भद्र हे सौम्य, त्वां मत्पितुरनन्तरं समुद्र एव मेखला यस्यास्तां महीं भूमिं, शासतो मम, अर्धं राज्यस्य अर्धराज्यम्, 'अर्धं नपुंसकम्' इति समांशवाचिनोऽर्धशब्दस्य समासः । अर्धराज्यस्य परिभोगः अनुभवः तस्य भाजनं योग्यम्, 'भाजनं योग्यपात्रयोः' इति रत्नमालायाम् । विधास्ये करिष्यामि । महीमर्धराज्यं तुभ्यं दास्यामीत्यर्थः । इत्यनेन प्रकारेण, सख्युर्भावः सख्यं सौहृदम्, 'सख्युर्यः' इति यप्रत्ययः । ईदृशमीदृग्विधं हि ॥ २३ ॥

सोमके धृतभुजोजसि क्रमात्पैतृकं सुहृदि संश्रिते पदम् ।
तत्सकाशमगमं न निःस्पृहः सेवयाऽनुमितधर्मविप्लवः ॥ २४ ॥

सोमक इति—धृतभुजोजसि धृतभुजपराक्रमे सुहृदि मित्रे सोमके द्रुपदे क्रमात् पितुरागतं पैतृकं 'पितुर्यच्' इति चकारात् ठञ् । पदं स्थानं, राज्यमित्यर्थः । संश्रिते प्राप्ते सति, निःस्पृहो निरीहः, यतः सेवयाऽनुमितः ऊहितः धर्मविप्लवः सुकृतनाशो यस्य स तथोक्तः, तत्सकाशं द्रुपदसमीपं, नागमं न प्रापम् । गमेर्लुङि च्लेरङादेशाभावः ॥ २४ ॥

मुग्धमेनमथ दुग्धकाङ्क्षिणं पीतपिष्टरसदूषितात्मजम्[2] ।
वीक्ष्य दुर्गततया गरीयसीमासदत्कृपयवीयसी शुचम् ॥ २५ ॥

मुग्धमिति—अथानन्तरं कृपयवीयसी कृपस्वसा मम भार्या, दुग्धकाङ्क्षिणं क्षीरकामिनं मुग्धं मूढम्, अत एव पीतेन पिष्टरसेन पिष्टजलेन दूषितम्, आत्मजं पुत्रं वीक्ष्य, दुर्गततया दारिद्र्येण, गरीयसीं गुरुतरां, शुचं शोकमासदत् प्रापत् । 'धिक् कष्टमहो मे दारिद्र्यम्' इति शुशोचेत्यर्थः । लोके हि दुर्गताः शिशुभिः क्षीरे याचिते सति तत्संपादयितुमशक्नुवन्तः पिष्टमिश्रितजलेन शिशून् प्रतारयन्तीति भावः । सदेर्लुङि च्लेरङादेशाभावः ॥ २५ ॥

स्वीकृता तदनु गर्हिता मया दैन्यवृत्तिजननी च याचना ।
अप्यकृत्यविधिना विपश्चितः कुर्वते खलु कुटुम्बरक्षणम् ॥ २६ ॥

स्वीकृतेति—तदनु तदनन्तरं, मया च दैन्यवृत्तिजननी दैन्यवृत्तेरुत्पादयित्री, अत एव गर्हिता निन्दिता, 'देहीति वचनं कष्टम्' इति वचनादिति भावः । याचना याच्ञा, 'सर्वे धातवः

1. •भागिनं 2. •मानसम्

स्वार्थे ण्यन्ताः' इति मते याचतेः स्वार्थे ण्यन्तात् 'ण्यासश्रन्थो युच्' इति क्रियां युच्प्रत्ययः। स्वीकृता अङ्गीकृता। तथा हि—विपश्चितो विद्वांसः, 'विद्वान् विपश्चिद्दोषज्ञः' इत्यमरः। अकृत्यविधिना अकार्यकरणेनापि, कुटुम्बरक्षणं सुतादिपोष्यवर्गपोषणम्, 'कुटुम्बं तु सुतादिकम्' इति वैजयन्ती। कुर्वते खलु। 'वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्॥' इति स्मृतेरिति भावः। करोतेः कर्तरि लट्॥ २६॥

यज्ञसेनमुपगम्य संसदि स्वेन मां प्रियसखं न्यवेदयम्।
सोऽपि कोपकलुषीकृताननः सोपहासमिदमुद्धतोऽवदत्॥ २७॥

यज्ञसेनमिति—यज्ञसेनं द्रुपदम्, उपगम्य प्राप्य, संसदि सभायां स्वेन आत्मनैव, न तु दूतान्तरेणेति भावः। मां प्रियसखं प्रियमित्रम्, 'राजाहःसखिभ्यष्टच्' इति टच्। न्यवेदयम् निवेदितवानभवम्। उद्धतो दृप्तः, सोऽपि द्रुपदः कोपेन कलुषीकृतमाननं यस्य स तथोक्तः सन्, सोपहासं सोल्लुण्ठनम्, इदं वक्ष्यमाणं अवदत् उक्तवान्॥ २७॥

दुर्गतस्य तव च द्विजन्मनः [1]क्षत्रियस्य मम संपदां निधेः।
काचरत्नघटनोपमं द्वयोः सख्यमेतदुपपद्यते कुतः॥ २८॥

दुर्गतस्येति—दुर्गतस्य दरिद्रस्य, 'दरिद्रो दुर्गतोऽपि सः' इत्यमरः। द्विजन्मनो विप्रस्य तव, संपदां निधेः स्थानस्य, क्षत्रियस्य 'क्षत्राद्घः' इति घप्रत्ययः। 'भूभुजश्च मम बाहुजन्मनः' इति वा पाठः। मम च द्वयोः, काचो मृद्भेदः 'काचस्तु शिक्ये मृद्भेदे' इति रत्नमालायाम्। रत्नं मणिः, 'रत्नं श्रेष्ठे मणौ' इति वैजयन्ती, तयोः काचरत्नयोः घटना एकत्र संयोजनं उपमा यस्य तत्तथोक्तम्। एतत्सख्यं कुतः कस्मादुपपद्यते उपपन्नं भवति। यथा काचरत्नयोर्घटना लोके उपहासकारिणी भवति, तद्वदावयोः सख्यमपीति भावः। पद्यतेर्दैवादिकाल्लट्॥ २८॥

इत्थमप्रियगिराऽवमानितस्त्वत्सकाशमयमागतो जनः।
नप्तृभिस्तव महास्त्रपारगैः पूरयिष्यति निजं मनोरथम्॥ २९॥

इत्थमिति—इत्थमनेन प्रकारेण, अप्रियगिरा अप्रियवचनेन द्रुपदेन, अवमानितः तिरस्कृतः अयं जनः, अहमित्यर्थः। त्वत्सकाशं त्वत्समीपम्, आगतः सन्, महास्त्राणां पारमन्तं गच्छन्तीति महास्त्रपारगाः, 'अन्तात्यन्त' इत्यादिना डप्रत्ययः। तैः तव नप्तृभिः पौत्रैः, निजमात्मीयं, मनोरथमभिलषितं, पूरयिष्यति पूर्णं करिष्यति। पूरिश्चौरादिकः॥ २९॥

तन्निशम्य वचनं प्रमोदवान्कुम्भजाय गुरवे कुरूद्वहः।

1, भूभुजश्च मम बाहुजन्मनः

प्रश्रितः प्रथममर्थमूर्जितं पौत्रवर्गमसमं[1] ददौ ततः ॥ ३० ॥

तदिति—कुरूद्वहो भीष्मः, तत् पूर्वोक्तं वचनं निशम्य, प्रमोदवान् हर्षयुक्तः, प्रश्रितो विनीतः सन्, कुम्भजाय कुम्भसंभवाय, गुरवे द्रोणाय प्रथमं प्राक्, ऊर्जितं प्रभूतं अर्थं धनं ददौ। 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः। ततोऽनन्तरम्, असममतुलं, पौत्रवर्गं नप्तृसमूहं, ददौ। अध्यापयितुमिति शेषः ॥ ३० ॥

रेणुकातनयपादरेणुभिस्तेन पूताशिरसा नृपात्मजाः।
आयुधेषु विधिवद्विनिन्यिरे धन्विनश्च [2]भुजदर्पमात्मनः ॥ ३१ ॥

रेणुकेति—रेणुका जमदग्निप्रिया; 'जमदग्निप्रियायां च तुषरेणौ च रेणुका' इति रत्नमालायाम्। तस्यास्तनयः परशुरामः, तस्य पादरेणुभिः, पूताशिरसा पवित्रितमूर्ध्ना, तेन द्रोणेन कर्त्रा, नृपात्मजाः राजकुमाराः, आयुधेषु विषये विधिवत् विध्यर्हं यथा भवति तथा, विनिन्यिरे शिक्षिताः। नयतेः कर्मणि लिट्। इतरे धन्विनः धानुष्काश्च, आत्मनां स्वेषां, भुजदर्पं बाहुमदं, विनिन्यिरे, विजह्रुरित्यर्थः। 'कर्तृस्थे चाशरीरे कर्मणि' इति नयतेः कर्तर्यात्मनेपदम् ॥ ३१ ॥

भूतलैकतिलकेन [3]भृष्णुना मातरिश्वतनयानुजन्मना।
कृष्यते स्म गुणवच्छरासनं चित्तमस्य च गुरोरहर्निशम् ॥ ३२ ॥

भूतलेति—भूतलस्य एकतिलकेन असाधारणभूषणेन भृष्णुना भविष्णुना, 'भुवश्च' इति क्नुप्रत्ययः। 'भृष्णुर्भविष्णुर्भविता' इत्यमरः। मातरिश्वतनयस्य वायुनन्दनस्य अनुजन्मना अनुजेनार्जुनेन, गुणवत् सज्यं, शरासनं कार्मुकं विकृष्यते स्म आकर्णमाकृष्टम्। अस्य गुरोर्द्रोणस्य गुणवत् सत्त्वादिगुणयुक्तम्, 'मौर्व्यां द्रव्याश्रिते सत्त्वशौर्यसन्ध्यादिके गुणः' इत्यमरः। चित्तं चेतश्च, अहर्निशं सर्वदा, कृष्यते स्म, प्रह्वीकृतमित्यर्थः ॥ ३२ ॥

एकलव्यमथ जात्वनुज्ञया शिक्षितास्त्रमधिकं धनुष्यसौ।
दक्षिणार्थहृतदक्षिणाङ्गुलिः फल्गुनस्य सममेव तं व्यधात् ॥ ३३ ॥

एकलव्यमिति—अथानन्तरं, जातु कदाचित् असौ द्रोणः, मृन्मयद्रोणं गुरुं कृत्वा अधिकं यथा भवति तथा शिक्षितास्त्रमभ्यस्तास्त्रविद्यं, एकलव्यमेकलव्याख्यं तं प्रसिद्धं कंचित् शिष्यम्, अनुज्ञया तदनुमत्या, दक्षिणार्थं गुरुदक्षिणार्थं हृता गृहीता खण्डितेत्यर्थः, दक्षिणाङ्गुलिः

---

1. •मनर्घं 2. भुवि 3. जिष्णुना

अन्येतरकरशाखा येन स तथोक्तः सन्, धनुषि विषये, फल्गुनस्यार्जुनस्य, सदृशमेव व्यधात् विहितवान्। दधातेर्लुङ् ॥ ३३ ॥

स्थापितं कलशजेन पादपे लक्षितं शिरसि केवलं नरः ।
पत्रिणा कृतकभासमच्छिनन्मत्सरेण [1]सममन्यधन्विनाम् ॥ ३४ ॥

स्थापितमिति—कलशजेन द्रोणेन, पादपे वृक्षे स्थापितमर्पितं, शिरसि केवलं लक्षितं दृष्टं विषयान्तरदर्शनविरहेण स्वेन दृश्यमानशिरस्कमित्यर्थः। कृतकभासं कृत्रिमपक्षिविशेषम्, 'भासे-भासि खगे गोष्ठे' इति रत्नमालायाम्। अन्येषां स्वव्यतिरिक्तानां, धन्विनां धनुर्भृतां मत्सरेण समं, नरः अर्जुनः, पत्रिणा बाणेन, अच्छिनत् चिच्छेद। 'नरो मनुष्यार्जुनयोः' इति रत्नमालायाम् ॥

स्नातुमप्सु मुरुरेकदा वसन्ग्राहमात्तचरणं घ्नतः शरैः ।
अर्जुनादलभताधिकां मुदं दिव्यमस्त्रमपरं ततश्च सः ॥ ३५ ॥

स्नातुमिति—गुरुः द्रोणः, एकदा एकस्मिन् दिवसे, स्नातुं स्नानं कर्तुम्, अप्सु वारिषु, वसन् तिष्ठन्, आत्तचरणं गृहीतपादं, ग्राहं नक्रम्, 'ग्राहोऽवहारो नक्रः' इत्यमरः। शरैः बाणैः घ्नतः खण्डयतः, अर्जुनात् सकाशात्, अधिकामतिशयितां, मुदमलभत प्राप। स चार्जुनश्च, ततो द्रोणात् सकाशात् अपरमन्यत् दिव्यमस्त्रम् अलभत। ग्राहखण्डनात्तुष्टो गुरुरपि ब्रह्मशिरो नाम दिव्यास्त्रं ददावित्यर्थः ॥ ३५ ॥

आप रङ्गमथ शिल्पिनिर्मितं कल्पमङ्गलबलिं कृती गुरुः ।
राजपुत्रनिवहेन संयुतस्तस्य दर्शयितुमस्त्रकौशलम् ॥ ३६ ॥

आपेति—अथ कृती कुशलो गुरुः, राजपुत्राणां निवहेन समूहेन संयुतः, तस्य राजपुत्र-निवहस्य, अस्त्रकौशलमायुधनैपुण्यं, दर्शयितुं, प्रेक्षकेभ्य इति शेषः। शिल्पिभिः कारुभिः, निर्मितं कल्पमङ्गलबलिं विहितमङ्गलपूजं, रङ्गं नृत्तस्थलं, खुरलीशालामिति यावत्। आप प्राप्तवान्। 'रङ्गं वपुषि रङ्गो ना रागे नृत्तस्थले रगे' इति रत्नमालायाम् ॥ ३६ ॥

प्रेक्षकैर्विविधमञ्चवर्तिभिः पौरजानपदभूमिभर्तृभिः ।
रङ्गसद्म निबिडं तदाऽभवन्निर्जरैरपि विमानगैर्नभः ॥ ३७ ॥

प्रेक्षकैरिति—रङ्गसद्म रङ्गगृहं कर्तृ, तदा तस्मिन् काले, विविधेषु मञ्चेषु चतुःस्तम्भ-

---

1. समसम इति नाथ

रूपेषु पर्यङ्केषु वर्तितुं शीलमेषामस्तीति विविधमञ्चवर्तिनः तैः, ताच्छील्ये णिनिः। पुरे भवाः पौराः, जनपदेषु भवा जानपदाः भूमिभर्तारो राजानः, तैर्निबिडं निरन्तरं रङ्गसद्म अभवत्। नभः गगनमपि 'नभोऽन्तरिक्षं गगनम्' इत्यमरः। निरुद्गतैर्विमानचारिभिः, निर्गता जरा येषां ते निर्जराः अमराः, 'अमरा निर्जरा देवाः' इत्यमरः। तैर्निबिडमभवत्। 'नेर्विडज्विरीनचौ' इति निरुद्गात् विडच्प्रत्ययः। देवाश्च द्रष्टुमागता इत्यर्थः॥ ३७॥

तत्र ते गुरुकृपार्हणाकृतो धर्मनन्दनमुखा धनुर्भृतः।
स्थूलसूक्ष्मचलनिश्चलादिकं लक्ष्यमाशु [1]विविधुः शिलीमुखैः॥

तत्रेति—तत्र रङ्गे, गुरुकृपयोर्द्रोणकृपाचार्ययोरर्हणाकृतः पूजाकारिणः, धर्मनन्दनमुखाः युधिष्ठिरप्रमुखास्ते धनुर्भृतः, स्थूलं पृथुलं 'पीनपीवनी तु स्थूलपीवरे' इत्यमरः। सूक्ष्मश्च, चलं चञ्चलं, निश्चलं स्थिरं, तेषां द्वन्द्वः, स्थूलसूक्ष्मचलनिश्चलम्। 'सर्वो द्वन्द्वो विभाषैकवद्भवति' इत्येकवद्भावः; तदादिर्यस्य तत्। 'षष्ठाद्विभाषा' इति कप्रत्ययः। लक्ष्यं शरव्यं 'वेध्यं लक्ष्यं शरव्यं च' इत्यमरः। शिलीमुखैः बाणैः 'आलिबाणौ शिलीमुखौ' इत्यमरः। आशु शीघ्रं विविधुः जघ्नुः। व्यधेर्लिट्॥ ३८॥

आयुधेषु कतिचित्परिश्रमं खड्गमुद्गरमुखेष्वदर्शयन्।
चर्यया च रथहस्तिवाजिनां पश्यतां कतिचिदादधुर्मुदम्॥ ३९॥

आयुधेति—कतिचित् धनुर्भृतः, खड्गो निस्त्रिंशः, मुद्गरः आयस आयुधविशेषः, तन्मुखेषु तत्प्रभृतिषु आयुधेषु, परिश्रमम् अभ्यासम्, अदर्शयन् दर्शितवन्तः। कतिचित् रथश्च हस्ती च वाजी च रथहस्तिवाजिनः। यद्यपि सेनाङ्गत्वादेकवद्भावप्राप्तिरस्ति, तथाऽपि 'बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानाम्' इति वक्तव्यात् बहुप्रकृतिकस्यैव द्वन्द्वस्यैकवद्भावविधानात् अत्र बहुप्रकृतिकत्वाविवक्षया न द्वन्द्वैकवद्भावः। तथा च 'हस्त्यश्वरथपदातिभिः' इति महाभाष्ये प्रयोगश्च। तेषां चर्यया प्रेरणया 'चर्या स्त्रीर्यापथे स्थितिः' इत्यमरः। पश्यतां प्रेक्षकाणां मुदमानन्दम्, आदधुश्चक्रुः। 'मुत्प्रीतिः प्रमदो हर्षः' इत्यमरः। चर्ययेत्यत्र 'परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम्' इति चरतेः स्त्रियां यक्प्रत्ययः॥ ३९॥

[2]उद्धृतोद्भटगदाभयंकरो मारुतात्मजसुयोधनौ ततः।
रङ्गभूमिमवतेरतुः क्षणाद्ढसालविटपाविव द्विपौ॥ ४०॥

उद्धृतेति—ततोऽनन्तरम्, उद्धृताभ्यामुत्क्षिप्ताभ्यामुद्भटाभ्यां भीकराभ्यां गदाभ्या-

1. विमिदुः 2. उद्यतो॰

मायुधविशेषाभ्याम्, 'गदः स्यात्पुंसि शस्त्रान्तरे' इति रत्नमालायाम्। भयंकरौ भयानकौ; 'भेदार्तिभयेषु कृञः' इति खच्प्रत्ययः। 'प्रकृतैवेत्' इत्यादिना मुम्। मारुतात्मजसुयोधनौ भीमदुर्योधनौ, ऊढौ भृतौ सालविटपौ द्रुमशाखे याभ्यां तौ तथोक्तौ। 'शाखोऽस्त्री विटपः कुटः सालः' इत्यमरः। द्वाभ्यां पिबत इति द्विपौ गजाविव। 'सुपि' इति योगविभागात् क्यच्प्रत्ययः। रङ्गभूमिं रणादवतेरतुः, अवतीर्णौ। 'तृफलभजत्रपश्च' इति क्तिन्प्रत्ययान्तात्वाभ्यासत्वा। अवेति गतेः कर्मणि क्तः। 'हो ढः' इति हकारस्य ढकारः। 'झषस्तथोर्धोऽधः' इति निष्ठातकारस्य धकारः। 'ष्टुना ष्टुः' इति ष्टुत्वेन ढकारः। 'वचिस्वपि' इत्यादिना संप्रसारणम्। 'संप्रसारणाच्च' इति परपूर्वत्वम्। 'ढो ढे लोपः' इति पूर्वढकारस्य लोपः। 'ढ्रलोपे पूर्वस्य दार्घोऽणः' इति दीर्घः॥ ४०॥

मण्डलेषु विविधेषु वल्गतोर्घट्टितोभयगदाग्रयोर्मिथः।
क्रुद्धयोर्गहनमाहवोद्यमं द्रोणसूनुरभयोर्न्यवारयत्॥ ४१॥

मण्डलेष्विति—विविधेषु नानाप्रकारेषु मण्डलेषु सव्यापसव्यभ्रमणविशेषेषु, वल्गतोरुत्प्लवमानयोः, मिथः परस्परं, घट्टितोभयगदाग्रयोस्ताडितोभयगदाग्रयोः, क्रुद्धयोः कुपितयोः, उभयोर्भीमसुयोधनयोः, गहनं दुःखं, 'गहनं वनदुःखयोः' इति रत्नमालायाम्। आहवोद्यमं रणोद्योगं, द्रोणसूनुरश्वत्थामा, न्यवारयत् निवारितवान्॥ ४१॥

आज्ञया तदनु कुम्भजन्मनस्तत्पदप्रणतिपूतमौलिना।
धन्विना कवचिना निषङ्गिणा रङ्गभूरलमकारि जिष्णुना॥ ४२॥

आज्ञयेति—तदनु तदनन्तरं, कुम्भाज्जन्म यस्य सः कुंभजन्मा द्रोणः, 'व्यधिकरणोऽपि जन्माद्युत्तरपदो बहुव्रीहिरवर्ज्यः' इत्याह वामनः; अगतिकत्वादाश्रयणीय इत्यर्थः। अस्याज्ञया आसनेन, तत्पदप्रणतिपूतमौलिना तस्य द्रोणस्य पदे पादौ; 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः। तयोः प्रणतिः प्रणामः तया पूतः पवित्रितः मौलिः किरीटं यस्य तेन, 'चूडा किरीटं केशाश्च संयता मौलयस्त्रयः' इत्यमरः। धन्विना धनुर्धरेण, कवचिना वर्मयुक्तेन 'उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम्' इत्यमरः। निषङ्गिणा तूणीरवता, 'तूणोपासङ्गतूणीरनिषङ्गाः' इत्यमरः। जिष्णुना अर्जुनेन 'जिष्णुः शक्रे धनञ्जये' इति विश्वः। रङ्गभूः रङ्गस्थलम्, अलमकारि अलंकृता। अनेन रङ्गभूमिः प्राप्तेत्यर्थः। कर्मणि लुङ्॥ ४२॥

वह्निवारिधरहारितकेसरिव्यालतार्क्ष्यतिमिरार्कदैवतम्।
अस्त्रजातमभिजातविक्रमः संसदि प्रकटयांबभूव सः॥ ४३॥

वह्नीति—अभिजातविक्रमः श्रेष्ठपराक्रमः, सोऽर्जुनः, संसदि सभायां, वह्निरग्निः, वारि-

वरो मेघः, हस्ती गजः केसरी सिंहः व्यालः सर्पः, 'व्यालः सर्पे दुष्टगजे' इति रत्नमालायाम्। तार्क्ष्यो गरुडः तिमिरमन्धकारं, अर्कः सूर्यः, एषां द्वन्द्वः। 'येषां च विरोधः शाश्वतिकः' इत्येकवद्भावः। वह्निवारिधरहस्तिकेसरिव्यालतार्क्ष्यतिमिरार्कं दैवतं यस्य तत्तथोक्तम्। अस्त्राणां जातं समूहं, 'जातं जन्मसमूहयोः' इत्यमरः। प्रकटमबिभूव प्रकाशयति स्म ॥ ४३ ॥

सिंहसंहननतामुपेयिवान्सिंहनादमुखराष्टदिङ्मुखः।
रङ्गसद्म रविसूनुरुल्लसन्प्राप चापनिगमाब्धिपारगः ॥ ४४ ॥

सिंहसंहननेति—सिंहसंहननतां वराङ्गरूपोपेतत्वम्, उपेयिवान् प्राप्तवान् 'वराङ्गरूपोपेतो यः सिंहसंहननो हि सः' इत्यमरः। सिंहनादेन क्ष्वेलास्वनेन, 'क्ष्वेलं तु सिंहनादः स्यात्' इत्यमरः। मुखराणि शब्दायमानानि 'रप्रकरणे जमुखकुञ्जेभ्य इति वक्तव्यम्' इति रप्रत्ययः। 'दुर्मुखे मुखराबद्धमुखौ' इत्यमरः। अष्टानां दिशां मुखानि यस्य स तथोक्तः, चापनिगमो धनुर्वेदः, 'निगमो निश्चये पुर्यां पथि वेदे वणिक्पथे' इति रत्नमालायाम्। स एवाब्धिः सागरः तस्य पारमन्तं गच्छति यस्तथोक्तः। 'अन्तात्यन्त' इति डप्रत्ययः। रविसूनुः कर्णः, उल्लसन् प्रकाशमानः सन्, रङ्गसद्म रङ्गगृहं प्राप ॥ ४४ ॥

अर्चितेन गुरुणाऽनुमोदितो धारयन्धनुरधिज्यतां गतम्।
अद्भुतं व्यधित यद्यदर्जुनस्तत्तदभ्यधिकमाततान सः ॥ ४५ ॥

अर्चितेनेति—अर्चितेन पूजितेन, गुरुणा द्रोणेन, अनुमोदितोऽर्जुनः अधिज्यतामाधिगतमौर्वीकत्वं गतं, धनुश्चापं, 'धनुश्चापौ धन्वशरासनं' इत्यमरः। धारयन् बिभ्रत् यद्यदद्भुतमाश्चर्यं व्यधित विहितवान्, स कर्णः, तत्तदद्भुतम्, अभ्यधिकमाततान चकार ॥ ४५ ॥

अस्त्रसंपदमुदीक्ष्य तद्गतां तत्र संसदि विसिष्मिये जनः।
व्रीडितोऽजनि सुतो विडौजसः सानुजस्तु मुमुदे सुयोधनः ॥ ४६ ॥

अस्त्रसंपदमिति—तत्र संसदि, जनः तद्गतां कर्णस्थिताम्, अस्त्रसंपदमायुधोत्कर्षम्, उदीक्ष्य दृष्ट्वा, विसिष्मिये विस्मयते स्म। 'ष्मिङ् ईषद्धसने' इति धातोः कर्तरि लिट्। 'आदेशप्रत्यययोः' इति षत्वम्। विडौजसः नाकशासनस्य, सुतोऽर्जुनः, व्रीडितो लज्जितः, अजनि जातः। कर्तरि चिण्। सुयोधनः सानुजः अनुजसहितः सन्, मुमुदे जहर्ष। मुदेः कर्तरि लिट् ॥

द्वन्द्वयुद्धमधुना करोम्यहं जिष्णुनेति कथयन्तमाहवे[1]।

---

1. •माहवात्।

आत्मनः सुहृदमंशुमत्सुतं स्वीचकार धृतराष्ट्रनन्दनः ॥ ४७ ॥

द्वन्द्वयुद्धमिति—जिष्णुना अर्जुनेन सहेत्यर्थः । अधुना इदानीम्, 'वृद्धो यूना' इति ज्ञापकात् सहार्थशब्दयोगाभावेऽपि तृतीया । द्वन्द्वस्य युग्मस्य संबन्धि युद्धं द्वन्द्वयुद्धं द्वैरथं, करोमीति कथयन्तं वदन्तम्, अंशुमत्सुतं कर्णं, धृतराष्ट्रनन्दनः सुयोधनः, आहृतः सादरः सन् 'आहृतौ सादरार्चितौ' इत्यमरः । आत्मनः स्वस्य, सुहृदं मित्रं स्वीचकार मित्रत्वेन स्वीकृतवान् । अभूततद्भावे च्विः । 'अस्य च्वौ' इतीत्वम् ॥ ४७ ॥

अन्तरं स्वपरयोरजानतां जल्पतां जगति या गतिर्नृणाम् ।
तामिषुर्नयति मे विकत्थनं त्वामिति द्विषमुवाच फल्गुनः ॥ ४८ ॥

अन्तरमिति—स्वपरयोरात्मान्ययोरन्तरं भेदम्, 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये' इत्यमरः । अजानतामजानानां जल्पतां प्रलपतां, नृणां नराणां, 'नृ च' इति विकल्पात् 'नामि' इति दीर्घाभावः । जगति या गतिरवस्था भवति तां गतिं, विकत्थनं श्लाघनम् आत्मस्तुतिं कुर्वाणमित्यर्थः । त्वां मे मम इषुर्बाणो नयति प्रापयति। त्वां हनिष्यामीत्यर्थः । 'नीवह्योः' इति द्विकर्मकत्वम्, इति अनेन प्रकारेण फल्गुनः द्विषं कर्णमुवाच ॥ ४८ ॥

तिष्ठ पार्थ समितावि[ह] स्थिरो मामकेन दलितेन पत्त्रिणा ।
त्वच्छिरःसरसिजेन कल्पयाम्याशु रङ्गगृहदेवताबलिम् ॥ ४९ ॥

तिष्ठेति—पृथायाः संबन्धी पुमान् पार्थः । 'तस्येदम्' इत्यण् । अन्यथा 'स्त्रीभ्यो ढक्' इति ढक् स्यात् । सामान्यस्य विशेषार्थवत्त्वात् अपत्यार्थलाभः । तस्य संबुद्धिः, हे पार्थ । इह समितौ युद्धे 'स्त्रियः संयत्समित्याजिसमिद्युधः' इत्यमरः । स्थिरः सन् तिष्ठ । मामकेन मत्संबन्धिना, पत्त्रिणा बाणेन, दलितेन खण्डितेन, तव शिरःसरसिजेन शिरःपद्मेन, रङ्गगृहे या देवता चण्डिका तस्या बलिं पूजाम्; आशु शीघ्रं, कल्पयामि करिष्यामि । वर्तमानसामीप्ये भविष्यति लट् ॥ ४९ ॥

इत्युदीर्य गिरमाहवोद्यतं गौतमस्तपनसूनुमब्रवीत् ।
सूतपुत्र भवता न योत्स्यते पूरुवंशमणिरेष पूरुषः ॥ ५० ॥

इतीति—इत्येवं गिरमुदीर्याहवोद्यतं रणोद्युक्तं, तपनसूनुं कर्णं, गौतमः कृपः, अब्रवीत् । सूतपुत्रेति मर्मोद्घाटनी संबुद्धिः । हे सूतपुत्र, पूरुवंशस्य मणिः मणिवत् प्रकाशकः इत्यर्थः । एष पुरोवर्ती । पुरति अग्रे गच्छतीति पुरुषः, स एव पूरुषोऽर्जुनः । 'पुर अग्रगमने' इत्यस्मात् 'पुरः कुषन्' इत्यौणादिकः कुषन्प्रत्ययः । 'अन्येषामपि दृश्यते' इति दीर्घः । 'पुरुषः पुरुष ऋषभः'

जनयति परिघो यस्याः कच्छपशङ्खोरुमकरपद्मौघान् ।
अमितान्नवनिधिमन्तं धनदं विहसन्ति तत्पुरोरव्याः ॥ २० ॥
गोत्रैकदलनदक्षा वृषला वृषवृत्तिमाश्रिता यत्र ।
बहुधान्यासक्तिवशात्क्रमशोहल्यासिजन्यसुखमापुः ॥ २१ ॥
तेजो भानुरिवारचय्य निखिलानानन्दयन्मङ्गला-
वासः सौम्यविहारिणः श्रितजनानाकल्पयन्केतुमान् ।

परवाहिनीशानां शत्रुसेनापतीनां कुलस्य प्राणनायत्तस्य रक्षणोद्युक्तस्य गभीरस्याधिकस्य रसस्य प्रीतेः स्थितिः येषां तथोक्ताः ; पादपतितशत्रूणामपि रक्षका इति भावः । 'संमर्दः संगरो विधः' इत्यमरः । 'गद्गदं गलमूलस्थं चुबुकं स्पृष्टनासिकम्' इति सारे । 'शृङ्गारादौ विधे वीर्ये गुणे रागे द्वये रसः' इत्यमरः । अन्यत्र संमर्देन निजपादमूले प्रत्यन्तपर्वतमूले पतितानां गद्गदं यथा तथा नदन्तीनां परवाहिनीनां नदीनां शकुलप्राणने मत्स्यरक्षणे ; 'विसारः शकुली....' इत्यमरः । गभीररसानां जलानाम् । महीभृतः राजानः, अन्यत्र पर्वताः ; यां नगरीमध्यासांचक्रिरे यस्यामवसन्नित्यर्थः ॥

जनयतीति । यस्याः परिधः प्राकारस्य परितः खातः परिघः अमितानसंख्याकान् कच्छपशङ्खोरुमकरपद्मौघान् जनयति । एतन्नामकनिधयश्च सूच्यन्ते । तत्पुरोरव्याः तन्नगरवैरिण्याः नवसंख्याकनिधिशालिनं कुबेरं निजैश्वर्येण हसन्तीति भावः । 'परिघः परिघातेऽस्त्रेऽप्योघो वृन्देऽम्भसां रये' इत्यमरः । 'ऊरव्या ऊरुजा अर्याः' इत्यमरः ॥ २० ॥

गोत्रेति । यत्र वृषवृत्तिं धर्मवृत्तिम्, इन्द्रवृत्तिं च ; 'वृत्रहा वृषा' 'वृषो धर्मे मूषिके च' 'वृत्तिर्वर्तनजीवने' इत्यमरः । आश्रिता गोत्रैकदलनक्षमाः भूकर्षाः । अन्यत्र गिरिभेदने दक्षः । वृषलाः शूद्राः बहुषु धान्येषु आसक्तिवशात् क्रमशः हल्यायाः हलसमूहस्य आप्त्या जन्यं सुखं लाङ्गलसंपादितधान्यसंपदा सुखमापुः । अन्यत्र इन्द्रस्तु बहुधा अन्यस्यां परकीयायामासक्तिवशादहल्यायाः ऋषिपत्न्याः प्राप्त्या सुखमाप । 'हल्या हलसमूहे स्यात्' इति सारे ॥ २१ ॥

तेज इति । प्रकृतार्थबोधकैः पदैरप्रकृता नवग्रहाश्च मुद्रालंकारभङ्गया सूच्यन्ते । यदुक्तम्— 'सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः' इति । भानुरिव तेजः दीप्तिमारचय्य निखिलानानन्दयन् कविराजानां सत्समीचीनं गुरुतममतिप्रौढं च यस्तोत्रं तस्य एकपात्रं मुख्य-

अभ्रान्तं कविराजसद्गुरुतमस्तोमैकपात्रं महा-
मन्दात्मा रुचिरः शताङ्गनिकरो विभ्राजते नागरः ॥ २२ ॥

भ्रान्तिं चक्रगतां परं रिपुमनः संक्रामयन्घोटिका-
जङ्घालत्वमरिक्षमाधरवधूपादावलं लम्भयन् ।
तारल्यं निजकेतनाञ्चलभवं गात्रं रिपोः प्रापय-
न्निर्घोषं गमयन्मुखं रथगणः पुर्यां दरीदृश्यते ॥ २३ ॥

कुम्भसंभवकथामहनीयोऽपि वर्धितसैन्धवविभवः, पृथुतरपेचका-
डम्बरोऽपि प्रकटितकरटः, बहुमतकक्षासंलक्षितोऽपि निष्ठुरघनदन्त-

स्थानम् । अन्यत्र कविः शुक्रः राजा चन्द्रः गुरुर्बृहस्पतिः तमो राहुः इति ग्रहाश्च सूचिताः । महानमन्दः अतिपृथुः आत्मा यस्य तथोक्तः । मन्दः शनिः, अन्यत्स्पष्टम् । 'तेजो बीजे प्रतापे च प्रभायां परमात्मनि' इति हलायुधः । 'मङ्गलोऽङ्गारकेऽपि स्यात्कल्याणे मङ्गलं स्मृतम्' इति विश्वः । 'ग्रहभेदे ध्वजे केतुः' इत्यमरः । 'कविः पुमान्काव्यकर्तृशुक्रयवासीकिंसूरिषु' इति रत्नमाला । 'राजा धनपतौ चन्द्रे यज्ञे क्षत्रियशक्रयोः' इति मेदिनी । 'गुरुर्निषेकादिकरे पुरोधसि बृहस्पतौ । पित्रादौ ना बृहत्यां च दुर्जरा लघुषु त्रिषु ॥' इति रत्नमाला । 'तमस्तु तिमिरे राहौ मायाऽज्ञानगुणेषु च' इति वैजयन्ती । 'शताङ्गः स्यन्दनो रथः' इत्यमरः ॥ २२ ॥

भ्रान्तिमिति । यस्यां पुर्यां रथगणः चक्रगतां भ्रान्तिं भ्रमणगतिं रिपूणां मनः संक्रामयन् गमयन् ; निजचक्रगमनदर्शनेन रिपुमनस्सु भ्रान्तिमुत्पादयतीति भावः । घोटिकानां रथतुरङ्गाणां जङ्घालत्वं वेगवत्त्वम् ; 'जङ्घालोऽतिजवस्तुल्यौ' इत्यमरः । अरिक्षमाधरवधूनां शत्रुस्त्रीणां पादौ लम्भयन्, शत्रुस्त्रियः भिया पलायन्त इति भाव । निजकेतनाञ्चलभवं ध्वजपटाञ्चलोत्पन्नं तारल्यं रिपोः गात्रं प्रापयन्, कम्पयन्निति भावः । निर्घोषं घर्घरध्वनिं मुखं गमयन्सन् भिया आक्रन्दयन्निति भावः ; दरीदृश्यते ॥ २३ ॥

कुम्भसंभवेति । विरोधाभासेन गजा वर्ण्यन्ते । कुम्भसंभवकथया अगस्त्यकथया महनीय उत्कृष्टोऽपि वर्धितसैन्धवविभवः समुद्रप्राभव इति विरोधः, अगस्त्यस्य तच्छोषकत्वादिति भावः । गजसमूहस्तु कुम्भस्थललक्षणप्रस्तावेन ; सैन्धवविभवः गजसंबन्धिविभवः उत्तमगजानां बहुगजसंपा-

दन्तुरः, अत्युदात्तहरिद्दृग्विषयोऽपि उद्दीर्णमदोपक्रमः, घनपदाक्रमणभूसरितावकाशोऽपि रुचिरपुष्करप्रकाशः, अनवरतदानवारिप्रमुदितोऽपि पद्मोन्मूलनेभमानमनोरथः, संचितावग्रहोऽपि सान्द्रशीकरासारावसिक्तभूभागः, एकान्तजरठकायोऽपि शृङ्गारसंगतरुचिः, सामजातख्यातोऽपि मदोद्धतगलद्धानभीषणः, चकास्ति निस्तुलः स्तोमो हस्तिनाम्; जङ्घाकारिकाः पौरुषेया जङ्गमगजसन्निवेशकुशलाः कलभ्वानां रचनविषये

दकत्वादिति भावः । 'कुम्भौ घटेभमूर्धानौ' इत्यमरः । 'स्त्री नद्यां ना नदे सिन्धुर्गजभेदेऽम्बुधौ गजे' इति विश्वः । पृथुतरपेचकानां घृणालसाडम्बरः संरम्भः; करटाः काकाः । अन्यत्र पेचको गजपुच्छमूलदेशः करटो गण्डदेशः; 'उच्छूके करिणः पुच्छमूलोपान्ते च पेचकः' 'काकेभगण्डौ करटौ' इत्यमरः । बहुपताभिः कक्ष्याभिः हस्त्याभरणैः । अन्यत्र कक्ष्यया गजमध्यबन्धनेन; दन्तैरुन्नतोपलैः रदनैश्च दन्तुरो निम्नोन्नतः 'कक्षा यकोष्ठे हर्म्यादेः' 'काञ्च्यां मध्येभबन्धने' इत्यमरः । 'दन्तास्तु दन्तकास्तिर्यक्पाषाणाः पतिता गिरेः' इति सारे । 'दन्तोऽधिकतटे कुञ्जे रदनेऽप्युन्नतोपले' इति रत्नमाला । अत्युदात्तस्य अतिप्रौढस्य हरेः सिंहस्य इव दृग्विषयोऽपि । अन्यत्र कृष्णदृग्विषयः उद्दीर्णमदः अधिकगर्वः मदजलं च; 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिः' इत्यमरः । 'मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः' इति वैजयन्ती । घनानां मेघानां पदस्य मेघमण्डलस्य । अथ वा, निजपदान्मेघमण्डलादासमन्तात् गगने क्रमणेन संचरणेन; 'पदं व्यवसितत्राणस्थानलक्ष्म' इत्यमरः । 'कठिनाधिकसान्द्रेषु वाच्ये मध्यमयानयोः । मुस्ताभद्रमेघेषु त्रिषु क्लीबे पुमान् घनः ॥' इति रत्नमाला । 'पुष्करं करिहस्ताग्रे' इत्यमरः । दानवारिणा विष्णुना, मदोद्धतेन च, पद्मोन्मूलने लक्ष्म्या उन्मूलने, कमलोत्पाटने च । संचितावग्रहः संपूर्णवर्षप्रतिबन्धकोऽपि संचितो दृढोऽवग्रहः गजललाटभागः; 'अवग्रहो वृष्टिरोधे प्रतिबन्धे गजालिके' इति रत्नमाला । सान्द्राः निबिडाः ये शीकराः तेषामासारेण सिक्तो यो भुवो भागः यस्य स तथोक्तः । अन्यत्र संचितः अवग्रहः ललाटं यस्य सः, 'अवग्रहो ललाटं स्यात्' इति हैमः । सान्द्रशीकरैः शुण्डाकृतैः अभिसिक्तो भूभागो येन । एकान्तजरठकायः अत्यन्तजीर्णशरीरः कठिनदेहश्च 'जरठः कठिने जीर्णे' इति विश्वः । शृङ्गारेण शृङ्गाररसेन गजालंकारेण च; 'शृङ्गारः सुरते नाट्ये रसेऽपि गजमण्डने' इति शाश्वतः । संगता रुचिः शोभा स्पृहा वा यस्य तथोक्तः । सामजाते सान्त्ववचनसमूहविषये ख्यातोऽपि

धारापूर्वकवृत्तिमारचय्य सादिजनश्लाघिताः स्पर्शनजातप्रतीतिमूहुः ; कथमन्यथा शराणां मार्गणापरनामता ॥

यत्र पौरसीमन्तिनीरवलोकयतामेताः सौदामिन्यः, कथमन्यथा कुन्तलभराम्बुदाडम्बरः ; संततानूनरसाः सरस्यः अपरथा कुतो विपुलनयनाम्भोजराजिविकसनम् ; निर्जरजनैकनन्दनीयाः सुधाकरकलाः, कथमितरथा स्मितचन्द्रिकाविलसनम् ; सुमनोभिरामाः सुकुमारलताः, कथमाहो प्रशस्तपयोधरगुल्लुच्छोदञ्चनम् ; मुष्टिमेयमध्या

शास्त्रवाक्यकथनशीलोऽपीत्यर्थः । 'साम सान्त्वशुभे समे' इत्यमरः । अन्यत्र सामजातेषु गजेषु 'स्निग्धुरः सामजः कुम्भी कटी सामभवो गजः' इति सारः । निस्तुलः साम्यरहितः हस्तिनां स्तोमः चकास्ति 'कासृ दीप्तौ' । जङ्गाकारिकेति । जङ्गाकरिका वेगवन्तः, 'जङ्गाकरिकजाङ्गिकौ' इत्यमरः । पौरतुरगाः जवस्य भरो यस्यास्तथोक्तां गतिमभिलषुकाणां कलम्बानां बाणानाम् 'कलम्बमार्गणशराः' इत्यमरः । रयविषये धारापूर्वकवृत्तिमुदकधारापूर्वकदानक्रियामारचय्य बाणानां निजवेगगुणं दत्तवन्त इत्यर्थः । स्वभावतः धाराभिः पञ्चधाराख्यगतिविशेषैः पूर्वकवृत्तिं पुरोयायिवृत्तिमारचय्य बाणवेगमतीत्य गत्वेत्यर्थः । 'आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् । गतयोऽमूः पञ्चधाराः' इत्यमरः । अत एव सादिजनैः श्लाघिताः सन्तः 'अश्वारोहास्तु सादिनः' इत्यमरः । स्पर्शनजातां वायुजन्यां प्रतीतिं वेगवत्ताप्रसिद्धिमूहुः 'श्वसनः स्पर्शनो वायुः' इत्यमरः । दातृविषये आदिजनैः सहिताः सादिजनास्तैः चिरकालवृत्तान्तज्ञैः वृद्धजनैः सह इदानींतनैरपीति भावः । श्लाघिताः स्पर्शनेन दानेन जातां प्रतीतिं प्रसिद्धिम् ; 'स्पर्शनं प्रतिपादनम्' इत्यमरः । अन्यथा वेगगुणप्रतिग्रहाभावे शराणां मार्गणा इति अपरनामता अन्यनामत्वं कथम् ? 'मार्गणो याचकार्थिनौ' इत्यमरः ॥

यत्रेति । पौरसीमन्तिनीः पुरस्त्रियः अवलोकयतां कवयतां कवीनां मनांसि कर्तृपदम् ; वितर्कदोलाप्रेङ्खोलनं प्रतिपदमातेनिरे इति संबन्धः । एताः स्त्रियः सौदामिन्यः तडितः, अन्यथा तथा न चेत्, कुन्तलभर एवाम्बुदः तस्य आडम्बरः कथं भवेत् ? एतेन तडित्सादृश्यं देहस्य, मेघसादृश्यं केशानां सूच्यते । अनूनः पूर्णः रसः उदकं यासु तथोक्ताः ; अन्यत्र रसः शृङ्गारः ; 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः । सरस्य एव । निर्जरजनैः सुरजनैः तरुणजनैश्च । सुमनोभिरामाः पुष्पैः अभिरामाः ; अन्यत्र सुमनसां रसिकानामभिरामाः ;

मदनचापयष्टयः कथमुताहो शम्बरारिपुशौर्यमुद्रितापाङ्गकलम्बकादम्ब-कोद्गार इति च प्रतिपदमातेनिरे वितर्कडोलाप्रेङ्खोलनं मनांसि कवयताम् ॥

यत्र च कामिनीकदम्बकानां हंसकरणितमनोहराणि चरणस-रोरुहाणि, तेजःसारयोगपिचण्डिलाश्चोरुशुण्डाः, सुमुन्मिषत्काञ्ची-प्रभामण्डितानि कटिधात्रीमण्डलानि, प्रथमानरसस्फूर्तिरमणीया ना-भिगभीरावर्ताः, संग्रहवृत्तिसूचका मध्यतव्योमसीमानः, प्रशस्ताम्बरं-कषशिखराः स्तनमहीधराः मौक्तिकोल्लासिनो गलशङ्खाः, परागधा-

---

आहो अन्यथा ; 'आहो उताहो किमुत विकल्पे किं किमूत च' इत्यमरः । पयोधररूपगुलुच्छा-नां गुच्छानामुदञ्चनमुदयः कथम् ? 'गुच्छो गुलुच्छः स्तबकः' इति सारे । मुष्टया मातुं योग्यं मध्यं यासां तथोक्ताः, चापयष्टयश्चापदण्डाः ; 'यष्टिर्दीमनि दण्डे च' इति वैजयन्ती । उताहो एवं न चेत्, शम्बरारिपोः मदनस्य शौर्येण मुद्रितानां निबद्धानामपाङ्गा एव कलम्बकादम्बकाः बाण-समूहानामुद्गार उद्गमनम् ; 'कलम्बमार्गणशराः' इत्यमरः । इति प्रतिपदं वितर्कडोलायां विविध-युक्तिरूपडोलायां प्रेङ्खोलनमान्दोलनम् ; 'वितर्कोऽहंसंशयौ' इति रत्नमाला । 'डोला प्रेङ्खोलिका स्त्रियां' इत्यमरः । आतेनिरे चक्रुः ॥

यत्र चेति । कामिनीकदम्बकानां चरणा एव सरोरुहाणि, हंसकानां पादकटकानां हंसानां च रणितेन शब्देन मनोहराणि ; 'हंसकः पादकटकः' इत्यमरः । ऊरुशुण्डाः तेजःसारस्य उत्कटबलस्य योगेन पिचण्डिलाः मांसलाः ; अन्यत्र तेजःसारः उत्कृष्टदीप्तिः 'तेजः प्रभावे दीप्तौ च बले शुक्रेऽप्यथ त्रिषु' इत्यमरः । 'शुण्डा करिकरे मद्ये नलिन्यां वारयोषिति' इति रत्नमाला । कटिधात्रीमण्डलानि ; 'विपुला गह्वरी धात्री' इत्यमरः । काञ्ची काञ्चीनगर्याः मेखलायाश्च । नाभय एव गभीरावर्ताः, प्रथमानस्य प्रसिद्धस्य रसस्य शृङ्गारस्य अधिकजलस्य च । संग्रहवृत्तेः समीचीनग्रहसंचारस्य सूचकाः ; अन्यत्र कृशरूपवर्तनस्य ; 'मध्यमं चावलग्नं च' इत्यमरः । प्रशस्तानि अम्बरंकषाणि गगनचुम्बीनि शिखराणि येषां तथोक्ताः । अम्बरं वस्त्रम् ; 'अम्बरं व्योम्नि वाससि' इत्यमरः । गला एव शङ्खाः, शङ्खेषु मौक्तिकानि सन्तीति प्रसिद्धिः । रदन-मुकुलाः दन्तकुड्मलाः परागः कुसुमरेणुः दन्तधावनचूर्णं च, 'परागः कौसुमे रेणौ स्त्रानीयादौ

रिणो रदनमुकुलाः, संततासन्नाम्बकाः भ्रूचापाः, वरनिशालिङ्कृतरुचि-सान्द्रा वदनचन्द्राः घनपुष्पमेदुराश्चिकुरजलधरा इति च ताः पणायन्ति गणाः कामिनीनाम् ॥

किं च जलधरवेणिकाः पुष्पलाविन्यः कैतकबर्हसंततिमम्बरान्तरलसितामारचय्य तत्क्षणपरागतया परिमलरेखया तदभिमुखवलमानान्वितेनुभुजङ्गान्सोच्छ्वासान् ॥

यत्र च, प्रतिरथ्यमधिसायमनुपुष्पलाविनीवृन्दमञ्चतामनुपमतदीयविलासवञ्चितानामस्खलनप्रसाधनानां तदनुरागसंपादनैकलम्प-

---

रजस्यपि' इत्यमरः । संततमासन्नानि समीपवर्तीनि अम्बकानि बाणा येषां तथोक्ताः । 'अम्बकं वस्त्रमात्रे स्यान्नेत्रे शस्त्रे च कीर्तितम्' इति केशवः । निशाल्या निशासंपर्केण हरिद्रालेपनेन च, 'निशा रात्रौ हरिद्रायाम्' इति रत्नमाला । चिकुराः केशा एव जलधराः घनपुष्पैः जलैः मेदुरा निबिडाः; अन्यत्र सान्द्रकुसुमैः; 'मेघपुष्पं घनरसम्' इत्यमरः । इति कामिनीनां गणाः ताश्च पुरस्त्रियः पणायन्ति स्तुवन्ति; 'पण व्यवहारे स्तुतौ च' ॥

किं चेति । जलधरवेणिकाः नीरदवेण्यः; मेघमालाश्च; 'वेणी प्रवाहे सरितां मेलने कचबन्धने' इति रत्नकोशः । पुष्पलाविन्यः मालाकारिण्यः; कैतकबर्हसंततिं केतकीदलराशिम्; 'बर्हं पर्णशिखण्डयोः' इति रत्नमाला । अम्बरान्तरलसितां वस्त्रेगाच्छादितामित्यर्थः । आरचय्य; मेघाः केतकीकुसुमानि विकासयित्वेत्यर्थान्तरमपि सूच्यते । तत्क्षणं परागतया व्याप्तया परिमलरेखया सुगन्धरेखया; 'रेखा तु श्रेणिरेखयोः' इति रत्नमाला । रसेन शृङ्गारेण विषेण च; 'शृङ्गारादौ विषे वीर्ये' इत्यमरः । उत्तुङ्गानुत्कणान् भुजङ्गान्विटान्सर्पांश्च, तदभिमुखं कुसुमाभिमुखं वलमानान् चलितान्, 'वल संचलने', बिवेनुः । केतकीकुसुमाभिमुखं सर्पाः समायान्तीति प्रसिद्धिः । मालाकारिण्यः कुसुमपरिमलेन विटान् वशीचकुरिति भावः ॥

यत्र चेति । विटानां परिहासवचनान्युच्यन्ते । साये अधिसायं सायंकाले; 'सायः संध्या पितृप्रसूः' इत्यमरः । साय इति पुंलिङ्गः । प्रतिरथ्यं प्रतिराजवीथ्याम्; अनु पुष्पलाविनीवृन्दं मालाकारिणीवृन्दस्य पश्चात्; अञ्चतां गच्छतां, अनुपमैः तदीयविलासैः वञ्चितानां तदधी-

टानां विटानाम्; अयि मालाकारिणि ! कुतो यासि ? स्फुटमिदानीमसि जनविदिता पुष्पिणीति, यतो रजोऽरुणितम्बरं विभाठयते तावकम् । हृदयविन्यस्तकमलमुकुलानिचोलनमौपयिकं मदवत्करपुष्करबलाभिमर्दनं मा भूदिति; दलत्कैतककुसुमनिकरामोदमेदुरायास्तवोचितमभितो विलासिविलसनम्: अतनुकाण्डमाण्डलिकामाहिण्डयन्त्याः भजमानमेव करपल्लववेल्लनम्; पद्मिनि ! समग्रगुणोदग्रायाः पुंनागसमुदयावर्जनमविरतपरिमलप्रागल्भ्यलिङ्गम्; हस्तिनि ! प्रशस्तानुभावाया न्याय्या मदमन्थरगामिता; सदानपायिपल्लवशोभायाः

नानामित्यर्थः । तासामनुरागसंपादनैकलम्पटानामासक्तानाम्; '...चललम्पटलालसाः' इति सारः । विटानामालापाः प्रादुरासन्निति संबन्धः । अयि मालाकारिणि ! त्वमिदानीं पुष्पिणी पुष्पशालिनीति जनैर्विदिताऽसि; ऋतुमतीति च परिहासोक्तिः । यतस्तावकसम्बरं रजसा परागेणारुणितम्; अन्यत्र आर्तवेन, 'रजो गुणेऽपि स्त्रीपुष्पे' इत्यमरः । हृदयविन्यस्तयोः कमलमुकुलयोः निचोलनमाच्छादनं । औपयिकं युक्तम्; 'युक्तमौपयिकं लभ्यम्' इत्यमरः । मदवतो गजस्य करपुष्करेण शुण्डाग्रेण; 'पुष्करं करिहस्ताग्रे' इत्यमरः । लोके गजाः कमलमुकुलान् मर्दयन्तीति प्रसिद्धिः । अन्यत्र मदविशिष्टपुरुषस्य करकमलेन मर्दनं मा भूदिति स्तनयुगमाच्छादयसि, तद्युक्तमिति भावः । दलतां विकसतां कैतककुसुमनिकराणामामोदेन मेदुरायाः पूर्णायास्तव परितो विलासिनां विलासपुरुषाणाम्; वयोभेदाद्विलासिनां सर्पाणां च विलसनमुचितम् । अतनोः मदनस्य काण्डमाण्डलिकां बाणसंततिमाहिण्डयन्त्याः संचारयन्त्याः, दर्शनमात्रेण मदनोद्रेककारिण्या इति भावः; 'हिडि गतौ' । करेण पल्लवस्य वेल्लनं चालनं कररूपपल्लवस्य वेल्लनं वा भजमानं युक्तं; पल्लवस्यापि मदनशरत्वेन प्रसिद्धत्वात्; 'युक्तमौपयिकं लभ्यं भजमानाभिनीतवत्' इत्यमरः । पद्मिन्याः नलिन्याः, पद्मिनीजातेश्च, समग्रगुणेन उदग्रायाः श्रेष्ठायाः पुंनागसमुदयस्य पुरुषगजसमूहस्य आवर्जनं वशीकरणम्, श्रेष्ठवशीकारश्च । अविरतपरिमलप्रागल्भ्यस्य सुगन्धाधिक्यस्य लिङ्गं चिह्नम्; अन्यत्र अविरतपरिमलप्रागल्भ्यस्य सुरतप्रौढैः सुरतप्रागल्भ्ये सति बहुपुरुषसंपादनेच्छा जायत इति भावः । 'सुखसुप्तिः परिमलसंगमं सुखितं रतिः' इति सारः । हस्तिन्याः गजवध्वाः, हस्तिनीजातेश्च । 'अनुभावः स्वभावे च' इत्यमरः ।

पल्लवतल्लजाक्रमणं चटुलचक्षूरागमुद्रा इति विविधविन्यासविचित्रिताः सरससहासमेदुराः प्रादुरासन्नालापाः ॥

जगतीशीर्षललामे कमलाकमनः स्वयं हरिस्तत्र ।
क्रीडन्नुवास रसिको व्रजरमणीरूपदेवललनाभिः ॥ २४ ॥
शारदनीरदरेखागौरतनुर्जातु नारदोऽभ्यागात् ।
श्रीकान्तकान्तसेवाहेवाकाक्रान्तमानसो नगरीम् ॥ २५ ॥
प्रणिधानयोगभूम्ना भावितमपि नित्यमन्तरात्मानम् ।
साक्षाच्चिकीर्षुरचिरादमितंपचनैजभागधेयेन ॥ २६ ॥

मदेन मन्थरगामिता मन्दगमनशालेता ; 'मन्दगामी तु मन्थरः' इत्यमरः । सदा अनपायिनामपायरहितानाम् ; अम्लानानामित्यर्थः । पल्लवानां चूताशोकादिकिसलयानां शोभा यस्याः ; किसलयान्याहरन्तीति भावः । पदे : पादयोः लवो विलासः तेन शोभा यस्यास्तथोक्ताया इति वा ; 'लवो रामसुते लेशे विलासे छेदनेऽपि च' इति रत्नमालां । अन्यत्र सदानुगतविटशोभाया इत्यर्थः । पल्लवतल्लजानां प्रशस्तकिसलयानां विटश्रेष्ठानां च आक्रमणं स्वाधीनकरणं पादशोभया किसलयतिरस्कारो वा ; चटुलानां चपलानां चक्षूरागाणां कोकिलानाम् ; मुद्रा लक्षणं ; कोकिलानां पल्लवान्वेषणं स्वभाव इति भावः । अन्यत्र चटुलयोश्चक्षुषो रागस्य अनुरागस्य मुद्रा लिङ्गम् ; चक्षुःप्रकाशितानुरागेण विटान्वशीकरोषीति भावः । 'चक्षूरागस्तु कोकिलः' इति सारे । इति विविधविन्यासैः भङ्गीभिः विचित्रिता आलापाः प्रादुरासन ॥

जगतीति । रसिकः सरलः, कमलाकमनः श्रीकान्तः ; 'सरलो रसिकः समौ' इत्यमरः । जगत्याः पृथिव्याः शीर्षललामे शिरोऽलंकारे तत्र नगरे व्रजमणीरूपाभिः सुराङ्गनाभिः सह क्रीडन्सन् स्वयमुवास ॥ २४ ॥

शारदेति । जातु कदाचित् ; 'कदाचिज्जातु सार्धं तु' इत्यमरः । शारदनीरदानां शरत्कालमेघानां रेखावत् ; 'श्रेणीरेखास्तु राजयः' इत्यमरः । श्रीकान्तस्य कान्तसेवायां हेवाकेन संभ्रमेण ; 'निषेवाहेवाकप्रसूमरसमस्तामरकुलम्' इति प्रयोगश्च ॥ २५ ॥

प्रणिधानेति । प्रणिधानयोगानां ध्यानयोगानां भूम्ना बाहुल्येन बहुविधध्यानयोगैरित्यर्थः । अन्तः नित्यं भावितं ध्यातमपि आत्मानं परमात्मानम् ; अमितंपचेन अधिकेन नैजभागधेयेन भाग्येन साक्षाच्चिकीर्षुः प्रत्यक्षीकर्तुमिच्छुः सन् ; अचिरादभ्यागादिति पूर्वेणान्वयः ॥ २६ ॥

जीवः— यद्येवं कथं मामनुभवं पृच्छसि ?

रमणीयचरणः— (स्वगतम्) हन्त, निर्जितोऽस्मि दैवेन । (प्रकाशम्) देव, आस्तां तावदयमनुभवकलहः । कथ्यतां नाम कथाशेषस्तत्रभवत्याः ।

जीवः—

अमेदं गतयोरेवमावयोः पक्षसोरिव । विधूतपक्षपातेन विधिना कलहंसितम् ॥ ७ ॥
अनन्तरमुपनीतोऽस्म्यध्ययनदुरवस्थमुमाश्रमम् ।

रमणीयचरणः— दुर्लभस्वास्थ्य एवायं प्रथमाश्रमोऽध्ययननैयत्येन ।

तथा हि, उच्चैरुच्चरतः पदक्रमगतान्युच्चावचान्यादरा-
दाचार्यस्य चिरस्य शिष्यनिचयः कुर्वन्ननूच्चारणम् ।
तत्रत्यस्वरवर्णविप्लुतिभयाद्दत्तावधानां धियं
बिभ्राणिश्वसितेऽपि न स्ववशतामभ्येति नक्तंदिवम् ॥ ८ ॥

जीवः— बाढमेवम् । अथाप्यत्र वसतो मम समर्थ्यते समग्रमादिमाश्रमधर्मैः प्रियाविरहो वा ।

तथा हि, विद्वेषो मम चन्दने विमुखता माल्ये मनोहारिणि
व्यावृत्तिश्च कुतूहलस्य सुरभेः श्रीखण्डशैलानिलात् ।
शय्यां जहतश्च मे नियमतो भैक्षाशनतो जीवतो
नास्था वस्तुनि कुत्रचिज्जगति यद्भोगाय संभाव्यते ॥ ९ ॥

रमणीयचरणः— अपि ज्ञातं तस्याः कुलशीलादिकं देवेन ?

जीवः— कः कालः कुलशीलादिवेदनस्य ?

दृष्टा लीढा यावन्निमिषमिव तावत्प्रियतमा ममाङ्गानि स्वाङ्गैरकृत परिरब्धान्यविरलम् ।
तया तस्मिन्काले लपितुमधिकारः क इव मे निमग्नस्यानन्दैकरसजलधौ लुप्तसकले ॥

रमणीयचरणः— मा भूनाम दर्शनानन्तरमवसरालाभात्तया सह संलापः । प्राक्तु दर्शनात्प्रवृत्तः पद्यरूपस्तदीयालापः पुनः पठ्यताम् । अपि नाम पर्यालोच्यमाने तस्मिन्कथंचिदभिज्ञायेत कुलशीलादिकं तस्याः ।

जीवः— ओम् । (इत्युक्त्वा 'आरामम्' इत्यादि पूर्वोक्तं पद्यद्वयमाम्रेडयति ।)

रमणीयचरणः— (संपधार्य) अत्र तावदाद्ये पद्ये 'मां न पश्यसि' इत्यनेन स्वस्य दुर्दैव-

स्वमुक्तम् । द्वितीये तु हिरण्यनिधिनिदर्शनोपदर्शनेनान्तर्हितत्वं स्वस्य दुर्दर्शतत्वे निमित्तमुपवर्णितम् । न पुनरिह शीलादीनां कथाऽपि विधया प्रतिभानमस्ति ।

जीवः— किं पुनरुपायान्तरं तदधिगमस्य ?

रमणीयचरणः— देव, सा यथादृष्टमालेख्येऽभिलिख्यताम् । प्रायेण सर्वत्र संचारशीलस्य मम कदाचित्कचिदृष्टचरी भवेत् ।

जीवः— अनुपपन्नं नामैतत् । तथा हि,

नैषा दृष्टचरी न च श्रुतचरी कस्यापि कुत्रापि वा
न क्रोडीक्रियते यतो बहुविधैः सृष्टिक्रमैर्वेधसः ।
चिन्तातूलिकया हृदम्बुजदले रागेण लेख्या परं
तन्वङ्गी कथमत्र चित्रफलके तत्तादृशी लिख्यताम् ॥ ११ ॥

अपि च,

विकारगोचरैर्वर्णैरतिवर्णगुणोदयाम् । विलिखन्नेष तां चित्रे विडम्ब्येत न किं बुधैः ॥

अपि च, आचूडातलमानखाञ्चलमपि प्रत्यङ्गमत्यद्भुता
चित्रे विन्यसितुं तदाकृतिरितो यावन्मयोल्लिख्यते ।
तावद्विप्लुतहर्षसिन्धुलहरीगाढावगाहक्षण-
स्तब्धाङ्गस्य मम स्वतोऽपि परतः कीदृक्क्रियाकौशलम् ॥ १३ ॥

रमणीयचरणः— तथाऽप्यदूरविप्रकर्षेण च्छायामात्रेण तद्रूपमभिविलिखतु देवः ।

जीवः— अस्त्वेवम् । कः कोऽत्र भोः । चित्रं चित्रम् ।

(प्रविश्य)

आपातबोधः— अहमिह । चित्रं चित्रम् । (इति चित्रफलकं जीवस्य हस्ते प्रयच्छति ।)

जीवः— (नाट्येन गृहीत्वा निर्वर्ण्य च, सहर्षप्रत्यभिज्ञम्) अहो संवादः ।

सैषा वधूरिह सुधारसधारयेव सूक्त्या यया श्रुतिरभूदभिपूरितेयम् ।
संदर्शनस्य पदवीमदवीयसीं मे या च व्यगाहत तदोषवनान्तभागे ॥ १४ ॥

अये रमणीयचरण, चित्रगतेयं कियदपि न भिद्यते प्रियायाः पूर्वदृष्टायाः । तथा हि,

तदेवेदं तस्या वपुरपरिमेयात्मविभवं
तदेवास्यं दास्यार्पणविधिकृतार्थीकृतशशि ।
तदेवाश्लिष्टद्वन्द्वं स्वशरणनिषक्तोत्पलकुलं
तदेवैतद्घोरुहयुगलमक्षोभनिहितम् ॥ १५ ॥

(इति स्वहस्तगतमेव चित्रफलकं रमणीयचरणस्य प्रदर्शयति ।)

रमणीयचरणः— (निरूप्य, सशिरःकम्पम्) स्थाने तावल्लोकसामान्याकृतावस्थामभिलाषबन्धो देवस्य ।

जीवः— आपातबोध, क्व पुनरेषा त्वया दृष्टा ?

आपातबोधः— देव, तदपि लिखितमधस्ताच्चित्रफलकस्य । अनुवाच्यताम् ।

जीवः— तथा । (इति वाचयति ।)

आम्नायस्य गिरेरन्ते सेयमप्राकृताकृतिः । गुहायां निहिता दृष्टा कन्या सामान्यतो मया ॥

रमणीयचरणः— देव, सामान्यत इत्यनेन तदीयकुलशीलादिविषये परिज्ञानमापातबोधस्याप्यावयोरिवेति ध्वनितम् । वसतिस्त्वेका तस्या निर्धारिता भवति ।

जीवः— प्रागन्तर्निहितत्वयत्रभवतीपद्ये यदुद्द्योतितं
पद्येऽस्यापि तदेव भाति निहिता दृष्टा गुहायामिति ।
संवादश्च तदाकृतेरिह पुनश्चित्रे मया बोधित-
श्चित्रस्थैव पुराऽपि दर्शनपथं यातेत्यतो निश्चयः ॥ १७ ॥

यदि नाम कुलं शीलं तदीयं न प्रतीयते । अयोनिजा नित्यसिद्धा काचिदेषा भविष्यति ॥

रमणीयचरणः— अहो मीमांसाकौशलं देवस्य ।

उपक्रमोपसंहारमध्यामर्श्यैकरूप्यतः । निर्णीयते क्रियारूप एकोऽर्थः सांप्रतं यतः ॥१९॥

जीवः— आपातबोध, कुत्रत्यैर्वर्णैश्चित्रे कृतैषा । अथ वा ज्ञातम् ।

अप्राकृताकारतया नतभ्रूरनन्यसाधारणरूपधेया ।
अप्राकृतैरेव ततस्त्वयेयमाम्नायवर्णैरभिचित्रिता स्यात् ॥ २० ॥

(चित्रं पुनर्निर्वर्ण्य) हन्त हन्त ।

यस्या दर्शनमेव कामपि मुदं दुग्धे विदग्धे जने
कल्याण्या कथयाऽपि यद्विषयया स्वर्गस्पृहोच्छिद्यते ।

कैवल्यं करतात्करोति यदनुस्पर्शोद्भवा निर्वृति-
स्तामेनां प्रतिलम्भुमद्य न कियत्तप्तव्यमुग्रं तपः ॥ २१ ॥

आपातबोध, अपि प्रज्ञाता भवतः सा गुहा यत्र प्रतिवसति मम प्राणनाडी ?

आपातबोधः— कः संदेहः ?

जीवः— आपातबोध, न कस्यचिदेतत्त्वया प्रकाशयितव्यम्, बहुविघ्नानि नाम श्रेयांसि ।

(नेपथ्ये शिञ्जितमिव)

जीवः— (कर्णं दत्त्वा) नूनं प्रबुद्धा देवी सुषुप्तिभवनादित एवाभिवर्तते । तदेतत्प्रच्छाद्यताम् ।

(इत्यापातबोधस्य हस्ते चित्रफलकमर्पयति । सोऽपि गृहीत्वा कक्षे स्थापयन्नुत्तरीयेणात्मानमवगुण्ठयति ।)

(ततः प्रविशति बुद्धिः ।)

बुद्धिः— (दीर्घमुष्णं च निश्वस्य) हद्धि, हद्धि । जह मन्तिदं असूआए तह एव्व जदि अज्जउत्तो होदि तदो किं करिस्सं । अङ्कुरो खु सा अणत्थरुक्खस्स जा अण्णासत्ती अज्जउत्तस्स । अम्हो जललिवी पुरिसाणं सिणेहो ववहारो अ, जदो तह तह अहिणिविसन्तस्स तह तह अणण्णं ववहरन्तस्स वि अज्जउत्तस्स संपदं अण्णारिसो एव्व आआरो सुणिज्जइ । कहिं अज्जउत्तो कहिं इत्थिअन्तरं कहं वा दुवेण्णं समाअमो त्ति सङ्किदुं वि ण अवआमो । जदो दोसेक्कदिट्ठीए वि असूअए एदं वअणं ण सदन्तं किन्दु अज्जामिस्सस्स तादस्स एव्व एसो संदेसो अवच्चिणेहेण हिदोवदेसप्पउत्तस्स । एव्वं आवदिदे एत्थ संकडम्मि मए किं करणिज्जं ।

[हा धिक् हा धिक् । यथा मन्त्रितमसूयया तथैव यद्यार्यपुत्रो भवति ततः किं करिष्यामि । अङ्कुरः खलु साऽनर्थवृक्षस्य, याऽन्यासक्तिरार्यपुत्रस्य । अहो जललिपिः पुरुषाणां स्नेहो व्यवहारश्च, यतस्तथा तथाऽभिनिविशमानस्य तथा तथाऽनन्यं व्यवहरतोऽप्यार्यपुत्रस्य सांप्रतमन्यादृश एवाचारः श्रूयते । कुत्रार्यपुत्रः क्वत्र स्त्र्यन्तरं कथं वा द्वयोः समागम इति शङ्कितुमपि नावकाशः । यतो दोषैकदृष्टेरप्यसूयाया एतद्वचनं न स्वतन्त्रं किं त्वार्याभिश्रस्य तातस्यैवैष संदेशोऽपत्यस्नेहेन हितोपदेशप्रवृत्तस्य । एवमापतितेऽत्र संकटे मया किं करणीयम् ।] (विचिन्त्य ।) अज्जउत्तम्मि कोवं करिस्सं । दाणिं सावराहो एव्व सो, जेण सुसुत्तघरअम्मि एआइणिं मं उज्झिअ अग्गदो णिग्गदो अज्जउत्तो । [आर्यपुत्रे कोपं करिष्यामि । इदानीं सापराध एव सः, येन सुषुप्तगृह एकाकिनीं मामुज्झित्वाऽग्रतो निर्गत आर्यपुत्रः ।]　　(इति विलक्षणमपसृत्यायथापूर्वमवतिष्ठते ।)

जीवः— (निरूप्य स्वगतम्) कथं देवी कुपितेव दृश्यते । किमस्या ह्यस्तनः प्रियावृत्तान्तो विदितः स्यात् । अथ वाऽन्यदेव कोपस्य कारणं भवेत् । (प्रकाशम्)

एह्येहि सुन्दरि किमन्तरिताऽसि दूरं कल्याणि नन्वयुतसिद्धमुरुं जुषस्व ।
उत्सङ्गमण्डलमलंकुरु मे निविष्टा जीवन्नसौ न सहते किल ते वियोगम् ॥ २२ ॥

बुद्धिः— ण खु अरुहदि एसा तुह उच्छङ्गस्स । [न खल्वर्हत्येषा तवोत्सङ्गस्य ।]

जीवः— का पुनरर्हति ?

बुद्धिः— अप्पा पुच्छिदव्वो । [आत्मा प्रष्टव्यः ।]

जीवः— देवि, त्वमेवात्मा जीवस्य ।

बुद्धिः— इत्तिअं कालं तह एव्व । अज्जप्पहुदि मिच्छावादो एव्व एसो त्ति मे वितक्को । [इयन्तं कालं तथैव । अद्यप्रभृति मिथ्यावाद एवैष इति मे वितर्कः ।]

जीवः— अहो, आत्मन्यप्रत्ययः ।

त्वमहमयमहं त्वं भीरु किं भेदवादैरहमिव तव यन्मे हर्षशोकांशभाक्त्वम् ।
त्वदनुपहितमूर्तेः किं सुखं किं नु दुःखं मम हितमहितं च त्वत्प्रसादैकलभ्यम् ॥

बुद्धिः— अपुव्वो एसो अज्जउत्तस्स आआरभेदो मं एव्वं विआरेदि ।

[अपूर्व एष आर्यपुत्रस्याचारभेदो मामेवं विकारयति ।]

जीवः— (सविमर्शाभिनयम्) देवि, अणुमात्रमप्याचारभेदमात्मनो न पश्यामि । यदप्यद्य सुषुप्तिभवनेऽर्धप्रबुद्धायास्तव स्तोकमुल्लासमाश्रित्य कतिपयक्षणान्किंचिदिव बहिर्मुखोऽस्मि तदपि कार्यगौरवमेवापराध्यति ।

बुद्धिः— जाणामि दाव तं गुरुकज्जं जत्थ पवुत्तिणिमित्तं एसो एव्व महप्पा ।]

[जानामि तावत्तद्गुरुकार्यं यत्र प्रवृत्तिनिमित्तमेष एव महात्मा ।

(इत्यापातबोधमङ्गुल्या निर्दिशति ।)

आपातबोधः— (सभयकम्पम्) प्रसीदतु देवी । (इति उसंभ्रमं च्यवमानचित्रफलकः समुत्तिष्ठति ।

बुद्धिः— (अग्रतश्च्युतं चित्रफलकं गृह्णाति ।)

जीवः— (स्वगतम्) आः प्रमादः ।

बुद्धिः— (चित्रं निर्वर्ण्य, स्वगतम्) कहं एत्थ अहिलिहिदा लोउत्तरगुणुत्तरा का वि मत्तकासिणी । अहो रुव्वं अहो सुन्देरं । हद्धि हद्धि मह वि दिट्ठी एत्थ णिबद्धिज्जइ । किं उण अज्जउत्तस्स । [कथमत्राभिलिखिता लोकोत्तरगुणोत्तरा काऽपि मत्तकाशिनी । अहो रूपमहो सौन्दर्यम् । हन्त हन्त ममापि दृष्टिरत्र निबध्यते । किं पुनरार्यपुत्रस्य ।]
(प्रकाशम्) अज्जउत्त, किं एदं ? [आर्यपुत्र, किमेतत् ?]

जीवः— देवि, आपातबोध एव प्रश्नमर्हति । एतत्प्रसङ्गानभिज्ञः खल्वयं जनः ।

बुद्धिः— णं आवादबोह, कहेहि किं एदं । [नन्वापातबोध, कथय किमेतत् ।]

आपातबोधः— देवि, चित्रफलकमेतत् ।

बुद्धिः— आवादबोह, एत्थ अहिलिहिदं इत्थिअं पुच्छामि ।
[आपातबोध, अत्राभिलिखितां स्त्रियं पृच्छामि ।]

आपातबोधः— न ज्ञायते मया ।

बुद्धिः— केण उण अहिलिहिदा एसा ? [केन पुनरभिलिखितैषा ?]

आपातबोधः— मयैव नाम ।

बुद्धिः— मए एव्व अहिलिहिदा ण जाणिज्जदि अ मए त्ति विप्पडिसिद्धं खु एदं वअणं । [मयैवाभिलिखिता न ज्ञायते च मयेति विप्रतीषिद्धं खल्वेतद्वचनम् ।]

आपातबोधः— न किंचिदिह विप्रतिषिध्यते । यल्लिखितं कन्यारूपं तदृष्टमेव देव्या । विशेषस्तु तदीयनामगोत्रादिर्यत्नावदत्रभवत्या पृष्टः स न ज्ञायत इति मया भूतार्थः कथितः ।

बुद्धिः— चिट्ठदु दाव एदं । कहिं उण तुए दिट्ठा किंणिमित्तं अ चित्तं आरोविदा ? [तिष्ठतु तावदेतत् । कुत्र पुनस्त्वया दृष्टा किंनिमित्तं च चित्रमारोपिता ?]

आपातबोधः— देवि श्रूयतामादितः कथयामि । अस्ति खलु कर्मब्रह्मकाण्डलक्षणाधरोत्तरभागद्वयलोभनीयः शिक्षाकल्पादिप्रभेदभिन्नविद्यास्थानमयप्रस्थोपबृंहितः प्रणवमयकन्दरसुन्दरो महावाक्यमयशृङ्गशृङ्गारितस्तत्प्ररूढब्रह्म वेद्यात्मकसिद्धाञ्जनौषधिविशेषभूषितः संपदध्यासप्रतीकाहंग्रहोपास्तिरूपतरुलतागुल्मौषधिस्तोमकमनीयश्चतुर्विधवर्णाश्रमारण्यश्चरण्यस्तदधिकृतद्वैताद्वैताद्वैतनेकखदसन्मार्गसंसर्गमयचिद्धातुराम्नायनामा गिरिरिशेखरः ।

यत्र हिंस्रैरजस्रोद्यदहमावेशदुर्दशैः । पीड्यन्ते सा भवः पान्था द्वैतवादाख्यभल्लकैः ॥

तत्र चाहमधिकृतो देवेन प्रत्यहं सर्वतः पर्यटामि । पर्यटंश्च,

यद्यद्वस्तु विशेषेण यत्र यत्रोपलभ्यते । तत्तच्चित्रं समारोप्य देवस्योपहराम्यहम् ॥
अद्य तावदियं दृष्टा मया दृष्टिप्रिया वधूः । चित्रमारोपिता चेयं देवस्योपजिहीर्षया ॥

एष वृत्तान्तः । तदिदं चित्रफलकं देवस्यात्मभूतयाऽनयाऽन्तराले बलाद्गृहीतमिति संप्रति निर्भरोऽस्मि संवृत्तः ।

बुद्धिः— आवादबोह, पच्चुप्पण्णमदी खु तुमं । अहं उण अण्णाणवम्मणो अइन्दजालिअस्स अप्पसम्भवा ण सक्का केण वि अदिसन्धादुं । [आपातबोध, प्रत्युत्पन्नमतिः खलु त्वम् । अहं पुनरज्ञानवर्मण ऐन्द्रजालिकस्यात्मसंभवा न शक्या केनाप्यतिसंधातुम् ।]

जीवः— देवि, अपदे ते कोपः ।

बुद्धिः— अण्णादउलणामहेआ जा का वि एसा पाडिहालिएण आलेक्खसरीरेण वट्टन्ती वि एव्वं मं आआसेदि । सा एव्व दिट्ठिआ सेण रूवेण अहिणिप्पज्जन्ती किं किं ण करिस्सदि ।

[अज्ञातकुलनामधेया या काऽप्येषा प्रातिभाभिकेनालेख्यशरीरेण वर्तमानाऽप्येवं मामायासयति । सैव दिष्ट्या स्वेन रूपेणाभिनिष्पद्यमाना किं किं न करिष्यति ?]

(इति साटोपं परावर्तते ।)

जीवः — (चेलान्ते बुद्धिं गृहीत्वा)

त्वं भूषणं त्वमसि मे सकलाऽपि संपत्त्वं जीवितं किमपरं परमस्त्वमात्मा ।
देवि प्रसीद कुपिताऽसि कुतो निकामसात्मन्यहं तु कलयामि न कोपहेतुम् ॥ २७ ॥

बुद्धिः— (बलाच्चेलाञ्चलं विमोच्य सचित्रफलका निष्क्रान्ता ।)

जीवः— हन्त, अगृहीतानुनया गतैव देवी । अये रमणीयचरण, त्वया यथोचितं संविधानकेऽव्यापर्तव्यम् । अहं तु देवीं सान्त्वयामि यावदेषा पुरीतल्लतावितानं न प्रविशति ।

[इति परिक्रम्य निष्क्रान्ताः सर्वे ।]

इति द्वितीयोऽङ्कः ।

तृतीयोऽङ्कः ।

शुद्धविष्कम्भः ॥

(ततः प्रविशति भवितव्यता ।)

भवितव्यता— अहो मह भाअहेअं । [अहो मम भागधेयम् ।]

अणुआ सत्तसुद्धी मे जीवामच्चो पिदा मह । पउत्ती अ णिउत्ती अ किङ्करीओ दुवे विअ ॥

[अनुजा सत्त्वशुद्धिर्मे जीवामात्यः पिता मम । प्रवृत्तिश्च निवृत्तिश्च किंकर्यौ द्वे अपि ॥]

अदो एव्व णिव्वावारम्हि । सम्पदं दु सत्तसुद्धितादाणं कज्जन्तरासत्तदाए अम्होवरि एक्को वावारो आवदिओ । जह सत्तसुद्धी खु तादस्स णिओएण बम्हजिण्णासं आणेदुं गआ । बम्हजिण्णासा उण सहिं साहणसंपत्तिं विणा पदं वि चलिदुं ण सक्कुणोमि त्ति विलम्बइ । साहणसम्पत्ती उण पुढमोवसप्पणिज्जा मं अदिलङ्घिअ बम्हजिण्णासाए सआसं गआ सत्त-सुद्धि त्ति कुविदा । तं अणुणेदुं पत्थिदो तादो । अत्थन्दरे बलवदीए कामवासणाए पुढ-मस्समादो दुदिअस्समं पाविदो साणुअरो देव्वो । तं अ णिस्सेअसमग्गादो भंसेदुं पेसिदा कामादिणो अरिणो अण्णाणवम्मणा । तं एदं पडिकादव्वं त्ति मज्झ अज्झवसाओ । अह वा, तादस्स पाणपदं अप्पउणठ्ठअं देवस्स णिअडम्मि पट्ठावइस्सं । तेण एव्व सव्वं पडिकरिस्सदि । मए उण कुविदा देवी पसादइदव्वा । [अत एव निर्व्यापाराऽस्मि । सांप्रतं तु सत्त्वशुद्धि-तातयोः कार्यान्तरासक्ततया मदुपर्येको व्यापार आपतितः । यथा, सत्त्वशुद्धिः खलु तातस्य नियोगेन ब्रह्मजिज्ञासामानेतुं गता । ब्रह्मजिज्ञासा पुनः सखीं साधनसंपत्तिं विना पदमपि चलितुं न शक्नोमीति विलम्बते । साधनसंपत्तिः पुनः प्रथमोपसर्पणीया मामतिलङ्घ्य ब्रह्मजि-ज्ञासायाः सकाशं गता सत्त्वशुद्धिरिति कुपिता । तामनुनेतुं प्रस्थितस्तातः । अत्रान्तरे बलवत्या कर्मवासनया प्रथमाश्रमाद्द्वितीयाश्रमं प्रापितः सानुचरो देवः । तं च निश्रेयसमार्गाद्भंशयितुं प्रेषिताः कामादयोऽरयोऽज्ञानवर्मणा । तदेतत्प्रतिकर्तव्यमिति ममाध्यवसायः । अथ वा, तातस्य प्राणपदमात्मगुणाष्टकं देवस्य निकटे प्रस्थापयिष्यामि । तेनैव सर्वं प्रतिकरिष्यते । मया पुनः कुपिता देवी प्रसादयितव्या ।] (इति परिक्रम्य निष्क्रान्ता ।)

इति शुद्धविष्कम्भः ।

यद्यर्धं तृतीयमनयोरिति विग्रहः क्रियते, को दोषः स्यात्? षष्ठ्यर्थो नोपपद्यते; किं हि द्वयोस्तृतीयमर्धं भवति? भवानपि पृष्टो व्याचष्टाम्। अथेह देवदत्तस्य भ्रातेति कः संबन्धार्थः? एकस्मात् प्रादुर्भाव इति चेत्, वार्तं तत्; तद्यथा—स्वार्थिकानामेकप्रतिश्रयद्विजानां प्रातरुत्थाय विप्रतिष्ठमानानां न कश्चित्परस्परमभिसंबन्धो भवति एवंजातीयकं भ्रातृत्वं नाम; तत्र चेदुक्तः षष्ठ्यर्थो दृश्यते, इहापि युक्तो दृश्यताम्; द्वयोर्ह्यनुजन्मा तृतीयो भवति। दृश्यते चान्यत्रापि द्वयोस्तृतीयेन संबन्धः; तद्यथा—

निसर्गभिन्नास्पदमेकसंस्थमस्मिन्द्वयं श्रीश्च सरस्वती च।
काम्त्या गिरा सूनृतया च योग्या त्वमेव कल्याणि तयोस्तृतीया॥ इति॥

नन्वेवम्, अर्धतृतीया आनीयन्तामित्यर्धानयनं न प्राप्नोति, बहुवचनं च नोपपद्यते। नैष दोषः; भवति हि बहुव्रीहौ तद्गुणसंविज्ञानमपि; तद्यथा—शुक्लवाससमानय, लोहितोष्णीषा ऋत्विजः प्रचरन्तीति तद्गुण आनीयते, तद्गुणाश्च प्रचरन्ति। बहुवचनं तु द्वित्रादिवदुपपद्यत इति; तत्र यथा आनीयन्तामिति त्रयाणामिव द्वयोरप्यानयनपक्षे बहुवचनमुपपन्नं भवति, तथेहापि भविष्यति। विषम उपन्यासः; तत्र हि द्वौ वेत्युक्ते त्रयो वेति गम्यते, त्रयो वेत्युक्ते द्वौ वेति गम्यते; सैषा समानाधिकरणपदार्थपञ्चकाधिष्ठाना वाक्; तत्र युक्तं बहुवचनम्; इह त्वर्धं तृतीयमनयोरित्युक्ते, यद्यपि गम्यते त्रयाणां पूरणस्तृतीयो भवतीति, तथाऽपि समासेऽन्यपदार्थपरतया द्वयोरेवाभिधानाद्बहुवचनस्य नोत्पत्तिः। तद्गुणसंविज्ञानमपि समासाभिधानपक्ष एवोपपद्यते; समासश्च सामर्थ्ये सति भवति; सामर्थ्यं च वृत्तिवाक्ययोरैकार्थ्यम्; तच्च तदोपजायते, यदि वृत्ताविव वाक्येऽपि समासार्थस्य बहुवचनं भवति।

अथ किंसब्रह्मचारीति कोऽयं समासः? के सब्रह्मचारिणोऽस्येति। कः सब्रह्मचारीति कर्मधारयः कस्मान्न भवति? भवति, यदि क्षेपो गम्यते, यथा—किंराजा यो न रक्षति, किंगौः यो न वहति। केषां सब्रह्मचारीति तत्पुरुषस्तर्हि भवतु। कठ इति प्रतिवचनं नोपपद्यते; न ह्यन्यत् पृष्टेनान्यदाख्येयम्; अतः कठानामिति प्रतिवक्तव्यं भवति। बहुव्रीहावप्येतत्तुल्यमेव; तत्रापि के सब्रह्मचारिणोऽस्येति बहुवचनप्रश्ने कठ इति नैकवचनेनोत्तरं भवति। नैष दोषः; अग्नौ करवाणीति न्यायेन भविष्यति; तद्यथा—कश्चिदाह—अग्नौ करवाणीति, तत्र कुर्विति तत्कर्तर्यनुज्ञाते कर्मण्यनुज्ञातं भवति; अपर आह—अग्नौ करिष्ये; तत्र क्रियतामिति कर्मण्यनुज्ञाते कर्तर्यनुज्ञातो भवति। एवं यथैव के सब्रह्मचारिणोऽस्येत्युक्ते कठा इति प्रत्युक्ते संबन्धादेतल्लभ्यते

अयमपि कठः ; तथा कठ इत्यप्युक्ते संबन्धादेतदवगन्तव्यम्—बेऽपि कठाः। समासेन तु प्रतिनिर्देष्टुमशक्यम्, उपसर्जनं हि तत्र ते भवन्तीति ॥

ऐकपद्यं समासः। स त्रिधा—उपश्लिष्टक्रियः, गमितक्रियः, अक्रियश्च। तेषूपश्लिष्टक्रियो द्विधा— उभयस्थक्रियः, अन्यतरस्थक्रियश्च ; तयोरुभयस्थक्रियो यथा—कृताकृतम्, क्लिष्टाक्लिश्टम्, स्नातानुलिप्तः, भ्रष्टलुञ्चितः, कृष्टातिकृष्टम्, क्रयाक्रयिका, इति ; अन्यतरस्थक्रियो यथा—भोज्योष्णम्, प्राप्तजीविकः, आहिताग्निः, कष्टश्रितः, काकपेया, इध्मप्रव्रश्चनः, इति। गमितक्रियो द्विधा—उभयकारकः, अन्यतरकारकश्च ; तयोरुभयकारको यथा—दध्नोपसृष्ट ओदनः दध्योदनः, गुडेन मिश्रा धाना गुडधानाः, शङ्कुलया कृतः खण्डः शङ्कुलाखण्डः, अक्षेषु प्रसक्तः शौण्डः अक्षशौण्डः, कण्ठे स्थितः कालो यस्य कण्ठेकालः, पञ्चसु कपालेषु संस्कृतः पञ्चकपालः, इति ; अन्यतरकारको यथा—प्रगत आचार्यः प्राचार्यः, अतिक्रान्तो मालामतिमालः, अवकृष्टः कोकिलया अवकोकिलः, परिग्लानोऽध्ययनाय पर्यध्ययनः, निष्क्रान्ताः कौशाम्ब्याः निष्कौशाम्बिः, प्रपतितानि पलाशान्यस्य प्रपलाशः इति। अक्रियो द्विधा—वस्तुरूपः, अवस्तुरूपश्च ; तयोर्वस्तुरूपो यथा—उपकुम्भम्, त्रिभुवनम्, नीलोत्पलम्, राजपुरुषः, चित्रगुः, अवखादिरौ, इति। अवस्तुरूपो यथा—अधिस्त्रि, प्रत्युरसम्, यथाशक्ति, यावदमत्रम्, पारेगङ्गम्, मध्येसमुद्रम्, इति। अयं तु उपश्लिष्टक्रियो गमितक्रियश्च भवति। यथा—

आयतीमवमामच्छत्यातिष्ठद्गूपतिष्ठते। निकुब्ज कर्णे शार्दूलोऽपोह्य पुच्छी प्रधावति ॥

यथा च—

शलाकापर्यभिद्यूतं चतुष्पर्यक्षपर्यपि। विपर्यस्ते विधौ पश्य तलादेरपि जायते ॥

केशाकेशि, बाहूबाहवि, दण्डादण्डि, मुष्टीमुष्टि, इत्यपि गमितक्रियमसत्त्वरूपं केचित्; यथा—

रोषावेशादाभिमुख्येन कौचिन्नामग्राहं रंहसैवोपजातौ।
भित्त्वा हेती मद्भवन्मुष्टिघातैर्घ्नन्तौ बाहूबाहवि व्यासजेताम् ॥

केचित्पुनरस्य वस्तुरूपत्वं ब्रुवते। यथा—

दण्डादण्डि न कुर्वन्ति न कचाकचि कोकिलाः। तथाऽपि जितमेवाभिर्वाग्भिरेव जगत्त्रयम् ॥

इति। कुतः पुनरेतत् यदेकदा दण्ड्यादण्ड्यादयः सत्त्वरूपाः, अन्यदा त्वसत्त्वरूपा इति? 'तत्र तेनेदमिति सरूपे' (पा. २-२-२७) सूत्रस्य व्याख्यानभेदात्; तत्रास्य सूत्रस्यायमर्थः—द्वे समा-

नाकृती शब्दरूपे अन्यपदार्थे समस्येते—तत्रेति येनेति च। कः पुनरिहान्यपदार्थः? केचिदाहुः—इतिशब्दस्य प्रकारवाचित्वादित्थमिति; केचित्पुनः—इदमित्थमिति। तत्र पूर्वस्मिन् पक्षेऽसत्त्वरूपता, इतिशब्दस्यासत्त्ववाचित्वात्; उत्तरस्मिन् सत्त्वरूपता, इदमिति सर्वनाम्ना वस्तुरूपपरामर्शात्। कः पुनरिहेतिशब्दार्थः? योऽसौ तत्रेत्यधिकरणे तेनेति करणे वा इदमर्थानुयायिनी इतिकर्तव्यतारूपा क्रिया, तत्र गृहीत्वा तेन प्रहृत्य इत्यादिकः सर्वनामार्थो यत्तदिति तदिति व्यपदेशार्हग्रहणप्रहरणादिकायाः क्रियायाः साध्यं युद्धादि। तदाह चन्द्रगोमी—'तत्र गृहीत्वा तेन प्रहृत्य युद्धे सरूपं सुप्सुपैकार्थं भवति' इति। किमेतदुक्तव्यम्? न वक्तव्यम्। कथमनुक्यमानं गम्यते? 'सरूप' इत्येकशेषापवादेन द्वयोरधिकरणयोः करणयोश्च तुल्यकालनिर्देशात्; न हि द्वयोस्तुल्यबलयोः प्रतियोगिनोर्व्यापारमन्तरेण द्वयोरधिकरणयोः करणयोर्वा तुल्यकालनिर्देशो भवति। तथाऽपि युद्धादिनियमो न लभ्यते। कः पुनराह—नियम इति? युद्धग्रहणादेरन्यत्रापि प्रयोगात्; हस्ते हस्ते च गृहीत्वा मित्राय युद्धं समर्पयति हस्ताहस्ति, गालिभिश्च गालिभिश्च निर्भर्त्स्य प्रवृत्तः परिहासो गालीगालि, इति॥

ननु च अन्यपदार्थे बहुव्रीहिरित्युच्यमाने विस्पष्टपटुर्दूतः, पुनरूत्स्यूतं वासः, पञ्चशताः शरदः, इति सामान्यसमासानाम्; स्वयंधौतौ पादौ, सामिभुक्तमन्नं, श्रेणीकृताः पत्तयः, इति विशेषसमासानाम; विनिकृत्तप्ररूढो वृक्षः, कृष्णपिङ्गलो गावौ, ईषत्कडारोऽयमिति विशेषणसमासानाम्; अवकोकिलं वनम्, पर्यध्ययनश्छात्रः, निष्कौशाम्बिः सार्थः, इति प्रादिसमासानाम्; अक्षीश्यामा देवदत्ता, अवतप्तेनकुलस्थितं तवैतत्, कूपसमप्लूको माणवकः, इत्युपमानसमासानाम्; राजवल्लभा वलभी, वरप्रदेया कन्या, मासो जातोऽस्येति षष्ठीसमासानाम्; कष्टश्रितो रिक्षुः, वृकभीतो न्यङ्कुः, शङ्कुलाखण्डः पोगण्डः, इति कारकसमासानाम्; अश्राद्धभोजी ब्राह्मणः, पुमाननेकः पदार्थः, इति नञ्समासानां च बहुव्रीहिसंज्ञा प्राप्नोति। नैवम्; नैषामन्यपदार्थत्वं समासेन क्रियते, अपि तु गुणप्रधानत्वेन। यदसौ द्रव्यं श्रितो भवति गुणः, तस्य यल्लिङ्गं वचनमर्थो वा स तस्यापि भवति; तद्यथा—शुक्लं वस्त्रम्, शुक्ला शाटी, शुक्लः कम्बलः, शुक्लौ पटौ, शुक्लाः पटाः, इति। कथं पुनः विस्पष्टपटुप्रभृतीनां सामान्यसमासता? 'विस्पष्टादीनि गुणवचनेषु' (पा. ६-२-२४) इति ज्ञापकैः समासावगमे विशेषसमाससंज्ञाभावे, 'सह सुपा' (पा. २-१-४) इति समासाभ्युपगमे च 'प्राक्कडारात्समासः' (पा. २-१-३) इति समासस्य समाससंज्ञाश्रवणात्। कथं स्वयंधौतादीनां विशेषसमासता? 'स्वयं क्तेन' 'सामि' (पा. २-१-२५, २७) इति स्वयंसामीतिशब्दयोर्वृत्तिवाक्ययोर्विशेषेऽपि स्वरैकपदार्थमेव समासारम्भात्। 'श्रेण्यादयः कृतादिभिः' (पा. २-१-५९) 'कृत्यर्थे' इति च वृत्तावर्थविशेषात्। कथं छिन्नप्ररूढा-

दीनां विशेषणसमासता ? छिन्नश्चासौ प्ररूढश्चेत्यादिप्रकारेण विशेषणविशेष्यभावात् । ननु च, यदा छिन्नो न तदा प्ररूढः, यदा प्ररूढो न तदा छिन्नः ; तत्कथमर्थयोः परस्परसंमूर्छनायां सामानाधिकरणलक्षणो विशेषणविशेष्यभावो भवति ? य एव छिन्नः स एवायं प्ररूढः इत्यनुसंधानात् । अथेह कथम् कृष्णपिङ्गल इति ? यो ह्यस्य कृष्णो भागः न स पिङ्गलः, यस्तु पिङ्गलः स न कृष्ण इति । समुदायेषु वृत्ताः शब्दा अवयवेषु वर्तन्ते ; यथा—पूर्वे पञ्चालाः, उत्तराः कुरव इति । यदि वा कृष्णावयवयोगात् स एव कृष्णः, पिङ्गलावयवयोगात् स एव पिङ्गल इत्युपपद्यते सामानाधिकरण्यम् । अथ, ईषदित्यनेन किं विशेष्यम् ? कडारगुणयुक्तः पदार्थः । कथं पुनरव्ययानामसत्त्ववचनत्वे सत्त्वभूतार्थविशेषणत्वं भवति ? क्रियाविशेषणत्वात् । का पुनरत्र क्रिया ? कडारेण गुणेन योगः । यदि वा अव्ययानां केषांचित् सत्त्वगन्धित्वेन शक्तियोगादिः सत्त्वधर्मो दृश्यते ; तद्यथा—दोषामन्यमह्नः, दिवामन्या रात्रिः । 'दिवाकराद्रक्षति यो गुहासु लीनं दिवा भीतमिवान्धकारम्', इति । 'ग्रहवति मित्रहारिणि न त्वं योषाऽसि दोषाऽसि' इति । एवमयमपि सत्त्वगन्धित्वेन गुणं विशिंषन् द्रव्यं विशेषयिष्यति । ननु, कडारं द्रव्यमेव कस्मान्न विशेषयति ? यथा—ईषत्तन्त्रं कातन्त्रम् इति । तथा सति गुणस्येषद्भावो न लभ्यते ; तदुक्तम्—'ईषद्गुणवचनेन' इति । अथ कथं प्रादीनां द्रव्यवचनैः समासः ? यत्र हि कश्चित् क्रियावाची शब्दः प्रयुज्यते, तत्रैव प्रादीनां प्रयोगो भवति । उच्यते, प्रयोगादेवैतद्गन्तव्यम्—नूनमत्र प्रयोगार्हः शब्दो न प्रयुज्यते, येन प्रादेः सामर्थ्यमिति । तद्यथा—धूमं दृष्ट्वाऽग्निरत्रेति गम्यते ; त्रिविष्टब्धकं च दृष्ट्वा परिव्राजक इति । के पुनरत्र प्रयोगार्हाः शब्दाः ? ये कृदन्ताः कर्मकर्तृवाचिनः ; तद्यथा—अवकुष्टं कोकिलया अवकोकिलम्, परिग्लानोऽध्ययनाय पर्यध्ययनः, निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः, इति । अथ कथं शक्लीश्यामादय उपमानसमासा उपपद्यन्ते ? 'उपमानानि सामान्यवचनैः' (पा. २-१-५५) इत्यादिभिः । यद्येवम्, 'इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च' इति न वक्तव्यम्, वाससी इव, कन्ये इव, इत्यादिप्रयोगाणाम् 'उपमानानि सामान्यवचनैः' इत्यनेनैव सिद्धेः ; विभक्त्यलोपमात्रं पुनरलुक्प्रकरणे वक्तव्यं भवति । उच्यते—नायमिवशब्दः सामान्यवाची, अपि तु सामान्यद्योतकः, तद्यथा—नेत्रे नीलोत्पले इत्युक्ते तदाकारकान्त्यादयः प्रतीयन्ते । शक्लीश्यामेत्यादिषु साक्षात् सामान्यवचनः श्यामाशब्दः प्रयुज्यते । अथ, अवतप्तेनकुलस्थितमित्यत्र कथम् ? न ह्ययमुपमानम्, अपि तु क्षेपे । उपमानेनात्र क्षेपो गम्यते—अवतप्ते नकुलस्येव स्थितं तवैतच्चापलमिति ; यथाऽवतप्ते नकुलश्चिरस्थाता न भवति, तद्वत् कार्यमारभ्य यश्चिरं तत्र नावतिष्ठते स एवमुच्यते—अवतप्तेनकुलस्थितं तवैतदिति । एतेन कूपमण्डूक इत्यपि व्याख्यातम् ; यथा कूपमण्डूकः कूपाद्बहिरनिःसरन् देशान्तरव्यवहारं न जानाति, तथाऽयं स्वगेहाद्बहिरनिःसरन् न देशान्तरव्यवहार-

वेदी ; स एवमुच्यते—कूपमण्डूकोऽयमिति । अथ राजवल्लभेत्यादयः कथं षष्ठीसमासाः ? यतो राजवल्लभेत्ययं बहुव्रीहिः कस्मान्न भवति—राजा वल्लभोऽस्या इति ? अचेतनत्वेन वल्लभ्या वाल्लभ्यायोगात् । राज्ञस्तु वल्लभेति भवति । तत्र राजा निर्ज्ञातस्वार्थः, स्वभावतः सामान्यात् प्रच्युतः, सामान्ये व्यवस्थितस्योपकर्तुमशक्तेः ; संबन्धिसामान्यापेक्षः ; संबन्धिविशेषापेक्षो वा, संबन्ध्यन्तरस्य व्यवच्छेदार्थं प्रवृत्तेः, उभयाधिष्ठानत्वे सत्यपि संबन्धस्य परार्थमुपादानादुद्भूतसंबन्धप्रवृत्तिः, उपजातप्रातिपदिकार्थव्यतिरेकः, आत्मनि संबन्धोपभोगात् प्रधानेऽप्युपयुज्यमानसंबन्धषष्ठ्यन्त उपादीयते । प्रधानानि चानिर्ज्ञातार्थानि प्रथमयैव विभक्त्या युज्यन्ते ; तद्यथा—'कव पुनरिदं पठितम् ? ग्रामे नाम श्लोकाः' इति । ततश्च वल्लभाशब्दोऽनिर्ज्ञातार्थत्वादात्मव्यपदेशाय स्वार्थादप्रच्युतः स्वभावतो निरुपवृत्तिः, सत्यप्यर्थित्वे गुणानामेवोपलम्भात् ; परत इदंकारं लिप्समानो निर्ज्ञातार्थेन संबन्धिना स्वार्थविशेषे नियम्यमान उपरतौत्सुक्य औदासीन्येन प्रवर्तते । तत्र भेदाधिष्ठानस्य संबन्धस्य वाचिका षष्ठी, पदान्तराभिधेये संबन्धिन्याकाङ्क्षावता गुणपदेन विशेष्यमाणा गुणपदस्था श्रूयते, विशेषविषयत्वात्समासस्य । गुणाश्च स्वार्थोपसर्जनप्रधानार्थोपपादिनो भेदे विनिवर्तमाने भेदाधिष्ठानं संबन्धमभ्यन्तरीकृत्य प्रवर्तन्ते । तत्र राजवल्लभेति संबन्धे प्रातिपदिकार्थतामापाद्यमाने तद्विषया षष्ठी, स्वभावतो निवृत्ता कार्यार्थं सामान्येन प्रसक्ता 'सुपो धातुप्रातिपदिकयोः' (पा. २-४-७१) इति शस्त्राद्विनिवर्तमाने वाऽन्वाख्यायते । अथ वरप्रदेया कन्येति कोऽयं समासः ? षष्ठीतत्पुरुष एव ; यथा—देवदेयं पुष्पम्, ब्राह्मणदेयं धनमिति । नन्वेवम्, एते चतुर्थीसमासाः कस्मान्न भवन्ति ? 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' (पा. २-१-३६) इति तदर्थादिष्वेव तत्समाम्नानात् । तादर्थ्य एव हि तर्हि समासा भवन्तु ; यद्धि यस्मै प्रदीयते तदर्थमेव तद्भवति । नैवम् ; न तादर्थ्यमात्रे चतुर्थी समस्यते ; यथा—अवहननायोलूखलम् ; अपि तु प्रकृतिविकारतादर्थ्ये ; यथा—यूपरूपाया विकृतेः प्रकृतिभूतं दारु यूपदार्वीति । ननु च नात्र प्रकृतिविकारग्रहणमस्ति ; दृश्यते चाप्रकृतिविकारभावेऽपि, अश्वघासः, श्वश्रूसुरम्, 'अथातो धर्मजिज्ञासा' इति चतुर्थीसमासः ; तत्कथमुच्यते प्रकृतिविकारतादर्थ्ये एव चतुर्थ्याः सामर्थ्यमिति ? आचार्यप्रवृत्तिर्ज्ञापयति यदयं बलिरक्षितग्रहणं करोति—यथाजातीयकानां च समासे बलिरक्षितग्रहणमपुनरुक्तं भवति, तथाजातीयकानां समासः । विकृतीनामेव चतुर्थ्यन्तानां प्रकृतिभिः सह समासे बलिरक्षितग्रहणमपुनरुक्तं भवति, न तादर्थ्यमात्रे । अश्वघासादयस्तु षष्ठीसमासा भविष्यन्ति । यद्धि यदर्थं भवति, अयमपि तत्राभिसंबन्धः—तस्येदमिति ; तद्यथा—गुरोरिदं यदुर्वर्थमिति । तादर्थ्यमपि संबन्धविशेषः ; विशेषे चावश्यमेव सामान्यं संभवति । न चैतत्कर्मादिष्वपि न दृश्यते—माषाणामश्नीयात्, श्रुतं ते सर्वमेवैतत्, इति । ननु च वरप्रदेया कन्येति यदि ददातिप्रयोगेऽपि न संप्रदानम्, संप्रदानेऽपि न चतुर्थी, कोऽन्यस्तयोर्विशेषो भविष्यति ?

कः पुनराह—नात्र संप्रदानम्; संप्रदान एवैषा चतुर्थ्यर्थे षष्ठी; दृश्यते हि संप्रदानादौ षष्ठी-चतुर्थ्योरविशेषेण प्रयोगः; तद्यथा—'हिमवतो हस्ती' 'पुरुषमृगश्चन्द्रवसे' (वै. सं. ५-५-१९, १५) 'न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति' (बृ. २-४-५) विप्राय दत्तः, चिररात्राय दत्तः, 'रोचते मम घृतं सह गुडैः तिलयो दधिशर्करं क्षीरकाश्च' 'घृतमेव ममापि रोचते घृतगीतं च सशर्करं पयः' इति। अथ मासजातोऽन्यमिति किंप्रमाणोऽयं समासः? उत्तरपदार्थप्रधानः। स कर्मणाऽनेनान्यैरुत्तरपदार्थप्रधानैर्भवितव्यम्। अन्येषु चोत्तरपदार्थप्रधानेषु यैवकारान्तर्वर्तिनी विभक्तिरुत्तरस्याः समासेऽपि श्रवणं भवति; तद्यथा—राज्ञः पुरुषो राजपुरुषः इति। तद् पुनरर्थके षष्ठी, नाम्नि प्रथमा। केनैतद्भेदं गच्छति? योऽसौ मास-जातयोरभिसंबन्धः स प्रत्ययो निवर्तते, आक्षेपिकः योऽर्थोऽन्तर्भूतः प्रतिपादिकार्थः संपन्न इति, तत्र 'प्रातिपदिकार्थे प्रथमा' इति प्रथमा भवति। न तर्हीदानीं द्वे स्तः—मासजातस्येति। बाह्यं संबन्धिनमपेक्ष्य भविष्यति। नन्वु च 'कालाः परिमाणिना' (पा. २-३-५) अनेनायं समासः। न च जातस्य मासः परिमाणम्, अपि तु त्रिंशद्भावस्य; यथा—द्रोणो बदराणां देव-दत्तस्येति न देवदत्तस्य द्रोणः परिमाणम्, अपि तु बदराणाम्; तदाह—'कालस्य येन समा-सस्तस्यापरिमाणित्वादनिर्देशः' इति। किं पुनर्भवान् कालं मन्यते? येन मूर्तीनामुपचया अपच-याश्च लक्ष्यन्ते। तस्यैव तर्हि कयाचित् क्रियया युक्तस्याहरिति भवति, रात्रिरिति च। कया क्रियया? आदित्यगत्या। तयैवास्य वृत्तया मास इति च भवति, संवत्सर इति च भवति। यद्येवं भवति जातस्य मासः परिमाणम्, किंतु मासो जातस्येतिवत् सोऽसौ जातस्य मासस्य जातस्येति प्राप्नोति। नैवम्, मासजात इत्युक्ते द्वित्वादिसंख्याविशेषस्यानुपलम्भात्। यत्र तूपलब्धेर्नीमत्व-मस्ति तत्र भवत्येव; यथा—द्वौ मासौ जातस्य द्विमासजातः, एवं त्रिमासजातः, इति। कथं पुनः कारकाणां समास इत्युपपन्नं भवति? तेषां हि क्रियायैवाभिसंबन्धः; न च क्रियावाचिनः सुबन्तत्वमस्ति। सुबन्तयोरेवान्तर्भूतक्रियाविशेषयोर्भावेष्यतीति चेत्, नैवम्; द्रव्याणां क्रियोप-जनितः संबन्धः शेषविषयो भवति, न कारकविषयः। स्वभावसिद्धं हि द्रव्यं सिद्धवदभिधीय-मानं द्रव्यान्तरं प्रत्यात्मप्रतिलम्भे निराकाङ्क्षं न कर्मादिभावं भजते। न च समासप्रकरणे कारकाणि समन्यन्ते इति वचनमस्ति। उच्यते—मा भूद्वचनम्; अर्थतस्तु गम्यते; यदाह—द्वितीया श्रिता-दिभिः समस्यते; कष्टं श्रितः कष्टश्रितः इति। तत्र श्रित इत्युपात्तक्रियाविशेषपरिच्छिन्नः कर्ता, अभ्यन्तरीकृतसाध्यसाधनसंबन्धक्रियान्तरसंबन्धार्हैः स्वाश्रयविषयासु बाह्यासु क्रियासु शक्त्यन्तरैरपि विरुद्धैकार्थसमवायः कष्टादीन्युपसर्जनीभूतया श्रयतिक्रियाऽपेक्षते। ततश्च श्रयतिक्रियया संबन्धात् कष्टं कर्मत्वमिति श्रयणक्रियापूर्वकः कष्टश्रितयोरभिसंबन्धो भवति। तस्मिन् स्ववृत्त्यवयवार्थशक्त्य-नुगृहीतेऽर्थान्तरे प्रादुर्भूते तदभिधायी शब्दः समासंज्ञां लभते। एवं वृकाद्भीतो वृकभीतः इत्यत्रापि

'पञ्चमी भयेन' (पा. २-१-३७) इति वृकस्य भये 'भीत्रार्थानां भयहेतुः' (पा. १-४-२५) इत्यपादानत्वात् सति सामर्थ्ये, अभ्यन्तरीकृतक्रियाकारकसंबन्धः समुदायः समाससंज्ञां लभते। ननु च, न वृकस्य भीतं प्रत्यपादानत्वम्, अपि तु अयं भीतिः इत्येतानि। उच्यते—यथा साधो जातस्येति मात्राख्यः क्रियाकलापः अवयवक्षिप्तगर्भविशेषाभ्यन्तर्य जन्मनोऽवधिभूतेन परिच्छेदको भवति, जन्मप्रतिलब्धां वा तस्यां स्वमहत्त्व जातस्येति, तथेहापि वृकादिलक्षणपादानशब्दो भयमात्रस्यैवानवच्छेदको भविष्यति, न भीतस्य। नन्वि, यथा कष्टश्रित इत्यत्रोपात्तक्रियासंबन्धात् कष्टे कर्मणीति श्रवणक्रियापूर्वकं कष्टेन संबन्धः, तथेहापि उपात्तक्रियावच्छिन्नः कर्ता भयक्रियासंबन्धाद्वृकस्यापादानत्वमिति भयक्रियापूर्वकं वृकेण संबन्ध इति; अनुपात्तोपसर्जनीभूतायाऽपि क्रियायाः श्रवणम्; यत्र तु क्रिया न श्रूयते तत्र कथं शङ्कुलाखण्ड इति? प्रतीयमाना भविष्यति; तथा हि—शङ्कुलाखण्डः इत्युक्ते कृत इति प्रतीयते; तदेतद्योजयन्नाह—'तृतीया तत्कृतेन गुणवचनेन' इति। न्यायसिद्धत्वाद्वचनमनर्थकमिति चेत्, न; वचनस्य नियमार्थत्वात्—यत्रैव कृत इत्यादि गम्यते तत्रैव समासः, अन्यत्र मा भूदिति। एवं च गम्यमानक्रियोपगृहीतकरणकर्तृतृतीयान्तेन शङ्कुलादिना खण्डादीनां गुणयुक्तवचनां मतुल्लोपादिना द्रव्यवचनानां तृतीयान्तार्थकृतत्वे सति सामर्थ्यमवसीयते; न तूक्तविपरीते; यथा—अक्ष्णा काणः, पादेन खञ्जः, इति। तदेवमाक्षिप्तक्रियावच्छिन्नः क्रियान्तरसंबन्धार्हः खण्डशब्दार्थो गम्यमानोपसर्जनीभूतया करोतिक्रियया शङ्कुलादीनपेक्षमाणः करणभूतैः कर्तृभूतैर्वा शङ्कुलादिभिः संबध्यते। तद्वचनश्च समुदायोऽभ्यन्तरीभूतक्रियाकारकसंबन्धः समाससंज्ञो भवति। अथेह कस्मान्न भवति—दध्ना पटुः घृतेन पटुः इति? असामर्थ्यात्। कथमसामर्थ्यम्? सापेक्षमसमर्थं भवति; न हि दध्नः पटुना सामर्थ्यम्। किं तर्हि? भुजिना—दध्ना भुङ्क्ते पटुरिति। इहापि तर्हि न प्राप्नोति—शङ्कुलया खण्ड इति; अत्रापि न शङ्कुलायाः खण्डेन सामर्थ्यम्। किं तर्हि? करोतिना—शङ्कुलया कृतः खण्ड इति। तत्कृतेनेति वचनाद्भविष्यति। वचनादिति चेत्, अथेह गुणवचनेनेत्युच्यमाने कथं मतुल्लोपाद्द्रव्यवचनेन खण्डादिनेति प्रतीयते? वचनग्रहणात्; इह तृतीया तत्कृतेन गुणेनेति सिद्धे यद्वचनग्रहणं करोति तस्यैतत् प्रयोजनम्, एवं यथा विज्ञायेत—गुणमुक्तवान् गुणवचनः, खण्डगुणवान् खण्डः, पाण्डुगुणवान् पाण्डुः, इति। यद्येवम्, नार्थस्तत्कृतग्रहणेन भवति; भवति हि शङ्कुलायाः खण्डेन सामर्थ्यम्; असामर्थ्यादिह न भविष्यति—दध्ना पटुरिति। इदं तर्हि तत्कृतस्य प्रयोजनम्—द्रव्यवचनैः कारकसमासे तदनुरूपा क्रिया अध्याहर्तव्येति; तद्यथा—अक्षेषु प्रसक्तः शौण्डः अक्षशौण्ड इति। अथ द्रव्यवचनैस्तत्कृतसमासे गुणवचनेनेत्यपि किमर्थम्? इह मा भूत्—धान्येन धनवान्, गोभिर्वृषावान्, इति॥

अथ, अश्राद्धभोजीति कोऽयं समासः? असमर्थनञ्तत्पुरुषः। किं पुनरिहासामर्थ्यम्? पूर्वोत्तरपदयोर्मिथोऽनपेक्षा; तथा हि—अश्राद्धभोजीति भुजिक्रियया नञः संबन्धः, न श्राद्धेन; न हि तस्यायं नियमः—नश्राद्धं भोक्तव्यमिति; अपि तु—श्राद्धं न भोक्तव्यमिति। यत्र हि वर्तिपदार्थसमवायिनी क्रियाऽभिधीयमाना प्रतीयमाना वा स्वभावतो निवृत्ता नञा द्योत्यते—अपाचकः, अब्राह्मणः इति, तत्रैव सामर्थ्यम्। यत्र तु बाह्यक्रियया नञः संबन्धस्तत्रासामर्थ्यमेव; यथा—सूर्यमपि न पश्यन्ति, असूर्यंपश्या राजदाराः, न पुनर्गीयन्ते, अपुनर्गेयाः श्लोकाः, लवणं न भुङ्क्ते, अलवणभोजी भिक्षुः, इति। नन्वेवम्, अवयवार्थव्यतिरिक्तसमुदायार्थाभावेऽर्थवत्त्वाभावात् कथं प्रातिपदिकसंज्ञा? समासग्रहणादिति चेत्, अनर्थके कृतार्थत्वान्नियमानुपपत्तिः; ततश्चार्थवतो वाक्यस्यापि प्रातिपदिकत्वप्रसङ्गः। ननु च, 'असूर्यललाटयोर्दृशितपोः' (पा. ३-२-३६) इत्यनेनासमर्थनञ्समासानां साधुत्वे ज्ञापिते, अ किंचित्कुर्वाणः, अ मापं हरमाणः, अ गाधादुत्सृप्त इत्यादीनामपि ना सूत् समास इत्यसूर्यंपश्यादयश्चत्वार एवासमर्थसमासाः परिगण्यन्ते; परिगणनसामर्थ्यादेव प्रातिपदिकसंज्ञाऽपि भविष्यति; तथाऽप्यनर्थकत्वादाश्रयाभावे संख्याकर्मादयभावे तेषां वाचिका द्योतिका वाऽपि विभक्तयो नोत्पद्येरन्। नैवम्; समुदायस्तावदानर्थक्येऽपि 'न केवला प्रकृतिः प्रयोक्तव्या' इति नियमादवश्यमेवाव्ययादिवद्विभक्तिमात्रमपेक्षते; अवयवस्त्वर्थवत्त्वात् संख्याकर्मादेराश्रयत्वेन तां विशिष्टामेवाङ्गीकरोति; ततश्च यथाऽऽतुराणामातुर्योरेकभोजनप्रतिपत्तावातुराणां भोजनमनातुरोऽपि प्रतिपद्यते, तथाऽवयवार्थानुग्रहार्थकोऽपि समुदायो विभक्तिविशेषमेव प्रतिपत्स्यत इति न कश्चिद्दोषः। ननु, अत्यन्तेकार्थीभावे व्यपेक्षाधर्माः कथं निवर्तन्ते? के पुनस्ते? विशेषणयोगः, समुच्चयः, संख्याविशेष इति। तत्र ब्राह्मणस्य शोभनं श्राद्धं न भुङ्क्ते इति विशेषणयोगः, श्राद्धं न भुङ्क्ते बलिमामन्त्रणं चेति समुच्चयः, श्राद्धं श्राद्धानि वा भुङ्क्ते इति संख्याविशेषयोगः। ते च वाक्य एवोपलभ्यन्ते, न त्वश्राद्धभोजीति वृत्तौ; न ह्यश्राद्धभोजी ब्राह्मणस्य शोभनमित्यादि। तत्कथमुच्यते—नास्त्यत्रैकार्थीभाव इति? नैवम्; अश्राद्धशब्दो ह्यत्रासमर्थः, न त्वश्राद्धभोजिशब्दः; अश्राद्धभोजिविषयाश्चैते विशेषणायोगादयः प्रतीयन्ते, नाश्राद्धविषया इति। ननु च, यद्यश्राद्धशब्दः समुदायार्थाभावादनर्थकः, अश्राद्धभोजिशब्दोऽप्यर्थवदनर्थकसंघातत्वादनर्थकः प्राप्नोति। अस्त्वानर्थक्यम्। वाक्यविषयास्तु धर्मा भविष्यन्ति ह्यनानर्थक्यमपि परिहर्तव्यम्; इदं च परिह्रियते—शब्दशक्तिरेषा यदभिन्नेऽप्यर्थे केनचिच्छब्देनाभिधीयमाने विशेषणादियोगो भवति केनचिन्न भवति, तत्र वाक्येऽसमर्थसमासपदानामविद्यमानमपि वृत्तौ शब्दान्तरत्वादस्त्येकार्थाभिधायित्वमिति। ननु च, यद्यसामर्थ्येऽपि वचनात् समासः—किमयं ते वस्त्रं नीलम् उत्पलमालि कर्णे; नेह कश्चित्पुरुषः व्याघ्रः सरति पल्वलीम्; पश्य साखि कष्टम् चित्रः प्रियो मे गुरुकुलम्; किं ते शङ्कुलया खण्डो देवदत्त उपलेन; गच्छ त्वं गृहाय दारु शोभनं

शैले; निवर्तस्व वृकात् भयं देवदत्तस्य यज्ञदत्तात्; भार्या राज्ञः पुरुषो देवदत्तस्य; सक्तः त्वमक्षेषु शौण्डः पिबति पानागारे इत्यादावपि समासः प्राप्नोति; स तर्ह्यत्रापि वचनात् 'विशेषणं विशेष्येण', 'द्वितीया श्रितादिभिः', 'तृतीया तत्कृतेन', चतुर्थी तदर्थेन', 'पञ्चमी भयेन', 'षष्ठी सुबन्तेन', 'सप्तमी शौण्डादिभिः' समस्यत इति। विषम उपन्यासः; परिगणनादीन्यसामर्थ्ये एव समासार्थमारभ्यन्ते; यथा—कृतपूर्वी कटमित्याद्यर्थं 'पूर्वादिनिः' 'सपूर्वाच्च' (पा. ५. २. ८६, ८७) इति। 'विशेषणं विशेष्येण' इत्येवमादीनि तु 'समर्थः पदविधिः' (पा. २. १. १) इति सामर्थ्ये सत्युपादीयन्ते। सामर्थ्यविषयप्रदर्शनार्थमेव च 'विशेषणं विशेष्येण' इति प्रथमायां सामानाधिकरण्यम्, द्वितीयायां श्रितादिनियमः, तृतीयायां तत्कृतादिवचनम्, चतुर्थ्यां प्रकृतिविकारभावः, पञ्चम्यां भयादिपरिगणनम्, षष्ठ्यां पूरणादिनिषेधः, सप्तम्यां शौण्डादिनिर्देशः, इत्युपपद्यते। तेन यत्र विशेषणादिषु सामानाधिकरण्यादेरभावः, तत्रासामर्थ्यात् समासो न भवति॥

अब्राह्मणोऽयमिति कोऽयं समासः? समर्थनञ्तत्पुरुषः। किंप्रधानोऽयम्? उत्तरपदार्थप्रधानः। अब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोति। नैष दोषः; इदं तावदयं प्रष्टव्यः—अथेह राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं कस्मान्न भवति? राजात्र विशेषकः प्रयुज्यते, तेन राजविशिष्टस्यानयनं भविष्यति। इहापि नञ् विशेषकः प्रयुज्यते; तेन नञ्विशिष्टस्यानयनं भविष्यति। कः पुनरसौ? निवृत्तपदार्थकः। यदा पुनरस्य पदार्थो निवर्तते, तदा किं स्वाभाविकी निवृत्तिः? आहोस्विद्वाचनिकी? किं चातः? यदि स्वाभाविकी, किं नञ् प्रयुज्यमानः करोति। तर्हि वाचनिकी भविष्यति; किंच प्रतिकीलवत्; तत्र यथा कील आहन्यमानः प्रतिकीलं निवर्तयति, एवं नञ् प्रयुज्यमानः पदार्थं निवर्तयति। यद्येतन्नञो माहात्म्यं स्यात्, न जातुचिद्राजानो हस्त्यश्वं बिभृयुः, नेत्येव ब्रूयुः। एवं तर्हि स्वाभाविकी निवृत्तिः, नञ्निमित्ता तूपलब्धिः; तद्यथा—संतमसान्धकारे द्रव्याणां प्रदीपनिमित्तं दर्शनम्, न च तेषां प्रदीपो निवर्तको भवति। यदि पुनरयं निवृत्तपदार्थको नञ्, किमर्थं ब्राह्मणशब्दः प्रयुज्यते? एवं यथा विज्ञायेत—अस्य पदस्यार्थो निवृत्त इति; नेति ह्युक्ते संदेहः स्यात्—कस्य पदार्थो निवर्तत इति; तत्रासंदेहार्थं ब्राह्मणशब्दः प्रयुज्यते। यदि वा, सर्व एते शब्दा अवयवेष्वपि वर्तन्ते—ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्र इति॥

'तपः श्रुतं च योनिश्च तत्र ब्राह्मणकारणम्। तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः॥'

तथा गौरः कपिलः पिङ्गलकेश इत्येतानप्यान्तरान् ब्राह्मण्ये गुणान् ब्रुवति। समुदायेषु ये वृत्तयः शब्दा अवयवेष्वपि वर्तन्ते; तद्यथा—पूर्वे पञ्चालाः, उत्तराः कुरव इति। एवमयं

समुदाये ब्राह्मणशब्दो वृत्तोऽवयवेऽपि वर्तते गुणे जातौ च। गुणे तावत्—अब्राह्मणोऽयं यस्तिष्ठन् मूत्रयतीति, अब्राह्मणोऽयं गच्छन् भक्षयतीति। अपि च, कालं करोषं मापराशिवर्णमापण आसीनं दृष्ट्वाऽध्यवस्यति—नायं ब्राह्मणः; अब्राह्मणोऽयमिति निर्ज्ञातं तस्य भवति; गुणकृता चार्थस्य निवृत्तिः। अथ जातौ—जातिहीने संदेहादुरुपदेशाद्वाऽन्यो ब्राह्मणशब्दः प्रवर्तते। संदेहात्तावत्—गौरमयं शुच्याचारं पिङ्गलं कपिलकेशं दृष्ट्वाऽध्यवस्यति—ब्राह्मणोऽयमिति; ततः पश्चादुपलभते—नायं ब्राह्मणः; अब्राह्मणोऽयमिति निर्ज्ञातं तस्य भवति। अत्र संदेहाच्च ब्राह्मणशब्दो वर्तते; जातिकृता चार्थस्य निवृत्तिः। अथ दुरुपदेशात्—दुरुपदिष्टमस्य भवति—अमुष्मिन्नवकाशे ब्राह्मणमानयेति; स तत्र गत्वा यं पश्यति तमध्यवस्यति—ब्राह्मणोऽयमिति; ततः पश्चादुपलभते—नायं ब्राह्मणः, अब्राह्मणोऽयमिति। तत्र दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते; जातिकृता चार्थस्य निवृत्तिः। ननु च, नञ्व्यवच्छेदाय ब्राह्मणादिशब्दप्रयोगे समासस्य पूर्वपदप्रधानता प्राप्नोति; नैवम्, अव्ययसंज्ञाप्रसङ्गात्; अव्ययं ह्यस्य पूर्वपदम्। नैष दोषः; पाठेनाव्ययसंज्ञा क्रियते; न च नञ्समासस्तत्र पठ्यते। मा भूदव्ययेषु पाठः; तथाऽप्यभिधेयबल्लिङ्गवचनानि भवन्ति; यश्चेहार्थोऽभिधीयते न तस्य लिङ्गसङ्ख्याभ्यां योगोऽस्ति। नेदं वाचनिकम्—अलिङ्गता, असङ्ख्यता वा। किं तर्हि? स्वाभाविकमेतत्; तत्र किमस्माभिः शक्यं वक्तुम्—यन्नञः प्राक् समासाल्लिङ्गसङ्ख्याभ्यां योगो नास्ति, समासे च भवति। यदि वा, गुणवचनानामाश्रयतो लिङ्गवचनानि भवन्ति; यदसौ द्रव्यं श्रितो भवति गुणः समासो वा, तस्य यल्लिङ्गं वचनं च तत् गुणस्यैव समासस्यापि भवति। उच्यते; इह त्रयी गतिः—कदाचिन्नञर्थेनोत्तरपदार्थो विशेष्यते, कदाचिन्नञर्थ उत्तरपदार्थेन, कदाचिन्नञर्थोत्तरपदार्थाभ्यामन्यः पदार्थ इति। तत्र यदा नञर्थोत्तरपदार्थाभ्यामन्यपदार्थो विशेष्यते तदा 'समानाधिकरणानां बहुव्रीहिः'; नञर्थश्च विशेष्यो भवतीति षट् समासार्थभेदा जायन्ते—अत्यन्ताभावः, अनत्यन्ताभावः, अन्यतराभावः, तादात्म्याभावः, संबन्धाभावः, प्रध्वंसाभावः, इति; यथा—अरूपो वायुः, अनुदरा कन्या, अकिंचनः पुमान्, अपिशाचः कुड्यः, अघटं भूतलम्, अनङ्गः कामः, इति। यदा तूत्तरपदार्थेन नञर्थो विशेष्यते, तदा पूर्वपदार्थप्रधानस्तत्पुरुषः; नञर्थोपाधेश्च षट् समासार्थभेदा जायन्ते—प्रागभावः, सामर्थ्याभावः, आवश्यकताभावः, इतरेतराभावः, सत्ताभावः, भावाभावः, इति; यथा—अनुत्पन्नो घटः, अप्रधृष्यः सुभटः, अभूषितः कान्तः, अवर्षा हेमन्तः, असत् शशविषाणम्, अनुद्भिन्नः प्रवालः, इति। यदा तु नञर्थेनोत्तरपदार्थो विशेष्यते, तदा उत्तरपदार्थप्रधानस्तत्पुरुषः; पदार्थस्य च नञर्थोपाधेः षट् समासभेदा जायन्ते; यथा—तदभावः, तदन्यः, तत्सदृशः, तद्विरुद्धः, तदपकृष्टः, तदुत्कृष्टः, इति; यथा—अनन्यः, अनात्तिः, अब्राह्मणः, असितः, अमनुष्यः, अमानुषः, इति। ननु च, अन्यपदार्थ-

तत्पुरुषयोरन्यत्रापि नञ्समासो दृश्यते ; यथा—मक्षिकाणामभावः अमक्षिकमिति । नायं नञ्-समासः ; किं तर्हि ? 'अव्ययं विभक्ति' इत्यादिनाऽव्ययमभावार्थे समस्यते ; अव्ययीभावश्च समासो भवति ; यथा—निवातम्, निशीतम्, इति । किं पुनरमी नञ्समासार्था अन्यपदार्थादिषु व्यवतिष्ठन्ते उत संभवन्ते ? केचिद्व्यवतिष्ठन्ते प्रध्वंसाभावादयः ; तद्यथा—

भवेद्भीष्मद्रोणं धृतराष्ट्रबलं कथम् ।
यदि तत्तुल्यकक्ष्योऽत्र भवान् धुर्यो न युज्यते ॥

यथा च—अनुदरा कन्या, अलोमिका एडकेति । केचित्तु संभवन्ते प्रागभावादयः ; तद्यथा—

अजन्मा पुरुषस्तावदपुमान् पशुरेव वा ।
यावल्लीलावतीकटाक्षवीक्षितार्थं न बुध्यते ॥

यथा च—अनेके, अनेकः इति । ननु च, एकशब्दो बह्वर्थः ; तद्यथा—'एकः कोऽपि स कुम्भसंभवमुनिः' इत्युत्कर्षार्थः ; तत्रैके तावदाहुरिति पक्षान्तरार्थः ; एक एवायमावयोः स्वभाव इति तुल्यार्थः ; नैकः शयीतेत्यसहायार्थः ; एकमेवेदं शब्दब्रह्मेत्यभेदार्थः ; एकः, द्वौ, बहवः इति संख्यार्थः ; तत्कस्येह ग्रहणम् ? संख्यार्थस्य ; उत्कर्षादीनां कस्मान्न भवति ? अनभिधानात् ; तद्यथा—अमित्र इत्युक्ते पूर्वपदार्थप्रधानतत्पुरुषे शत्रुरेव प्रतीयते, न त्वसूर्यः । एवं अनेके इत्युक्ते बहव एव प्रतीयन्ते, न पुनरनुत्कर्षादिमन्तः । एतेन तत्पुरुषस्योत्तरपदप्राधान्ये सत्यनेक इत्यपि व्याख्यातम् । कथं पुनः एकस्य प्रतिषेधे बहूनां संप्रत्ययः स्यात् ? प्रसज्यायं क्रियागुणौ ततः पश्चान्निवृत्तिं करोति ; तद्यथा—आसय भोजय शायय अनेकम्, इति । स्यादेतत्, यत्र क्रियागुणौ प्रसज्येते ; यत्र तु खलु न प्रसज्येते तत्र तु कथम्—अनेकस्तिष्ठतीति ? भवत्येवंजातीयकेष्वपि एकस्य प्रतिषेधे बहूनां संप्रत्ययः ; तद्यथा—न न एकं प्रियम्, न न एकं सुखम्, इति ॥

प्रकृतिप्रत्ययौ लेधा त्रिधोपस्कारभक्तयः ।
त्रिधैवोपपदप्रातिपदिकानां विभक्तयः ॥

त्रिधोपसर्जनं लेधा समास इति कीर्तितः ।
प्रतिपादकशब्दोऽयमथान्वाख्येय उच्यते ॥

पदमिह त्रिविधं प्रतिपाद्यते
त्रिविधमेव हि वाक्यमथ त्रिधा ।
व्यवहृतिः खलु शब्दनिबन्धना
यदनयोरुभयोः प्रतितिष्ठति ॥

इति महाराजाधिराज श्रीभोजदेवविरचिते
शृङ्गारप्रकाशे प्रातिपदिकादिप्रकाशो नाम
द्वितीयः प्रकाशः संपूर्णः ॥



The Journal

OF THE

Sri Sankaragurukulam

Srirangam

VOL. III. NO. II.

RAGHUVAMSA—A STUDY.

By Mimamsaratna A. V. GOPALACHARIAR, M. A., B. L.

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

I bow to (or sing the praise of) Parvati (the Mountain Princess) and Paramesvara (the Sovereign of Unlimited Power) who are the Universal Parents and who are, as it were (or like unto) the harmonious combination of sweet expression and fine idea, so that I may be blessed with such combination of choice words and beautiful ideas (for the benefit of the world).

Poetry is the sweet and harmonious combination of lovely ideas and lovely and musical expression beautifully embellished with all excellences without any fault. Sabda and Artha combined happily and with all graces make a Kavya. The poet suggests that good Poetry which is a tasteful combination of lovely idea and lovely expression is an even rarer beauty than the Divine Couple—Nataraja, the Master-Dancer and the Mountain Princess—the embodiment of all the loveliness and natural graces in the Universe. In a simile (upamana), the object compared with—upameya—is lesser than the upamana. In showing Vak and Artha as

the upamana, the poet finely suggests that poetic Vagartha is even lovelier than the Divine Couple.

The two combinations—the Vagartha and the Divine Couple—reflect upon each other and suggest a variety of ideas which contribute to the mutual adornment of the two pairs.

The Goddess represents the Beautiful and Isvara the Sublime. The most beautiful Vak and the most sublime ideas together form the ideal poetry. The poet indicates his ideal of good poetry at the very opening of his maiden poem and prays to be blessed with the poetic talent by the fountain-source of all talent. The Vak and the Artha must hug each other in loving embrace and be wedded inseparably to each other. They must be kissing each other as it were. They must so deserve each other and be mutually so appropriate that no other language could so well fit in with the idea.

One must be able to feel and say about them as Valmiki said of the Divine Couple, "Raghava deserves Vaidehi and she, with her black eyes, deserves him. **राघवोऽर्हति वैदेहीं स चेयमसितेक्षणाम्।** Any attempt to substitute another expression or idea and separate the poet's combination must be cruel like separating a loving couple locked in fast embrace. You cannot remove a single word and substitute another without marring the beauty of the poem.

On account of the wonderful aptness of the expression to the idea, the two must be practically immutable. The idea of immutability of the expression being present to the poet is confirmed by the use of the word Parvati in the place of the Vak. The Vak must be immutable and unshakeable like a mountain. The Vak must rise to the height of the Himalayas.

As any divorce or other separation is unthinkable in the case of the Divine Couple, any divorce or separation between the Vak and the Artha must be equally unthinkable.

As the divine couple are not made, the poet's combination must be eternal, not made. And the combination of the divine couple is eternal; the Vagartha-combination, *i.e.*, the poetry, must be immortal. As they are ever and ever fresh, although never so old, the poem must be ever fresher and fresher and bear countless readings.

The power of the idea must be great like Paramesvara's power; the idea must have the most forceful appeal to the reader and must rule his heart. The two together must sit in the heart and rule it like the divine couple (Antaryami). The use of the word Paramesvara in the place of the Artha, is clear indication of the idea being in the poet's mind. The Sruti says

that the divinity gives itself to the devotee and clothes him with divinity (Atmada) and power (Balada). The Rishis say "Artha is Vishnu and Lakshmi is Vani (Speech)". "Sarva's sweetheart is the basis of the world of words, and the Lord with the lovely crescent on His head is the basis of the world of ideas". It is interesting to note that in stating this Parvati is described as Siva's love. The idea that the two could not be separated is indicated by describing her not by her name, but as her Lord's love. She is nothing if not that. The idea of perfect love and happiness between the Vak and the Artha is also suggested. The Lord's head bearing the lovely crescent must be full of fine ideas, lovely like the crescent. They enhance each other's beauty and deserve and and irradiate each other. Any attempt to separate them or divorce one from the other will be unthinkable. The attempt, if made, must be cruel as Ravana's attempt to separate Sita from Rama. The separator must be a Ravana and make us weep. That was exactly the feeling of Hanuman when he said on seeing Sita under the Asoka tree, 'that Sita was like Vak wrested from its legitimate and appropriate idea and put to a wrong use संस्कारेण यथा हीनां वाचमर्थान्तरगताम्। It will be a greater outrage than Ravana's. Kalidasa evidently had Valmiki's description in mind when he sang this verse. There the piteousness of the separation was emphasised; here the beauty and joy of the union is described. Valmiki was uppermost in his mind. That it was so is proved by his reverential reference to him in the third Sloka itself as opening the door for Vak. It is quite appropriate that the poet should open his mouth with a lovely idea voiced by Valmiki. The Vak Dwara for this poem literally opens with Vak. Bharavi describes the inapt use of language as murder (करोत्यसंस्कारहतामिवोक्तिम्)

Kalidasa is a worshipper of the beauties of language. The fine combination of a fine suffix (Pratyaya) with the root-word (Prakriti) occurs to him as an Upamana for comparing the apporpriate union of the sons of Dasaratha with the brides of Mithila. The idea of the immortality of the Vagartha set forth in the Paspasa of Patanjali is also present to the poet. The desire is indicated that the poem must be immortal as the divine couple. सिद्धे शब्दार्थसंबन्धे says the Mahabhashya. 'Siddha' means eternal and unmade. That the poet's mind was full of the Mahabhashya Paspasa is shown not only by his reference to the eternal connection between Vak and Artha but also by his use of the word 'Samprikta' immediately after Vagarthaviva. The Paspasa beautifully uses the word

Mother Sruti in giving a model of the Teacher's commandments to the pupil on the eve of his leaving the Gurukulam after completing his studies. The Teacher modestly puts himself after the Mother and Father.

Ladies are honoured in the Sanskrit Literature from the Vedic times. Mena is the name of women in the Veda. Yaska says, 'she is called Mena, because she is honoured 'Manayantyenam iti'.

'*Samprktau*'—United. The indissolubility of the union is suggested by the prefix sam meaning 'well.' The foundations of poetry are well and truly laid. The root 'Prci' by itself means 'samparka', "Prci samparke" is the Dhatu patha. To add the prefix 'sam' is to further strengthen the union, to the degree of inseparability. 'Sam' also draws attention to the extreme loveliness of the union. Besides the Paspasa of the Mahabhashya already referred to as suggesting the word 'samprkta' to the poet, the poet appears to remember also the famous verses of Valmiki at the opening of the Yuddha Kanda: 'The ocean shone like the sky, and the sky like the ocean. The ocean and the sky seemed to coalesce and be one vast expanse. The blue ocean was united indistinguishably with the blue sky and the blue sky was so united with the blue ocean'.

सागरस्याम्बरप्रख्यमम्बरं सागरोपमम् ।
सागरं चाम्बरं चेति निर्विशेषमदृश्यत ॥
संपृक्तं नभसाऽम्भः संपृक्तं च नभोऽम्भसा ।

The poet seems to be thinking also of the word 'samprktau' appearing in Valmiki's description of the union between Rama and Sugriva. Valmiki says of them. **इभावेकान्तसंपृक्तौ ततस्तौ नरवानरौ** Valmiki seems to suggest humorously that although there was only as much in common between the two as between the words 'nara' and 'vanara' which have in common only the two letters 'na' and 'ra' they were united so closely as to produce an impression of 'aikya' 'oneness', Hanuman said to Sita of their union **रामसुग्रीवयोरैक्यं देव्येवं समजायत** Although Parvati and Parameswara are united as one, this union is of Spirit with spirit, Soul with soul, and has not the least carnal touch about it. Could there be any carnal touch about the union of Rama the Nara with Sugriva the Vanara. As any such suggestion would be absurd in that union so would it be in the case of the divine couple. Of the same union, Kalidasa himself affirms perfect asceticism and the absence of carnal attachment at the opening of the Malavikagnimitra. **कान्तासंमिश्रदेहोऽप्यविषयमनसां यः स्थितस्तत्वतीनाम्** There also 'sam' is added to 'misra' which by itself connotes 'union'.

Sammisra answers to 'samprkta'; prkta means the same as 'misra'.

Bharavi in Arjuna's Stotra (xx) says

of Lord Siva the Kirata : चक्षुः शरीरेऽस्ति न चास्ति मन्मथः. Kalidasa uses the word 'samprkta' used by Valmiki in the above connection to suggest the absence of any carnal touch in the union. There could be no real sex or division of sex in the Divinity. The division is only one of two aspects : the Beautiful and the Sublime, elegant grace and power, melting Mercy and stern and hard Justice, motherly and fatherly aspects. Brahma, Tat and Sat, the names of Divinity, are all of the neuter gender. The Sruti says to Brahman, "You are a woman (stri) ; you are a man (purusha) ; or you are a girl (kumari) ; you are like a crabbed old man trudging along with a stick ; you are myriad-faced (visvato-mukhah);' In the Taittiriya Brahmana, 'samprkta' is used of the lovely combination of the twin Gods 'Asvin' noted for their supreme beauty and for their healing power as Divine Physcians. By drawing attention to the Vedic words "madhva samprktau" describing the Asvin's combination our Poet draws attention to that combination and suggests the healing power of good poetry when the mind is tormented by mundane ills.

The union is unique ; there is a very strange mutual half-metamorphosis of sex as it were, The musical and enchanting expression (Vak) sinks into the lovely idea and the idea sinks into the expression. They become one and indistinguishable in their immeasurable sweetness. They sink into each other and sweeten and beautify each other.

Vagarthapratipattaye—For the gift of the best vak and artha. To whom is the gift to be ? The word following 'jagatah', is cunningly placed after this and before 'pitarau'. It must govern this and also the succeeding word. For the words 'vagarthapratipattaye'—for the gift of a classical poem to the world as a model of good vak and artha. The poet does not say 'to me' but he expressly says 'to the world'. The poet's prayer is for the gift to the world of a classical poem for students to learn and write model vak and model artha. The poet envisages the great destiny of his poem. Every student has to get his vagarthapratipatti from this poem. His instruction was to begin with "sa rajyam". The student's entry into the poetic kingdom must be brought about by his Guru with that Sloka.

Jagatah pitarau—To whom is the appeal made for providing a model poem for the instruction of the children of the Sanskrit world of all time in good Vak and Artha ? Of course, it must be to the parents of the world. It is the duty of the parents to give good literature for their children ; the Parents of the world are certainly interested in providing a Classical poem

which may be a Universal Text-book for all time, popular and never-changing. The middle word 'jagatah' like the 'madhya-mani', (the middle brilliant gem) or the 'dehali-dipa (the lamp in the middle passage) governs and illuminates the words on either side. Arunagirinatha points out that the word 'pratipatti' has six meanings and all the six are meant here.

Vande—This is placed immediately after 'pitarau'. The poet cannot think of the Divine Parents without at once falling at their feet. There cannot be even a second's delay. This is placed before 'Parvati-Paramesvarau'. We say 'Abhivadaye' in the beginning and that too is conformed to by the poet, The root 'vand' has two meanings 'abhivadana' and 'stotra'. Abhivadana is very appropriate in the case of the parents. They are the first to be saluted. The Bhiksha of Vak and Artha is begged of the Parents. The mother is the first instructor of the child in Vak and Artha. The word 'Vande' is indicative of complete self-surrender and a merger (sinking) of one's self into the object of worship. The rishis interpret 'namas' as meaning 'Na aham', 'na mama' (not I, not mine). "I am not *me*, but you are *me*". "Whatever is reputed to be mine is not mine, but yours". 'I am not the poet Kalidasa, but you are he'. Who is Dhananjaya? Not Arjuna, but Krishna. "Pandavanam Dhananjayah". The poem is not mine, but yours. That the poet makes a complete surrender and self-effacement and lets in the divine Parents into his mind and feels that the Divinity is employing him as a mouth-piece is voiced by him by the words "Soham" at the very commencement of the relation of this narrative. The Divinity becomes I and begins to sing. The meaning of "Stuti" (praise) is also meant. I sing the praise of the Divine Couple and their Amsas. The couples presented in the poem, Dilipa and Sudakshina, Aja and Indumati, and Rama and Sita are either chips of the Divine Couple or the Divine Couple themselves. All good poetry sings the praise of God.

Parvati-Paramesvarau—The word 'pitarau' is put before to stress the parental relationship and dispel all fear and awe. Well-assorted combinations are rare. When there is a suitable union formed, rishis call to mind other such rare unions which are universally known and proverbial. When Draupadi garlands Arjuna at the Svayamvaram, the bridal pair are compared by Vyasa to other rare sweet couples known to the Puranic literature. Amongst them are 'Mahesvara and Parvatarajaputri" and "Rama and Maithilarajaputri". महेश्वरं पर्वतराजपुत्री समं यथा मैथिलराजपुत्र्या।

The ideal of pure speech and pure idea (pure thought and speech) is remembered throughout the poem by

the poet in many forms. The Raghus the heroes, are Ajanasuddhas–pure, from birth and they maintain their spotless purity till they end their earthly existence by Yoga. The story of such pure heroes must be sung in the purest language and with the chastest ideas.

Patanjali in his first Ahnika voices his ideal of good language. He quotes a mantra which says that good language must lay its idea bare to the intelligent reader in all its natural beauty like a loving wife in neat apparel to her lord. उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः The Bhashyakara says "Vanguo vivrnuyadatmanam". 'Let Vak exhibit her beauty to us.' Language (sabda) is the vehicle of Isvara. Languages bring the invisible lord into our vision. "Vrishabho roraviti" says the Mantra. Garuda, who is the Veda is Vishnu's vehicle. The Veda brings the God to us. Sabda is the Lord's Vrishaba. Sabda is called Vrishabha also because of 'varshana' (raining) of sweet nectar. Another mantra says that language and idea must be winnowed and cleansed of all chaff: "सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत । " Hanuman's speech came in for Rama's admiration. A bad word is considered to be a Mleccha (outcaste). "Vyakarana must be read so that one may not be a 'mleccha'.

Pandit SUBRAHMANYA SASTRY

AN APPRECIATION.

By Gurubhaktasikhamani Sastraprasarabhushana
T. K. Balasubrahmanya Aiyar B. A.

In this materialistic age and in this work-a-day world with its mad race after lucre it is a real pleasure to come across a personage who had a genuine love towards the language, literature, and the culture of his forefathers and worked hard for the resuscitation without the expectation of *any* kind of reward pecuniary or otherwise. The late Pandit S. Subrahmanya Sastry was one such rare individual. A very quiet and unassuming personage in spite of his erudite scholarship, he worked hard day and night for the resuscitation of Sanskrit literature in all its branches. Born of poor but respectable orthodox parents in the village of Valadi, Trichinopoly Dt., he spent his early days at Srirangam at the house of my father the late Principal Sadramin T. Krishnaswamy Iyer where his uncle one Mr. Sundarabhagavatar of Palamaneri and another relation of his, the late Nemam Subrahmanya Bhagavatar were already engaged in conducting daily bhajanas and pujas. In their company, the boy Subrahmanyam also acquired a taste for music and would sing several songs when myself, himself and the

late V. Anantakrishna Iyer, Retd., Dy., Collector played at carrying processions of gods round about the house. While here he studied English up to the Matriculation class. He married at an early age the daughter of the late Pazhamaneri Rama Sastrigal who with his brother the late Sundara Sastrigal adorned the court of Mysore as Palace Mahavidvans. The said Rama Sastrigal was a great Mimamsa scholar and the young Subrahmanyam got all his knowledge of Sanskrit literature, and Philosophy from his father-in-law and his brother. From the very commencement, he used to be thorough and very accurate in all that he learnt and this habit he kept up till the end of his life. His unbounded love for Sanskrit made him ferret out from among the old cadjan leaves rare works and copy them out in his own beautiful and inimitable handwriting which will be very clear and legible and just like print. It will be a pleasure to read his Mss. accurately punctuated, neatly spaced out, closely written with paragraphs and various readings legibly marked. The compositors in the Press will be delighted to compose from his Mss, so much so that they would insist on my asking this Pandit to prepare the Press copy of the Mss. written by others. Before I started the Sri Vani Vilas Press, he used to send Mss. of the rare Sanskrit works to the Nirnaya Sagar Press of Bombay for publication in the Kavyamala Series. After the establishment of the Sri Vani Vilas Press in 1904, there was no Sanskrit work published from the Press for which he has not prepared the Press copy and gone through the entire proofs. In correcting the proofs he will be very careful and always maintain the correctness of his corrections and readings as against those of others. He worked with me in this Press for a long time when the Memorial Edition of the works of Sri Sankara was printed and his ardour for work was something indescribable. I had then a number of very eminent scholars co-operating with me in the matter of collating, editing and correcting the various works comprised in the Memorial Edition as also the other Advaitic works published then. When all these scholars had completed their corrections Pandit Subrahmanyam would make some suggestions which would be acceptable to all of them. But for his humility and unassuming unselfishness, he would have risen to the highest place among Sanskrit scholars and earned a very high name with a lot of titles and wide-spread fame. These are days of push without which no one is taken note of. Merit for Merit's sake is a thing of the past. Nowadays people with very shallow learning but with great push become great men with a number of titles both as prefixes and suffixes to their names and make much fuss in the world. But Pandit Subrahmanyam was of sterling worth shining far above the modern fussies, doing his work for work's sake and with a zealous love unknown in these days. He cared not for public praise but cared only for the accuracy of his work. He was a very keen and intelligent scholar ever bent on acquiring fresh knowledge. He learnt Marathi in his advanced age and translated Bala Gangadhara Tilak's Gitarahasya into Tamil, the first two parts of which have been published by the Sri Vani Vilas Press of Srirangam. He unearthed several rare & valuable Sanskrit works from the Tanjore Palace Sarasvati Mahal Library as well as private libraries and had them published by the Sri Vani Vilas Press, the most prominent of which is the *Brahmanandagiri*, a commentary of Sri Venkatanatha on the Bhagavadgita. He was an earnest member of the Theosophical Society till the end of his days. For a long time he was the Sanskrit Pandit of the Kalyanasundaram High School, Tanjore, where the scope for the exhibition of his talents was very limited,

The Journal

OF THE

Sri Sankaragurukulam

Srirangam

VOL. III. JANUARY—MARCH NO. 12.



Editor :
Gurubhaktasikhamani,
Sastraprasarabhushana,
T. K. BALASUBRAHMANYA AIYAR,
B. A.
Founder, Sri Sankara-
gurukulam, Srirangam.

Literary Adviser :
Bharatakalanidhi
Vidyasagara,
Vidyavacaspati,
P. P. SUBRAHMANYA SASTRI,
B. A. (Oxon) M. A,
Curator, Govt.
Oriental Mss. Library
& Professor of
Sanskrit, Presidency
College, Madras.

ANNUAL SUBSCRIPTION { INLAND Rs. 6/—Post Free.
FOREIGN SH. 12/—

CONTENTS.

Original Articles.

1	श्री सारस्वताष्टकम्	By Vedantakesari Ganapati Sastrigal, Panganad	50
2	महामायाष्टकम्	Do.	51—52
3	संस्कृताष्टकम्	Do.	53
4	श्रीकृष्णस्तवः	By Kavibhushana Ramanatha Sastri	54—58
5	तीर्थविनायकस्तवराजः	By Sri Sacchidananda Tirtha Swami	59—60
6	अभिज्ञानशाकुन्तलानुभवः	By Mimamsaratna A. V. Gopalachariar M.A., B.L.	60—64

Rare & Hitherto Unpublished Works.

7	सौन्दर्यलहरी	By Sri Sankara Bhagavatpadacharya with three commentaries — Lakshmidhara, Saubhagyavardhini and Arunamodini	25—32
8	तत्त्वकौस्तुभः	By Sri Bhattoji Dikshita	25—32
9	मयूखावली	A commentary on the Sastra Dipika of Parthasarathi Misra By Sri Appayya Dikshita	95—102
10	बालभारतम्	By Agastya Pandita with the commentary of Salva Timmayah Dandanatha	111—123
11	मद्रकन्यापरिणयचम्पूः	By Sri Gangadharakavi with commentary	25—32
12	जीवन्मुक्तिकल्याणम्	A Drama By Sri Nalladhvari	25—32
13	महिषशतकम्	By Sri Vanchesvarakavi with a commentary by the author's great-grandson	1—8

i. *Introduction, Contents and Index to Sringaraprakasa*

ii. *Title-page and Contents to Stotra Ratnamala Part I.*

Original Articles in English.

14 *The Supreme Donee* By R. Krishnaswami Iyer, M.A., B.L. Tinnevelly 45—50

Reviews.

15 *History and Philosophy of Lingayat Religion*—By M. R. Sakhare M.A., T.D., (Cantab) Mimamsaratna A. V. Gopalachariar, M.A., B.L. 50—53


Soundaryalahari—K. S. Venkatarama Sastri 53—55

16 News and Notes. 56—60

17 Books Received. 60—61

18 Our Exchanges. 61

Sri Venkateswara Hyd



॥ श्रीः ॥

या वर्णपदवाक्यार्थस्वरूपेण विवर्तते । अनादिनिधनाऽनन्ता सा मां पातु सरस्वती ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैतेकथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

संपुटः ३] [संचिका १२

जन्मानेकशतैः सदादरयुजा भक्त्या समाराधितो
भक्तैर्वैदिकलक्षणेन विधिना संतुष्ट ईशः स्वयम् ।
साक्षाच्छ्रीगुरुरूपमेत्य कृपया दृग्गोचरः सन्प्रभु-
स्तत्त्वं साधु विबोध्य तारयति तान्संसारदुःखार्णवात् ॥

पञ्चानाङ्ग्रामाभिजनैः 'महामहोपाध्याय' 'वेदान्तकेसरी'
ब्रह्मश्री गणपतिशास्त्रिभिर्विरचितम्

१. श्री सारस्वताष्टकम् ॥

वसन्तीमम्भोजे वरतरनिजद्योतविजिते वहन्तीमुत्तंसं वदनसदृशाभं विधुशिशुम् ।
दधानामात्मीये वरमभयमन्यत्करतले बुधानां संपूज्यां भुवनजननीं नौमि सततम् ॥ १ ॥

कटाक्षे कैश्ये वा कलितनवनीलाम्बुदतुलां दरस्मेरे हारे घनतनुपवीते च महिते ।
वतंसे वाहे वा वपुषि वसने चासनवरे वलक्षां वैधात्रीं वरतनुमवन्दिष्महि वयम् ॥ २ ॥

पुरस्कुर्वन्पुण्यैर्जगति भवतीं पूरुषवरो विधत्ते विश्वेषां जननि विबुधानां च विनुतिम् ।
भवत्यास्तादृश्या भगवति नुतौ हन्त शरणं त्वमेवैका तस्माज्जननि तनुमस्त्वां हृदि सदा ॥ ३ ॥

स्थितायां त्वय्यम्ब क्षणमिव हि जोषं ध्रुवममी जगत्यां जायेरञ्जननि जनुषान्धा जनचयाः ।
प्रसेदुष्यां नूनं प्रभवति च मोक्षावधि जनस्त्वमेवैका सेव्या जननि जनिमद्भिस्तत इह ॥ ४ ॥

चतुर्धा ते रूपं जननि चतुराः केऽपि विबुधा वदन्ते वाणीदं कथमहमवायानि जडधीः ।
तुरीयं यद्रूपं तुहिनकरचूडालमकुटे पशूनामप्यास्ते परिचितमिदं मे किल मतिः ॥ ५ ॥

अविज्ञेयं सर्वैरमरतिलकैरप्यतितरामपारं माहात्म्यं कलयितुमिहास्तीयमनघा ।
वलक्षश्रीर्याऽसौ वहति च करे पुस्तकवरं वसत्वेषा वाणी वदनकुहरे मेऽतिकुतुकात् ॥ ६ ॥

सुधाधारासारप्रतिमरसया स्वादुतरया गिरा स्वं गायन्तं करतलगतं कीरमतुलम् ।
दरस्मेरं याऽसौ कलयति दयाशीतलरुचा दृशा सेयं देवी द्रुहिणगृहिणी मां शिशिरयेत् ॥ ७ ॥

कचे नीला स्थूला कुचभुवि सुचेला कटितटे कटाक्षे कल्लोलोद्धहलकरुणापूरशिशिरा ।
रुचा पीता धूताखिलदुरितमाताम्रचरणा मता माता पोते मयि निजकटाक्षं विकिरतु ॥ ८ ॥

सुधासध्रीचीनं स्तुतितिलकमेनं गणपतेर्मुखाम्भोजान्मूर्तं मधुझरमिव द्राक्प्रसुमरम् ।
पठन्तो भारत्याः पदनलिनमाहात्म्यविभवाद्भजन्ते पाण्डित्यं परिहतजडिम्ना पटुधिया ॥ ९ ॥

॥ इति सारस्वताष्टकं संपूर्णम् ॥

२. महामायाष्टकम् ॥

सत्स्वन्येष्वपि दैवतेषु बहुषु प्रायो जनः भूतले
यामेकां जननीति संततमसौ जल्पन्ति तादृग्विधा ।
भक्तस्तोमभयप्रणाशनचणा भव्याय दीव्यत्वसौ
देवी स्फोटविपाटनैकचतुरा माता महामायिका ॥ १ ॥

मातेत्याह्वय एव जल्पति महद्वात्सल्यमस्मासु ते
कारुण्ये तव शीतलेति यदिदं नामैव साक्षीयते ।
इत्थं वत्सलतादयानिधिरिति ख्याता त्वमस्मानिभा-
न्मातः कातरतां निवार्य निजरामानन्दितानातनु ॥ २ ॥

प्रत्यक्षेतरवैभवैः किमितरैर्देवव्रजैस्तादृशै-
र्निन्दायामपि च स्तुतावपि फलं किंचिन्न ये तन्वते ।
या निन्दास्तवयोः फलं भगवती दत्तेऽनुरूपं क्षणा-
न्नूनं तादृशवैभवा विजयसे देवि त्वमेका भुवि ॥ ३ ॥

वृत्तान्तं विविधप्रकारमयि ते जल्पन्ति लोके जना-
स्तत्त्वं नोपलभे तथैव न विधिं जाने त्वदाराधने ।
तस्मादम्ब कथं पुनः कलयितुं शक्तोऽस्मि ते पूजनं
नूनं वच्मि दयानिधेऽवतु जडानस्मान्भवत्यादरात् ॥ ४ ॥

रोदं रोदमुदीर्णबाष्पलहरीखिन्नानने ते शिशा-
वस्मिन् तप्यति किंचिदत्र करुणादृष्टिं विधत्से न चेत् ।
पातुं स्फोटगदात्पटुत्वामिव ते कस्यास्ति मातर्वद
क्वायं गच्छतु कस्य पश्यतु मुखं का वा गतिर्लभ्यताम् ॥ ५ ॥

धर्म्यादुच्चरतां पथः कलयतां दोषांस्तथा चात्मनः
स्वैरं निन्दनमातनोतु सततं द्वैष्ये पदे तिष्ठतु ।
एतावत्यपि वत्सके किल शुचं जाते मनाक् तत्क्षणं
तत्त्राणे जननी प्रयस्यति हितं मातस्त्वमस्मानव ॥ ६ ॥

आबालस्थविरं प्रसिद्धमयि ते मातेति यन्नाम त-
द्गोप्तुं नैव हि शक्यमम्ब तदसौ तादृग्विधा त्वं यदि ।
अस्मिन्खिद्यति वत्सके न तनुषे मातुर्गुणं चेत्तदा
नूनं स्यादपवादपात्रमयि तन्मातस्त्वमस्मानव ॥ ७ ॥

मुक्ताहारमनोहरद्युतियुतां मूर्त्तिं नरास्तावकीं
ये ध्यायन्ति मृणालतन्तुसदृशीं नाभीह्रदोरन्तरे ।
ते घोरज्वरभारजातविषमस्फोटस्फुटद्दुःसह-
क्लेदोद्यत्कटुपूतिगन्धमपि नो जानन्त्यमी जात्वपि ॥ ८ ॥

कारुण्याम्बुधिशीतलापदपयोजातत्वधीभावना-
जातस्फीतहृदन्तरामितसुधानिर्यासरूपामिमाम् ।
ये मर्त्याः स्तुतिमादराद्गणपतेर्वक्त्राम्बुजान्निःसृतां
विश्वासेन पठन्ति ते न दधते स्फोटव्यथां जातुचित् ॥ ९ ॥

॥ इति महामायाष्टकं संपूर्णम् ॥



३. संस्कृताष्टकम् ॥

प्रायेणाद्य प्रथितविषणान्बालकानस्मदीया दर्शंदर्शं ददति कथमप्याङ्गलानां कलायै ।
अभ्यस्यन्तोऽप्यतिपरिमिता नोत्सहन्तेऽप्यमुष्यां तस्मादस्मिञ्जगति समये क्षीयते संस्कृता गीः

ज्ञातारोऽस्या विरलविरला मेलनं नैव तेषां जातु स्याच्चेन्न पुनरनया भाषया सँल्लपन्ति ।
वास्ति श्रोता बत बत भवत्यन्ततो न्यूनताधीस्तस्मादस्मिञ्जगति समये क्षीयते संस्कृता गीः ॥

भाषा काचिद्व्यवहृतिकृते नोपयुक्ता यदि स्यात्कोऽस्या दोषो भवति स परं भाषितॄणां हि दोषः ।
इत्थं तत्त्वे सति मृतधिया दूषयन्ते यदेनां तस्मादस्मिञ्जगति समये क्षीयते संस्कृता गीः ॥

साङ्गा वेदाः स्मृतिरथ पुराणाद्यमित्यस्तसीमे साम्राज्येऽस्मिञ्जगति विततेसाधु सारस्वताख्ये ।
अद्यास्माकं यदिदमभवद्वित्रकाव्यावसानं तस्मादस्मिञ्जगति समये क्षीयते संस्कृता गीः ॥

आर्याः सन्तोऽप्यहह महितं शास्त्रमुत्सृज्य दूरे धर्माधर्मौ तदपि परमं ब्रह्म भाषान्तरेभ्यः ।
जिज्ञासन्ते यदि बत परिक्षीणसर्वावकाशास्तस्मादस्मिञ्जगति समये क्षीयते संस्कृता गीः ॥

आस्तामन्यद्भुतमखिलमप्यन्ततो योऽयमस्याः हौणीशालास्वतिपरिमितश्चैष ईषत्प्रवेशः ।
कष्टं तं च क्षपयितुमिहोद्युञ्जते चास्मदीयास्तस्मादस्मिञ्जगति समये क्षीयते संस्कृता गीः ॥

नार्त्विज्यादिर्न च वितरणं नाधिकारोऽस्ति कश्चिद्भूपालेभ्यो न किमपि फलं जातु चेन्नाममात्रम् ।
मा भूत्सर्वं विदुषि जगतां नो पुरस्कार्यताधीस्तस्मादस्मिञ्जगति समये क्षीयते संस्कृता गीः ॥

सङ्घीभूय स्वमहिमविदः शक्तिमन्तोऽस्मदीयाः पश्येयुश्चेदुदितमखिलं खं परावृत्य चक्षुः ।
अस्या वृद्धिर्जगति भविता ते परत्रापकृष्टास्तस्मादस्मिञ्जगति समये क्षीयते संस्कृता गीः ॥

भूयोवादैः किमिह भविता दौरवस्थ्यं तदेतद्दूरे धून्वन्दुरितनिकरच्छेदपादारविन्दः ।
अस्मान्सर्वानखिलजगतामन्तरात्मा स देवः प्राचीनेऽस्मिन्महिमनि जवात्स्थापयत्वित्युपासे ॥

॥ इति संस्कृताष्टकं संपूर्णम् ॥

॥ श्रीकृष्णस्तवः ॥

मधुरापुरीवास्तव्येन व्याकरणसाहित्यशिरोमणिना
पं. श्रीरामनाथशास्त्रिणा विरचितः ॥

अत्यूर्जितं कलयतात्कुशलं गणानां पत्युः पदाब्जयुगलं त्रिदशैः स्तुतं तत् ।
प्रत्यूहशैलदलने कुलिशायमानं मत्यूहवाग्वितरणे निपुणं शरण्यम् ॥ १ ॥

संसारदुस्तरमहार्णवतारणाय यं सारवत्तरमुपायमुदाहरन्ति ।
तं सारथिं समरदर्शितपार्थसख्यं कंसारिमेव सततं शरणं प्रपद्ये ॥ २ ॥

अप्राकृतानि भगवच्चरितानि गातुं सम्भासबन्धललितैरनवद्यपद्यैः ।
क्षिप्रानुकम्पमवलोकय मारनिं त्वं सुप्रापमम्ब यदि तेऽस्ति कृपा कवित्वम् ॥ ३ ॥

आपादचूडमभिवर्णयितुं त्वदङ्गान्यापादयत्वचिरमेव वचोविलासान् ।
गोपाकृते कलितगोत्रसमुद्धृते ते गोपायितत्रिभुवनः करुणाकटाक्षः ॥ ४ ॥

अल्पोऽपि मे मतिरिह स्तवने त्वदीये जल्पाकयत्यनुपमैः सुगुणैः प्रणुन्ना ।
तल्पायमानफणिराज भवत्पदाब्जं कल्पायतामुचितपद्यकवित्वसिद्धौ ॥ ५ ॥

कल्याणदायि शुभनामसहस्रमध्ये कल्यार्तिहारि तव नाम यदेकमेकम् ।
शल्यानि मे हृदयतो हरतान्मुरारे कल्या हि तत्र वरनाममनुस्मृतिस्ते ॥ ६ ॥

दुष्टान्निहत्य धरणेरतिभारभूतान् कष्टां दशां समपनीय भरप्रयुक्ताम् ।
शिष्टाभिरक्षणकृते विहितोद्यमाय तुष्टाय भक्तभजनेन हरे नमस्ते ॥ ७ ॥

कीलालराशिविनिमज्जितधातृवेदलीलासमुद्धरणसंश्रितमीनरूपम् ।
हेलाविधूतमधुकैटभदानवेन्द्रं वेलातिगामिकरुणारसमाश्रये त्वाम् ॥ ८ ॥

क्षीराब्धिमग्नगिरिमन्दरमन्थदण्डोद्धाराय कूर्मवपुषे रमणीयवेष ।
सारामृतार्थकलहायितदैत्यसङ्घसाराद्विमोक्ष सुरवृन्दपुषे नमस्ते ॥ ९ ॥

स्थूलावदातकुटिलातिकरालदंष्ट्रकोलावतारकृतभूरिसमुद्धृतिं त्वाम् ।
कोलाहलाहतहिरण्यमखेलोकपालावलिस्तुतगुणं शरणं श्रयामि ॥ १० ॥

अम्भोजनाभ भवदीयगुणाब्धिमग्नडिम्भोक्तवाक्यपरिपालनसादराय ।
स्तम्भोद्भवाय दितिजेन्द्रहिरण्यवक्षोदम्भोलिसारनखराय हरे नमस्ते ॥ ११ ॥

गर्वावलिप्तबलिदानवनिग्रहाय स्वर्वाङ्गमर्थितपदत्रयभूविभागम् ।
गुर्वाकृतिं क्रमयुगाक्रमितक्ष्मभूमिस्वर्लोकखेलनियमितासुरमानतोऽस्मि ॥ १२ ॥

पूषान्वयाब्धिमणिपङ्क्तिरथाब्जजातं शेषाग्रजं स्वयमनुष्ठितधर्मजातम् ।
योषापहारभवकिल्बिषपङ्कदुष्टदोषाचेन्द्रद्रुक्कण्ठरिपुं नमामि ॥ १३ ॥

शिञ्जानमञ्जुतरनूपुरराजिताङ्घ्रिं गुञ्जाभिभूषितपलं चलकुन्तलाढ्यम् ।
तं जानुचङ्क्रमकरं हृदि बालकृष्णं कञ्जायताक्षवनुवेलमनुस्मरामि ॥ १४ ॥

उष्णांशुजासलिलपूरमदाविहारी तिष्णाद्युगोपवनितावसनापहारी ।
कृष्णापटीवितरणेन महोपकारी तुष्णातु मेऽद्य दुरितं नवनीतहारी ॥ १५ ॥

जिष्णावतिप्रणयवान् श्रितातापभङ्गः कृष्णाम्बुदः स रुचिराम्बरभास्वराङ्गः ।
तृष्णातुरं हृदयचातकपोतमेतं पुष्णातु भूरिकरुणारसबिन्दुपातम् ॥ १६ ॥

पापानि शोधयति यत्प्रसृताऽऽपगाऽपि सोपानतां भजति नाकमुपारुरुक्षोः ।
गोपाल तत्तव पदाम्बुजमद्य मह्यमापादयत्वमितवैभव मङ्गलानि ॥ १७ ॥

भोगीन्द्रकालियफणावलये नटंस्तं यो नीतिपूर्वमकरोद्गलितावलेपम् ।
योगीन्द्रमृग्यविभवे तव पादपद्मे भोगी सदा विहरतान्मम चित्तभृङ्गः ॥ १८ ॥

मा तात याहि भवनाद्बहिरित्युदीर्य माता बबन्ध यमुलूखलबद्धधाम्ना ।
भ्राता बलस्य बलकर्षणभग्नवृक्षस्त्राता स मे भवतु संसृतिपाशबन्धात् ॥ १९ ॥

राधापयोधरपटीरजपङ्कलिप्ते माधारभूतविपुलोरसि राजमाना ।
मेधाप्रदप्रसरगन्धभरा भवोद्यद्बाधापहा भवतु ते शुभवैजयन्ती ॥ २० ॥

बालाकृतेर्दधिपयोघृततस्करस्य नीलालकस्य कनकाङ्गदभूषितस्ते ।
लीलाविलासचतुरायतबाहुदण्डस्त्वालानतां व्रजतु मत्तमनोगजस्य ॥ २१ ॥

सीमातिगामिमहिमा कमनीयगोपवामाङ्गनापरिवृतः कृतरासलीलः ।
कामार्थदो भवतु कल्पकपादपो मे मामाप्रमोदहृतनन्दनपारिजातः ॥ २२ ॥

नाकाधिराजद्युतपाद करे विराजन्राकाशशाङ्करुचिरस्तव पाञ्चजन्यः ।
ओंकारतत्त्वमुपदिश्य मनोज्ञनादैराकालिकं हरतु कालभयं मदीयम् ॥ २३ ॥

मायागृहीतनृशरीर करे प्रदीप्तं छायापतिप्रतिमभासुरभानुचक्रम् ।
दायाद यादवकुलस्य सुदर्शनं ते पायादपायबहुलाद्भवसागरान्माम् ॥ २४ ॥

गुल्फावलम्बिकनकाम्बर चित्ररत्नाकल्पाभिभूषितमनोज्ञकरे बिलम्ब्य ।
कल्पावसानसमयोदितकोटिसूर्यकल्पा व्यपोहयतु जाड्यगदं गदा ते ॥ २५ ॥

वाचाऽतिनीचतरया तव शार्ङ्गचापं याचामहे दितिसुतातिभयावहं तम् ।
आचारहीनमपि मां स धिनोतु दासं धीचापलं विषयभोगसुखे धुनोतु ॥ २६ ॥

पादाम्बुजं प्रणमतामभिनन्दकस्ते श्रीदायकः शयधृतः शुभनन्दकोऽयम् ।
यो दानवासुपवने तृषितो भुजङ्गो मोदाय मे भवतु मोदितदेववृन्दः ॥ २७ ॥

मारातिसुन्दर मनोहरबन्धुरा ते हारादिभूषणधरा वरकन्धरेयम् ।
क्षीरादिपानमसृणा मम बन्धुरास्तां नारायणेति जपतः शुभनाममन्त्रम् ॥ २८ ॥

मोहान्धकारभिदुरं स्मितचन्द्रिकाभिः नीहारदीधितिसमं समराङ्गणे यत् ।
प्राहार्जुनाय निगमान्तरहस्यमास्यमीहाविहीनमुनिदृश्यमहं समीडे ॥ २९ ॥

मृत्स्नातिरूषितमुखं शिशुकेलिषु द्राक्कृत्स्नान्यदर्शयदहो भुवनानि मात्रे ।
तत्स्नानमस्य परिकल्पयतु स्वहासज्योत्स्नाझरैरमृतवर्षसमानशीलैः ॥ ३० ॥

मा नन्दबाल कुरु चौर्यमिति ब्रुवन्त्याः सानन्दमेत्य सदनं तदसन्निधाने ।
पानं विधाय पयसां मुखफूत्कृतेन दूनं व्यधाद्व्रजवधूनयनं तदव्यात् ॥ ३१ ॥

प्राणानिलैः स्तनरसं खलपूतनायाः क्षीणाधरं यदपि चूषयति स्म देव ।
त्राणाय सर्वजगतां हृदि भातु तन्मे वीणामुनीन्द्रपरिगीतगुणापदान ॥ ३२ ॥

हासाङ्कुरेण तव निर्जितमिन्दुबिम्बं ह्रासान्वितेन वपुषा त्रपयेव यत्र ।
नासाग्रलम्बिनवमौक्तिकरूपमस्य दासायमानमिव तद्भवतात्सुखाय ॥ ३३ ॥

भद्राणि मे वितर नाथ किमित्युपेक्षा विद्रावयान्तररिपून्मदमोहमुख्यान् ।
निद्राणमप्यवनकर्मणि जागरूकं मुद्राविहीनकमलेक्षणमाश्रये त्वाम् ॥ ३४ ॥

स्निग्धां तरङ्गय दृशं करुणोर्मिलां ते मुग्धान्तरङ्गविवशे मयि बालिशाख्ये ।
मुग्धाङ्गनामुषितयौवनभागधेय दुग्धां सुधामधुरवाचममोघवर्षाम् ॥ ३५ ॥

श्रुत्यन्तसंस्तववतीमपि रागिणीं ते प्रत्यन्तमेव कुटिलभ्रुवमक्षिरेखाम् ।
नित्यं स्तुवन्ति मुनयोऽपि विशुद्धसत्त्वाः सत्यं स एष महिमा हि समाश्रयस्य ॥

स्वर्णप्रभातरलितं मकराङ्कितं ते कर्णप्रलम्बिमणिकुण्डलमस्तु चित्ते ।
कर्णद्विषो रथनियुक्ततुरङ्गमाणां स्वर्णःप्रसेकसमये कृततान्डवं यत् ॥ ३७ ॥

अस्तूल्लसत्कुटिलकुन्तलकोमलोऽन्तः कस्तूरिकातिलककान्तिलसल्ललाटः ।
यः स्तूयते कविवरैः सुषमाश्लिलोभात्प्रस्तूयमानपरिचर्य इवार्धचन्द्रः ॥ ३८ ॥

बर्हावतंसशिरसं शिशुपालवाक्यगर्हासहं विहितदुष्टविनाशमीशम् ।
अर्हार्हणं प्रथमतः सकलागमेड्यमर्हामि देव मम चित्तसुमार्पणेन ॥ ३९ ॥

मुद्बानताङ्गलतिकां प्रियरुक्मिणीं तामुद्बाहनिश्चितमतिं द्विजनीतलेखात् ।
विद्वानुमार्चनपरामनयद्रथेन सद्मानां दिशतु रुक्ममदापहन्ता ॥ ४० ॥

मानातिगामिफलदायक दिव्यवेणुगानातिलोल रमणीस्पृहणीयरूप ।
नानासुवर्णमणिपूजितविप्रदत्तधानाकमुष्टिपरितुष्ट कटाक्षयेमम् ॥ ४१ ॥

पुंनागवृक्षमधिरुह्य गवां कदम्बं पुंनाग वेणुनिनदैस्त्वममोहयः किम् ।
खिन्नान्तरं विषयघासरतं पशुं मां किं नाम गोपवर नैव वशीकरोषि ॥ ४२ ॥

कुम्भीनसाध्वसनिराकरणे धुरीणं कुम्भीनसाधिपतिकल्पितचारुतल्पम् ।
गम्भीरभावमभवं प्रभवं जगत्याः तं भीममोदरसखं हृदि भावयामि ॥ ४३ ॥

नाभीसरोजभवनिर्मितसर्वलोकमाभीरशेखरमभिष्टुतमागमाद्यैः ।
मा भीतिरस्त्विति वचः समुदाहरन्तं स्वाभीष्टदं शरणयामि भवामयघ्नम् ॥ ४४ ॥

आजीवनं त्रिजगतामपराजितं त्वां राजीवनेत्रमजितेन्द्रियदुर्लभाङ्घ्रिम् ।
वाजीन्द्रवक्त्रमजवज्रधरादिलेखराजीकिरीटमणिराञ्जितपादमीडे ॥ ४५ ॥

संतानकृष्ण पदपङ्कजमाश्रितानां संतानपादप इति ग्रथितोऽसि लोके ।
चिन्तातपं हर भवाभिधघर्मजातं किं तावता त्वयि समस्तभरोऽर्पितो मे ॥ ४६ ॥

संतानकृष्ण भवदीयपदाभिधानः संतानपादपवरः शरणार्थिनं माम् ।
चिन्तातिदन्तुरमदीयमनोदुरन्तसंतापदुःखहरणेन सुखाकरोतु ॥ ४७ ॥

अव्याजभक्तिवशगं पुरुषं पुराणं गव्यापहारचतुरं यदुवंशरत्नम् ।
नव्यापदानचरितं धृतविश्वरूपं भव्याय भावयतु मे हृदयं हरे त्वाम् ॥ ४८ ॥

नानाश्रुतिस्मृतिपुराणततीतिहासाञ्जानामि नैव न च शास्त्रकलाप्रभेदान् ।
यो नाम पार्थविषये भवता प्रगीतः श्रीनाथ देह्यखिलसारमनन्यभावम् ॥ ४९ ॥

कन्यां सुवृत्ततिलकां सरसां सुवर्णविन्यासरम्यपदराजिमलंकृताङ्गीम् ।
मान्यां स्तुतिं गुणवते भवते समर्प्य धन्या जनिर्भवतु मे रसिकावतंस ॥ ५० ॥

पञ्चाशताऽद्य भगवंस्तव पादपद्ममर्चामि पद्यकुसुमैः सरसैः सगन्धैः ।
मञ्चायिताहिपतिभोग मम श्रुतिं द्राक् सिञ्चामृतैः प्रणवतत्त्वमहोपदेशैः ॥ ५१ ॥

श्रीरामनाथाख्यकविप्रणीतं संतानकृष्णस्तवरत्नमेतत् ।
भक्त्या पठन्तो नियतं लभन्ते संतानसंपत्सुखभक्तिमुक्तीः ॥ ५२ ॥

॥ इति संतानकृष्णस्तवः संपूर्णः ॥



॥ तीर्थविनायकस्तवराजः ॥

श्री सच्चिदानन्दतीर्थस्वामिभिर्विरचितः ॥

वन्दे तीर्थविनायकमिभमनुजाकारसंनिवेशेन ।
अद्वैतपारमार्थ्यं प्रकटीकुर्वन्तमात्मभक्तानाम् ॥ १ ॥

आधिकावेरीपरिसरमारचितानल्पशिल्पकमनीयं ।
दिव्यालये लसन्तं गजवदनं तं गुणाढ्यमवलम्बे ॥ २ ॥

अभ्रंकषेऽतिरम्ये मण्टपयुगलेन मण्डिते सदने ।
देदीप्यमानदेहं दरहसितास्यं भजे गणाध्यक्षम् ॥ ३ ॥

भक्ताभीप्सितसंपद्वितरणवैदग्ध्याविजितकल्पतरुम् ।
मञ्जुतरकुञ्जरास्यं कुलदैवं मामकीनमाकलये ॥ ४ ॥

विघ्ननिवारणनिपुणं विद्यावैशद्यमाशु भक्तानाम् ।
विश्राणयन्तमनघं विघ्नेशं तं व्रजाम्यहं शरणम् ॥ ५ ॥

मधुरतरमञ्जुगात्रं पिञ्जरिताकारमलमलंकारैः ।
कंचन कुञ्जरवदनं भञ्जयितुं विघ्नपूगमवलम्बे ॥ ६ ॥

निगमान्तवाक्यभूम्ना निर्णीतं यत्प्रमाणपरसीम्ना ।
तद्ब्रह्म गीयसे त्वं विघ्नेशानन्दकन्दलीकन्दः ॥ ७ ॥

कामादिवैरिपटलीनिर्दलनैकान्तलब्धवर्णं त्वाम् ।
मामकवैरिवराणां दूरीकरणाय संततं याचे ॥ ८ ॥

अङ्कारूढं गिरिवरतनुजायाः पङ्कजाभपदयुगलम् ।
शङ्कासंहतिविमथनपटुतरमेनं भजाम गणनाथम् ॥ ९ ॥

आश्रितकावेरीतटमदभ्रकारुण्यकबलितस्वान्तम् ।
काञ्जरमुखं महो मे किमपि प्रतिभातु संततं हृदये ॥

अप्राकृतमहिमानं क्षिप्रादितभक्तमोहगरिमाणम् ।
निगमवनीसीमानं गजमुखमीडेऽतिमात्रधामानम् ॥

कुण्ठीकृतविघ्नगणं कण्ठेकालप्रमोदसर्वस्वम् ।
कण्ठ वारणरूपं किमपि सामिन्धे परात्परं ज्योतिः ॥

प्रत्यूहवारणक्षममत्यूर्जितपुरुषकारसारस्य ।
संघातं गिरिजाया अङ्कालंकारमेकमवलम्बे ॥ १३ ॥

माधीयसां हि संसृतिसाध्वसहारी सदा गणाध्यक्षः ।
संविन्मयस्वरूपः सर्वाभीष्टं समर्पयेन्मह्यम् ॥ १४ ॥

आब्रह्मकीटमखिलैराराध्यं किमपि गजमुखं दैवम् ।
आश्रयणीयं यमिनामनुदिनमाभातु मामके हृदये ॥

कारुण्यसारलहरीशीतलितस्वान्तमतितरां शान्तम् ।
करकलितमोदकं तं कमपि तु देवं चिरेण कलयामः ॥

पाटलिमभरितगात्रं पर्वतराजप्रधानदौहित्रम् ।
पाकारिपरिनिषेवितपादयुगं कमपि देवमाकलये ॥

आहृतमूषिकवाहनमावैरिञ्चप्रणीतबहुमानम् ।
आश्रयितुमुत्सुकोऽस्म्यहमस्खलितब्रह्मचर्यमहिमानम् ॥

कमनीयकान्तिकवचितलोचनसंचारिमेचकालोकम् ।
कामारिकामिनीमुखकमलचुमणिं गणेशमाकलये ॥

दुर्वारतमदुराशादुर्वातोद्धूयमानहृदयोऽहम् ।
निर्वोढुमात्ममोक्षं शर्वात्मजमेव संश्रये शरणम् ॥ २० ॥

दुष्पूरोदरपूरणनिर्गमिताशेषकालमतिकुटिलम् ।
करुणाकन्दलितदृशा किंचिद्वीक्षस्व तावकं दासम् ॥

स्वामिंस्तीर्थविनायक नाहं स्पृहयामि नश्वरफलाय ।
अनवद्यमात्मविद्यावैशद्यं किं तु वितरितुं याचे ॥ २७ ॥

आनम्रभक्तजनतामोहतमिस्रापनोदखरकिरणम् ।
मूषिकवाहनचरणं भूषितभुवनं भजेऽहमामरणम् ॥

भवविषदूषितधिषणां विषयविशेषेषु दोषमाकलयन् ।
विघ्नेश पादपङ्कजमकरन्दे ते निमज्जयाम्येनाम् ॥ २८ ॥

नवनीतमृदुलगात्रं नमनीयाङ्घ्रिं निलिम्पमुख्यानाम् ।
अपनीतविघ्ननिवहं शरणीकुर्मो भवाब्धितरणाय ॥

कण्ठेगडुकल्पानां कुण्ठीकृत्योद्यमं ममारीणाम् ।
अनुसवनमात्मविद्यारसिकजनस्यास्य साधयाभीष्टम् ॥

पाथोरुहोदरोपमपाटलमहसां निधानकोशगृहम् ।
पर्वतराजसुतायाः प्रेमभरैकान्तनिलयमाकलय ॥ २४ ॥

आन्तरवैरिवराणां बाह्यतराणां च रभसमभिभूय ।
अस्खलितमात्मविद्याविचारमेनं विधत्स्व गणनाथ ॥

प्रत्यूहपर्वतानां पाटनकलनापटीयसे महसे ।
प्रत्यर्प्य मामकीनां प्रणतिततिं प्रार्थये सदा मुक्त्यै ॥

निगमान्तवचननिचयैरादरतः स्तूयमान गजवदन ।
प्रापय मामापे कृपया कामपि परमां दशां प्रकाशमयीम् ॥

प्रकटितकरुणावैभव विघटितविघ्नौघ देव गणनाथ ।
घटयसि कदा मदीयां मुक्तिवधूटीकरग्रहोत्कण्ठाम् ॥

तीर्थविनायकदेवस्तोत्रमिदं यस्तु कीर्तयेद्भक्त्या ।
स भवति विघ्नविहीनो भजति च चिरमेष सच्चिदानन्दम् ॥



अभिज्ञानशाकुन्तलानुभवः ॥

मीमांसारत्नं, एम्. ए., बि., एल्., ए. वि. गोपालाचार्येण विरचितः ॥

(पूर्वतोऽनुवृत्तः)

अहो प्रवातसुभगोऽयमुद्देशः । 'शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम् । अङ्गै-रनङ्गतप्तैरविरलमालिङ्गितुं पवनः ॥' 'रम्यान्तरः कमलिनीहारैतैः सरोभिश्छायाद्रुमैर्नियमितार्कमयूख-

तापः । भूयात्कुशेशयरजोमृदुरेणुरम्याः शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥' इत्यत्रोक्तं चेह भाव्यम् । 'शैत्यं हि यत्सा प्रकृतिर्जलस्य' इति सलिलस्य शैत्यं स्वभावः । 'शीते सुखोष्णसर्वाङ्गी ग्रीष्मे या सुखशीतला । तमःश्यामघनवर्णाभा सा स्त्री श्यामेति कथ्यते ॥' इति युवतेरपि ग्रीष्मे शीतत्वं संभावनीयम् । 'समुत्क्षिपन्यः पृथिवीभृतां वरं वरप्रदानस्य चकार शूलिनः । त्रसत्तुषाराद्रिसुतासमक्षमन्यं ग्रहाश्लेषसुखेन निष्क्रयम् ॥' इति माघश्लोकोऽप्यत्र भाव्यः ॥

'पाटलसंसर्गी' इत्यत्र पाटलशब्देन पाटल अधरोऽपि लक्ष्येत । 'यत्ते दष्टमसंस्कारपाटलोष्ठपुटं मुखम्' इति नाटकान्ते शकुन्तलाधरस्य निसर्गपाटलत्वमुक्तम् । 'दलितकोमलपाटलकुड्मले निजवधूश्वसितानुविधायिनि । मरुति याति विलासिभिरुन्मदभ्रमदलौ मदलौल्यमुपादधे ॥' इति माघश्लोके पाटलकुड्मलगन्धवाहिवातस्य वधूश्वसितानुविधायित्वं वर्णितम् । 'सुरभिणि श्वसिते दधतस्तृषं नवसुधामधुरे च तवाधरे । अलभतेव गन्धरसावमू मम न सौमनसौ मनसो मुदे ॥' इति माघश्लोके श्वसिताधरयोः सौरभमाधुर्ये वर्ण्येते । पाटलोऽधरो मधुभरितः, तत्संसर्गसुरभिः वनजमुखमारुतः । 'सरसीष्वरविन्दानां वीचिविक्षेपशीतलम् । आमोदमुपजिघ्रन्तौ स्वनिश्वासानुवादिनम् ॥' इति दिलीपसुदक्षिणानुभवोऽप्यत्र स्मर्तव्यः । चिररतिपरिश्रान्त्या निद्रा सुलभा । 'चिररतिपरिखेदप्राप्तनिद्रासुखानाम्' इति माघश्लोकोऽपि अत्र भाव्यः । तन्द्रीग्लान्यालस्यावहरतिश्रमस्य प्रच्छाये अपनोदनं सुलभम् । तस्मिन् प्रच्छाये सुलभं सुभगं च निद्रासुखम् । 'प्रच्छायसुलभनिद्राः' इति दुर्वासःशापतमोरूपच्छायया संजातो निद्रासदृशस्मृतिप्रमोषोऽपि सूच्यते । तमस्यपि छायाशब्दः पठ्यते । 'उत्कोचे पालने कान्तौ छायायां च तमस्यपि' इति मेदिनी । 'किमपि मनसः संमोहो मे तदा बलवानभूत्,' 'मुनिसुताप्रणयस्मृतिरोधिना मम च मुक्तमिदं तमसा मनः' इति राज्ञा, 'शापादस्मि प्रतिहता स्मृतिरोधरूक्षे भर्तर्यपेततमसि प्रसृता तथैव । छाया न मूर्च्छति मलोपहतप्रसादे शुद्धे तु दर्पणतले सुलभावकाशा ॥' इति काश्यपेन च वक्ष्यते । 'प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तं । अनुशयदुःखायेदं हतहृदयं संप्रति विबुद्धम् ॥' इति च राज्ञा वक्ष्यते । 'अभावप्रत्ययालम्बना वृत्तिर्निद्रा' इति योगसूत्रम् । वृत्त्यन्तराभावसहिततमोमात्रालम्बना वृत्तिर्निद्रा । दुर्वाससः क्रोधाद्राज्ञोऽभूत्संमोहः, संमोहाच्च स्मृतिविभ्रमः, स्मृतिभ्रंशाच्च बुद्धिनाशः । यद्यपि मध्ये भूयो दुःखमनुभूयते दम्पतिभ्यां, परिणामे रमणीयो दारिकासहितः समागमो भवति । पूर्वं मन्मथाचार्यनियुक्तः सहसा कथमप्यबान्धवकृतो रहसि परिणयसंयोगोऽभूत् । नाटकान्ते काश्यपकुलकूटस्थपितृमिथुनमभिवाद्य तदाशीःपूर्वकं भर्त्रा संयोजनं लभ्यते । पितृत्वेनाभिमतस्य कण्वस्याभिनन्दनं च निवेद्यते काश्यपमुखेन । पित्रनुमतिराहित्यमिति यदप्रे अरमणीयमिवाभूत्, तत्परिणामे पितृकुलकूटस्थप्रजापतिमिथुनाभिनन्दनलाभेन

पित्रनुमतिलाभेन च रमणीयं समपद्यत । भारतदेशीयपुरातनसनातनवैदिकाचारानुगुण्यसंपादनेन परिणामे रमणीयोऽभूत्परिणयः । ऊर्ध्वरेताः कण्वः शाश्वते ब्रह्मणि वर्तमानो न कन्यादाने अधिकारी । तत्कुलकूटस्थवृद्धमिथुनस्य तदधिकारभाक्त्वं शोभनम् । वक्ष्यते च राज्ञा शकुन्तलां प्रति नाटकावसाने—'प्रिये क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तम्' इति । इत्थमुदाहृतैतन्नाटकोक्तिभिरेवैतच्छ्लोकपदैर्भावितबहुवृत्तान्तसूचकैः सूत्रसद्दशैरेतन्नाटकवस्तुपरतया एतच्छ्लोकार्थवर्णनं कविहृदयस्थमित्यत्र रसिकविद्वद्धृदयं साक्षित्वेन वृणीमहे ॥

'शैशवेऽभ्यस्तविद्यानां' इति श्लोकोक्तप्रकृष्टराजर्षिचरितक्रमोऽप्यनेन श्लोकेन ध्वन्यते । विद्यास्नानानि सुलभसलिलावगाहा इव । सहधर्मचर्यासहभोगरसावगाहाः प्रथमद्वितीयपादाभ्यां सूच्यन्ते । 'भवनेषु सुधासितेषु पूर्वं क्षितिरक्षार्थमुशन्ति ये निवासम् । निरतैकपतिव्रतानि पश्चात्तरुमूलानि गृहीभवन्ति तेषाम् ॥' इति सप्तमाङ्के पौरवाणां गलितवयसां पत्न्या सह प्रच्छायतरुमूलेषु सुखेन वानप्रस्थव्रतचर्या प्रोच्यते राज्ञा । ऐकाग्र्यरूपतपःसमाधिर्योगनिद्रा । प्रच्छायसुलभनिद्रा इति समासपदेन तपोयोगनिद्राः वानप्रस्थचर्यासहजाः सूच्यन्ते । 'परित्यज्य सर्वान्कामानरण्ये विश्राम्यन्ति मनीषिणः हृदयमर्मच्छेदिभ्यः संसारभावेभ्यो बीभत्समानाः' इति रघुवंश्यराममुखेन स्वमनोरथं कथयतीव भवभूतिः । 'अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे नृपतिककुदं दत्वा यूने सितातपवारणम् । मुनिवनतरुच्छायां देव्या तया सह शिश्रिये गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥' इत्यादिभिर्वर्णिता रघुकुलमहीपालचर्या समाना पौरवेषु राजस्वपि । 'अस्त्येतत्पौरवाणामन्त्यं कुलव्रतम्' इति स्पष्टमुच्यतेऽत्र राज्ञा सप्तमाङ्के । 'भूत्वा चिराय चतुरन्तमहीसपत्नी दौष्यन्तिमप्रतिरथं तनयं निवेश्य । भर्त्रा तदर्पितकुटुम्बभरेण सार्धं शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥' इति कण्वश्लोकोऽप्येतत्क्रमस्मारकः । यौवनावस्थायां विषयैषित्वस्य औचित्यात्, 'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्' इति शासनेनाप्रतिष्ठितवंशस्याप्रजस्य मुमुक्षुत्वानौचित्यात्, बुभुक्षुत्वस्यैव तदुचितत्वात् । प्रथमाङ्के कण्वाश्रमद्वारप्रवेशे 'शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य' इति शमफलस्य मोक्षादेर्वन्तुसदपि फलत्वं यदनेन तदा न गणितं, तन्नायुक्तम् । 'अस्मात्परं बत यथाश्रुति संभृतानि को नः कुले निवपनानि करिष्यतीति । नूनं प्रसूतिविकलेन मया प्रसिक्तं धौताश्रुशेषमुदकं पितरः पिबन्ति ॥' 'संरोपितेऽप्यात्मनि धर्मपत्नी त्यक्ता मया नाम कुलप्रतिष्ठा । कल्पिष्यमाणा महते फलाय वसुंधरा काल इवोप्तबीजा ॥' इति भृशमाकृश्यते षष्ठे । वानप्रस्थेऽपि तपश्चर्यया योगाभ्यासस्य सौकर्यमस्ति । यद्यपि राजन्यानां संन्यासेऽनधिकारः, वानप्रस्थाश्रम एव योगाभ्यासपाटवेन, योगेन तनुमन्ते त्यक्त्वा पुनर्भवक्षपणं सुकरमेव । तदाश्रमेऽपि परिणामे रमणीयमोक्षलाभः सुलभः ॥

सुभगशाकुन्तलनाटकरसावगाहा अपि कविना आशास्यन्त इवास्मिन् श्लोके; किं ततोऽस्ति सौभाग्यं कवेः? मधुरमधुरकाव्यरसावगाहाः सुभगसलिलावगाहाः; किमतोऽन्यत् सौभाग्यं रसिकविद्वल्लोकस्य? 'क्षुभ्यद्भावतरङ्गिते रससुधापूरे मिमज्जन्ति ये' इति श्रीमाघकाव्यरसमज्जनं वर्णितं श्रीमल्लिनाथसूरिणा तद्व्याख्यानभूमिकायाम्। 'एतस्मिन्नधिकपयःश्रियं वहन्त्यः संबाधं पवनभुवा जवेन नीताः। वाल्मीकेररहितरामलक्ष्मणानां साधर्म्यं वहति परं महासरस्यः॥' इति माघे रैवतकगिरिवर्णने। 'इदमेवावगाहिष्ये तमसातीर्थमुत्तमम्' इत्यत्र नारदगीतसंक्षेपरामायणरसावगाहः, तदनुरुद्ध्य तदुपजीव्य स्वेन गास्यमानरामायणमहानदीसुभगसलिलावगाहश्च कविबुद्धिस्थौ। 'अकर्दममिदं तीर्थं भरद्वाज निशामय। रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा॥' इति श्लोको रामायणनदीविषयेऽपि योजनीयः कविबुद्ध्या। अत्रापि नाटकारम्भे रामायणारम्भ इव सुभगकाव्यरसावगाहाः, तेषां रमणीयत्वं च सूच्यन्त इव। सत्काव्यस्य सौरभ्यं कविलोकप्रसिद्धम्। 'गौडवैदर्भपाञ्चालीमालाकारां सरस्वतीम्। यस्य नित्यं प्रशंसन्ति सन्तः सौरभवेदिनः॥' 'तृणमपि वयं सायं संफुल्लमतल्लिकापरिमलमुचा वाचा न याचामहेऽधीश्वरान्' इत्यादिकं स्मर्तव्यम्। सुरभिविमर्शमनोवृत्तिवातैः काव्यरसावगाढ्नां सुगन्धिपरिमला आनीयन्ते, सुगन्धानुभव उपनीयते। सलिलस्नानानन्तरं सुगन्धिद्रव्यवातधूमसेवनं प्रसिद्धम्। काव्यवृक्षबहुलच्छाये निद्रायामिव सर्वचित्तखेदविलयः सुलभः। अनन्यभावेन काव्यरसानुभवात्सर्वेतरविषयविस्मरणं घनीभूतसुखं चानुभूयेत यथा निद्रायाम्। 'अस्मिन्महत्यस्तमितान्यवेद्ये विसृत्वरे वीचितरङ्गरीत्या। काव्यध्वनौ जाग्रति देहभाजां कर्णे विशेयुः कथमन्यशब्दाः॥' इति शिवलीलार्णवे। 'रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम्' इत्यत्र दशेन्द्रियाननघोरमनोनक्तंचरविलयो रामायणपठनाज्जायेतेति ध्वन्यते। काव्यरसानुभवे मनसस्तत्र लये निर्दुःखसुखानुभवश्च प्रसिद्धः; 'प्रच्छायसुलभनिद्राः' इति तद्व्यञ्जनम्। विषयरसावगाहवन्न काव्यरसावगाहस्य दुःखोदर्कत्वम्, न परिणामे विषत्वं काव्यरसभोगस्य। परिणामेऽमृतोपमो रमणीयैकान्तः इति 'परिणामरमणीयाः' इत्यनेन व्यज्यते। सात्विकं सुखं काव्यसुखम्। ब्रह्मानन्दसजातीयत्वमुच्यते काव्यरसस्य॥

भगवत्स्वरूपगुणचरित्रादिष्ववगाहा अप्यत्र सूच्यन्ते। 'इति तव सूरयस्त्र्यधिपतेऽखिललोकमलक्षपणकथामृताब्धिमवगाह्य तपांसि जहुः' इति श्रुतिगीता। अत्रोपक्रमे ब्रह्मविषयकमधुरचिन्तासरिदवगाहनं प्रस्तूय नाटकान्ते अखिललोकमलक्षपणं प्रस्तूयते इति श्रुतिगीताश्लोकसारूप्यं भावनीयं रसिकैः। 'अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः। तृषार्तोऽवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसंपन्नवन्नः॥' इति भगवानस्तूयत चतुर्थस्कन्धे दक्षयज्ञस्य पुनः प्रयोगे। विश्वशरीरकभगवत्प्रणामेनारब्धं नाटकं पुनर्भवक्षपणप्रार्थनेनोपसंहृतम्। भगवच्चरित्रवदास्तिकवरपुण्यराजर्षिचरित्रं पवित्रम्। महाभारतपठितमिदं पुण्यचरित्रं कान्ता-

संमिततया हृद्यंगमतया मोक्षसाधनपर्यन्तधर्मसूक्ष्मानुपदिशति अनुभावयति च । 'स्वर्गादधिकतरनिर्वृति स्थानम् , अमृतह्रदमिवावगाढोऽस्मि' इति राजा वक्ति शान्तशान्तकाश्यपाश्रमोपकण्ठप्रदेशानुभवे । एतेन चास्मिन् सुभगश्लोके श्रमनाशनेष्वाश्रमेषु शान्तिस्रोतोऽवगाहा अपि कविबुद्धिस्था इत्युन्नेतुं शक्यम् ॥

अमृतह्रदमिवावगाढोऽस्मि इत्यनेन 'एष ब्रह्म प्रविष्टोऽस्मि ग्रीष्मे शीतमिव ह्रदम् । शाम्यामि परिनिर्वामि ब्रह्म संपद्यते मया ॥' इति प्रमाणश्लोकः प्रत्यभिज्ञाप्यते कविनेति सुस्पष्टम् । 'सुभगसलिलावगाहाः' इत्यनेन ब्रह्मगुणध्यानरूपसुखमयचिन्नवृत्तिप्रवाहावगाहनानि सूच्यन्ते । 'या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् । सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्' इत्यनुभवरसिकाः । सुशीतब्रह्मस्वरूपावगाहाश्च सूच्यन्ते । 'नित्यं स्मरञ्जलदनीलमुदारहारकेयूरकुण्डलकिरीटधरं हरिं वा । ग्रीष्मे सुशीतमिव वा ह्रदमस्तशोकं ब्रह्म प्रविश्य भज निर्वृतिमात्मनीनाम् ॥' इति प्रबोधचन्द्रोदयश्लोके 'एष ब्रह्म प्रविष्टोऽस्मि' इति प्रमाणश्लोको निर्गुणब्रह्मस्वरूपमज्जनपरतया योजितः । 'गङ्गासेतुसरस्वतीरविसुतागोदावरीनर्मदातुङ्गाशोणमरुद्वृधाप्रभृतिभिस्तीर्थैरलं प्रार्थितैः । नित्यासन्नमशेषतापशमनं निःश्रेयसार्थप्रदं ग्रीष्मे शीतमिव ह्रदं बहुगुणं ब्रह्म प्रविष्टो मुनिः ॥' इति संकल्पसूर्योदयश्लोके स एव श्लोकः सगुणब्रह्मस्वरूपमज्जनपरतया योजितः । 'सुरस्रोतस्विन्याः पुलिनमधितिष्ठन्नयनयोर्निधायान्तर्मुद्रामथ सपदि विद्राप्य विषयान् । विधूतान्तर्ध्वान्तो मधुरमधुरायां चिति कदा निमग्नः स्यां कस्यांचन नवनभस्याम्बुदरुचि ॥' इति करुणालहर्यां पण्डितराजानुभवोऽपि भाव्यः । 'ब्रह्मावृक्षं मोक्षफलं शान्तिशय्यासमन्वितम् । ज्ञानाश्रयं तृप्तितोयमन्तः क्षेत्रज्ञभास्करम् । येऽभिगच्छन्ति ते सन्तस्तेषां नास्ति पुनर्भवः ॥' इत्याश्वमेधिकपर्वणि । नाटकान्ते अपुनर्भवप्रार्थनया तत्प्राप्त्योपयिकशमरसावगाहाः अत्र प्रस्तावनायामेव आशास्यन्त इव । 'प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने तोये काञ्चनपद्मरेणुकपिशे पुण्याभिषेकक्रिया । ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तास्सिस्तपस्यन्त्यमी ॥' इत्यत्र सप्तमाङ्के हेमकूटवनेषु तपस्यन्तो योगिनो वर्णिताः । तत्र द्वितीयपादे पाटलपद्मरेणुकपिशेषु सुगन्धिषु सलिलेषु त्रिषवणावगाहाः, प्रथमपादे पद्मसौगन्धिकवहवातैरेव प्राणानां वृत्तिः, तृतीयपादे सत्कल्पवृक्षच्छाये रत्नशिलातलेषु आनन्दमयध्यानरूपसंयमनिद्रा इत्यादिकं वर्ण्यते यथाऽस्मिन् सुभगश्लोके । 'नानावाक्यसमाहारतत्त्वज्ञानविशारदैः । वैशेषिकार्थविद्भिश्च मौनधर्मविशारदैः । नानाशास्त्रार्थमुख्यैश्च शुश्राव स्वनमीरितम् ॥' इति कण्वतपोवनवर्णने भारते अध्यात्मविचारभूयस्त्वमुक्तम् । 'यान्ति निर्वहणमस्य संसृतिक्लेशनाटकविडम्बना विधेः ॥' इत्युक्तरीत्या इदमुत्तमं नाटकं संसृतिक्लेशोपरतिरूपनिर्वहणेनोपसंहियते ॥

अतः अमूम्, अत्यमङ्गलचरितस्यापि शिवस्योक्तप्रकारेणानुग्राहिकामारण्यकादिसर्वोपनिषत्प्रसिद्धाम्, हरिहरविरिञ्चादिभिः ब्रह्मविष्णुरुद्रैः सर्जनाद्याधिपत्यकामुकैः पतित्वकामुकेन शिवेनान्यैश्चाराध्यां सेव्याम्। अत्रोक्तं दक्षिणामूर्तिसंहितायाम्—'एनामाराध्य विश्वेशीं महात्रिपुरसुन्दरीम्। ब्रह्मविष्णुमहेशाद्या आधिपत्यानि लेभिरे। पतित्वमाप्तवान्देवः साक्षात्परशिवः स्वयम्॥' इति। यद्वा, हरिहरादिभिर्भृत्यभावं संप्राप्य सेव्याम्। अत्रोक्तं भैरवयामले—'शिवात्मके महामञ्चे महेशानोपबर्हिणि। अतिरम्यतले तत्र कोशपुश्च सदाशिवः॥ श्रुतकाश्च चतुष्पादा महेन्द्रश्च पतद्ग्रहः। तत्रास्ते परमेशानी महात्रिपुरसुन्दरी॥' इति। वक्ष्यति च कविः—'गतास्ते मञ्चत्वं द्रुहिणहरिरुद्रेश्वरभृतः' इति। यद्वा, हरिहरविरिञ्चादिभिः, महिषासुरकुपितदैवतविज्ञापनाकर्णनकुपितैर्हरिहरादिभिराराध्याम्, कोपविनिर्गतस्वस्वतेजःसंमेलनेन सिद्धामुत्पन्नां तत्तद्देवतेजःसंसिद्धमुखाद्यवयवां तैश्च शूलादिस्वीयायुधप्रदानेन बहुमतां चेत्यर्थः। अत्रोक्तं मार्कण्डपुराणे—'इत्थं निशम्य देवानां वचांसि मधुसूदनः। चकार शंभुः कोपं च भ्रुकुटीकुटिलाननः॥ ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः। निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च॥ अन्येषां चैव देवानां शक्रादीनां शरीरतः। निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत॥ अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम्। ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम्॥ अतुलं तत्र तत्तेजः सर्वदेवशरीरजम्। एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा॥ यदभूच्छांभवं तेजस्तेनाजायत तन्मुखम्। याम्येन चाभवन्केशा बाहवो विष्णुतेजसा॥ सौम्येन स्तनयोर्युग्मं मध्यमैन्द्रेण चाभवत्। वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः॥ ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा। वसूनां च कराङ्गुल्यः कौबेरेण च नासिका॥' इत्यारभ्य 'अन्येषां चैव देवानां संभवस्तेजसां शिवा' इत्यनन्तरम् 'शूलं शूलाद्विनिष्पिष्य ददौ तस्यै पिनाकभृत्। चक्रं च दत्तवान्कृष्णः' इत्याद्यायुधदानमपि तत्रैव द्रष्टव्यम्। यद्वा, हरिहरविरिञ्चादिभिः विष्णुयामलरुद्रयामलब्रह्मयामलानि आदिशब्देन भैरवयामलादिकमुच्यते, तैराराध्याम्, विष्णुयामलादिसर्वागमप्रतिपाद्यामित्यर्थः। अपि-शब्देनाप्येतदन्यनिगमेतिहासादिकं समुच्चिनोति। त्वां शिवजायाम् 'यत्कुमारी मन्द्रयते' इत्यादिश्रुतिप्रतिपाद्यां हैमवतीम्, अकृतपुण्यः बहुजन्मसु भवदीयपादपङ्कजसेवयाऽनधिगतसुकृतः पुमान्, यो वा को वा भवत्विति विशिष्यानिर्देशः। 'अश्रितासः श्रितासश्च। यज्वानो येऽप्ययज्वनः' इति श्रुतेः देवीपूजायां सर्वेषामधिकारादिति। प्रणन्तुं भवत्तत्वं परिज्ञाय मानसिकवाचिककायिकरूपेण प्रकर्षेण नन्तुं स्वीयदुर्दशां शब्दापयितुं चेति ध्वनिः। 'णम प्रह्वत्वे शब्दे च' इति धातुः। स्तोतुं वा कथं प्रभवति, केन हेतुना शक्नुयात्? तद्धेतोः सुकृतस्य पूर्वमनार्जितत्वाद्ब्रह्मादिदुर्विज्ञेयत्वाच्च तस्या इति भावः। तदुक्तं मार्कण्डेयेन—'यस्याः प्रभावमतुलं भगवाननन्तो ब्रह्मा हरश्च न हि वक्तुमलं बलं च' इति। यदि प्रभवति तर्हि, कथयतीति कथा, स्वयं जननी वदति रहस्यमपि, तत्त्वं कथयन्ती मा लक्ष्मीवागादिरूपिणी भवती यस्य स कथमः, लब्धभवत्कटाक्षानुग्रहः। अस्याश्च कमलारूपत्वमम्बास्तुतौ—'दाक्षायणीति कुटिलेति गुहायनीति कात्यायनीति कमलेति कलावतीति। एका सती भगवती परमार्थतोऽपि संदृश्यसे बहुविधा ननु नर्तकीव॥' इति। स चासौ कृतपुण्यश्च यः स एव प्रभवति प्रणामादिकं कर्तुं शक्नोति प्रभुरपि भवतीत्यर्थः। वयं च 'पूर्वजन्मकृतैः पुण्यै-

ज्ञात्वेमां परदेवताम् । पूजयेदागमोक्तेन विधानेन समाहितः ॥' इत्यागमाद्भवत्कृपाकटाक्षवीक्षणलब्धप्रसादास्त्वां प्रणन्तुं स्तोतुं च कथंचित्प्रभवेम । तत्र स्तवनार्थं मदीयवाणीप्रेरणमेव निदर्शनमिति भावः । वक्ष्यन्ति चाचार्याः—'मयि जननि दृष्टिः सकरुणा' 'दयावत्या दत्तं द्रविडशिशुः' इत्यादि । उक्तं चाचार्यैरम्बास्तवे—'सौन्दर्यविभ्रमभुवो भुवनाधिपत्यसंपत्तिकल्पतरवस्त्रिपुरे जयन्ति । एते कवित्वकुमुदप्रकरावबोधपूर्णेन्दवस्त्वयि जगज्जननि प्रणामाः ॥ देवि स्तुतिव्यतिकरे कृतबुद्धयस्ते वाचस्पतिप्रभृतयोऽपि जडीभवन्ति । तस्मान्निसर्गजडिमा कतमोऽहमत्र स्तोत्रं तव त्रिपुरतापनपत्नि कर्तुम् ॥ मातस्तथाऽपि भवतीं भवतीव्रतापविच्छित्तये स्तुतिमहार्णवकर्णधारः । स्तोतुं भवानि स भवच्चरणारविन्दभक्तिग्रहः किमपि मां मुखरीकरोति ॥' इति । इति प्रकृतदेवतापक्षीयोऽर्थस्तृतीयः ॥

अतः अमूं हरिहरविरिञ्चादिभिरपि आराध्यां जप्यमानामित्यर्थः । त्वां भवद्वाचकं शिवनामेत्यर्थः । वाच्यवाचकयोरभेदोपचारः । प्रणन्तुं स्तोतुं वा समस्तपापनिबर्हणदक्षतया नमस्कर्तुं स्तोतुं च अकृतपुण्यः कथं प्रभवति । कृतपुण्य एव भवद्वाचकशिवनामस्तवननमनादिसमर्थो भवति । इति शब्दपरार्थस्तुरीयः ॥

अतः अमूं हरिहरविरिञ्चादिभिराराध्यां त्वां शब्दार्थरूपिणीं भवतीं नित्यसंबन्धवतीं प्रणन्तुं स्तोतुं वा, अकृतपुण्यः कथं प्रभवति । इत्यर्थपरार्थः पञ्चमः ॥

अतः अमूं हरिहरविरिञ्चादिभिराराध्यां सेव्यामभिवन्द्याम्, उच्चार्यमाणामित्यर्थः । चतुष्पदवागुच्चरणलाभादेवानामित्यर्थः । तथा च श्रुतिः—'चत्वारि वाक्परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः, गुहा त्रीणि निहिता नेङ्गयन्ति, तुरीयं वाचो मनुष्या वदन्ति' इति । त्वां सकलब्रह्मविवर्तकारणपराशक्तिरूपां भवतीम्, अकृतपुण्यः प्रणन्तुं नमस्कर्तुं स्तोतुं वा शब्दापयितुं चेत्यर्थः । कथं प्रभवति, न प्रभवत्येवेत्यर्थः । उक्तं चाम्बास्तवे—'व्योमेति बिन्दुरिति नाद इतीन्दुरेखारूपेति वाग्भवतनूरिति मातृकेति । निष्यन्दमानसुखबोधनिजस्वरूपे विद्योतसे मनसि भाग्यवतां जनानाम् ॥' इति । इति शब्दोत्पत्तिनिरूपणपरार्थः षष्ठः ॥

अत इदम् 'इमानुकं भुवना सीषधेम' इति श्रुतिप्रतिपाद्यं सर्वदेवतात्मकं हरिहरविरिञ्चादिभिर्विष्णुरुद्रब्रह्मादिदेवैः, 'इन्द्रश्च विश्वे च देवाः' इति श्रुतेः । आराध्यां देवताप्रसादाय पूजिताम्, 'इह चामुत्र चान्वेति, विद्वान्देवासुरानुभयान्' इति श्रुतेः । यद्वा, हरिः सूर्यः, 'यमानिलेन्द्रचन्द्रार्क' इत्यादयमरः । हरोऽग्निः, 'हरा रुद्राग्निगर्दभाः' इति रत्नमाला । विरिञ्चशब्देन सूर्याग्निसाहित्यादौचित्याद्विशेषेण रिञ्चति विदधाति लोकानन्दमित्यर्थाश्रयणाद्वा चन्द्र उच्यते । 'रिच वियोजनसंपर्चनयोः' इति धातोः पृषोदरादित्वान्नुम् । आदिशब्देन वशिन्यादिशक्तय उच्यन्ते । तैः खण्डत्रयाधिदैवतैः सूर्याग्नीन्दुभिर्वशिनीत्रिपुरसुन्दरीवामादिसर्वशक्तिभिश्चाराध्यां यथार्हमष्टदलादितत्तत्स्थानेषु स्थित्वा सेव्याम् । एतदुत्तरत्र स्फुटीकरिष्यते । यद्वा, हरिहरविरिमित्येषां पौनःपुन्येन पठितानां वर्णानामन्तःस्थेषूष्मसु च दर्शनादन्तःस्था ऊष्माणश्चाष्ट वर्णा लाघवादनेन गृह्यन्ते । चकारोऽकारश्चादिर्येषां ते चादय इति योजनायामादिशब्दस्य प्रत्येकमभि-

संबन्धाच्चादिशब्देन चकाराद्या सकारान्ता विंशतिर्वर्णा गृह्यन्ते । आदिपदेनाकाराद्या ङकारान्ता एकविंशतिर्वर्णा गृह्यन्ते । ककारषकारमेलनात्मकः क्षकारो गृहीत एव । अथ वा, हरिहरविरिञ्चै-रधिष्ठानदेवताभिः आदिभिः 'अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः । हकारोऽन्त्यः कलारूपो वर्णोऽहंताप्रकाशकः ॥' इत्यागमादहमिति प्रत्याहारेण गृहीतैरकारादिहकारान्तवर्णैः पञ्चा-शद्भिरिति वा, आराध्याम् । त्रिषोडशधा त्रिपुरसुन्दरीप्रभृतिषोडशनित्यास्वन्तर्भूय ताभिः सहाष्ट-द्विकतामापद्याष्टदले स्थित्वा वाऽष्टवर्गात्मकतयाऽष्टदले स्थित्वा वा संसेवितामित्यर्थः । एवंविधां त्वां देवतादेहरूपं यन्त्रं तद्रूपिणीं भवतीं वा । अत्र युष्मदो लिङ्गत्रयसाधारण्यात् 'अलिङ्गे युष्मदस्मदी' इति वचनाद्वा चक्राभिधेयत्वाद्देतायामप्याराध्यामित्यस्य स्त्रीलिङ्गतया न तद्विशेषणीभवनार्हतेति न शङ्कयम् । 'अकारोद्भव आकारः' इति मन्त्रशास्त्रे आकारस्याकारकारणकत्वकथनात्, पाणि-नीयशास्त्रे च वर्णोपदेशवेलायामकारस्यैव ग्रहणमुक्त्वा तस्मादेवाकारग्रहणात्, डणादिषु च 'अव-तेष्टिलोपश्च, दीर्घो वा' इति विकल्पविधानाच्च अनेन प्रकृतिलक्षणायाः सर्वसंमतत्वात् । लिङ्ग-विपरिणामो वा पाठसौकर्यात्कर्तव्यः । अथ वा, लिङ्गभेदेऽपि न तद्विशेषणता दोषाय, यथाऽऽहुः— 'विशेष्येण सहैकार्थं भवेद्यत्र विशेषणम् । तत्र लिङ्गादयः प्रायो विशेष्यस्था विशेषणे ॥' इत्य-भिधाय 'लिङ्गसंख्याविभेदेऽपि विशेषणविशेष्यता । विभक्तिः पुनरेकैव विशेषणविशेष्ययोः ॥' इति । अत एव 'राज्यश्रीप्रथमावतारपदवीमारुह्य सिंहासनम्' इत्यादयः साधव इत्याहुः । प्रणन्तुम्, 'कला विद्या परा शक्तिः श्रीचक्राकाररूपिणी । तन्मध्ये बैन्दवं स्थानं तत्रास्ते परमेश्वरी ॥ सदाशिवेन संयुक्ता सर्वमन्त्रातिगामिनी । चक्रं त्रिपुरसुन्दर्या ब्रह्माण्डाकारमीश्वरी ॥ पञ्चभूतात्मकं चैव तन्मात्रात्मकमेव च ।' इत्याद्यागमं विज्ञाय नमस्कर्तुं सकलदेवतारूपं तत्स्तोतुं वा, अकृतपुण्यः कथं प्रभवति, सकलजगदात्मकम् 'लोकस्य द्वारमर्चिमत्पवित्रम्' इत्यादिश्रुतिप्रसिद्धं तत्परिज्ञाय कृतसुकृतः प्रणामादि विधातुं शक्नोतीत्यर्थः । इति यन्त्रपरार्थः सप्तमः ॥

'अथ मन्त्रोऽन्वर्थादिसंज्ञकः । जप्तव्यो मन्त्रिणा नैनं विना देवः प्रसीदति । क्रियाकर्मे-ष्यकर्तृणामर्थं मन्त्रो वदत्यथ । मननात्त्राणनान्मन्त्रः' इति श्रुतेर्मन्त्रजपस्यावश्यकत्वेन यन्त्रस्वरूप-स्येव तत्स्वरूपस्यापि दर्शयिष्यमाणत्वादादौ 'ओंकारो गुणबीजं प्रणवस्तारो ध्रुवश्च वेदादिः । अस्य तु वेदादित्वात्सर्वमनूनां प्रयुज्यते चादौ ॥' इत्याचार्योक्तेः प्रणवस्य सर्वमन्त्राग्रिमत्वात्तदुद्धारः कथ्यते—'अकारः क्षत्रिये नेत्रे हरमौलौ हरे हरौ । अमरेशस्तथा विष्णुरिन्धिका च गजाङ्कुशः ॥ दक्षकर्णश्च विजय उकारो मन्मथो विधिः । मः शिवश्चन्द्रमा वेधाः' इति कोशप्रसिद्धेरुकारो मकारश्च शिवशब्देनोच्यते । तथा च शिव उकारो मकारश्च शक्त्या बिन्दुयुक्तेनाकारेण युक्तो यदि, 'अकारो बिन्दुसंयुक्तः शक्तिरस्य द्विजोत्तमाः । उकारश्च मकारश्च त्रयं बीजं प्रकीर्तितम् ॥' इति सूतसंहिता-याम् । तर्हि प्रभवितुं प्रणवरूपो भवितुं नादादिरूपेण परापश्यन्त्याद्यवस्थाभिः स्वरवर्णपदवाक्या-त्मकं प्रकर्षमवाप्तुं च शक्तो भवति, शक्तिवाचकोऽपि भवतीत्यभिसंधिः । 'ओंकारपञ्जरशुकीम्' इति नवरत्नमालिकायाम् । उक्तं च—'ओंकारप्रभवा वेदा ओंकारप्रभवाः स्वराः' इत्यादि । एवं न चेत् शक्त्या युक्तो न चेत्, देवः पूर्वोक्तकोशे अमरेश इति प्रसिद्धेरुकारो मकारश्च स्पन्दितुं किंचि-दपि चलितुं प्रणवाक्षरमुत्पादयितुम् उकारमकाराकारबिन्दूनां संयोगाभावात् कुशलो न खलु, 'तस्य

वाचकः प्रणवः' इति योगसूत्रात्, 'उमार्धविग्रहो देवो रुद्रः सत्यादिलक्षणः । संसारतारकस्यास्य प्रणवस्यार्थ उच्यते ॥' इति सूतसंहितावचनाच्च । सांहित्युपनिषदि 'ओमिति ब्रह्म' इत्यादिना प्रकटितसार्वात्म्यं परमेश्वरवाचकं प्रणवमुत्पादयितुं न शक्नोतीति भावः । अतः अमुं हरिहरविरिञ्चादिभिराराध्यां ब्रह्मविष्णुमहेश्वररुद्रदेवतीभूय तथाऽन्यैरग्निवायुसूर्यैर्मुनिभिः गायत्रीत्रिष्टुब्जगत्यभिधानैश्छन्दोभिः रक्तशुक्लकृष्णैर्वर्णैः जाग्रत्स्वप्नसुषुप्त्यवस्थाभिः भूम्यन्तरिक्षस्वर्गस्थानैः उदात्तानुदात्तस्वरिताभिधानैः स्वरैः ऋग्यजुःसामाभिधानैर्वेदैः गार्हपत्याद्यग्निभिः प्राह्णादिभिः कालैः सत्त्वादिभिर्गुणैः सृष्ट्यादिभिः कर्मभिश्च यथायोगं वर्णेषु स्थित्वाऽऽराध्यां त्वां प्रणवरूपिणीं भवतीं प्रणन्तुं स्तोतुं वा, अकृतपुण्यः कथं प्रभवति, न प्रभवत्येवेत्यर्थः । इति प्रणवरूपार्थोऽष्टमः ॥

अथ 'मातृका परमा देवी मन्त्रमाता महेश्वरी' इति वचनान्मन्त्रमातृरूपत्वान्मातृकार्थः कथ्यते—'ककारादिक्षकारान्ता वर्णास्ते शिवरूपिणः । समस्तव्यस्तरूपेण षट्त्रिंशत्तत्त्वविग्रहाः ॥' इत्यागमात्ककादिक्षान्तो वर्णसङ्घः शिवशब्देनोच्यते । 'अकारादिविसर्गान्ताः स्वराः षोडश शक्तयः । नित्याषोडशिकात्मानः परस्परममी युताः ॥' इति वचनाच्छक्तिरित्यनेनादयः षोडश स्वरा उच्यन्ते । तथा च शिवः कादिसङ्घः शक्त्या आदिस्वरसङ्घेन युक्तो यदि श्लिष्टश्चेत्, तर्हि प्रभवितुं प्रकर्षेण भवितुं वेदपुराणेतिहासादिरूपेण गुम्भनयोग्यतां प्राप्तुं शक्तः समर्थः, 'शिवशक्तिमया वर्णाः शब्दार्थप्रतिपादकाः । शिवः स्वरपराधीनो न स्वतन्त्रः कदाऽप्यसौ ॥' इति वचनात् । एवं न चेत्, देवः शिवः कादिः स्पन्दितुं तालवोष्ठादिभिः सुखोच्चारणं प्राप्तुं कुशलो न खलु । स्वरसंमेलनाभावे क् ख् ग् घ् इत्येवंरूपतया, उच्चारणायोग्यत्वान्निरर्थकत्वाच्चेति भावः । अतः अमुं हरिहरविरिञ्चादिभिरपि आराध्यामुपास्यां त्वां मातृकारूपिणीं भवतीम् 'अकारादिक्षकारान्तैर्वर्णैरत्यन्तनिर्मलैः । अशेषशब्दैर्या भाति तामानन्दपरां नुमः ॥' इति वचनात्, प्रणन्तुं स्तोतुं वा पञ्चाशद्वर्णात्मिकैव वेदेतिहासाद्यनेकरूपेण विस्तीर्णेति, अकृतपुण्यः कथं प्रभवति । इति मातृकार्थो नवमः ॥

अथ मन्त्रपरार्थः—शिवः ककारः शक्त्या एकारेण युक्तो यदि संयोगं प्राप्नुयात्, ककारानन्तरमेकार उच्चारितश्चेदित्यर्थः । शिवशक्तिशब्दयोः ककारैकारपरत्वं मन्त्रोद्धारश्लोके वक्ष्यन्त्याचार्याः । तथा चायमर्थः—शिवा त्रिपुरसुन्दर्यस्यास्ति देव्यात्मनेति शिवः ककारः । अर्शआद्यच् । अथ वा 'क्रोधीशो धातुसंज्ञश्च' इति मातृकाकोशाच्छिवः ककार उच्यते । एवं शक्त्यात्मकदृष्टाकलावचनस्य प्रकृत्यभिधानमिति ज्ञेयम् । अथ वा शक्तिरेकारः, 'चण्डीशः पद्मनाभश्च शक्तिः सूक्ष्मोऽमृताक्षरः । उद्घोलः कामरूपश्च एकारश्च त्रिकोणकः ॥' इति मातृकाकोशात् । यत्तूक्तं लक्ष्मीधरेण—'शिवशब्देन त्रिपुरसुन्दरीनामधेया कला कथ्यते, तेन ककारो लक्ष्यते' इति, तन्न, पुंलिङ्गस्य शिवशब्दस्य त्रिपुरसुन्दरीवाचकत्वाभावात् । न चानेन शिवशब्देन शिवाशब्दलक्षणा युक्ता, शब्दलक्षणेव लिङ्गलक्षणाया अश्रुतत्वात्, प्रकृते वाच्यार्थानुपपत्त्याद्यभावाच्च, कोशाश्रयेण ऋज्वर्थमपहाय क्लिष्टकल्पनाप्रयोजनाभावाच्च । एवं शक्त्यादिस्थलेऽपि दूषणमूह्यम् । 'ककाराय कपूर्वादिदेवतापूजिताय च' इति सूतसंहितोक्तेर्वा शिवः ककारः । तर्हि प्रभवितुं मातृकारूपेण

गुम्भनं प्राप्तुं शक्तः । एवं न चेत् प्राथमिकः ककार एकारयुक्तो न यदि, कौ भुवि शेते वर्तत इति कुशः पृथिवीबीजभूतो लो लकारो यस्य सः, कर्मधारयो वा । यद्वा कुशोऽङ्कुशीभूतः, स्वोपरि वर्तमानत्वादिति, लो यस्य स कुशलो देव ईकारः । 'गोविन्दश्च त्रिमूर्तीशः शान्तिः स्याद्वामलोचनः । नृसिंहास्त्रं तथा माया ईकारश्च सुरेश्वरः ॥' इति कोशात्सुरेश्वरापरपर्यायेण देवशब्देन ईकारोक्तिरविरुद्धा । अथ वा, दीव्यति साध्नोति स्त्रीपुरुषेष्विति वा. कामदेवपदे 'विनाऽपि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वाच्यः' इत्यनुशासनात् 'देवदत्तो दत्तः' इत्यादिवन्नामैकदेशे नामग्रहणाद्वा देवशब्देन मदन उच्यते । तेन तद्बीजमीकार उच्यते । स्पन्दितुं चलितुं मन्त्रे उच्चारणं प्राप्तुं न खलु शक्तः, कुशलोऽपि देवोऽपि स्पन्दितुं न शक्त इति वाऽर्थः । पूर्वपूर्वबीजोच्चारणानन्तरभावित्वादुत्तरोत्तरबीजोच्चारणस्येति भावः । एवं प्रथमखण्डीयाश्चत्वारो वर्णा अत्र प्रतिपादिताः । अतोऽनन्तरं हरिहरविरिञ्चादिभिः, हरिशब्दस्य सूर्याचन्द्रमसोरुभयोरभिधानत्वात्, अनेन खण्डद्वयान्तर्गतमुभयार्थकं हद्वयं सद्वयं चेति कथ्यते । हरशब्देन शिवशब्दापरपर्यायेणैकः ककारो गृह्यते । विरिञ्चशब्देन ब्रह्मवाचिनाऽपरः ककारो गृह्यते, तस्यापि ब्रह्माभिधायकत्वात् । 'इन्द्रश्च विश्वे च देवाः' इति श्रुतावुपासकत्वेनोक्तस्यैवेन्द्रस्यादिशब्दाभिधेयो भवनार्हत्वात्तद्वाचकेनादिशब्देन 'शक्रो लकारः' इति कोशप्रसिद्धेरिन्द्रबीजं लकारद्वयमुच्यत इत्येवं खण्डद्वयान्तर्गता अष्टौ वर्णा उक्ता इत्येवं द्वादश वर्णा उद्धृताः । किं चात्रैव हरिहरविरिञ्चेत्यादिपदमध्ये हलामक्ष्वन्तर्भावाङ्गीकारमते विरिमित्यनयोर्वकाररेफयोरिकारयोरन्तर्भावात्प्रथमहरिशब्दस्थहकाररेफयोर्वकारोपरितनेकारस्य सानुस्वारेकारस्य च सवर्णदीर्घं कृत्वा श्लिष्टोच्चारणे एकहलेखालाभः । तथा तदनन्तरहरपदस्थहकाररेफयोर्वकारोपरितनेकारसानुस्वारेकारयोः सवर्णदीर्घानन्तरं श्लिष्टोच्चारणे द्वितीयहलेखालाभः । तथा हरपदस्थस्य रेफस्य तदुपरितनाकारेऽन्तर्भावात्कृतपररूपस्याकारस्य वकारोपरितनेकारान्तर्भूतसानुस्वाररेफोपरितनेकारेण सवर्णदीर्घानन्तरं श्लिष्टोच्चारणे तृतीयहलेखालाभ इति खण्डत्रयस्थहलेखात्रयोद्धारोऽपि लभ्यत इति 'दशपञ्चकभेदेन प्रपञ्चस्य विलासिनः । साक्षिणी चाक्षरी यस्मात्तस्मात्पञ्चदशाक्षरी ॥' इति निरुक्त्या पञ्चदशाक्षरी प्रोक्ता । तथा, आद्यस्य साचः प्रथमोष्मणो विरिञ्चपदमध्यस्थसानुस्वाररेफेण सवर्णदीर्घं विधाय श्लिष्टोच्चारणे प्रधानकमलाबीजलाभोऽपि भवति । अत्र च भगवत्पादाचार्याः षोडशाक्षरीमन्त्रप्रधानस्य कमलाबीजस्य कृत्स्नमन्त्राक्षरावाप्तिं प्रकाशयितुं मन्त्रवर्णान्मध्ये विन्यस्य तत्प्रत्याहाररूपेण संपुटीकृत्य प्रायुङ्क्तेति ध्येयम् । अत एव हरिहरविरिमित्यनेन त्रीणि भुवनेश्वरीबीजानि सूचयित्वा 'चस्तुरुष्के स्वरे चापे चकारे चन्द्रमस्यपि' इति नानार्थात्तस्य चन्द्रस्यादिश्चादिः, तत्प्रथमसंभूतत्वात्, चं चन्द्रमसि तच्छोभां भुङ्क्ष इति वा चादिर्लक्ष्मीरित्यमुमर्थं मनसि निधाय तेन तद्बीजसूचनापूर्वकं तस्याः कृत्स्नाभिव्याप्तिप्रदर्शनाय बहुवचनमवोचन्निति तात्पर्यम् । अथवा, चादिभिः स्वरादिभिर्मातृकाक्षरैर्मन्त्रे प्रत्याहाररूपेण गुप्तैरित्यर्थः । आराध्यां सिद्धाम्, 'राध साध संसिद्धौ' इति धातुः । हरिहरादिभिर्जेप्यां वा । तदुक्तं दक्षिणामूर्तिसंहितायाम्—'अनयैव पुरा ब्रह्मा सृष्टिकर्तृत्वमाप्तवान् । हरिः पालनकर्तृत्वं रुद्रः संहारकर्तृताम् ॥ षोडशार्णा महाविद्या ब्रह्मरूपा जगन्मयी । सर्वानन्दमयी साक्षात्सर्वसाम्राज्यदायिनी ॥' इति । त्वां मन्त्ररूपिणीं भवतीं कादिविद्यारूपिणीं प्रणन्तुं स्तोतुं पञ्चदशकलात्मकैः पञ्चदशभिरेव

वर्णैः कृत्स्नं प्रपञ्चं व्याप्यासीति स्तवितुं वा, अकृतपुण्यः कथं प्रभवति । इति कादिविद्योद्धार-रूपार्थो दशमः ॥

अथ हादिविद्योद्धाररूपोऽर्थः—'शक्तिः प्राणश्च जीवश्च मन्त्रो नादः शिवो रविः । कषोल्क इति संज्ञाः स्युर्हकारस्य शिवोदिताः ॥' इति शारदातिलकोक्तेः शिवो हकारः शक्त्या सकारेण परा-बीजत्वात्सकारस्य । सकारस्य पराबीजत्वं मन्त्रोद्धारश्लोके वक्ष्यन्त्याचार्याः । 'सहशक्तिः' इति मन्त्रान्तरे च दृश्यते । युक्तो यदि संयुतश्चेत् तर्हि प्रभवितुं मन्त्ररूपेण गुम्भनं प्राप्तुं शक्तः । एवं न चेत्, देवः ककारः कुशलो लकारश्च स्पन्दितुं मन्त्रवर्णतया स्पन्दनं प्राप्तुं न खलु न शक्तः खल्विति प्रथमखण्डीयवर्णचतुष्टयमुक्तम् । अनेनैवार्धेन द्वितीयखण्डीयाः पञ्च वर्णा अप्युच्यन्ते । शिवशक्तिदेवपदानि हकारसकारककाराभिधेयानि समानान्येव । खमाकाशं लुनाति तद्बीजत्वादिति खलुराकाशबीजं हकारः । कुशलो लकारश्च स्पन्दितुमपि न शक्त इत्यर्थः । हरिर्वायुः, तेन च तद्बीजं सकार उच्यते । हरः ककारः । वेर्वकारस्याधो रिञ्चति प्रकाशत इति विरिञ्चो लकारः । तैरेतै-र्द्वादशभिर्वर्णैर्हकारादिभिः सर्वमन्त्रमूलकारणैस्त्रिभिर्गौरीबीजैश्च पूर्वोक्तप्रकारेणात्रैव सूचितैरित्यर्थः । आराध्यां सिद्धां कामेश्वरीवाचकलोपामुद्रोपासितहादिविद्यारूपिणीं त्वां मन्त्रं तद्रूपिणीं भवतीं च प्रणन्तुं स्तोतुं वा, अकृतपुण्यः कथं प्रभवति ? किं तु दक्षिणामूर्तिसंहितोक्तमस्य माहात्म्यमव-बुध्याराधितुं कृतपुण्य एव समर्थः । इति हादिविद्यापरार्थ एकादशः । अयं च वर्णोपदेशवेलायां पाणिनिना प्रथमतो निरूपितत्वादुत्कटोऽतिगोपनीयोऽपि प्रकाशितो गोप्तव्यः ॥

पञ्चाक्षरीपरार्थोऽपि प्रतीयते—शिवशब्दः शक्त्या, आवृत्त्याश्रयणात् 'नमः शक्तिकदी-रिता' इति प्रसिद्धेर्नमःशब्देन शिवशब्दादुत्पन्न 'ङे' इत्येतच्चतुर्थीविभक्तिलब्धेनैकारेण च युक्तो यदि, तर्हि प्रभवितुम् 'ङेर्यः' इति यादेशे 'सुपि च' इति दीर्घे च क्रियमाणे मन्त्ररूपेणोत्पत्तुं परमेश्वरं स्वमभिधातुं च शक्तः । एवं न चेत् देवः शिवशब्दः स्पन्दितुं पञ्चाक्षरीमन्त्ररूपेण चलितुं च न कुशलः खलु, लोकानां शिवयोरैक्यबोधकोऽपि नेत्यर्थः । अतः अमूं हरिहरविरिञ्चादिभिराराध्यां जप्यमानां त्वां पञ्चाक्षरीमन्त्ररूपिणीं भवतीं प्रणन्तुं स्तोतुं वा, अकृतपुण्यः कथं प्रभवति । इति पञ्चाक्षरीरूपार्थो द्वादशः ।

अथ 'गुरुविद्यादेवतानामैक्यं संभावयेद्धिया' इति वचनाद्गुरुरूपार्थोऽपि प्रकाश्यते । तत्र चायमर्थः—'देहजात्यादिसंबन्धान्वर्णाश्रमसमन्वितान् । वेदाञ्शास्त्राणि सर्वाणि पादपांसुमिव त्यजेत् ॥ न गुरुं संत्यजेन्नित्यं जानन्नस्य कृतं नरः । गुरुभक्तिं सदा कुर्याच्छ्रेयसे भूयसे नरः ॥ ऋतस्य दातारमनुत्तरस्य निधिं निधीनां चतुरन्वयानाम् । ये नाद्रियन्ते गुरुमर्चनीयं ते वै लोका-न्निर्विशन्त्यप्रतिष्ठान् ॥' इत्यादिवचनेभ्यो गुरुभक्त्यामवश्यविधेयायां स किमात्मक इति प्रश्ने 'गुरुरेव शिवस्तस्य नान्य इत्यत्रवीच्छ्रुतिः' इति श्रुत्या यदुक्तं स परमार्थ एव । '...यः सर्वभूतानामीश्वरः स्वत एव तु । ईशानः सर्वविद्यानां स एवादिगुरुर्बुधाः ॥ * * * यथाऽहं ज्ञानदो गुरुः ॥ शुद्ध-स्फटिकसंकाशं द्विनेत्रं द्विभुजं गुरुम् । वराभयकरं देवं परमानन्दरूपिणम् ॥ भक्ताज्ञानतमो-भानुं मूर्ध्नि पङ्कजसंस्थितम् । सदाशिवमयं नित्यं श्रीगुरुं प्रणमाम्यहम् ॥ अनन्तमपरिच्छिन्नं तत्त्वं

येन प्रकाशितम् । सच्चिदानन्दसपरं श्रीगुरुं शिवमाश्रये ॥' इत्याद्यभेदवचनेभ्यः शिवो गुरुरित्युच्यते । तथा च शिवयति शिष्यान्मन्त्रतत्त्वोपदेशेनेति शिवो गुरुः । 'सिद्धस्य विप्रवर्यस्य षोडशार्णप्रजापिनः । संप्रदायविशुद्धस्य शिष्योऽवश्यं भवेच्छिवः ॥' इति वचनोक्तगुणसंपन्नतया कल्याणमूर्तिर्वा, शक्त्या सामर्थ्येन मन्त्रजपदेवतानुसंधानवश्याकर्षणादिरहस्यविज्ञानरूपेणेत्यर्थः । युक्तो यदि तर्हि शिष्यः प्रभवितुं प्रकृष्टो भवितुं शक्तः परशुरामादिवदित्यर्थः । परमशिवरूपगुर्वनुग्रहात्स्वयमुत्कटो भवतीत्यभिप्रायः । एवं न चेत्, गुरुः समर्थो न चेत्, देवोऽपि प्रकाशमानोऽपि शिष्यः, देवताऽपीत्यर्थः । स्पन्दितुं किंचिदपि सामर्थ्यमवाप्तुं कुशलो न खलु, देवतानुग्रहभाङ् न भवत्येवेत्यर्थः । अतः अमूं हरिहरविरिञ्चादिभिरप्याराध्याम्, सर्वेषामपि मन्त्ररहस्यस्य गुरुपरम्परागतत्वादिति भावः । त्वां गुरुमूर्तिरूपिणीं भवतीम् । अत्रोक्तमम्बास्तवे—'विद्यां परां कतिचिदम्बरमेव केचिदानन्दमेव कतिचित्कतिचिच्च मायाम् । त्वां विश्वमाहुरपरे वयमामनामः साक्षादपारकरुणां गुरुमूर्तिमेव ॥' इति । प्रणन्तुं स्तोतुं वा अकृतपुण्यः कथं प्रभवति । इति गौरवार्थस्त्रयोदशः ॥

अथ देव्याश्चन्द्रकलारूपत्वात्तद्रूपार्थोऽपि प्रतीयमानो विविच्यते—शिवशब्देन शिवतत्त्वात्मिका दर्शाख्या चान्द्री कलोच्यते । न च पुंलिङ्गेनानेन स्त्र्यभिधानं विरुद्धमिति शङ्कनीयम्, प्रतापरुद्रीये स्त्रियामेव गणपतिराजदुहितरि रुद्र इति पुंलिङ्गप्रयोगदर्शनात् । आहुश्च तत्र रत्नापणकृतः—'प्राचामियं शैली यदयं लिङ्गव्यत्यासेन निर्दिशति; यथा—पुंव्यक्तौ शिखण्डिनि' इति । तथा शतपथब्राह्मणे इन्द्रं पुमांसमपि सुब्रह्मण्यों सुब्रह्मण्यों सुब्रह्मण्योमिति स्त्रियमिह त्रिराहेति । तथा च शिवो दर्शाख्या चान्द्री कला शक्त्या शक्तितत्त्वात्मिकया दृष्ट्याख्यया कलया युक्तो यदि, तर्हि प्रभवितुं प्रकृष्टतां दर्शनयोग्यतामुपासनयोग्यतां च प्राप्तुं शक्तो भवति । प्राथमिककलाया अतिसूक्ष्मतया द्वितीयकलायोगेनैव दर्शनयोग्यत्वादिति भावः । अत एवाह भारविः—'प्रतिपच्चन्द्रमिव प्रजा नृपम्' इति । 'तस्य प्रतिपद्यदर्शनाद्द्वितीयाचन्द्रमिवेत्यर्थः' इति घण्टापथे । एवं न चेत्, दीव्यति प्रकाशत इति देवो दर्शाख्या कला स्पन्दितुमपि किंचिदपि प्रकाशं जगदाप्यायनं च प्राप्तुं कर्तुं च दर्शतादिकला अनुग्रहीतुं चेत्यर्थः । न कुशलः न समर्थः । स्वदर्शनेन लोकानां सौख्यप्रदानशक्तश्च नेत्यर्थः । ताश्च कला वेदे प्रसिद्धाः 'दर्शा दृष्टा दर्शता विश्वरूपा सुदर्शना । आप्यायमानाप्यायमानाप्याया सूनृतेरा' इत्यादिना । अतः अमूं चन्द्रकलारूपिणीं हरिहराविरिञ्चादिभिराराध्यां सेव्याम् । यद्वा, 'प्रथमां पिबते वह्निः' इत्यादिक्रमेण सोमोत्पत्त्युक्तप्रकारेण वा सेव्याम् 'दर्शाद्याः पूर्णिमान्ताश्च कलाः पञ्चदशैव तु । षोडशी तु कला नित्या सच्चिदानन्दरूपिणी ॥' इति सुभगोदयोक्तां सकलजगदाप्यायिकां भगवतीम्, अकृतपुण्यः पूर्वजन्मार्जितपुण्यरहितः प्रणन्तुं स्तोतुं वा कथं प्रभवति । पुण्यवत एव चन्द्रकलायां भक्तिरुदेति । तद्रूपेणापीष्टार्थप्रदात्री त्वमेवेति भावः । अतो हरिहरादिष्विव किंचित्पुण्यलेशेन स्तवनोद्युक्ते मयि निरतिशयप्रसादमासादयेति तात्पर्यम् । इति कलारूपार्थश्चतुर्दशः ॥

अस्य श्लोकस्य संग्रहवाक्यरूपत्वादुत्तरश्लोकानामस्यैव विवरणवाक्यरूपत्वादुत्तरत्र प्रतिपाद्योऽर्थः सर्वोऽप्यत्र संगृहीतः, यथा विवरणवाक्यरूपाध्यायचतुष्टयप्रतिपाद्यार्थप्रतिपादनं संग्रहवाक्य-

रूपायां चतुःसूत्र्यामिति संक्षेपोऽवधेयम्। अत्र शिवेत्यादीनां सर्वेषां पदानामभिप्रायगर्भत्वात्परिकर-परिकराङ्कुरावलंकारौ। किं च, पूर्ववाक्ये शिवयोर्निरतिशयसाहित्योक्तेर्नित्यशृङ्गारित्वप्रतीतेः साध्य-साधनभावनिर्देशरूपानुमानादत्र समासोक्तिः। लौकिकाशक्तपुरुषवृत्तान्तप्रतीतेर्वस्त्वलंकाररसात्मक-स्त्रिविधो ध्वनिः। पूर्ववाक्यस्योत्तरवाक्यं प्रति हेतुत्वात्काव्यलिङ्गं क्वचिच्छ्लेषोऽपीति सर्वं रमणीयम्। माधुर्यं गुणः, 'या पृथक्पदता वाक्ये तन्माधुर्यं प्रकीर्त्यते' इति तल्लक्षणात्। पाकोऽत्र द्राक्षापाकः, 'द्राक्षापाकः स कथितो बहिरन्तःस्फुरद्रसः' इति लक्षणात्। वृत्तिरत्र कैशिकी, तदुक्तं शृङ्गारतिलके— 'या नृत्तगीतप्रचुरोपभोगवेषाङ्गसंकीर्तनचारुबन्धा। माधुर्यवृत्तालपसमासरम्या वृत्तिः स्मृताऽसाविह कैशिकीति॥' इति। रीतिरत्र वैदर्भी, 'बन्धपारुष्यरहिता शब्दकाठिन्यवर्जिता। नातिदीर्घ-समासा च वैदर्भी रीतिरिष्यते॥' इति। अलमतिविस्तरेण॥

अरुणाकरुणावीक्षाप्रेरितेनातिविस्तरम्। विविधानागमग्रन्थांष्टीकाः प्राचीननिर्मिताः॥
आलोच्य सावधानेन शास्त्रसारमनेकशः। प्रोक्तः श्लोकाभिधेयोऽयं भजता गणनायकम्।
असूयां दूरतः कृत्वा सुधीभिरवधार्यताम्॥ १॥

तनीयांसं पांसुं तव चरणपङ्केरुहभवं
विरिञ्चिः संचिन्वन्विरचयति लोकानविकलम्।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः संक्षुद्यैनं भजति भसितोद्धूलनविधिम्॥ २॥

॥ लक्ष्मीधरा ॥

तनीयांसं अतिसूक्ष्मं, पांसुं रजःकणं, तव भवत्याः देव्याः, चरणपङ्केरुहभवं चरणौ पङ्केरुहे इव ताभ्यां भवं, विरिञ्चिः ब्रह्मा। विरिञ्चिशब्दः इकारान्तः, 'विरिञ्चिश्च विरिञ्चनः' इति अमरशेषे अभिधानात्। संचिन्वन् संपादयन्, भाण्डीकुर्वन्निलयर्थः। विरचयति विविधान् करोति, लोकान् लोक्यन्त इति लोकाः, स्थावरजङ्गमात्मकप्रपञ्चः इत्यर्थः। यद्वा—ऊर्ध्व-लोकाः सप्त भूरादयः, अधोलोकाः सप्त अतलादयः, एवं चतुर्दशलोकान्। अविकलं परस्परम-संकीर्णं यथा भवति तथा। यद्वा—यावत्प्रलयमेषां वैकल्यं यथा न भवति तथा। वहति प्रापयति रक्षति एनं पांसुकणं चतुर्दशलोकात्मकतया अवस्थितम्। शौरिः शूरस्य यदोरपत्यं शौरिः बलभद्रः, तेन शेषो लक्ष्यते, शेषावतारत्वाद्बलभद्रस्य। यद्वा—शृणाति हिनस्ति दशतीति शौरिः सर्पराजः, शेष इति यावत्। यद्वा—शौरिः विष्णुः; तथोक्तं चतुःशत्याम्—'शिशुमारात्मना विष्णुः सप्त-लोकानधःस्थितान्। दधे शेषतया लोकान्भूरादीनूर्ध्वतः स्थितान्॥' इति। शेषपक्षेऽपि शेष एव विष्णुः, रक्षणे विष्णोरेवाधिकारात्। कथमपि कथंचित् सहस्रेण शिरसाम्, हरः, अन्तकाले

संभोगप्राप्तिरिति चेन्न, वैशेष्यात् ॥ ८ ॥

जीवपरयोरेकशरीरस्थत्वे समानभोगप्राप्तिरिति चेन्न, सामर्थ्यवैशेष्यात् । उक्तं हि गारुडे—'सर्वज्ञाल्पज्ञताभेदात्सर्वशक्त्यल्पशक्तितः । स्वातन्त्र्यपारतन्त्र्याभ्यां संभोगो नेशजीवयोः ॥' इति । खण्डनं प्राग्वत् ॥

बृहदारण्यके श्रूयते—'स यद्यदेवासृजत तत्तदत्तुमाद्रियत । सर्वं वा अत्तीति तददितेरदितित्वम्' इति । तत्राऽत्ता क इति संशये अदितिश्रुतिबलादादित्याख्यो देवताविशेष इति प्राप्ते, सिद्धान्तमाह—

अत्ता चराचरग्रहणात् ॥ ९ ॥

अत्ता विष्णुरेव, सर्वसंहर्तृत्वादित्यर्थः ॥

प्रकरणाच्च ॥ १० ॥

'इदं सर्वमसृजत' इत्यादिलिङ्गाद्विष्णोरेव प्रकरणमित्यर्थः । खण्डनं प्राग्वत् ॥

कठवल्लीषु श्रूयते—'[1]अमृतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे' इत्यादि । अत्र पिबन्ताविति प्रतीयमानं कर्मफलभोक्तृत्वं यद्यपि जीवयोर्न, एकस्मिन्नेव शरीरे भोक्तृजीवद्वयायोगात्, तथाऽपि जीवेशयोस्तदिति प्राप्ते, सिद्धान्तमाह—

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥

पिबन्तौ विष्णुरूपे एव, गुहाप्रवेशरूपलिङ्गात् । 'घर्मा समन्तात्त्रिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम' इत्यादिना तद्दर्शनात् । घर्मौ दीप्तौ समन्ताद्व्याप्तौ भगवन्तौ तेजोऽबन्नात्मकं शरीरं विशेषेण गुहास्थाने प्राप्तौ तयोः सेवां कर्तुं मातरिश्वाऽपि त्रिवृतं जगामेति श्रुत्यर्थः । 'आत्मान्तरात्मेति हरिरेक एव द्विधा स्थितः । निविष्टो हृदये नित्यं रसं पिबति कर्मजम् ॥' इति बृहत्संहितायाम् । 'शुभं पिबत्यसौ नित्यं नाशुभं स हरिः पिबेत् । पूर्णानन्दमयस्यास्य चेष्टा न ज्ञायते क्वचित् ॥' इति पाद्मे । पूर्णानन्दरूपोऽप्यसौ अचिन्त्यैश्वर्यबलेन शुभकर्मफलं भुङ्क्ते, 'तस्येवाहुः पिप्पलं स्वाद्वत्ति' इति श्रुतेः । अत एव 'अनश्नन्यः' इति श्रुतिरशुभभोगाभावविषयेति भावः । हिशब्देन 'यो वेद निहितं गुहायाम्' इत्यादिप्रसिद्धिं दर्शयति ॥

विशेषणाच्च ॥ १२ ॥

'यः सेतुरीजानानामक्षरं ब्रह्म यत्परम्' इति ब्रह्मशब्देन विष्णोरेव लाभादित्यर्थः । खण्डनं तूक्तम् ॥

---

1. ऋतं

छान्दोग्ये श्रूयते—'य एषोऽक्षिणि पुरुषो दृश्यते' इति । तत्राक्षिस्थः पुरुषोऽग्निर्विष्णुर्वेति संशये अग्निरिति प्राप्तम्, 'य एष आदित्ये पुरुषः सोऽहमस्मि' इत्यग्निवचनात्। न चादित्यत्वोक्त्याऽक्षिस्थत्वं कथमायातमिति वाच्यम्, 'आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशत्' इति श्रुत्वा आदित्यस्याक्षिस्थत्वेन तत्सिद्धेः। अत्र सिद्धान्तमाह—

अन्तर उपपत्तेः ॥ १३ ॥

चक्षुरन्तःस्थो विष्णुरेव, 'एतदमृतमभयम्' इत्यादिनोक्तानाममृतत्वादीनां विष्णावेवोपपत्तेः। 'सोऽहमस्मि' इति तु अन्तर्याम्यपेक्षया। 'अन्तर्यामिणमीशेशमपेक्ष्याहं त्वमित्यपि। सर्वशब्दाः प्रयुज्यन्ते सति भेदेऽपि वस्तुषु ॥' इति महाकौर्मे ॥

स्थानादिव्यपदेशाच्च ॥ १४ ॥

'तद्यद्यस्मिन्सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव तद्गच्छति' इति स्थानशक्तिः 'वामनीः, भामनीः' इत्याद्यात्मशक्तिश्च व्यपदिश्यमाना तल्लिङ्गमित्यर्थः। 'स ईशः सोऽसपत्नः स हरिः स परः परोवरीयान् य इदं चक्षुषी सर्पिर्वोदकं वा सिञ्चति वर्त्मन्येवागच्छति स भामनः स वामनः स आनन्दः सोऽच्युतः' इति चतुर्वेदशिखायाम्। 'यत्स्थानत्वादिदं चक्षुरसङ्गं सर्ववस्तुभिः। स वामनः परोऽस्माकं गतिरित्येव चिन्तयेत् ॥' इति वामने ॥

सुखविशिष्टाभिधानादेव च ॥ १५ ॥

'कं ब्रह्म' इति सुखविशिष्टत्वोक्तेरित्यर्थः। 'लक्षणं परमानन्दो विष्णोरेव न संशयः। अव्यक्तादिरणान्तास्तु विप्रुडानन्दभागिनः ॥' इति ब्रह्मवैवर्ते ॥

श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १६ ॥

'स एनान् ब्रह्म गमयति' इत्यभिधीयमाना गतिरप्यत्र लिङ्गम्, 'मद्भक्ता यान्ति मामपि' इत्युक्तेः। पूर्वपक्षे त्वग्निप्राप्तिरेवोच्यते, 'देवान् देवयजो यान्ति' इत्युक्तेः ॥

एवं चतुःसूत्र्या सिद्धान्ते साधकमभिधाय पक्षान्तरे बाधकमाह—

अनवस्थितेरसंभवाच्च नेतरः ॥ १७ ॥

तत्तत्प्रेरकत्वेनाभिप्रेतश्चक्षुःस्थो नाग्निः, अस्य नियामकत्वेऽनवस्थापत्तेः, जीवे तादृशशक्त्यसंभवाच्चेत्यर्थः। खण्डनं प्राग्वत् ॥

बाजसनेयके—'एष त आत्माऽन्तर्याम्यमृतः' इति श्रूयमाणोऽन्तर्यामी किं प्रकृतिर्जीवो विष्णुर्वेति संशये 'यस्य पृथिवी शरीरम्' इत्यादिश्रवणात्प्रकृतिर्जीवो वेति प्राप्ते, सिद्धान्तमाह—

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥

अन्तर्यामी विष्णुरेव, अविदितान्तरत्वादिरूपतद्धर्मश्रवणात् ॥

प्रकृतेरन्तर्यामित्वं निराचष्टे—

न च स्मार्तम् अतद्धर्माभिलापात् ॥ १९ ॥

स्मृत्युक्तं प्रधानं नान्तर्यामी, त्रिगुणत्वादिप्रधानधर्माणामिहानुक्तेः ॥

जीवस्य तन्निराचष्टे—

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ २० ॥

नेत्यनुवर्तते । शारीरो जीवोऽपि नान्तर्यामी ; 'आत्मनोऽन्तरः' इति माध्यंदिनाः 'विज्ञानादन्तरः' इति काण्वाश्च जीवमन्तर्यामिणः सकाशाद्भेदेन यतो वदन्ति । 'शीर्यते नित्यमेवास्माद्विष्णोस्तु जगदीदृशम् । रमते च परो ह्यस्मिन् शरीरं तस्य तज्जगत्' इति वचनात् न शरीरत्वविरोधः । खण्डनं प्राग्वत् ॥

आथर्वणे श्रूयते—'अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यम्' इत्यादि । तददृश्यत्वादिगुणकं वस्तु विष्णुः, अन्य इति संशये, अन्यदेवेति प्राप्तम् । तथा हि—अदृश्यत्वादिगुणके अक्षरत्वं श्रुतम् । अक्षरश्च न विष्णुः, 'अक्षरात्परतः परः' इति ततोऽप्युत्कृष्टस्याभिधानात् । न हि विष्णोरपि परोऽस्ति । तस्मादिह जडप्रकृतिरेवाक्षरम् । 'तथाऽक्षरात्संभवतीह विश्वम्' इति पृथिव्यादिदृष्टान्तेनोक्तमुपादानं हि तदेव ; तदेव चादृश्यत्वादिगुणकम् । चेतनप्रकृतिर्वा, तत्रापि अक्षरशब्दस्य स्मृतिसिद्धत्वात् । विकारित्वेन जगत्कारणत्ववचनं च तस्या विकाराभिमानित्वाद्युज्यते । हिरण्यगर्भो वा, 'स ब्रह्मविद्याम्' इति ब्रह्मशब्दात् । रुद्रो वा, 'कर्तारमीशं पुरुषम्' इति ईशशब्दात् । एवं प्राप्ते, सिद्धान्तमाह सूत्रकारः—

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥

अदृश्यत्वादिगुणको विष्णुरेव, 'अथ परा यया तदक्षरमधिगम्यते' इति पराविद्याविषयत्वस्य विष्णुधर्मस्योक्तेः । 'द्वे विद्ये' इत्यत्र च यदा अन्यविषयतया योज्यते तदा तस्या अपरविद्यात्वम्, हरिपरत्वे तु पराविद्यात्वमिति बोध्यम् । तदुक्तम्—'ऋगाद्या अपरा विद्याः यदा विष्णोर्न वाचकाः । ता एव परमा विद्याः यदा विष्णोस्तु वाचकाः ॥' इति ॥

अर्थान्निरस्तप्रायाणि पक्षान्तराणि युक्त्यन्तरेण निराकर्तुं सूत्रान्तरम्—

विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ २२ ॥

न प्रकृतिः, 'यः सर्वज्ञः सर्ववित्' इति विशेषणात्। नापि हिरण्यगर्भः, 'तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते' इत्यक्षरात्तदुत्पत्तिकथनेन भेदलाभात्। नापि रुद्रः, 'अन्यमीशमस्य' इति श्रुतेः। अन्यं प्रसिद्धरुद्राद्विलक्षणमीशं यदा पश्यतीति हि तस्याः श्रुतेरर्थः। तदुक्तम्—विशेषणभेदव्यपदेशाभ्यामिति।

विष्णोरेवाहृश्यत्वादिगुणकत्वे युक्त्यन्तरकथनार्थं सूत्रम्—

रूपोपन्यासाच्च ॥ २३ ॥

'यदा पश्यः पश्यते रुक्मवर्णम्' इति हिरण्यवर्णता श्रुता। सा च विष्णोरेव, 'तस्य हैतस्य परमस्य नारायणस्य चत्वारि रूपाणि—शुक्लं रक्तं रौक्मं कृष्णम्' इति श्रुतेः। 'अक्षरात्परतः परः' इति तु प्रकृतस्याक्षरस्याक्षराभिधानादन्यस्मात्परत्वं गृहीत्वा योज्यम्। उक्तं हि स्कान्दे—'अपरं त्वक्षरं या सा प्रकृतिर्जडरूपिका। श्रीः परा प्रकृतिः प्रोक्ता चेतना विष्णुसंश्रया॥ तामक्षरं परं प्राहुः परतः परमक्षरम्। हरिमेवाखिलगुणमक्षरत्रयमीरितम्॥' इति। खण्डनं प्राग्वत्॥

छान्दोग्ये श्रूयते—'यस्त्वेतमेव प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते' इति। तत्र वैश्वानरोऽग्निरिति प्राप्ते, सिद्धान्तार्थं सूत्रम्—

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥

वैश्वानरो विष्णुरेव, अग्नाविष्णवोः साधारणस्यापि वैश्वानरशब्दस्यात्मशब्देन विशेषेऽस्थापनात्, अभितो विगतं मानं मर्यादा यस्येति विग्रहेण सर्वगतत्वलाभाच्च। किं च,

स्मर्यमाणमनुमानं स्यादिति ॥ २५ ॥

'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः' इति स्मर्यमाणमिहापि तस्यैव ग्रहणे लिङ्गमिति सूत्रार्थः। सूत्रे इति स्मर्यमाणमिति योजनया इतिशब्दः समाख्यां सूचयति। समा एकरूपा आख्या प्रतीतिः समाख्या॥

शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथादृष्ट्युपदेशादसंभवात्पुरुषविधमपि चैनमधीयते ॥ २६ ॥

ननु नायं विष्णुः, 'अयमग्निर्वैश्वानरः' इति बृहदारण्यके 'वैश्वानरमृत आजातम्' इत्याग्नेयेषु चाग्निशब्दसामानाधिकरण्यात्। 'वैश्वानरे तद्धुतं भवति हृदयं गार्हपत्यो मनोऽन्वाहार्यपचनः' इत्यादिलिङ्गेभ्यः। बृहदारण्यके—'येनेदमन्नं पच्यते' इति। छान्दोग्ये च—'तद्यदुक्तं

प्रथममागच्छेत्तद्धोमीयम्' इत्यादिना पाचकत्वेनान्तःप्रतिष्ठानप्रतीतेश्चेति चेन्न, अग्नेर्यानि नामलिङ्गानि कर्माणि तद्वत्तया विष्णोरुपास्यत्वोपदेशात्। श्रूयते हि महोपनिषदि—'अथ हेममात्मानमणोरणीयांसं परतः परं विश्वं हरिमुपासीतेति सर्वनामा सर्वकर्मा सर्वलिङ्गः सर्वगुणः सर्वकामः सर्वधर्मः सर्वरूपः' इत्यादि। अत्र प्रथम इतिशब्दो विधिसमाप्तौ। द्वितीयस्य तु इत्युपासीतेत्यन्वयः, 'को न आत्मा किं ब्रह्म' इत्यारम्भात्, अन्येषामसंभवाच्च। अपि च 'चन्द्रमा मनसो जातः' इत्यादिना यः पुरुषाख्यो विष्णुरभिहितस्तद्विधमेवात्र वैश्वानरमधीयते—'मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मा' इत्यादिना। न चाभेदविरोधः, 'यस्माद्यज्ञायते चाङ्गाल्लोकवेदादिकं हरेः। तन्नामवाच्यमङ्गं तद्यथा ब्रह्मादिकं मुखम्॥' इति नारदीयवचनात्॥

अत एव न देवता भूतं च ॥ २७ ॥

यद्यपि वैश्वानरशब्दो देवतायां तेजोरूपे भूते च प्रसिद्धः, तथाऽपि नात्र ते ग्राह्ये, आत्मशब्दादिहेतोरेवेत्यर्थः॥

साक्षादप्यविरोधं जैमिनिः ॥ २८ ॥

वैश्वानरादयः शब्दाः साक्षाद्विष्णोरेव वाचकाः। अविद्वांसस्तु तैरन्यत्र व्यवहरन्तीति अविरोधं जैमिनिर्मन्यते, 'यो देवानां नामधा एक एव' इति श्रुतेः॥

नन्वेवं वैदिकानामग्निसूक्तादिप्रसिद्धिः कथमित्यत आह—

अभिव्यक्तेरित्याश्मरथ्यः ॥ २९ ॥

तत्र सूक्ते विष्णोरेव प्रतिपाद्यत्वेऽपि अग्न्यादिसूक्तैर्ब्रह्मोपासनायां कृतायामग्न्यादिष्वेव स्वेच्छया ब्रह्मणोऽभिव्यक्तिनियमात्तदभिप्रायेण तथा प्रसिद्धिरित्याश्मरथ्यो मन्यते॥

अनुस्मृतेर्बादरिः ॥ ३० ॥

तत्तत्सूक्ताद्युपासकैरग्न्यादिष्वेव विष्णोः प्रतिपत्तव्यताभिप्रायेण तथा प्रसिद्धिरिति बादरिर्मन्यते॥

संपत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ३१ ॥

'साक्षादप्यविरोधम्' इति सूत्रोक्तरीत्या लौकिकव्यवहारेऽङ्गरूप्याऽप्यविरोधं वदन् जैमिनिः सूक्तादिव्यवहारस्याग्न्यादिसंप्राप्त्या निर्वाहं वक्तीत्यर्थः। तथा हि दर्शयति श्रुतिः—'तं यथोपासते तदेव भवन्ति' इति। भू प्राप्तौ; भवन्ति प्राप्नुवन्तीत्यर्थः॥

स्यादेतत्। अग्न्यादिसूक्तादिभिर्ब्रह्मोपासकस्याग्निप्राप्तिरिति न युक्तम्, 'मद्भक्ता यान्ति

मामपि' इति वचनात्, अन्योपासकस्यान्यप्राप्तेरयोगात्। 'श्रुतोपनिषत्कगत्यभिधानाच्च' इत्यादौ तथाऽनभ्युपगमाच्चेत्याशङ्कां समाधत्ते सूत्रकारः—

आमनन्ति चैनमस्मिन् ॥ ३२ ॥

एनं विष्णुमग्न्यादावामनन्ति—'यो अग्नौ तिष्ठन्' 'य एतस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषः' इत्यादिना। तथा च विष्णूपासकस्याग्न्यादिप्राप्तिर्नायुक्ता, अग्न्यादिप्राप्तिरित्यनेन तदन्तर्गतभगवत्प्राप्तेरेव विवक्षितत्वादित्यर्थः। खण्डनं प्राग्वत् ॥

इति श्रीतत्त्वकौस्तुभे द्वितीयपरिच्छेदे प्रथमाध्यायस्य
द्वितीयः पादः ॥

॥ प्रथमाध्यायस्य तृतीयः पादः ॥

आथर्वणे श्रूयते—'यस्मिन् द्यौः पृथिवी चान्तरिक्षम्' इत्यादि। तत्र द्युभ्वाद्यायतनं किमिति वीक्षायां रुद्र इति प्राप्तम्, 'रुद्रो वाव लोकधारः' इति श्रुतेः। प्रकृतिर्वा, द्युभ्वादीनां प्रकृतिकार्यत्वात्। जीवो वा, 'अरा इव रथनाभौ संहता यत्र नाड्यः स एषोऽन्तश्चरते बहुधा जायमानः' इति द्युभ्वाद्यायतने जीवलिङ्गश्रवणाज्जीवस्य प्राणित्वप्रसिद्धेश्च। वायुर्वा, वायुना वै गौतम सूत्रेण' इत्यादिश्रुत्या वायोर्लोकाधारत्वप्रतीतेः ॥ सिद्धान्तार्थं सूत्रम्—

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥

द्युभ्वादेराधारो विष्णुरेव, 'तमेवैकं जानथ आत्मानम्' इत्यात्मशब्दात्। 'आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययम्। न संभवन्ति यस्मात्तैर्नैवाप्ता गुणपूर्णता ॥' इति ब्रह्मवैवर्ते। किं च,

मुक्तोपसृप्यव्यपदेशात् ॥ २ ॥

'अमृतस्यैष सेतुः' इति मुक्तप्राप्यत्वोक्तेरिति सूत्रार्थः ॥

नानुमानमतच्छब्दात् ॥ ३ ॥

अनुमानात्मकागमपरिकल्पिते रुद्रप्रकृती नेह ग्राह्ये, तत्समर्पकशब्दाभावात्। 'सोऽन्तकः स रुद्रः स प्राणभृत्स प्राणनायकः स ईशो यो हरिर्योऽनन्तो यो विष्णुर्यः परः परोवरीयान्' इत्यादिना प्राणग्रन्थिरुद्रत्वादेर्विष्णोरेवोक्तत्वात्। ब्रह्माण्डे च—'रुजं द्रावयते यस्माद्रुद्रस्त-

स्माज्जनार्दनः । ईशानादेव चेशानो महादेवो महत्त्वतः ॥ पिबन्ति ये नरा नाकं मुक्ताः संसार-सागरात् । तदाधारो यतो विष्णुः पिनाकीति ततः स्मृतः ॥ शिवः सुखात्मकत्वेन शर्वः [1]संरोधनाद्धरिः । कृत्यात्मकमिमं देहं यतो वस्ते प्रवर्तयन् ॥ कृत्तिवासास्ततो देवो विरिञ्चिश्च विरेचनात् । बृंहणाद्ब्रह्मनामासावैश्वर्यादिन्द्र उच्यते ॥ एवं नानाविधैः शब्दैरेक एव त्रिविक्रमः । वेदेषु स-पुराणेषु गीयते पुरुषोत्तमः ॥' इति । वामने च—'न तु नारायणादीनां नाम्नामन्यत्र संभवः । अन्यनाम्नां गतिर्विष्णुरेक एव प्रकीर्तितः ॥' इति । स्कान्दे च—ऋते नारायणादीनि नामानि पुरुषोत्तमः । प्रादादन्यत्र भगवान् [2]राजेवर्तं स्वकं पुरम् ॥' इति । 'चतुर्मुखः शतानन्दो ब्रह्मणः पद्मभूरिति । उग्रो भस्मधरो नग्नः कपालीति [3]शिवस्य च । विशेषनामानि ददौ स्वकीयान्यपि केशवः ॥' इति ब्राह्मे । एवं रुद्रादिशब्दानां विष्णौ योगमुक्त्वा 'वेदेषु सपुराणेषु गीयते' इत्युक्त्या विद्वद्रूढिकथनाच्छ्रुत्यन्तरेऽपि विष्णोः प्रतिपाद्यत्वनिश्चयो बुक्तः, रूढिमात्रान्महायोग-विद्वद्रूढ्योः प्राबल्यादिति भावः ॥

प्राणभृच्च ॥ ४ ॥

प्रागुक्तहेतूनां नञश्च समाकर्षणार्थश्चकारः । जीववायू नेह ग्राह्यौ, आत्मशब्दात् मुक्तोपसृप्यत्वोक्तेः अतच्छब्दाच्चेति सूत्रार्थः ॥

नन्वात्मशब्दादिकं जीवेऽपि संभवत्येव, तस्य वस्तुतो ब्रह्माभेदादित्याशङ्क्य नेत्याह—

भेदव्यपदेशात् ॥ ५ ॥

'जुष्टं यदा पश्यत्यन्यमीशम्' इति भेदोक्तेरित्यर्थः ॥

प्रकरणात् ॥ ६ ॥

'द्वे विद्ये वेदितव्ये' इति परविद्याविषयवस्तुनोऽत्र प्रकरणादीशशब्दो विष्णुपर एवेति तस्यैव भेद उक्त इति भावः ॥

स्थित्यदनाभ्यां च ॥ ७ ॥

जीवेशयोर्भेदे हेत्वन्तरपरमिदं सूत्रम्, 'द्वौ सुपर्णौ' इति श्रुतेरिति भावः । संयुक्तौ सख्यायौ द्वौ सुपर्णरूपौ जीवेशौ देहाख्यं पिप्पलवृक्षमालिलिङ्गतुः । तयोर्मध्ये अन्यो जीवः अश्वत्थफलरूपं देहजनितकर्मफलमस्वाद्वेव स्वादुत्वेनात्ति । अन्य ईश्वरः तदनश्नन् अभितः प्रकाशत इति हि गुहाधिकरणाविरोधेन श्रुत्यर्थः । न च मिथ्याभेदानुवादित्वं श्रुतेः, अप्रामाण्या-पातात् । तस्माद्विष्णुरेव द्युभ्वाद्यायतनं न त्वन्यदिति माध्वाधिकरणशरीरम् । खण्डनं प्राग्वत् ॥

---

1. संरोधनाद्धरिः 2. राजेवैतत् 3. शिवः परः

यत्तु 'सोऽन्तकः स रुद्रः' इत्यादिवचनमुदाहृतम्, तदद्वैताभिप्रायकमेव । तथा च कैवल्योपनिषदि—'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठम्' इत्याद्युक्त्वा 'स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् । स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः' इति चोक्त्वा 'ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये' इत्युक्तम् । एवमथर्वशिरः-प्रभृतिष्वपि स्पष्टम् । यदपि विष्णौ विद्वद्रूढिः निरवधिकैश्वर्यरूपमहायोगश्चेत्युक्तम्, तच्छिवेऽपि तुल्यम् । तथा च मन्त्रवर्णः—'तव श्रिये मरुतो [1]मर्जयन्ते रुद्र यत्ते जनिम चारु चित्रम् । पदं यद्विष्णोरुपमं [2]निधायि [3]' इति । उपबृंहितं च पाराशरोपपुराणे—'रौद्रं लिङ्गं महाविष्णु-र्भक्त्या शुद्धं शिवालयम् । चारु चित्रं समभ्यर्च्य लब्धवान् परमं पदम् ॥' इति । तथा विष्णुरित्येति मन्त्रे अस्याग्नेः परमं शिवस्वरूपं ज्ञातवतो विष्णोः बृहत्त्वं तृतीयलोकपालकत्वा-द्युक्तम् । अत एव 'अस्य देवस्य' इति मन्त्रे विष्णोः पूजने सति यन्महत्त्वं लभ्यते तद्रुद्र एव जानाति यतो रुद्रीयं तदित्युक्तम् । तथा पाद्मे—'श्रुतानि सर्वशास्त्राणि पुराणान्यखिलानि च । धर्मशास्त्राणि सर्वज्ञ त्वत्तः सूत महामते । अस्माकं संशयः कश्चित्' इत्युप-क्रम्य, 'को देवः परमो ज्यायान्कथं चाराध्यते हि सः' इति पृष्टे सनत्कुमारविष्णु-संवादमुखेनोत्तरितम् । तत्रेदं विष्णुवचनम्—'एक एव शिवो ज्यायान् द्विधा च बहुधा श्रुतः । वेदेषु च पुराणेषु साङ्गोपाङ्गेषु गीयते । सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा । ज्ञानान्येतानि पञ्चैव ज्ञेयस्त्वेको महेश्वरः ॥ सर्वाकारो निराकारो महात्मा पार्वतीपतिः । तस्मात्पर-तरं नास्ति ज्ञानज्ञेयात्सदाशिवात् ॥' इति । तथा महाभारते आरण्यके—'ततो गच्छेत्सुवर्णाक्षं त्रिषु लोकेषु विश्रुतम् । यत्र विष्णुः प्रसादार्थं रुद्रमाराधयत्पुरा[4] ॥' इति । द्रोणपर्वणि—'देवदेवस्त्वचिन्त्यात्मा अजय्यो विष्णुरव्ययः । सर्वरूपं भवं ज्ञात्वा लिङ्गेऽर्चयति तं सदा । तस्मिन्नभ्यधिकां प्रीतिं करोति वृषभध्वजः ॥' इति । आनुशासनिके इन्द्रं प्रत्युपमन्युवचनम्—'यस्य ब्रह्मा च विष्णुश्च त्वं च शक्र सहामरैः । [5]अर्चयध्वे [6]सदा लिङ्गं तस्माच्छ्रेष्ठतरो हि सः ॥' इति । भागवते चतुर्थस्कन्धे षष्ठाध्याये देवान्प्रति ब्रह्मणो वचनम्—'नाहं न यज्ञो न च यूय-मन्ये ये देहभाजो मुनयश्च तत्त्वम् । विदुः प्रमाणं बलवीर्ययोर्वा [7]तस्यात्मतन्त्रस्य क उपायं विधि-त्सेत् ॥' इति । अष्टमस्कन्धे सप्तमेऽध्याये—'न ते गिरित्राखिललोकपालविरिञ्चवैकुण्ठसुरे-न्द्रगम्यम् । ज्योतिः परं यत्र रजस्तमश्च सत्त्वं न यद्ब्रह्म निरस्तभेदम् ॥' काशीखण्डे चतुर्भुजाभिषे-काध्याये स्पष्ट एव शिवोत्कर्षः । यत्तु, नवीनः सत्त्वप्रयुक्तं विष्णोराधिक्यमिति तन्न, शिवेऽपि सुवचत्वात् । उक्तं हि सूतगीतासु—'यस्य मायागतं सत्त्वं शरीरं स्यात्तमोगुणः । संहाराय

---

1. मज्जयन्त ; दुर्जयन्त 2. निधायाति 3. तेन पासि गुह्यं नाम गोनाम् 4. सुराः
5. अर्चयध्वम् 6. महालिङ्गम् 7. तस्यात्मतन्त्रस्य कलां विन्देत

दिशब्दान्व्याकरणानुगताननुगतांश्चोदाहृत्य चिन्तनीयम्—किमेते सर्वे एकस्मिन्नर्थे प्रयोक्तव्याः साधवः, किं वा व्याकरणानुगता एव साधवोऽन्ये त्वसाधवो न प्रयोक्तव्या इति। तदर्थं च किं सर्वेऽप्यविच्छिन्नपारम्पर्यप्रयोगजा उत केचिदशक्तिजा अपभ्रंशा इति। तदर्थं च किं व्याकरणं प्रमाणमप्रमाणं वेति चिन्तनीयम्। तत्सिद्ध्ये किमस्य मूलं संभवति न वेति। मूलसंभवे प्रमाणभूतव्याकरणस्मृतिशास्त्रबलीयस्त्वेन तदभियुक्तपुरुषाचारबलेन च पृथग्जनाचारबाधात् गाव्यादीनामसाधुत्वम्, निर्मूलत्वे तु तदप्रामाण्याल्लौकिकप्रयोगाविशेषात्सर्वेषां साधुत्वेन प्रयोज्यतेति। तेन व्याकरणे प्रामाण्याप्रामाण्यमेवात्र चिन्तनीयम्। तत्र—

निर्मूलत्वाद्विगीतत्वान्नैष्फल्याद्वेदबाधनात्। पूर्वापरविरोधाच्च नास्य प्रामाण्यसंभवः॥
तस्मादनेन शब्दानां प्रयोगो न नियम्यते। तेनार्थप्रत्ययात्सर्वे प्रयोज्या न व्यवस्थया॥

नियमद्वयार्थं हि व्याकरणम्; साधूनेव प्रयुञ्जीत नासाधूनित्येकः प्रयोगनियमः, गवादय एव साधवो न गाव्यादय इति साधुत्वस्वरूपनियमोऽपरः। न चैतद्वयमप्यनेन नियन्तुं शक्यते। तथा हि—न तावत्साधूनेव प्रयुञ्जीतेति नियमसंभवः। अर्थावगमाय हि शब्दोच्चारणं न धर्माय। अर्थश्च यद्यसाधुभ्योऽपि गम्यते, ततः साधुनियमोऽनर्थकः। अथ न

प्राप्तानुवादः। द्वितीयसंशयकोट्योरविच्छिन्नपारम्पर्यापभ्रंशतयोः[1] साध्वसाधुतारूपत्वात्तत्राशक्तिजा इति विशेषणं गावीगोणीगोपोतलिकेत्यादीनां साधुशब्दापभ्रंशतोपपादनाय। कश्चित् 'गामानय' इति वक्तुमुपक्रम्य तदानींतनवैयग्र्येण व्याध्यादिप्रयुक्तकरणापाटवेन वा 'गावीमानय' इत्युवाच। श्रोता 'गामानय' इति वक्तुमुद्यतस्याशक्तिजोऽयं शब्द इति निश्चित्य गामानिनाय। व्युत्पित्सुः तदृष्ट्वा गावीशब्दः सास्नावद्वाचक इति बभ्राम। तदुपज्ञं गावीशब्दपरम्परा प्रवृत्ता। एवं गोण्यादिशब्दपरम्पराऽपीति द्वितीयकोट्यर्थः। **मूलं संभवति न वेति**। मूलग्रहणं वक्ष्यमाणानामविगानादीनामुपलक्षणम्। नेति कोटौ सर्वेषां तेषां निषेधः। संशयपरम्परायाः फलफलिभावं स्वयमेव दर्शयति—**मूलसंभव इति**। **असाधुत्वमिति**; असाधुत्वे चाप्रयोज्यतेति शेषः॥

निर्मूलत्वे हेतुं प्रयोजनांशे मूलाभावपरतया योजयितुं वैयाकरणाभिमतं नियमद्वयरूपं प्रयोजनमुपन्यस्यति—**नियमद्वयार्थं हीति**। तत्र प्रथमनियमोऽर्थावगतिरूपे दृष्टफले, उत तदाश्रितनियमादृष्टे इति विकल्पं मनसि निधाय आद्य आह—**अर्थावगमाय हीति। न धर्माय**; न स्वतन्त्रापूर्वाय। **यद्यसाधुभ्य इति**। गाव्यादिशब्देभ्योऽर्थावगतिरस्ति, न वा? यद्यस्ति, तदा गवादि-

---

1. पारम्पर्यतापभ्रंशतयोः

गम्यते ततः सुतरां नियमशास्त्रानर्थक्यम्, अर्थवशादेव नियमद्वयसिद्धेः। अथ गम्यमानेऽसाधुभ्योऽप्यर्थे दृष्टार्थमपि शब्दप्रयोगमाश्रित्य धर्माय साधुनियमः शास्त्रेण क्रियत इत्युच्यते, तन्न, मूलासंभवात्। न तावदत्र प्रत्यक्षादीनां मूलत्वम्, तेषां धर्माधर्मयोरप्रवृत्तेः। न च वेदवाक्यानि गवादिशब्देषु प्रतिपदं कल्पयितुं शक्यन्ते, अनन्तवाक्यपाठासंभवात्, अपठितानां च मूलत्वानुपपत्तेः। न च शब्दमेव प्रयुञ्जीत नापशब्दमित्येकेनैवोपलक्षणेन सर्वेषामपि संग्रहः; गाव्यादीनामपि श्रोत्रग्रहणत्वेन सुशब्दत्वाद्व्यवस्थानुपपत्तेः। न चावान्तरसामान्यं गवादिष्वनुगतं गाव्यादिभ्यश्च व्यावृत्तं किंचिदस्ति, येन व्यवस्था

शब्देभ्य एवार्थावगतिरिति नियमोऽभिधेयशून्यत्वान्निष्फलः। यदि नास्ति तदा सुतरां निष्फलः, पाक्षिकसाधनान्तरप्राप्त्यभावे स्वत एवाभिमतसाधनव्यवस्थासिद्धेरित्यर्थः। द्वितीयं पक्षमाशङ्कते—अथेति। उक्तं हि पाणिनीयविवेचनार्थे महावार्तिके—'सिद्धे शब्दार्थसंबन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु' इति। शब्दार्थसंबन्धे सिद्धे नित्ये अर्थप्रतिपत्तिलक्षणप्रयोजनेनैवाक्षिप्ते शब्दप्रयोगे तमाश्रित्य शास्त्रेण धर्माय नियमः क्रियते; यथा—लौकिके क्षुत्प्रतिघातार्थत्वेन प्राप्ते भक्षणे भक्ष्याभक्ष्यनियमः; वेदे वा 'पयो व्रतं ब्राह्मणस्य' इत्यादिनियम इति तदर्थः। अतो वार्तिककारोक्तं नियमस्य धर्मार्थत्वं वैयाकरणाभिमतमित्याशयः। वार्तिककृताऽपि किंचिन्मूलमदृष्ट्वा प्रयोगनियमस्य धर्मार्थत्वमशक्यं वक्तुम्; धर्मे चातीन्द्रिये प्रत्यक्षादिकं न क्रमत इत्याह—तन्नेति। अस्तु तर्हि वेदो मूलमित्याशङ्क्य किं 'गोशब्दमेव प्रयुञ्जीत, अश्वशब्दमेव प्रयुञ्जीत' इत्येवंरूपेण व्याकरणपरिगृहीतगवादिशब्दप्रयोगे प्रत्येकं नियमविधिरूपो वेदः कल्प्यते, उत केनचिद्धर्मेण क्रोडीकृतेषु तावत्प्रयोगनियमविषय एको नियमविधिः कल्प्यत इति विकल्पं मनसि निधायाद्यं दूषयति—न च वेदवाक्यानीति। ननु मा भूत्तेषामनन्तानां पाठः। 'अनन्ता वै वेदाः' इति श्रुत्या वेदानन्त्यवद्व्याकरणस्मृतिलिङ्गेन तत्परिगृहीतपदप्रयोगनियमविध्यानन्त्यमाश्रीयतामित्याशङ्क्याह—अपठितानां चेति। व्याकरणकर्तुस्तन्मूलवेदवाक्यदर्शनं ह्यपेक्षितम्। न चापर्यवसितानन्तताबद्वाक्यदर्शनं पुरुषायुषसहस्रेणापि कस्यचित् संभवति। न च व्याकरणकर्तुरपि पूर्वपूर्वव्याकरणस्मृतिलिङ्गेन तन्मूलानन्तवेदवाक्यानुमानं संभवतीति वाच्यम्, तस्याप्रयोजकत्वात्। नानाशाखाविप्रकीर्णमूलवाक्यदर्शनेन स्मृतिप्रणयनं, न नित्यानुमेयवेदावगत्येति प्राक् समर्थितत्वादिति भावः। द्वितीयमाशङ्क्य निराकरोति—न च शब्दमेवेति। 'शब्दमेव प्रयुञ्जीत नापशब्दम्' इति नियमविधौ शब्दशब्दः साधुशब्दपरः, 'शब्ददर्दुरं करोति' इति सूत्रे तथा व्यवहारात्। अत एव तत्सूत्रविहितठक्प्रत्ययान्तस्य शाब्दिकशब्दस्य साधुशब्दान्वाख्यानं कुर्वत्येव प्रयोगः। अपशब्द इत्यत्रापोपसर्गस्त्वपेतत्ववाची, यथा वृत्तापेतवाचिन्यपवृत्तशब्दे। एवं चापभ्रंशरूपगाव्यादिशब्दवाची अपशब्दशब्द इति युक्तः 'शब्दमेव प्रयुञ्जीत नापशब्दम्' इति नियमविधिरिति भावः।

स्यात्। साधुत्वमिति चेत्, किं पुनरिदं साधुत्वं यद्गवादिष्वेव व्यवस्थितमित्युच्यते? न हीदं प्रत्यक्षादिभिरवगम्यते। वाचकत्वमिति चेत्, तद्गाव्यादिष्वप्यविशिष्टम्। तेषामपि हि प्रयोगप्रत्ययानुपपत्त्या वाचकत्वं लोके गम्यते। न ह्यवाचकानां प्रयोगः प्रत्यायकत्वं वा घटते। न च यवादीनामिव प्रियङ्ग्वादिषु गुणात्प्रयोगसंभवः, मुख्याभावात्। मुख्यपूर्वको हि गौणः। नासावत्यन्तावाचकस्य गाव्यादेरवकल्पते। एतेन लक्षणा प्रत्यूढा। तेन गाव्यादीनामवाचकत्वं लोकविरुद्धमिति न साधुरूपं शास्त्रेण नियन्तुं शक्यते। अनादित्वं साधुत्वमिति चेत्, तदपि गाव्यादिष्वविशिष्टम्, तत्रापि संबन्धुरस्मरणात्। अदृष्टसाधनत्वमिति चेत्, न, तस्य प्रत्यक्षाद्यविषयत्वात्। वेदवाक्यानां च प्रतिपदमसंभवादुपलक्षणानुप-

---

अनुगतानतिप्रसक्तसाधुत्वानिरुक्त्या दूषयति—**किं पुनरिदं साधुत्वमिति**। ननु गाव्यादिशब्दानां वाचकत्वाभावेऽपि वाचकापभ्रंशत्वेन प्रयोगप्रत्ययावुपपन्नावित्याशङ्क्याह—**न ह्यवाचकानामिति**। न खल्वार्यावर्तनिवासिभिरेव प्रयुज्यमानानां गाव्यादीनां म्लेच्छभाषाशब्दवदपभ्रंशत्वे प्रमाणमस्ति। पूर्वव्याकरणस्मृत्यपरिगृहीतत्वादपभ्रंशत्वमवसीयते इति चेत्—न; प्रयोगमूलं हि व्याकरणम्; न केवलं व्याकरणान्तरमूलम्, अन्धपरम्परापत्तेः। प्रयोगस्तु गाव्यादिष्वप्यविशिष्ट इति मूलविरोधात् गाव्यादीन्परित्यज्य गवादिशब्दान् संगृह्णत् व्याकरणमेव 'हेयमिति भावः। ननु गाव्यादीनामवाचकत्वेऽपि वृत्त्यन्तरेण प्रयोगो भविष्यति। यवबराहाधिकरणे हि शास्त्रस्थप्रयोगस्य बलीयस्त्वात् यवादिशब्दा दीर्घशूकादीनामेव वाचका इति व्युत्पादितम्। तद्वदिहापि शास्त्रप्रयुक्तो गवादिशब्द एव वाचकः; गाव्यादिशब्दस्य तु प्रियङ्ग्वादिषु यवादिशब्दवत् वृत्त्यन्तरमेवेति युक्तम्। यवादिपदानां नानार्थतायां वैदिकयवादिपदार्थग्रहणे विकल्पापत्तिदोषवत् गोगाव्यादिशब्दानामेकार्थतायां सास्नादिमद्व्यक्तिरूपार्थप्रतिपत्तौ तेषां विकल्पापत्तिदोषस्य सत्त्वेन न्यायतौल्यात्। एवं च तेनैव गतार्थत्वान्न पृथग्विचार्यताऽपीत्याशङ्क्य निराकरोति—**न च यवादीनामिवेति**। **एतेनेति**। गोणीशब्दस्यावपनवाचिनस्तत्संबन्धात् गवि लक्षणासंभवेऽपि गाव्यादिषु सा न संभवतीति भावः। अनादित्वमपि न साधुत्वम्, गाव्यादिशब्दानां गवादिषु संकेतयितुरस्मरणेन तेषामप्यनादित्वाविशेषादित्याह—**अनादित्वमिति। तस्य प्रत्यक्षाद्यविषयत्वादिति**। 'गोशब्दमेव प्रयुञ्जीत' इत्यादिर्नियमविधिश्चेन्नियम्यस्य प्रत्यक्षत्वात् तद्विषयनियमविध्यर्थोऽवगन्तुं शक्यते। 'अदृष्टसाधनमेव प्रयुञ्जीत' इति नियमविधौ अमुकशब्दोऽदृष्टसाधनमिति ज्ञात्वा तदर्थोऽवगन्तव्य इति भावः। ननु गवादिशब्दप्रयोगाणां प्रत्येकविधिभिरदृष्टसाधनत्वं प्रथमं ज्ञायतामित्याशङ्क्याह—**वेदवाक्यानां चेति**। प्रतिविषयं वेदवाक्यकल्पना न संभवति, आनन्त्यापत्तेरित्यर्थः। ननु प्रतिविषयं वेदवाक्यानि न कल्प्यन्ते; किं तु सर्वान् गवादिशब्दरूपान्विषयानेकेन धर्मेण क्रोडीकृत्य तेषामदृष्टसाधनत्वबोधकमेकमेव वाक्यं कल्प्यत इत्याशङ्क्याह—**उपलक्षणेति**।

पत्तेश्च । तत्र साधुत्वमेवोपलक्षणं, तदेव च प्रमेयमित्यात्माश्रयदोषापत्तिः । तस्मान्मूलाभावादप्रमाणं व्याकरणम् ॥

परस्परविगानाच्च । सूत्रकारो ह्यवश्यवक्तव्यं प्रयोजनमनभिदधानो निष्प्रयोजनतामेव शास्त्रस्य मन्यते ; भाष्यवार्तिककारौ तु धर्मप्रयोजनतामिति विगीतत्वम् । तयोरपि मिथो ज्ञानतत्पूर्वप्रयोगधर्मत्ववचनाद्विगीतत्वम् । निष्फलं चेदं शास्त्रम् । न ह्यनेन धर्मार्थ-

---

क्रोडीकारस्योपलक्षणान्तरस्यानुपलब्धेरित्यर्थः । न च तत्रापि साधुत्वमेवोपलक्षणं वाच्यम्, तत्र अदृष्टसाधनोद्देशेन अदृष्टसाधनत्वविधावात्माश्रयादित्यर्थः । इत्थं साधुत्वानिर्वचनप्रसाधनेनैव गवादय एव साधवो न गाव्यादय इति द्वितीयनियमोऽपि निरस्तः । गाव्यादिभ्योऽप्यर्थप्रतिपत्तिदर्शनेन तेषामपि 'साधयन्ति बोधयन्त्यर्थान्' इति व्युत्पत्त्या साधुशब्दार्हत्वात्, अनादित्वाच्च ; अदृष्टसाधनत्वस्य च गोशब्द एवादृष्टसाधनत्वमित्यत्र मानाभावेन तत्साधारण्यादित्यभिप्रेत्य निर्मूलत्वहेतुमुपसंहरति—तस्मादिति । एवं च प्राच्यत्वाद्यनिर्वचनेन होलाकाद्याचाराणामिव साधुत्वानिर्वचनेन न गवादीनां प्रयोगे व्यवस्थितिरिति समनन्तराधिकरणेनापि संगतिः सूचिता ॥

ननु प्रमाणभूतः पाणिनिराचार्यः कथं निष्फलं शास्त्रं प्रणयेत् ? अतो भाष्यवार्तिककाराभ्यां तदाशयस्थमेव धर्मप्रयोजनत्वमुक्तमित्याशङ्क्याह—तयोरपीति । भाष्ये साधुशब्दज्ञानाद्धर्म उक्तः ; वार्तिके तत्(पूर्वक)प्रयोगादिति तयोरपि विगीतत्वमित्यर्थः । ननु 'एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवति' इति श्रुत्या ज्ञानप्रयोगयोर्द्वयोरपि स्वर्गसाधनत्वोक्त्या धर्मप्रयोजनत्वमाविष्कृतम् । तत्रैकैकं प्रयोजनमेकैकस्मिन्नुक्तमिति तदन्यस्याप्युपलक्षणमस्तु । अतो न विगानमिति चेत्, उच्यते—वार्तिककृता 'ज्ञानाद्धर्म इति चेत् तथाऽधर्मः' इति वार्तिकेन साधुशब्दज्ञानात् धर्मश्चेदसाधुशब्दविविक्तस्य तस्य ज्ञानार्थमसाधुशब्दज्ञानमपि तस्य भवेदिति तस्मादधर्मोऽपि स्यादिति दूषणम्, 'प्रयोगे सर्वलोकस्य' इति वार्तिकेन प्रयोगाद्धर्मश्चेत्सर्वस्यापि तत्प्रयोगाद्धर्मः स्यादिति व्याकरणशास्त्रपाठानर्थक्यमिति दूषणं चोक्त्वा 'शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन' इति वार्त्तिकेन व्याकरणशास्त्रज्ञानमूलात् प्रयोगाद्धर्म इति स्थापितम् । भाष्यकृता तु वार्त्तिकेन दूषित एव ज्ञानपक्षः स्थापितः—'अथवा पुनरस्तु ज्ञानाद्धर्मः' इत्यादिना । वार्तिकोक्तं च दूषणमुद्धृतम्—'यच्छब्द आह तदस्माकं प्रमाणम्, शब्दश्च शब्दज्ञाने धर्ममाह, नापशब्दज्ञाने अधर्मम्' इति। एवं च 'एकः शब्दः' इत्येकेन वाक्येन साधनद्वयविध्ययोगात् ज्ञानमेव स्वर्गसाधनतया विधीयते, प्रयोगस्तदनुनिष्पादिज्ञानस्तुत्यर्थं तथात्वेनानूद्यते इति ज्ञानपक्षे श्रुतिर्व्याख्येया । प्रयोगपक्षे तु ज्ञातमात्रोऽपि साधुशब्दः स्वर्गं साधयति, किमुत प्रयुक्त इति कैमुतिकन्यायेन प्रयोगस्तुत्यर्थं ज्ञानं तथात्वेनानूद्यत इति व्याख्येयेत्यस्ति प्रयोजनांशे तन्मूलश्रुत्यर्थपरिग्रहे चासमाधेयो विरोध इत्यर्थः। यद्यप्युत्तरत्रापि बहुशो वार्तिकप्रत्याख्यानादस्ति भूयान् विरोधः, इहापि

काममोक्षाणां किंचिदप्यवाप्यते । धर्म इति चेन्न, तत्रापि पूर्वोक्तनिर्मूलत्वेनाप्रमाणत्वात् । न च रक्षोहादीनामपि प्रयोजनत्वम्, तेषामप्यन्येभ्य एव शिष्याचार्यसंबन्धलोकमीमांसादिभ्यः सिद्धिरिति वार्तिक एव प्रपञ्चितम् ॥

शास्त्रे तत्तदधिकरणविषयवाक्यन्यायकथनादिषु भाष्यवार्तिकयोर्भूयान् विरोधः सुप्रसिद्धः, तथाऽपि शास्त्रप्रयोजने विरोधोऽयं 'प्रणव एव विस्वरः' इति न्यायादोषत्वेनोपपादितः। तत्रापि पूर्वोक्तेति । न च नियमद्वयरूपप्रयोजनाभावस्य मूलाभावहेतुनैव सिद्धत्वान्निष्फलत्वहेतुर्व्यर्थ इति वाच्यम्, रक्षोहादिप्रयोजनान्तरदूषणार्थत्वेनावैयर्थ्यात्। यद्वा प्राक् मूलाभावेन नियमद्वयदूषणं प्रतिपाद्यदूषणमेव, न तु प्रयोजनदूषणम्, अशब्दार्थस्यापि तस्य तात्पर्यविषयत्वेन व्याकरणप्रतिपाद्यत्वाभ्युपगमात्। अत एव सिद्धान्ते 'द्वौ नियमौ प्रतिपाद्येते' इति वक्ष्यति। 'एकः शब्दः' इत्यादिश्रुत्याऽपि व्याकरणस्य धर्मार्थत्वं न सिध्यति, सुशब्दज्ञानस्य तत्प्रयोगस्य वा तया धर्मार्थत्वेन प्रतिपादितस्य पूर्वपूर्वप्रयोगादुपपत्तेः, व्याकरणस्यापि स्वमूलत्वेन तदपेक्षावश्यंभावात्, व्याकरणार्थप्रतिपत्तृणामपि 'सप्तम्यधिकरणे च' इत्यादिसप्तम्यर्थाद्यनुशासनपरसूत्रगतसप्तम्यादीनामर्थस्य प्रयोगप्रसिद्ध्यैवावसेयत्वादिति भावः। न च रक्षोहादीनामिति । महाभाष्ये—'कानि पुनः शब्दानुशासनस्य प्रयोजनानि ?' इति प्रश्नपूर्वकं 'रक्षोहागमलघ्वसंदेहाः प्रयोजनम्' इति व्याकरणस्य प्रयोजनान्युक्तानि । तत्र रक्षा वेदरक्षा । लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यति । तत्र लोपागमयोरुदाहरणम्—'देवा अदुह्र गन्धर्वाप्सरसो अदुह्र' इति । दुहिधातोर्लङ्यात्मनेपदप्रथमपुरुषबहुवचनान्तस्य अदुहतेति लोके रूपम् । तत्र 'लोपस्त आत्मनेपदेषु' इति छान्दसस्तलोपः, 'बहुलं छन्दसि' इति रुडागमश्च । इदं छान्दसं रूपं वैयाकरण[1] एवाध्यवस्यति, अन्यस्तु भ्राम्येत्। वर्णविकारस्योदाहरणम्—'उद्ग्राभं च निग्राभं च' इति[2]। 'ह्रग्रहोर्भश्छन्दसि' इति गृह्णातेर्हकारस्य विकारः। ऊहो यथा—'अग्नये जुष्टं निर्वपामि' इति मन्त्रस्य सौर्यचरौ चोदकप्राप्तस्य 'अग्नये' इत्यस्य स्थाने 'सूर्याय' इत्यूहनमिति। आगमः—'ब्राह्मणेन निष्कारणो [3]धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति श्रुतिः। इह प्रयोजनशब्देन प्रयोजक उच्यते, रक्षादिषु फलमिति विशेषः। निष्कारणः दृष्टप्रयोजनानपेक्षः। ब्राह्मणेन षडङ्गो वेदोऽध्येय इति यत्, अयं नित्यो धर्म इत्यर्थः। लघुशब्देन उपायलाघवमुच्यते। द्विविधो हि साधुशब्दज्ञानोपायः प्रयोगान्वेषणं, व्याकरणाध्ययनं च। तत्राद्यात् द्वितीयस्य लक्षणमुखेनानेकशब्दसंग्राहकस्य 'तस्यापत्यम्' इत्यादेर्लाघवं स्पष्टमेव। असंदेहोऽपि व्याकरणस्य प्रयोजनम्। 'स्थूलपृषतीमनड्वाहीमालभेत' इति श्रुतौ स्थूला चासौ पृषती चेति तत्पुरुषो वा, स्थूलानि पृषन्त्यस्या इति बहुव्रीहिर्वेति संदेहो व्याकरणज्ञस्य न भवति, पूर्वपदप्रकृतिस्वरेण बहुव्रीहिरिति निर्णयात्। अन्तोदात्तस्वरो हि तत्पुरुषो भवतीति। एतानि न व्याकरणस्य प्रयोजनानि, अन्यतः सिद्धिसंभवादिति वार्तिके प्रपञ्चेनोपपादितमित्यर्थः॥

---

1. व्याकरणज्ञः 2. ब्रह्म देवा अवीवृधन् 3. नित्यो धर्मः

वेदविरुद्धं चेदं व्याकरणम्। 'दृष्टं साम' इत्यधिकृत्य 'कलेर्ढक्' 'वामदेवाड्ड्यड्ड्यौ' इत्युक्तम्। वेदे च 'यदकालयत्तत्कालेयस्य कालेयत्वम्' 'ततो वसु वामं समभवत्' इत्युपन्यस्य 'वामं वा इदं देवेभ्योऽजनि तस्माद्वामदेव्यम्' इति वेदबाधादप्रा-

---

तदुपपादितार्थसङ्क्षेपोऽयम्—वैदिकपदजातविषये वेदरक्षा वेदपाठक्रमविषय इव वेदतदर्थाभिज्ञगुरुशिष्यसंप्रदायपरंपरयैव सिध्यति। न हि वेदपठनक्रमे तां विना गतिरस्ति। व्याकरणाधीना वेदरक्षेत्यङ्गीकारेऽपि व्याकरणार्थप्रतिपत्तिस्तदभिज्ञगुरुशिष्यसंप्रदायपरंपराप्राप्तेन व्याख्यानेन सिध्यति। 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्' इति महाभाष्योक्तेः। ऊहोऽपि मीमांसयैव सिध्यति। तत्र हि निर्वापमन्त्रे अग्नय इत्यस्य स्थाने चतुर्थ्यन्तसूर्यवाचिशब्द एवोहनीयः। न च सूर्यशब्द एवोहनीयो न त्वादित्यादिशब्द इत्यत्र मीमांसां विनाऽन्यत्किंचिन्नियामकमस्ति। सूर्यायेति चतुर्थ्यन्तरूपं तु पूर्वपूर्वप्रयोगादाबालं प्रसिद्धमिति न व्याकरणमपेक्षते। उदाहृतश्रुतिरूपागमो यदि व्याकरणाध्ययनप्रयोजक इष्यते तदा तर्हि (तस्य) सह वेदाध्ययनेन निष्फलत्वमेवायाति, 'निष्कारणः' इति फलानपेक्षोक्तेः। अतो वरं व्याकरणाध्ययनसाफल्यव्यवस्थापनाय... श्रुतिलिङ्गादिषडङ्गो वेदोऽध्येयः, ज्ञातव्यः स्मर्तव्य इति वा तदर्थग्रहणम्। 'इण् गतौ' इति गत्यर्थधातोर्ज्ञानार्थतोपपत्तेः, 'इक् स्मरणे' इति धात्वर्थोपपत्तेश्च। अकारप्रश्लेषं विना ध्येयो ज्ञातव्य इति वा तदर्थग्रहणं युक्तम्। अस्य निरुक्तादिषडङ्गसहितवेदाध्ययनविषयत्वेऽपि व्याकरणाध्ययनविषयत्वे न प्रमाणमस्ति, निरुक्तादीनां प्रातिशाख्येन षट्त्वसंख्यापूरणसंभवात्। व्याकरणस्य पदपदार्थप्रतीतौ लघूपायत्वमसिद्धम्। गोशब्दस्य सास्नावानर्थ इति हि प्रयोगात् सुखमवगम्यते। व्याकरणात्तु गमेर्भूवादिगणपाठम्, तस्य धातुसंज्ञाम्, तस्मात् 'डो' इत्यस्य विधानम्, तस्य प्रत्ययसंज्ञाम्, प्रत्ययस्य परत्वविधानम्, डकारस्य इत्संज्ञाम्, तस्य लोपं, गमिधातावमष्टिसंज्ञां तस्य लोपं चावगत्य गोशब्दस्तदर्थश्च क्लेशेनावगन्तव्यः। तदर्थोऽपि गमनकर्तेत्येतावन्मात्रं व्याकरणादवगन्तुं शक्यम्। सास्नावानर्थ इत्यत्र विशेषे तु प्रयोग एवोपासनीयः। 'तस्यापत्यम्' इत्यादिवचनमपत्याद्यर्थे प्रत्ययादिविधायकमध्यनेकापवादपरंपरागणपाठादिजटिलं दुर्ज्ञानमेव। स्थूलपृषतीमित्यत्र पूर्वपदप्रकृतिस्वर इत्यध्ययनसंप्रदायादेवावगन्तव्यम्, न तु व्याकरणात्। तत एव याज्ञिकाभिमततदर्थविशेषस्याप्यवगत्युपपत्तेर्न व्याकरणमपेक्ष्यते। तस्मात्तत्रावश्यापेक्षितादन्यत एव रक्षादिसिद्धेर्निष्प्रयोजनं व्याकरणमिति॥

व्याकरणमिति। तेनेत्यधिकारे 'दृष्टं साम' इति सूत्रम्। तदनुवर्तनात् 'कलेर्ढक्' इति सूत्रस्य, कलिना दृष्टं सामेत्यर्थे कलिशब्दात् ढक्प्रत्ययो भवतीत्यर्थो लभ्यते। तेन कालेयमिति सामविशेषनामसिद्धिः। तथा वामदेवेन दृष्टं सामेत्यर्थे वामदेवशब्दात् ड्यतः प्रत्ययस्य ड्यस्य च विधायकं 'वामदेवाड्ड्यड्ड्यौ' इति सूत्रम्। तेन वामदेव्यमिति सामविशेषनामसिद्धिरिति। इदं सूत्रद्वयं श्रुतिविरुद्धम्। छन्दोगब्राह्मणे हि—'आपो वा ऋत्वियमार्च्छन्। तासां वायुः पृष्ठं व्यवर्तत। ततो वसु वामं समभवत्' इत्युपक्रम्य 'इदं देवेभ्वजनि, तस्माद्वामदेव्यम्' इति च श्रुतम्।

माण्यम्। पूर्वापरविरोधाच्च। अर्थप्रयुक्तानां हि शब्दानां व्याकरणं प्रतिज्ञातम्; वाक्यमेव च तथेष्टं, न पदानि, अनर्थकत्वात्। यथोक्तम्—

ब्राह्मणार्थो यथा नास्ति कश्चिद्ब्राह्मणकम्बले। देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः॥

इति। ततश्च यथाप्रतिज्ञं वाक्यमेव व्याकरणेन संस्कर्तव्यं तदव्याकरणात्पदव्याकरणाच्च पूर्वापरविरोधः। पदद्वारा व्याकरणेन वाक्यमेव संस्क्रियत इति चेन्न, अत्यन्तमविद्यमानत्वात् वाक्ये पदानां तद्द्वारेण वाक्यस्य, विषाणद्वारेणेव शशस्य, संस्कारासंभवात्। तस्मादप्रमाणं व्याकरणं सर्वैर्भाषितव्यमिति प्राप्तेऽभिधीयते॥

'प्रयोगप्रत्ययौ तावद्वाचकत्वादृतेऽपि हि। युक्तावेकस्य चार्थस्य न्याय्या नानेकशब्दता॥

तत्र रजोधर्मप्राप्तिभिरद्भिर्वायौ संगते वामं वसु उत्तमं धनं जातम्। तद्देवेष्वजनि, सर्वदेवतासंबद्धमभवत्। तेन प्रवृत्तिनिमित्तेन वामदेव्याख्यमिदं सामेत्युक्तम्। अत एवाग्रे 'सर्वदेवत्यं वै वामदेव्यम्' इति श्रूयते। तथा 'यदकालयत्तत्कालेयस्य कालेयत्वम्' इति कालनक्रियानिमित्ता साग्नि कालेयशब्दप्रवृत्तिः श्रूयते। अतो वेदविरोधादप्रमाणं व्याकरणमित्यर्थः। पूर्वापरविरोधं विवृणोति—**अर्थप्रयुक्तानामिति**। वार्तिककृता 'सिद्धे शब्दार्थसंबन्धे' इत्यादिप्रथमवार्त्तिकेनार्थप्रयुक्तानां शब्दानां व्याकरणं प्रतिज्ञातम्। वाक्यमेव चार्थप्रयुक्तं शाब्दिकानामिष्टम्। पदान्यनर्थकान्येवेति तेषां मतमित्यर्थः। ननु सूत्रकारादिभिः पदपदार्थानामनिराकरणाद्वाक्यमेव तथेष्टम्, न पदानीति कथमुच्यत इत्याशङ्क्य शाब्दाभियुक्तसंमतिमाह—**यथोक्तमिति**। वार्तिककारैः—'अर्थेन च प्रयुक्तानां शब्दानां संस्क्रियोदिता। वाक्यमेवंविधं चेष्टं न पदान्यर्थवर्जनात्॥' इत्युक्त्वा तत्र संमतित्वेन 'ब्राह्मणार्थः' इति तदीयटीकाश्लोक उदाहृतः। यथा ब्राह्मणकम्बल इति समासपदे ब्राह्मणार्थः समुदायार्थरूपो वा बकारादिप्रत्येकवर्णार्थरूपो वा कश्चिदप्यर्थो नास्ति, समासवर्तिपदानां वर्णवदानर्थक्यस्य समर्थसूत्रभाष्यादिषूक्तत्वात्। तथैव 'देवदत्त गामानय' इत्यादिवाक्येऽपि देवदत्तादिशब्दा निरर्थका इति श्लोकार्थः। उक्तमेव वाक्ये पदानां निरर्थकत्वं स्पष्टीकर्तुं शङ्कामुद्भावयति—**पदद्वारेति**। पदसंस्कारद्वारेण तत्समुदायरूपं वाक्यं संस्क्रियत इत्यर्थः। उक्तमर्थं सदृष्टान्तं स्पष्टीकरोति—**अत्यन्तमविद्यमानत्वादिति**। पूर्वपक्षमुपसंहरति—**तस्मादिति**। व्याकरणाप्रामाण्यप्रसाधनफलमाह—**सर्वैरिति**। भाषितव्यमित्यनेन वेदेष्वसन्तोऽपि भाषायां साधवः युवामावामित्यादय इवेति दर्शितम्॥

प्रयोगेति। प्रयोगप्रत्ययौ वाचकत्वं विनाऽप्यशक्तिजन्यत्वेनोपपन्नौ, न नियमेन वाचकत्वं गमयतः। न च गोशब्दस्य गाव्यादेश्चेत्युभयोरपि वाचकत्वोपपत्तौ कस्यचिदशक्तिजत्वकल्पनं न प्रामाणिकमिति वाच्यम्। वक्ष्यमाणविकल्पदोषदुष्टतया अनेकशब्दत्वस्यान्याय्यत्वात्। न चैवं सति कस्याशक्तिजत्वं कल्प्यमित्यत्र विनिगमनाविरहः; व्याकरणस्मृतिपरिग्रहापरिग्रहरूपविनिगमक-

अभियुक्तस्मृतेश्चात्र स्याद्विशेषावधारणम् । स्मृतेः स्मृत्यन्तरं मूलं वेदस्तस्मात्प्रमाणता ॥'

गवादय एव साधवो न गाव्यादय इति साधुस्वरूपनियमः, साधव एव प्रयोज्या नासाधव इति धर्माय प्रयोगनियम इति द्वौ नियमौ व्याकरणेन प्रतिपाद्येते । द्वयोरपि च मूलसंभवाद्युपपन्नं प्रामाण्यम् । तथा हि—प्रयोगनियमे मन्वादिवत्सप्रत्ययप्रणीतत्वाद्वेदमूलत्वम् । न हि पाणिनिकात्यायनपतञ्जलिभ्योऽन्ये प्रणयितारो विद्यन्ते । तेन च तत्प्रत्ययात्स्वनुमानं वेदवचनम् । प्रत्यक्षमेव च वाजसनेयादिषु वचनम्—'तस्माद्ब्राह्मणेन न म्लेच्छितवै, म्लेच्छो ह वा एष यदपशब्दः' इत्यादि, 'आहिताग्निरपशब्दं प्रयुज्य सारस्वतीमिष्टिं निर्वपेत्' इत्यादिषु च प्रायश्चित्तविधानम् ; 'उत त्वः पश्यन्' इत्यादयश्च बहवो

सत्वात् । न च तस्या निर्मूलत्वम् ; पूर्वपूर्वव्याकरणस्मृतिरूपमूलसद्भावात् । न च अन्धपरम्परादोषः, अनादिवृद्धव्यवहारप्राप्तगवादिशब्दविषयप्रत्यक्षरूपमूलप्रमाणसद्भावादेकान्तरितप्रामाण्योपपत्तेः । साधव एव प्रयोक्तव्या इति द्वितीयनियमे व्याकरणस्मृत्यनुमितश्रुतिरूपमूलप्रमाणसद्भावाच्चेति श्लोकद्वयार्थः । तस्मात्प्रमाणतेति ॥

श्लोकनिर्दिष्टां प्रतिज्ञां नियमद्वयविषयतया विवृणोति—गवादय एवेति । नियमद्वयेऽपि मूलसंभवं विचारयितुमुपक्रमते—तथा हीति । प्रयोगनियमे यद्यपि मूलवेदो नोपलभ्यते, तथाऽपि मन्वादिवत्पाणिन्यादीनामप्याप्ततमत्वप्रसिद्धेः सुदृढत्वात्तदभिमते प्रयोगनियमे मूलश्रुतिसत्त्वमनुमीयत इत्याह—प्रयोगनियम इति । प्रयोगनियममूलभूताः प्रत्यक्षश्रुतयोऽपि सन्तीति प्रतिज्ञाय वाजसनेयके तावदुदाहरति—तस्मादिति । न म्लेच्छितवै ; नापभाषितव्यमित्यर्थः । उभयत्रापि 'कृत्यार्थे तवैकेन्केन्यत्वनः' इति सूत्रेण कृत्यसंज्ञस्य तव्यप्रत्ययस्यार्थे छान्दसस्तवैप्रत्ययः । कृत्यार्थश्चेह प्रैषः, 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' इति प्रैषेऽपि कृत्यस्मरणात् । प्रैषस्त्वप्राप्तविषयो विधिरेव पर्यवस्यतीति, तत्र नञर्थान्वयेन निषेधलाभः । अनेनार्थसाधनादपेतोऽवाचकः शब्दोऽपशब्दः, 'म्लेच्छ अव्यक्तायां वाचि' इति धात्वर्थप्रसिद्धिरप्युक्तापशब्दपरेति दर्शितं भवति । तेन गाव्यादेरप्यवाचकत्वस्य [1]वक्ष्यमाणत्वात् तस्यापि निषेधलाभः । वर्ज्यः शब्दोऽपशब्द इति नार्थः, अनुवादाय वर्जनार्थवचनान्तरान्वेषणेन तदपेक्षस्यास्य वैयर्थ्यापत्तेः । उत त्व इति । 'उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् । उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥' इति मन्त्रः । अत्र त्व इति सर्वनामपदमन्यवाचि । उतशब्दोऽप्यर्थो भिन्नक्रमः । कश्चिद्वाचं पश्यन्नपि न पश्यति, कश्चिदेनां शृण्वन्नपि न शृणोति । साधुशब्दानाभिज्ञविषयं पूर्वार्धम् । तदभिज्ञविषयमुत्तरार्धम् । उतो इति निपातसमुदायोऽप्यर्थः । त्वस्मै कस्मैचित् साध्वसाधुविवेचनकुशलाय,

---

1. वेदयमानत्वात्

इत्यमरः। भवता त्वया सह, न योत्स्यते युद्धं न करिष्यति। 'विवाहश्च विवादश्च समयोरेव शोभते' इति न्यायात् सिंहशृगालयोरिव भवतोर्युद्धं न संघटत इति भावः। योत्स्यत इति कर्तरि लृट्॥ ५०॥

व्रीडिते सुहृदि कौरवः कृपं प्राह नैवमभिधातुमर्हसि।
विष्टपत्रितयविश्रुतौजसामुद्भवो न महतां विगर्हितः॥ ५१॥

व्रीडित इति—सुहृदि कर्णे, व्रीडिते कृपवाक्यश्रवणाल्लज्जिते सति, व्रीडतेः कर्तरि क्तः। कौरवः सुयोधनः, कृपं प्राह। किमित्याह—हे कृप, एवमित्थम्, अभिधातुं वक्तुं, नार्हसि। विष्टपत्रितये भुवनत्रये, विश्रुतौजसां महतां महात्मनाम्, उद्भवो जन्म न विगर्हितः न निन्दितः॥

पूरुषः किल पुरा पुरातनः स्तम्भतः समुदपादि तादृशः।
क्रौञ्चविन्ध्यमथनाविवापरौ त्वं गुरुश्च शरकुम्भसंभवौ॥ ५२॥

कर्णोत्पत्तेरनिन्द्यत्वं द्रढयितुं महापुरुषोत्पत्तिदृष्टान्तमाह—पूरुष इति। पुरा पूर्वं, तादृशस्तथाविधः, अचिन्त्यवैभव इत्यर्थः। पुरातनश्चिरंतनः। 'सायंचिरम्' इत्यादिना ट्युः, तुडागमश्च। पूरुषो विष्णुः, स्तम्भतः स्तम्भात्, पञ्चम्यास्तसिः। समुदपादि किल उत्पन्नः किल, किलेति वार्तायाम्। 'चिण् ते पदः' इति कर्तरि चिण्। सकलजगदुपजीव्यो नरसिंहरूपी नारायणोऽपि स्तम्भादुत्पन्नः, किमुतान्ये इति भावः। किं च, अपरौ क्रौञ्चविन्ध्यमथनौ स्कन्दागस्त्याविव त्वं गुरुर्द्रोणश्च। शरः तृणविशेषः, कुम्भः कलशः, यथाक्रमं तत्र संभवो जन्म ययोस्तौ तथोक्तौ; दृश्येथे इत्यर्थः। नृसिंहकुमारागस्त्यानां गुरोर्भवतश्चोत्पत्तिर्यदि निन्दिताऽभविष्यत्, तर्हि कर्णोत्पत्तिर्निन्दिताऽभविष्यदिति भावः॥ ५२॥

ऊचिवानिति स तत्र मन्त्रविस्कर्णमासननिवेशितं स्वयम्।
शातकुम्भकलशाम्बुभिः शुभैरभ्यषिञ्चदमुमङ्गभूपतिम्॥ ५३॥

ऊचिवानिति—तत्र सभायाम्, इति एवम्, ऊचिवान् उक्तवान्। ब्रूञो लिटः क्वसुः। मन्त्रवित् मन्त्रज्ञः, 'सत्सूद्विष...' इत्यादिना किप्। स दुर्योधनः, आसने सिंहासने, निवेशितं स्थापितम्, अमुं कर्णं, शुभैः शोभनैः, शातकुम्भस्य सुवर्णस्य संबन्धी कलशः शातकुम्भकलशः, न तु शातकुम्भमयः कलशः शातकुम्भकलश इति, कुत्रापि मयटो लोपाभावात्। 'तपनीयं शातकुम्भम्' इति सुवर्णपर्यायेष्वमरः। अङ्गा देशविशेषाः। 'अङ्गं गात्रान्तिकोपायप्रतीकेष्वप्रधानके। देशभेदे तु पुंसि स्यात्' इति रत्नमालायाम्। तत्संबन्धिन्या भुवः पतिं स्वामिनं, स्वयमभ्यषिञ्चत् अभिषिक्तवान्। 'प्राक्सितादड्व्यवायेऽपि' इति षत्वम्॥ ५३॥

राज्यलाभसुखितो रवेः सुतः सख्यलाभमुदितश्च कौरवः ।
तौ परस्परमहोपकारिणौ पाण्डवान्न गणयांबभूवतुः ॥ ५४ ॥

राज्यलाभेति—रवेः सुतः कर्णः, राज्यलाभेन राज्यप्राप्त्या, सुखितः संजातसुखः, तारकादित्वादितच् । कौरवः सुयोधनः, सख्यलाभेन मैत्रीप्राप्त्या, मुदितोऽभूदिति शेषः । परस्परमन्योन्यम्, उपकारिणौ महोपकारवन्तौ, तौ सुयोधनराधेयौ पाण्डवान् न गणयांबभूवतुः तृणीचक्रतुरित्यर्थः । गणेश्चोरादिकाद्ण्प्रत्ययः ॥ ५४ ॥

इत्थमस्त्रजलराशिपारगाञ्जातु राजतनयानयाचत ।
अर्पणं हठहृतस्य संयुगे पार्षतस्य गुरुदक्षिणां गुरुः ॥ ५५ ॥

इत्थमिति—गुरुः द्रोणः, जातु कदाचित्, इत्थम् अनेन प्रकारेण, अस्त्रजलराशेः धनुर्विद्याब्धेः पारगान् पारीणान्, राजतनयान् नृपसुतान्, संयुगे युद्धे, हठेन बलात्कारेण, हृतस्य गृहीतस्य, पृषतस्यापत्यं पुमान् पार्षतो द्रुपदः, 'तस्यापत्यम्' इत्यण्। तस्यार्पणं दानमेव, गुरुदक्षिणामयाचत याचितवान् । याचेर्दुहादिपाठात् द्विकर्मकत्वम् ॥ ५५ ॥

तद्वचः शिरसि ते शिरस्त्रवत्संनिवेश्य रथिनो धनुर्भृतः ।
पांसुभिः पटहनिस्वनैश्च खं रुन्धता सह बलेन निर्ययुः ॥ ५६ ॥

तद्वच इति—धनूंषि बिभ्रतीति धनुर्भृतो धनुर्धराः, ते नृपतनयाः तस्य द्रोणस्य, वचो वचनम्, शिरः त्रायत इति शिरस्त्रम्। 'आतोऽनुपसर्गे कः'। शिरस्त्रवत् शीर्षण्यमिव 'अथ शीर्षकम्। शीर्षण्यं च शिरस्त्रं च' इत्यमरः । शिरसि मूर्ध्नि, संनिवेश्य निक्षिप्य, रथिनो रथिकाः सन्तः, पांसुभिर्धूलिभिः, 'पांसुर्ना न द्वयो रजः' इत्यमरः । पटहनिस्वनैः भेरीनादैश्च 'नादनिस्वाननिस्वनाः' इत्यमरः । खमाकाशम्, रुन्धता आवृण्वता, बलेन सैन्येन, सह निर्ययुः निर्गतवन्तः ॥

चोदितं कलशजन्मना ततः सैन्यसुग्रमरुधत्पुरं द्विषः ।
प्रेरितं परिवहेन वायुना मेघजालमिव मेरुमेखलाम् ॥ ५७ ॥

चोदितमिति—ततोऽनन्तरं कलशजन्मना द्रोणेन, चोदितं प्रेरितम्, उग्रं भयंकरम्, सैन्यं सेना, द्विषः शत्रोर्द्रुपदस्य, पुरं नगरीम्, परिवहेन परिवहाख्येन वायुना, प्रेरितं मेघजालं मेघवृन्दम्, 'जालं समूह आनाय...' इत्यमरः। मेरोर्मेखलाम्, 'काञ्चीदामन्यद्रिकटके' इति रत्नमालायाम् । अरुधत् रुरोध । रुधेर्लुङि 'इरितो वा' इत्यङ् । परिवहलक्षणं तु—परिवहो नाम स्वर्गङ्गासप्तर्षि-

मण्डलप्रवर्तकः षष्ठो वायुस्कन्धः। यथोक्तं ब्रह्माण्डपुराणे—'आवहः प्रवहश्चैव संवहश्चोद्वहस्तथा। विवहाख्यः परिवहः परावह इति क्रमात्॥ आवहो वर्तयेद्वायुर्मेघोल्कावृष्टिविद्युतः। वर्तयेत्प्रवहश्चाथ तथा मार्ताण्डमण्डलम्॥ संवहो मारुतस्कन्धस्तथा शीतांशुमण्डलम्। वर्तयेदुद्वहश्चापि तथा नक्षत्रमण्डलम्॥ पञ्चमो विवहाख्यस्तु तथैव ग्रहमण्डलम्। सप्तर्षिचक्रं स्वर्गङ्गां षष्ठः परिवहस्तथा। परावहस्तथा वायुर्वर्तयेद्ध्रुवमण्डलम्॥' इति॥ ५७॥

पौरवद्विरदबृंहितश्रवात्पार्षतस्य बलमुद्धतं पुरात्।
निर्ययौ निशमिताभ्रनिस्वनं सिंहवृन्दमिव सह्यकन्दरात्॥ ५८॥

पौरवेति—पार्षतस्य द्रुपदस्य, उद्धतं बलं सैन्यम्, पौरवाणां ये द्विरदा गजास्तेषां बृंहितानि गर्जितानि, 'बृंहितं करिगर्जितम्' इत्यमरः। तेषां श्रवात् श्रवणाद्धेतोः, पुरात् नगरात्, निशमिताभ्रनिस्वनं श्रुतघनगर्जितं, सिंहवृन्दं सिंहसंहतिः, 'स्त्रियां तु संहतिर्वृन्दम्' इत्यमरः। सह्यस्य कन्दरात् गुहाया इव निर्ययौ निर्जगाम। 'दरी तु कन्दरो वा स्त्री' इत्यमरः॥ ५८॥

सोमकैश्च[1] कुरुभिश्च निर्मितं विष्टपेषु विनुतस्य सज्जनैः।
पार्थशौर्यनिगमस्य तादृशस्तद्रणं प्रणवतामुपागमत्॥ ५९॥

सोमकैरिति—सोमकैर्द्रुपदभटैश्च, कौरवैः कुरुभिश्च, निर्मितं विहितं तद्रणं युद्धं, विष्टपेषु भुवनेषु,, 'विष्टपं भुवनं जगत्' इत्यमरः। सज्जनैर्विनुतस्य प्रशंसितस्य, तादृशस्तथाविधस्य प्रसिद्धस्येत्यर्थः। 'त्यदादिषु दृशः' इत्यत्र चकारात् किन्। पार्थस्यार्जुनस्य, शौर्यमेव निगमो वेदः तस्य, प्रणवस्य भावः प्रणवता, 'तस्य भावस्त्वतलौ' इति तल्, तां प्रणवतामोंकारत्वम् 'ओंकारप्रणवौ समौ' इत्यमरः। उपागमत् प्राप। गमेर्लुङि लदित्त्वात् च्लेरङ्॥ ५९॥

सृञ्जयास्रगनुरञ्जितां भुवं कुर्वता विशिखजालवर्षिणा।
योधयन् युधि शतं च कौरवानभ्यभावि विजयेन पार्षतः॥ ६०॥

सृञ्जयेति—युधि युद्धे विशिखजालं बाणसमूहं, वर्षतीति विशिखजालवर्षी। ताच्छील्ये णिनिः; तेन। अत एव भुवं भूमिम्, सृञ्जयानां द्रुपदस्य वर्ग्याः केचित् क्षत्रियाः तेषाम्, असृजा रक्तेन 'रुधिरेऽसृग्लोहितास्र...' इत्यमरः। अनुरञ्जितामरुणितां कुर्वता विजयेनार्जुनेन कर्त्रा 'विजयो जयपार्थयोः' इति रत्नमालायाम्। पार्षतो द्रुपदः, शतं शतसंख्याकान् कौरवान् सुयोधनादीन् योधयन् युद्धं कारयन्, तैः सह युध्यमान इत्यर्थः। अभ्यभावि अभिभूतः। कर्मणि लुङ्॥

1. पार्षतैश्च

बाणलूनधनुषं गुरुद्रुहं फल्गुनः करधृतासिरग्रहीत् ।
सृक्कलोलरसनादुरासदः शीतभानुमिव सिंहिकासुतः ॥ ६१ ॥

बाणेति—फल्गुनोऽर्जुनः, बाणेन लूनं छिन्नं बाणलूनम् । 'क्त्वादिभ्यः' इति निष्ठानत्वम् । बाणलूनं धनुर्यस्य तं तथोक्तम् । समासान्तविधेरनित्यत्वाश्रयणेन, 'धनुषश्च' इत्यनङादेशाभावः । गुरवे द्रुह्यतीति गुरुध्रुक् । 'सत्सूद्विष' इत्यादिना क्विप् । तं गुरुद्रुहं द्रोणद्वेषिणं द्रुपदम्, करधृतासिः करकलितकरवालः सन्, सृक ओष्ठप्रान्तः 'प्रान्तावोष्ठस्य सृकणी' इत्यमरः; तत्र लोला चञ्चला या रसना जिह्वा 'रसज्ञा रसना जिह्वा' इत्यमरः । तया दुरासदो दुष्प्रापः, सिंहिकासुतो राहुः शीतभानुं चन्द्रमिवाग्रहीत् जग्राह ॥ ६१ ॥

जिष्णुना परिवृतेन कौरवैरग्रतो निहितमात्मनो गुरुः ।
व्रीडनम्रशिरसं विरोधिनं वीक्ष्य किंचिदवदत्कृतस्मितः ॥ ६२ ॥

जिष्णुनेति—गुरुः द्रोणः कौरवैः परिवृतेन परिवेष्टितेन, जिष्णुना अर्जुनेन, आत्मनः स्वस्याग्रतो निहितमर्पितम्, 'दधातेर्हिः' इति हिरादेशः । व्रीडेन लज्जया नम्रशिरसं विरोधिनं द्रुपदं वीक्ष्य किंचित्कृतस्मितः कृतहासः सन् अवदत् उक्तवान् ॥ ६२ ॥

क्षत्रियप्रवर यत्त्वया पुरा विप्र इत्यवमतोऽस्मि मानिना ।
अद्य तस्य फलमीदृशं मया पश्य शिष्यनिवहेन कारितम् ॥

क्षत्रियेति—हे क्षत्रियप्रवर क्षत्रियश्रेष्ठ, विपरीतलक्षणया क्षत्रियाधमेत्यर्थः । मानिना अभिमानवता त्वया, पुरा पूर्वम्, अस्मि अहम्, अस्मीत्यहमर्थेऽव्ययम् । तथा प्रयोगोऽपि दृश्यते—'अन्यत्र यूयं कुसुमापचायं कुरुध्वमत्रास्मि करोमि सख्यः' इति । विप्रो ब्राह्मण इत्यवमतः, तिरस्कृत इति यत् । अथवा अवमतः तिरस्कृतोऽस्मि भवामीति यत् । 'धातुसंबन्धे प्रत्ययाः' इति सूत्रेण अस्मीति वर्तमानकालविहितस्य प्रत्ययस्य अवमत इति भूतकालविहितप्रत्ययानुरोधो द्रष्टव्यः । तस्य तिरस्करणस्य, अद्य इदानीम् ॥ ६३ ॥

अर्धराज्यहरणं वितन्वता सख्यमस्तु तव शाश्वतं मया ।
आसनार्धभजनेन हृष्यता गुह्यकाधिपतिनेव शूलिनः ॥ ६४ ॥

आश्वासयन्नाह—अर्धराज्येति । राज्यस्यार्धमर्धराज्यम्, 'अर्धं नपुंसकम्' इत्येकदेशिसमासः । तस्य हरणं स्वीकरणं; वितन्वता कुर्वता मया सह; 'वृद्धो यूना' इति ज्ञापकात् सह-

योगाभावेऽपि तृतीया। तवासनस्यार्धः आसनार्धः ; सिंहासनैकदेशः, 'षष्ठी' इति षष्ठीसमासः। अत्रार्धशब्दस्य समांशवाचित्वाभावेन एकदेशिसमासाभावान्न पूर्वनिपातः। तस्य भजनेन प्राप्त्या, हृष्यता संतुष्यता, गुह्यकाधिपतिना कुबेरेण ; 'यक्षराड्गुह्यकेश्वरः' इत्यमरः। अत्रापि पूर्ववत् तृतीया। शूलिनः शंभोरिव, शाश्वतं स्थिरम्, सख्यं सौहृदमस्तु ॥ ६४ ॥

इत्युदीरितगिराऽमुना ततः सत्कृतः कुरुपुराभिगामिना।
तत्कृतं परिभवं स तादृशं पार्थशौर्यमपि संस्मरन् ययौ ॥ ६५ ॥

इतीति—इत्यनेन प्रकारेण, उदीरितगिरा उक्तवचसा, कुरुपुराभिगामिना हस्तिननगरप्रापिना, अमुना द्रोणेन, सत्कृतः पूजितः, स द्रुपदः, ततोऽनन्तरं, तत्कृतं द्रोणकृतं, परिभवं तिरस्कारम्, तादृशं तथाविधं पार्थस्यार्जुनस्य शौर्यं वीर्यमपि, संस्मरन् ययौ जगाम ॥ ६५ ॥

इच्छति स्म भुवि लब्धुमोजसा ऋश्यशृङ्गसदृशस्तपस्विनः।
आत्मनो रिपुशिरश्छिदं सुतं फल्गुनप्रणयिनीं च कन्यकाम् ॥

इच्छति स्मेति—द्रुपदो भुवि भूमौ, ऋश्यशृङ्गेण विभण्डकपुत्रेण, सदृशः समस्य, तपस्विनः कस्यचिन्मुनेः, ओजसा, 'ऋत्यकः' इति प्रकृतिभावः। आत्मनः स्वस्य, रिपुः शत्रुः द्रोणः 'रिपौ वैरिसपत्नारि' इत्यमरः। तस्य शिरश्छिदं सुतम्, फल्गुनप्रणयिनीं अर्जुनप्रियां कन्यकां च लब्धुमिच्छति स्म ; पुत्रकामेष्टया प्राप्तुं चकाङ्क्ष इत्यर्थः ॥ ६६ ॥

जाह्नवीतटतपोवनास्पदं प्राप्य याजमुपयाजचोदितः।
अर्बुदेन परितोषितं गवामाततान कथितात्मकाङ्क्षितम् ॥ ६७ ॥

जाह्नवीति—द्रुपदः उपयाजो नाम कश्चिन्मुनिः, तेन चोदितः प्रेरितः सन्, जाह्नवीतटतपोवनं गङ्गातीरमुनिवनमास्पदं स्थानं यस्य तम् ; याजं याजाख्यमुपयाजभ्रातरं, प्राप्य गवां धेनूनाम्, 'माहेयी सौरभेयी गौः' इत्यमरः। अर्बुदेन परितोषितम्, कथितं आत्मनः काङ्क्षितं मनोरथो यस्य तं तथोक्तम्, आततान चकार ॥ ६७ ॥

निःस्पृहेण वशवर्तिना ततस्तेन सार्धमनुजेन तापसः।
पुत्रगर्धिनममुं यथाक्रमं राजपुंगवमसावयाजयत् ॥ ६८ ॥

निःस्पृहेणेति—निःस्पृहेण विगतस्पृहेण, वशवर्तिना वशंवदेन, अनु पश्चाज्जायत इत्यनुजः भ्राता, 'अन्येष्वपि दृश्यते' इति डप्रत्ययः। तेन उपयाजेन सार्धम्, तत्सहित इत्यर्थः।

पुत्रगर्धिनं पुत्रकाङ्क्षिणम्, असुं राजपुंगवं द्रुपदम् यथाक्रमं क्रममनतिक्रम्य, अयाजयत् याजयामास। यजतेर्हेतुमण्ण्यन्तालङ् ॥ ६८ ॥

आरचय्य सवनान्तसंभृतं स्वेन पुत्रमयमोजसा हविः ।
तत्स पाययितुमन्तिकस्थितामाजुहाव यजमानगेहिनीम् ॥ ६९ ॥

आरचय्येति—स मुनिः, सवनान्ते सुत्यावसाने, 'सुत्याऽभिषवः सवनं च' इत्यमरः। संभृतं संचितं साम्राज्यं हविः 'साम्राज्यं हविरग्नौ तु' इत्यमरः। स्वेन आत्मीयेन ओजसा तेजसा पुत्रमयं पुत्रात्मकम् आरचय्य कृत्वा, स्वार्थे मयट्। तद्धविः, पाययितुं पानं कारयितुम्, अन्तिकस्थितां समीपवर्तिनीम्, यजमानो यष्टा द्रुपदः 'पूङ्यजोः शानन्' इति शानन्प्रत्ययः। 'यष्टा च यजमानोऽपि' इत्यमरः। तस्य गेहिनीं गृहिणीं, आजुहाव आहूतवान् ॥ ६९ ॥

जातभीतिमुपसर्पणे मुनिः किं त्वयेति महिषीं रुषा वदन् ।
हव्यमाहितगुणं महातपाः संभृतार्चिषि जुहाव पावके ॥ ७० ॥

जातभीतिमिति—महत् तपो यस्य स महातपाः, 'आन्महतः समानाधिकरण जातीययोः' इति महच्छब्दस्य आकारः। मुनिर्याजः, उपसर्पणे हविःपानार्थं समीपप्राप्तौ, जातभीतिमुत्पन्नभयां महिषीं राजपत्नीम्, 'कृताभिषेका महिषी' इत्यमरः। त्वया किं साध्यम्, न किंचित् साध्यमित्यर्थः। गम्यमानसाधनक्रियापेक्षया त्वयेत्यस्य करणत्वात्तृतीया। उक्तं च न्यासोद्योते—'न केवलं श्रूयमाणैव क्रिया निमित्तं कारकभावस्य अपि तु गम्यमानाऽपि' इति। इत्येवं रुषा कोपेन, वदन् ब्रुवन्, आहितगुणमात्तगुणम्, पुत्रजननसामर्थ्यगुणवदिति यावत्। हव्यं हविः, संभृतार्चिषि समिद्धज्वाले, पावके वह्नौ, 'कृशानुः पावकोऽनलः' इत्यमरः। जुहाव अहौषीत्। जुहोतेर्लिट् ॥ ७० ॥

उद्भवन्तमुदितार्चिषस्ततो भानुमन्तमिव हेमभूभृतः ।
पङ्कजैरिव कुमारमीक्षणैर्विस्मयेन विकचैः पपौ जनः ॥ ७१ ॥

उद्भवन्तमिति—हेमभूभृतो मेरोः सकाशात्, भानुमन्तं भास्करमिव उदितार्चिषः उद्भूतज्वालात्, ततः पावकात्, उद्भवन्तमुत्पद्यमानम्, कुमारं बालम्, जनो लोकः, विस्मयेनाश्चर्येण, विकचैर्विकसितैः, 'व्याकोचविकचस्फुटाः' इत्यमरः। पङ्कजैः पद्मैरिव स्थितैः, ईक्षणैः नयनैः, पपौ आदरेणापश्यदित्यर्थः ॥ ७१ ॥

अङ्गदी मकुटवान्स कुण्डली वर्मितः स्वनितसज्यकार्मुकः।
आरुरोह रथमुल्लसन्नदन् पुत्रिणां च पृषतात्मजो धुरम् ॥ ७२ ॥

अङ्गदीति—अङ्गदी केयूरवान्, 'अत इनि' इति इनिप्रत्ययः। 'केयूरमङ्गदं तुल्यम्' इत्यमरः। मकुटवान् किरीटवान्, वर्मितः संनद्धवर्मभृदित्यर्थः। वर्मशब्दात् 'सत्यापपाश' इत्यादिना ण्यन्तात् कर्तरि क्तः। 'संनद्धो वर्मितः सज्ज इत्यमरः। कुण्डली कर्णाभरणवान्, 'कुण्डलं कर्णवेष्टनम्' इत्यमरः। स्वनितसज्यकार्मुकः स्वनितं सज्यं समौर्वीकं चापं यस्य स कुमारः, उल्लसन् प्रकाशमानो, नदन् सिंहनादं कुर्वन्, रथं स्यन्दनमारुरोह आरूढवान्; 'शताङ्गः स्यन्दनो रथः' इत्यमरः। पृषतात्मजो द्रुपदश्च, पुत्रिणां पुत्रवतां, धुरमग्रमारुरोह। 'धूर्ना धूमे स्त्री तु कम्पे वित्ते फाले युगाग्रयोः' इति रत्नमालायाम् ॥ ७२ ॥

शङ्खतूर्यतुमुलस्वनैरयं पूर्यमाणगगनं ससोमकः।
पर्यवर्तत पुरं ध्वजाकुलं तत्प्रवृत्तिरपि विष्टपत्रयम् ॥ ७३ ॥

शङ्खेति—ससोमकः द्रुपदवंश्यसहितः, अयं कुमारः, शङ्खाः कम्बवः, तूर्याणि वाद्यानि च, तेषां तुमुलैः संकुलैः स्वनैर्ध्वनिभिः पूर्यमाणं व्याप्यमानं गगनमाकाशं यस्य तत्तथोक्तम्। ध्वजैः केतुभिः, आकुलमाकीर्णम् 'केतनं ध्वजमस्त्रियाम्' इत्यमरः। पुरं नगरं पर्यवर्तत बभ्राम। तस्य कुमारस्य, प्रवृत्तिरुत्पत्तिरूपा वार्ताऽपि; 'वार्ता प्रवृत्तिर्वृत्तान्तः' इत्यमरः। विष्टपत्रयं भुवनत्रयं पर्यवर्तत ॥ ७३ ॥

तेन याजमुनिना हुतं पुनः प्राप्य हव्यमभिजातमुच्छिखात्।
शुष्मणः समुदगामि[1] कन्यया रक्तपङ्कजवनादिव श्रिया ॥ ७४ ॥

तेनेति—तेन याजमुनिना, पुनर्भूयः, हुतं वषट्कृतम्, 'हुतं त्रिषु वषट्कृतम्' इत्यमरः। अभिजातं श्रेष्ठं, हव्यं हविः, 'हव्यकव्ये दैवपित्र्ये' इत्यमरः। प्राप्य लब्ध्वा, उच्छिखात् उद्गतज्वालात्, शुष्मणः कृष्णवर्त्मनः सकाशात्, 'बर्हिः शुष्मा कृष्णवर्त्मा' इत्यमरः। कन्यया कुमार्या कर्त्र्या रक्तपङ्कजवनात् रक्तोत्पलकाननात्, श्रिया लक्ष्म्येव 'शोभासंपत्तिपद्माम्बु लक्ष्मीः श्रीरपि गद्यते' इति शाश्वतः। उदगामि उद्गतम्। भावे लुङ्। अग्निकुण्डात् समुद्भूतेति महाभारते ॥ ७४ ॥

कल्पितार्जुनविकासयाऽनया प्रावृषेव नवपद्मकाननम्।

---

1. समुदपादि

क्षत्रमुद्धतमुपैष्यति क्षयं कृष्णयेति दिवि वागजृम्भत ॥ ७५ ॥

कल्पितेति—कल्पितः संपादितः अर्जुनस्य पार्थस्य विकासो हर्षः यया तया । अन्यत्र कल्पितः कृतः अर्जुनानां ककुभकुसुमानां विकासो विकसनं यया तया। 'पार्थेऽर्जुनः केकिनि कार्तवीर्ये' 'इन्द्रद्रुः ककुभोऽर्जुनः' इत्युभयत्रापि रत्नमालामरसिंहौ । अनया कृष्णया द्रौपद्या, कन्यया शोक इतिवत् हेतौ तृतीया । 'द्रव्ये त्रिषु द्रुपदजा तटिनी कणा च कृष्णा' इति रत्नमालायाम् । उद्धतं दृप्तं, क्षत्रं क्षत्रियजातिः । क्षत्रशब्दो वर्णविशेषवचनो नपुंसकलिङ्गः । तथा च त्रिकाण्डशेषः—'मूर्धाभिषिक्तमूर्धावसिक्तौ क्षत्रं नपुंसकम्' इति । 'क्षत्राणि राज्ञः परिभूय रामात् क्षत्राद्यथाऽभज्यत स द्विजेन्द्रः' इति नैषधकाव्ये द्वाविंशे सर्गे प्रयोगः । प्रवर्षतीति प्रावृट्, क्विप् । 'नहिवृतिवृषि' इत्यादिना पूर्वपदस्य दीर्घः । तया प्रावृषा वर्षाभिर्नवपद्मकाननमिव क्षयं नाशमुपैष्यति प्राप्स्यति इत्यनेन प्रकारेण, दिवि आकाशे, वागदृश्यरूपा वाणी अजृम्भत प्रचकाशे, उदभूदित्यर्थः ॥

जातयोः सपदि जातवेदसः पुत्रयोरधिगमेन पार्षतः ।
फल्गुनान्मुदममंस्त भाविनीं द्रोणतश्च विजहौ महद्भयम् ॥ ७६ ॥

जातयोरिति—पार्षतो द्रुपदः, जातवेदसः पावकात्, 'जातवेदास्तनूनपात्' इत्यमरः । जातयोरुत्पन्नयोः, पुत्रश्च दुहिता च पुत्रौ 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' इति पुत्रशब्दशेषः । 'पुत्रौ पुत्रश्च दुहिता च' इत्यमरः । तयोरधिगमेन प्राप्त्या फल्गुनादर्जुनान्मुदं प्रीतिं सपदि सद्य एव भाविनीं भविष्यन्तीममंस्त मेने । पार्थप्रिया दुहिता जातेति मुमुद इत्यर्थः । मन्यतेरनुदात्तेश्चेवादिट्प्रतिषेधः । द्रोणतः द्रोणात्; 'भीत्रार्थानाम्' इति पञ्चमी ; ततस्त्रासिः । महत् अधिकं भयं च विजहौ । द्रोणान्तकः पुत्रो मम जात इति भयं तत्याजेत्यर्थः ॥ ७६ ॥

आत्मशत्रुमपि शिष्यतां गतं सोमकेन्द्रतनयं महायशाः[1] ।
आततान गुरुरस्त्रपारगं जीवितादपि यशः सतां प्रियम् ॥ ७७ ॥

आत्मशत्रुमिति—महायशाः महाकीर्तिः; महाशयः इति यदा पाठः, तदा महात्मेत्यर्थः । गुरुः द्रोणः, आत्मनः शत्रुमपि, शासितुं योग्यः शिष्यः 'एतिस्तुशास्वृदृजुषः क्यप्' 'इति क्यप् । 'शास इदङ्हलोः' इति इत्वम् । 'शासिवसिघसीनां च' इति षत्वम् । तस्य भावस्तत्ता । तां शिष्यतामन्तेवासित्वं गतं प्राप्तं सोमकेन्द्रतनयं द्रुपदपुत्रम्, अस्त्रपारगमस्त्रपारीणमाततान चकार । कथमयमात्मशत्रुमध्यापितवानित्यत आह—सतां महात्मनां, जीवितादपि यशः कीर्तिरेव,

1. महाशयः

'यशः कीर्तिः समाख्या च' इत्यमरः। प्रियमिष्टं भवतीति शेषः। 'इगुपधज्ञाप्रीकिरः कः' इति कप्रत्ययः। महान्तः स्वदेहत्यागेनापि यशः संपादयन्तीति भावः॥ ७७॥

यौवराज्यविहिताभिषेचनं कौरवक्षितिपतिर्युधिष्ठिरम्।
स्निग्धवर्णमधिकं सुदर्शनं चक्षुरागतममन्यतात्मनः॥ ७८॥

यौवराज्येति—कौरवक्षितिपतिः धृतराष्ट्रः, यौवराज्ये युवराजकर्मणि, विहिताभिषेचनं कृताभिषेकम्, स्निग्धा अनुरक्ताः वर्णाः ब्राह्मणादयो यस्य सः तम्, अधिकमत्यर्थं सुदर्शनं शोभनदर्शनं युधिष्ठिरमागतं प्राप्तं स्निग्धवर्णं मसृणशोभं सुदर्शनं शोभनदर्शनम्, आत्मनश्चक्षुः नयनं जातावेकवचनमविवक्षितम। युधिष्ठिर एव मम चक्षुर्द्वयमित्यमंस्तेत्यर्थः। मन्यतेर्दैवादिकाद्गङ्॥ ७८॥

ऋद्धिमस्य गुणशालिनोऽन्वहं नासहिष्ट धृतराष्ट्रनन्दनः।
ज्ञातिमुच्छ्रयिणमाह दुर्हृदामाशुशुक्षणिमनिन्धनं जनः॥ ७९॥

ऋद्धिमिति—धृतराष्ट्रनन्दनः सुयोधनः, अन्वहं प्रतिदिनं, गुणैरौदार्यादिभिः शालते शोभत इति गुणशाली तस्य गुणशालिनः, अस्य युधिष्ठिरस्य, ऋद्धिं संपदम्, नासहिष्ट न सोढवान्। सहेर्लुङि 'तीषसह' इतीट्। तथा हि, जनो लोकः उच्छ्रयिणं ऐश्वर्यातिशयवन्तम्। 'एकाक्षरात् क्तो जातेः सप्तम्यां च न तौ स्मृतौ' इति निषेधस्य 'क्वचिदिष्यतेऽपि' इति भाष्यकारवचनेन प्रापितत्वावगमात् उच्छ्रयशब्दादिनिप्रत्ययः। ज्ञातिं दायादम्, दुष्टं हृदयं येषां ते दुर्हृदः; 'सुहृद्दुर्हृदौ मित्रामित्रयोः' इति निपातनात् साधुः। तेषां दुर्हृदामभित्राणां ज्ञातीनाम्, अनिन्धनम्, इध्यतेऽनेनेति इन्धनं काष्ठम्, न विद्यते इन्धनं यस्य तमाशुशुक्षणिमग्निमाह ब्रूते। 'ज्ञातिश्चेदनलेन किम्' इति न्यायादिति भावः॥ ७९॥

दुर्मनाः पितरमब्रवीन्मिथस्तात संप्रति जनो युधिष्ठिरम्।
श्लाघते मधुरवाङ्नवोदयं चैत्रमासमिव कोकिलव्रजः॥ ८०॥

दुर्मना इति—दुर्मनाः दुर्बुद्धिः सुयोधनः, मिथो रहसि, पितरं धृतराष्ट्रमब्रवीत्। किमित्याह—हे तात हे पितः, 'तातोऽनुकम्प्ये पितरि' इति रत्नमालायाम्। संप्रतीदानीम्, मधुरवाक् मनोहरवचनो जनः, नवोदयं नूतनाभ्युदयं युधिष्ठिरम्, मधुरवाक् कोकिलव्रजः पिकसमूहः 'गोष्ठाध्वनिवहा व्रजाः' इत्यमरः। नव उदय आविर्भावो यस्य तं चैत्रमासं मधुमासमिव, श्लाघते प्रशंसति। 'श्लाघृ कत्थने' इत्यस्माल्लट्। अत्र युधिष्ठिरस्यानीप्स्यमानत्वात् 'श्लाघह्नुङ्' इत्यादिना न संप्रदानसंज्ञा॥ ८०॥

कौरवं यदि भजेदयं पदं सर्व एव नियतं हता वयम् ।
तन्न संस्पृशति नो यथा विपन्नीतिमाशु कुरुतात्तथा भवान् ॥

कौरवमिति—अयं युधिष्ठिरः, कौरवं कुरुसंबन्धि । 'तस्येदम्' इत्यण् । पदं स्थानम्, राज्यमित्यर्थः ; 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । भजेद्यदि प्राप्नुयाच्चेत्, तर्हि सर्वे समस्ता एव वयं, नियतं निश्चयं यथा भवति तथा, हता नष्टाः, ; तत्तस्मात्कारणात् विपत आपत्, 'विपत्त्यां विपदापदौ' इत्यमरः । नोऽस्मान् यथा येन प्रकारेण न संस्पृशति न प्राप्नोति, तथा तेन प्रकारेण, भवान् नीतिमुपायम्, आशु कुरुतात्, त्वं शीघ्रं कुर्वित्यर्थः । 'शेषे प्रथमः' इति प्रथमपुरुषः । भवच्छब्दस्य युष्मदस्मद्व्यतिरेकेण शेषत्वादिति ॥ ८१ ॥

प्रत्युवाच सुतमम्बिकासुतस्तात नैवमभिधातुमर्हसि ।
एष पाण्डुरिव तत्सुतो गुणी दृश्यते मयि दृढं हि भक्तिमान् ॥

प्रत्युवाचेति—अम्बिकासुतो धृतराष्ट्रः, सुतं प्रत्युवाच प्रत्यवोचत् । किमित्याह—पुत्रोपलालनार्थं तातेति संबुद्धिः । हे तात, एवमभिधातुं वक्तुम्, नार्हसि । कुत इत्यत आह—हि यस्मात्कारणात्, पाण्डुरिव गुणी गुणवान्, एष तत्सुतः पाण्डुसूनुर्मयि दृढं यथा भवति तथा, भक्तिमान् अनुरागवान्, दृश्यते । तस्मात्पाण्डुरिव तत्सुतोऽपि ममात्यन्तं प्रिय इति भावः ॥

स्निग्धबन्धुरयमाहृतप्रजः क्षेप्तुमद्य भवता न शक्यते ।
भेदबुद्धिमवधूय दुर्मते पाण्डुसूनुषु भजस्व साधुताम् ॥ ८३ ॥

स्निग्धबन्धुरिति—स्निग्धा अनुरक्ता बन्धवो मित्राणि यस्मिन् स तथोक्तः, वश्यबन्धुरित्यर्थः । आहृताः अर्चिताः प्रजाः येन सः, वशीकृतजन इत्यर्थः । 'प्रजा स्यात्संततौ जने' इत्यमरः । अयं युधिष्ठिरः, अद्येदानीं, भवता क्षेप्तुं निरसितुं, न शक्यते । क्षेप्तुमित्यस्याप्यर्थो युधिष्ठिर एव कर्म । तथा व्याख्यातम्—'वाच्यायां एव क्रियायाः प्राधान्यात् द्वितीयाविभक्तिर्न भवति' इति । शक्यते शक्नोतेः कर्मणि लट् । यथाऽऽह हरदत्तः—'यद्यपि शक्तिः केवलोऽकर्मकः, तथाऽपि तुमुनन्तवाच्यक्रियाविशेषणत्वेन सकर्मकोऽपि भवति । तथा च कर्मणि लादयो दृश्यन्ते—'अयं योगः शक्योऽकर्तुम्' इति । हे दुर्मते हे दुर्बुद्धे, भेदबुद्धिमवधूय विमुच्य पाण्डुसूनुषु पाण्डुसुतेषु, 'आत्मजस्तनयः सूनुः' इत्यमरः । साधुतां भजस्व प्राप्नुहि ॥ ८३ ॥

तं स चाह सरिदात्मजो गुरुस्तत्सुतः स च तदीयमातुलः ।
स्निग्धभावमकृतघ्नवृत्तयः कल्पयन्ति मयि कर्णबान्धवे ॥ ८४ ॥

तमिति—स च सुयोधनः, तं पितरमाह उवाच। आत्मनः सहायसंपत्तिं कथयति—सरिदिति। सरिदात्मजो भीष्मः, गुरुर्द्रोणः, तत्सुतोऽश्वत्थामा स च, तदीयः अश्वत्थामसंबन्धी मातुलः मातुर्भ्राता कृपश्च, 'पितृव्यमातुल' इति निपातनात् मातुलशब्दः साधुः। 'मातुर्भ्राता तु मातुलः' इत्यमरः। कृतमुपकारं घ्नन्तीति कृतघ्नाः, 'अमनुष्यकर्तृकेऽपि' इति कौमारसूत्रे अपि-शब्दात् कृतघ्नशत्रुघ्नादयः टक्प्रत्ययान्ताः सिद्धा इति दुर्गासिंहः। पाणिनीयेऽपि 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणात् यथेष्टसिद्धिः। तेषां कृतघ्नानां वृत्तिरिव वृत्तिर्येषां ते कृतघ्नवृत्तयः, ते न भवन्ती-त्यकृतघ्नवृत्तयः, किं तु कृतज्ञाः सन्त इत्यर्थः। बन्धुरेव बान्धवः प्रज्ञादित्वात् स्वार्थेऽण्। कर्णः बान्धवो यस्य तस्मिन् मयि स्निग्धभावं वत्सलत्वम्, 'श्रीमान् स्निग्धस्तु वत्सलः' इत्यमरः। कल्पयन्ति कुर्वन्ति। युधिष्ठिरादपि ममैव समृद्धिरस्तीति भावः॥ ८४॥

तत्सहायरहितः पृथासुतः कर्तुमस्मदभिषङ्गमक्षमः।
शासनेन तव वारणावते सानुजो यदि वसेद्भिदा कुतः॥ ८५॥

तदिति—तत् तस्मात्कारणात्, सहायरहितः सहायहीनः, पृथासुतो युधिष्ठिरः अस्माक-मभिषङ्गं तिरस्कारम्, 'देशकोशतिरस्कारेष्वभिषङ्गः' इति रत्नमालायाम्। कर्तुमक्षमः अशक्तः, बृहत्सहायं मामभिभवितुं न शक्नोतीत्यर्थः। भेदाभावे उपायं कथयति—शासनेनेति। तव शासनेना-ज्ञया, सानुजः सन्, वारणावते वारणावताख्ये पुरे, यदि वसेत् तिष्ठेच्चेत्, तर्हि भिदा भेदः कुतः, नास्त्येवेत्यर्थः। 'षिद्भिदादिभ्योऽङ्' इति स्त्रियामङ्प्रत्ययः॥ ८५॥

वासमत्र नगरे करोति चेत्संगतो भवदुपाश्रयैर्जनैः।
रूढमूल इव पादपो महानुद्धृतेरविषयो भविष्यति॥ ८६॥

युधिष्ठिरोऽप्यत्रैव तिष्ठतु, भवतः का हानिरित्यत आह—वासमिति। युधिष्ठिरः अत्र नगरे हास्तिनपुरे, वासं स्थितिं, करोति चेत् तर्हि, भवदुपाश्रयैः भवानुपाश्रयो येषां तैः त्वदाश्रितै-रित्यर्थः। जनैः संगतः संबद्ध एव रूढं मूलं मूलबलं यस्य स तथोक्तः सन् रूढानि प्रवृद्धानि मूलानि शिफा यस्य स तथोक्तः। 'मूलमादौ शिफायां च' इत्यमरः। महान् पादपो द्रुम इव उद्धृतेरुच्छेदनस्य उत्पाटनस्य च अविषयः अगोचरो भविष्यति। तस्माद्वारणावत एव तस्य वासो-ऽस्त्विति भावः॥ ८६॥

ईदृशेन वचसा दुरात्मनः [1]क्षोभितं कथमपि क्षमापतेः।
[2]स्वच्छतां रहयति स्म मानसं हास्तिनेव लुलितं ह्रदोदकम्॥

---

1. क्षोभमाप हृदयं क्षमापतेः 2. स्वच्छतां न भजति स्म मानसं ; स्वच्छतामुपगतं स्वतो बकात्

ईदृशेनेति— दुरात्मनो दुर्योधनस्य, ईदृशेन ईदृग्विधेन, 'त्यदादिषु दृशः' इति कञ्। 'इदंकिमोरीश्की' इति इदम ईशादेशः। वचसा भाषितेन, 'भाषितं वचनं वचः' इत्यमरः। क्षोभितं कलुषितं, क्षमापतेः धृतराष्ट्रस्य, मानसं मनः कर्तृ, हस्तिना गजेन, लुलितं क्षुभितं ह्रदोदकमिव, कथमपि महता प्रयासेन, स्वच्छतां नैर्मल्यं, रहयति स्म तत्याज। 'रह त्यागे' इत्यस्मात् स्वार्थे ण्यन्तात्लङ्। 'लट् स्मे' इति भूतार्थता॥ ८७॥

जातु धर्मजमुवाच भूपतिर्वत्स पुण्यशतलभ्यदर्शनः[1]।
वारणावतमवाप्य वीक्ष्यतां श्लाघितो जगति शंकरोत्सवः॥ ८८॥

जात्विति—जातु कदाचित्, 'कदाचिज्जातु सार्धं तु' इत्यमरः। भूपतिः धृतराष्ट्रः, धर्मजं युधिष्ठिरमुवाच। किमित्याह—हे वत्स हे पुत्रक, 'वत्सौ तरुणपुत्रकौ' इति रत्नमालायाम्। पुण्यशतैः सुकृतशतैः, 'स्याद्धर्ममास्त्रियां पुण्य...' इत्यमरः। लभ्यं प्राप्यम्, 'पोरदुपधात्' इति यत्; दर्शनं यस्य स तथोक्तः। जगति लोके 'विष्टपं भुवनं जगत्' इत्यमरः। श्लाघितः प्रशंसितः, शं सुखं करोतीति शंकरः। 'शमिधातोः संज्ञायाम्' इत्यच्प्रत्ययः। तस्य शंकरस्य चन्द्रशेखरस्य, उत्सवः कर्मभूतः, 'मह उद्धव उत्सवः' इत्यमरः। वारणावतमवाप्य गत्वा वीक्ष्यतां दृश्यताम्; त्वयेति शेषः। ईक्षतेः कर्मणि लोट्॥ ८८॥

वस्तुमस्ति यदि तत्र ते रुचिः कारिते महति मन्दिरे वसन्।
शाधि दक्षिणभुजेन सानुजो वारिराशिरशनां वसुंधराम्॥ ८९॥

वस्तुमिति—हे वत्स, ते तव, तत्र वारणावते, वस्तुं स्थातुं, 'वसिश्च सान्तेषु' इति वचनात् वसतेस्तुमुन इडभावः। रुचिः स्पृहा, अस्ति यदि विद्यते चेत्, 'अभिषङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियाम्' इत्यमरः। तर्हि कारिते मया शिल्पिभिर्निर्मापिते, महति विशाले, मन्दिरे गृहे, वसन् तिष्ठन्, सानुजः सभ्रातृकः सन्, वारिराशिरेव रशना मेखला यस्याः सा तथोक्ता। 'स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा' इत्यमरः। वसूनि रत्नानि धारयतीति वसुंधरा रत्नगर्भा, 'संज्ञायां भृतृवृजिधारिसहितपिदमः' इति खच्। 'अरुर्द्विषत्' इत्यादिना मुम्। तां दक्षिणभुजेन शाधि पालय; शासेर्लोटि 'शा हौ' इति शादेशः। 'असिद्धवदत्राभात्' इति शादेशस्यासिद्धत्वात् 'हुझल्भ्यो हेर्धिः' इति धिरादेशः॥ ८९॥

इति पितुरुपलभ्य शासनं विदिततदाशयविक्रियो विभुः।

---

1. दर्शनम्।

उदचलदभि वारणावतं सममनुजैः प्रथमो मनस्विनाम् ॥ ९० ॥

इति अगस्त्यपण्डितकृतौ बालभारते महाकाव्ये
आदिपर्वणि तृतीयः सर्गः ॥

इतीति—मनस्विनां स्थिरचित्तानाम्, धैर्यवतामित्यर्थः। 'अस्मायामेधास्रजो विनिः' इति विनिप्रत्ययः। प्रथमः आद्यः, विभुः प्रभुः स युधिष्ठिरः, इति पूर्वोक्तम्, पितुः धृतराष्ट्रस्य, शासनं निदेशं, 'निदेशः शासनं च' इत्यमरः। उपलभ्य प्राप्य, विदिता ज्ञाता तस्य धृतराष्ट्रस्य आशयविक्रिया अभिप्रायविकृतिः येन स तथोक्तः सन् 'भावोऽभिप्राय आशयः' इत्यमरः। अनुजैः समं भ्रातृभिः सह अभि वारणावतं वारणावतं लक्षीकृत्य, 'अभिरभागे' इति कर्मप्रवचनीये तद्योगे द्वितीया। अथवा आभिमुख्येऽव्ययीभावः। उदचलत् उच्चाल। धृतराष्ट्रः शंकरोत्सवव्याजेन मां वारणावतं प्रेषयतीति जानन्नेव युधिष्ठिरो जगामेत्यर्थः। 'चल गतौ' इत्यस्माद्धातोर्लङ्। वैतालीयं वृत्तम्। 'षड्विषमेष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः। न समाऽत्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः॥' इति लक्षणात्॥ ९० ॥

इति श्रीमद्राजाधिराजराजपरमेश्वरकर्णाटेश्वरश्रीकृष्णरायशिरःप्रधानसकलागमपारावारपारीण
श्रीसाल्वतिम्मयदण्डनाथविरचितायां मनोहराख्यायां बालभारतव्याख्यायां
तृतीयः सर्गः ॥



SRIRANGAM SRI SANKARA GURUKULA SERIES.

No. 1.	**पञ्चरत्नकारिका:** A poetic commentary on the Upadesa Panchakam of Sri Sankara Bhagavatpadacharya by Sri Sadasiva ; with a *Prastavana* by Sri Sacchidananda Tirtha Swamigal.	0	12	0
No. 2.	**नयमञ्जरी** A poetic commentary on the Brahma Sutras, by Sri Appayya Dikshita. With a Sanskrit Introduction by Sri Sacchidananda Tirtha Swamigal.	2	0	0
No. 4.	**बालभारतम्** of Agastya Pandita with the Commentary *Manohara* of Salva Timmaya Dandanatha. Part I. Cantos 1–3	2	0	0
No. 5.	**कुमारसंभवचम्पू:** by Sri Sarabhoji Maharaja of Tanjore; with an Introduction by Vidyasagara Vidyavacaspti P. P. Subrahmanya Sastri, B. A. (Oxon), M. A., Professor of Sanskrit, Presidency College, Madras.	1	0	0
No. 6.	**डमरुकम्** A Sanskrit Farce by Pandit Ghanasyama with the Commentary of Chandrasekhara; Edited by Vidyasagara Vidyavacaspati P. P. Subrahmanya Sastri, B. A. (Oxon), M. A. Curator, Govt. Oriental Mss. Library, and Professor of Sanskrit, Presidency College, Madras.	0	8	0
No. 7.	**शृङ्गारप्रकाश:** by Maharajadhiraja Sri Bhoja Deva. Part I, Prakasas 1 & 2	1	8	0
No. 8.	**मनीषापञ्चकम्** of Sri Sankara Bhagavatpadacharya with a Summary of the Commentary of Sri Sadasiva Brahmendra and a Foreword by Rao Saheb N. Natesa Iyer B.A., B.L., President, All-India Varnasrama Swarajya Sangha, Madura. Edited by Gurubhaktasikhamani T. K. Balasubrahmanya Iyer.	0	6	0
No. 9.	**स्तोत्ररत्नमाला** Part I, Contains rare stotras by different ancient authors.	1	8	0

IN THE PRESS.

No. 3. **शास्त्रदीपिका** of Parthasarathi Misra with the commentary *Mayukhavali* of Sri Appayya Dikshita.

No. 10. **जीवन्मुक्तिकल्याणनाटकम्** by Nalla Dikshitar.

No. 11. **मद्रकन्यापरिणयचम्पू:** by Gangadhara Kavi.

No. 12. **तत्त्वकौस्तुभ:** by Bhattoji Dikshita.

No. 13. **सौन्दर्यलहरी** with the commentaries of **लक्ष्मीधरा, सौभाग्यवर्धनी** and **अरुणामोदिनी**

The above Five books are being published serially in the ***Sri Sankara-gurukula Patrika:*** Annual Subscription Rs. 6 only.

Apply to THE LIBRARIAN,
Sri Sankaragurukulam, Srirangam.

रजतद्रवलहरीभिः कलयञ्जगदण्डगह्वरं निखिलम् ।
क्षालितमिव मुनितिलकस्तानवमहसा महीयसा विश्वम् ॥ २७ ॥

दहरावकाशनगरीविहरल्लक्ष्मीधवानुसन्धानात् ।
सामिनिमीलितनयनः सान्द्रतरानन्दतुन्दिलः परवान् ॥ २८ ॥

यशसा महतीं महतीं सुन्दरकुरुविन्ददन्तशोभाढ्याम् ।
कलभाषिणीं करेऽसौ कलयन्कल्याणरूपिणीं प्रायात् ॥ २९ ॥

रत्नसुकञ्चुकविलसन्निस्तुलतुम्बीफलस्तनां शस्ताम् ।
अङ्कतललालनीयां कुङ्कुमपङ्काङ्कशोभिनिजकायाम् ॥ ३० ॥

रजतेति । मुनितिलकः मुनिश्रेष्ठः महीयसा अधिकेन तानवमहसा कायकान्त्या निखिलं जगदण्डस्य गह्वरं-बिलम् ; रजतद्रवाणां विलापितरूप्यरसानां लहरीभिः पूरैः क्षालितमिव कलयन् धवलीकुर्वन्निव्यर्थः ; अभ्यागात् ॥ २७ ॥

दहरेति । दहरावकाश एव हृदयगोलकगतसूक्ष्माकाशः स नगरी तत्र विहरतः लक्ष्मीधवस्यानुसन्धानात् सान्द्रतरानन्देन तुन्दिलः अत एव परवान्परवशः ; अतः सामिनिमीलितेऽर्धमुकुलिते नयने यस्य तथोक्तः सन् अभ्यागादिति ; 'सामि त्वर्धे जुगुप्सने' इत्यमरः ॥ २८ ॥

यशसेति । असौ नारदः यशसा महतीं प्रसिद्धामित्यर्थः ; विशेषणमहिम्ना अप्रकृतकामिनीं च प्रतीयते । कुरुविन्दानां पुष्यरागाणां, दन्तस्य गजदन्तस्य च शोभया आढ्याम् ; मणिभिर्दन्तेन चालंकृतामित्यर्थः ; अन्यत्र कुरुविन्दसदृशदशनोपेताम् ; 'कुरुविन्दः पुष्यरागे' इति सारे । कलभाषिणीं मधुरस्वनाम् ; अतः कल्याणरूपिणीं मङ्गलाकारां महतीं महतीनामकवीणां करतले कलयन् प्रायात्; 'महती नारदस्य स्यात्तरस्वत्यास्तु कच्छपी' इति नारदवीणाया महतीति नाम ॥ २९ ॥

रत्नेति । रत्नसुकञ्चुकेन रत्नमयनिचोलेन विलसती निस्तुलतुम्बीफले वर्तुलालाबुफले, त एव स्तनौ यस्यास्तथोक्ताम् ; रत्नकञ्चुकनिचोलितवृत्तालाबुयुतामित्यर्थः ; पक्षे रत्नकार्पासच्छन्नवर्तुलतुम्बीफलसदृशकुचाम् , शस्तां प्रशस्ताम्, कुङ्कुमपङ्कस्य पूजासमयसमर्पितकुङ्कुमकर्दमस्य

दयितामिव हितां प्रसेवकयुतां प्रकृष्टरुचिसान्द्राम् ।
जगदेकसंनुतगुणां जङ्गमचरभिन्नजन्यसुखदोग्ध्रीम् ॥ ३१ ॥
गलल्लम्बिदिव्यमाल्यामोदझरीलब्धमधुपसंरुद्धाम् ।
दरनमितनैजवदनां नखमुखसंघर्षरम्यमृदुरासाम् ॥ ३२ ॥
परमां प्रवालसुभगां जागतकुतुकैकतानवरगानाम् ।
उपवीणयन्विपञ्चीं फाणितमाधुर्यधुर्यमयमागात् ॥ ३३ ॥
सौवर्गमानिनीभिर्नमसितचरणश्च सिद्धकान्ताभिः ।
गन्धर्वलोकबृन्दैः प्रायादग्रे स मौनिकुलचन्द्रः ॥ ३४ ॥

अङ्केन चिह्नेन शोभमानः निजकायः वीणाशरीरं यस्यास्तथोक्ताम् ; 'कोलम्बकस्तु कायोऽस्याः' इत्यमरः ; अन्यत्र कुङ्कुमालंकृतदेहामित्यर्थः । एतादृशीं महतीं करे कलयन्निति पूर्वेणान्वयः ॥

दयितामिति । दयितामिव कान्तामिव हितामिष्टाम् ; प्रसेवकैः तन्त्रीबन्धनकीलकैः ; 'कङ्कुभस्तु प्रसेवकः' इत्यमरः, अन्यत्र सेवकजनैः युताम् । प्रकृष्टरुच्या सान्द्राम् । जगदेकसंनुताः गुणाः तन्त्र्यः, सद्गुणाश्च यस्यास्तथोक्ताम् । जङ्गमाः, चरभिन्नाः स्थिराश्च ये जन्याः शरीरिणः ; 'जन्तुजन्यशरीरिणः' इत्यमरः । तेषां सुखदोग्ध्रीं सुखदां महतीमिति पूर्ववत् ॥ ३१ ॥

गलेति । मधुपैः भ्रमरैः संरुद्धां संयुक्तामित्यर्थः । वीणायाः वदनस्य स्वभावतो नम्रत्वात् दरनमितनैजवदनाम् ; अन्यत्र लज्जया । नखमुखसंघर्षेण आस्फालनेन मृदुः रासो ध्वनिर्यस्यास्तथोक्ताम् । 'गोपक्रीडारवौ रासौ' इति रत्नमाला ॥ ३२ ॥

परमेति । प्रवालेन वीणादण्डेन, अन्यत्र विद्रुमैः ; 'वीणादण्डे प्रवालोऽस्त्री विद्रुमे नवपल्लवे' इति रत्नमाला । जागतकुतुके जगत्कुतूहलोत्पादने ; विपञ्चीं, फाणितस्य खण्डशर्करा-विकारस्य माधुर्यस्य धुर्यं धूर्वहं यथा तथा उपवीणयन्गायन् सन् ; 'मत्स्यण्डी फाणितं खण्डविकारे' 'धूर्वहे धुर्यधौरेयधुरीणाः' इति चामरः ॥ ३३ ॥

सौवर्गेति । नमसितचरणोऽर्चितपादः । 'स्यादर्हिते नमःसितं नमसितमुपचायितार्चितापचितम्' इत्यमरः ॥ ३४ ॥

ततः पुरस्तादभितः सालतालहिन्तालतमालतक्कोलबालरसाल-सालकल्पितशोभाविशालः ; कुटजकुरण्टककोविदारकर्णिकारभूर्जखर्जूरकेसरकुरबकमरुवकमधूकबन्धूकभल्लातकाम्रातकविभीतकतककेतकीषण्डविरचितमण्डनः ; तिन्दुकचन्दनस्यन्दमुचिलिन्दचम्पकचाम्पेयसरलवकुलवञ्जुलपनसपटलपाटलप्रियालकदम्बोदुम्बरकपित्थाश्वत्थतिमिशतिलकानिशातिलकितोद्देशः ; मातुलुङ्गलवङ्गनारङ्गतुङ्गनागपुंनागबिल्वामलकलिकुचनिम्बजम्बुजम्बीरमुखनानानोकहनिवहनीरन्ध्रकटकद्रोणिकागहनसदनमदमुदितवनमहिषकुटिलविषाणकोटिघट्टनोत्कीर्यमाणसविस्फुलिङ्गोपलपरागधूमिकालोकनिरवग्रहाग्रहगुहामुखजवोज्झिहानचण्डतरपुण्डरीकोद्दण्डभण्डनकोलाहलभयपलायमानगवयगोकर्णगण्डकभल्लूकप्रियकशशपृषतरुरुवराहशम्बरचमूरुमार्जारघोरतरारावः

ततः पुरस्तादिति रैवतकगिरिर्वर्ण्यते—तत इति । रसालसालैः चूतादिवृक्षैः, कल्पितशोभया विशालः ; केतकीषण्डेन केतकीसमूहेन विरचितमण्डनः कृतालंकारः ; तिलकितोद्देशोऽलंकृतप्रदेशः ; जम्बीरमुखानां नानानोकहानां वृक्षाणाम् ; 'अनोकहः कुटः सालः' इत्यमरः । निवहैः, नीरन्ध्रे कटके मध्यप्रदेशे, द्रोणिकायां द्रोण्याकारगभीरदेशे च ; 'कटकोऽस्त्री नितम्बोऽद्रेः' इत्यमरः । 'द्रोणिस्तु शिलयोः संधिः' इति सारः । गहनमरण्यमेव सदनं येषां तथोक्तानाम् ; 'गहनं काननं वनम्' इत्यमरः । विषाणकोटीनां शृङ्गाग्राणाम् ; 'कोटिस्त्वग्रे प्रकर्षेऽग्रे' इति सारः । घट्टनेन उत्कीर्यमाणाः सविस्फुलिङ्गाः साग्निकणाः ; 'त्रिषु स्फुलिङ्गोऽग्निकणः' इत्यमरः । उपलपरागाः शिलाधूलय एव धूमिका धूमसंततिस्तस्याः आलोकेन गुहामुखाज्जवोज्झितानामुद्गच्छतां चण्डतरपुण्डरीकाणां व्याघ्राणाम्, 'चण्डस्त्वत्यन्तकोपनः' इत्यमरः । उद्दण्डभण्डने क्रूरयुद्धे कोलाहलादुच्चध्वनिश्रवणाद्भयपलायमानानाम् ; गवयो गोसदृशमृगविशेषः, 'गोकर्णो गोनस इत्यपि', गण्डकः खड्गमृगः ; 'खड्गी वार्ध्राणसः खड्गो गणोत्साहश्च गण्डकः' इति सारः । भल्लूको ऋक्षकः ; 'ऋक्षभल्लूकभल्लुकाः' इति विक्रमादित्यः । 'मृदुरक्तासितैः सान्द्रैर्लोमभिः प्रियकः स्मृतः । शशः प्लुतगतिः प्रोक्तः पृषतो बिन्दुचित्रितः ॥' इति माधवः । कृष्ण

निरन्तरकंदरान्तरः ; अम्बरचुम्बिनितम्बतटीप्ररूढतुङ्गमहीरुहोच्च-
तरशाखाशिखान्तरलम्बमानमारुताधूतपरिणतपिशङ्गवल्लिकाशतकपट-
शम्पालताविराजमाननिबिडनीलनीरदकदम्बकाडम्बरविडम्बकगभीर-
गिरिगहनविहरणपल्लवितकुतूहलोल्लालितफुल्लगिरिमल्लिकोल्लासित-
धम्मिल्लश्लिष्टपल्लवाधरीकपोलमूलकलितगजमदमकरिकामोदलह-
रिकोदितप्रतिगजविषणानुधावदुदारफीट्कारकरटिकुम्भतटीपाटनविक-
टाट्टहासजवनोच्चलज्जटिलसटाभीषणकेसरिविसरनिर्वहणायत्तमत्तप्रत्या-
लीढपदावस्थितचण्डभुजदण्डकुण्डलितकाण्डासनाहितशरशबरतरुण-

रेखाङ्कितो रुरुः ; 'लम्बमाना रोमराजिः ककुदि स्यात्स कम्बरः । चित्रवर्णो ह्रस्वपुच्छश्चमूरुः परि-
कीर्तितः ॥ मार्जारो जारको मर्कः' इति सारः । इत्येवमादीनां मृगाणां घोरतरारावैः निरन्तरं
निबिडं कन्दरान्तरं गुहामध्यं यस्य तथोक्तः । अम्बरचुम्बिनीषु नितम्बतटीषु प्ररूढानां प्रवृद्धानां
तुङ्गमहीरुहाणामुच्चतरशाखाशिखान्तरेषु लम्बमानानां परिणतानां परिपाकं प्राप्तानामत एव
पिशङ्गानां पीतवर्णानां वल्लिकानां शतमिति कपटो व्याजो यासां तथोक्ताभिः । विराजमानं
नीलनीरदकदम्बकस्य आडम्बर आटोपस्तस्य विडम्बकं प्रकाशकं यद्गिरिगहनम् ; परिपाक-
पिशङ्गवर्णलतासंगतमरण्यं विद्युद्विशिष्टमेघकदम्बवत्प्रकाशत इति भावः । तत्र विहरणे पल्लवित-
कुतूहलेनोल्लालितानां भिल्लपल्लवाधरीणां किरातस्त्रीणां कपोलमूलकलितानां गजमदेन कृतानां मकरि-
काणाम् ; किरातस्त्रियः गजमदोदकेन मकरिकापत्रलेखनं कुर्वन्तीति प्रसिद्धिः । तादृशमकरिकाणा-
मामोदलहरिकया उदिता प्रतिगजविषणा प्रतिपक्षगज इति बुद्धिस्तया अनुधावतामुदारो फीट्कार
एषां तथोक्तानां करटीनां गजानां कुम्भतटीपाटने विदलने विकटाट्टहासानामुत्कटं गर्जावतां जव-
नानां वेगवतामत एवोच्चलतां जटिलसटाभिः निबिडमुखकेसरैः ; 'सटा जटाकेसरयोः' इति
रत्ने । भीषणानां केसरिणां सिंहानां विसरस्य समूहस्य निर्वहणे संहारे आयत्ता मत्ताश्च ; प्रत्या-
लीढपदेन संस्थानविशेषेण ; 'वामपादं पुरो न्यस्य जानुनाऽन्येन भूतलम् । आलम्ब्यावस्थितिर्युद्धे
प्रत्यालीढपदं स्मृतम् ॥' 'स्यात्प्रत्यालीढमालीढम्' इत्यमरः । अवस्थिताः, चण्डभुजदण्ड-
कुण्डलितेषु काण्डासनेषु चापेष्वाहितशराश्च ये शबरतरुणास्तैः निरन्तरमाक्रान्तमहाधित्यका पर्वतो-

निरन्तराक्रान्तमहाधित्यकः ; निम्नोन्नतपरुषशिलातलाघातशीर्यन्निबिड-
चटुलनीरपूरपूरितझरीझाङ्करणनादमेदुरदरीकुहरविहरणोत्कण्ठकण्ठी-
रवखरनखरमुखदलितदन्तावलकुम्भमुक्तमुक्ताफलाश्चितविततप्रपातोच्छ-
सितः ; अभ्रंकषशिखरनिःसरत्प्रपातनिपतदमलतरवारिधाराशीकरशि-
शिरतीररुहोदारवानीरकुञ्जमञ्जुलमुकुलकरम्बितकदम्बकाननकुटुम्बि-
शिखावलगलकाहलीकलकलकातरव्यालमिलितासन्नसरलवनपरिमला-
भोगघुमुघुमितसंतताश्वमुखकान्तान्तःपुरपर्यन्तदर्यन्तरालनिर्यन्त्रणनि-
बिडशार्वरनिःशेषनिराकरणतरणिकिरणायितमणिगणद्विगुणगुणप्रदान-
धुरीणज्योतिर्लतावितानालंकृतः ; सान्द्रकादम्बिनीसंबाधनितम्बतया
अभितो लम्बमानोरुगरुद्गरिमा ; दवदहनदह्यमानगहनोद्भूतबहुलधूम-

परिभागो यस्य तथोक्तः ; 'भूमिरूर्ध्वमधित्यका' इत्यमरः । निम्नेति । शिलातलाघातेन शीर्यद्भिः शिथिलैः चटुलैः तरलैः, नीरपूरैः पूरितानां झरीणाम् ; 'झरी तु निर्झरझरौ' ; 'प्रपातस्तु तटो भृगुः' इत्यमरः । अभ्रंकषेति । शिखरेभ्यो निःसरन्तीनां प्रपातेषु तटेषु निपतदमलतरवारिधाराणां शीकरशिशिरैः, तीररुहोदारवानीरकुञ्जैः मञ्जुलैः मुकुलैः करम्बितानां संगतानाम् ; 'वृतः करम्बितो मिश्रः च्छुरितो मिलितः समाः' इति सारः । कदम्बानां नीपवृक्षाणां कानने कुटुम्बिनां संसारिणां निवसतामित्यर्थः । शिखावलानां मयूराणां गला एव काहल्यो वाद्यविशेषास्तासां कल-कलैरुच्चध्वनिभिः, 'कोलाहलः कलकलः' इत्यमरः । कातरैः व्यालैः मिलितम् ; आसन्नं समीपवर्ति यत्सरलवनं, 'पीतद्रुः सरलः' इत्यमरः । तस्य परिमलस्य आभोगेन संपूर्णव्यापनेन ; 'आभोगः परिपूर्णता' इत्यमरः । घुमुघुमितानां संततमश्वमुखकान्तान्तःपुराणां किंपुरुषयोषिदावासस्थानीयानां पर्यन्तदरीणां गुहानामन्तराले निर्यन्त्रणस्य निराबाधस्य ; 'निर्यन्त्रणं तथोद्दाममुच्छृङ्खलमनर्गलम्' इत्यमरः । निबिडशार्वरस्य अन्धकारस्य ; 'शार्वरं त्वन्धतमसे' इत्यमरः । निःशेषनिराकरणे तरणिकिरणायिताः सूर्यकिरणवदाचरमाणा ये मणिगणास्तेषां द्विगुणगुणप्रदाने द्विगुणशोभागुणदाने धुरीणैः ज्योतिर्लतावितानैरलंकृतः ; सान्द्रकादम्बिन्या मेघमालया ; संबाधनितम्बतया निबिडकटकतया ; अभित उभयतो लम्बमानयोरुगरुतोः पक्षयोः गरिमा यस्य तथोक्तः । मेघमालाभिः पक्षविशिष्ट इव भातीति भावः । दवदहनेति । दवदहनेन वनाग्निना

स्तम्बलिह्यमानाम्बरतया च लम्बितोड्डीनगतिरिवोपलक्ष्यमाणः ; परशुराम इव प्रकटितभृगुवंशः ; चन्द्रमा इव संभृतैणकः ; कार्तिकेय इव कमनीयशिखिवाहः ; महिलाजन इव पृथुलनितम्बस्थलोल्लसितः ; भुजङ्ग इव गणिकागणवेष्टितः ; वैश्य इव नीचोदग्रबहुप्रस्थसंपन्नः ; वृषभ इव प्रकटितशृङ्गोच्चयः ; वनीपक इव बहुलाशाक्रान्तिप्रकाशितस्वभावः ; चण्डिकासमरभूभाग इव युध्यमानमहिषकोलाहलातिभीषणः; धर्मराज इव पादान्तिकानुषक्तार्जुनः ; बहुलपलाशवृन्ददन्तुरितोऽपि सप्त-

---

'दवदावौ वनारण्यवह्नी' इत्यमरः । दह्यमानाद्दहनादरण्यात् ; उद्भूतबहुलधूमस्तम्बेन धूमसङ्घेन ; लम्बिता आश्रिता उड्डीनगतिरूर्ध्वगतिर्यस्य तथोक्त इव, पर्वतः उद्गतधूमजालैः गगने उद्गच्छन्निव भातीति भावः । परशुराम इव प्रकटितः प्रकाशितः भृगुवंशः भार्गववंशो येन तथोक्तः ; अन्यत्र भृगुदेशे वंशाः वेणवः ; 'प्रपातस्तु तटो भृगुः' इत्यमरः । संभृतो रक्षितः, एणो हरिणो येन संभृतैणकः । कमनीयः शिखी मयूरः, वाहो वाहनं यस्य तथोक्तः ; अन्यत्र शिखिनः शाखावन्तो वृक्षा इत्यर्थः ; तान् वहतीति शिखिवाहः ; गन्धवाह इतिवत् कर्मण्यण् । 'शिखा शिफायां चूडायां ज्वालायामग्रमात्रके । लाङ्गलक्यां च शाखायां चूडायां च शिखण्डिनः ॥' इति विश्वः । महिलाजनः स्त्रीजन इव ; 'नितम्बः पश्चिमे श्रेणिभागेऽद्रिकटकेऽपि च' इति यादवः । भुजङ्गः विट इव गणिकागणेन वेश्यासङ्घेन ; अन्यत्र लताविशेषैः ; 'गणिका यूथिकाम्बष्ठा' इत्यमरः । प्रस्थैः धान्यादिमानसाधनैः ; 'प्रस्थोऽस्त्री सानुमानयोः' इत्यमरः । 'शृङ्गं प्रभुत्वे शिखरे प्राधान्ये जलयन्त्रके । विषाणोत्कर्षयोः सानौ शृङ्गं स्यात्कूर्चशीर्षयोः' इति विश्वः । वनीपकः याचक इव बहुलाशया अधिकाशया आक्रान्तिः सर्वत्राटनम् ; अन्यत्र सर्वदिशामाक्रान्त्या आक्रमणेन । महिषस्य महिषासुरस्य ; अन्यत्र वनमहिषाणाम् । पादान्तिके पादसमीपे अनुषक्तः, अर्जुनः पार्थो यस्य ; अन्यत्र पादपर्वतानुषक्तार्जुनवृक्षः ; 'इन्द्रद्रुः ककुभोऽर्जुनः' इत्यमरः । अथ विरोधाभासाः—बहुलपलाशानां बहुपत्राणां वृन्देन दन्तुरितोऽपि स्थपुटितोऽपि सप्तसंख्याकच्छदानाम्, एकाश्रित इति विरोधः ; अन्यत्र पलाशाः किंशुकाः मांसभक्षकजन्तवश्च ; सप्तच्छदाः सप्तपर्णवृक्षाः ; 'पलाशे किंशुके पर्णः' 'सप्तपर्णे विशालत्वक्शारदो विषमच्छदः' इत्यमरः ।

च्छदैकाश्रितः ; प्रकटमहागुहोरुसंपदविरहितोऽपि संततोपान्तमहित-तारकावष्टम्भः ; उदग्रगोत्रतायोगविश्रुतोऽपि नकुलविख्यातः ; मातङ्ककुलावासभूरपि परितो द्विजातिसंभावितः ; पुण्यजनालिसेवनीयोऽप्यनवरतरौरवप्रवृत्तिहेतुः ; अगाधजलाशयोऽपि विशदविशालकीर्तिः ; विश्रुतकूटसहस्रसंकुलोऽपि सच्चर्यानुकूलोन्नतिः ; नयनाध्वनीनः समजनि शैलराजो रैवतको नाम ॥

औन्नत्येन निजेन नाकजगतो मिथ्यात्वमेवानिशं
मर्त्यानां स्फुटयन्प्रमाणमपि यः प्रत्यक्षमेकं श्रितः ।

महागुहस्य स्कन्दस्य, उरुसंपदा अधिकविभवेन अविरहितो युक्तोऽपि, तारकस्य तारकासुरस्य अवष्टम्भो गर्वो यस्य ; 'दर्पोऽवलेपोऽवष्टम्भः' इत्यमरः ; अन्यत्र गुहाया दर्याः, उरुसंपदा, तारकाणां नक्षत्राणामवष्टम्भः उन्मेषः । उदग्रं ख्यातं गोत्रं वंशो यस्य तस्य भावः उदग्रगोत्रता तस्या उत्तमवंशवत्तायाः इत्यर्थः ; योगेन विश्रुतोऽपि कुलेन विख्यातो न भवतीति विरोधः ; अन्यत्र गोत्रतायाः पर्वतत्वस्य, नकुलैः सर्पशत्रुभिः, 'नकुलं पिङ्गलः समौ' इति सारे ; 'गोत्रं नाम्नि कुलेऽचले' इत्यमरः । मातङ्गकुलस्य चण्डालकुलस्य द्विजातिभिर्ब्राह्मणैः ; अन्यत्र मातङ्गाः गजाः, द्विजैः पक्षिभिः, अतिसंभावितः ; 'मातङ्गौ करिचण्डालौ' इति रत्ने पुण्यजनालिभिः सुकृतिजनसङ्घैः, रौरवस्य नरकविशेषस्य । अन्यत्र पुण्यजनालिभी राक्षससङ्घैः, रौरवी रुरुनामकमृगसंबन्धिनी प्रवृत्तिर्वर्तनं जीवनं वा तस्या हेतुः ; 'यातुधानः पुण्यजनः' इत्यमरः । 'वर्तनं जीवनं टीका कैशिक्यादिश्च वृत्तयः' इति रत्ने । अगाधजलाशयः गभीरजलाधारोऽपि विशदविशालकीर्तिः, प्रस्फुटाधिकपङ्कः ; अन्यत्र अगाधः जलाशयो ह्रदो यस्मिंस्तथोक्तः, कीर्तिः यशः, प्रसिद्धिरित्यर्थः ; 'कीर्तिः प्रसादे यशसि कर्दमे विस्मृतावपि' इति रत्ने । कूटसहस्रेण अनृतसहस्रेण, शृङ्गसहस्रेण च सच्चर्यायाः सज्जनचर्यायाः नक्षत्रचर्यायाश्च ; 'कूटो यन्त्रेऽनृते राशौ निश्चले लोहमुद्गरे । मायाद्रिशृङ्गयोस्तुच्छे सिरावयवदम्भयोः' इति शाश्वतः । नयनाध्वनीनश्चक्षुर्विषयः ॥

औन्नत्येति । यो गिरिरौन्नत्येन नाकजगतः स्वर्गलोकस्य मिथ्यात्वमेव मर्त्यानां स्फुटयन् ; अतिप्रबुद्धत्वादुपरिभागे लोको यदि स्यात्तत्र गिरिशृङ्गाणां सक्तिः स्यात् ; सक्तेरभावाल्लोको

कंदर्पागमधीरनिर्जरवधूक्रीडातिसक्तान्तरः
सोऽयं सौगतवृत्तिमाश्रित इव क्ष्माभृद्वरीदृश्यते ॥ ३६ ॥

आशासीमसु गोगणानविरतं संचालयन्सर्वतः
केकावन्नवबर्हशेखरशिरावेणुं वहन्सुन्दरम् ।
नित्योद्यद्वनमालिको श्रितमहानन्दव्रजात्सेकक्रु-
च्छैलो नन्दकुमारशैशवदशानैपथ्यभाग्राजते ॥ ३७ ॥

तदनु प्रतिकल्पमादिमतत्त्वसर्जनाय सञ्जीकृतमनश्वरमपार-
मनुकलसमेधमानमपां निधानमद्भुतैकनिदानम्, उल्लोलकल्लोलमालि-
काशिखरडोलाप्रेङ्खोलननित्यकुतूहलायमानजलमानुषयुवसङ्घसानुराग-

नास्तीति जनानां प्रकाशयन्निवेति भावः । प्रमाणं दिगन्तव्याप्तत्वात्प्रकृष्टं मानमेकं श्रितः । बौद्धस्तु स्वर्गस्य मिथ्यात्वं वदति; प्रत्यक्षादिप्रमाणेष्वेकं प्रत्यक्षमेव प्रमाणत्वेन गृह्णातीति भावः । कंदर्पागमे मदनशास्त्रे धीराणां कोविदानां निर्जरवधूनां देवस्त्रीणां क्रीडाभिः अतिसक्तमन्तरं यस्य तथोक्तः; अन्यत्र निर्जरवधूनां तरुणीनां क्रीडायामन्तरं हृदयम्; बौद्धेन कामार्थावेव पुरुषार्थत्वेन गृहीतौ; अतः कामासक्त इति भावः । सौगतानां बौद्धानां वृत्तिम् ॥ ३६ ॥

आशेति । आशासीमसु गोगणान् किरणगणान्, मणिमयत्वादिति भावः । अविरतं संचारयन्; अन्यत्र धेनुगणान् । केकावतां मयूराणां नवबर्हैः नूतनपिञ्छैः कृतशेखरः अलंकारः शिरसि यस्य तथोक्तः; अन्यत्र मयूरपिच्छालंकृतशृङ्ग इत्यर्थः । 'शिखास्वापीडशेखरौ' इत्यमरः । नित्यमुद्यन्ती वनानां मालिका यस्मिन्; अन्यत्र वनमाला हारविशेषो यस्य तथोक्तः । श्रितानां महानन्दव्रजस्य अधिकानन्दपरंपराया उत्सेककृद्वृद्धिकृत् । अन्यत्र नन्दव्रजाख्यस्य आभीरपल्ल्याः 'आकल्पवेषौ नैपथ्यम्' इत्यमरः ॥ ३७ ॥

तदन्विति समुद्रो वर्ण्यते । कल्पे कल्पे प्रतिकल्पम्; 'कल्पः स्यात्प्रलये न्याय्ये शास्त्रे ब्रह्मदिने विधौ' इति शाश्वतः । आदिमतत्त्वस्य जलतत्त्वस्य, सर्जनाय सृष्टये, 'आपो वा इदमग्रे सलिलमासीत्' इति श्रुत्या प्रतिपादितत्वात्सृष्टावपामादिमत्वम् । 'तत्त्वं विलम्बमाने स्यात्स्वरूपे परमात्मनि' इति रत्ने । अनुकलं प्रतिक्षणं, समेधमानं वर्धमानं, अपां निधानं निधिस्थानीयम्; कल्लोलमालिकानां शिखराण्येव डोलास्तत्र प्रेङ्खोलने आन्दोलने, नित्यं कुतूहलाय-

[ततः प्रविशति जीवः आपातबोधश्च ।]

जीवः—अन्यस्मादपि चाश्रमादयमसौ गार्हस्थ्यनामाऽऽश्रमः
श्रेयानित्यविवादमेव विधिषु प्रत्यक्षमाम्नानतः ।
धर्माधारतया समस्तजनतानामोपकारक्षमं
प्राप्तस्यैनमतोऽखिलोऽपि पुरुषस्यार्थः स्वतः सेत्स्यति ॥ २ ॥

अथ वा, विक्षेपभूयिष्ठोऽयमाश्रमः । अत्र हि,

आस्तां तावदसंभाव्या तस्या दर्शनसंकथा । श्रवणायापि सा तन्वी न लभ्या मम कुत्रचित् ॥

आपातबोधः—सत्यमेतत् ।

गुहायां निहिता ह्येषा दुर्लभातिलम्भना । पामराणामिहस्थानां परमानन्दलक्षणा ॥ ४ ॥

जीवः—सम्यगुक्तं परमानन्दलक्षणेति । तथा हि,

अराभ्योर्वीपरिवृढगतं भानुपानन्दमेकं ब्रह्मानन्दाभिरतिशयः प्रत्यपादि श्रुतौ यः ।
सोऽप्येतस्याः किल सुखनिधेरेकदेशैकदेशे विश्रान्तः स्यादिति मम पुनर्निष्प्रकम्पो वितर्कः ॥

किं बहुना,

स्मरणसरणिरेषा जातुचित्पुण्यभूम्ना मम कथमपि तावन्मन्दमासाद्यमाना ।
हृदयमदयमेव ह्लादपारंपरीभिः परवशयति हन्त प्लावयन्ती नितान्तम् ॥ ६ ॥

आपातबोधः—तर्हि निरन्तरमनुसंधानपद्धतिमवतारयितव्या तत्रभवती ।

जीवः—संध्यास्नानजपाग्निहोत्रनियमस्वाध्यायदेवातिथि-
स्तोमाभ्यर्चनचन्द्रचूडचरणध्यानादि यद्वैदिकम् ।
यद्वा लौकिकमस्ति कर्म गमनव्याहारभुक्त्यादिकं
सर्वं तन्मम सांप्रतं समभवद्विघ्नः प्रियाऽनुस्मृतेः ॥ ७ ॥

आपातबोधः—त्यक्तव्यानि तर्हि कर्माणि ।

जीवः—

ग्रामारामक्षितिपशुधनाद्यैहिकामुष्मिकात्मश्रेयःसिद्ध्यै भवति यदनुष्ठानमात्रेण पुंसाम् ।
काम्यं कर्म प्रबलमपि तत्त्यज्यतां नाम कामं नित्यं नैमित्तिकमपि कथं त्यक्तुमत्र प्रभुः स्याम् ॥

आपातबोधः—आचारेऽभ्युदयं करोति परथा यः प्रत्यवायोदयं
सोऽयं कर्मचयोऽधिकारिभिरिहोपास्यो न तु त्यज्यते ।

त्यक्तश्चेदयमाश्रमः स च परित्यक्तुं तदा शक्यते
त्यागश्चास्य समस्तवस्तुविषयं वैराग्यमाकाङ्क्षति ॥ ९ ॥

जीवः—कर्माणि स्वयमाचरन्नपि सदा बध्येषु तेषामहं
कांचित्कांचिदपि क्षणस्य कणिकां लब्ध्वाऽवकाशं ततः ।
चिन्तायामुपनीय चिन्मयतनुं तामिन्दुकान्ताननां
कान्तामन्तरुदित्वराकुलतया नन्दामि शान्तव्यथः ॥ १० ॥

आपातबोधः—मलयं गच्छतो मन्दरपथानुवर्तनमेतद्यत्कर्मफलवस्तुकामुकस्याश्रमभवतः कर्मदुर्दिने गृहस्थाश्रमेऽवस्थानम् ।

जीवः—अवितथमाह भवान् । तथा हि,

प्रक्रान्तान्यरुणोदये परिसमाप्यन्ते निशीथावधौ
यान्येतानि दिने दिनेऽपि गृहिभिः कर्माणि निर्मातृभिः ।
एतेषामसिधारयेव विषया स्वाच्छन्द्यविच्छेदतो
विश्रान्तिं कलयाऽपि न प्रतिलभे न त्यक्तुमप्युत्सहे ॥ ११ ॥

आपातबोधः—दुस्त्यजो नाम संसारचक्रभ्रमिकुम्भकारः कर्माधिकारः । अत एव.

कर्म कष्टमिति ज्ञात्वा तन्निर्मूलनतत्पराः । केचिदा जन्मनः शुद्धा निबध्नन्ति परां धृतिम् ॥

जीवः—आपातबोध, किं नाम न विद्यते तादृगुद्देशो यत्र मिथानुसंधानपरिपन्थिनां कर्मणामुपरोधः ?

आपातबोधः—अस्त्येव संन्यासनामा महानाश्रमः ।

जीवः—यद्येवं प्रापय मां तमुद्देशम् ।

आपातबोधः—एवं नाम भविष्यति ।

जीवः—कुतो मन्दीकृतं वचनम् ?

आपातबोधः—प्रतिबन्धकाशङ्कया ।

जीवः—किं प्रतिबन्धकं तुर्याश्रमगमनस्य ?

आपातबोधः—किमन्यत्कण्टकोपसर्गमन्तरेण ।

(ततः प्रविशन्ति कामादयः षडरयः ।)

कामः—नारीवद्गगने विचित्ररचनामाधाय विश्वं जनं
तत्र प्रत्ययतः प्रवर्तयितुमप्यद्य प्रगल्भोऽस्म्यहम् ।

किं भूयो घनगन्धसार्यमदिरामांसाद्युपस्कारव-
नारीसंघसहस्रसंपदुदितोल्लासाधिकोपक्रमः ॥ १३ ॥

क्रोधः—

सखा वा बन्धुर्वा सुहृदपि च वा मित्रमपि वा कलत्रं पुत्रो वा भवतु जनको वाऽपि जननी ।
प्रविश्यान्तः क्षोभं सपदि जनयञ्जातकलह-स्मिथ्यो लोकान्शोकार्णवमुपनयेत्को मदितरः ॥

लोभः—

धनदानाधिकस्यापि मया संपृष्टचेतसः । धनिनो नोपभोगाय न त्यागाय धनं महत् ॥

मोहः—

समूहो धूमानामिव चय इवोद्गाढतमसां घनानां भूमेव प्रचुरतरधूलीभर इव ।
तनुच्छायोद्गारच्छुरितहरिदन्तरतया समावृण्वन्नन्तर्बहिरपि हराम्यापदि जनम् ॥

मदः—

अहो मम महीयस्ता यन्मयाऽऽलिङ्गितो जनः । बुद्धतत्त्व इव स्वान्यान्पश्यन्नपि न पश्यति ॥

मत्सरः—

एषोऽस्मि हन्त परदूषणशीकरेण संप्लावयञ्जलधिरेव भुवं युगान्ते ।
सर्वातिशायिपरकीयगुणक्षमाभृद्-म्लोलिक्केलिकलनारसिकः स्वभावात् ॥ १८ ॥

कामः—भो भो भ्रातरः,

एकैकोऽप्यलमेव तावदचिराद्याचान्तमुद्भ्रान्तम-
प्याधातुं जगदप्रतीक्षितसहोत्साहोद्यमस्थेमतः ।
अन्योन्यं समवायिनां पुनरिहासाध्यं किमस्माकमि-
त्येतन्नूतनवन्न तावदधुना विज्ञापनीयं मया ॥ १९ ॥

परं तु भुवनेन्द्रजालशेवधेरज्ञानवर्मणो महाराजस्याज्ञाकरतायाः पक्षपातिताथाश्चानुरूपं प्रयतितव्यमस्माभिः ।

अन्ये—आदिश्यतामत्रभवता तादृशो यत्नः ।

कामः—सर्वैराकर्ण्यतां भ्रातृभिः,

मोहो मत्तद्विप इव भवत्वेष यन्ता भवामि क्रोधो लोभो मम परिकरो मत्सरोऽयं मदश्च ।
इत्थं भूत्वा षडपि च वयं जीवसंज्ञस्य राज्ञो भूयो दृष्टिप्रसरविषये भूविभागे चरामः ॥

ततश्च,

आलोक्य मोहनमनेकपसार्वभौममारोक्ष्यति क्षितिपतिः स कुतूहलेन ।

आरूढमात्रमथ तं वितथाभिलाषाशु क्षिपेम परुषे विषयान्धकूपे ॥ २१ ॥
क्षिप्तश्च तत्र स स्वैरं क्षीबस्तत्परतन्त्रितः । मुक्तिप्रासादनिश्रेणीं नारोहेच्चरमाश्रमम् ॥

अन्ये—अहो साधीयः संविधानकम् ।

मोहः—अथापि परिज्ञातास्मदीयदुर्व्यवसितो जीवानुचर इति शङ्कते मे हृदयम् ।

कामः—(सामर्षम्)

योगारूढोऽपि निःसङ्गोऽप्यस्माभिः सङ्गहेतुभिः ।
निपात्यते क्षणेनाधः कियानेष पृथग्जनः ॥ २३ ॥

भ्रातर्मोह, तदलमतिशङ्कया । संकल्पय तावदात्मानं गजरूपेण ।

मोहः—यथा रोचते ज्यायसे । (इति ध्यानं नाटयति ।)

कामः—अहो, संकल्पमात्रेण महानेष गजः संवृत्तः । तदहमप्यस्य स्कन्धमधिरुह्याधोरणभावमवलम्बे । (इति तथा करोति ।)

(परिशिष्टाश्चत्वारः परिवारभावेनावतिष्ठन्ते । कामः सपरिवारो गजेन परिक्रामति ।)

जीवः—(विलोक्य) अहो, गजो गजः ।

आपातबोधः—(विलोक्य, स्वगतम्) आः कष्टम् । आरब्धमनिर्मथातुमगतिभिः । (प्रकाशम्) देव, न परमार्थोऽयं गजः ।

जीवः—कथं मिथ्यैव ?

आपातबोधः—कः संदेहः ?

जीवः—(पुनर्निरूप्य) नन्वयं परमार्थ एव ।

आपातबोधः—मदीयो मिथ्यात्ववादः ।

जीवः—गरीयसी पुनरियमन्यथाप्रतिपत्तिः ।

आपातबोधः—बाढम् । कस्येति तु विवेचनीयम् ।

जीवः—व्यवहारविस्पष्टेऽर्थे किं वेदनायासेन ।

आपातबोधः—अयमपि निर्देशो देवमनुस्पृशन्न निवार्यते ।

जीवः—(निपुणं निर्वर्ण्य, स्वगतम्)

स्वयमयमुपपन्नः कात्स्न्र्यतो हस्तिधर्मैः स्फुटमनुभवपद्यामद्य नो गाहमानः ।
कुवलयितवनान्तः कोमलाभिः स्वभाभिः कथमपलपनीयः कुञ्जराणामधीशः ॥ २४ ॥

अतः परमार्थ एवायम् । नामधेयानुरूपः पुनरापातबोधस्य बोध इव व्यवहारोऽपि न विस्रम्भणीयः (प्रकाशम्) आपातबोध, भवतु गजो मिथ्या वा तथ्यो वा । सर्वथा तावदेतस्य दर्शनमात्रेण मम कुतूहलमुत्पद्यते । (पुनर्निरूप्य) कथमस्योपर्यारोहणोऽपि, परितः परिवारश्च ।

(कामः गजमुपनयति । आपातबोधः भयेन पलायितुमुपक्रमते ।)

जीवः—(आपातबोधं हस्तेन गृहीत्वा, सोपहासम्) आपातबोध, गजो मिथ्या; किं पलायसे ?

आपातबोधः—पलायनमपि मिथ्यैव ।

कामः—(अङ्कुशगर्भमञ्जलिं कुर्वन्) आयुष्मन् अत्रभवता सानुचरेणाधिरुह्य सनाथीक्रियतामेष गजराजः ।

जीवः—(स्वगतम्) प्रथममेवाहं कुतूहली । तदुपर्ययमपि प्रार्थयते । तदेनमधिरुह्यात्मानं विनोदयिष्यामि । (प्रकाशम्) आपातबोध, मिथ्यापलायन इव मिथ्यागजारोहणेऽपि भवान् प्रवर्तताम् ।

आपातबोधः—अनतिलङ्घनीयं नाम गजशासनम् ।

(कामः गजं नमयति । जीवः प्रथममापातबोधं गजमारोप्य स्वयमपि नाट्येन गजमधिरोहति ।)

आपातबोधः—(स्वगतम्) हा हन्त, अयमहमपि लम्भोऽस्मि मोहवागुरायाम् ।

जीवः—आपातबोध, अनेनैव गजयानेन तुर्याश्रमं प्रवेक्ष्यामि ।

आपातबोधः—अहमप्यन्धतमसे न रूपं द्रक्ष्यामि ।

जीवः—अलं वैतण्डिकत्वावलम्बनेन ।

आपातबोधः—एष मूकीभूतोऽस्मि ।

कामः—आयुष्मन्, यौवनवनस्याभ्यर्हितोऽयं विषयोद्देशो दर्शनीयः, तदत्र प्रवर्तयामि गजराजम् ।

जीवः—आधोरण, तुर्याश्रमं गन्तुमभिलषामि, यत्र मे वासो भविष्यति ।

कामः—किं नाम कुविन्दवाटिकप्राप्तिरभिलषिताऽऽयुष्मतः ?

जीवः—न हि न हि । चतुर्थाश्रमप्राप्तिः ।

कामः—चतुर्थ इत्यनेन किमेकजातिवर्णोऽभिप्रेयते ?

जीवः—कृतमन्यथाख्यात्या । चरमाश्रमं जिगमिषितोऽस्मि ।

कामः—हन्त प्रतिपन्नोऽस्मि । चरमाश्रमेण [illegible] । (इति गर्वं प्रधान्य नाट्येन पुरं प्रवेशयन्,) आयुष्मन् चरमाश्रमं प्राप्ता स्म ।

जीवः—(निरूप्य) अनृतवादिन्नाधोरण, पुरं खल्वेतत् ।

कामः—आयुष्मन्, नानृतमेतत् । अनेन पथा गच्छतामस्माकं प्राप्तप्रायश्चरमाश्रम इत्युच्यते ।

जीवः—भवतु । कस्येदं पुरं यस्य घण्टापथे वयं नर्तामहे ? किंनिमित्तश्च पौराणां संभ्रमः ?

कामः—नन्वायुष्मान् एव पुरत्रयस्वामिनः पुरमेतदध्यासनामकम् । व्यवहारनामाऽयं घण्टापथः । अत्र भवदागमनमहोत्सवप्रयुक्तश्च पौराणां संभ्रमः । तथा हि,

आसिक्ता घनसारवारिभिरितो व्याक्षिप्यमानाः पुन-
र्लक्ष्यन्ते विशिखा विकीर्णसुमनःसंभारमाध्वीरमैः ।
बध्यन्ते पथितः पुरं वणिमयप्रासादपङ्क्तिद्वय-
स्यूतानेकवितानतोरणगणैः [illegible]ताका अपि ॥ २५ ॥

अपि च, नीरन्ध्रे वियदन्तरं ध्वजपटीच्छत्रच्छटाकोटिभिः
पुष्पैरद्य निरन्तरा वसुमती कुन्दारविन्दादिभिः ।
प्रत्याशं पुरमेतदायतदृशामोघैरमोघीकृतं
संपूर्णे पटवासपांसुनिकरैरत्रोत्सवे गोत्रभी ॥ २६ ॥

अपि च, उद्गायन्ति कुशीलवास्तव पुरो गाथाः सुधाधारणीं
नृत्यन्त्यद्भुतरूपसंपद इतः संभूय वाराङ्गनाः ।
संघीभूय जनेन वन्दिन इतः संप्रस्तुवन्ति स्तुतिं
पौरा जानपदाश्च भो जय जयेत्याशीर्वचः कुर्वते ॥ २७ ॥

जीवः—(साहंकारावेशमुन्मस्तको वीरासनं विरचयन्) अहो अहम्, अहो अहम् ।

राजाऽहं जगतो युवाऽस्मि धनिको रूपेण कामाधिको
रम्भोरूनिवहैरहंप्रथमिकासंभावनीयाकृतिः ।
किं चाहं विदितोऽस्मि दिग्विजयतो निर्वैरितावींतलः
सर्वैश्वर्यसमुन्नतस्य धुरि मे चन्द्रः क्व चेन्द्रः क्व वा ॥ २८ ॥

[स्तम्भेन स्वयं नाटयन्स्थितः । ततः प्रविशन्ति दयाऽऽदयोऽष्टावात्मगुणाः ।]

दया—देवो वा दनुजोऽथ वाऽथ मनुजः कीटः पतङ्गोऽपि वा
यः कश्चिद्यदि दुःखपङ्कपतितः प्रत्युद्धराम्येव तम् ।

न ह्यागन्तुक एष किं तु विमलो नैसर्गिको मे गुण-
स्त्रातुं दुःखितजन्तुवर्गकरुणा जातोऽस्ति तेनानिशम् ॥ २९ ॥

क्षान्तिः—दुःखं नाम किमस्ति वस्तु महता यत्नेन यद्वार्यते
द्वन्द्वं चेद्व्यथयत्यलं व्यथयतु क्षन्तव्यमेतत्पुनः ।
क्षाम्यन्यत्सुखमश्नुते परिहरन्नाप्नोति तत्सर्वथा
सीदेत्प्रत्युत दुःखवानपरो विक्षेपिभिः साधनैः ॥ ३० ॥

अनसूया—आपन्मत्सरिणो जनस्य नियतं संपत्तदन्यस्य च
प्रत्यक्षं च विभाव्यते मतिमता स्वस्मिन्परस्मिन्नपि ।
इत्थं सत्यपि नान्यदोषविमुखा नान्योदयश्लाघिनो
लोका इत्ययमस्मदन्वयबहिर्भावस्य कोऽपि क्रमः ॥ ३१ ॥

अनायासः—भूयोभिर्मिलितैर्महोपकरणैर्यैः सुखसाध्नेहसा
दुःसाध्याः सुधियोऽपि कौशलभृता यत्नैर्विचित्रैरपि ।
आयासेन विना सिषाधयिषतस्तांस्तान्साधयन्तः क्रियाः
के तावन्मनुजग्रहेण गृहिणो नासन्कृतार्थीकृताः ॥ ३२ ॥

शौचनामा—अधीतस्वाध्यायोऽप्यविदिततदर्थोऽपि निपुणं
समर्थोऽप्यर्थी सन्नपि निरपवादोऽपि निगमे ।
मदुन्मेषाभावे कुहचिदपि कर्मण्यधिकृतः
कथं भावी वर्णत्रितयमनुगच्छन्नपि नरः ॥ ३३ ॥

मङ्गलशर्मा—इज्यादानतपःप्रधानमखिलश्रेयःप्रदानक्षमं
कर्म प्रारभमाण एव पुरुषो व्यावर्तमानः श्रमैः ।
प्रोत्साहीक्रियते न चेत्किल मया तत्तादृशा कर्मणा
सिद्धिं विन्दति किं प्ररोचितमतिः स्तुत्यर्थवादैरपि ॥ ३४ ॥

अकार्पण्यशर्मा—

कृच्छ्रेण क्षणशस्तथैव कणशो लुब्धेन संपादिता
प्राणेभ्योऽपि गरीयसी सकृदपि स्वेनोपयुक्ता न या ।
सा संपन्मम संगतिं गतवता तेनैव केनाप्यहो
पात्रेषु प्रतिपाद्यते तृणमिव द्राक्त्यज्यते भुज्यते ॥ ३५ ॥

अस्पृहा—ऐन्द्रं यत्पदमद्भुतं यदपि वा वैश्वं चमप्यूर्जितं
यश्च प्रार्थितदुर्लभस्तनुभृतां भोगस्तथोच्चावचः ।
एतत्तन्मदपाङ्गशीकरकलासंपातसंभावना-
निःशेषीकृतकौतुकस्य कृतिनः क्वापि क्षणे दृश्यताम् ॥ ३६ ॥

आपातबोधः—आः कष्टमतिभूमिं गतोऽहंकारावेशो देवस्य । तदत्र प्रतिबोधनमपि निष्फलं भविष्यति । अप्रतिबोधने च देवो दुर्विषयपरतन्त्रतया अयसो विषकुम्भेत । किमत्र कर्तुमुचितम् । (ऊर्ध्वमवलोक्य सहर्षम्) कथमार्यसौवलवर्णितमेवात्मगुणाष्टकम् । कथं पुनरेतेन देवः संगमयितव्यः । (विचिन्त्य) इत्थं नाम । आधोरण, देवस्य निदेशवर्तिना त्वया प्रासादस्यास्य समीपमुपनेतव्यो गजराजः, यद्दर्शनेन सफलं कुतूहलं देवस्य ।

(कामः तथा करोति । आपातबोधः आत्मगुणान्प्रति गीतिं करोति । आत्मगुणा वातायनद्वारा प्रासादमुपनिपत्यापातबोधेन सह जीवमुत्क्षिप्य पुनः प्रासादान्तरन्तर्हिताः ।)

कामः—आयुष्मन्, आधीयतामितो दृष्टिः ।

मांसानां पालिकेयं मधुरसभरिता कुम्भिकापङ्क्तिरेषा
संफुल्लन्मल्लिकादिप्रसवसरयुतश्चन्दनाद्रिद्रवोऽयम् ।
एषा योषामणीनां ततिरतिरुचिराकारनिर्धूतरम्भा
संभारोऽयं समग्रः समुदयमयते भोगसंपादकानाम् ॥ ३७ ॥

(परावृत्य पश्चाद्भागं पश्यन्, सोद्वेगं हस्तेन हस्तं निष्पिष्य) अहह प्रमादः ! न दृश्यते राजा ।


(निरूप्य सर्वे विषादं नाटयन्ति ।)

कामः—यावन्मांसकलङ्कमद्यसुतनुस्तोमस्रगालेपन
प्रालेयानिलचन्द्रिकादिविषयेष्वाधज्जयामो नृपम् ।
तावत्त्वाक्षिपता प्रभावपिहिताकारेण केनाप्यहो
दैवेन प्रतिपक्षमाशु विशता सर्वे वयं वञ्चिताः ॥ ३८ ॥

क्रोधः—(दन्तान्कटकटाप्य) कष्टं भोः कष्टम् ।

पराक्रान्तंमन्यैरविरलमसीभिः परिवृतः सुदूरादस्माभिः प्रसभमुपनीतो य इह सः ।
विषत्स्वेवास्मासु व्यवधिमवधानादभजदित्यसौ दुष्कीर्त्तिर्नः कुलमलिनतायै न किमहो ॥

लोभः—यमाकृष्टुं दुष्टे पथि विषयनामन्यनुचिते नितान्तं संभ्रान्ता वयमियदनेहःसमुदयम् ।
दुराधर्षो जातः स पुनरधुना जीवनृपतिस्ततो नः संरम्भः परिणमति भस्माहुतिरिव ॥



॥ महिषशतकम् ॥

॥ श्रीवाञ्छेश्वरकविप्रणीतम् ॥

स्वस्त्यस्तु प्रथमं समस्तजगते शस्ता गुणस्तोमतः
सन्तो ये निवसन्ति सन्तु सुखिनस्तेऽमी शिवानुग्रहात् ।
धर्मिष्ठे पथि संचरन्त्वघनिषा धर्मोपदेशादृता-
स्तेषां ये भुवि मन्त्रिणः सुमनसस्ते सन्तु दीर्घायुषः ॥ १ ॥

वन्दे दुण्ढिं महालिङ्गं विघ्नेशं मणिकर्णिकाम् । ईश्वरश्रीनिवासार्यां होबलाख्यगुरूत्तमान् ॥ १ ॥
श्रीमत्कवेरजातीरं विद्वद्वृन्दोपशोभितम् । अत्युत्तमशिवक्षेत्रविष्ण्वादिस्थानमस्ति हि ॥ २ ॥
तत्र तञ्जपुरं नाम राजस्थानमनुत्तमम् । राजानः प्रथितास्तत्र भोसलीयान्ववायजाः ॥ ३ ॥
तदमात्यकुलोत्पन्नः श्रीमान्वाञ्छेश्वरः सुधीः । शिष्टः कन्नाटिजातीयो वेदवेदाङ्गपारगः ॥ ४ ॥
नीतिमार्गेण राजानं तत्तत्कालेष्वचोदयत् । कदाचिद्बालको राजा मेलयित्वा खलान्बहून् ॥ ५ ॥
खेलंस्तैः सर्वदा मुग्धो न शुश्राव हितं वचः । तेभ्यो निवर्तयन्भूपं सन्मार्गे संप्रवर्त्तयन् ॥ ६ ॥
महिषस्तुतितो राजबुद्धिं चक्रे सुनिर्मलाम् । तस्य नप्ता माधवार्यपौत्रः श्रीनरसिंहतः ॥ ७ ॥
वाञ्छेश्वरो लब्धजन्मा पितृप्रोक्तेन वर्त्मना । व्याख्यास्ये संप्रणम्यैतान्माहिषं शतकं मुदा ॥ ८ ॥
काहं मुग्धमतिः क्वेयं साहिती सर्वपूजिता । तथाऽपि जन्म तद्वंशे प्रवर्तयति मामिह ॥ ९ ॥
काशीस्थान्पण्डितान्नत्वा लिख्यते किंचिदेव तु । तद्वृत्तन्तु मुदा व्याख्यां तन्वन्तु विपुलामपि ॥ १० ॥
नाशास्त्रं लिख्यते किंचिन्नानपेक्षितमेव च । तथाऽपि सर्वतन्त्रार्था उक्ता मूलानुसारतः ॥ ११ ॥

अथाऽऽत्मभवाञ्श्रीवाञ्छेश्वरः कविः 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥' इत्यभियुक्तोक्तिप्रामाण्यात्काव्यस्यानेकश्रेयःसाधनतां 'काव्यालापांश्च वर्जयेत्' इति निषेधस्यासत्काव्यविषयतां च पश्यन्स्वीयग्रन्थस्योपनिषत्प्रति-

पाद्यद्वितीयात्मप्रतिपादनद्वारा निःश्रेयसोपयोगितां तत्र सत्र प्रकटयिष्यन्महिषप्रबन्धाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितान्तरायनिरन्तरोपशान्तिचिरंतनसमागतसंप्रदायानुवृत्तिलक्षणफलसाधनत्वात् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्' इत्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वादाशीर्निर्देशमुखेन प्रबन्धतात्पर्यविषयीभूतमर्थं संगृह्णाति—स्वस्तीति। शिवस्य परमेश्वरस्य अनुग्रहात् प्रसादात्, समस्तं सकलं जगत् भुवनं तस्मै, प्रथमं आदौ, स्वस्ति कल्याणम्, अस्तु भवतु। 'नमःस्वस्ति' इत्यादिना चतुर्थी। गुणानां शब्दमादीनां स्तोमतः संघतः, शस्ताः श्रेष्ठाः सन्तः साधवः ये निवसन्ति वर्तन्ते तेऽमी सन्तः शिवानुग्रहात् इत्यनुषङ्गः। एवमभिसंबन्धवाक्यद्वयेऽपि बोध्यम्। सुखिनः शर्मिणः सन्तु भवन्तु। धर्मिष्ठे धर्मप्रधाने पथि मार्गे अवनिपाः भूपाः संचरन्तु प्रवर्तन्ताम्। तेषां अवनिपानां ये मन्त्रिणः सचिवाः ते दीर्घायुषः चिरजीविनः सुमनसः कोमलचित्ताः, आहृतः अङ्गीकृतः धर्मस्य सुकृतस्य उपदेशः जापनं यैस्ते धर्मोपदेशाहृताः। 'वाऽऽहिताग्न्यादिषु' इति परनिपातः। सन्तु भवन्तु। अत्र समस्तजगतः स्वस्तिप्रार्थनया स्वस्यापि तदन्तःपातिनः चिकीर्षितग्रन्थपरिसमाप्तिरूपाभिलषितप्राप्तिरपि प्रार्थिता भवति। तथा अविशेषेण सर्वप्राणिसंबन्धिस्वस्तिप्रार्थनया 'विद्याविनयसंपन्ने' इत्यादिभगवद्वचनोक्तद्वेष्यप्रियसाधारणसमत्वरूपब्रह्मनिष्ठत्वगुणः कवेर्व्यज्यते। द्वितीयपादेन च सतां निरस्तदुरितानां श्रेयोमात्रप्रार्थनाया अकिंचित्करत्वान्निरतिशयानन्दरूपपरमपुरुषार्थप्राप्तिरेव प्रार्थनीयेति व्यज्यते। एवं पूर्वार्धेन प्रार्थितार्थस्य राजाधीनत्वाद्राज्ञो मतिभ्रंशे सति जगतां कल्याणाप्रसक्तेस्तपःस्वाध्यायादिलोपेन साधूनामपि तन्मूलकसुखातिशयाप्रसक्तेः तदुभयसिद्ध्यर्थं तृतीयपादेन राज्ञां धर्मप्रवणता प्रबन्धपरमतात्पर्यविषयीभूता प्रार्थितेति ज्ञेयम्। राज्ञां धर्मिष्ठत्वमपि सचिवाधीनमिति तेषामैकमत्येन धर्मद्रष्टृत्वाभावे राज्ञस्तदनुपपत्तेश्चतुर्थपादेनामात्यादीनामेव बह्वाशीःप्रार्थनमिति द्रष्टव्यम्। अत्र पूर्वार्धे 'शस्ता गुणस्तोमतः' इति वाक्यार्थस्य सुखप्राप्तिहेतुत्वात्, उत्तरार्धे धर्मोपदेशाहृतपदार्थस्य दीर्घायुष्ट्वहेतुत्वाच्च वाक्यार्थहेतुकं पदार्थहेतुकं च काव्यलिङ्गमलंकारः। तथा सकारतकारावृत्तिरूपव्यञ्जनानुप्रासस्य स्पष्टत्वात्तथा सं मंमिति स्वरानुप्रासस्यसाच्च च्छेकानुप्रासलाटानुप्रासावपि शब्दालंकारौ; तथा निर्दोषत्वं सगुणत्वं च बोध्यम्। तथा च 'काव्यं ह्यदुष्टौ सगुणौ शब्दार्थौ सदलंकृती' इति काव्यसामान्यलक्षणस्य 'वाच्यातिशायि व्यङ्ग्यं यदुत्तमं तद्ध्वनिश्च सः' इत्युत्तमकाव्यलक्षणस्य च संपत्तिः सुलभैवेत्यस्मत्कृतश्लेषार्थचन्द्रिकायां विस्तरः। अस्मिन्प्रबन्धे शार्दूलविक्रीडितं वृत्तम्, 'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥ १ ॥

ये जाता विमलेऽत्र भोजकुले सूर्येन्दुवंशोपमे
राजानश्चिरजीविनश्च सुखिनस्ते सन्तु संतानिनः।

ये तद्वंशपरम्पराक्रमवशात्सभ्याः समभ्यागता-
स्ते सन्तु प्रथमानमानविभवा राज्ञां कटाक्षोर्मिभिः ॥ २ ॥

एवं मङ्गलं कृत्वा स्वोपजीव्यराजपरम्पराया आशिषं प्रार्थयते—य इति। सूर्यस्य रवेः, इन्दोश्चन्द्रस्य, यो वंशः अन्ववायः स उपमा यस्य सः तादृशः तस्मिन्, विमले निष्कलङ्के, अत्रास्मिन् प्रसिद्धे, भोसलकुले भोसलसंततौ, ये राजानो जाताः प्रादुर्भूताः ते राजानः, शिवानुग्रहात् इति पूर्वश्लोकस्थस्यानुषङ्गः। चिरं जीवन्तीति तादृशाः, सुखमेषामस्तीति तथोक्ताः, संतानं पुत्रपौत्रादिः एषामस्तीति तथोक्ताः, सन्तु भवन्तु। एवं राज्ञामाशिषं संप्रार्थ्य तदमात्यानामप्याशिषं प्रयुङ्क्ते—य इति। तद्वंशस्य भोसलवंशस्य परम्परायाः यः क्रमः पौर्वापर्यं तद्वशात् तदनुरोधात्, अस्यायममात्यः, तत्पुत्रस्य तदमात्यपुत्रः सचिवः, तत्पुत्रस्य तत्पुत्र इति रीत्येत्यर्थः। ये सभ्याः सभासदः समभ्यागताः ते अमात्याः, राज्ञां कटाक्षा ऊर्मय इव तरङ्गा इव; 'भङ्गस्तरङ्ग ऊर्मिर्वा' इत्यमरः। कटाक्षोर्मयः, तैः, प्रथमानौ वर्धमानौ मानविभवौ संमाननैश्वर्ये येषां ते तादृशाः सन्तु। अनेन स्वस्यापि राजामात्यपरम्परान्तर्गतस्य प्रथमानमानविभवत्वं प्रार्थितमिति सूचितम्। अत्र विमल इति विशेषणाद्राजकुलस्य चतुर्दशराजदोषरहितत्वं प्रतिपाद्यते। सूर्येन्दुवंशसादृश्याद्राज्ञां धार्मिकत्वपराक्रमित्वादयो गुणा व्यज्यन्ते। कटाक्षोर्मिभिः इत्यत्र कटाक्षाणां ऊर्मिसादृश्यप्रतिपादनात् उपमालंकारः। तेन च कटाक्षाणां सभ्येषूत्तरोत्तरमाधिक्यं व्यज्यत इत्यलंकारेण वस्तुध्वनिः। 'तद्वंशपरम्पराक्रमवशात् सभ्याः' इत्यनेन सभ्यानामपि संतानवृद्धिर्व्यज्यते। तेषां सभ्यपदेनोपादानाद्वेदशास्त्रसंपत्तिरात्मगुणसंपत्तिश्च ध्वन्यते। यथाऽऽह याज्ञवल्क्यः—'श्रुताध्ययनसंपन्नाः सप्त पञ्च त्रयोऽपि वा। राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः ॥' इति। न चास्य व्यवहारप्रकरणस्थत्वाद्व्यवहारपरिच्छेत्तृविषयत्वं मन्तव्यम्, सर्वत्रापेक्षितस्य प्रकरणलाघवेन एकत्र प्रतिपादितत्वात् ॥ २ ॥

नानाजिप्रभुचन्द्रभानुशहजीन्द्रानन्दरायादयो
विद्वांसः प्रभवो गताः श्रितसुधीसंदोहजीवातवः।
विद्यायां विषबुद्धयो हि वृषलास्तेभ्यास्त्विदानींतनाः
किं कुर्वेऽम्ब कृषे व्रजामि शरणं त्वामेव विश्वावनीम् ॥ ३ ॥

स्वस्य महिषप्रबन्धकरणे निमित्तं वदन् तदुपोद्घाततया आदौ कृषिं प्रशंसति—नानाजीति। नानाजिः धार्मिकश्रेष्ठः अमात्यः, प्रभुचन्द्रभानू राजा, शहजीन्द्रः प्रख्यातो राजा, आनन्दरायस्तदमात्यः प्रसिद्धः, एते आदयो मुख्या येषां ते एतादृशाः, विद्वांसो ज्ञानिश्रेष्ठाः,

श्रिता आश्रिताः ये सुधियः पण्डितास्तेषां संदोहः समूहः तस्य जीवातवो जीवनौषधरूपाः। 'जीवातुर्जीवनौषधम्' इति विश्वः। प्रभवो गताः; स्वस्वतपोविशेषैः प्राप्यान् शिवलोकादीनिति शेषः। इदानींतनाः अद्यतनाः प्रभवस्तु, वृषलाश्च ते असभ्याश्च पूर्वोक्तसभ्यलक्षणरहिताः; हि यस्मात्कारणात् विद्यायां श्रुतिस्मृतिपुराणादिविद्यायां विषबुद्धयः विषमिति बुद्धिर्येषां ते तथोक्ताः, सन्तीति शेषः। किं कुर्वे किं करोमीति खेदे। हे अम्ब मातेव रक्षणशीले, कृषे, विश्वावनीं विश्वस्य प्रपन्नस्य प्राणिमात्रस्येति यावत्। अवनीं रक्षणीम्, त्वामेव शरणं रक्षित्रीम्। 'शरणं गृहरक्षित्रोः' इत्यमरः। व्रजामि भजामि। 'शूद्रं यत्नेन वर्जयेत्' इति शूद्राधिकारस्य धर्मशास्त्रनिषिद्धत्वेन पण्डितानां शूद्राधिकृतदेशे संमानाद्यभावेन जीवनासंभवात् तस्मिन्देशे सर्वेषामपि कृष्यैव जीवनं भवतीत्यर्थः। अत्र विश्वावनीमिति साभिप्रायविशेषणात्परिकरालंकारः॥ ३॥

अक्षैर्मेति ननु श्रुतिः श्रुतिपथं प्रायः प्रविष्टा न किं
सौख्यं वा हलजीविनामनुपमं भ्रातर्न किं पश्यसि।
किं वक्ष्ये तदपि क्षितीश्वरबहिर्द्वारप्रकोष्ठस्थली-
दीर्घावस्थितिरौरवाय कुरुषे हा हन्त हन्त स्पृहाम्॥ ४॥

ननु कृषेर्नीचवृत्तित्वात् श्रुत्यादिप्रमाणाभावाच्च न युक्तं कृषिकर्मेत्यत आह—अक्षैरिति। 'अक्षैर्मा' इति श्रुतिर्वेदः श्रुतिपथं श्रवणपथं प्रायः प्रायेण न प्रविष्टा किम्? इयं श्रुतिः न श्रुता किमित्यर्थः; एतादृशश्रुतिश्रवणे सतीयमाशङ्का न जायत इत्यर्थः। 'अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहुमन्यमानः' इति श्रुतिः ऋग्वेदे शाकलशाखायां सप्तमाष्टकेऽष्टमाध्याये पठिता। अक्षैर्देवनैः मा दीव्यः द्यूतं मा कार्षीः, तर्हि जीवनं कथं? तत्राह—कृषिमित् कृषिमेव इच्छब्दोऽवधारणार्थश्छन्दसि दृष्टः। कृषस्व कुरुष्व। तथा च तद्द्वारा जीवितव्यमिति भावः। कृषिं कुर्वन् बहुमन्यमानः बहुभिर्लोकैः संभाव्यमानः सन् वित्ते धनधान्यादिरूपे रमस्व क्रीडस्वेति श्रुत्यर्थो बोध्यः। एतादृशश्रुत्यर्थस्य प्रत्यक्षसंवादमप्याह—सौख्यमिति। हलजीविनां लाङ्गलजीविनाम्, अनुपमं समानरहितं सर्वोत्तमं सौख्यं हे भ्रातः न पश्यसि किम्? पश्यस्येवेत्यर्थः। भ्रातरिति प्रमाणप्रष्टारं प्रति संबुद्धिः। तदपि तथाऽपि क्षितीश्वराणां राज्ञां बहिर्द्वारं द्वाराद्बहिः विद्यमाना या प्रकोष्ठस्थली प्रदेशविशेषः तत्र दीर्घावस्थितिरेव रौरवसंज्ञकं नरकं तस्मै स्पृहाम् इच्छां कुरुषे करोषि। किं वक्ष्ये किं कथये। यदेतादृशश्रुतिलोकानुभवयोः सतोरपि कृषिं परित्यज्य दुष्प्रभूपसर्पणे यत्नं करोषीति भावः। हा हन्त हन्तेति खेदातिशये। दीर्घावस्थितिरौरवायेति रूपकालंकारः॥ ४॥

दुर्भिक्षं कृषितो न हीति जगति ख्यातं किल ब्रह्मणा-
मापद्धर्मतया मनौ च कृषिगोरक्षादिकं संमतम् ।
भूपेष्वर्थपरेषु हन्त समये क्षुण्णे च दुर्भिक्षतो
वृत्त्यर्थं कृषिमाश्रयेम भुवि नः किं वा ततो हीयते ॥ ५ ॥

ननु श्रुतितात्पर्यस्य सर्वज्ञर्षिमात्रसमधिगम्यतया केवलं श्रुतिं दृष्ट्वा कृषिग्रहणं न युक्तम् । किं चोक्तश्रुतेर्वैश्यादिपरत्वेनाप्युपपत्तेर्न ब्राह्मणपरत्वं, नापि प्रत्यक्षसुखदर्शनात्प्रवृत्तिः, कलञ्ज-भक्षणादावपि प्रत्यक्षसुखसत्त्वेन तत्रापि शिष्टप्रवृत्त्यापत्तेरित्यत आह—**दुर्भिक्षमिति** । **कृषितः** कर्षणाद्धेतोर्**दुर्भिक्षं** क्षामं न हि भवतीति जगति भूतले ख्यातं किल प्रसिद्धं किल? लोके कृषिं कुर्वतां दारिद्र्यं नश्यतीत्यर्थः । **ब्रह्मणा** ब्राह्मणानामापद्धर्मतया आपदि जीवनलोपे धर्मतया मनौ मनुस्मृतौ च कृषिगोरक्षादिकं कृषिपाशुपाल्यादिकं संमतमङ्गीकृतम । तथा च श्रीमद्भागवते वर्णधर्मप्रकरणे—'वार्ता विचित्रा शालीनयायावरशिलोञ्छनम् । विप्रवृत्ति-स्त्रयी चाऽऽन्वीक्षिकी तुर्यं श्रयसी चोत्तरोत्तरा ॥' वार्ता विचित्रा कृष्यादिरूपा । वृत्तिष्वेव व्यवस्थां दर्शय-न्नापद्धर्मानाह—'जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः । ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः ॥' इत्यापद्धर्मतया भागवतोक्तिर्द्रष्टव्या । मनुरपि—षट्कर्मैको भवेत्तेषां त्रिभिरन्यः प्रवर्तते । द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति ॥' इति । एकः शालीनः याजनाध्यापनप्रतिग्रहकृषिवाणिज्य-पाशुपाल्यैः षड्भिर्जीवति । याजनादिभिस्त्रिभिरन्यः । द्वाभ्यामपरः । चतुर्थस्त्वध्यापनेनैवेत्यर्थः । तथा च नेयं श्रुतिर्वैश्यपरा । भागवतमनुवचनाभ्यामुक्तश्रुतितात्पर्यस्य ब्राह्मणादिसाधारणधर्म-विषयकत्वेन निर्णीतत्वान्न पूर्वोक्तशङ्कावकाश इति भावः । **भूपेष्वर्थपरेषु** अर्थलोलुपेषु सत्सु **समये** काले **दुर्भिक्षतः क्षुण्णे** बाधिते पीडिते सति च **वृत्त्यर्थं** जीवनार्थं **कृषिमाश्रयेम** भजेम । **भुवि** भूमौ **नोऽस्माकं ततः** कृष्याश्रयणात्**किं वा हीयते** त्यक्तं भवति । न किमपीत्यर्थः ॥ ५ ॥

आर्यश्रीधरमम्बुदीक्षितमिमौ दृष्ट्वा महापण्डितौ
विद्यायै स्पृहये न यद्यपि वरं क्षात्रं बिभेम्याहवात् ।
वाणिज्यं धनमूलकं तदखिलं त्यक्त्वा श्रितस्त्वामहं
त्वं विद्या च धनं त्वमेव सकलं[1] त्वं मे लुलायप्रभो ॥ ६ ॥

ननु प्रभुनिकटे विद्याया अनुपयोगेऽप्यध्यापनादिना विद्याजीवनं शास्त्रसंमतम्, तदेव कुतो न कृतमित्यत आह—**आर्येति** द्वाभ्याम् । आर्यो यः श्रीधरः श्रीधरनामा महापण्डितः,

1. निखिलं

अम्बुदीक्षितोऽग्निहोत्रसोमयागादिनित्यनैमित्तिकानुष्ठाननिरतः षड्दर्शनीवल्लभः। ताविमौ महापण्डितौ दृष्ट्वा विद्यायै न स्पृहये नेच्छामि। 'स्पृहेरीप्सितः' इति संप्रदानत्वम्। तयोर्याजनाध्यापनशीलयोरपि दारिद्र्यपीडितत्वादिति भावः। यद्यपि क्षात्रं क्षत्रवृत्तिः प्रजापालनराज्यसंपादनादि वरं श्रेष्ठम्। तत्र संपत्समृद्धया जीवनं भवतीति भावः। तथाऽप्याहवाद्युद्धात् बिभेमि भयं प्राप्नोमि। 'भीत्रार्थानां भयहेतुः' इत्यपादानत्वम्। तर्हि निर्भयत्वाद्वाणिज्यं कार्यमित्याशङ्क्याह—वाणिज्यमिति। वाणिज्यं मूल्येन क्रयविक्रयद्रव्यसंप्रयोगादिकं धर्मशास्त्रप्रसिद्धं निरुपद्रवमिति शेषः। तत्रापि स्वस्याप्रवृत्तिहेतुमाह—धनमूलकृमिति। धनं सुवर्णादिकं मूलं मूलकारणं यस्य तत्तादृशम्। अनेन स्वस्य धनसंपत्त्यभावेन तत्र युज्यत इति सूच्यते। तत्तस्मात्कारणात्, अखिलं पूर्वोक्तं विद्याक्षात्रवाणिज्यादिकं त्रैवर्णिकमुख्यधनागमनिमित्तं त्यक्त्वा त्वां लुलायप्रभुमाश्रितः, नान्यद्विद्यादिकमिति भावः। लुलायाश्रयेण किं भविष्यतीत्यत आह—हे लुलायप्रभो, त्वं विद्या विद्याकार्यकारी, विद्याशब्दस्य विद्याकार्ये लक्षणाङ्गीकारात्। त्वमेव धनं, धनकार्यसुखादिकारित्वात्। सकलं क्षात्रवृत्त्यादिकमपि त्वमेवेत्यर्थः। क्षात्रवृत्त्यादौ भयमुपपाद्य त्वमेव सर्वकार्यकारीत्युक्त्या महिषमूलककृष्यादौ भयादिदोषप्रसक्तिर्नास्तीत्याशय आविष्कृतः। तथा च विद्यार्जनस्य मुख्यस्यासंभवान्नीचवृत्तिरपि कृषिराश्रयणीयेति भावः॥ ६॥

विद्यापण्यविशेषविक्रयवणिग्जातः सुधीः श्रीधरः
स्वन्नं स्वर्णमभूद्धताम्बुमखिनो धिक्तस्य षड्दर्शनीम्।
ख्यातः [1]कुट्टिकविस्तु दुर्धनिगृहद्वारेषु निद्रायते
तत्सर्वं महिषेश्वरानुसृतेर्दौर्भाग्यधाम्नः फलम्॥ ७॥

पूर्वश्लोकप्रतिपादितविद्याजीवनासंभवमेव स्पष्टयति—विद्येति। श्रीधरः श्रीधराख्यः सुधीः पण्डितः, विद्या वेदादिः, सैव पण्यं क्रय्यं वस्तु, तस्य विशेषविक्रयेण द्रव्यदानानुरूपाध्यापनेन; येन बहु द्रव्यं दीयते स बह्वध्याप्यते, येन त्वल्पं स त्वल्पमध्याप्यत इति विशेषविक्रयपदसूचितार्थः। वणिग्वैश्यो जातः संपन्नः, वाणिज्यस्य वैश्यधर्मत्वादिति भावः। अम्बुमखिनः अम्बुदीक्षितस्य स्वन्नं सुष्ठु अन्नं शाल्योदनादिकं स्वर्णं काञ्चनमभूत्। तस्याम्बुमखिनः षड्दर्शनीं षण्णां दर्शनानां समाहारः षड्दर्शनी तां धिक्, यद्वोक्तुमन्नमपि दुर्भिलं किं तस्य षड्दर्शन्येति भावः। तत्सहाध्यायिनः स्वस्य दशामाह—कुट्टिकविः स्वयं दुर्धनिनां दुष्टधनिकानां गृहद्वारेषु बहिःप्रदेशेषु निद्रायते स्वपितीति ख्यातः। तत्सर्वं त्रयाणामप्येतादृशं दुःखं दौर्भाग्यस्य दारिद्र्यस्य धाम्नः

1: कुट्टिकवि

स्थानभूताया महिषेश्वरस्य लुलायराजस्याननुस्मृतेरनुनयाभावस्य फलं प्रयोजनम्। तस्मादध्यापनेन जीवनं न संभवतीति भावः। तदुक्तं शास्त्रनिर्णये—'कपिलस्य कणादस्य गौतमस्य पतञ्जलेः। व्यासस्य जैमिनेश्चैव दर्शनानि षडेव तु॥' इति॥ ७॥

विद्वन्मा कुरु साहसं शृणु वचो वक्ष्यामि यत्ते हितं
त्यक्त्वा कामदमत्र सैरिभपतिं निर्व्याजबन्धुं नृणाम्।
श्रीरङ्गाभिधपत्तनं प्रति सखे मा गा ज्वरस्यालयं
दूरे श्रीर्निकटे कृतान्तमहिषग्रैवेयघण्टारवः॥ ८॥

ननु स्वदेशे विद्याप्रयोजनाभावेऽपि देशान्तरेषु विद्याधिक्यसंभवात्तत्र गत्वा सुखेन स्थेयमित्यत्राह—विद्वन्निति। हे विद्वन्, श्रीधरार्य, साहसं बलात्कारकार्यम्। 'साहसं तु बलात्कारकृतकार्ये दमेऽपि च' इति विश्वः। मा कुरु न कुरुष्व। ते यद्धितं सुखकरं तद्वक्ष्यामि ब्रवीमि, शृणु। कामानामभिलषितानां धनधान्यादीनां दातारं नृणां पुरुषाणां निर्व्याजबन्धुमनिमित्तोपकारिणं सैरिभपतिं लुलायप्रभुम्। 'लुलायो महिषो वाहद्विषत्कासरसैरिभाः' इत्यमरः। त्यक्त्वा परित्यज्य ज्वरस्य तापरोगस्यालयं श्रीरङ्गेत्यभिधा संज्ञा यस्य पत्तनस्य जनपदस्य तादृशं श्रीरङ्गपत्तनमित्यर्थः। मा गाः न गच्छ। कुत इत्यत आह—दूरे दूरदेशे तत्र संपद्रूपा श्रीर्लक्ष्मीः, श्रूयत इति शेषः। यद्वा दूरे श्रीः चिरकालसाध्येत्यर्थः। निकटे श्रीरङ्गपत्तनसमीपदेशे, यद्वा निकटे झटितीत्यर्थः। कृतान्तस्य यमस्य यो महिषो वाहनभूतः, तस्य या ग्रीवाबद्धा घण्टा, तस्या रवः शब्दः, श्रूयत इति शेषः। तथा च तत्र ज्वररोगाधिक्याद्वैदेशिकानां पण्डितानां तत्र धनार्जनार्थं गमनमनुचितमिति भावः। अत्र श्रीरङ्गपत्तनस्य ज्वराधिक्यप्रतिपादनेनेतरदोषाभावस्तत्रत्यप्रभोर्विद्यापक्षपातित्वं तत्रत्यपण्डितानां विद्याजीवनं च व्यज्यते। ज्वरस्यालयमित्यत्र परिकरोऽलंकारः। साहसमित्यस्योत्तरवाक्यैः समर्थनात्काव्यलिङ्गालंकारः॥ ८॥

यं यो रक्षति तस्य स प्रभुरिति स्पष्टं हि मद्रक्षिणो
राजश्रीमहिषान्विचुत्य सफलं कुर्वेऽद्य वाग्वैभवम्।
मत्पीडानिरतान्मदीयमहिमाभिज्ञानशून्यान्प्रभू-
न्यन्निन्दामि निशम्य तद्गुणविदस्तुष्यन्तु सन्तो नृपाः॥ ९॥

एवं पूर्वोक्तरीत्या विद्याजीवनासंभवमुपपाद्य कृषिरेव कर्तव्येति श्रुतिस्मृतिप्रत्यक्षार्थापत्तिभिर्निश्चित्य तन्मुख्यसाधनं महिषं वर्णयितुं तस्य प्रभुत्वमुपपादयंस्तद्द्वारा कृत्याकृत्यविवेकशून्यान्-

मन्यायार्जितवित्तानां शिष्टंमन्यदुर्विदग्धानां मूढानां राज्ञां चरितोपदेशरूपमेतत्प्रबन्धप्रयोजनमाह—यमिति। यं पुरुषं यो नरो रक्षति पालयति तस्य स रक्षकः प्रभुरिति हि यस्मात्कारणात्स्पष्टं प्रसिद्धम्। तदिति शेषः, तस्मात्कारणात् मद्रक्षिणो मत्पालकान् राजश्रिया राजलक्ष्म्या युक्तान्महिषान्महिषाख्यप्रभून्विनुत्य विशेषेण स्तुत्वा वाग्वैभवं माहित्यप्रागल्भ्यम्, अद्येदानीं सफलं सप्रयोजनं कुर्वे करोमि। मत्पीडायां मदीयहिंसायां निरतान्प्रवृत्तान मदीयमहिम्नो मत्प्रभावस्य यदभिज्ञानं परिचयः तेन शून्यान्रहितान्प्रभून्यन्निन्दामि तद्दूषणं निशम्य श्रुत्वा गुणविदः सद्गुणग्राहिणः सन्तः श्रेष्ठाः नृपा राजानस्तुष्यन्तु संतुष्यन्तु। अनेनैतद्ग्रन्थप्रयोजनं दुष्टानां सन्मार्गप्रवृत्तिरूपं दर्शितं बोध्यम। अत्रापि निन्दायां हेतूपन्यासात्काव्यलिङ्गमलंकारः॥ ९॥

कंचित्पश्वधमं लुलाय विगुणं कर्तुं प्रबन्धाञ्शतं
त्वामालम्ब्य समुत्सहे न खलु तद्वर्ण्यस्य माहात्म्यतः।
मद्द्रोहप्रवणाधिकारिहतकक्रोधेन तन्निन्दन-
व्याजात्तत्प्रभुतत्प्रभुष्वपि च वाग्दण्डो मया पात्यते॥ १०॥

ननु महिषस्य सर्वलोकनिन्द्यस्य स्तुतिरूपप्रबन्धकरणापेक्षया मुग्धानां प्रत्यक्षहितोपदेश एव युक्त इत्यतो द्रोहप्रवणचित्तानां खलानां हितोपदेशो न फलिष्यतीत्याह—कंचिदिति। पशूनां चतुष्पदामधमं निकृष्टं विगुणं शोभनगुणहीनं त्वामालम्ब्य विषयीकृत्य शतं प्रबन्धान् शतं श्लोकान्कर्तुं रचयितुं समुत्सहे संतोषयुक्तो भवामि। तत्प्रबन्धकरणं वर्ण्यस्य महिषस्य माहात्म्यतः प्रभावाद्धेतोर्न खलु, संभवतीति शेषः। विगुणत्वपश्वधमत्वादिना वर्णयितुमयोग्यत्वादिति भावः। तर्हि किमिति प्रवृत्तिः? अत आह—मद्द्रोहे मदीयापकारे प्रवणो जागरूको योऽधिकारिहतकः खलाधिकारी। तस्य निन्दनं दूषणमेव व्याजः, तस्मात्तत्प्रभुषु खलाधिकार्यपेक्षया किंचिदधिकेषु तत्प्रभुषु तदपेक्षया किंचिदधिकेषु च दुष्टाधिकारिषु वाग्रूपो यो दण्डः शिक्षा मया पात्यते क्षिप्यते। मूर्खाणां हितोपदेशस्य सर्वथा दुष्करत्वात्साक्षाद्धर्मोपदेशो न संभवतीति निकृष्टवर्णनद्वारैव खलाः सन्मार्गे प्रवर्तनीया इति भावः॥ १०॥

श्रुत्वेमं महिषप्रबन्धमिह ये भूपा गुणग्राहिण-
स्ते बुद्ध्वा निजदुर्गुणान्कविमुखात्तद्वयङ्ग्यमर्यादया।
अद्रोहेण निजाः प्रजा इव यथाधर्मं प्रजा रक्षितुं
कुर्वन्तु स्वकुलक्रमागत[1]नरान्देशाधिकारोचितान्॥ ११॥

---

१. वरान्

INTRODUCTION.

Royal authors of works on Sanskrit Language and Literature have always been well known to students of Indology. Some Orientalists like Theodore Aufrecht and Arthur Antony Macdonell had always held the belief that these Royal Authors usually palmed off the works of their court-pandits as their own. But this short-sightedness among Indologists is slowly disappearing.

We are therefore glad to bring to light for the first time the first two Prakasas of Maharajadhiraja Sri Bhojadeva's monumental work on Rhetoric, the Sringaraprakasa, which was first discovered in its complete form by the Peripatatic Party of the Madras Government Oriental Manuscripts Library during its search for new and rare works in Malabar in 1920.

Maharajadhiraja Bhojadeva lived in the first half of the 11th century A. D. It is known that he composed the Rajamrganka, an astronomical treatise in Saka 964 or 1042 A. D. It is also known that Parantaka, the author of the famous Syamaladandaka was honored by King Bhojadeva with a grant in Saka 923 or A. D. 1001. He was King of Malwa from 1018 A. D. to 1054 A. D.

King Bhojadeva was a prolific writer on all departments of knowledge. More than twenty works are attributed to him by Dr. T. R. Chintamani of the University of Madras, in his Introduction to his edition of the Sarasvatikantha-bharana (University of Madras 1937).

To Indian Rhetoricians, Bhojadeva's Sringaraprakasa had long been known as a voluminous work, bristling with quotations from numerous authors. A critical study of the text by modern students had been handicapped by the want of a printed edition.

The enthusiastic Orientalist His Holiness Sri Yatirajaswami of Melkote, Mysore printed the three Prakasas, 22, 23 and 24 in 1926 as a Part. But it has not been followed up since then. The Madras Government Oriental Manuscripts Library included the publication of the Sringaraprakasa in its programme of publications and prepared a press copy of the first six Prakasas,

under the immediate supervision of Pandit V. Krishnamachariar. It is in furtherance of this scheme, that Prakasas 1 and 2 are now published for the first time as Part I, so that scholars might not be kept waiting too long.

Dr. Raghavan of the University of Madras made a critical study of the contents of the Sringaraprakasa and has recently published, a portion of his thesis as "Bhoja's Sringaraprakasa Vol. I–Part I (Karnatak Publishing House, Bombay 1940). The thesis is a critical examination of the contents of the Sringaraprakasa and brings to light much interesting material of permanent value to students of Indian Literary Criticism.

Bhojadeva's chief contribution is to establish that Sringara or Love is the *only* Rasa and to dispel the time-honoured darkness from the minds of those who recognised the Rasas to be ten (Dr. Sankaran has an interesting chapter on King Bhojadeva in his "Some Aspects of Literary Criticism in Sanskrit"—Madras University 1929).

In Prakasas 1 and 2 of the Sringaraprakasa, Bhojadeva quotes profusely from Panini, Patanjali, Yaska, Vakyapadiya, Vatsyayana (p. 7), Venisamhara (pp. 31 and 89), Sangrahakara, probably Vyadi (p. 46) Katyayana (p. 53), Mallanaga (p. 53), Hari (p. 54) Candragomi (pp. 60 & 81) and Manu (p. 87). There are also some unidentified quotations, notably in pp. 4, 56, 60, 65 & 89.

A detailed table of contents and an alphabeticalindex to the slokas in the Sringaraprakasa (1 & 2) are also furnished.

Thanks are due to my learned Colleague, Pandit V. Krishnamachariar, who saw the work through the press.

The Sri Vani Vilas Press, Srirangam deserves our warmest thanks and gratitude for having successfully co-operated with Government in bringing out in quick succession five books in three years, Nos. 8, 9, 10, 11 & 12 of the Madras Government Oriental Manuscript Series.

Presidency College,
Madras.
31—3—42.

P. P. SUBRAHMANYA SASTRI,
Curator, Government
Oriental Manuscripts Library.

॥ विषयसूचिका ॥

	पुटम्
॥ प्रथमः प्रकाशः ॥	
उपोद्घातः	१
शब्दः द्वादशधा	४
प्रकृतयः-धातुरूपाः-परिपठिताः	,,
,, ,, अपरिपठिताः	५
,, ,, परिपठितापरिपठिताः	,,
,, ,, प्रत्ययधातवः	,,
,, ,, नामधातवः	६
,, ,, प्रत्ययनामधातवः	,,
,, प्रत्ययरूपाः-सुप्प्रत्ययान्ताः	७
,, ,, तिङ्प्रत्ययान्ताः	,,
,, ,, कृत्प्रत्ययान्ताः	,,
,, ,, तद्धितप्रत्ययान्ताः	,,
,, ,, धातुसंज्ञाप्रत्ययान्ताः	,,
,, ,, स्त्रीप्रत्ययान्ताः	,,
,, प्रातिपदिकरूपाः-नामानि	८
,, ,, अव्ययानि	९
,, ,, अनुकरणाः	२२
,, ,, कृतः	२४
,, ,, तद्धिताः	,,
,, ,, समासाः	,,
प्रत्ययः-धातुप्रत्ययः-सनादयः	२६
,, ,, विबादयः	,,
,, ,, तुमुनादयः	,,

	पुटम्
प्रत्ययः-धातुप्रत्ययः-तव्यादयः	२६
,, ,, ण्वुलादयः	,,
,, ,, उणादयः	,,
,, प्रत्ययप्रत्ययः-यदादयः	,,
,, ,, घादयः	,,
,, ,, मबादयः	,,
,, ,, फगादयः	,,
,, ,, युजादयः	,,
,, ,, ढगादयः	,,
,, प्रातिपदिकप्रत्ययः-टाबादयः	,,
,, ,, स्वादयः	,,
,, ,, तसिलादयः	२७
,, ,, कादयः	,,
,, ,, अणादयः	,,
,, ,, क्यजादयः	,,
उपस्कारः-प्रकृत्युपस्कारः-भूषणाः	,,
,, ,, समवायाः	,,
,, ,, अध्याहाराः	,,
,, ,, वैकृताः	,,
,, ,, यत्नाः	,,
,, ,, प्रतियत्नाः	,,
,, प्रत्ययोपस्कारः-भूषणादयः	,,
,, उभयोपस्कारः-भूषणादयः	२८
उपपदम्-तिङुपपदम्-क्रियाकृपम्	,,

	पृष्ठम्
उपपदम्–तिङुपपदम्–कारकरूपम्	३८
,, ,, नामरूपम्	,,
,, ,, अव्ययरूपम्	,,
,, ,, निपातरूपम्	,,
,, ,, उपसर्गरूपम्	,,
,, कृदुपपदम्–क्रियारूपादयः	३९
,, सुबुपपदम् ,,	,,

॥ द्वितीयः प्रकाशः ॥

प्रातिपदिकम्–विभक्तावयवम्–कृद्रूपम्	४०
,, ,, तद्धितरूपम्	४६
,, ,, समासरूपम्	६५
,, अविभक्तावयवम्–नामरूपम्	७५
,, ,, अव्ययरूपम्	,,
प्रातिपदिकम्–अविभक्तावयवम्–निपातरूपम्	७५
,, अनुकरणम्–साध्वनुकरणम्	७६
,, ,, असाध्वनुकरणम्	,,
,, ,, अव्यक्तानुकरणम्	,,
विभक्तिः–तिङ्विभक्तिः	,,
,, सुब्विभक्तिः	,,
,, अव्ययविभक्तिः	,,
उपसर्जनम्–विशेष्यरूपम्	७७
,, विशेषणरूपम्	,,
,, तुल्यरूपम्	,,
समासः–उपश्लिष्टक्रियः	८०
,, गमितक्रियः	,,
,, अक्रियः	,,



॥ शृङ्गारप्रकाशे प्रथमद्वितीयप्रकाशस्थश्लोकाना-मादिवर्णानुक्रमणिका ॥

	पुटम्		पुटम्		पुटम्
अच्छिन्नमेखल	1	गिरो गीर्त्रह्म	6	प्रकृष्ट इति	62
अनन्तरोक्तः	57	चटचटिति	23	प्रपराषस्व	15
अनुस्कुनुहि	5	चर्मणि द्वीपिनं	39	भूयात्तेषां	4
अनुस्यूतेव	69	छिन्नेन पतता	22	मिलन्त्याशासु	5
अप्रातिकूलि	3	जातिगुणा	47	मीमांससे न	5
अर्हतो या क्रिया	49	तडित्खचयती	5	मुसलक्षेप	5
अवधेरपि	47	तत्स्वभाव	41	यत्पादपङ्कज	1
अविमहा	53	तात्पर्यमेव	2	या सामान्याश्रया	29
अव्ययानि	39	तेषामुच्चा	65	रत्यादयोऽर्ध	3
अस्यौपम्य	50	त्रिधोपसर्जनं	89	रत्यादयो यदि	3
आत्मस्थितं	2	त्यागरूपं	51	रोषावेशा	80
आभावनोदय	3	त्वं जीवितम्	23	वल्गूयति	6
आयतीगव	80	दण्डादण्डि	80	वष्टि भागुरि	16
इवशब्दप्रयोगे	56	देवदत्तादि	62	विशेषः श्रूय	54
उक्ता षोढैव	8	द्वन्द्वो यावं	28	वीराद्भुता	2
उपमानोपमेय	49	द्विष्ठोऽप्यसौ	55	शलाकापर्व	80
एक इह	62	धातुप्रकरणा	6	शृङ्गारवीर	2
कण्डूयति न	6	न केवलेह	39	सत्वात्मना	2
कपोलौ	5	न च सांप्रतिकी	62	सरस्वतीव	50
कमिबुध्यन्तु	6	न रुणत्मीन्द्रिय	4	स वाचको	65
कविः सृजति	4	निसर्गभिन्ना	79	सविता विधवति	6
कालानुपाति	40	नीपानान्दोलय	5	संबन्धिशब्दः	28, 58
किं द्वारि	61	पतयालूनि	5	सुसूक्ष्मजटकेशादौ	29
कुत्सा प्रशंसा	61	पदामह	90	सुसूक्ष्मजटकेशेन	28
कुत्सितत्वेन	62	पिपिप्रिय	23	सूर्यीयति सुधा	5
कौमारी सा	52	प्रकृतिप्रत्ययौ त्रेधा	89	सोऽयमित्यभि	41
क्रियाविशेष	18	प्रकृतिप्रत्ययावेवं	39	स्थायित्वमत्र	3
गच्छेति वक्तु	22	प्रकृतिः प्रातिपदिक	35	होडसे	6
गतमस्तं	42	प्रकृतिः षट्प्रकारै	7		
गतेऽर्धरात्रे	23	प्रकृत्यर्थविशिष्टो	57		

॥ श्रीशंकरगुरुकुलपत्रिका ॥

THE JOURNAL

OF THE

SRI SANKARAGURUKULAM, SRIRANGAM.

Editor : Gurubhaktasikhamani, Sastraprasarabhushana, T. K. Balasubrahmanya Aiyar, B A., Founder of Sri Sankaragurukulam, Srirangam.

Literary Adviser : Vidyasagara, Vidyavacaspati, P. P. Subrahmanya Sasri B.A. (Oxon), M.A., Curator, Government Oriental Manuscript Library and Professor of Sanskrit, Presidency College, Madras.

The Main features are :

1. The publication of rare and hitherto unpublished works of writers of established reputation on all branches of learning baring on Hindu Culture and Learning.
2. The reviewing of books and periodicals on current thought.
3. The encouraging of the production of original compositions in Sanskrit by contemporary writers and poets.

Annual Subscription Rs. 6/only.

The Journal is now published Quarterly and has completed three years. If sufficient encouragement is forthcoming it is hoped to convert it into a Bimonthly and even a Monthly.

Vols. I, II & III are available at Rs. 6 each volume. Postage extra.

Srirangam Sri Sankaragurukula Series No. 9.

॥ स्तोत्ररत्नमाला ॥

STOTRA RATNAMALA

PART I

CONTAINING RARE STOTRAS BY DIFFERENT ANCIENT AUTHORS.

EDITED BY

Gurubhaktasikhamani, Sastraprasarabhushana,

T. K. BALASUBRAHMANYA AIYAR, B. A.

Dharmadhikari, Sri Sankaragurukulam, Srirangam.



— SRIRANGAM —

SRI SANKARAGURUKULAM.

SRI VANI VILAS PRESS,

SRIRANGAM

॥ विषयसूचिका ॥

स्तोत्रसंख्या	स्तोत्रनाम	कर्तृनाम	पुटसंख्या
	॥ शिवस्तोत्राणि ॥		
1.	दक्षिणामूर्तिस्तोत्रम्		२७
2.	निग्रहाष्टकम्	श्रीमदप्पय्यदीक्षिताः	१३
3.	न्यायशतकम्	श्रीरामेश्वरमखिनः	१७
4.	हरस्तुतिः	श्रीनिवासकविः	७
5.	हरिहरतारतम्यशतकम्	श्रीरामेश्वरमखिनः	२९
6.	जगद्गुरुधामसेवाशतकम्	श्रीनिवासमखिनः	६७
	॥ देवीस्तोत्राणि ॥		
7.	उमाष्टकम्		५७
8.	कामाक्षीस्तोत्रम्		१५
9.	गिरिजादशकम्		६२
10.	श्रीगौरीनवरत्नमालिकास्तवः		२८
11.	चण्डिकास्तवः	श्रीशंकरशास्त्रिणः	५४
12.	ज्ञानप्रसूनाम्बिकास्तोत्रम्		६०
13.	पार्वत्यष्टकम्		४
14.	श्रीबालाम्बिकाष्टकम्	स्कान्दे, वैद्यनाथमाहात्म्ये	१७
15.	भ्रमराम्बाष्टकम्	दुर्वासोमुनिः	६५
16.	मीनाक्षीनवरत्नमालास्तोत्रम्		३५
17.	मूकाम्बास्तोत्रम्		४१

स्तोत्रसंख्या	स्तोत्रनाम	कर्तृनाम	पुटसंख्या
18.	राजराजेश्वरीमातृकामन्त्रस्तवः	श्रीशंकरानन्दः	१
19.	श्रीशैलभ्रमराम्बिकाष्टकम्	गर्गः	३९
20.	सप्तरत्नमालिकास्तोत्रम्	कालिदासः	५९
	॥ विष्णुस्तोत्रम् ॥		
21.	हरिस्तुतिः	श्रीनिवासकविः	६
	॥ लक्ष्मीस्तोत्रम् ॥		
22.	कमलास्तवकर्णरसायनम्	मेधाश्री पण्डित नारायणशास्त्रिणः	४३
	॥ प्रकीर्णकस्तोत्राणि ॥		
23.	सप्रकारतारकावलिः	श्रीनिवासकविः	१०
24.	हरिहरस्तुतिः	,,	९



The Journal

OF THE

Sri Sankaragurukulam

Srirangam

VOL. III. NO. 12.

THE SUPREME DONEE

By R. KRISHNASWAMY AIYAR, M. A., B. L.

The Vedanta wants us to rise to a conception of the self as transcending all embodiment. The conception itself is a very difficult one and its realisation more so. From time beginningless we have always known ourselves as embodied. To ask us therefore to believe that we are really and in essence bodiless is virtually, it seems to us, to deny our very existence. It may be fair and reasonable to ask us to realise that the bodies are not ourselves but it goes against our grain to accede to the idea that the bodies are not even *ours*. However much we may dislike this idea, it is even this that is insisted on as condition precedent to realisation of the true Self. If we are keen upon knowing the true nature of the Self, we have to reconcile ourselves, at least in easy stages, to this, at-present revolting, idea of absolute unrelatedness to the bodies.

When a coat which we have worn for some time becomes torn and useless for us, we do not immediately throw it into the dust-bin at the end of the street. We keep it with us till we give it to a beggar or to a collector of rags. The psychology of this phenomenon seems to be this. We are so accustomed to think of the coat as an object to be owned and possessed that we are loth to immediately make it *dis*-owned and

un-possessed by anybody. We wait therefore for an opportunity to make it the property of and transfer it to the possession of somebody who is capable of owning and possessing it and certainly not of the dust-bin which is incapable of doing either.

While walking along a road, I find a two anna piece lying in front of me. I know it is not mine and I do not want it. Yet I stoop down and pick it up and pass it on to the first beggar or urchin that I meet on the road. Why? Here again, the explanation is the same. Though the coin is not mine and I do not want to own it, my mind from force of long habit is unable to tolerate the idea of a coin being ownerless. I do not therefore simply pass along or pick it up and throw it off the road but seek somebody who is capable of being or becoming its owner; I get greater relief when the very person who has dropped it claims it from me as his own. "To be owned" is in my mind, a necessary attribute of that thing and I feel uneasy when I find it without an owner and I do not feel at ease till I find the actual owner or make somebody else or myself the owner so that it may "be owned."

The same mentality is responsible for our disinclination to treat our bodies as unrelated to us. We have till now been in the habit of looking upon them as ours. We are by force of habit from time beginningless, quite unwilling to conceive of our bodies as "un-owned." "If we cannot own them and if the Vedanta insists upon our dis-owning them, let it be so. But don't tell us that they must remain unowned, for our conception of them has alway been that they are owned things. As it is their essential nature to be owned how can they possibly, remain without an owner? How can we feel at ease at all until we find somebody who is capable of exercising dominion over them and until we make him their owner? It is impossible for us to reconcile ourselves to the idea of throwing away into the dust-bin of inanimate Matter these bodies which we have clung to so long as our very selves. If you want us to discard them, you must find first a proper owner for them." It is this kind of natural feeling that is responsible for many persons devoting their bodies to the service of their fathers, their Gurus, their families, their kings, their countries or their religions; they vest the latter with the dominion over their bodies and are content to dedicate them to their service. The path of selflessness does lie that way, no doubt. But the Vedantic ideal of selflessness is still higher.

Just as we freely and gladly part with the coin picked upon the road to a coin-less beggar or to the owner of the coin itself, so are we asked to seek

somebody who is bodiless or who is the owner of the bodies even when they are in our possession, That Somebody is called God. He happens to combine in Himself both the characteristics of being bodiless and yet of owning all our bodies. If we freely and gladly retire from the ownership of the bodies and surrender them into His divine keeping, they cease to be ours and we cease to be troubled any longer by the worries which attached themselves to us as long as we thought them to be ours. This is the attitude of the true Bhakta or devotee.

The willingness to surrender our bodies to the keeping of the Lord rather than equate them with the world of Matter is due to an innate and indelible feeling that they are worth something. Our reluctance to throw the unwanted coin into the dust-bin and our seeking somebody who can own it are both due to the fact that, even when *we* do not want it, we feel that *it* is a valuable thing. Though the stage may have been reached by us where we realise that the bodies have no value *for* us, we still cling to the thought that they are valuable in themselves and this thought effectively prevents us from agreeing to the idea of their being lost, as it were, in the world of Matter.

The same thought is equally responsible for preventing us from agreeing to an idea of their being lost or annihilated or of their losing their individuality in God also, however much we may have reconciled ourselves to the idea of their being surrendered to God. In other words, however intensely and sincerely we may devote and dedicate our bodies to God, we expect Him to keep them and retain them as valuable things. When we pick up an unwanted coin and pass it on gladly to a begger instead of throwing it into a dust-heap, we shall feel insulted if before our very eyes the beggar throws it into the dust-heap. The insult is not in any way lessened by the fact that we do *not* want the coin. Similarly, when we pass on to God the ownership of our bodies, we shall be sorely grieved if *He* makes them lose their individuality by dissolving them in the world of matter. In short, whenever we dedicate the bodies, nay any the slightest thing on which we set value ever so small, we in our heart of hearts expect a grateful smile of thanks from Him and an implied promise that He will treasure our valuable gift.

If I present a silver cup to a friend on the occasion of his marriage, I cease to have any ownership over it and clothe him with all the incidents of absolute ownership. And yet, if I happen to hear about six months later that he has pledged it with a pawn-broker

or sold it to somebody else or melted it and made some other article out of that silver or lost it or even broken its rim or in fact done anything with it inconsistant with its remaining as a silver cup worthy of being treasured as a marriage present, I am solely grieved and I may also regret having made a present of it to one who has proved to be so ungrateful, unworthy or careless. Mind you, all this feeling comes to me long after I have ceased to have any ownership or dominion over the cup and this is explainable only on the basis that, though it is not mine, I still continue to attach value to it. I do not pick up a pebble from the road to give it to a beggar or feel sorry if he throws it away.

The highest devotee therefore, even when he is prepared to hand over and surrender absolutely to God all his possessions and even all his bodies, his conception of God is circumscribed by this idea that He must accept the gift with a "Thank you" and treasure the gift as a valuable acquisition and not do anything with it which will have the effect of impairing its value, and more particularly, which will make it lose its individuality or identity. "Even such a God am I who accepts and treasures with pleasure the smallest thing you give to Me with true devotion" is the assurance of the Lord in His Sacred Song on the battlefield of Kurukshetra (Gita ix, 26).

The Divine Donee is never under any necessity to pledge, sell away or transform our gifts nor is He likely to lose or injure it, unlike my friend who gets the cup from me as a marriage present. The whole world is His Treasure House and Museum and He is carefully looking after it, not from any residential quarters outside it and not during any office hours only, but He lives and has His being in every part of it, from the little body of the protoplasm to the cosmic body of Hiranyagarbha, and through and for all time. He is the Eternal Friend of all of us including the most insignificant of us and is ever ready to accept our sincere gifts ever so insignificant. He is never ungrateful, never becomes unworthy and never slights or misuses our gifts. No occasion can possibly arise for our ever regretting our gift to Him. Such is the God of the devotee.

The God to whom we can so dedicate our bodies without the latter losing their individuality has necessarily to be conceived of as One who has in His nature a place, as it were, where He can provide for the accommodation of the bodies without their being dissolved or merged into Himself. He must have such places for not only the bodies of ourselves but for the bodies of all who have bodies. Our conception therefore of Him has to be of One who has room in His nature for all the

bodies of the world. The term "body" is applicable not only to this gross body of physical matter but is equally applicable to the subtle body of mind-matter and the still subtler body the seed of individual consciousness. All these three bodies, severally known as Sthula (gross), Sukshma (subtle) and Karana (causal), cling to, circumscribe and get equated with the *I* in us which remains the same in all of them. Similarly, the God of the devotee who has to be the repository of all these three kinds of bodies has also to be considered as threefold, though the bodiless God inhering in them ever remains the same.

God conceived of as the repository or sum-total of all physical bodies is known to the Vedanti as *Virat* or Vaisvanara. The same God conceived of as the repository or sum-total of all subtle bodies is given the name of *Hiranyagarbha* or Sutratma. The very same God conceived of as the repository or sum-total of all causal bodies is called *Isvara* or Antaryami. The Hindu religion does not postulate at all *three* Gods. Just as *our* three bodies, the gross, the subtle and the causal, do *not* split our personality into three and just as that personality subsists throughout as only one, so does the conception of three cosmic bodies for God not mean any splitting of Godhead into three, for He ever remains one. In Puranic phraseology, these three aspects of god are given the names of Brahma, Vishnu and Rudra respectively. It is with such an "embodied" God that we can have any relationship as a part to the whole, as a servant to a master, as a beloved to the lover, as a son to a father and so on, that is, any kind of relationship short of identity.

There is an important side-effect of our equating our bodies with the cosmic bodies of God. The moment such an equation is made ever so vaguely or indefinitely, a sense of sacredness and of trust will arise in our own bodies. We will hesitate to pollute it or do anything with it any longer which may have the remote effect of affecting its sacredness as the property of God. A weaver may roughly handle the yarn and also the cloth made from it. If he is himself very much satisfied with the texture and recollects a gentleman who would like to have it, from the moment of that recollection and even though the cloth may still remain in the possession of the weaver, he will treat the cloth with great care as he has made a mental dedication of it to that gentleman. When the devotee therefore bathes, he will think that he is cleaning the house of God. When he dines, he will think that he is obeying the dictates of God. Such will be his attitude in every sphere of life. No action is needed or possible except for the bodies; and, when the bodies be-